Hare Raama Hare Raama Raama Raama Hare Hare ! Hare Krushna Hare Krushna Krushna Krushna Hare Hare !!



# Srimadh Bhaagavadham - Slokaas for Paaraayanam

श्रीमद् भागवतम्

अथ प्रथम स्कन्दः प्रथमो ऽध्याय :

स्कन्द- 01: अध्याय- 01

01 जन्माद्यस्य यतो ऽन्वयाद् इतरतश् चार्थेषु अभिज्ञः स्वराट्

तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत् सूरयः

तेजो वारि मृदाम् यथा विनिमयो यत्र त्रिसर्गो ऽमृषा

धाम्ना स्वेन सदा निरस्त कुहकम् सत्यम् परम् धीमहि

02 धर्मः प्रोज्झित कैत वो ऽत्र परमो निर्मत् सराणाम् सताम्

वेद्यम् वास्तवम् अत्र वस्तु शिवदम् ताप त्रयोन् मूलनम्

श्रीमद् भागवते महा मुनिकृते किम् वा परैर् ईश्वरः

सद्यो हृद्य व रुध्य ते ऽत्र कृतिभिः शुश् रूषुभिः तत् क्षणात्

03 निगम कल्पतरोर् गळितम् फलम्

शुक मुखाद् अमृत द्रव सम्युतम्

पिबत भागवतम् रसम् आलयम्

मुहुरहो रसिका भुवि भावुकाः

04 नैमिषे ऽनिमिष क्षेत्रे ऋशयः शौन कादयः

सत्रम् स्वर्गाय लोकाय सहस्र सम मासत

05 त एकदा तु मुनयः प्रातर् हुत हुताग्नयः

सत् कृतम् सूत मासीनम् पप्रच्छु रिद मादरात्

06 ऋषय ऊचुः

त्वया खलु पुराणानि सेति हासानि चानघ

आख्या तान् यप्य धीतानि धर्म शास्त्राणि यान्युत

07 यानि वेद विदाम् श्रेष्ठो भगवान् बाद रायणः

अन्ये च मुनयः सूत परावर विदो विदुः

08 वेत्थ त्वम् सौम्य तत् सर्वम् तत्त्वतस् तद् अनुग्रहात्

ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्य मप्युत

09 तत्र तत्राञ्जस् आयुष्मन् भवता यद् विनिश् चितम्

पुम्साम् एकान्त तः श्रेयः तन्नः शम्सितु मर्हसि

10 प्रायेण आल्पायुषः सभ्य कला वस्मिन् युगे जनाः

मन्दाः सुमन्द मतयो मन्द भाग्या ह्युपद् रुताः

11 भूरीणि भूरि कर्माणि श्रोतव्यानि विभागशः

अतः साधो ऽत्र यत् सारम् समुद् धृत्य मनीषया

ब्रूहि नः स्रद्द दानानाम् येनात्मा सम् प्रसीददति

12 सूत जानासि भद्रम् ते भगवान् सात्वताम् पतिः

देवक्याम् वसुदेवस्य जातो यस्य चिकीर्षया

13 तन्नः शुश्रूष माणानाम् अर्हस् यङ्गानु वर्णितुम्

यस् यावतारो भूता नाम् क्षेमाय च भवाय च

14 आपन्नः सम्सृतिम् घोराम् यन्नाम विवशो गृणन्

ततः सद्यो विमुच्येत यद् बिभेति स्वयम् भयम्

15 यत् पाद सम्श्रयाः सूत मुनयः प्रश मायनाः

सद्यः पुनन्ति उप स्पृष्टाः स्वर्धुन् यापो ऽनु सेवया

16 को वा भगवतस् तस्य पुण्य श्लोकेड्य कर्मणः

शुद्धि कामो न शृणु याद् यशः कलि मलापहम्

17 तस्य कर्माण् युदाराणि परिगी तानि सूरिभिः

ब्रूहि नः श्रद्द धानानाम् लीलया दधतः कलाः

18 अथाख्याहि हरेर् धीमन् अवतार कथाः शुभाः

लीला विदधतः स्वैरम् ईश्वरस् यात्म मायया

19 वयम् तु न वितृप्याम उत्तम श्लोक विक्रमे

यच् छृण्वताम् रसज्ञानाम् स्वादु स्वादु पदे पदे

20 कृतवान् किल वीर्यानि सह रामेण केशवः

अति मर्त्यानि भगवान् गूढः कपट मानुषः

21 कलिम् आगत माज्ञाय क्षेत्रे ऽस्मिन् वैष्णवे वयम्

आसीना दीर्घ सत्रेण कथायाम् सक्षणा हरेः

22 त्वम् नः सन्दर् शितो धात्रा दुस्तरम् निस्ति तीर् षताम्

कलिम् सत्त्व हरम् पुम्साम् कर्णधार इवार्णवम्

23 ब्रूहि योगेश्वरे कृष्णे ब्रह्मण्ये धर्म वर्मणि

स्वाम् काष्ठाम् अधुनोपेते धर्मः कम् शरणम् गतः

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

प्रथम स्कन्दे प्रथमो ऽध्याय ः॥

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ प्रथम स्कन्दः द्वितीयो ऽध्याय :

स्कन्द- 01: अध्याय- 02

01 व्यास उवाच

इति सम्प्रश्न सम्हृष्टो विप्राणाम् रौमहर्शणिः

प्रति पूज्य वचस् तेशाम् प्रवक्तुम् उप चक्रमे

02 सूत उवाच

यम् प्रव्रजन्तम् अनुपेतम् अपेत कृत्यम् द्वैपायनो विरह कातर आजुहाव

पुत्रेति तन्म यतया तरवो ऽभिनेदुः तम् सर्व भूत हृदयम् मुनि मान तोऽस्मि

03 यः स्वानु भावम् अखिल श्रुति सार मेकम् अध्यात्म दीपम् अति तितीर् षताम् तमो ऽन्धम्

सम्सारिणाम् करुणयाह पुराण गुह्यम् तम् व्यास सूनुम् उपयामि गुरुम् मुनीनाम्

04 नारायणम् नमस् कृत्य नरम् चैव नरोत्तमम्

देवीम् सरस्वतीम् व्यासम् ततो जय मुदीरयेत्

05 मुनयः साधु पृष्टो ऽहम् भवद्भिर् लोक मङ्गळम्

यत् कृतः कृष्ण सम्प्रश्नो येनात्मा सुप्रसी दति

06 स वै पुम्साम् परो धर्मो यतो भक्ति रधोक्षजे

अहै तुक्य प्रति हता ययात्मा सम्प्रसी दति

07 वासुदेवे भगवति भक्ति योगः प्रयोजितः

जनयत् याशु वैराग्यम् ज्ञानम् च यद हैतुकम्

08 धर्मः स्वनुष्ठितः पुम्साम् विष्वक्सेन कथासु यः

नोत् पादयेद् यदि रतिम् श्रम एव हि केवलम्

09 धर्मस्य ह्याप वर्ग्यस्य नार्थो ऽर्थायोप कल्पते

नार्थस्य धर्मै कान्तस्य कामो लाभाय हि स्मृतः

10 कामस्य नेन्द्रि यप्रीतिः लाभो जीवेत यावता

जीवस्य तत्त्व जिज्ञासा नार्थो यश्चेह कर्मभिः

11 वदन्ति तत् तत्त्व विदः तत्त्वम् यज्ज्ञान मद्वयम्

ब्रह्मेति परमात् मेति भगवान् इति शब्द् यते

12 तच् छ्रद्द धाना मुनयो ज्ञान वैराग्य युक्तया

पश्यन्त् यात्मनि चात्मानम् भक्त्या श्रुत गृही तया

13 अतः पुम्भिर् द्विज श्रेष्ठा वर्णाश्रम विभागशः

स्वनुष् ठितस्य धर्मस्य सम्सिद्धिर् हरि तोषणम्

14 तस्मा देकेन मनसा भगवान् सात्वताम् पतिः

श्रोतव्यः कीर्ति तव् यश्च ध्येयः पूज्यश् च नित् यदा

15 यद् अनुध्यासि ना युक्ताः कर्म ग्रन्थि निबन्धनम्

छिन्दन्ति को विदास् तस्य को न कुर्यात् कथा रतिम्

16 शुश्रूषोः श्रद्द धानस्य वासुदेव कथा रुचिः

स्यान् महत् सेवया विप्राः पुण्य तीर्थ निषेवणात्

17 शृण्वताम् स्वकथाम्ः कृष्णः पुण्य श्रवण कीर्तनः

हृद् यन्तः स्थो ह्यभद् राणि विधुनोति सुहृत् सताम्

18 नष्ट प्रायेषु अभद्रेषु नित्यम् भागवत सेवया

भगवत् युत्तम श्लोके भक्तिर् भवति नैष्ठिकी

19 तदा रजस् तमो भावाः काम लोभादयश् च ये

चेत एतै रना विद्धम् स्थितम् सत्त्वे प्रसीदति

20 एवम् प्रसन्न मनसो भगवद् भक्ति योगतः

भगवत् तत्त्व विज्ञानम् मुक्त सङ्गस्य जायते

21 भिद्यते हृदय ग्रन्थिः छिद्यन्ते सर्व सम्शयाः

क्षीयन्ते चास्य कर्माणि दृष्ट एवात्म नीश्वरे

22 अतो वै कवयो नित्यम् भक्तिम् परमया मुदा

वासुदेवे भगवति कुर्वन्ति आत्म प्रसादनीम्

23 सत्त्वम् रजस् तम इति प्रकृतेर् गुणास् तैः युक्तः परः पुरुष एक इहास्य धत्ते

स्थित् यादये हरि विरिञ्चि हरेति सम्ज्ञाः श्रेयाम्सि तत्र खलु सत्त्व तनोर् नृणाम् स्युः

24 पार्थिवाद् दारुणो धूमः तस्माद् अग्निस् त्रयी मयः

तम सस्तु रजस् तस्मात् सत्त्वम् यद् ब्रह्म दर्शनम्

25 भेजिरे मुनयो ऽथाग्रे भगवन्तम् अधोक्षजम्

सत्त्वम् विशुद्धम् क्षेमाय कल्पन्ते ये ऽनुतानिह

26 मुमुक्षवो घोर रूपान् हित्वा भूत पतीनथ

नारायण कलाः शान्ता भजन्ति ह्यन सूयवः

27 रजस् तमः प्रकृतयः सम शीला भजन्ति वै

पितृ भूत प्रजेशा दीन् श्रि यैश्वर्य प्रजेप् सवः

28 वासुदेव परा वेदा वासुदेव परा मखाः

वासुदेव परा योगा वासुदेव पराः क्रियाः

29 वासुदेव परम् ज्ञानम् वासुदेव परम् तपः

वासुदेव परो धर्मो वासुदेव परा गतिः

30 स एवेदम् ससर् जाग्रे भगवान् आत्म मायया

सद सद् रूपया चासौ गुण मय्या गुणो विभुः

31 तया विलसि तेष् वेषु गुणेषु गुणवा निव

अन्तः प्रविष्ट आभाति विज्ञानेन विजृम् भितः

32 यथा हयव हितो वह्निः दारुष् वेकः स्वयो निषु

नानेव भाति विश्वात्मा भूतेषु च तथा पुमान्

33 असौ गुणमयैर् भावैः भूत सूक्ष्मेन्द्रि यात्मभिः

स्वनिर् मितेषु निर्विष्टो भुङ्क्ते भूतेषु तद् गुणान्

34 भाव यत् येष सत्त्वेन लोकान् वै लोक भावनः

लीला वतारा नुरतो देव तिर्यङ् नरादिषु

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

प्रथम स्कन्दे द्वितीयो ऽध्याय ः||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ प्रथम स्कन्दः त्रुतीयो ऽध्याय ः

स्कन्द- 01: अध्याय- 03

01 सूत उवाच

जगृहे पौरुषम् रूपम् भगवान् महद् आदिभिः

सम्भूतम् षोडश कलम् आदौ लोक सिसृक्षया

02 यस्याम्भसि शया नस्य योग निद्राम् वितन् वतः

नाभि ह्रदाम्बुजा दासीद् ब्रह्मा विश्व सृजाम् पतिः

03 यस्या वयवसम् स्थानैः कल्पितो लोक विस्तरः

तद्वै भगवतो रूपम् विशुद्धम् सत्त्व मूर्जितम्

04 पश्यन्त् यदो रूपम् अदभ्र चक्षुषा सहस्र पादोरु भुजान नाद्भुतम्

सहस्र मूर्ध श्रवणाक्षि नासिकम् सहस्र मौल्यम् बर कुण्डलोल् ल सत्

05 एतन् नानाव ताराणाम् निधानम् बीज मव्ययम्

यस्याम् शाम्शेन सृज्यन्ते देव तिर्यङ् नरादयः

06 स एव प्रथमम् देवः कौमारम् सर्ग मास्थितः

चचार दुश् चरम् ब्रह्मा ब्रह्म चर्यम् अखण्डितम्

07 द्वितीयम् तु भवा यास्य रसा तल गताम् महीम्

उद्ध रिष्यन् उपा दत्त यज्ञेशः सौकरम् वपुः

08 तृतीयम् ऋषि सर्गम् च देवर्षित्वम् उपेत्य सः

तन्त्रम् सात्वत माचष्ट नैष् कर्म्यम् कर्मणाम् यतः

09 तुर्ये धर्म कला सर्गे नर नारायणा वृषी

भूत् वात्मोप शमो पेतम् अकरोद् दुश्चरम् तपः

10 पञ्चमः कपिलो नाम सिद्धेशः काल विप्लुतम्

प्रोवा चासुरये साङ्ख्यम् तत्त्व ग्राम विनिर्णयम्

11 षष्ठे अत्रेर पत्यत्वम् वृतः प्राप्तो ऽनसूयया

आन्वीक्षिकी मलर्काय प्रह्लादा दिभ्य ऊचिवान्

12 ततः सप्तम आकूत्याम् रुचेर् यज्ञो ऽभ्य जायत

स यामाद्यैः सुरगणैः अपात् स्वायम्भु वान्तरम्

13 अष्टमे मेरु देव्याम् तु नाभेर् जात उरुक्रमः

दर्शयन् वर्त्म धीराणाम् सर्वाश्रम नमस् कृतम्

14 ऋषिभिर् याचितो भेजे नवमम् पार्थिवम् वपुः

दुग् धेमाम् ओषधीर् विप्राः तेनायम् स उशत् तमः

15 रूपम् स जगृहे मात्स्यम् चाक्षुषो दधि सम्प्लवे

नाव्या रोप्य मही मय्याम् अपाद् वैवस्वतम् मनुम्

16 सुरा सुराणाम् उदधिम् मथ्नताम् मन्द राचलम्

दध्रे कमठ रूपेण पृष्ठ एकादशे विभुः

17 धान् वन्तरम् द्वाद शमम् त्रयो दशमम् एव च

अपाय यत् सुरान् अन्यान् मोहिन्या मोहयन् स्त्रिया

18 चतुर् दशम् नारसिम्हम् बिभ्रद् दैत् येन्द्र मूर्जितम्

ददार करजैर् वक्षसि एरकाम् कटकृद् यथा

19 पञ्च दशम् वामनकम् कृत्वा गाद् अध्वरम् बलेः

पद त्रयम् याच मानः प्रत् यादित्सुः त्रि विष्टपम्

20 अवतारे षोडशमे पश्यन् ब्रह्म द्रुहो नृपान्

त्रिः सप्त कृत्वः कुपितो निः क्षत्राम् अकरोन् महीम्

21 ततः सप्त दशे जातः सत्य वत्याम् परा शरात्

चक्रे वेदतरोः शाखा दृष्ट्वा पुम्सो ऽल्प मेधसः

22 नर देवत्वम् आपन्नः सुर कार्य चिकीर् षया

समुद्र निग्रहा दीनि चक्रे वीर्याण् यतः परम्

23 एकोन विम्शे विम्शतिमे वृष्णिषु प्राप्य जन्मनी

राम कृष्णा विति भुवो भगवान् अहरद् भरम्

24 ततः कलौ सम्प्र वृत्ते सम्मोहाय सुरद् विषाम्

बुद्धो नाम्नाञ् जनसुतः कीकटेषु भविष् यति

25 अथासौ युग सन्ध् यायाम् दस्यु प्रायेषु राजसु

जनिता विष्णु यशसो नाम्ना कल्किर् जगत् पतिः

26 अवतारा हि असङ्ख् येया हरेः सत्त्व निधेर् द्विजाः

यथा विदासिनः कुल्याः सरसः स्युः सहस्रशः

27 ऋषयो मनवो देवा मनु पुत्रा महौजसः

कलाः सर्वे हरेर् एव सप्रजा पतयः स्तताः

28 एते चाम्श कलाः पुम्सः कृष्णस्तु भगवान् स्वयम्

इन्द्रारि व्याकुलम् लोकम् मृड यन्ति युगे युगे

29 जन्म गुह्यम् भगवतो य एतत् प्रयतो नरः

सायम् प्रातर् गृणन् भक्त्या दुःख ग्रामाद् विमुच्यते

30 एतद् रूपम् भगवतो ह्य रूपस्य चिदात् मनः

माया गुणैः विरचितम् महदा दिभिर् आत्मनि

31 यथा नभसि मेघौघो रेणुर्वा पार्थिवो ऽनिले

एवम् द्रष्टरि दृश् यत्वम् आरोपितम् अबुद्धिभि:

32 अत: परम् यद् अव्यक्तम् अव्यूढ गुण व्यूहितम्

अदृष्टा श्रुत वस्तुत् वात् स जीवो यत् पुनर्भव:

33 यत्रे मे सद सद्रूपे प्रति षिद्धेस्व सम्विदा

अविद्यया आत्मनि कृते इति तद् ब्रह्म दर्शनम्

34 यद् येषो परता देवी माया वै शारदी मति:

सम्पन्न एवेति विदु: महिम्नि स्वे महीयते

35 एवम् जन्मानि कर्माणि ह्यकर्तु: अजनस् य च

वर्ण यन्ति स्म कवयो वेद गुह्यानि हृत् पते:

36 स वा इदम् विश्वम् अमोघ लील: सृजति अवत् यत्ति न सज्जते ऽस्मिन्

भूतेषु चान्तर् हित आत्म तन्त्र: षाड् वर्गिकम् जिघ्रति षड् गुणेश:

37 न चास्य कश्चित् निपुणेन धातु: अवैति जन्तु: कुमनीष ऊती:

नामानि रूपाणि मनोव चोभि: सन्तन् वतो नट चर्यामि वाज्ञ:

38 स वेद धातु: पदवीम् परस्य दुरन्त वीर्यस्य रथाङ्ग पाणे:

यो ऽमायया सन्त तयानु वृत्त्या भजेत तत् पाद सरोज गन्धम्

39 अथेह धन्या भगवन्त इत्थम् यद् वासुदेवे ऽखिल लोकनाथे

कुर्वन्ति सर्व् आत्मकम् आत्म भावम् न यत्र भूय: परि वर्त उग्र:

40 इदम् भागवतम् नाम पुराणम् ब्रह्म सम्मितम्

उत्तम श्लोक चरितम् चकार भगवान् ऋषि:

41 नि: श्रेयसाय लोकस्य धन्यम् स्वस् त्ययनम् महत्

तदिदम् ग्राहया मास सुतम् आत्म वताम् वरम्

42 सर्व वेदेति हासानाम् सारम् सारम् समुद् धृतम्

स तु सम्श्रावया मास महाराजम् परीक्षि तम्

43 प्रायोप विष्टम् गङ्गायाम् परीतम् परम ऋषिभि:

कृष्णे स्वधा मो पगते धर्म ज्ञानादिभि: सह

44 कलौ नष्ट दृशाम् एष पुराणार् को ऽधुनोदित:

तत्र कीर्त यतो विप्रा विप्रर्षेर् भूरि तेजस:

45 अहम् चाध्य गमम् तत्र निविष्ट: तद् अनुग्रहात्

सो ऽहम् व: श्राव यिष्यामि यथा धीतम् यथा मति

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

प्रथम स्कन्दे त्रुतीयो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ प्रथम स्कन्द: चतुर्थ्थो ऽध्याय :

स्कन्द- 01: अध्याय- 04

01 व्यास उवाच

इति ब्रुवाणम् सम्स्तूय मुनीनाम् दीर्घ सत्रिणाम्

वृद्ध: कुलपति: सूतम् बह्वृच: शौनको ऽब्रवीत्

02 शौनक उवाच

सूत सूत महा भाग वद नो वदताम् वर

कथाम् भागवतीम् पुण्याम् यदाह भगवाञ् छुक:

03 कस्मिन् युगे प्रवृत् तेयम् स्थाने वा केन हेतुना

कुत: सञ्चोदित: कृष्ण: कृतवान् सम्हिताम् मुनि:

04 तस्य पुत्रो महा योगी सम दृङ् निर्विकल्पक:

एकान्त मतिर् उन्निद्रो गूढो मूढ इवेयते

05 दृष्ट्वानु यान्तम् ऋषिम् आत्मज मप्य नग्नम् देव्यो ह्रिया परिदधु: न सुतस्य चित्रम्

तद् वीक्ष्य पृच्छति मुनौ जगदुस्त वास्ति स्त्री पुम्भिदा न तु सुतस्य विविक्त दृष्टे:

06 कथम् आलक्षितः पौरैः सम्प्राप्तः कुरु जाङ्गलान्

उन्मत्त मूक जडवद् विच रन्गज साह्वये

07 कथम् वा पाण्डवे यस्य राजर्षेर् मुनिना सह

सम्वादः सम भूत् तात यत् रैषा सात्वती श्रुतिः

08 स गो दोहन मात्रम् हि गृहेषु गृह मेधिनाम्

अवेक्षते महाभागः तीर्थी कुर्वम्स्त दाश्रमम्

09 अभिमन्यु सुतम् सूत प्राहुर् भागव तोत्तमम्

तस्य जन्म महाश् चर्यम् कर्माणि च गृणीहि नः

10 स सम्राट् कस्य वा हेतोः पाण्डूनाम् मान वर्धनः

प्रायोप विष्टो गङ्गायाम् अनाद् ऋत्या धिराट् श्रियम्

11 नमन्ति यत् पाद निकेतम् आत्मनः शिवाय हानीय धनानि शत्रवः

कथम् स वीरः श्रिय मङ्ग दुस्त् यजाम् युवैष तोत् स्रष्टुम् अहो सहासुभिः

12 शिवा य लोकस्य भवाय भूतये य उत्तम श्लोक परायणा जनाः

जीवन्ति नात्मार्थम् असौपर् आश्रयम् मुमोच निर्विद्य कुतः कळेवरम्

13 तत् सर्वम् नः समा चक्ष्व पृष्टो यदिह किन्चन

मन्ये त्वाम् विषये वाचाम् स्नातम् अन्यत्र छान्द सात्

14 सूत उवाच

द्वापरे समनु प्राप्ते तृतीये युग पर्यये

जातः पराशराद् योगी वासव्याम् कलया हरेः

15 स कदा चित् सरस्वत्या उपस्पृश्य जलम् शुचिः

विविक्त देश आसीन उदिते रवि मण्डले

16 परा वरज्ञः स ऋषिः कालेना व्यक्त रम्हसा

युग धर्म व्यतिकरम् प्राप्तम् भुवि युगे युगे

17 भौति कानाम् च भावानाम् शक्तिह् रासम् च तत् कृतम्

अश्रद्द धानान् निः सत्त्वान् दुर्मे धान् ह्रसि तायुषः

18 दुर् भगाम्श् च जनान् वीक्ष्य मुनिर् दिव्येन चक्षुषा

सर्व वर्णाश्र माणाम् यद् दध्यौ हितम् अमोघ दृक्

19 चातुर् होत्रम् कर्म शुद्धम् प्रजानाम् वीक्ष्य वैदिकम्

व्यदधाद् यज्ञ सन्तत्यै वेदमेकम् चतुर् विधम्

20 ऋग् यजुः साम अथर् वाख्या वेदाश् चत्वार उद्धृताः

इतिहास पुराणम् च पञ्चमो वेद उच्यते

21 तत्र रुग्वेद धरः पैलः सामगो जैमिनिः कविः

वैशम्पायन एवैको निष्णातो यजु षामुत

22 अथर्वाङ्गिर साम् आसीत् सुमन्तुर् दारुणो मुनिः

इतिहास पुराणानाम् पिता मे रोम हर्षणः

23 त एत ऋषयो वेदम् स्वम् स्वम् व्यस्यन् अनेकधा

शिष्यैः प्रशिष्यैः तच् छिष्यैः वेदास्ते शाखिनो ऽभवन्

24 त एव वेदा दुर् मेधैः धार्यन्ते पुरुषैर् यथा

एवम् चकार भगवान् व्यासः कृपण वत्सलः

25 स्त्री शूद्र द्विज बन्धूनाम् त्रयी न श्रुति गो चरा

कर्म श्रेयसि मूढानाम् श्रेय एवम् भवेदिह

इति भारत माख्यानम् कृपया मुनिना कृतम्

26 एवम् प्रवृत्त स्य सदा भूतानाम् श्रेयसि द्विजाः

सर्वात्म केनापि यदा नातुष् यद् हृदयम् ततः

27 नाति प्रसीदद् हृदयः सरस्वत्यास् तटे शुचौ

वितर्कयन् विविक्तस्थ इदम् प्रोवाच धर्म वित्

28 धृत व्रतेन हि मया छन्दाम्सि गुरवो ऽग्नयः

मानिता निर्व्य लीकेन गृहीतम् चानु शासनम्

29 भारत व्यपदे शेन ह्याम्नायार् थश्च दर्शितः

दृश्यते यत्र धर्मादि स्त्री शूद्रादि भिरप् युत

30 तथापि बत मे दैह्यो ह्यात्मा चै वात्मना विभुः

असम्पन्न इवा भाति ब्रह्म वर्चस्य सत्तमः

31 किम् वा भागवता धर्मा न प्रायेण निरूपिता:

प्रिया: परम हम्सानाम् त एव हयच्युत प्रिया:

32 तस् यैवम् खिलम् आत्मानम् मन्य मानस्य खिद् यत:

कृष्णस्य नारदो ऽभ्यागाद् आश्रमम् प्राग् उदा हृतम्

33 तम् अभिज्ञाय सहसा प्रत् युत्था यागतम् मुनि:

पूजया मास विधिवत् नारदम् सुर पूजितम्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

प्रथम स्कन्दे चतुर्थ्थो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ प्रथम स्कन्द: पञ्चमो ऽध्याय :

स्कन्द- 01: अध्याय- 05

01 सूत उवाच

अथ तम् सुखम् आसीन उपासीनम् बृहच् छ्रवा:

देवर्षि: प्राह विप्रर्षिम् वीणा पाणि: स्मयन् निव

02 नारद उवाच

पाराशर्य महा भाग भवत: कच्चिद् आत्मना

परितुष् यति शारीर आत्मा मानस एव वा

03 जिज्ञासितम् सु सम्पन्नम् अपि ते महद् अद्भुतम्

कृतवान् भारतम् यस्त्वम् सर्वार्थ परि बृम्हितम्

04 जिज्ञासितम् अधीतम् च यत् तत् ब्रह्म सनातनम्

अथापि शोचस् यात्मानम् अकृतार्थ इव प्रभो

05 व्यास उवाच

अस्त्येव मे सर्वमिदम् त्वयोक्तम् तथापि नात्मा परि तुष्यते मे

तन् मूलम् अव्यक्तम् अगाध बोधम् पृच् छामहे त्वात्म भवात्म भूतम्

06 स वै भवान् वेद समस्त गुह्यम् उपासितो यत् पुरुषः पुराणः

परा वरेशो मनसैव विश्वम् सृजत् यवत् यत्ति गुणैर् असङ्गः

07 त्वम् पर्यटन् अर्क इव त्रिलोकीम् अन्तश् चरो वायुर् इवात्म साक्षी

परावरे ब्रह्मणि धर्मतो व्रतैः स्नातस्य मे न्यून मलम् विचक्ष्व

08 श्री नारद उवाच

भवतान् उदित प्रायम् यशो भगवतो ऽमलम्

येनै वासौ न तुष्येत मन्ये तद् दर्शनम् खिलम्

09 यथा धर्माद यश् चार्थाः मुनि वर्यानु कीर्तिताः

न तथा वासु देवस्य महिमा ह्यनु वर्णितः

10 न यद् वचः चित्र पदम् हरेर् यशो जगत् पवित्रम् प्रगृणीत कर्हिचित्

तद् वायसम् तीर्थम् उशन्ति मानसा न यत्र हम्सा निर मन्त्यु शिक्षयाः

11 तद् वाग् विसर्गो जनताघ विप्लवो यस्मिन् प्रति श्लोकम् अबद्ध वत्यपि

नामान् यनन्तस्य यशो ऽङ्कि तानियत् शृण्वन्ति गायन्ति गृणन्ति साधवः

12 नैष् कर्म्यम् अप्यच्युत भाव वर्जितम् न शोभते ज्ञान मलम् निरञ्जनम्

कुतः पुन : शश् वद् अभद्र मीश्वरे न चार्पितम् कर्म यदप्य कारणम्

13 अथो महा भाग भवान् अमोघ दृक् षुचिश्रवाः सत्य रतो धृत व्रतः

उरुक्रमस्या अखिल बन्ध मुक्तये समाधि नानु स्मर तद् विचेष्टितम्

14 ततो ऽन्यथा किञ्चन यद् विवक्षतः पृथग् दृशस् तत् कृत रूप नामभिः

न कुत्र चित् क्वापि च दुः स्थिता मतिः लभेत वाता हत नौरिवास् पदम्

15 जुगुप्सि तम् धर्म कृते ऽनुशासतः स्वभाव रक्तस्य महान् व्यतिक्रमः

यद् वाक्यतो धर्म इतीतरः स्थितो न मन्यते तस्य निवारणम् जनः

16 विचक्षणो ऽस्यार्हति वेदितुम् विभोः अनन्त पारस्य निवृत्तितः सुखम्

प्रवर्त मानस्य गुणैर् अनात्मनः ततो भवान् दर्शय चेष्टितम् विभोः

17 त्यक्त्वा स्वधर्मम् चरणाम्बुजम् हरेः भजन् अपक्वो ऽथ पतेत् ततो यदि

यत्र क्ववा भद्रम् अभूद मुष्य किम् को वार्थ आप्तो ऽभजताम् स्वधर्मतः

18 तस् यैव हेतोः प्रयतेत कोविदो न लभ्यते यद् भ्रमताम् उपर्यधः

तल् लभ्यते दुः ख वद् अन्यतः सुखम् कालेन सर्वत्र गभीर रम्हसा

19 न वै जनो जातु कथञ्चना व्रजेत् मुकुन्द सेव्यन् यवद् अङ्ग सम् सृतिम्

स्मरन् मुकुन्दाङ्घ्र् युप गूहनम् पुनः विहातु मिच्छेत् नर सग्रहो यतः

20 इदम् हि विश्वम् भगवान् इवेतरो यतो जगत् स्थान निरोध सम्भवाः

तद्धि स्वयम् वेद भवाम्स् त थापि वै प्रादेश मात्रम् भवतः प्रदर् शितम्

21 त्वम् आत्मना आत्मानम् अवेहय मोघ दृक् परस्य पुम्सः परमात्मनः कलाम्

अजम् प्रजातम् जगतः शिवाय तत् महानु भावाभ् युदयो ऽधिगण् यताम्

22 इदम् हि पुम्सः तपसः श्रुतस्यवा स्विष्टस्य सूक्तस्य च बुद्धि दत्तयोः

अविच्युतो ऽर्थः कविभिर् निरूपितो यद् उत्तम श्लोक गुणानु वर्णनम्

23 अहम् पुरा तीत भवे ऽभवम् मुने दास्यास्तु कस्याश् चन वेद वादिनाम्

निरूपितो बालक एव योगिनाम् शुश्रूषणे प्रावृषि निर्वि विक्षताम्

24 ते मय्य पेता अखिल चापले ऽर्भके दान्ते ऽधृत क्रीडनके ऽनुवर्तिनि

चक्रुः कृपाम् यद्यपि तुल्य दर्शनाः शुश्रूष माणे मुनयो ऽल्प भाषिणि

25 उच्छिष्टले पान नुमोदि तो द्विजैः सकृत्स्म भुञ्जे तद् अपास्त किल्बिषः

एवम् प्रवृत् तस्य विशुद्ध चेतसः तद् धर्म एवात्म रुचिः प्रजायते

26 तत्रान् वहम् कृष्ण कथाः प्रगायताम् अनुग्रहेणा शृणवम् मनोहराः

ताः श्रद्धया मे ऽनुपदम् विशृण्वतः प्रिय श्रवस् यङ्ग ममा भवद् रुचिः

27 तस्मिम् स्तदा लब्ध रुचेर् महामुने प्रिय श्रवस्यस् खलिता मतिर् मम

ययाह मे तत् सद सत् स्व मायया पश्ये मयि ब्रह्मणि कल्पितम् परे

28 इत्थम् शरत् प्रावृषि कावृतू हरेः विशृण् वतो मे ऽनु सवम् यशो ऽमलम्

सङ्कीर्त्य मानम् मुनिभिर् महात् मभिः भक्तिः प्रवृत्ता आत्म रजस् तमो पहा

29 तस् यैवम् मे ऽनुरक्तस्य प्रश्रि तस्य हतै नसः

श्रद्द धानस्य बालस्य दान् तस् यानु चरस्य च

30 ज्ञानम् गुह्य तमम् यत् तत् साक्षाद् भगवतो दितम्

अन्ववोचन् गमिष् यन्तः कृपया दीन वत्सलाः

31 येनै वाहम् भगवतो वासुदेवस्य वेधसः

मायानु भावम् अविदम् येन गच् छन्ति तत् पदम्

32 एतत् सम्सूचितम् ब्रह्मन्ः ताप त्रय चिकित् सितम्

यद् ईश्वरे भगवति कर्म ब्रह्मणि भावितम्

33 आमयो यश्च भूतानाम् जायते येन सुव्रत

तद् एव ह्यामयम् द्रव्यम् न पुनाति चिकित् सितम्

34 एवम् नृणाम् क्रिया योगाः सर्वे सम्सृति हेतवः

त एवात्म विना शाय कल्पन्ते कल्पिताः परे

35 यद् अत्र क्रियते कर्म भगवत् परि तोषणम्

ज्ञानम् यत् तद् अधीनम् हि भक्ति योग समन्वितम्

36 कुर्वाणा यत्र कर्माणि भगवच् छिक्षया स कृत्

गृणन्ति गुण नामानि कृष्णस् यानु स्मरन्ति च

37 नमो भगवते तुभ्यम् वासुदेवाय धीमहि

प्रद्युम्नाय अनिरुद्धाय नमः सङ्कर्षणाय च

38 इति मूर्त् यभि धानेन मन्त्र मूर्तिम् अमूर्तिकम्

यजते यज्ञ पुरुषम् स सम्यग् दर्शनः पुमान्

39 इमम् स्व निगमम् ब्रह्मन् अवेत्य मद् अनुष्ठितम्

अदान् मे ज्ञानम् ऐश्वर्यम् स्वस्मिन् भावम् च केशवः

40 त्वमप् यद भ्रश्रुत विश्रुतम् विभोः समाप्यते येन विदाम् बुभुत् सितम्

आख्याहि दुः खैः मुहुर् अर्दित् आत्मनाम् सङ्क्लेश निर्वाणम् उशन्ति नान् यथा

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

प्रथम स्कन्दे पञ्चमो ऽध्याय ः||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ प्रथम स्कन्द: षष्टो ऽध्याय :

स्कन्द- *01:* अध्याय- *06*

*01* सूत उवाच

एवम् निशम्य भगवान् देवर्षेर् जन्म कर्म च

भूय: पप्रच्छ तम् ब्रह्मन् व्यास: सत्यवती सुत:

*02* व्यास उवाच

भिक्षुभिर् विप्र वसिते विज्ञाना देष्टृ भिस्तव

वर्त मानो वयस् याद्ये तत: किम करोद् भवान्

*03* स्वायम् भुव कया वृत्त्या वर्तितम् ते परम् वय:

कथम् चेदम् उदस् राक्षी: काले प्राप्ते कळेवरम्

*04* प्राक् कल्प विषया मेताम् स्मृतिम् ते सुर सत्तम

न ह्येष व्यवधात् काल एष सर्व निरा कृति:

*05* नारद उवाच

भिक्षुभिर् विप्र वसिते विज्ञाना देष्टृभिर् मम

वर्त मानो वयस् याद्ये तत एत दकारषम्

*06* एकात्मजा मे जननी योषिन् मूढा च किङ्करी

मय् यात्मजे ऽनन्य गतौ चक्रे स्नेहानु बन्धनम्

*07* सास्व तन्त्रा न कल्पासीद् योग क्षेमम् ममेच् छती

ईशस्य हि वशे लोको योषा दारुमयी यथा

*08* अहम् च तद् ब्रह्म कुले ऊषिवाम् स्तद् अपेक्षया

दिग् देश काला व्युत्पन्नो बालक: पञ्च हायन:

*09* एकदा निर्गताम् गेहाद् दुहन्तीम् निशि गाम् पथि

सर्पो ऽदशत् पदा स्पृष्टः कृपणाम् काल चोदितः

10 तदा तदह मीशस्य भक्तानाम् शम् अभीप्सतः

अनुग्रहम् मन्यमानः प्रातिष्ठम् दिश मुत्तराम्

11 स्फीतात्र् जनपदाम्स् तत्र पुरग्राम व्रजाकरान्

खेट खर्वट वाटीश् च वनानि युपवनानि च

12 चित्रधातु विचित् राद्रीन् इभ भग्न भुज द्रुमान्

जला शयात्र् छिव जलान् नळिनीः सुर सेविताः

13 चित्र स्वनैः पत्र रथैः विभ्रमद् भ्रमर श्रियः

नलवेणु शरस् तम्ब कुश कीचक गह् वरम्

14 एक एवाति यातो ऽहम् अद्राक्षम् विपिनम् महत्

घोरम् प्रति भया कारम् व्यालो लूक शिवाजिरम्

15 परिश् रान्तेन्द्रि यात्माहम् तृट् परीतो बुभुक् षितः

स्नात्वा पीत्वा ह्रदे नद्या उप स्पृष्टो गत श्रमः

16 तस्मिन् निर् मनुजेर् ऽरण्ये पिप्पलो पस्थ आस्थितः

आत्मन् आत्मानम् आत्मस्थम् यथा श्रुतम् अचिन्तयम्

17 ध्याय तश् चरणाम् भोजम् भाव निर्जित चेतसा

औत् कण्ठ्या श्रुक लाक्षस्य हृद्या सीन् मे शनैर् हरिः

18 प्रेमाति भर निर्भिन्न पुलकाङ्गो ऽति निर्वृतः

आनन्द सम्प्लवे लीनो नापश्यम् उभयम् मुने

19 रूपम् भगवतो यत्तत् मनः कान्तम् शुचापहम्

अपश्यन् सहसोत् तस्थे वैक्लव्याद् दुर्मना इव

20 दिदृक्षुः तद् अहम् भूयः प्रणिधाय मनो हृदि

वीक्ष माणो ऽपि नापश्यम् अवितृप्त इवातुरः

21 एवम् यतन्तम् विजने मामाहा गोचरो गिराम्

गम्भीरश् लक्ष्णया वाचा शुचः प्रशम यन्निव

22 हन्तास्मिन्त्र् जन्मनि भवान् मामाम् द्रष्टु मिहार् हति

अवि पक्व कषायाणाम् दुर् दर्शो ऽहम् कुयोगिनाम्

23 सकृद् यद् दर्शितम् रूपम् एतत् कामाय ते ऽनघ

मत्कामः शनकैः साधुः सर्वान् मुञ्चति हृच् छयान्

24 सत् सेवया अदीर्घया ते जाता मयि दृढा मतिः

हित्वा वद्यम् इमम् लोकम् गन्ता मज् जनता मसि

25 मतिर् मयि निबद् धेयम् न विपद् येत कर्हिचित्

प्रजा सर्ग निरोधे ऽपि स्मृतिश् च मद् अनुग्रहात्

26 एताव दुक्त्वो परराम तन् महद् भूतम् नभो लिङ्ग मलिङ्ग मीश्वरम्

अहम् च तस्मै महताम् महीयसे शीर्ष्णाव नामम् विदधे ऽनु कम्पितः

27 नामानि अनन्तस्य हतत्र पः पठन् गुह्यानि भद्राणि कृतानि च स्मरन्

गाम् पर्यटम् स्तुष्ट मना गतस् पृहः कालम् प्रतीक्षन् विमदो विमत्सरः

28 एवम् कृष्ण मतेर् ब्रह्मन् असक् तस्यामल् आत्मनः

कालः प्रादुर भूत् काले तडित् सौदामनी यथा

29 प्रयुज्य माने मयि ताम् शुद्धाम् भागवतीम् तनुम्

आरब्ध कर्म निर्वाणो न्यपतत् पाञ्च भौतिकः

30 कल्पान्त इद मादाय शयाने ऽम्भस् युदन् वतः

शिशयिषोः अनुप्राणम् विविशे ऽन्तरहम् विभोः

31 सहस्र युग पर्यन्ते उत्था येदम् सिसृक् षतः

मरीचि मिश्रा ऋषयः प्राणेभ्यो ऽहम् च जज्ञिरे

32 अन्तर् बहिश्च लोकाम् स्त्रीन् पर्येमि यस् कन्दित व्रतः

अनुग्रहान् महा विष्णोर् अवि घात गतिः क्वचित्

33 देव दत्ताम् इमाम् वीणाम् स्वर ब्रह्म विभूषिताम्

मूर्च्छ यित्वा हरि कथाम् गायमानः चराम्यहम्

34 प्रगा यतः स्व वीर्याणि तीर्थ पादः प्रिय श्रवाः

आहूत इव मे शीघ्रम् दर्शनम् याति चेतसि

35 एतद् ध्या तुर चित्तानाम् मात्रा स्पर्शेच् छया मुहुः

भव सिन्धु प्लवो दृष्टो हरि चर्यानु वर्णनम्

*36* यमा दिभिर् योग पथै: काम लोभ हतो मुहु:

मुकुन्द सेवया यद् वत् तथात् माद्धा न शाम्यति

*37* सर्वम् तद् इद माख्यातम् यत् पृष्टो ऽहम् त्वया नघ

जन्म कर्म रहस्यम् मे भवतश् चात्म तोषणम्

*38* सूत उवाच

एवम् सम्भाष्य भगवान् नारदो वासवी सुतम्

आमन्त्र्य वीणाम् रणयन् ययौ याद् ऋच्छिको मुनि:

*39* अहो देवर्षि: धन्यो ऽयम् यत् कीर्तिम् शार्ङ्ग धन्वन:

गायन् मादयन् निदम् तन्त्र्या रमयति यातुरम् जगत्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

प्रथम स्कन्दे षष्टो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ प्रथम स्कन्द: सप्तमो ऽध्याय :

स्कन्द- *01:* अध्याय- *07*

*01* शौनक उवाच

निर्गते नारदे सूत भगवान् बाद रायण:

श्रुत वाम्स् तद् अभिप्रेतम् तत: किमकरोद् विभु:

*02* सूत उवाच

ब्रह्मनद् याम् सरस्वत् याम् आश्रम: पश्चिमे तटे

शम्या प्रास इति प्रोक्त ऋषीणाम् सत्र वर्धन:

03 तस्मिन् स्व आश्रमे व्यासो बदरी षण्ड मण्डिते

आसीनो ऽप उपस्पृश्य प्रणि दध्यौ मनः स्वयम्

04 भक्ति योगेन मनसि सम्यक् प्रणिहि ते ऽमले

अपश्यत् पुरुषम् पूर्वम् मायाम् च तद पाश्रयम्

05 यया सम्मोहितो जीवः आत्मानम् त्रि गुणात्मकम्

परो ऽपि मनुते ऽनर्थम् तत् कृतम् चाभि पद्यते

06 अनर्थोप शमम् साक्षाद् भक्ति योगम् अधोक्षजे

लोकस् याजानतो विद्वान्ः चक्रे सात्वत सम्हिताम्

07 यस्याम् वै श्रूय माणायाम् कृष्णे परम पूरुषे

भक्ति रुत्पद् यते पुम्सः शोक मोह भया पहा

08 स सम्हिताम् भागवतीम् कृत्वा नुक्रम्य चात्मजम्

शुकम् अध्यापया मास निवृत्ति निरतम् मुनिः

09 शौनक उवाच

स वै निवृत्ति निरतः सर्वत्रो पेक्षको मुनिः

कस्य वा बृहतीम् एताम् आत्मा रामः समभ् यसत्

10 सूत उवाच

आत्मा रामाश् च मुनयो निर् ग्रन्था अप्यु रुक्रमे

कुर्वन्त् यहैतु कीम् भक्तिम् इत्थम् भूत गुणो हरिः

11 हरेर् गुणा क्षिप्त मतिः भगवान् बाद रायणिः

अध्यगान् महद् आख्यानम् नित्यम् विष्णु जनप्रियः

12 परीक्षितो ऽथ राजर्षेः जन्म कर्म विलापनम्

सम्स्थाम् च पाण्डु पुत्राणाम् वक्ष्ये कृष्ण कथोदयम्

13 यदा मृधे कौरव सृञ्ज यानाम् वीरेष् वथो वीर गतिम् गतेषु

वृकोदरा विद्ध गदाभि मर्श भग्नोरु दण्डे धृत राष्ट्र पुत्रे

14 भर्तुः प्रियम् द्रौणि रिति स्म पश्यन् कृष्णा सुतानाम् स्वपताम् शिराम्सि

उपाहरद् विप्रिय मेव तस्य जुगुप्सितम् कर्म विगर्ह यन्ति

15 माता शिशूनाम् निधनम् सुतानाम् निशम्य घोरम् परि तप्य माना

तदा रुदद् वाष्प कला कुलाक्षी ताम् सान्त्व यन्नाह किरीट माली

16 तदा शुचस्ते प्रमृ जामि भद्रे यद् ब्रह्म बन्धोः शिर आततायिनः

गाण्डीव मुक्तैः विशि खैर् उपाहरे त्वा क्रम्य यत् स्नास्यसि दग्ध पुत्रा

17 इति प्रियाम् वल्गु विचित्र जल्पैः स सान्त्व यित्वा अच्युत मित्र सूतः

अन्वा द्रवद् दम्शित उग्र धन्वा कपि ध्वजो गुरु पुत्रम् रथेन

18 तमाप तन्तम् स विलक्ष्य दूरात् कुमार होद् विग्न मना रथेन

परा द्रवत् प्राण परीप् सुरुर्व्याम् यावद् गमम् रुद्र भयाद् यथार्कः

19 यदा शरणम् आत्मानम् ऐक्षत श्रान्त वाजिनम्

अस्त्रम् ब्रह्म शिरो मेने आत्मत् राणम् द्विज् आत्मजः

20 अथोपस् पृश्य सलिलम् सन्दधे तत्स माहितः

अजानन् उप सम्हारम् प्राण कृच्छ्र उपस्थिते

21 ततः प्रादुष् कृतम् तेजः प्रचण्डम् सर्वतो दिशम्

प्राणा पदम् अभिप्रेक्ष्य विष्णुम् जिष्णुर् उवाच ह

22 अर्जुन उवाच

कृष्ण कृष्ण महाबाहो भक्तानाम् अभयङ्कर

त्वमेको दह्य मानानाम् अप वर्गो ऽसि सम्सृतेः

23 त्वम् आद्यः पुरुषः साक्षाद् ईश्वरः प्रकृतेः परः

मायाम् व्युदस्य चिच् छक्त्या कैवल्ये स्थित आत्मनि

24 स एव जीव लोकस्य माया मोहित चेतसः

विधत्से स्वेन वीर्येण श्रेयो धर्मादि लक्षणम्

25 तथायम् चाव तारस्ते भुवो भारजि हीर्षया

स्वानाम् चानन्य भावानाम् अनु ध्यानाय चास कृत्

26 किमिदम् स्वित् कुतो वेति देव देवा न वेद्म्यहम्

सर्वतो मुखम् आयाति तेजः परम दारुणम्

27 श्री भगवान् उवाच

वेत् थेदम् द्रोण पुत्रस्य ब्राहमम् अस्त्रम् प्रदर् शितम्

नैवासौ वेद सम्हारम् प्राण बाध उपस्थिते

28 न ह्यस्यान्य तमम् किञ्चिद् अस्त्रम् प्रत्यव कर्शनम्

ज ह्यस्त्र तेज उन्नद्धम् अस्त्रज्ञो ह्यस्त्र तेजसा

29 सूत उवाच

श्रुत्वा भगवता प्रोक्तम् फाल्गुनः पर वीरहा

स्पृष्ट्वा पस्तम् परिक्रम्य ब्राहमम् ब्राहमाय सन्दधे

30 सम्हत् यान्योन्यम् उभयोः तेजसी शरसम् वृते

आवृत्य रोदसी खम् च ववृ धाते ऽर्क वह्निवत्

31 दृष्ट्वा अस्त्र तेजस्तु तयोः त्रीन् लोकान् प्रदहन् महत्

दह्य मानाः प्रजाः सर्वाः साम् वर्तकम् अमम् सत

32 प्रजो पप्लवम् आलक्ष्य लोक व्यतिकरम् च तम्

मतम् च वासु देवस्य सञ्जहार् आर्जुनो द्वयम्

33 तत आसाद्य तरसा दारुणम् गौतमी सुतम्

बबन्धा मर्ष ताम् राक्षः पशुम् रशनया यथा

34 शिबिराय निनी षन्तम् दाम्ना बद्ध्वा रिपुम् बलात्

प्राह् आर्जुनम् प्रकु पितो भगवान् अम्बुजेक्षणः

35 मैनम् पार्थार् हसि त्रातुम् ब्रह्म बन्धुम् इमम् जहि

यो ऽसौ अनागसः सुप्तान् अवधीन् निशि बालकान्

36 मत्तम् प्रमत्तम् उन्मत्तम् सुप्तम् बालम् स्त्रियम् जडम्

प्रपन्नम् विरथम् भीतम् न रिपुम् हन्ति धर्म वित्

37 स्व प्राणान् यः परप्राणैः प्रपुष्णात् यघृणः खलः

तद् वधस् तस्य हि श्रेयो यद् दोषाद् यात् यधः पुमान्

38 प्रति श्रुतम् च भवता पाञ्चाल्यै शृण्वतो मम

आहरिष्ये शिरस् तस्य यस्ते मानिनि पुत्रहा

39 तदसौ वध्यताम् पाप आततायि आत्म बन्धुहा

भर्तुश् च विप्रियम् वीर कृतवान् कुल पाम्सनः

40 सूत उवाच

एवम् परीक्षता धर्मम् पार्थः कृष्णेन चोदितः

नैच्छद् हन्तुम् गुरु सुतम् यद्यप् यात् महनम् महान्

41 अथो पेत्य स्व शिबिरम् गोविन्द प्रिय सारथिः

न्य वेदयत् तम् प्रियायै शोचन्त्या आत्मजान् हतान्

42 तथा हृतम् पशु वत् पाश बद्धम् अवाङ् मुखम् कर्म जुगुप्सि तेन

निरीक्ष्य कृष्णाप कृतम् गुरोः सुतम् वाम स्वभावा कृपया ननाम च

43 उवाच चास हन्त्यस्य बन्धना नयनम् सती

मुच्यताम् मुच्यताम् एष ब्राहमणो नितराम् गुरुः

44 स रहस्यो धनुर् वेदः स विसर्गोप सम्यमः

अस्त्र ग्रामश् च भवता शिक्षितो यद् अनुग्रहात्

45 स एष भगवान् द्रोणः प्रजा रूपेण वर्तते

तस् यात्मनो ऽर्धम् पत्न् यास्ते नान्वगाद् वीरसूः कृपी

46 तद् धर्मज्ञ महा भाग भवद्भिः गौरवम् कुलम्

वृजिनम् नार्हति प्राप्तुम् पूज्यम् वन्द्यम् अभीक्ष्णशः

47 मा रोदी दस्य जननी गौतमी पति देवता

यथाहम् मृत वत् सार्ता रोदिम् यश्रु मुखी मुहुः

48 यैः कोपितम् ब्रहम कुलम् राजन्यै रजि तात्मभिः

तत् कुलम् प्रदहत् याशु सानु बन्धम् शुचार् पितम्

49 सूत उवाच

धर्म्यम् न्याय्यम् स करुणम् निर्व्य लीकम् समम् महत्

राजा धर्म सुतो राज्ञ्याः प्रत्य नन्दद् वचो द्विजाः

50 नकुलः सहदे वश्च युयुधानो धनञ्जयः

भगवान् देवकी पुत्रो ये चान्ये याश्च योषितः

51 तत् राहा मर्षितो भीमः तस्य श्रेयान् वधः स्मृतः

न भर्तुः नात् मनश् चार्थे यो ऽहन् सुप्तान् शिशून् वृथा

52 निशम्य भीम गदितम् द्रौपद् याश्च चतुर् भुजः

आलोक्य वदनम् सख्युः इदमाह हसन्निव

53 श्री कृष्ण उवाच

ब्रह्म बन्धुर् न हन्तव्य आततायी वधार् हणः

मयै वोभय माम् नातम् परिपाह् यनुशासनम्

54 कुरु प्रति श्रुतम् सत्यम् यत्तत् सान्त्व यता प्रियाम्

प्रियम् च भीम सेनस्य पाञ्चाल्या मह्यम् एव च

55 सूत उवाच

अर्जुनः सह साज्ञाय हरेर् हार्द मथासिना

मणिम् जहार मूर्धन्यम् द्विजस्य सह मूर्धजम्

56 विमुच्य रशना बद्धम् बाल हत्या हत प्रभम्

तेजसा मणिना हीनम् शिबिरान् निरया पयत्

57 वपनम् द्रविणा दानम् स्थानान् निर्यापणम् तथा

एष हि ब्रह्म बन्धूनाम् वधो नान्यो ऽस्ति दैहिकः

58 पुत्र शोका तुराः सर्वे पाण्डवाः सह कृष्णया

स्वानाम् मृतानाम् यत् कृत्यम् चक्रुर् निर्हरणादिकम्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

प्रथम स्कन्दे सप्तमो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ प्रथम स्कन्दः अष्टमो ऽध्याय :

स्कन्द- *01:* अध्याय- *08*

*01* सूत उवाच

अथ ते सम्परे तानाम् स्वाना मुद कमिच् छताम्

दातुम् स कृष्णा गङ्गायाम् पुरस् कृत्य ययुः स्त्रियः

*02* ते निनी योदकम् सर्वे विलप्य च भृशम् पुनः

आप्लुता हरि पादाब्ज रजः पूत सरिज्जले

*03* तत् रासीनम् कुरुपतिम् धृत राष्ट्रम् सहानुजम्

गान्धारीम् पुत्र शोकार्ताम् पृथाम् कृष्णाम् च माधवः

*04* सान्त्वया मास मुनिभिः हत बन्धूञ् शुचार्पि तान्

भूतेषु कालस्य गतिम् दर्श यन्न प्रति क्रियाम्

*05* साधयित्वा जात शत्रोः स्वम् राज्यम् कित वैर्हृतम्

घात यित्वा सतो राज्ञः कच स्पर्शक् षतायुषः

*06* याज यित्वाश्व मे धैस्तम् त्रिभिर् उत्तम कल्पकैः

तद् यशः पावनम् दिक्षु शत मन्योरि वातनोत्

*07* आमन्त्र्य पाण्डु पुत्राम्श् च शैनेयोद् धव सम्युतः

द्वैपाय नादिभिर् विप्रैः पूजितैः प्रति पूजितः

*08* गन्तुम् कृत मतिर् ब्रह्मन् द्वारकाम् रथ मास्थितः

उपलेभे ऽभिधा वन्तीम् उत्तराम् भय विह्वलाम्

*09* उत्तरो उवाच

पाहि पाहि महा योगिन् देव देव जगत् पते

नान्यम् त्वद् अभयम् पश्ये यत्र मृत्युः परस्परम्

*10* अभिद्र वति मामीश शरस्तप् ताय सो विभो

कामम् दहतुमाम् नाथ मा मे गर्भो निपात्य ताम्

*11* सूत उवाच

उपधार्य वचस् तस्याः भगवान् भक्त वत्सलः

अपाण्डव मिदम् कर्तुम् द्रौणेर् अस्त्रम् अबुध् यत

12 तद्दर्ये वाथ मुनि श्रेष्ठ पाण्डवाः पञ्च सायकान्

आत्मनो ऽभिमुखान् दीप्तान् आलक्ष्य अस्त्राण् युपा ददुः

13 व्यसनम् वीक्ष्य तत् तेषाम् अनन्य विषयात् मनाम्

सुदर्शनेन स्वास्त्रेण स्वानाम् रक्षाम् व्यधाद् विभुः

14 अन्तः स्थः सर्व भूतानाम् आत्मा योगेश्वरो हरिः

स्व मायया वृणोद् गर्भम् वैराट्याः कुरु तन्तवे

15 यद्यप् यस्त्रम् ब्रह्म शिरस्तु अमोघम् चाप्रति क्रियम्

वैष्णवम् तेज आसाद्य समशाम् यद् भृगूद् वह

16 मा मम्स्था हये तद् आश्चर्यम् सर्वाश् चर्य मये ऽच्युते

य इदम् मायया देव्या सृजत् यवति हन्त्यजः

17 ब्रह्म तेजो विनिर् मुक्तैः आत्मजैः सह कृष्णया

प्रयाणाभि मुखम् कृष्णम् इदमाह पृथा सती

18 कुन्ति उवाच

नमस्ये पुरुषम् त्वाद्यम् ईश्वरम् प्रकृतेः परम्

अलक्ष्यम् सर्व भूतानाम् अन्तर्बहिर वस्थितम्

19 मायाज वनिकाच् छन्नम् अज्ञा धोक्षज मव्ययम्

न लक्ष्यसे मूढ दृशा नटो नाट्य धरो यथा

20 तथा परम हम्सानाम् मुनीनाम् अमलात् मनाम्

भक्ति योग विधा नार्थम् कथम् पश्येम हि स्त्रियः

21 कृष्णाय वासुदेवाय देवकी नन्दनाय च

नन्दगोप कुमाराय गोविन्दाय नमो नमः

22 नमः पङ्कज नाभाय नमः पङ्कज मालिने

नमः पङ्कज नेत्राय नमस्ते पङ्कजाङ् घ्रये

23 यथा हृषीकेश खलेन देवकी कम्सेन रुद्धाति चिरम् शुचार् पिता

विमोचि ताहम् च सहात्मजा विभो त्वयैव नाथेन मुहुर् विपद् गणात्

24 विषान् महाग्नेः पुरुषाद दर्शनाद् असत् सभाया वनवास कृच्छ्रतः

मृधे मृधे ऽनेक महा रथास् त्रतो द्रौण् यस्त्र तश् चास्म हरे ऽभि रक्षिता:

25 विपद: सन्तु न: शश्वत् तत्र तत्र जगद् गुरो

भवतो दर्शनम् यत्स्याद् अपुनर्भव दर्शनम्

26 जन्मैश्वर्य श्रुत श्रीभि: एधमान मद: पुमान्

नैवार् हत्यभि धातुम् वै त्वाम् अकिञ्चन गोचरम्

27 नमो ऽकिञ्चन वित्ताय निवृत्त गुण वृत्तये

आत्मा रामाय शान्ताय कैवल्य पतये नम:

28 मन्ये त्वाम् कालम् ईशानम् अनादि निधनम् विभुम्

समम् चरन्तम् सर्वत्र भूतानाम् यन् मिथ: कलि:

29 न वेद कश्चिद् भगवम्श् चि कीर्षितम् तवेह मानस्य नृणाम् विडम्बनम्

न यस्य कश्चिद् दयितो ऽस्ति कर्हिचिद् द्वेष् यश्च यस्मिन् विषमा मतिर् नृणाम्

30 जन्म कर्म च विश्वात्मन् अजस्या कर्तुर् आत्मन:

तिर्यङ् न्रुषिषु सा याद: सु तदत् यन्त विडम्बनम्

31 गोप्या ददे त्वयि कृतागसि दाम तावद् या ते दशाश्रु कलि लाञ्जन सम्भ्र माक्षम्

वक्त्रम् निनीय भय भावन या स्थितस्य सा माम् विमोह यति भीरपि यद् बिभेति

32 केचिद् आहुरजम् जातम् पुण्य श्लोकस्य कीर्तये

यदो: प्रियस् यान्ववाये मलयस् येव चन्दनम्

33 अपरे वसुदेवस्य देवक्याम् याचितो ऽभ्यगात्

अजस् त्वम् अस्य क्षेमाय वधाय च सुरद् विषाम्

34 भाराव तारणा यान्ये भुवो नाव इवोदधौ

सीदन्त्या भूरि भारेण जातो ह्यात्म भुवार् थित:

35 भवे ऽस्मिन् क्लिश्य मानानाम् अविद्या काम कर्मभि:

श्रवण स्मरणार् हाणि करिष्यन् निति केचन

36 शृण्वन्ति गायन्ति गृणन्त् यभीक्ष्णश: स्मरन्ति नन्दन्ति तवेहितम् जना:

त एव पश्यन्त् यचिरेण तावकम् भव प्रवाहो परमम् पदाम्बुजम्

37 अप्यद् यनस् त्वम् स्वकृते हित प्रभो जिहाससि स्वित् सुहृदो ऽनु जीविन:

येषाम् न चान्यद् भवतः पदाम्बुजात् परायणम् राजसु योजिताम् हसाम्

38 के वयम् नाम रूपाभ्याम् यदुभिः सह पाण्डवाः

भवतो ऽदर्शनम् यर्हि हृषी काणामि वेशितुः

39 नेयम् शोभिष् यते तत्र यथे दानीम् गदाधर

त्वत् पदैर् अङ्किता भाति स्व लक्षण विलक्षितैः

40 इमे जनपदाः स्वृद्धाः सुपक् वौषधि वीरुधः

वनाद्रि नद् युदन् वन्तो ह्येधन्ते तव वीक्षि तैः

41 अथ विश्वेश विश्वात्मन् विश्व मूर्ते स्वकेषु मे

स्नेह पाशम् इमम् छिन्धि दृढम् पाण्डुषु वृष्णिषु

42 त्वयि मे ऽनन्य विषया मतिः मधुपते ऽसकृत्

रतिम् उद्वहता दद्धा गङ्गे वौघम् उदन् वति

43 श्री कृष्णा कृष्ण सखा वृष्नि ऋषभ अवनि ध्रुग् राजन्य वम्श दहन अनप वर्ग वीर्य

गोविन्दा गोद्विज सुरार्ति हराव तार योगेश्वरा अखिल गुरो भगवन् नमस्ते

44 सूत उवाच

पृथ येत्थम् कलपदैः परिणूता खिलोदयः

मन्दम् जहास वैकुण्ठो मोहयन् इव मायया

45 ताम् बाढमित् युपा मन्त्र्य प्रविश्य गज साह्वयम्

स्त्रि यश् च स्वपुरम् यास्यन् प्रेम्णा राज्ञा निवारितः

46 व्यासाद् यैर् ईश्वरे हाज्ञैः कृष्णेन् आद्भुत कर्मणा

प्रबोधितो ऽपीति हासैः नाबुध् यत शुचार् पितः

47 आह राजा धर्म सुतः चिन्तयन् सुहृदाम् वधम्

प्राकृतेन आत्मना विप्राः स्नेह मोह वशम् गतः

48 अहो मे पश्य ता ज्ञानम् हृदि रूढम् दुरात्मनः

पारक्यस् यैव देहस्य बह्व्यो मे ऽक्षौहिणीर् हताः

49 बाल द्विज सुहृन् मित्र पितृ भ्रातृ गुरु द्रुहः

न मे स्यान् निरयान् मोक्षो ह्यपि वर्षा युता युतैः

50 नैनो राज्ञ: प्रजा भर्तु: धर्म युद्धे वधो द्विषाम्

इति मे न तु बोधाय कल्पते शासनम् वच:

51 स्त्रीणाम् मद्धत बन्धूनाम् द्रोहो यो ऽसौ इहोत् थित:

कर्मभिर् गृहमे धीयै: नाहम् कल्पो व्यपो हितुम्

52 यथा पङ्केन पङ्काम्भ: सुरया वा सुरा कृतम्

भूत हत्याम् तथै वैकाम् न यज्ञैर् मार्ष्टु मर्हति

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

प्रथम स्कन्दे अष्टमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ प्रथम स्कन्द: नवमो ऽध्याय :

स्कन्द- 01: अध्याय- 09

01 सूत उवाच

इति भीत: प्रजा द्रोहात् सर्व धर्म विवित् सया

ततो विनशनम् प्रागाद् यत्र देव व्रतो ऽपतत्

02 तदा ते भ्रातर: सर्वे सदश्वै: स्वर्ण भूषितै:

अन्वगच् छन् रथैर् विप्रा व्यास धौम्याद यस् तथा

03 भगवान् अपि विप्रर्षे रथेन स धनञ्जय:

स तैर् व्यरोचत नृप: कुवेर इव गुह्यकै:

04 दृष्ट्वा निपतितम् भूमौ दिवश् च्युत मिवामरम्

प्रणेमु: पाण्डवा भीष्मम् सानुगा: सह चक्रिणा

05 तत्र ब्रह्मरुषय: सर्वे देव ऋषयश् च सत्तम

राज ऋषयश् च तत्रासन् द्रष्टुम् भरत पुङ्गवम्

06 पर्वतो नारदो धौम्यो भगवान् बादरायण:

बृह दश्वो भरद्वाज: सशिष्यो रेणुका सुत:

07 वसिष्ठ इन्द्र प्रमद: त्रितो गृत् समदो ऽसित:

कक्षीवान् गौतमो ऽत्रिश् च कौशिको ऽथ सुदर्शन:

08 अन्ये च मुनयो ब्रह्मन् ब्रह्म राता दयो ऽमला:

शिष्यै रुपेता आजग्मु: कश्यपाङ्गि रसादय:

09 तान् समेतान् महा भागान् उपलभ्य वसूत्तम:

पूजया मास धर्मज्ञो देश काल विभागवित्

10 कृष्णम् च तत् प्रभावज्ञ आसीनम् जगद् ईश्वरम्

हृदिस्थम् पूजया मास माययो पात्त विग्रहम्

11 पाण्डु पुत्रान् उपासीनान् प्रश्रय प्रेम सङ्गतान्

अभ्या चष्टानु रागाश्रैर् अन्धी भूतेन चक्षुषा

12 अहो कष्टम् अहो ऽन्याय्यम् यद् यूयम् धर्म नन्दना:

जीवितुम् नार्हथ क्लिष्टम् विप्र धर्मा ऽच्युत् आश्रया:

13 सम्स्थिते ऽतिरथे पाण्डौ पृथा बाल प्रजा वधू:

युष्मत् कृते बहून् क्लेशान् प्राप्ता तोक वती मुहु:

14 सर्वम् काल कृतम् मन्ये भवताम् च यद् अप्रियम्

सपालो यद् वशे लोको वायोरिव घनावळि:

15 यत्र धर्म सुतो राजा गदा पाणिर् वृकोदर:

कृष्णो ऽस्त्री गाण्डिवम् चापम् सुहृत् कृष्णस् ततो विपत्

16 न ह्यस्य कर्हिचिद् राजन् पुमान् वेद विधित् सितम्

यद् विजिज्ञास या युक्ता मुह्यन्ति कवयो ऽपि हि

17 तस्मा दिदम् दैव तन्त्रम् व्यवस्य भरत र्षभ

तस्यानु विहितो ऽनाथा नाथ पाहि प्रजा: प्रभो

18 एष वै भगवान् साक्षाद् आद्यो नारायण: पुमान्

मोहयन् मायया लोकम् गूढः चरति वृष्णिषु

19 अस्यानु भावम् भगवान् वेद गुह्यतमम् शिवः

देवर्षिः नारदः साक्षाद् भगवान् कपिलो नृप

20 यम् मन्यसे मातुलेयम् प्रियम् मित्रम् सुहृत् तमम्

अकरोः सचिवम् दूतम् सौहृदा दथ सारथिम्

21 सर्वात्मनः सम दृशो ह्यद् वयस् यान हङ्कृतेः

तत् कृतम् मति वैषम्यम् निर वद्यस्य न क्वचित्

22 तथाप् येकान्त भक्तेषु पश्य भूपानु कम्पितम्

यन्मे ऽसूम् स्त्यजतः साक्षात् कृष्णो दर्शन मागतः

23 भक्त्या वेश्य मनो यस्मिन् वाचा यन् नाम कीर्तयन्

त्यजन् कळेवरम् योगी मुच्यते काम कर्मभिः

24 स देव देवो भगवान् प्रतीक्ष ताम् कळेवरम् यावद् इदम् हिनोम्यहम्

प्रसन्न हासारुण लोचनोल् लसत् मुखाम्बुजो ध्यान पथश् चतुर् भुजः

25 सूत उवाच

युधिष्ठिरस् तदा कर्ण्य शयानम् शर पञ्जरे

अपृच्छद् विविधान् धर्मान् ऋषीणाम् चानु शृण्वताम्

26 पुरुष स्वभाव विहितान् यथा वर्णम् यथाश्रमम्

वैराग्य रागोपा धिभ्याम् आम्नातो भय लक्षणान्

27 दान धर्मान् राज धर्मान् मोक्ष धर्मान् विभागशः

स्त्री धर्मान् भगवद् धर्मान् समास व्यास योगतः

28 धर्मार्थ काम मोक्षाम्श् च सहोपायान् यथा मुने

नानाख्या नेति हासेषु वर्णया मास तत्त्व वित्

29 धर्मम् प्रवदतस् तस्य स कालः प्रत् युपस्थितः

यो योगिनश् छन्द मृत्योः वाञ्छि तस्तू उत्तरायणः

30 तदोप सम्हृत्य गिरः सहस्रणीः विमुक्त सङ्गम् मन आदि पूरुषे

कृष्णे लसत् पीत पटे चतुर् भुजे पुरः स्थिते ऽमीलित दृग्व्य धारयत्

31 विशुद्धया धारणया हता शुभः तदीक्ष यै वाशु गतायुध व्यथः

निवृत्त सर्वेन्द्रिय वृत्ति विभ्रमः तुष्टाव जन्यम् विसृजञ् जनार्दनम्

32 श्री भीष्म उवाच

इति मतिर् उप कल्पिता वितृष्णा भगवति सात्वत पुङ्गवे विभूम्नि

स्वसुख मुपगते क्वचिद् विहर्तुम् प्रकृति मुपेयुषि यद्भव प्रवाहः

33 त्रि भुवन कमनम् तमाल वर्णम् रवि कर गौरवर् आम्बरम् दधाने

वपुरल ककुला वृतान नाब्जम् विजय सखे रतिर् अस्तु मे ऽनवद्या

34 युधि तुर गरजो विधूम्र विष्वक् कच लुलित श्रम वार् यलङ्कृ तास्ये

मम निशित शरैः विभिद् यमान त्वचि विलसत् कवचे ऽस्तु कृष्ण आत्मा

35 सपदि सखि वचो निशम्य मध्ये निजपरयोर् बलयो रथम् निवेश्य

स्थित वति पर सैनिकायुः अक्ष्णा हृतवति पार्थ सखे रतिर् ममास्तु

36 व्यवहित पृतना मुखम् निरीक्ष्य स्वजन वधाद् विमुखस्य दोष बुद्ध्या

कुमति महरद् आत्म विद्ययायः चरण रतिः परमस्य तस्य मे ऽस्तु

37 स्व निगम मपहाय मत् प्रतिज्ञाम् ऋतमधि कर्तुम् अवप्लुतो रथस्थः

धृत रथ चरणो ऽभ्ययाच् चलद्गुः हरि रिव हन्तुमिभम् गतोत्त रीयः

38 शित विशि खहतो विशीर्ण दम्शः क्षतज परिप्लुत आततायिनो मे

प्रसभम् अभिससार मद्व धार्थम् स भवतु मे भगवान् गतिर् मुकुन्दः

39 विजय रथ कुटुम्ब आत्त तोत्रे धृत हयरश्मिनि तच्छ्रि येक्षणीये

भगवति रतिरस्तु मे मुमूर्षोः यमिह निरीक्ष्य हता गताः स्वरूपम्

40 ललित गति विलास वल्गुहास प्रणय निरीक्षण कल्पितोरु मानाः

कृत मनु कृत वत्य उन्मदान्धाः प्रकृति मगन् किल यस्य गोप वध्वः

41 मुनिगण नृपवर्य सङ्कुले ऽन्तः सदसि युधिष्ठिर राज सूय एषाम्

अर्हणम् उपपेद ईक्षणीयो मम दृशि गोचर एष आविरात्मा

42 तम् इमम् अहमजम् शरीर भाजाम् हृदि हृदि धिष्ठितम् आत्म कल्पितानाम्

प्रति दृशमिव नैकधार्क मेकम् समधि गतो ऽस्मि विधूत भेद मोहः

43 सूत उवाच

कृष्ण एवम् भगवति मनोवाग् दृष्टि वृत्तिभि:

आत्मन् यात्मान मावेश्य सो ऽन्त: श्वास उपारमत्

44 सम्पद्य मान माज्ञाय भीष्मम् ब्रह्मणि निष्कले

सर्वे बभू वुस्ते तूष्णीम् वयाम्सीव दिनात्यये

45 तत्र दुन्दुभयो नेदु: देव मानव वादिता:

शशम्सु: साधवो राज्ञाम् खात् पेतु: पुष्प वृष्टय:

46 तस्य निर्हरणा दीनि सम्परे तस्य भार्गव

युधिष्ठिर: कार यित्वा मुहूर्तम् दु: खितो ऽभवत्

47 तुष्टुवुर् मुनयो हृष्टा: कृष्णम् तद् गुह्यना मभि:

ततस्ते कृष्ण हृदया: स्वाश्रमान् प्रययु: पुन:

48 ततो युधिष्ठिरो गत्वा सह कृष्णो गजाह् वयम्

पितरम् सान्त्वया मास गान्धारीम् च तपस् विनीम्

49 पित्रा चानु मतो राजा वासुदेवानु मोदित:

चकार राज्यम् धर्मेण पितृ पैतामहम् विभु:

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

प्रथम स्कन्दे नवमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ प्रथम स्कन्द: दशमो ऽध्याय :

स्कन्द- 01: अध्याय- 10

01 शौनक उवाच

हत्वा स्वरिक्थ स्पृध आततायिनो युधिष्ठिरो धर्म भृताम् वरिष्ठ:

सहानुजैः प्रत्यव रुद्ध भोजनः कथम् प्रवृत्तः किमकार षीत् ततः

02 सूत उवाच

वम्शम् कुरोर् वम्श दवाग्नि निर्हृतम् सम्रोह यित्वा भव भावनो हरिः

निवेश यित्वा निज राज्य ईश्वरो युधिष्ठिरम् प्रीतमना बभूव ह

03 निशम्य भीष्मोक्तम् अथाच्यु तोक्तम् प्रवृत्त विज्ञान विधूत विभ्रमः

शशास गाम् इन्द्र इवाजित् आश्रयः परिध् युपान्ताम् अनुजानु वर्तितः

04 कामम् ववर्ष पर्जन्यः सर्व काम दुघा मही

सिषिचुः स्म व्रजान् गावः पयसोधस् वतीर् मुदा

05 नद्यः समुद्रा गिरयः सवनस् पति वीरुधः

फलन्त्यो षधयः सर्वाः काम मन्वृतु तस्य वै

06 नाधयो व्याधयः क्लेशा दैव भूतात्म हेतवः

अजात शत्रौ अभवन् जन्तूनाम् राज्ञि कर्हिचित्

07 उषित्वा हास्तिन पुरे मासान् कतिपयान् हरिः

सुहृदाम् च विशोकाय स्वसुश् च प्रिय काम्यया

08 आमन्त्र्य चाभ् यनुज्ञातः परिष् वज्याभ् इवाद्य तम्

आरुरोह रथम् कैश्चित् परिष् वक्तो ऽभि वादितः

09 सुभद्रा द्रौपदी कुन्ती विराट तनया तथा

गान्धारी धृत राष्ट्रश् च युयुत्सुर् गौतमो यमौ

10 वृको दरश् च धौम्यश् च स्त्रियो मत्स्य सुतादयः

न सेहिरे विमुह् यन्तो विरहम् शार्ङ्ग धन्वनः

11 सत् सङ्गान् मुक्त दुः सङ्गो हातुम् नोत् सहते बुधः

कीर्त्य मानम् यशो यस्य सकृदा कर्ण्य रोचनम्

12 तस्मिन् न्यस्त धियः पार्थाः सहेरन् विरहम् कथम्

दर्शन स्पर्श सम्लाप शयनासन भोजनैः

13 सर्वे ते ऽनिमिषै रक्षैः तम् अनुद्रुत चेतसः

वीक्षन्तः स्नेह सम्बद्धा विचेलुः तत्र तत्र ह

14 न्यरुन्धन् उद्गलद् बाष्पम् औत् कण्ठ्याद् देवकी सुते

निर्यात्य गारान् नो ऽभद्रम् इति स्याद् बान्धव स्त्रियः

15 मृदङ्ग शङ्ख भेर्यश् च वीणा पणव गोमुखाः

धुन्धुर् यानक घण्टाद्या नेदुर् दुन्दु भयस् तथा

16 प्रासाद शिखरा रूढाः कुरुनार्यो दिदृक् षया

ववृषुः कुसुमैः कृष्णम् प्रेम व्रीडास्मि तेक्षणाः

17 सितात पत्रम् जग्राह मुक्तादाम विभूषितम्

रत्न दण्डम् गुडाकेशः प्रिय : प्रिय तमस्य ह

18 उद्धवः सात्यकिश् चैव व्यजने परम अद्भुते

विकीर्य माणः कुसुमै रेजे मधु पति : पथि

19 अश्रूयन् ताशिषः सत्याः तत्र तत्र द्विजे रिताः

नानु रूपानु रूपाश् च निर्गुणस्य गुणात्मनः

20 अन्योन्य मासीत् सञ्जल्प उत्तम श्लोक चेतसाम्

कौर वेन्द्र पुर स्त्रीणाम् सर्व श्रुति मनोहरः

21 स वै किलायम् पुरुषः पुरातनो य एक आसीद् अविशेष आत्मनि

अग्रे गुणेभ्यो जगदात्मन् ईश्वरे निमीलि तात्मन् निशि सुप्त शक्तिषु

22 स एव भूयो निज वीर्य चोदिताम् स्वजीव मायाम् प्रकृतिम् सिसृक् षतीम्

अनाम रूप आत्मनि रूप नामनी विधित् समानो ऽनुस सार शास्त्र कृत्

23 स वा अयम् यत्पद मत्र सूरयो जितेन्द्रिया निर्जित मातरिश् वनः

पश्यन्ति भक्त्युत् कलितामल् आत्मना नन्वेष सत्त्वम् परिमार्ष्टु मर्हति

24 स वा अयम् सख् यनुगीत सत् कथो वेदेषु गुह्येषु च गुह्य वादिभिः

य एक ईशो जगद् आत्म लीलया सृजत्य वत् यत्ति न तत्र सज्जते

25 यदा ह्य धर्मेण तमोधियो नृपा जीवन्ति तत्रैष हि सत्त्व तः किल

धत्ते भगम् सत्य मृतम् दयाम् यशो भवाय रूपाणि दधद् युगे युगे

26 अहो अलम् श्लाघ्य तमम् यदोः कुलम् अहो अलम् पुण्य तमम् मधोर् वनम्

यदेष पुम्साम् ऋषभः श्रियः पतिः स्व जन्मना चङ्क्रमणेन चात्र् चति

27 अहो बत स्वर् यशसस् तिरस् करी कुशस् थली पुण्य यशस् करी भुवः

पश्यन्ति नित्यम् यद् अनुग्र हेषितम् स्मिताव लोकम् स्वपतिम् स्म यत् प्रजाः

28 नूनम् व्रत स्नान हुता दिनेश् वरः समर्चितो ह्यस्य गृहीत पाणिभिः

पिबन्ति याः सख्य धरा मृतम् मुहुः व्रज स्त्रियः सम् मुमुहुर् यदा शयाः

29 या वीर्य शुल्केन हृताः स्वयम्वरे प्रमथ्य चैद्य प्रमुखान्हि शुष्मिणः

प्रद्युम्न साम्बाम्ब सुता दयो ऽपरा याश्चा हृता भौम वधे सहस्रशः

30 एताः परम् स्त्री त्वम् अपास्त पेशलम् निरस्त शौचम् बत साधु कुर्वते

या साम् गृहात् पुष्कर लोचन : पतिः न जात्व पैत्या हृतिभिर् हृदि स्पृशन्

31 एवम् विधा गदन् तीनाम् स गिरः पुरयो षिताम्

निरीक्षणेना भिनन्दन् सस्मि तेन ययौ हरिः

32 अजात शत्रुः पृतनाम् गोपी थाय मधुद् विषः

परेभ्यः शङ्कितः स्नेहात् प्रायुङ्क्त चतुर् अङ्गिणीम्

33 अथ दूरा गतान् शौरिः कौरवान् विरहा तुरान्

सन्नि वर्त्य दृढम् स्निग्धान् प्रायात् स्व नगरीम् प्रियैः

34 कुरु जाङ्गल पाञ्चालान् शूर सेनान् सयामुनान्

ब्रह्मा वर्तम् कुरुक्षेत्रम् मत्स्यान् सारस्वतान् अथ

35 मरुधन्व मतिक्रम्य सौवीरा भीरयोः परान्

आनर्तान् भार्गवो पागात् छ्रान्त वाहो मनाग् विभुः

36 तत्र तत्र ह तत्रत् यैः हरिः प्रत्युद्य तार्हणः

सायम् भेजे दिशम् पश्चाद् गविष्ठो गाम् गतस् तदा

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

प्रथम स्कन्दे दशमो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ प्रथम स्कन्दः एका दशो ऽध्याय :

स्कन्द- 01: अध्याय- 11

01 सूत उवाच

आनर्तान् स उपव्रज्य स्वृद्धाञ् जन पदान् स्वकान्

दध्मौ दरवरम् तेषाम् विषादम् शम यन्निव

02 स उच्च काशे धवलो दरो दरो ऽपि उरुक्रमस्या धर शोण शोणिमा

दाध् मायमानः कर कञ्ज सम्पुटे यथाब्ज षण्डे कलहम्स उत्स्वनः

03 तमुप श्रुत्य निनदम् जगद् भय भयावहम्

प्रत् युद् ययुः प्रजाः सर्वा भर्तृ दर्शन लालसाः

04 तत्रोप नीत बलयो रवेर् दीपम् इवा दृताः

आत्मा रामम् पूर्ण कामम् निज लाभेन नित् यदा

05 प्रीत् युत्फुल्ल मुखाः प्रोचुः हर्ष गद्गद या गिरा

पितरम् सर्व सुहृदम् अवितार मिवार् भकाः

06 नताः स्म ते नाथ सदाङ्घ्रि पङ्कजम् विरिञ्च वैरिञ्च्य सुरेन्द्र वन्दितम्

परायणम् क्षेम मिहेच्छ ताम् परम् न यत्र कालः प्रभवेत् परः प्रभुः

07 भवाय नस्त्वम् भव विश्व भावन त्वमेव माता थ सुहृत् पतिः पिता

त्वम् सद् गुरुर्नः परमम् च दैवतम् यस्यानु वृत्त्या कृतिनो बभू विम

08 अहो सनाथा भवता स्म यद् वयम् त्रै विष्ट पानाम् अपि दूर दर्शनम्

प्रेम स्मित स्निग्ध निरीक्ष णाननम् पश्येम रूपम् तव सर्व सौभगम्

09 यर्ह् यम्बुजाक्षा पससार भो भवान् कुरून् मधून् वाथ सुहृद्दि दृक्षया

तत् राब्द कोटि प्रतिमः क्षणो भवेद् रविम् विनाक्ष्णोर् इव नस्त वाच्युत

11 इति चो दीरि ता वाचः प्रजानाम् भक्त वत्सलः

शृण्वानो ऽनुग्रहम् दृष्ट्या वितन्वन् प्रावि शत् पुरीम्

12 मधु भोज दशार् हार्ह कुकु रान्धक वृष्णिभिः

आत्म तुल्य बलैर् गुप्ताम् नागैर् भोगवती मिव

13 सर्वर्तु सर्व विभव पुण्य वृक्ष लता श्रमैः

उद्यानो पवना रामैः वृत पद्मा करश्रियम्

14 गोपुर द्वार मार्गेषु कृत कौतुक तोरणाम्

चित्र ध्वज पता काग्रैः अन्तः प्रति हता तपाम्

15 सम् मार्जित महा मार्ग रथ्या पणक चत् वराम्

सिक्ताम् गन्धजलै रुप्ताम् फल पुष्पाक्ष ताङ्कुरैः

16 द्वारि द्वारि गृहाणाम् च दध् यक्षत फलेक्षुभिः

अलङ्कृताम् पूर्ण कुम्भैः बलिभिर् धूप दीपकैः

17 निशम्य प्रेष्ठ मायान्तम् वसुदेवो महामनाः

अक्रूरश् चोग्रसेनश् च रामश् चाद्भुत विक्रमः

18 प्रद्युम्नश् चारु देष्णश् च साम्बो जाम्बवती सुतः

प्रहर्ष वेगोच्छ्र शित शयनासन भोजनाः

19 वारणेन्द्रम् पुरस् कृत्य ब्राह्मणैः स सुमङ्गलैः

शङ्ख तूर्य निनादेन ब्रह्म घोषेण चाद् ऋताः

प्रत्युज् जग्मू रथैर् हृष्टाः प्रणया गत साध्वसाः

20 वार मुख्याश् च शतशो यानैस् तद् दर्शनोत् सुकाः

लसत् कुण्डल निर्भात कपोल वदन श्रियः

21 नट नर्तक गन्धर्वाः सूत मागध वन्दिनः

गायन्ति चोत्तम श्लोक चरितानि अद्भुतानि च

22 भगवाम्स् तत्र बन्धूनाम् पौराणाम् अनु वर्तिनाम्

यथा विध् युप सङ्गम्य सर्वेषाम् मानमा दधे

23 प्रह्वाभि वादना श्लेष कर स्पर्श स्मितेक्षणैः

आश्वास्य चाश्व पाकेभ्यो वरैश् चाभि मतैर् विभुः

24 स्वयम् च गुरुभिर् विप्रैः सदारैः स्थविरै रपि

आशीर् भिर् युज्य मानो ऽन्यैः वन्दि भिश्चावि शत् पुरम्

25 राज मार्गम् गते कृष्णे द्वारकायाः कुल स्त्रियः

हर्म्याण्या रुरुहुर् विप्र तद् ईक्षण महोत्सवाः

26 नित्यम् निरीक्ष माणानाम् यद् अपि द्वार कौ कसाम्

नैव तृप्यन्ति हि दृशः श्रियो धामाङ्गम् अच्युतम्

27 श्रियो निवासो यस्योरः पान पात्रम् मुखम् दृशाम्

बाहवो लोक पालानाम् सारङ्गाणाम् पदाम् बुजम्

28 सितात पत्र व्यजनैर् उपस्कृतः प्रसून वर्षैर् अभि वर्षितः पथि

पिशङ्ग वासा वन मालया बभौ घनो यथार् कोडुप चापवै द्युतैः

29 प्रविष् टस्तु गृहम् पित्रोः परिष् वक्तः स्वमात् ऋभिः

ववन्दे शिरसा सप्त देवकी प्रमुखा मुदा

30 ताः पुत्रम् अङ्कम् आरोप्य स्नेहस् नुत पयोधराः

हर्ष विह्वलित् आत्मानः सिषिचुर् नेत्र् जैर् जलैः

31 अथावि शत् स्व भवनम् सर्व कामम् अनुत्तमम्

प्रासादा यत्र पत्नी नाम् सहस्राणि च षोडश

32 पत्न्यः पतिम् प्रोष्य गृहानु पागतम् विलोक्य सञ्जात मनो महोत्सवाः

उत्तस्थु रारात् सहसा स नाशयात् साकम् व्रतैर् व्रीडित लोचना ननाः

33 तम् आत्मजैर् दृष्टिभिर् अन्तर् आत्मना दुरन्त भावाः परि रेभिरे पतिम्

निरुद्धम् अप्यास्रवद् अम्बु नेत्रयोः विलज्ज तीनाम् भृगु वर्य वैक्लवात्

34 यद् यप्यसौ पार्श्व गतो रहो गतः तथापि तस् याङ्घ्रि युगम् नवम् नवम्

पदे पदे का विरमेत तत् पदात् चलापि यच् छ्रीर्न जहाति कर्हिचित्

35 एवम् नृपाणाम् क्षिति भार जन्मनाम् अक्षौहिणीभिः परि वृत्त तेजसाम्

विधाय वैरम् श्वसनो यथा नलम् मिथो वधेनो परतो निरायुधः

36 स एष नरलोके ऽस्मिन् अव तीर्णः स्व मायया

रेमे स्त्री रत्न कूटस्थो भगवान् प्राकृतो यथा

37 उद्दाम भाव पिशुनामल वल्गुहास

व्रीडाव लोक निहतो मदनो ऽपि यासाम्

सम् मुहय चापम् अजहात् प्रम दोत्त मास्ता

यस् येन्द्रियम् विम थितुम् कुह कैर्न शेकु:

38 तमयम् मन्यते लोको हयसङ्गम् अपि सङ्गिनम्

आत्मौपम् येन मनुजम् व्यापृण् वानम् यतो ऽबुध:

39 एतदी शनम् ईशस्य प्रकृतिस्थो ऽपि तद् गुणै:

न युज्यते सदात्म स्थै: यथा बुद्धिस् तद् आश्रया

40 तम् मेनिरे ऽबला मूढा: स्त्रैणम् चानु व्रतम् रह:

अप्रमाण विदो भर्तु: ईश्वरम् मतयो यथा

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

प्रथम स्कन्दे एका दशो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ प्रथम स्कन्द: द्वा दशो ऽध्याय :

स्कन्द- 01: अध्याय- 12

01 शौनक उवाच

अश्वत्थाम् नोप सृष्टेन ब्रहम शीर्ष्णो रुतेजसा

उत्तराया हतो गर्भ ईशेना जीवित: पुन:

02 तस्य जन्म महा बुद्धे: कर्माणि च महात् मन:

निधनम् च यथै वासीत् स प्रेत्य गतवान् यथा

03 तदिदम् श्रोतु मिच्छामो गदितुम् यदि मन्यसे

ब्रूहि न: श्रद्द धानानाम् यस्य ज्ञानम् अदाच्छुक:

04 सूत उवाच

अपी पलद् धर्म राजः पितृवद् रञ्जयन् प्रजाः

निः स्पृहः सर्व कामेभ्यः कृष्ण पादाब्ज सेवया

05 सम्पदः क्रतवो लोका महिषी भ्रातरो मही

जम्बू द्वीपाधि पत्यम् च यशश् च त्रिदिवम् गतम्

06 किम् ते कामाः सुरस् पार्हा मुकुन्द मनसो द्विजाः

अधि जह्रुर् मुदम् राज्ञः क्षुधि तस्य यथेतरे

07 मातुर् गर्भ गतो वीरः स तदा भृगु नन्दन

द दर्श पुरुषम् कञ्चिद् दह्य मानो ऽस्त्र तेजसा

08 अङ्गुष्ठ मात्रम् अमलम् स्फुरत् पुरट मौलिनम्

अपीच्य दर्शनम् श्यामम् तडिद्वास सम् अच्युतम्

09 श्रीमद् दीर्घ चतुर्बाहुम् तप्त काञ्चन कुण्डलम्

क्षत जाक्षम् गदा पाणिम् आत्मनः सर्वतो दिशम्

परि भ्रमन्त मुल्काभाम् भ्राम यन्तम् गदाम् मुहुः

10 अस्त्र तेजः स्व गदया नीहार मिव गोपतिः

विध मन्तम् सन्नि कर्षे पर्यैक्षत क इत्यसौ

11 विधूय तदमे यात्मा भगवान् धर्म गुब्विभुः

मिषतो दश मासस्य तत्रै वान् तर्दधे हरिः

12 ततः सर्व गुणो दर्के सानुकूल ग्रहोदये

जज्ञे वम्शधरः पाण्डोः भूयः पाण्डुर् इवौजसा

13 तस्य प्रीत मना राजा विप्रैर् धौम्य कृपा दिभिः

जातकम् कारया मास वाच यित्वा च मङ्गळम्

14 हिरण्यम् गाम् महीम् ग्रामान् हस्त्यश् वान् नृपतिर् वरान्

प्रादात् स्वन्नम् च विप्रेभ्यः प्रजा तीर्थे स तीर्थ वित्

15 तमूचुर् ब्राह्मणास् तुष्टा राजानम् प्रश्रयान् वितम्

एष ह्यस्मिन् प्रजा तन्तौ पुरूणाम् पौर वर्षभ

16 दैवेना प्रति घातेन शुक्ले सम्स्थामुपे युषि

रातोवो ऽनुग्रह आर्थाय विष्णुना प्रभ विष्णुना

17 तस्मान् नाम्ना विष्णु रात इति लोके ब्रुहच् छ्रवा

भविश्यति न सन्देहो महा भागवतो महान्

18 श्री युदिष्ठिर उवाच

अप्येष वम्श्यान् राजरुषीन् पुण्य श्लोकान् महात्मनः

अनु वर्तिता स्विद्य शसा साधु वादेन सत्तमाः

19 ब्राह्मणा ऊचुः

पार्थ प्रजा विता साक्षाद् इक्ष्वाकु रिव मानवः

ब्रह्मण्यः सत्य सन्धश् च रामो दाश रथिर् यथा

20 एष दाता शरण् यश् च यथा ह्यौशी नरः शिबिः

यशो वित निता स्वानाम् दौष्यन्ति रिव यज्वनाम्

21 धन्विनाम् अग्रणी रेष तुल्यश् चार्जुन योर्द्वयोः

हुताश इव दुर् धर्षः समुद्र इव दुस्तरः

22 मृगेन्द्र इव विक्रान्तो निषेव्यो हिमवान् इव

तितिक्षुर् वसुधेवासौ सहिष्णुः पितरा विव

23 पिता मह समः साम्ये प्रसादे गिरि शोपमः

आश्रयः सर्व भूतानाम् यथा देवो रमाश्रयः

24 सर्व सद्गुण माहात्म्ये एष कृष्ण मनु व्रतः

रन्ति देव इवोदारो ययातिर् इव धार्मिकः

25 द्रुत्या बलि समः कृष्णे प्रह्लाद इव सद् ग्रहः

आहर् तैषो ऽश्व मेधानाम् वृद् धानाम् पर् युपासकः

26 राजर् षीणाम् जनयिता शास्ता चोत्पथ गामिनाम्

निग्र हीता कलेरेष भुवो धर्मस्य कारणात्

27 तक्षकाद् आत्मनो मृत्युम् द्विज पुत्रोप सर्जितात्

प्रपत् स्यत उप श्रुत्य मुक्त सङ्गः पदम् हरेः

28 जिज्ञासि तात्म याथात्म्यो मुनेर् व्यास सुता दसौ

हित् वेदम् नृप गङ्गायाम् यास् यति अद्धा कुतोभयम्

29 इति राज्ञ उपादिश्य विप्रा जातक कोविदा:

लब्धा प चितय: सर्वे प्रति जग्मु: स्वकान् गृहान्

30 स एष लोके विख्यात: परीक्षिद् इति यत् प्रभु:

गर्भे दृष्ट मनु ध्यायन् परीक्षेत् अनरेष् विह

31 स राज पुत्रो ववृधे आशु शुक्ल इवोडुप:

आपूर्य माण: पितृभि: काष्ठा भिरिव सो ऽन्वहम्

32 यक्ष्य माणो ऽश्वमेधेन ज्ञाति द्रोह जिहासया

राजा लब्ध धनो दध्यौ अन्यत्र कर दण्डयो:

33 तद् अभिप्रेत मालक्ष्य भ्रातरो ऽच्युत चोदिता:

धनम् प्रहीण माजह्रु: उदीच्याम् दिशि भूरिश:

34 तेन सम्भृत सम्भारो धर्म पुत्रो युधिष्ठिर:

वाजि मेधै स्त्रिभिर् भीतो यज्ञै: समय जद् हरिम्

35 आहूतो भगवान् राज्ञा याज यित्वा द्विजैर् नृपम्

उवास कति चिन्मासान् सुहृदाम् प्रिय काम्यया

36 ततो राज्ञाभ् यनुज्ञात: कृष्णया सह बन्धुभि:

ययौ द्वार वतीम् ब्रह्मन् सार्जुनो यदुभिर् वृत:

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

प्रथम स्कन्दे द्वा दशो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ प्रथम स्कन्द: त्रयो दशो ऽध्याय :

*01* सूत उवाच

विदुरस् तीर्थ यात्रायाम् मैत्रेयाद् आत्मनो गतिम्

ज्ञात्वा गाद् हास्तिन पुरम् तया वाप्त विवित्सित:

*02* यावत: कृतवान् प्रश्नान् क्षत्ता कौषार वाग्रत:

जातैक भक्तिर् गोविन्दे तेभ्यश् चोप रराम ह

*03* तम् बन्धु मागतम् दृष्ट्वा धर्म पुत्र: सहानुज:

धृत राष्ट्रो युयुत् सुश् च सूत: शारद् वत: पृथा

*04* गान्धारी द्रौपदी ब्रह्मन् सुभद्रा चोत्तरा कृपी

अन्याश् च जामय: पाण्डो: ज्ञातय: स सुता: स्त्रिय:

*05* प्रत्युज् जग्मु: प्रहर्षेण प्राणम् तन्व इवागतम्

अभि सङ्गम्य विधिवत् परिष् वङ्गाभि वादनै:

*06* मुमुचु: प्रेम बाष् पौघम् विरह् औत्कण्ठ्य कातरा:

राजा तम् अर्हयाम् चक्रे कृतासन परिग्रहम्

*07* तम् भुक्त वन्तम् विश्रान्तम् आसीनम् सुखमासने

प्रश्रया वनतो राजा प्राह तेषाम् च शृण्वताम्

*08* युधिष्ठिर उवाच

अपि स्मरथ नो युष्मत् पक्षच् छाया समेधितान्

विपद् गणाद् विषाग् न्यादे: मोचिता यत् समातृका:

*09* कया वृत्त्या वर्तितम्व: चरद्भि: क्षिति मण्डलम्

तीर्थानि क्षेत्र मुख्यानि सेविता नीह भूतले

*10* भवद् विधा भागवता: तीर्थ भूता: स्वयम् विभो

तीर्थी कुर्वन्ति तीर्थानि स्वान्त: स्थेन गदा भृता

*11* अपि न: सुहृदस् तात बान्धवा: कृष्ण देवता:

दृष्टा: श्रुता वा यदव: स्वपुर्याम् सुख मासते

*12* इत् युक्तो धर्म राजेन सर्वम् तत् सम वर्णयत्

यथानु भूतम् क्रमशो विना यदु कुल क्षयम्

13 नन्व प्रियम् दुर् विषहम् नृणाम् स्वयम् उपस्थितम्

ना वेद यत्स करुणो दु: खितान् द्रष्टु मक्षम:

14 कञ्चित् कालम् अथावात् सीत् सत् कृतो देव वत्सुखम्

भ्रातु: ज्येष्ठस्य श्रेयस् कृत् सर्वेषाम् प्रीति मावहन्

15 अबिभ्र दर्यमा दण्डम् यथावद् अघ कारिषु

यावद् दधार शूद् रत्वम् शापाद् वर्ष शतम् यम:

16 युधिष्ठिरो लब्ध राज्यो दृष्ट्वा पौत्रम् कुलन् धरम्

भ्रातृभि: लोक पालाभै: मुमुदे परया श्रिया

17 एवम् गृहेषु सक्तानाम् प्रमत् तानाम् तदी हया

अत्य क्रामद् अविज्ञात: काल: परम दुस्तर:

18 विदुरस् तद् अभिप्रेत्य धृत राष्ट्रम् अभाषत

राजन् निर्गम् यताम् शीघ्रम् पश्येदम् भय मागतम्

19 प्रति क्रिया न यस्येह कुतश्चित् कर्हिचित् प्रभो

स एव भगवान् काल: सर्वेषाम् न: समागत:

20 येन चैवाभि पन्नो ऽयम् प्राणै: प्रियत मैरपि

जन: सद्यो वियुज्येत किमुतान् यैर् धनादिभि:

21 पितृ भ्रातृ सुहृत् पुत्रा हतास्ते विगतम् वय:

आत्मा च जरया ग्रस्त: परगेह मुपाससे

23 अहो महीयसी जन्तो: जीविताशा यथा भवान्

भीमाप वर्जितम् पिण्डम् आदत्ते गृह पालवत्

24 अग्निर् निसृष्टो दत् तश्च गरो दाराश् च दूषिता:

हृतम् क्षेत्रम् धनम् येषाम् तद् दत्तै: असुभि: कियत्

25 तस्यापि तव देहो ऽयम् कृपणस्य जिजीविषो:

परैत्य निच्छतो जीर्णो जरया वाससी इव

26 गत स्वार्थम् इमम् देहम् विरक्तो मुक्त बन्धन:

अविज्ञात गतिर् जह्यात् स वै धीर उदाहृतः

27 यः स्वकात् परतो वेह जात निर्वेद आत्मवान्

हृदि कृत्वा हरिम् गेहात् प्रव्रजेत् स नरोत्तमः

28 अथो दीचीम् दिशम् यातु स्वैर् अज्ञात गतिर् भवान्

इतो ऽर्वाक् प्रायशः कालः पुम्साम् गुण विकर्षणः

29 एवम् राजा विदुरे णानु जेन प्रज्ञा चक्षुः बोधित आजमीढः

छित्त्वा स्वेषु स्नेह पाशान् द्रढिम्नो निश् चक्राम भ्रातृ सन्दर्शित् आध्वा

30 पतिम् प्रयान्तम् सुबलस्य पुत्री पति व्रता चानु जगाम साध्वी

हिमालयम् न्यस्त दण्ड प्रहर्षम् मनस् विनाम् इव सत् सम्प्रहारः

31 अजात शत्रुः कृत मैत्रो हुताग्निः विप्रान् नत्वा तिलगो भूमि रुक्मैः

गृहम् प्रविष्टो गुरु वन्दनाय नचा पश्यत् पितरौ सौबलीम् च

32 तत्र सञ्जयम् आसीनम् पप्रच्छोद् विग्न मानसः

गावल्गणे क्व नस् तातो वृद्धो ही नश् च नेत्रयोः

33 अम्बा च हत पुत्रार्ता पितृव्यः क्व गतः सुहृत्

अपि मय् यकृत प्रज्ञे हत बन्धुः स भार्यया

आशम्स मानः शमलम् गङ्गायाम् दुः खितो ऽपतत्

34 पितर् युपरते पाण्डौ सर्वान्नः सुहृदः शिशून्

अरक्षताम् व्यसनतः पितृव्यौ क्व गतावितः

35 सूत उवाच

कृपया स्नेह वैक्लव् यात् सूतो विरह कर्शितः

आत्मेश् वरम् अचक्षाणो न प्रत्या हाति पीडितः

36 विमृज्या श्रूणि पाणिभ्याम् विष्टभ् यात्मान मात्मना

अजात शत्रुम् प्रत्यूचे प्रभोः पादव् अनुस्मरन्

37 सञ्जय उवाच

नाहम् वेद व्यवसितम् पित्रोर्वः कुल नन्दन

गान्धार्या वा महाबाहो मुषितो ऽस्मि महात् मभिः

38 अथाज गाम भगवान् नारदः सह तुम्बुरुः

प्रत् युत्थाया भिवाद् याह सानुजो ऽभ्यर्चयन् निव

39 युधिष्ठिर उवाच

नाहम् वेद गतिम् पित्रोः भगवन् क्व गता वितः

अम्बा वा हत पुत्रार्ता क्व गता च तपस् विनी

40 कर्ण धार इवापारे भगवान् पार दर्शकः

अथा बभाषे भगवान् नारदो मुनि सत्तमः

41 नारद उवाच

मा कञ्चन शुचो राजन् यदीश्वर वशम् जगत्

लोकाः सपाला यस्येमे वहन्ति बलि मीशितुः

ससम्यु नक्ति भूतानि स एव वियु नक्ति च

42 यथा गावो नसि प्रोताः तन्त्याम् बद्धाः स्वदा मभिः

वाक् तन्त्याम् नामभिर् बद्धा वहन्ति बलि मीशितुः

43 यथा क्रीडो पस्कराणाम् सम्योग विगमाविह

इच्छया क्रीडितुः स्याताम् तथै वेशेच् छया नृणाम्

44 यन्मन्यसे ध्रुवम् लोकम् अध्रुवम् वान चोभयम्

सर्वथा न हि शोच् यास्ते स्नेहाद् अन्यत्र मोहजात्

45 तस्माज् जह्यङ्ग वैक्लव्यम् अज्ञान कृतम् आत्मनः

कथम् त्वनाथाः कृपणा वर्ते रम्स्ते च माम् विना

46 काल कर्म गुणा धीनो देहो ऽयम् पाञ्च भौतिकः

कथम् अन्याम्स्तु गोपायेत् सर्प ग्रस्तो यथा परम्

47 अहस्तानि सहस् तानाम् अपदानि चतुष् पदाम्

फल्गूनि तत्र महताम् जीवो जीवस्य जीवनम्

48 तदिदम् भगवान् राजन् एक आत्मात् मनाम् स्वदृक्

अन्तरो ऽनन्तरो भाति पश्य तम् माय योरुधा

49 सो ऽयमद्य महाराज भगवान् भूत भावनः

काल रूपो ऽवतीर्णो ऽस्याम् अभा वाय सुरद् विषाम्

50 निष् पादितम् देव कृत्यम् अवशेषम् प्रतीक्षते

तावद् यूयम् अवेक्षध्वम् भवेद् यावदि हेश्वरः

51 धृत राष्ट्रः सह भ्रात्रा गान्धार्या च स्व भार्यया

दक्षिणेन हिमवत ऋषीणाम् आश्रमम् गतः

52 स्रोतोभिः सप्त भिर्या वै स्वर्धुनी सप्तधा व्यधात्

सप्तानाम् प्रीत ये नाना सप्त स्रोतः प्रचक्षते

53 स्नात्वानु सवनम् तस्मिन् हुत्वा चाग्नीन् यथा विधि

अब्भक्ष उपशान्त् आत्मा स आस्ते विगतै षणः

54 जितासनो जितश् वासः प्रत्या हृत षड् इन्द्रियः

हरि भावनया ध्वस्त रजः सत्त्व तमोमलः

55 विज्ञान् आत्मनि सम्योज्य क्षेत्रज्ञे प्रविलाप्य तम्

ब्रह्मण् यात्मान माधारे घटाम्बर मिवाम्बरे

56 ध्वस्त माया गुणो दर्को निरुद्ध करणा शयः

निवर्तिता अखिला हार आस्ते स्थाणु रिवाचलः

तस्यान्त रायो मैवाभूः सन्न्यस्त् आखिल कर्मणः

57 स वा अद्यत नाद् राजन् परतः पञ्चमे ऽहनि

कळेवरम् हास्यति स्वम् तच्च भस्मी भविष्यति

58 दह्य माने ऽग्नि भिर् देहे पत्युः पत्नी सहोटजे

बहिः स्थिता पतिम् साध्वी तम् अग्निम् अनु वेक्ष् यति

59 विदुरस्तु तद् आश्चर्यम् निशाम्य कुरु नन्दन

हर्ष शोक युतस् तस्माद् गन्ता तीर्थ निषेवकः

60 इत्युक्त्वा थारुहत् स्वर्गम् नारदः सह तुम्बुरुः

युधिष्ठिरो वचस् तस्य हृदि कृत्वा जहाच् छुचः

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

प्रथम स्कन्दे त्रयो दशो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ प्रथम स्कन्दः चतुर् दशो ऽध्याय :

स्कन्द- 01: अध्याय- 14

01 सूत उवाच

सम् प्रस्थिते द्वारका याम् जिष्णौ बन्धु दिदृक्षया

ज्ञातुम् च पुण्य श्लोकस्य कृष्णस्य च विचेष्टि तम्

02 व्यतीताः कति चिन्मासाः तदा न आयात् ततो ऽर्जुनः

ददर्श घोर रूपाणि निमित्तानि कुरूद् वहः

03 कालस्य च गतिम् रौद्राम् विपर्यस् तर्तु धर्मिणः

पापी यसीम् नृणाम् वार्ताम् क्रोध लोभा नृत् आत्मनाम्

04 जिह्म प्रायम् व्यव हृतम् शाठ्य मिश्रम् च सौहृदम्

पितृ मातृ सुहृद् भ्रातृ दम्पतीनाम् च कल्कनम्

05 निमित्तान् यत् यरिष्टानि काले त्वनु गते नृणाम्

लोभाद्य धर्म प्रकृतिम् दृष्ट्वो वाचा नुजम् नृपः

06 युधिष्ठिर उवाच

सम् प्रेषितो द्वारका याम् जिष्णुर् बन्धु दिदृक्षया

ज्ञातुम् च पुण्य श्लोकस्य कृष्णस्य च विचेष्टि तम्

07 गताः सप्ताधु ना मासा भीमसेन तवानुजः

नायाति कस्य वा हेतोः नाहम् वेदेद मञ्जसा

08 अपि देवर्षिणा दिष्टः स कालो ऽयम् उपस्थितः

यद् आत्मनो ऽङ्गमा क्रीडम् भगवान् उत्सि सृक्षति

09 यस्मान् नः सम्पदो राज्यम् दाराः प्राणाः कुलम् प्रजाः

आसन्स पत्न विजयो लोकाश् च यद् अनुग्रहात्

10 पश्योत् पातान् नर व्याघ्र दिव्यान् भौमान् स दैहिकान्

दारुणान् शम्सतो ऽदूराद् भयम् नो बुद्धि मोहनम्

11 ऊर्वक्षि बाहवो मह्यम् स्फुरन्त् यङ्ग पुनः पुनः

वेपथुश् चापि हृदये आराद् दास् यन्ति विप्रियम्

12 शिवै षोद् यन्तम् आदित्यम् अभि रौत्यन लानना

मा मङ्ग सारमेयो ऽयम् अभिरे भत्य भीरुवत्

13 शस्ताः कुर्वन्ति माम् सव्यम् दक्षिणम् पशवो ऽपरे

वाहाम्श् च पुरुष व्याघ्र लक्षये रुदतो मम

14 मृत्यु दूतः कपोतो ऽयम् उलूकः कम्प यन्मनः

प्रत्यु लूकश् च कुह्वानैः अनिद्रौ शून्यमिच् छतः

15 धूम्रा दिशः परिधयः कम्पते भूः सहा द्रिभिः

निर्घा तश् च महाम्स् तात साकम् च स्तन यित् नुभिः

16 वायुर् वाति खरस् पर्शो रजसा विसृजम्स् तमः

असृग् वर्षन्ति जलदा बीभत्स मिव सर्वतः

17 सूर्यम् हत प्रभम् पश्य ग्रह मर्दम् मिथो दिवि

ससङ्कुलैर् भूत गणैर् ज्वलिते इव रोदसी

18 नद्यो नदाश् च क्षुभिताः सराम्सि च मनाम्सि च

न ज्वलत् यग्नि राज्येन कालो ऽयम् किम् विधास् यति

19 न पिबन्ति स्तनम् वत्सा न दुह्यन्ति च मातरः

रुदन्त् यश्रु मुखा गावो न हृष्यन्ति ऋषभा व्रजे

20 दैवतानि रुदन् तीव स्विद् यन्ति ह्युच्च लन्ति च

इमे जनपदा ग्रामाः पुरोद्या नाकर् आश्रमाः

भ्रष्ट श्रियो निरा नन्दाः किमघम् दर्श यन्ति नः

21 मन्य एतैर् महोत् पातैः नूनम् भगवतः पदैः

अनन्य पुरुष श्रीभिः हीना भूर्हत सौभगा

22 इति चिन्त यतस् तस्य दृष्टा रिष्टेन चेतसा

राज्ञः प्रत्याग मद् ब्रह्मन् यदु पुर्याः कपि ध्वजः

23 तम् पाद योर्नि पतितम् अयथा पूर्व मातुरम्

अधो वदनम् अब्बिन्दून् सृजन्तम् नयनाब्जयोः

24 विलोक् योद् विग्न हृदयो विच्छायम् अनुजम् नृपः

पृच् छति स्म सुहृन् मध्ये सम्स्मरन् नारदे रितम्

25 युधिष्ठिर उवाच

कच्चिद् आनर्त पुर्याम् नः स्वजनाः सुख मासते

मधु भोज दशार् हार्ह सात्वतान् धक वृष्णयः

26 शूरो माता महः कच्चित् स्वस् त्यास्ते वाथ मारिषः

मातुलः सानुजः कच्चित् कुशल् यानक दुन्दुभिः

27 सप्त स्वसारः तत् पत्न्यो मातु लान्यः सहात्मजाः

आसते सस्नुषाः क्षेमम् देवकी प्रमुखाः स्वयम्

28 कच्चिद् राजा हुको जीवति असत् पुत्रो ऽस्य चानुजः

हृदीकः ससुतो ऽक्रूरो जयन्त गद सारणाः

29 आसते कुशलम् कच्चिद् ये च शत्रु जिदादयः

कच्चिद् आस्ते सुखम् रामो भगवान् सात्वताम् प्रभुः

30 प्रद्युम्नः सर्व वृष्णी नाम् सुख मास्ते महारथः

गम्भीर रयो ऽनिरुद्धो वर्धते भगवानुत

31 सुषेणश् चारु देष्णश् च साम्बो जाम्बवती सुतः

अन्ये च कार्ष्णि प्रवराः सपुत्रा ऋषभा दयः

32 तथै वानु चराः शौरेः श्रुतदे वोद्धवा दयः

सुनन्द नन्द शीर् षण्या ये चान्ये सात्व तर्षभाः

33 अपि स्वस्त्या सते सर्वे राम कृष्ण भुज आश्रयाः

अपि स्मरन्ति कुशलम् अस्माकम् बद्ध सौहृदाः

34 भगवान् अपि गोविन्दो ब्रह्मण्यो भक्त वत्सलः

कच्चित् पुरे सुधर्मायाम् सुख मास्ते सुहृद् वृतः

35 मङ्गळाय च लोकानाम् क्षेमाय च भवाय च

आस्ते यदु कुलाम् भोधौ आद्यो ऽनन्त सखः पुमान्

36 यद् बाहु दण्ड गुप्तायाम् स्वपुर्याम् यदवो ऽर्चिताः

क्रीडन्ति परमानन्दम् महा पौरुषिका इव

37 यत् पाद शुश्रूषण मुख्य कर्मणा सत्या दयो द्व्यष्ट सहस्र योषितः

निर्जित्य सङ्ख्ये त्रिद शाम्स्त दाशिषो हरन्ति वज्रायुध वल्लभो चिताः

38 यद् बाहु दण्डाभ् युदयानु जीविनो यदु प्रवीरा ह्यकुतो भया मुहुः

अधिक्र मन्ति अङ्घ्रिभि राहृताम् बलात् सभाम् सुधर्माम् सुर सत्त मोचिताम्

39 कच्चित् ते ऽनामयम् तात भ्रष्ट तेजा विभासि मे

अलब्ध मानो ऽवज्ञातः किम् वा तात चिरो षितः

40 कच्चिन् नाभि हतो ऽभावैः शब्दा दिभिर् अमङ्गलैः

न दत्तम् उक्तमर् थिभ्य आशया यत् प्रति श्रुतम्

41 कच्चित् त्वम् ब्राह्मणम् बालम् गाम् वृद्धम् रोगिणम् स्त्रियम्

शरणोप सृतम् सत्त्वम् नात्याक्षीः शरण प्रदः

42 कच्चित् त्वम् नागमो ऽगम्याम् गम्याम् वासत् कृताम् स्त्रियम्

पराजितो वाथ भवान् नोत्तमैर् नासमैः पथि

43 अपिस्वित् पर्य भुङ्क् थास्त्वम् सम्भोज्यान् वृद्ध बालकान्

जुगुप्सितम् कर्म किञ्चित् कृतवान् न यद क्षमम्

44 कच्चित् प्रेष्ठतमे नाथ हृदयेन् आत्म बन्धुना

शून्यो ऽस्मि रहितो नित्यम् मन्यसेते ऽन्यथा न रुक्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

प्रथम स्कन्दे चतुर् दशो ऽध्याय ः॥

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ प्रथम स्कन्दः पञ्च दशो ऽध्याय :

स्कन्द- 01: अध्याय- 15

01 सूत उवाच

एवम् कृष्ण सखः कृष्णो भ्रात्रा राज्ञा विकल्पितः

नाना शङ्कास् पदम् रूपम् कृष्ण विश्लेष कर्शितः

02 शोकेन शुष्यद् वदन हृत् सरोजो हत प्रभः

विभुम् तमेव आनुद्यायन् नाशक् नोत् प्रति भाषितुम्

03 कृच्छ्रेण सम्स्तभ्य शुचः पाणिना मृज्य नेत्रयोः

परोक्षेण समुन् नद्ध प्रणयौत् कण्ठ्य कातरः

04 सख्यम् मैत्रीम् सौहृदम् च सारथ् यादिषु सम्स्मरन्

नृपम् अग्रज मित्याह बाष्प गद् गदया गिरा

05 अर्जुन उवाच

वञ्चितो ऽहम् महाराज हरिणा बन्धु रूपिणा

येन मे ऽपहृतम् तेजो देव विस्मापनम् महत्

06 यस्य क्षण वियोगेन लोको ह्यप्रिय दर्शनः

उक्थेन रहितो ह्येष मृतकः प्रोच्यते यथा

07 यत् सम्श्रयाद् द्रुपद गेह मुपाग तानाम् राज्ञाम् स्वयम्वर मुखे स्मर दुर्म दानाम्

तेजो हृतम् खलु मयाभि हतश् च मत्स्यः सज्जी कृतेन धनुषाधि गता च कृष्णा

08 यत् सन्निधा वहमु खाण्डव मग्नये ऽदाम् इन्द्रम् च सामर गणम् तरसा विजित्य

लब्धा सभा मय कृता अद्भुत शिल्प माया दिग् भ्यो ऽहरन् नृपतयो बलि मध्वरे ते

09 यत् तेजसा नृप शिरो ऽङ्घ्रि महन् मखार्थे आर्यो ऽनुजस् तव गजायुत सत्त्व वीर्यः

तेना हृताः प्रमथ नाथ मखाय भूपा यन् मोचितास् तद् अनयन् बलि मध्वरे ते

10 पत्न्याः तवाधि मख क्लृत महाभिषेक श्लाघिष्ठ चारु कबरम् कितवैः सभायाम्

स्पृष्टम् विकीर्य पदयोः पति ताश्रु मुख्या यस्तत् स्त्रियो ऽकृत हतेश विमुक्त केशाः

11 यो नो जुगोप वनम् एत्य दुरन्त कृच्छ्राद् दुर्वास सो ऽरि रचिताद् अयुताग्र भुग्यः

शाकान्न शिष्टम् उपयुज्य यतस् त्रिलोकीम् तृप्ता ममम्स् त सलिले विनि मग्न सङ्घः

12 यत् तेजसाथ भगवान् युधि शूल पाणिः विस्मापितः स गिरिजो ऽस्त्र मदान् निजम् मे

अन्ये ऽपि चाह ममुनैव कळेवरेण प्राप्तो महेन्द्र भवने महदास नार्धम्

13 तत्रैव मे विहरतो भुज दण्ड युग्मम् गाण्डीव लक्षणम् अराति वधाय देवाः

सेन्द्राः श्रिता यदनु भावित माजमीढ तेनाह मद्य मुषितः पुरुषेण भूम्ना

14 यद् बान्धवः कुरु बलाब्धिम् अनन्त पारम् एको रथेन ततरे ऽहम् अतीर्य सत्त्वम्

प्रत्या हृतम् बहु धनम् च मया परेषाम् तेजास् पदम् मणिमयम् च हृतम् शिरोभ्यः

15 यो भीष्म कर्ण गुरु शल्य चमूष्व दभ्र राजन्य वर्य रथ मण्डल मण्डि तासु

अग्रेचरो मम विभो रथ यूथ पानाम् आयुर् मनाम्सि च दृशा सह ओज आर्च् छत्

16 यद्दोः षु मा प्रणिहितम् गुरु भीष्म कर्ण नप्तृ त्रिगर्त शल सैन्धव बाह्लि काद्यैः

अस्त्राणि अमोघ महिमानि निरूपि तानि नोपस् पृशुर्नृ हरि दास मिवा सुराणि

17 सौत्ये वृतः कुमति नात्मद ईश्वरो मे यत् पाद पद्मम् अभवाय भजन्ति भव्याः

माम् श्रान्त वाह मरयो रथिनो भुविष्ठम् न प्राहरन् यद् अनुभाव निरस्त चित्ताः

18 नर्माणि उदार रुचिर स्मित शोभितानि हे पार्था हे ऽर्जुन सखे कुरु नन्दनेति

सञ्जल्पि तानि नर देव हृदिस् पृशानि स्मर्तुर् लुठन्ति हृदयम् मम माधवस्य

19 शय्यास नाटन विकत्थन भोज नादिषु ऐक्याद् वयस्य ऋत वानिति विप्र लब्धः

सख्युः सखेव पितृवत् तनयस्य सर्वम् सेहे महान् महितया कुमतेर घम् मे

20 सो ऽहम् नृपेन्द्र रहितः पुरु षोत्तमेन सख्या प्रियेण सुहृदा हृदयेन शून्यः

अध्वन् युरुक्रम परिग्रहम् अङ्ग रक्षन् गोपैः असद्भिर् अबलेव विनिर्जितो ऽस्मि

21 तद्वै धनुस्त इषवः स रथो हयास्ते सो ऽहम् रथी नृपतयो यत आनमन्ति

सर्वम् क्षणेन तद् अभूद् असदी शरिक्तम् भस्मन् हुतम् कुह कराद्ध मिवोप्त मूष्याम्

22 राजम् स्त्वयाभि पृष्टानाम् सुहृदाम् नः सुहृत् पुरे

विप्र शाप विमूढानाम् निघ्न ताम् मुष्टि भिर्मिथः

23 वारुणीम् मदिराम् पीत्वा मदोन् मथित चेतसाम्

अजानताम् इवान् योन्यम् चतु: पञ्चाव शेषिता:

24 प्रायेणै तद् भगवत ईश्वरस्य विचेष्टितम्

मिथो निघ्नन्ति भूतानि भाव यन्ति च यन्मिथ:

25 जलौ कसाम् जले यद्वत् महान्तो ऽदन्त्य णीयस:

दुर्बलान् बलिनो राजन् महान्तो बलिनो मिथ:

26 एवम् बलिष्ठैर् यदुभि: महद्भिर् इतरान् विभु:

यदून् यदुभिर् अन्योन्यम् भू भारान् सञ्ज हार ह

27 देश कालार्थ युक्तानि हृत्तापो पशमानि च

हरन्ति स्मरतश् चित्तम् गोविन्दाभि हितानि मे

28 सूत उवाच

एवम् चिन्तयतो जिष्णो: कृष्ण पाद सरोरुहम्

सौहार् देनाति गाढेन शान्ता सीद् विमला मति:

29 वासु देवाङ्घ्रि अनुध्यान परि बृम्हित रम्हसा

भक्त्या निर्मथि ताशेष कषाय धिषणो ऽर्जुन:

30 गीतम् भगवता ज्ञानम् यत् तत् सङ्ग्राम मूर्धनि

काल कर्म तमो रुद्धम् पुनर् अध्य गमत् विभु:

31 विशोको ब्रह्म सम्पत्त्या सञ्छिन्न द्वैत सम्शय:

लीन प्रकृति नैर् गुण्याद् अलिङ्गत्वाद् असम्भव:

32 निशम्य भगवन् मार्गम् सम्स्थाम् यदु कुलस्य च

स्व: पथाय मतिम् चक्रे निभृ तात्मा युधिष्ठिर:

33 पृथापि अनुश्रुत्य धनञ्जयो दितम् नाशम् यदूनाम् भगवद् गतिम् च ताम्

एकान्त भक्त्या भगवत्य धोक्षजे निवेशि तात्मो पर राम सम्सृते:

34 यया हरद् भुवो भारम् ताम् तनुम् विजहा वज:

कण्टकम् कण्ट केनेव द्वयम् चापी शितु: समम्

35 यथा मत्स्यादि रूपाणि धत्ते जह्याद् यथा नट:

भू भारः क्षपितो येन जहौ तच् च कळेवरम्

36 यदा मुकुन्दो भगवान् इमाम् महीम् जहौ स्वतन्वा श्रवणीय सत् कथः

तदाहर् एवा प्रति बुद्ध चेतसाम् अधर्म हेतुः कलि रन्व वर्तत

37 युधिष्ठिरस् तत् परि सर्पणम् बुधः पुरे च राष्ट्रे च गृहे तथ् आत्मनि

विभाव्य लोभा नृत जिह्मह् इम्सनादि अधर्म चक्रम् गमनाय पर्य धात्

38 स्वराट् पौत्रम् विनयिनम् आत्मनः सुसमम् गुणैः

तोय नीव्याः पतिम् भूमेः अभ्य षिञ्चद् गजाह्वये

39 मथुरायाम् तथा वज्रम् शूरसेन पतिम् ततः

प्राजा पत्याम् निरूप् येष्टिम् अग्नीन् अपिबद् ईश्वरः

40 विसृज्य तत् र तत् सर्वम् दुकूल वलया दिकम्

निर्ममो निरहङ्कारः सञ्छिन्ना शेष बन्धनः

41 वाचम् जुहाव मनसि तत् प्राण इतरे च तम्

मृत्याव पानम् सोत् सर्गम् तम् पञ्चत्वे ह्यजो हवीत्

42 त्रित्वे हुत्वा च पञ्चत्वम् तच्चै कत्वे ऽजुहोन् मुनिः

सर्वम् आत्मन्य जुहवीद् ब्रह्मण् यात्मानम् अव्यये

43 चीर वासा निरा हारो बद्धवाङ् मुक्त मूर्धजः

दर्शयन् आत्मनो रूपम् जडोन्मत्त पिशाच वत्

44 अन पेक्ष माणो निरगाद् अशृण्वन् बधिरो यथा

उदीचीम् प्रवि वेशाशाम् गत पूर्वाम् महात् मभिः

हृदि ब्रह्म परम् ध्यायन् नावर्ते त यतो गतः

45 सर्वे त मनु निर्जग्मुः भ्रातरः कृत निश्चयाः

कलिना अधर्म मित्रेण दृष्ट्वा स्पृष्टाः प्रजा भुवि

46 ते साधु कृत सर्वार्था ज्ञात् वात् यन्तिक मात्मनः

मनसा धारया मासुः वैकुण्ठ चरणाम्बुजम्

47 तद् ध्यानो द्रिक्तया भक्त्या विशुद्ध धिषणाः परे

तस्मिन् नारायण पदे एकान्त मतयो गतिम्

48 अवापुर् दुरवा पाम् ते असद्भिः विषयात् मभिः

विधूत कल्मषा स्थाने विरजेन् आत्मनै व हि

49 विदुरो ऽपि परित्यज्य प्रभासे देहम् आत्मवान्:

कृष्णा वेशेन तच् चित्तः पितृभिः स्वक्षयम् ययौ

50 द्रौपदी च तद् आज्ञाय पतीनाम् अनपेक्ष ताम्

वासुदेवे भगवति ह्येकान्त मतिरा पतम्

51 यः श्रद्धयै तद् भगवत् प्रियाणाम् पाण्डोः सुतानाम् इति सम्प्रयाणम्

शृणोत् यलम् स्वस्त्य यनम् पवित्रम् लब्ध्वा हरौ भक्ति मुपैति सिद्धिम्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

प्रथम स्कन्दे पञ्च दशो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ प्रथम स्कन्दः षोडशो ऽध्याय :

स्कन्द- 01: अध्याय- 16

01 सूत उवाच

ततः परीक्षिद् द्विज वर्य शिक्षया महीम् महा भागवतः शशास ह

यथा हि सूत्याम् अभिजात कोविदाः समादि शन् विप्र महद् गुणस् तथा

02 स उत्तरस्य तनयाम् उपयेम इरावतीम्

जनमेजया दीम्श् चतुरस् तस्याम् उत्पाद यत् सुतान्

03 आजहार् आश्व मेधाम् स्त्रीन् गङ्गायाम् भूरि दक्षिणान्

शारद् वतम् गुरुम् कृत्वा देवा यत् राक्षि गोचराः

04 निजग्रा हौजसा वीरः कलिम् दिग्विजये क्वचित्

नृपलिङ्ग धरम् शूद्रम् घ्नन्तम् गो मिथुनम् पदा

05 शौनक उवाच

कस्य हेतोर् निजग्राह कलिम् दिग्विजये नृपः

नृदेव चिह्न धृक्षूद्र को ऽसौ गाम् यः पदा ह नत्

तत् कथ्यताम् महा भाग यदि कृष्ण कथाश्रयम्

06 अथवास्य पदाम् भोज मकरन्द लिहाम् सताम्

किमन्यै रसदा लापैः आयुषो यद सद्व्ययः

07 क्षुद्रा युषाम् नृणाम् अङ्ग मर्त्यानाम् ऋत मिच्छताम्

इहोप हूतो भगवान् मृत्युः शामित्र कर्मणि

08 न कश्चिन् म्रियते तावद् याव दास्त इहान्तकः

एत दर्थम् हि भगवान् आहूतः परमर् षिभिः

अहो नृलोके पीयेत हरि लीलामृतम् वचः

09 मन्द स्य मन्द प्रज्ञस्य वयो मन्दा युषश् च वै

निद्रया ह्रियते नक्तम् दिवा च व्यर्थ कर्मभिः

10 सूत उवाच

यदा परीक्षित् कुरु जाङ्गले ऽस्रुनोत् कलिम् प्रविष्टम् निज चक्रवर्ति ते

निशम्य वार्ताम् अनति प्रियाम् ततः शरासनम् सम्युग शौण्डि राददे

11 स्वलङ् कृतम् श्याम तुरङ्ग योजितम् रथम् मृगेन्द्र ध्वज माश्रितः पुरात्

वृतो रथाश् वद् विपपत्ति युक्तया स्व सेनया दिग् विजयाय निर्गतः

12 भद् राश्वम् केतु मालम् च भारतम् चोत्तरान् कुरून्

किम् पुरुषादीनि वर्षाणि विजित्य जगृहे बलिम्

15 तत्र तत्रोप शृण्वानः स्वपूर् वेषाम् महात् मनाम्

प्रगी यमाणम् च यशः कृष्ण माहात्म्य सूचकम्

16 आत्मानम् च परित् रातम् अश्वत् थाम्नो ऽस्त्र तेजसः

स्नेहम् च वृष्णि पार्थानाम् तेषाम् भक्तिम् च केशवे

17 तेभ्यः परम सन्तुष्टः प्रीत्युज् जृम्भित लोचनः

महा धनानि वासाम्सि ददौ हारान् महामनाः

18 सारथ्य पार षद सेवन सख्य दौत्य

वीरास नानु गमनस् तवन प्रणामान्

स्निग्धेषु पाण्डुषु जगत् प्रणतिम् च विष्णोः

भक्तिम् करोति नृपतिः चरणार विन्दे

19 तस्यैवम् वर्त मानस्य पूर्वेषाम् वृत्ति मन्वहम्

नाति दूरे किलाश् चर्यम् यदासीत् तन्नि बोध मे

20 धर्मः पदैकेन चरन् विच्छायाम् उप लभ्य गाम्

पृच्छति स्माश्रु वदनाम् विवत् सामिव मातरम्

21 धर्म उवाच

कच्चिद् भद्रे ऽनामयम् आत्मनस्ते विच्छा यासि म्लायतेषन् मुखेन

आलक्षये भवतीम् अन्तरा धिम् दूरे बन्धुम् शोचसि कञ्चनाम्ब

22 पादैर् न्यूनम् शोचसि मैक पादम् आत्मानम् वा वृषलैर् भोक्ष्य माणम्

आहो सुरादीन् हृत यज्ञ भागान् प्रजा उत स्विन् मघवत्य वर्षति

23 अरक्ष्य माणाः स्त्रिय उर्वि बालान् शोचस् यथो पुरुषादैर् इवार्तान्

वाचम् देवीम् ब्रह्म कुले कु कर्मणि अब्रह्मण्ये राजकुले कुलाग्र्यान्

24 किम् क्षत्र बन्धून् कलि नोप सृष्टान् राष्ट्राणि वा तैर् अवरोपि तानि

इतस् ततो वाशन पान वासः स्नानव्य वायोन् मुख जीव लोकम्

25 यद् वाम्ब ते भूरि भराव तार कृता वतारस्य हरेर् धरित्रि

अन्तर् हितस्य स्मरती विसृष्टा कर्माणि निर्वाण विलम्बि तानि

26 इदम् ममा चक्ष्व तवाधि मूलम् वसुन्धरे येन विकर्शि तासि

कालेन वा ते बलिनाम् बलीयसा सुरार्चितम् किम् हृत मम्ब सौभगम्

27 धरण् युवाच

भवान् हि वेद तत् सर्वम् यन्माम् धर्मानु पृच्छसि

चतुर्भिर् वर्तसे येन पादैर् लोक सुखा वहैः

28 सत्यम् शौचम् दया क्षान्तिः त्यागः सन्तोष आर्जवम्

शमो दमस् तपः साम्यम् तितिक्षो परतिः श्रुतम्

29 ज्ञानम् विरक्तिर् ऐश्वर्यम् शौर्यम् तेजो बलम् स्मृतिः

स्वा तन्त्र्यम् कौशलम् कान्तिः धैर्यम् मार्दवम् एव च

30 प्रागल्भ्यम् प्रश्रयः शीलम् सह ओजो बलम् भगः

गाम्भीर्यम् स्थैर्य मास्तिक्यम् कीर्तिर् मानो ऽनहङ् कृतिः

31 एते च अन्ये च भगवन् नित्या यत्र महागुणाः

प्रार्थ्या महत्त्व मिच्छद्भिः न वियन्ति स्म कर्हिचित्

32 तेनाहम् गुण पात्रेण श्रीनि वासेन साम्प्रतम्

शोचामि रहितम् लोकम् पाप्मना कलि नेक्षितम्

33 आत्मानम् चानु शोचामि भवन्तम् चाम रोत्तमम्

देवान् पितॄन् ऋषीन् साधून् सर्वान् वर्णाम्स् तथ् आश्रमान्

34 ब्रह्मा दयो बहुतिथम् यद पाङ्ग मोक्ष

कामास् तपः समचरन् भगवत् प्रपन्नाः

सा श्रीः स्व वासम् अरविन्द वनम् विहाय

यत् पाद सौभग मलम् भजते ऽनुरक्ता

35 तस्या हमब्ज कुलिशाङ् कुश केतु केतैः

श्रीमत् पदैर् भगवतः सम लङ्कृ ताङ्गी

त्री नत्य रोच उपलभ्य ततो विभूतिम्

लोकान्स माम् व्यसृ जद् उत्स्मयतीम् तदन्ते

36 यो वै ममाति भरम् आसुर वम्श राज्ञाम्

अक्षौहिणी शतम् अपानुदद् आत्म तन्त्रः

त्वाम् दुः स्थमून पदम् आत्मनि पौरुषेण

सम् पादयन् यदुषु रम्यम् अबिभ्र दङ्गम्

37 का वा सहेत विरहम् पुरु षोत्त मस्य

प्रेमाव लोक रुचिर स्मित वल्गु जल्पैः

स्थैर्यम् समान महरन् मधु मानि नीनाम्

रोमोत्सवो मम यदङ्घ्रि विटङ्कि ताया:

38 तयोर् एवम् कथयतो : पृथिवी धर्म योस्तदा

परीक्षिन् नाम राजर्षि: प्राप्त: प्राचीम् सरस्व तीम्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

प्रथम स्कन्दे षोडशो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ प्रथम स्कन्द: सप्त दशो ऽध्याय :

स्कन्द- 01: अध्याय- 17

01 सूत उवाच

तत्र गो मिथुनम् राजा हन्य मान मनाथ वत्

दण्ड हस्तम् च वृषलम् ददृशे नृप लाञ्छनम्

02 वृषम् मृणाल धवळम् मेहन्तम् इव बिभ्यतम्

वेप मानम् पदैकेन सीदन्तम् शूद्र ताडितम्

03 गाम् च धर्म दुघाम् दीनाम् भृशम् शूद्र पदा हताम्

विवत्साम् साश्रु वदनाम् क्षामाम् यवस मिच्छतीम्

04 पप्रच्छ रथम् आरूढ: कार्तस् वर परिच् छदम्

मेघ गम्भीरया वाचा समारोपित कार्मुक:

05 कस्त्वम् मच् छरणे लोके बलाद् हम्स्य बलान् बली

नरदेवो ऽसि वेषेण नटवत् कर्मणा द्विज:

06 यस्त्वम् कृष्णे गते दूरम् सह गाण्डीव धन्वना

शोच्यो ऽसि अशोच्यान् रहसि प्रहरन् वध मर्हसि

07 त्वम् वा मृणाल धवळः पादैर् न्यूनः पदा चरन्

वृष रूपेण किम् कश्चिद् देवो नः परि खेदयन्

08 न जातु पौर वेन्द्राणाम् दोर् दण्ड परि रम्भिते

भूतले ऽनु पतन् त्यस्मिन् विना ते प्राणिनाम् शु चः

09 मा सौर भेयानु शुचो व्येतु ते वृष लाद् भयम्

मा रोदी रम्ब भद्रम् ते खलानाम् मयि शास्तरि

10 यस्य राष्ट्रे प्रजाः सर्वास् त्रस्यन्ते साध्वि असाधुभिः

तस्य मत्तस्य नश्यन्ति कीर्ति रायुर् भगो गतिः

11 एष राज्ञाम् परो धर्मो ह्यार्ता नाम् आर्ति निग्रहः

अत एनम् वधिष्यामि भूत द्रुहम् असत्तमम्

12 को ऽवृश् चत् तव पादाम् स्त्रीन् सौरभेय चतुष् पद

मा भूवम् स्त्वा दृशा राष्ट्रे राज्ञाम् कृष्णानु वर्तिनाम्

13 आख्याहि वृष भद्रम् वः साधूनाम् अकृता गसाम्

आत्मवै रूप्य कर्तारम् पार्थानाम् कीर्ति दूषणम्

14 जने ऽनागस् यघम् युञ्जन् सर्वतो ऽस्य च मद् भयम्

साधूनाम् भद्र मे व स्याद् असाधु दमने कृते

15 अनागः स्विह भूतेषु य आगस्कृन् निरङ्कुशः

आहर् तास्मि भुजम् साक्षाद् अमर्त्यस् यापि साङ्गदम्

16 राज्ञो हि परमो धर्मः स्वधर्मस् थानु पालनम्

शासतो ऽन्यान् यथा शास्त्रम् अनापद् युत् पथानिह

17 धर्म उवाच

एतद्वः पाण्डवे यानाम् युक्तम् आर्ता भयम् वचः

येषाम् गुण गणैः कृष्णो दौत् यादौ भगवान् कृतः

18 न वयम् क्लेश बीजानि यतः स्युः पुरुषर् षभ

पुरुषम् तम् विजा नीमो वाक्य भेद विमोहिताः

19 केचिद् विकल्प वसना आहुर् आत्मान मात्मनः

दैव मन्ये ऽपरे कर्म स्वभावम् अपरे प्रभुम्

20 अप्र तर्क् याद् अनिर्देश् याद् इति केष्वपि निश्चयः

अत्रानु रूपम् राजर्षे विमृश स्व मनीषया

21 सूत उवाच

एवम् धर्मे प्रवदति स सम्राड् द्विज सत्तमाः

समाहिते न मनसा विखेदः पर्य चष्टतम्

22 राजो वाच

धर्मम् ब्रवीषि धर्मज्ञ धर्मो ऽसि वृष रूप धृक्

यद् अधर्म कृतः स्थानम् सूच कस्यापि तद् भवेत्

23 अथवा देव मायाया नूनम् गति रगोचरा

चेतसो वचसश् चापि भूतानाम् इति निश्चयः

24 तपः शौचम् दया सत्यम् इति पादाः कृते कृताः

अधर् माम्श इस्त्रयो भग्नाः स्मय सङ्गम् अदैस् तव

25 इदानीम् धर्म पादस् ते सत्यम् निर्वर्त येद् यतः

तम् जिघृक्षति अधर्मो ऽयम् अनृतेनै धितः कलिः

26 इयम् च भूर् भगवता न्यासि तोरु भरा सती

श्रीमद् भिस् तत् पदन् यासैः सर्वतः कृत कौतुका

27 शोचत् यश्रु कला साध्वी दुर्भगे वोज्झि ता धुना

अब्रह्मण्या नृप व्याजाः शूद्रा भोक्ष् यन्ति मामिति

28 इति धर्मम् महीम् चैव सान्त्व यित्वा महा रथः

निशातम् आददे खड्गम् कलये ऽधर्म हेतवे

29 तम् जिघाम्सुम् अभिप्रेत्य विहाय नृपलाञ् छनम्

तत् पाद मूलम् शिरसा समगाद् भय विह्वलः

30 पतितम् पादयोर् वीरः कृपया दीन वत्सलः

शरण्यो नावधीच् छलोक्य आह चेदम् हसन् निव

31 राजो वाच

न ते गुडाकेश यशोध राणाम् बद् धाञ्जलेर् वै भय मस्ति किञ्चित्

न वर्ति तव्यम् भवता कथञ्चन क्षेत्रे मदीये त्वम् अधर्म बन्धुः

32 त्वाम् वर्त मानम् नरदेव देहेषु अनुप्र वृत्तो ऽयम् अधर्म पूगः

लोभो ऽनृतम् चौर्यम् अनार्य मम्हो ज्येष्ठा च माया कलहश् च दम्भः

33 न वर्ति तव्यम् तद् अधर्म बन्धो धर्मेण सत्येन च वर्ति तव्ये

ब्रह्मा वर्ते यत्र यजन्ति यज्ञैः यज्ञेश्वरम् यज्ञ वितान विज्ञाः

34 यस्मिन् हरिः भगवान् इज्य मान इज्या मूर्तिर् यजताम् शम् तनोति

कामान् अमोघान् स्थिर जङ्ग मानाम् अन्तर् बहिर् वायुर् इवैष आत्मा

35 सूत उवाच

परीक्षि तैव मादिष्टः स कलिर् जातवे पथुः

तम् उद्य तासि माहेदम् दण्डपाणि मिवोद् यतम्

36 कलिर् उवाच

यत्र क्वचन वत्स्यामि सार्व भौम तव् आज्ञया

लक्षये तत् र तत् रापि त्वाम् आत्तेषु शरा सनम्

37 तन्मे धर्म भृताम् श्रेष्ठ स्थानम् निर्देष्टु मर्हसि

यत्रैव नियतो वत्स्य आतिष्ठम्स् ते ऽनुशासनम्

38 सूत उवाच

अभ्यर्थि तस् तदा तस्मै स्थानानि कलये ददौ

द्यूतम् पानम् स्त्रियः सूना यत्रा धर्मश् चतुर्विधः

39 पुनश् च याच मानाय जात रूपम् अदात् प्रभुः

ततो ऽनृतम् मदम् कामम् रजो वैरम् च पञ्चमम्

40 अमूनि पञ्च स्थानानि ह्यधर्म प्रभवः कलिः

औत्तरे येण दत् तानि न्यवसत् तन् निदेश कृत्

41 अथै तानि न से वेत बुभूषुः पुरुषः क्वचित्

विशे षतो धर्म शीलो राजा लोक पतिर् गुरुः

42 वृषस्य नष्टाम् स्त्रीन् पादान् तपः शौचम् दया मिति

प्रति सन्दध आश्वास्य महीम् च सम वर्धयत्

43 स एष एतर्ह्यध् यास्त आसनम् पार्थि वोचितम्

पिता महेनो पन्यस्तम् राज्ञा रण्यम् विविक्ष ता

44 आस्ते ऽधुना स राजर्षि: कौर वेन्द्र श्रियोल् लसन्

गजाह्वये महा भागश् चक्र वर्ती बृहच् छ्रवा:

45 इत्थम् भूतानु भावो ऽयम् अभिमन्यु सुतो नृप:

यस्य पाल यत: क्षौणीम् यूयम् सत्राय दीक्षि ता:

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

प्रथम स्कन्दे सप्त दशो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ प्रथम स्कन्द: अष्टा दशो ऽध्याय :

स्कन्द- 01: अध्याय- 18

01 सूत उवाच

यो वै द्रौण् यस्त्र विप्लुष्टो न मातुर् उदरे मृत:

अनुग्रहाद् भगवत: कृष्णस् याद्भुत कर्मण:

02 ब्रह्म कोपोत्थि ताद् यस्तु तक्षकात् प्राण विप्लवात्

न सम् मुमोहो रुभयाद् भगवत् यर्पिता शय:

03 उत्सृज्य सर्वत: सङ्गम् विज्ञा ताजित सम्स्थिति:

वैया सकेर् जहौ शिष्यो गङ्गायाम् स्वम् कळेवरम्

04 नोत्तम श्लोक वार्तानाम् जुषताम् तत् कथाम् ऋतम्

स्यात् सम्भ्रमो ऽन्त काले ऽपि स्मरताम् तत् पदाम् बुजम्

05 तावत् कलिर्न प्रभवेत् प्रविष्टो ऽपी ह सर्वतः

यावत् दीशो महानुर्व्याम् आभि मन्यव एकराट्

06 यस्मिन् नहनि यर्ह् येव भगवान् उत्स सर्ज गाम्

तदै वेहानु वृत्तो ऽसौ अधर्म प्रभवः कलिः

07 नानुद् वेष्टि कलिम् सम्राट् सारङ्ग इव सारभुक्

कुशलान् याशु सिद्ध्यन्ति नेतराणि कृतानि यत्

08 किम् नु बालेषु शूरेण कलिना धीर भीरुणा

अप्रमत्तः प्रमत् तेषु यो वृको नृषु वर्तते

09 उप वर्णित मे तद्वः पुण्यम् पार् ईक्षितम् मया

वासुदेव कथो पेतम् आख्यानम् यद् अपृच्छ त

10 या याः कथा भगवतः कथ नीयोरु कर्मणः

गुण कर्मा श्रयाः पुम्भिः सम्सेव् यास्ता बुभू षुभिः

11 ऋषय ऊचुः

सूत जीव समाः सौम्य शाश् वतीर् विशदम् यशः

यस्त्वम् शम्ससि कृष्णस्य मर्त् यानाम् अमृतम् हि नः

12 कर्मण् यस्मिन् ननाश् वासे धूम धूम्रात् मनाम् भवान्

आपाय यति गोविन्द पाद पद्मा सवम् मधु

13 तुलया मलवे नापि न स्वर्गम् ना पुनर्भवम्

भगवत् सङ्गि सङ्गस्य मर्त् यानाम् किमुता शिषः

14 को नाम तृप्येद् रसवित् कथायाम् महत् तमै कान्त परा यणस्य

नान्तम् गुणानाम् अगुणस्य जग्मुः योगेश्वरा ये भव पाद्म मुख्याः

15 तन् नो भवान् वै भगवत् प्रधानो महत् तमै कान्त परा यणस्य

हरेर् उदारम् चरितम् विशुद्धम् शुश्रूष ताम् नो वितनोतु विद्वन्

16 स वै महा भागवतः परीक्षिद् येनाप वर्गाख्यम् अदभ्र बुद्धिः

ज्ञानेन वैयासकि शब्दि तेन भेजे खगेन्द्र ध्वज पाद मूलम्

17 तन्नः परम् पुण्यम् असम्वृ तार्थम् आख्यानम् अत् यद्भुत योग निष्ठम्

आख् याहि अनन्ता चरितो पपन्नम् पारीक्षितम् भागवता भि रामम्

18 सूत उवाच

अहो वयम् जन्म भृतो ऽद्य हास्म वृद्धानु वृत्त् यापि विलोम जाता:

दौष् कुल्य माधिम् विधुनोति शीघ्रम् महत् तमानाम् अभि धान योग:

19 कुत: पुनर् गृणतो नाम तस्य महत् तमै कान्त परा यणस्य

यो ऽनन्त शक्ति: भगवान् अनन्तो महद् गुणत् वाद् यम् अनन्त माहु:

20 एताव तालम् ननु सूचि तेन गुणै रसाम्यान् अतिशाय नस्य

हित्वे तरान् प्रार्थ यतो विभूति: यस् याङ्घ्रि रेणुम् जुषते ऽनभीप्सो:

21 अथापि यत् पाद नखाव सृष्टम् जगद् विरिञ्चोप हृतार् हणाम्भ:

सेशम् पुनात् यन्य तमो मुकुन्दात् को नाम लोके भगवत् पदार्थ:

22 यत् रानु रक्ता: सहसैव धीरा व्यपोह्य देहा दिषु सङ्ग मूढम्

व्रजन्ति तत् पारम हम्स्य मन्त्यम् यस्मिन् नहिम्सो प शम: स्व धर्म:

23 अहम् हि पृष्टो ऽर्यमणो भवद्भि: आचक्ष आत्मा वगमो ऽत्र यावान्

नभ: पतन्त् यात्म समम् पतत् त्रिणस् तथा समम् विष्णु गतिम् विपश् चित:

24 एकदा धनुर् उद् यम्य विचरन् मृगयाम् वने

मृगान् अनुगत: श्रान्त: क्षुधि तस् तृषि तो भृशम्

25 जलाशय मचक् षाण: प्रवि वेश तम् आश्रमम्

ददर्श मुनि मासीनम् शान्तम् मीलित लोचनम्

26 प्रति रुद्धेन्द्रिय प्राणम् मनो बुद्धि मुपारतम्

स्थान त्रयात् परम् प्राप्तम् ब्रह्म भूतम् अविक्रियम्

27 विप्र कीर्ण जटाच् छन्नम् रौर वेणाजि नेन च

विशुष्यत् तालु रुदकम् तथा भूत मयाचत

28 अलब्ध तृण भूम्यादि: असम् प्राप्त् आर्घ्य सून् ऋत:

अवज्ञातम् इवात् मानम् मन्य मानश् चुकोप ह

29 अभूत पूर्व: सहसा क्षुत् तृड् भ्याम् अर्दि तात्मन:

ब्राह्मणम् प्रत्य भूद् ब्रह्मन् मत्सरो मन्युर् एव च

30 स तु ब्रह्म ऋषेर् अम्से गतासुम् उरगम् रुषा

विनिर् गच्छन् धनुष् कोट्या निधाय पुरम् आगमत्

31 एष किम् निभृता शेष करणो मीलि तेक्षण:

मृषा समाधि: आहोस्वित् किम् नु स्यात् क्षत्र बन्धुभि:

32 तस्य पुत्रो ऽति तेजस्वी विहरन् बालको ऽर्भकै:

राज्ञाघम् प्रापितम् तातम् श्रुत्वा तत् रेद मब्रवीत्

33 अहो अधर्म: पालानाम् पीव्नाम् बलि भुजामिव

स्वामिन् यघम् यद् दासानाम् द्वार पानाम् शुनामिव

34 ब्राह्मणै: क्षत्र बन्धुर्हि द्वार पालोनि रूपित:

स कथम् तद् गृहे द्वा: स्थ: सभाण्डम् भोक्तु मर्हति

35 कृष्णे गते भगवति शास्तर् युत् पथ गामिनाम्

तद् भिन्न सेतू नद्याहम् शास्मि पश्यत मे बलम्

36 इत् युक्त्वा रोष ताम् राक्षो वयस् यान् ऋषि बालक:

कौशिक् याप उपस् पृश्य वाग् वज्रम् विससर्ज ह

37 इति लङ्घित मर्यादम् तक्षक: सप्तमे ऽहनि

दङ्क्ष्यति स्म कुलाङ्गारम् चोदितो मे ततद् रुहम्

38 ततो ऽभ्येत् याश्रमम् बालो गले सर्प कळेवरम्

पितरम् वीक्ष्य दु: खार्तो मुक्त कण्ठो रुरोद ह

39 स वा आङ्गिरसो ब्रह्मन् श्रुत्वा सुत विलापनम्

उन्मील्य शनकैर् नेत्रे दृष्ट्वा स्वाम्से मृतोरगम्

40 विसृज्य पुत्रम् पप्रच्छ वत्स कस्माद्धि रोदिषि

केन वा ते ऽपकृतम् इत् युक्त: सन्य वेद यत्

41 निशम्य शप्तम् अतदर्हम् नरेन्द्रम् स ब्राह्मणो नात्मजम् अभ्य नन्दत्

अहो बताम् हो महदद्य ते कृतम् अल्पीयसि द्रोह उरुर्दमो धृत:

42 न वै नृभिर् नर देवम् पराख्यम् सम्मातु मर्हसि अवि पक्व बुद्धे

यत् तेजसा दुर् विषहेण गुप्ता विन्दन्ति भद्राणि अकुतो भया: प्रजा:

43 अलक्ष्यमाणे नरदेव नाम्नि रथाङ्ग पाणा वयम् अङ्ग लोक:

तदा हि चौर प्रचुरो विनङ्क्ष् यति अरक्ष् यमाणो ऽविवरूथ वत् क्षणात्

44 तद द्य न: पाप मुपैत् यन् अन्वयम् यन् नष्ट नाथस्य वसोर्वि लुम्पकात्

परस् परम् घ्नन्ति शपन्ति वृञ्जते पशून् स्त्रियो ऽर्थान् पुरुदस् यवो जना:

45 तद् आर्य धर्मश् च: विली यते नृणाम् वर्णाश्रमा चार युतस् त्रयी मय:

ततो ऽर्थ कामाभि निवेशि तात् मनाम् शुनाम् कपीनाम् इव वर्ण सङ्कर:

46 धर्म पालो नर पति: स तु सम्राड् बृहच् छ्रवा:

साक्षान् महा भागवतो राजर्षि: हयमे धयाट्

क्षुत् तृट् श्रम युतो दीनो नैवास्मच् छाप मर्हति

47 अपापेषु स्व भृत् येषु बालेन अपक्व बुद्धिना

पापम् कृतम् तद् भगवान् सर्वात्मा क्षन्तु मर्हति

48 तिरस् कृता विप्र लब्धा: शप्ता: क्षिप्ता हता अपि

नास्य तत् प्रति कुर्वन्ति तद् भक्ता: प्रभवो ऽपि हि

49 इति पुत्र कृता घेन सो ऽनु तप्तो महामुनि:

स्वयम् विप्र कृतो राज्ञा नैवाघम् तद् अचिन्तयत्

50 प्रायश: साधवो लोके परैर् द्वन्द्वेषु योजिता:

न व्यथन्ति न हृष्यन्ति यत आत्मा गुणाश्रय:

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

प्रथम स्कन्दे अष्टा दशो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ प्रथम स्कन्द: एकोन विम्शो ऽध्याय :

*01* सूत उवाच

महो पतिस् त्वथ तत् कर्म गर्ह्यम् विचिन्तयन् आत्म कृतम् सुदुर् मना:

अहो मया नीच मनार्य वत् कृतम् निरागसि ब्रह्मणि गूढ तेजसि

*02* ध्रुवम् ततो मे कृत देव हेलनाद् दुरत्ययम् व्यसनम् नाति दीर्घात्

तदस्तु कामम् त्वघ निष्कृताय मे यथा न कुर्याम् पुनरेव मद्धा

*03* अद्यैव राज्यम् बल मृद्ध कोशम् प्रकोपित ब्रह्म कुलानलो मे

दहत्व भद्रस्य पुनर्न मे ऽभूत् पापीयसी धीर् द्विज देव गोभ्य:

*04* स चिन्तयन् नित्थम् अथाशृणोद् यथा मुने: सुतोक्तो निरृतिस् तक्षका ख्य:

स साधु मेने न चिरेण तक्षका नलम् प्रसक् तस्य विरक्ति कारणम्

*05* अथो विहा येमम् अमुम् च लोकम् विमर्शितौ हेय तया पुरस् तात्

कृष्णाङ्घ्रि सेवाम् अधि मन्य मान उपावि शत् प्राय ममर्त्य नद्याम्

*06* या वै लसच् छ्री तुळसी विमिश्र कृष्णाङ्घ्रि रेण् वभ् यधि काम्बु नेत्री

पुनाति लोकान् उभयत्र सेशान् कस्ताम् न सेवेत मरिष्य माण:

*07* इति व्यवच् छिद्य स पाण्डवेय: प्रायोप वेशम् प्रति विष्णु पद्याम्

दध्यौ मुकुन्दाङ्घ्रि मनन्य भावो मुनिव्रतो मुक्त समस्त सङ्ग:

*08* तत् रोप जग्मुर् भुवनम् पुनानाम् महानु भावा मुनय: स शिष्या:

प्रायेण तीर्थाभि गमाप देशै: स्वयम् हि तीर्थानि पुनन्ति सन्त:

*09* अत्रिर् वसिष्ठश् च्यवन: शरद्वान् अरिष्ट नेमिर् भृगु रङ्गि राश् च

परा शरो गाधि सुतो ऽथ राम उतथ्य इन्द्र प्रमदेध्म वाहौ

*10* मेधातिथिर् देवल आर्ष्टि षेणो भारद् वाजो गौतम: पिप्प लाद:

मैत्रेय औौर्व: कवष: कुम्भ योनि: द्वैपायनो भगवान् नारदश् च

*11* अन्ये च देवरुषि ब्रह्मरुषि वर्या राजरुषि वर्या अरुणाद यश् च

नानार् षेय प्रवरान् समेतान् अभ्यर्च्य राजा शिरसा ववन्दे

*12* सुखोप विष्टेष् वथ तेषु भूय: कृत प्रणाम: स्वचि कीर्षितम् यत्

विज्ञाप यामास विविक्त चेता उपस् थितो ऽग्रे ऽभि गृहीत पाणि:

13 राजो वाच

अहो वयम् धन्य तमा नृपाणाम् महत् तमानु ग्रहणीय शीलाः

राज्ञाम् कुलम् ब्राह्मण पाद शौचाद् दूराद् विसृष्टम् बत गर्ह्य कर्म

14 तस्यैव मे ऽघस्य पराव रेशो व्यासक्त चित्तस्य गृहेष् वभीक्ष्णम्

निर्वेद मूलो द्विज शाप रूपो यत्र प्रसक्तो भय माशु धत्ते

15 तम् मोप यातम् प्रति यन्तु विप्रा गङ्गा च देवी धृत चित्त मीशे

द्विजोप सृष्टः कुहकस् तक्षको वा दशत् वलम् गायत विष्णु गाथाः

16 पुनश् च भूयाद् भगवत् यनन्ते रतिः प्रसङ्गश् च तद् आश्रयेषु

महत्सु याम् याम् उपयामि सृष्टिम् मैत्र् यस्तु सर्वत्र नमो द्विजेभ्यः

17 इति स्म राजा ध्यवसाय युक्तः प्राचीन मूलेषु कुशेषु धीरः

उदङ्मुखो दक्षिण कूल आस्ते समुद्र पत्न्याः स्वसुतन् यस्त भारः

18 एवम् च तस्मिन् नर देव देवे प्रायोप विष्टे दिवि देव सङ्घाः

प्रशस्य भूमौ व्यकिरन् प्रसूनैः मुदा मुहुः दुन्दु भयश् च नेदुः

19 महर्षयो वै समु पागता ये प्रशस्य साध् वित् यनु मोद मानाः

ऊचुः प्रजानु ग्रह शील सारा यद् उत्तम श्लोक गुणाभि रूपम्

20 न वा इदम् राजर्षि वर्य चित्रम् भवत्सु कृष्णम् समनु व्रतेषु

ये ऽध्यासनम् राज किरीट जुष्टम् सद्यो जहुः भगवत् पार्श्व कामाः

21 सर्वे वयम् ताव दिहास् महे ऽथ कळेवरम् यावद सौ विहाय

लोकम् परम् विरजस्कम् विशोकम् यास् यत्ययम् भागवत प्रधानः

22 आश्रुत्य तद् ऋषिगण वचः परीक्षित् समम् मधुच्युद् गुरु चाव्य लीकम्

आभाष तैनान् अभि नन्द्य युक्तान् शुश्रूष माणः चरितानि विष्णोः

23 समा गताः सर्वत एव सर्वे वेदा यथा मूर्ति धरास्त्रि पृष्ठे

नेहाथवा मुत्र च कश्च नार्थ ऋते परा अनुग्रहम् आत्म शीलम्

24 ततश् च वः पृच् छ्यमिमम् विपृच्छे विश् रभ्य विप्रा इति कृत्य तायाम्

सर्वात् मना म्रिय माणैश् च कृत्यम् शुद्धम् च तत्रा मृश ताभि युक्ताः

25 तत्रा भवद् भगवान् व्यास पुत्रो यदृच् छया गाम् अटमानो ऽनपेक्षः

अलक्ष्य लिङ्गो निज लाभ तुष्टो वृतश् च बालैर् अवधूत वेषः

26 तम् द्व्यष्ट वर्षम् सुकुमार पाद करोरु बाह्वम्स कपोल गात्रम्

चार् वाय ताक्षोन् नस तुल्य कर्ण सुभ्र् वाननम् कम्बु सुजात कण्ठम्

27 निगूढ जत्रुम् पृथु तुङ्ग वक्षसम् आवर्त नाभिम् वलि वल्गूदरम् च

दिगम्बरम् वक्त्र विकीर्ण केशम् प्रलम्ब बाहुम् स्वमरोत्त माभम्

28 श्यामम् सदा पीच्य वयो ऽङ्ग लक्ष्म्या स्त्रीणाम् मनोज्ञम् रुचिर स्मितेन

प्रत् युत्थि तास्ते मुनयः स्वास नेभ्यः तल् लक्षणज्ञा अपि गूढ वर्चसम्

29 स विष्णु रातो ऽतिथय आगताय तस्मै स पर्याम् शिरसा जहार

ततो निवृत्ता ह्यबुधाः स्त्रियो ऽर्भका महासने सोप विवेश पूजितः

30 स सम्वृतस् तत्र महान् महीयसाम् ब्रह्मरुषि राजरुषि देवरुषि सङ्घैः

व्यरोच तालम् भगवान् यथेन्दुः ग्रहर्क्ष तारा निकरैः परीतः

31 प्रशान्त मासीनम् अकुण्ठ मेधसम् मुनिम् नृपो भागवतो ऽभ्युपेत्य

प्रणम्य मूर्ध्ना वहितः कृताञ्जलिः नत्वा गिरा सूनृ तयान् व पृच्छत्

32 परीक्षिद् उवाच

अहो अद्य वयम् ब्रह्मन् सत् सेव्याः क्षत्र बन्धवः

कृपया तिथि रूपेण भवद्भिस् तीर्थ काः कृताः

33 येषाम् सम् स्मरणात् पुम्साम् सद्यः शुद्ध्यन्ति वै गृहाः

किम् पुनर् दर्शन स्पर्श पाद शौचास नादिभिः

34 सान्निध् यात्ते महा योगिन् पातकानि महान् त्यपि

सद्यो नश्यन्ति वै पुम्साम् विष्णोरिव सुरेतराः

35 अपि मे भगवान् प्रीतः कृष्णः पाण्डु सुत प्रियः

पैतृष् वसेय प्रीत् यर्थम् तद् गोत्र स्यात्त बान्धवः

36 अन्यथा ते ऽव्यक्त गतेः दर्शनम् नः कथम् नृणाम्

नितराम् म्रिय माणानाम् सम् सिद्धस्य वनीयसः

37 अतः पृच्छामि सम् सिद्धिम् योगिनाम् परमम् गुरुम्

पुरुषस् येह यत् कार्यम् म्रिय माणस्य सर्वथा

38 यच् छ्रोतव्यम् अथो जप्यम् यत् कर्तव्यम् नृभिः प्रभो

स्मर्तव्यम् भजनीयम् वा ब्रूहि यद्वा विपर्ययम्

39 नूनम् भगवतो ब्रह्मन् गृहेषु गृह मेधिनाम्

न लक्ष्यते ह्यवस् थानम् अपि गो दोहनम् क्वचित्

40 सूत उवाच

एवम् आभाषितः पृष्टः स राज्ञा श्लक्ष्ण या गिरा

प्रत्य भाषत धर्मज्ञो भगवान् बादरायणिः

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

प्रथम स्कन्दे एकोन विम्शो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ द्वितीय स्कन्दः प्रथमो ऽध्याय :

स्कन्द- 02: अध्याय- 01

01 श्री शुक उवाच

वरीयान् एष ते प्रश्नः कृतो लोक हितम् नृप

आत्मवित् सम्मतः पुम्साम् श्रोतव् यादिषु यः परः

02 श्रोतव् यादीनि राजेन्द्र नृणाम् सन्ति सहस्रशः

अपश् यताम् आत्म तत्त्वम् गृहेषु गृह मेधिनाम्

03 निद्रया ह्रियते नक्तम् व्यवा येन च वावयः

दिवा चार्थे हया राजन् कुटुम्ब भरणेन वा

04 देहा पत्य कलत् रादिषु आत्म सैन्येषु असत् स्वपि

तेषाम् प्रमत्तो निधनम् पश्यन् अपि न पश्यति

05 तस्माद् भारत सर्वात्मा भगवान् ईश्वरो हरिः

श्रोतव्यः कीर्ति तव्यश् च स्मर्तव् यश्चेच्छ ता भयम्

06 एतावान् साङ्ख्य योगाभ्याम् स्वधर्म परि निष्ठया

जन्म लाभः परः पुम्साम् अन्ते नारायण स्मृतिः

07 प्रायेण मुनयो राजन् निवृत्ता विधि षेधतः

नैर् गुण्यस्था रमन्ते स्म गुणानु कथने हरेः

08 इदम् भागवतम् नाम पुराणम् ब्रह्म सम्मितम्

अधीतवान् द्वापरादौ पितुर् द्वैपायना दहम्

09 परि निष्ठितो ऽपि नैर्गुण्य उत्तम श्लोक लीलया

गृहीत चेता राजर्षे आख्यानम् यद् अधीतवान्

10 तदहम् ते ऽभि धास्यामि महा पौरुषिको भवान्

यस्य श्रद्द धताम् आशु स्यान् मुकुन्दे मतिः सती

11 एतन् निर्विद्य मानानाम् इच्छताम् अकुतो भयम्

योगिनाम् नृप निर्णीतम् हरेर् नामानु कीर्तनम्

12 किम् प्रमत् तस्य बहुभिः परोक्षैर् हाय नैरिह

वरम् मुहूर्तम् विदितम् घटेत श्रेयसे यतः

13 खट्वाङ्गो नाम राजरुषिः ज्ञात्वे यत्तामि हायुषः

मुहूर्तात् सर्व मुत्सृज्य गतवान् अभयम् हरिम्

14 तवाप् येतर्हि कौरव्य सप्ताहम् जीविता वधिः

उपकल्प य तत् सर्वम् तावद् यत् साम्प रायिकम्

15 अन्तकाले तु पुरुष आगते गत साध्वसः

छिन्द् याद् असङ्ग शस्त्रेण स्पृहाम् देहे ऽनु ये चतम्

16 गृहात् प्रव् रजितो धीरः पुण्य तीर्थ जलाप् लुतः

शुचौ विविक्त आसीनो विधिवत् कल्पिता सने

17 अभ्यसेन् मनसा शुद्धम् त्रि वृद् ब्रह्म आक्षरम् परम्

मनो यच् छेत् जित श्वासो ब्रह्म बीजम् अविस्मरन्

18 नियच् छेद् विषयेभ्यो ऽक्षान् मनसा बुद्धि सारथि:
मन: कर्मभि राक्षिप्तम् शुभार्थे धारयेद् धिया
19 तत्रै कावयवम् ध्यायेद् अव्युच् छिन्नेन चेतसा
मनो निर्विषयम् युक्त्वा तत: किञ्चन न स्मरेत्
पदम् तत् परमम् विष्णो: मनो यत्र प्रसीदति
20 रजस् तमोभ्या माक्षिप्तम् विमूढम् मन आत्मन:
यच् छेद् धारणया धीरो हन्तिया तत् कृतम् मलम्
21 यस्याम् सन्धार्य माणायाम् योगिनो भक्ति लक्षण:
आशु सम्पद्यते योग आश्रयम् भद्र मीक्षत:
22 राजो उवाच
यथा सन्धार् यते ब्रह्मन् धारणा यत्र सम्मता
यादृशी वा हरे दाशु पुरुषस्य मनोमलम्
23 श्री शुक उवाच
जित आसनो जित श्वासो जित सङ्गो जितेन्द्रिय:
स्थूले भगवतो रूपे मन: सन्धार येद् धिया
24 विशेषस् तस्य देहो ऽयम् स्थविष्ठश् च स्थवीय साम्
यत् रेदम् द्रुश्यते विश्वम् भूतम् भव्यम् भवच्च सत्
25 आण्ड कोशे शरीरे ऽस्मिन् सप्ता वरण सम्युते
वैराज: पुरुषो यो ऽसौ भगवान् धारण् आश्रय:
26 पाताळ मेतस्य हि पाद मूलम् पठन्ति पार्ष्णि प्रपदे रसा तलम्
महा तलम् विश्व सृजो ऽथ गुल्फौ तला तलम् वै पुरुषस्य जङ्घे
27 द्वे जानुनी सुतलम् विश्व मूर्ते: ऊरुद्वयम् वितलम् चातलम् च
मही तलम् तज् जघनम् महीपते नभस् तलम् नाभिसरो गृणन्ति
28 उर: स्थलम् ज्योति रनीक मस्य ग्रीवा महर् वदनम् वै जनो ऽस्य
तपो रराटीम् विदुरादि पुम्स: सत्यम् तु शीर्षाणि सहस्र शीर्ष्ण:
29 इन्द्रा दयो बाहव आहु रुस्रा: कर्णौ दिश: श्रोत्रम् अमुष्य शब्द:

नासत्य दस्रौ परमस्य नासे घ्राणो ऽस्य गन्धो मुखम् अग्नि रिद्ध:

30 द्यौ रक्षिणी चक्षुर् अभूत् पतङ्ग: पक्ष्माणि विष्णोर् अहनी उभे च

तद् भ्रू विजृम्भ: परमेष्ठि धिष्ण्यम् आपो ऽस्य तालू रस एव जिह्वा

31 छन्दाम् स्यनन् तस्य शिरो गृणन्ति दम्ष्ट्रा यम: स्नेह कला द्विजानि

हासो जनोन् मादकरी च माया दुरन्त सर्गो यद् अपाङ्ग मोक्ष:

32 व्रीडोत्त रोष्ठो ऽधर एव लोभो धर्म: स्तनो ऽधर्म पथो ऽस्य पृष्ठम्

कस्तस्य मेढ्रम् वृषणौ च मित्रौ कुक्षि: समुद्रा गिरयो ऽस्थि सङ्घा:

33 नद्यो ऽस्य नाड्यो ऽथ तनूरु हाणि मही रुहा विश्व तनोर् नृपेन्द्र

अनन्त वीर्य: श्वसितम् मातरिश्वा गतिर्वय: कर्म गुण प्रवाह:

34 ईशस्य केशान् विदुरम्बु वाहान् वासस्तु सन्ध्याम् कुरुवर्य भूम्न:

अव्यक्त माहुर् हृदयम् मनश्च स चन्द्रमा: सर्व विकार कोश:

35 विज्ञान शक्तिम् महिमा मनन्ति सर्व आत्मनो ऽन्त: करणम् गिरित्रम्

अश्वाश्व तर् युष्ट्र गजान खानि सर्वे मृगा: पशव: श्रोणि देशे

36 वयाम्सि तद् व्याकरणम् विचित्रम् मनुर् मनीषा मनुजो निवास:

गन्धर्व विद्याधर चारण् आप्सर: स्वरस् मृतीर् असुरा नीक वीर्य:

37 ब्रह्माननम् क्षत्र भुजो महात्मा विड्रूरु रङ्घ्रिश् रित कृष्ण वर्ण:

नानाभिधा भीज्य गणोप पन्नो द्रव् यात्मक: कर्म वितान योग:

38 इयानसौ ईश्वर विग्रहस्य य: सन्नि वेश: कथितो मया ते

सन्धार्य ते ऽस्मिन् वपुषि स्थविष्ठे मन : स्व बुद्ध्या न यतो ऽस्ति किञ्चित्

39 स सर्व धीवृत् त्यनु भूत सर्व आत्मा यथा स्वप्न जनेक्षि तैक:

तम् सत्यम् आनन्द निधिम् भजेत नान् यत्र सज्जेद् यत आत्म पात:

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

द्वितीय स्कन्दे प्रथमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ द्वितीय स्कन्द: द्वितीयो ऽध्याय :

स्कन्द- 02: अध्याय- 02

01 श्री शुक उवाच

एवम् पुरा धारण यात्म योनि: नष्टाम् स्मृतिम् प्रत्य वरुध्य तुष्टात्

तथा स सर्जेदम् अमोघ दृष्टि: यथाप् ययात् प्राग् व्यवसाय बुद्धि:

02 शाब् दस्य हि ब्रह्मण एष पन्थायन् नामभिर् ध्यायति धीर पार्थै:

परिभ्रमम् स्तत्र न विन्द ते ऽर्थान् मायामये वासनया शयान:

03 अत: कविर् नामसु याव दर्थ: स्याद् अप्रमत्तो व्यवसाय बुद्धि:

सिद्धे ऽन्यथार्थे न यतेत तत्र परिश्रमम् तत्र समीक्ष माण:

04 सत्याम् क्षितौ किम् कशिपो: प्रयासै: बाहौ स्व सिद्धे ह्युप बर्हणै: किम्

सत्यञ् जलौ किम् पुरुधान्न पात्र्या दिग् वल्कलादौ सति किम् दुकूलै:

05 चीराणि किम् पथि न सन्ति दिशन्ति भिक्षाम्

नैवाङ्घ्रिपा: परभृत: सरितो ऽप्यशुष्यन्

रुद्धा गुहा: किम् अजितो ऽवति नोप सन्नान्

कस्माद् भजन्ति कवयो धन दुर् मदान्धान्

06 एवम् स्व चित्ते स्वत एव सिद्ध आत्मा प्रियो ऽर्थो भगवान् अनन्त:

तम् निर्वृतो निय तार्थो भजेत सम्सार हेतू परमश् च यत्र

07 कस्ताम् त्वना दृत्य परानु चिन्ताम् ऋते पशून् असतीम् नाम युञ्ज्यात्

पश्यञ्जनम् पतितम् वैतरण्याम् स्व कर्मजान् परि तापाञ्जु षाणम्

08 केचित् स्व देहान्तर् हृदयाव काशे प्रादेश मात्रम् पुरुषम् वसन्तम्

चतुर् भुजम् कञ्ज रथाङ्ग शङ्ख गदा धरम् धारणया स्मरन्ति

09 प्रसन्न वक्त्रम् नळिनाय तेक्षणम् कदम्ब किञ्जल्क पिशङ्ग वाससम्

लसन् महा रत्न हिरण्म याङ्गदम् स्फुरन् महारत्न किरीट कुण्डलम्

10 उन्निद्र हृत् पङ्कज कर्णि कालये योगेश्वरा स्थापित पाद पल्लवम्

श्री लक्ष्मणम् कौस्तुभ रत्न कन्धरम् अम्लान लक्ष्म्या वनमालया चितम्

11 विभूषितम् मेखलया अङ्गुळीयकैः महाधनैर् नूपुर कङ्कणा दिभिः

स्निग्धा मला कुञ्चित नील कुन्तलैः विरोच माना नन हास पेशलम्

12 अदीन लीला हसि तेक्षणोल् लसद् भ्रू भङ्ग सम्सूचित भूर् यनुग्रहम्

ईक्षेत चिन्ता मयम् एनम् ईश्वरम् यावन् मनो धारण याव तिष्ठते

13 एकैकशो ऽङ्गानि धियानु भाव येत् पादादि यावद् हसितम् गदा भृतः

जितम् जितम् स्थानम् अपोह्य धारयेत् परम् परम् शुद् ध्यति धीर् यथा यथा

14 यावन्न जाये त परावरे ऽस्मिन् विश्वेश्वरे द्रष्टरि भक्ति योगः

तावत्स् थवीयः पुरुषस्य रूपम् क्रिया वसाने प्रयतः स्मरेत

15 स्थिरम् सुखम् चासनम् आस्रितो यतिः यदा जिहासुः इममङ्ग लोकम्

काले च देशे च मनो न सज्जयेत् प्राणान् नियच्छेन् मनसा जितासुः

16 मनः स्व बुद्ध्या मलया नियम्य क्षेत्रज्ञ एताम् निन येत्त मात्मनि

आत्मानम् आत्मन् यवरुध्य धीरो लब्धो पशान्तिर् विरमेत कृत्यात्

17 न यत्र कालो ऽनिमिषाम् परः प्रभुः कुतो नु देवा जगताम् य ईशिरे

न यत्र सत्त्वम् न रजस् तमश् च न वै विकारो न महान् प्रधानम्

18 परम् पदम् वैष्णव मामनन्ति तद् यन्नेति नेतीति अतदुत् सिसृक् षवः

विसृज्य दौरात्म्यम् अनन्य सौहृदा हृदोप गुह्याह पदम् पदे पदे

19 इत्थम् मुनिस्तू परमेद् व्यवस् थितो विज्ञान दृग्वीर् य सुरन्धि ताशयः

स्व पार्ष्णिना पीड्य गुदम् ततो ऽनिलम् स्थानेषु षट्सून् नमयेज्जि तक्लमः

20 नाभ्याम् स्थितम् हृद् यधिरोप्य तस्माद् उदान गत् योर् असितम् नयेन्मुनिः

ततो ऽनु सन्धा यधिया मनस्वी स्वतालु मूलम् शनकैर्न येत

21 तस्माद् भ्रुवो रन्तर मुन्न येत निरुद्ध सप्ता यतनो ऽनपेक्षः

स्थित्वा मुहूर्तार् धम् अकुण्ठ दृष्टिः निर्भिद्य मूर्धन् विसृजेत् परम् गतः

22 यदि प्रयास् यन्नृप पार मेष्ठ्यम् वैहाय साना मुत यद् विहारम्

अष्टाधि पत्यम् गुण सन्निवाये सहैव गच्छेन् मनसेन्द्रि यैश्च

23 योगेश् वराणाम् गति माहु रन्तः बहिस् त्रि लोक्याः पवनान्त रात्मनाम्

न कर्म भिस्ताम् गति माप्नु वन्ति विद्या तपो योग समाधि भाजाम्

24 वैश् वानरम् याति विहाय सा गतः सुषुम्णया ब्रह्म पथेन शोचिषा

विधूत कल्को ऽथ हरेर् उदस्तात् प्रयाति चक्रम् नृप शैशु मारम्

25 तद् विश्व नाभिम् त्वति वर्त्य विष्णोः अणीयसा विरजेन् आत्मनैकः

नमस् कृतम् ब्रह्म विदा मुपैति कल्पा युषो यद् विबुधा रमन्ते

26 अथो अनन्तस्य मुखान लेन दन्दह् यमानम् स निरीक्ष्य विश्वम्

निर्याति सिद्धेश् वर जुउष्ट धिष्ण्यम् यद् द्वै परार्ध्यम् तदु पार मेष्ठ्यम्

27 न यत्र शोको न जरा न मृत्युः नार्तिर् न चोद्वेग ऋते कुतश् चित्

यच् चित्ततो ऽदः कृपया निदम् विदाम् दुरन्त दुःख प्रभवानु दर्शनात्

28 ततो विशेषम् प्रति पद्य निर्भयः तेनात्म नापो ऽनल मूर्ति रत् वरन्

ज्योतिर् मयो वायु मुपेत्य काले वाय्व् आत्मना खम् बृहद् आत्म लिङ्गम्

29 घ्राणेन गन्धम् रसनेन वै रसम् रूपम् तु दृष्ट्या श्वसनम् त्वचैव

श्रोत्रेण चोपेत्य नभो गुणत्वम् प्राणेन चाकूति मुपैति योगी

30 स भूत सूक्ष् मेन्द्रिय सन्नि कर्षम् मनोमयम् देवमयम् विकार्यम्

सम्साद्य गत्या सह तेन याति विज्ञान तत्त्वम् गुणसन् निरोधम्

31 तेनात्म नात्मानम् उपैति शान्तम् आनन्दम् आनन्द मयो ऽवसाने

एताम् गतिम् भागवतीम् गतो यः स वै पुनर् नेह विषज्ज ते ऽङ्ग

32 एते सृती ते नृप वेद गीते त्वयाभि पृष्टे ह सनातने च

ये वै पुरा ब्रह्मण आह प्रुष्ट आराधितो भगवान् वासुदेवः

33 न ह्यतो ऽन्यः शिवः पन्था विशतः सम्सृ ताविह

वासुदेवे भगवति भक्ति योगो यतो भवेत्

34 भगवान् ब्रह्म कार्त्स् न्येन त्रिरन् वीक्ष्य मनीषया

तद् अध्य वस्यत् कूटस्थो रतिर् आत्मन् यतो भवेत्

35 भगवान् सर्व भूतेषु लक्षितः स्वात्मना हरिः

दृश्यैर् बुद् ध्यादिभिर् द्रष्टा लक्षणैर् अनुमा पकैः

36 तस्मात् सर्वात्मना राजन् हरि: सर्वत्र सर्वदा

श्रोतव्य: कीर्ति तव् यश्च स्मर्तव्यो भगवान् नृणाम्

37 पिबन्ति ये भगवत आत्मन: सताम् कथामृतम् श्रवण पुटेषु सम्भृ तम्

पुनन्ति ते विषय विदूषि ताशयम् व्रजन्ति तच् चरण सरोरु हान्तिकम्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

द्वितीय स्कन्दे द्वितीयो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ द्वितीय स्कन्द: त्रुतीयो ऽध्याय :

स्कन्द- 02: अध्याय- 03

01 श्री शुक उवाच

एव मेतन् निगदितम् पृष्ट वान् यद् भवान् मम

नृणाम् यन्म्रिय माणानाम् मनुष् येषु मनीषिणाम्

02 ब्रह्म वर्च सकामस्तु यजेत ब्रह्मण : पतिम्

इन्द्रम् इन्द्रिय कामस्तु प्रजा काम: प्रजा पतीन्

03 देवीम् मायाम् तु श्री काम: तेजस् कामो विभावसुम्

वसुकामो वसून् रुद्रान् वीर्य कामो ऽथ वीर्यवान्

04 अन्नाद्य कामस् त्वदितिम् स्वर्ग कामो ऽदिते: सुतान्

विश्वान् देवान् राज्य काम: साध्यान् सम्साधको विशाम्

05 आयुष् कामो ऽश्विनौ देवौ पुष्टि काम इलाम् यजेत्

प्रतिष्ठा काम: पुरुषो रोदसी लोक मातरौ

06 रूपाभि कामो गन्धर्वान् स्त्री कामो ऽप्सर ऊर्वशीम्

आधि पत्य कामः सर्वेषाम् यजेत परमेष्ठिनम्

07 यज्ञम् यजेद् यशस् कामः कोश कामः प्रचेतसम्

विद्या कामस्तु गिरिशम् दाम्पत् यार्थ उमाम् सतीम्

08 धर् मार्थ उत्तम श्लोकम् तन्तुः तन्वन् पितॄन् यजेत्

रक्षा कामः पुण्य जनान् ओजस् कामो मरुद् गणान्

09 राज्य कामो मनून् देवान् निरृतिम् त्वभि चरन् यजेत्

काम कामो यजेत् सोमम् अकामः पुरुषम् परम्

10 अकाम : सर्व कामो वा मोक्ष काम उदार धीः

तीव्रेण भक्ति योगेन यजेत पुरुषम् परम्

11 एता वाने वयजताम् इह निः श्रेय सोदयः

भगवत् यचलो भावो यद् भागवत सङ्गतः

12 ज्ञानम् यदा प्रति निवृत्त गुणोर्मि चक्रम्

आत्म प्रसाद उत यत्र गुणेष्व सङ्गः

कैवल्य सम्मत पथस् त्वथ भक्ति योगः

को निर् वृतो हरि कथासु रतिम् न कुर्यात्

13 शौनक उवाच

इत् यभि व्याहृतम् राजा निशम्य भरतर् षभः

किमन् यत् पृष्टवान् भूयो वैयासकिम् ऋषिम् कविम्

14 एतच् छुश्रूष ताम् विद्वन् सूत नो ऽर्हसि भाषि तुम्

कथा हरि कथो दर्काः सताम् स्युः सदसि ध्रुवम्

15 स वै भागवतो राजा पाण्डवेयो महा रथः

बाल क्रीडन कैः क्रीडन् कृष्ण क्रीडाम् य आददे

16 वैयासकिश् च भगवान् वासुदेव परायणः

उरुगाय गुणो दाराः सताम् स्युर्हि समागमे

17 आयुर् हरति वै पुम्साम् उद् यन् नस्तम् च यन् नसौ

तस् यर्ते यत् क्षणो नीत उत्तम श्लोक वार्तया

18 तरवः किम् न जीवन्ति भस्त्राः किम् न श्वसन्त् युत

न खादन्ति न मेहन्ति किम् ग्रामे पशवो ऽपरे

19 श्व विड्वरा होष्ट्र खरैः सम्स्तुतः पुरुषः पशुः

न यत् कर्ण पथो पेतो जातु नाम गदा ग्रजः

20 बिले बतो रुक्रम विक्रमान्ये न शृण्वतः कर्णपुटे नरस्य

जिह्वासती दार्दुरि केव सूत न चोप गायति उरुगाय गाथाः

21 भारः परम् पट्ट किरीट जुष्टम् अप्युत्त माङ्गम् न नमेन् मुकुन्दम्

शावौ करौ नो कुरुत सपर्याम् हरेर् लसत् काञ्चन कङ्कणौ वा

22 बर्हायिते ते नयने नराणाम् लिङ्गानि विष्णोर् न निरीक्ष तो ये

पादौ नृणाम् तौ द्रुम जन्म भाजौ क्षेत्राणि नानु व्रजते हरेर् यौ

23 जीवञ् छवो भागवत आङ्घ्रि रेणुम् न जातु मर्त्यो ऽभिल भेत यस्तु

श्री विष्णु पद्या मनुजस् तुळस्याः श्वसञ् छवो यस्तु न वेद गन्धम्

24 त दश्म सारम् हृदयम् बतेदम् यद् गृह्य माणैर् हरि नाम धेयैः

न विक्रियेता थ यदा विकारो नेत्रे जलम् गात्र रुहेषु हर्षः

25 अथाभि धेह् यङ्ग मनो ऽनुकूलम् प्रभाषसे भागवत प्रधानः

यदा ह वैयासकिः आत्म विद्या विशा रदो नृपतिम् साधु पृष्टः

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

द्वितीय स्कन्दे त्रुतीयो ऽध्याय ः||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ द्वितीय स्कन्दः चतुर्थ्थो ऽध्याय ः

स्कन्द- 02: अध्याय- 04

01 सूत उवाच

वैयासके रिति वचः तत्त्व निश्चयम् आत्मनः

उपधार्य मतिम् कृष्णे औत्तरेयः सतीम् व्यधात्

02 आत्म जाया सुता गार पशुद्र विण बन्धुषु

राज्ये चाविकले नित्यम् विरूढाम् ममताम् जहौ

03 पप्रच्छ चेममे वार्थम् यन्माम् पृच् छथ सत्तमाः

कृष्णानु भाव श्रवणे श्रद्द धानो महा मनाः

04 सम्स्थाम् विज्ञाय सन्न्यस्य कर्म त्रै वर्गिकम् च यत्

वासुदेवे भगवति आत्म भावम् दृढम् गतः

05 राजो उवाच

समीचीनम् वचो ब्रह्मन् सर्व ज्ञस्य तवा नघ

तमो विशीर् यते मह्यम् हरेः कथ यतः कथाम्

06 भूय एव विवित् सामि भगवान् आत्म मायया

यथेदम् सृजते विश्वम् दुर् विभाव्यम् अधीश् वरैः

07 यथा गोपा यति विभुः यथा सम्यच्छ ते पुनः

याम् याम् शक्तिम् उपाश् रित्य पुरु शक्तिः परः पुमान्

आत्मानम् क्रीडयन् क्रीडन् करोति विकरोति च

08 नूनम् भगवतो ब्रह्मन् हरेर् अद्भुत कर्मणः

दुर् विभाव्यम् इवा भाति कवि भिश्चापि चेष्टितम्

09 यथा गुणाम्स्तु प्रकृतेः युगपत् क्रमशो ऽपिवा

बिभर्ति भूरिशस् त्वेकः कुर्वन् कर्माणि जन्मभिः

10 विचिकित् सितमे तन्मे ब्रवीतु भगवान् यथा

शाब्दे ब्रह्मणि निष्णातः परस् मिम्श्च भवान् खलु

11 सूत उवाच

इत् युपा मन्त्रितो राज्ञा गुणानु कथने हरेः

हृषी केशम् अनुस् मृत्य प्रति वक्तुम् प्रचक्रमे

12 श्री शुक उवाच

नमः परस्मै पुरुषाय भूयसे सद् उद्भवस् थान निरोध लीलया

गृहीत शक्ति त्रित याय देहिनाम् अन्तर् भवा यानु पलक्ष्य वर्त्मने

13 भूयो नमः सद् वृजिनच् छिदे ऽसताम् असम्भ वाय अखिल सत्त्व मूर्तये

पुम्साम् पुनः पारम हम्स्य आश्रमे व्यवस्थि तानाम् अनुम् ऋग्य दाशुषे

14 नमो नमस्ते ऽस्तु ऋषभाय सात्वताम् विदूर काष्ठाय मुहुः कुयोगिनाम्

निरस्त साम् याति शयेन राधसा स्वधामनि ब्रह्मणि रम्स्यते नमः

15 यत् कीर्तनम् यत् स्मरणम् यद् ईक्षणम् यद् वन्दनम् यच् छ्रवणम् यद् अर्हणम्

लोकस्य सद्यो विधुनोति कल्मषम् तस्मै सुभद्रश् रवसे नमो नमः

16 विचक्षणा यच् चरणोप सादनात् सङ्गम् व्युदस्य उभयतो ऽन्तर् आत्मनः

विन्दन्ति हि ब्रह्म गतिम् गत क्लमाः तस्मै सुभद्रश् रवसे नमो नमः

17 तपस्विनो दान परा यशस्विनो मनस्विनो मन्त्र विदः सुमङ्गळाः

क्षेमम् न विन्दन्ति विनायद् अर्पणम् तस्मै सुभद्रश् रवसे नमो नमः

18 किरात हूणान्ध्र पुळिन्द पुल्कशा आभीर गङ्गा यवनाः खसा दयः

ये ऽन्येच पापा यदु पाश्रय आश्रयाः शुध्यन्ति तस्मै प्रभ विष्णवे नमः

19 स एष आत्मात्म वताम् अध् ईश्वरः त्रयी मयो धर्म मयस् तपोमयः

गतव्य लीकैः अज शङ्क रादिभिः वितर्क्य लिङ्गो भगवान् प्रसीद ताम्

20 श्रियः पतिः यज्ञ पतिः प्रजा पतिः धियाम् पतिर् लोक पतिर् धरा पतिः

पतिर् गतिश् चान्धक वृष्णि सात्वताम् प्रसीदताम् मे भगवान् सताम् पतिः

21 यद् अङ्घ्र् यभि ध्यान समाधि धौतया धियानु पश्यन्ति हि तत्त्वम् आत्मनः

वदन्ति चैतत् कवयो यथा रुचम् स मे मुकुन्दो भगवान् प्रसीदताम्

22 प्रचो दिता येन पुरा सरस्वती वितन् वता जस्य सतीम् स्मृतिम् हृदि

स्व लक्षणा प्रादु रभूत्कि लास्यतः स मे ऋषीणाम् ऋषभः प्रसीद ताम्

23 भूतैर् महद् भिर्य इमाः पुरो विभुः निर्माय शेते यद् अमूषु पूरुषः

भुङ्क्ते गुणान् षोडश षोडश् आत्मकः सो ऽलङ्कृ षीष्ट भगवान् वचाम्सि मे

24 नमस्तस्मै भगवते वासुदेवाय वेधसे

पपुर् ज्ञान मयम् सौम्या यन् मुखाम्बुरु हासवम्

25 एतद् एवात्म भू राजन् नारदाय विपृच् छते

वेद गर्भो ऽभ्यधात् साक्षाद् यदाह हरिर् आत्मन:

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

द्वितीय स्कन्दे चतुर्थो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ द्वितीय स्कन्द: पञ्चमो ऽध्याय :

स्कन्द- 02: अध्याय- 05

01 नारद उवाच

देवदेव नमस्ते ऽस्तु भूत भावन पूर्वज

तद् विजानीहि यज्ज्ञानम् आत्म तत्त्व निदर्शनम्

02 यद् रूपम् यद् अधिष्ठानम् यत: सृष्ट मिदम् प्रभो

यत् सम्स्थम् यत् परम् यच्च तत् तत्त्वम् वद तत् त्वत:

03 सर्वम् हयेतद् भवान् वेद भूत भव्य भवत् प्रभु:

करा मलक वद् विश्वम् विज्ञाना वसितम् तव

04 यद् विज्ञानो यदाधारो यत् परस्त्वम् यद् आत्मक:

एक: सृजसि भूतानि भूतैर् एवात्म मायया

05 आत्मन् भावयसे तानि न परा भावयन् स्वयम्

आत्म शक्तिम् अवष्टभ्य ऊर्ण नाभिर् इवाक्लम:

06 नाहम् वेद परम् हयस्मिन् नापरम् न समम् विभो

नाम रूप गुणैर् भाव्यम् सदसत् किञ्चिद् अन्यत:

07 स भवान् अचरद् घोरम् यत् तपः सु समाहितः

तेन खेद यसे नस्त्वम् परा शङ्काम् प्रयच्छसि

08 एतन् मे पृच् छतः सर्वम् सर्वज्ञ सकलेश् वर

विजा नीहि यथै वेदम् अहम् बुध्ये ऽनुशासि तः

09 ब्रह्मो उवाच

सम्यक् कारुणि कस् येदम् वत्सते विचि कित्सितम्

यदहम् चोदितः सौम्य भगवद् वीर्य दर्शने

10 नान् ऋतम् तव तच् चापि यथा माम् प्रब्र वीषि भोः

अविज्ञाय परम् मत्त एता वत्त्वम् यतो हि मे

11 येन स्वरोचिषा विश्वम् रोचितम् रोच याम् यहम्

यथार् को ऽग्निः यथा सोमो यथर् क्षग्र हता रकाः

12 तस्मै नमो भगवते वासु देवाय धीमहि

यन् मायया दुर् जयया माम् ब्रुवन्ति जगद् गुरुम्

13 विलज्ज मानया यस्य स्थातुम् ईक्षा पथे ऽमुया

विमोहिता विकत् थन्ते ममाह मिति दुर् धियः

14 द्रव्यम् कर्म च कालश् च स्वभावो जीव एव च

वासुदेवात् परो ब्रह्मन् न चान्यो ऽर्थो ऽस्ति तत्त्वतः

15 नारायण परा वेदा देवा नारायणा अङ्गजाः

नारायण परा लोका नारायण परा मखाः

16 नारायण परो योगो नारायण परम् तपः

नारायण परम् ज्ञानम् नारायण परा गतिः

17 तस् यापि द्रष्टु रीशस्य कूटस् थस् याखिल् आत्मनः

सृज्यम् सृजामि सृष्टो ऽहम् ईक्षयै वाभि चोदितः

18 सत्त्वम् रजस् तम इति निर् गुणस्य गुणास् त्रयः

स्थिति सर्ग निरो धेषु गृहीता मायया विभोः

19 कार्य कारण कर्तृत्वे द्रव्य ज्ञान क्रियाश्रयाः

बध् नन्ति नित्यदा मुक्तम् मायिनम् पुरुषम् गुणाः

20 स एष भगवान् लिङ्गैः त्रिभि रेभिर् अधोक्षजः

स्व लक्षित गतिर् ब्रह्मन् सर्वेषाम् मम चेश्वरः

21 कालम् कर्म स्वभावम् च मायेशो मायया स्वया

आत्मन् यदृच् छया प्राप्तम् विबु भूषुर् उपाददे

22 कालाद् गुण व्यति करः परिणामः स्व भावतः

कर्मणो जन्म महतः पुरुषा धिष्ठि ताद् अभूत्

23 मह तस्तु विकुर् वाणाद् रजः सत् त्वोप बृम्हि तात्

तमः प्रधानस् त्व भवद् द्रव्य ज्ञान क्रियात्मकः

24 सो ऽहङ्कार इति प्रोक्तो विकुर्वन् सम भूत् त्रिधा

वै कारिकस् तैजसश् च तामसश् चेति यद् भिदा

द्रव्य शक्तिः क्रिया शक्तिः ज्ञान शक्तिर् इति प्रभो

25 तामसाद् अपि भूतादेर् विकुर् वाणाद् अभून् नभः

तस्य मात्रा गुणः शब्दो लिङ्गम् यद् द्रष्टृ दृश्ययोः

26 नभसो ऽथ विकुर्वाणाद् अभूत् स्पर्श गुणो ऽनिलः

परान् वयाच् छब्द वाम्श् च प्राण ओजः सहो बलम्

27 वायोरपि विकुर् वाणात् काल कर्म स्वभाव तः

उद पद्यत तेजो वै रूप वत् स्पर्श शब्द वत्

28 तेज सस्तु विकुर् वाणाद् आसी दम्भो रसात् मकम्

रूप वत् स्पर्श वच् चाम्भो घोष वच्च परान् वयात्

29 विशे षस्तु विकुर् वाणाद् अम्भसो गन्ध वान भूत्

परान् वयाद् रस स्पर्श शब्द रूप गुणान् वितः

30 वैकारिकान् मनो जज्ञे देवा वैकारिका दश

दिग् वातार्क प्रचे तो ऽश्वि वह्नीन्द्रो पेन्द्र मित्रकाः

31 तैज सात्तु विकुर् वाणाद् इन्द्रियाणि दशा भवन्

ज्ञान शक्तिः क्रिया शक्तिः बुद्धिः प्राणश् च तैजसौ

श्रोत्रम् त्वग् घ्राण दृग् जिह्वा वाग्दोर् मेढ़ राङ्घ्रि पायव:

32 यदै ते ऽसङ्गता भावा भू तेन्द्रिय मनो गुणा:

यदा यतन निर्माणे न शेकुर् ब्रह्म वित्तमम्

33 तदा सम्हत्यच् आन्योन्यम् भगवच् छक्ति चोदिता:

सद सत्त्वम् उपादाय चोभयम् ससृ जुहर्यद:

34 वर्ष पूग सहस्रान् ते त दण्डम् उदके शयम्

काल कर्म स्वभा वस्थो जीवो ऽजीवम् अजीवयत्

35 स एव पुरुषस् तस्माद् अण्डम् निर्भिद्य निर्गत:

सहस्रोर् वङ्घ्रिबाह् वक्ष: सहस्राननन शीर्ष वान्

36 यस्येहा वयवैर् लोकान् कल्प यन्ति मनीषिण:

कट्यादि भिरध: सप्त सप्तोर् ध्वम् जघन् आदिभि:

37 पुरुषस्य मुखम् ब्रह्म क्षत्र मेतस्य बाहव:

ऊर्वोर् वैश्यो भगवत: पद्भ्याम् शूद्रोभ् यजा यत

38 भूर्लोक: कल्पित: पद्भ्याम् भुवर्लोको ऽस्य नाभित:

हृदा स्वर्लोक उरसा महर्लोको महात्मन:

39 ग्री वायाम् जन लोको ऽस्य तपो लोक: स्तनद् वयात्

मूर्धभि: सत्य लोकस्तु ब्रह्म लोक: सनातन:

40 तत् कट्याम् चातलम् क्लृप्तम् ऊरुभ्याम् वितलम् विभो:

जानुभ्याम् सुतलम् शुद्धम् जङ्घाभ् याम् तु तला तलम्

41 महा तलम् तु गुल्फाभ्याम् प्रप दाभ्याम् रसा तलम्

पाताळम् पाद तलत इति लोक मय: पुमान्

42 भूर्लोक: कल्पित: पद्भ्याम् भुवर् लोको ऽस्य नाभित:

स्वर् लोक: कल्पितो मूर्ध्ना इति वा लोक कल्पना

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

द्वितीय स्कन्दे पञ्चमो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ द्वितीय स्कन्दः षष्टो ऽध्याय :

स्कन्द- *02:* अध्याय- *06*

*01* ब्रह्मो उवाच

वाचाम् वह्नेर् मुखम् क्षेत्रम् छन्द साम् सप्त धातवः

हव्य कव्याम् ऋतान् नानाम् जिह्वा सर्वर सस्य च

*02* सर्वा सूनाम् च वायोश् च तन्नासे परमायणे

अश्विनो रोषधी नाम् च घ्राणो मोद प्रमोदयोः

*03* रूपाणाम् तेजसाम् चक्षुः दिवः सूर्यस्य चाक्षि णी

कर्णौ दिशाम् च तीर्थानाम् श्रोत्रम् आकाश शब्दयोः

तद् गात्रम् वस्तु साराणाम् सौभगस्य च भाजनम्

*04* त्वगस्य स्पर्श वायोश् च सर्व मेधस्य चैव हि

रोमाण् युद् भिज्ज जातीनाम् यैर्वा यज्ञस्तु सम्भृतः

*05* केशश् मश्रु नखान् यस्य शिला लोहा भ्रविद् युताम्

बाहवो लोक पालानाम् प्रायशः क्षेम कर्मणाम्

*06* विक्रमो भूर् भुवः स्वश् च क्षेमस्य शरणस्य च

सर्व काम वरस् यापि हरेश् चरण आस्पदम्

*07* अपाम् वीर्यस्य सर्गस्य पर्जन्यस्य प्रजापतेः

पुम्सः शिश्न उपस् थस्तु प्रजात् यानन्द निर्वृतेः

*08* पायुर् यमस्य मित्रस्य परि मोक्षस्य नारद

हिम्साया निरृतेर् मृत्योः निरयस्य गुदम् स्मृतः

*09* परा भूतेर् अधर्मस्य तमसश् चापि पश्चिमः

नाड्यो नदनदी नाम् तु गोत्राणाम् अस्थि सम्हतिः

10 अव्यक् तरस सिन्धूनाम् भूतानाम् निधनस्य च

उदरम् विदितम् पुम्सो हृदयम् मनसः पदम्

11 धर्मस्य मम तुभ्यम् च कुमाराणाम् भवस्य च

विज्ञानस्य च सत्त्वस्य परस् यात्मा परायणम्

12 अहम् भवान् भवश् चैव त इमे मुनयो ऽग्रजाः

सुरा सुर नरा नागाः खगा मृग सरीसृपाः

13 गन्धर्वाप् सरसो यक्षा रक्षो भूत गणोरगाः

पशवः पितरः सिद्धा विद् याध्राश् चारणा द्रुमाः

14 अन्ये च विविधा जीवा जलस् थलन भौकसः

ग्रहर्क्ष केतवस् ताराः तडितः स्तन यित्नवः

15 सर्वम् पुरुष एवेदम् भूतम् भव्यम् भवच् च यत्

तेनेद मावृतम् विश्वम् वितस्तिम् अधि तिष्ठति

16 स्वधिष्ण्यम् प्रत पन् प्राणो बहिश् च प्रत पत्यसौ

एवम् विराजम् प्रतपन्ः तपत् यन्तर् बहिः पुमान्

17 सो ऽमृतस् या भयस् येशो मर्त्य मन्नम् यदत् यगात्

महिमै ष ततो ब्रह्मन् पुरुषस्य दुरत् ययः

18 पादेषु सर्व भूतानि पुम्सः स्थिति पदो विदुः

अमृतम् क्षेमम् अभयम् त्रि मूर्ध्नो ऽधायि मूर्धसु

19 पादास् त्रयो बहिश् चासन् अप्रजानाम् य आश्रमाः

अन्तस् त्रि लोक्यास् त्वपरो गृह मेधो ऽबृहद् व्रतः

20 सृती विचक्रमे विश्वम् साशना नशने उभे

यद विद्या च विद्या च पुरुषस्तू [उ]भया श्रयः

21 यस्मा दण्डम् विराड् जज्ञे भूतेन् द्रिय गुणात्मकः

तद् द्रव्यम् अत्यगाद् विश्वम् गोभिः सूर्य इवातपन्

22 यदास्य नाभ्यान् नळिनाद् अहमासम् महात् मनः

नाविदम् यज्ञ सम्भारान् पुरुषावय वाद्रुते

23 तेषु यज्ञस्य पशवः सवनस् पतयः कुशाः

इदम् च देव यजनम् कालश् चोरु गुणान् वितः

24 वस्तून् योषधयः स्नेहा रसलोह मृदो जलम्

ऋचो यजूम्षि सामानि चातुर् होत्रम् च सत्तम

25 नाम धेयानि मन्त्राश् च दक्षिणाश् च व्रतानि च

देव तान् उक्रमः कल्पः सङ्कल्पस् तन्त्रम् एव च

26 गतयो मतयश् श्रद्धा प्रायश् चित्तम् समर्पणम्

पुरुषा वयवै रेते सम्भाराः सम्भृता मया

27 इति सम्भृत सम्भारः पुरुषा वय वैरहम्

तमेव पुरुषम् यज्ञम् तेनै वायजम् ईश्वरम्

28 ततस्ते भ्रातर इमे प्रजानाम् पतयो नव

अयजन् व्यक्तम् अव्यक्तम् पुरुषम् सु समाहिताः

29 ततश् च मनवः काले ईजिरे ऋषयो ऽपरे

पितरो विबुधा दैत्या मनुष्याः क्रतुभिर् विभुम्

30 नारायणे भगवति तदिदम् विश्व माहितम्

गृहीत मायोरु गुणः सर्गादौ अगुणः स्वतः

31 सृजामि तन्नि युक्तो ऽहम् हरो हरति तद् वशः

विश्वम् पुरुष रूपेण परिपाति त्रि शक्ति धृक्

32 इति ते ऽभिहितम् तात यथेदम् अनु पृच् छसि

नान्यद् भगवतः किञ्चिद् भाव्यम् सद सद् आत्मकम्

33 न भारती मे ऽङ्ग मृषोप लक्ष्यते न वै क्वचिन्मे मनसो मृषा गतिः

न मे हृषी काणि पतन्त्य सत् पथे यन्मे हृदौत् कण्ठ्य वता धृतो हरिः

34 सो ऽहम् समाम् नायमयस् तपो मयः प्रजा पतीनाम् अभिवन्दि तः पतिः

आस्थाय योगम् निपुणम् समाहितः तम् नाध्य गच्छम् यत आत्म सम्भवः

35 नतो ऽस्म्यहम् तच् चरणम् समीयुषाम् भवच् छिदम् स्वस्त् ययनम् सुमङ्गळम्

यो ह्यात्म माया विभवम् स्म पर्यगाद् यथा नभः स्वान्तम् अथापरे कुतः

36 नाहम् न यूयम् यद्द ताम् गतिम् विदुः न वामदेवः किमुता परे सुराः

तन् मायया मोहित बुद्ध यस्त् विदम् विनिर् मितम् चात्म समम् विचक्ष् महे

37 यस् यावतार कर्माणि गायन्ति ह्यस्म दादयः

न यम् विदन्ति तत्त्वेन तस्मै भगवते नमः

38 स एष आद्यः पुरुषः कल्पे कल्पे सृजत् यजः

आत्मात्मन् यात्म नात्मानम् सम्यच्छति च पाति च

39 विशुद्धम् केवलम् ज्ञानम् प्रत्यक्सम् यग वस्थितम्

सत्यम् पूर्णम् अनाद् यन्तम् निर्गुणम् नित्य मद्वयम्

40 ऋषे विदन्ति मुनयः प्रशान्त् आत्मेन्द्रिया शयाः

यदा तदेवा सत् तर्कैः तिरोधी येत विप्लुतम्

41 आद्यो ऽवतारः पुरुषः परस्य कालः स्वभावः सदसन् मनश् च

द्रव्यम् विकारो गुण इन्द्रियाणि विराट् स्वराट् स्थास्नु चरिष्णु भूम्नः

42 अहम्भवो यज्ञ इमे प्रजेशा दक्षा दयो ये भवदाद यश्च

स्वर् लोक पाला : खग लोक पाला नृ लोक पाला स्तल लोक पालाः

43 गन्धर्व विद्याधर चारणेशा ये यक्ष रक्षोर् अगना गनाथाः

ये वा ऋषीणाम् ऋषभाः पित्ऋणाम् दैत् येन्द्र सिद् धेश्वर दान वेन्द्राः

अन्येच ये प्रेत पिशाच भूत कूष्माण्ड यादो मृग पक्ष्य धीशाः

44 यत् किञ्च लोके भगवन् महस्वद् ओजः सहस्वद् बलवत् क्षमावत्

श्री ह्री विभूत् यात्मवद् अद्भु तार्णम् तत्त्वम् परम् रूप वद स्वरूपम्

45 प्राधान् यतो यान् ऋष आमनन्ति लीलाव तारान् पुरुषस्य भूम्नः

आपी यताम् कर्ण कषाय शोषान् अनुक्र मिष्ये त इमान् सुपेशान्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

द्वितीय स्कन्दे षष्टो ऽध्याय ः॥

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ द्वितीय स्कन्दः सप्तमो ऽध्याय :

स्कन्द- 02: अध्याय- 07

01 ब्रह्मो उवाच

यत्रो द्यतः क्षितित लोद् धरणाय बिभ्रत्

क्रौडीम् तनुम् सकल यज्ञ मयीम् अनन्तः

अन्तर् महार्णव उपागतम् आदि दैत्यम्

तम् दम्ष्ट्र याद्रिम् इव वज्रधरो ददार

02 जातो रुचेर जनयत् सुयमान् सुयज्ञ

आकूति सूनु रमरानथ दक्षिणा याम्

लोक त्रयस्य महतीम् अहरद्य दार्तिम्

स्वायम्भु वेन मनुना हरि रित्य नूक्तः

03 जज्ञे च कर्दम गृहे द्विज देव हूत्याम्

स्त्रीभिः समम् नवभिर् आत्म गतिम् स्वमात्रे

ऊचे य यात्म शमलम् गुण सङ्ग पङ्कम्

अस्मिन् विधूय कपिलस्य गतिम् प्रपेदे

04 अत्रेर पत्यमभि काङ्क्षत आह तुष्टो

दत्तो मयाह मिति यद् भगवान् स दत्तः

यत् पाद पङ्कज पराग पवित्र देहा

योगर्द् धिमा पुरु भयीम् यदुहै हयाद्याः

05 तप्तम् तपो विविध लोक सिसृक्षया मे

आदौ सनात् स्व तपसः स चतुः सनो ऽभूत्

प्राक् कल्प सम्प्लव विनष्टम् इहात्म तत्त्वम्

सम्यग्ज गाद मुनयो यद चक्षत् आत्मन्

06 धर्मस्य दक्ष दुहितर् यज निष्ट मूर्त्याम्

नारायणो नर इति स्व तपः प्रभावः

दृष्ट् वात्मनो भगवतो नियमाव लोपम्

देव् यस्त् वनङ्ग पृतना घटितुम् न शेकुः

07 कामम् दहन्ति कृतिनो ननु रोष दृष्ट्या

रोषम् दहन्त मुत ते न दहन्त्य सह्यम्

सो ऽयम् यदन्त रमलम् प्रविशन् बिभेति

कामः कथम् नु पुनरस्य मनः श्रयेत

08 विद्धः सपत् न्युदित पत्रि भिरन्ति राज्ञो

बालो ऽपि सन् नुपगतस् तपसे वनानि

तस्मा अदाद् ध्रुव गतिम् गृणते प्रसन्नो

दिव्याः स्तुवन्ति मुनयो यदु पर्य धस्तात्

09 यद् वेन मुत्पथ गतम् द्विज वाक्य वज्र

विप्लुष्ट पौरुष भगम् निरये पतन् तम्

त्रात् वार्थितो जगति पुत्र पदम् च लेभे

दुग्धा वसूनि वसुधा सकलानि येन

10 नाभेरसौ ऋषभ आस सुदेवि सूनुः

यो वै चचार समदृग् जड योग चर्याम्

यत् पार महम्स्यम् ऋषयः पदमा मनन्ति

स्वस्थः प्रशान्त करणः परि मुक्त सङ्गः

11 सत्रे ममास भगवान् हय शीर षाथो

साक्षात् स यज्ञ पुरुष स्तप नीय वर्णः

छन्दो मयो मख मयो ऽखिल देव तात्मा

वाचो बभू वुरुशतीः श्वस तो ऽस्य नस्तः

12 मत्स्यो युगान्त समये मनु नोप लब्धः

क्षोणी मयो निखिल जीव निकाय केतः

विस्रम् सिता नुरुभये सलिले मुखान्मे

आदाय तत्र विजहार ह वेद मार्गान्

13 क्षीरो दधौ अमर दानव यूथ पानाम्

उन्मथ्न ताम् अमृत लब्धय आदि देवः

पृष्ठेन कच्छप वपुर् विद धार गोत्रम्

निद् राक्षणो ऽद्रि परि वर्तक षाण कण्डूः

14 त्रै पिष्ट पोरु भय हा स नृसिम्ह रूपम्

कृत्वा भ्रमद् भ्रुकुटि दम्ष्ट्र कराळ वक्त्रम्

दैत् येन्द्र माशु गदयाभि पतन्त माराद्

ऊरौ निपात्य विददार नखैः स्फुरन्तम्

15 अन्तः सरस्यु रुबलेन पदे गृहीतो

ग्राहेण यूथ पतिर् अम्बुज हस्त आर्तः

आहेदम् आदि पुरुषा अखिल लोक नाथ

तीर्थ श्रवः श्रवण मङ्गळ नाम धेय

16 श्रुत्वा हरिस्तम् अरणार् थिनम् अप्रमेयः

चक्रा युधः पतग राज भुजाधि रूढः

चक्रेण नक्र वदनम् विनिपाट्य तस्माद्

हस्ते प्रगृहय भगवान् कृपयोज्ज हार

17 ज्यायान् गुणैर् अवरजो ऽप्यदितेः सुतानाम्

लोकान् विचक्रम इमान् यद थाधि यज्ञः

क्ष्माम् वामनेन जगृहे त्रि पदच् छलेन

याच्ञा मृते पथि चरन् प्रभु भिर्न चाल्यः

18 नार्थो बलेर् अयम् उरुक्रम पाद शौचम्

आपः शिखाध् ऋतवतो विबुधाधि पत्यम्

यो वै प्रति श्रुतम् ऋते न चिकीर्ष दन्यद्

आत्मान मङ्ग शिरसा हरये ऽभिमेने

19 तुभ्यम् च नारद भृशम् भगवान् विवृद्ध

भावेन साधु परितुष्ट उवाच योगम्

ज्ञानम् च भागवतम् आत्म स तत्त्व दीपम्

यद् वासुदेव शरणा विदु रञ्ज सैव

20 चक्रम् च दिक्ष्व विहतम् दशसु स्व तेजो

मन्वन्तरेषु मनु वम्श धरो बिभर्ति

दुष्टेषु राज सुदमम् व्यदधात् स्व कीर्तिम्

सत्ये त्रि पृष्ठ उशतीम् प्रथयम्श् चरित्रैः

21 धन् वन्तरिश् च भगवान् स्वयमेव कीर्तिः

नाम्नान् ऋणाम् पुरुरुजाम् रुज आशु हन्ति

यज्ञे च भागम् अमृता युर वाव रुन्ध

आयुष्य वेदम् अनुशास् त्यव तीर्य लोके

22 क्षत्रम् क्षयाय विधिनोप भृतम् महात्मा

ब्रह्मध् रुगुज् झित पथम् नर कार्ति लिप्सु

उद्धन्त् यसौ अवनि कण्टकम् उग्र वीर्यः

त्रिः सप्त कृत्व उरुधार परश् वधेन

23 अस्मत् प्रसाद सुमुखः कलया कलेश

इक्ष्वाकु वम्श अवतीर्य गुरोर् निदेशे

तिष्ठन् वनम् स दयिता नुज आवि वेश

यस्मिन् विरुध्य दश कन्धर आर्तिम् आर्च्छत्

24 यस्मा अदाद् उदधि रूढ भयाङ्ग वेपो

मार्गम् सपद् यरिपुरम् हर वद्दि धक्षोः

दूरे सुहृन् मथि तरोष सुशोण दृष्ट्या

ता तप्य मान मकरोरग नक्र चक्रः

25 वक्षः स्थल स्पर्श रुग्न महेन्द्र वाह

दन्तैर् विडम्बित ककुब्जुष ऊढ हासम्
सद्यो ऽसुभिः सह विनेष्यति दार हर्तुः
विस् फूर्जितैर् धनुष उच्चर तो ऽधि सैन्ये
26 भूमेः सुरेतर वरूथवि मर्दि तायाः
क्लेशव् ययाय कलया सित कृष्ण केशः
जातः करिष्यति जनानुप लक्ष्य मार्गः
कर्माणि चात्म महिमोप निबन्धनानि
27 तोकेन जीव हरणम् यदु लूकि कायाः
त्रै मासिकस्य च पदा शकटो ऽपवृत्तः
यद् रिङ्ग तान्त रगतेन दिविस् पृशोर्वा
उन्मूलनम् त्वित रथार्जुन योर्न भाव्यम्
28 यद्वै व्रजे व्रज पशून् विषतोय पीतान्
पालाम्स्त्व जीव यद् अनुग्रह दृष्टि वृष्ट्या
तच् छुद्धये ऽति विष वीर्य विलोल जिह्वम्
उच्चाट यिष्य दुरगम् विहरन् ह्रदिन् याम्
29 तत् कर्म दिव्य मिवयन् निशि निः शयानम्
दावाग्निना शुचिवने परि दह्य माने
उन्नेष् यति व्रज मतो ऽवसि तान्त कालम्
नेत्रे पिधाय्य सबलो ऽनधि गम्य वीर्यः
30 गृह्णीत यद्यद् उप बन्धम मुष्य माता
शुल्बम् सुतस्य न तु तत् तद मुष्य माति
यज्जृम् भतो ऽस्य वदने भुवनानि गोपी
सम् वीक्ष्य शङ्कित मनाः प्रति बोधि तासीत्
31 नन्दम् च मोक्ष्यति भयाद् वरुणस्य पाशाद्
गोपान् बिलेषु पिहितान् मय सूनु ना च
अह्न्या पृतम् निशि शया नमतिश् रमेण

लोकम् विकुण्ठम् उपनेष् यति गोकुलम् स्म

32 गोपैर् मखे प्रति हते व्रज विप्ल वाय

देवे ऽभि वर्षति पशून् कृपया रिरक्षुः

धर् तोच्छ्रि लीन्ध्र मिव सप्त दिनानि सप्त

वर्षो महीध्रम् अनघै ककरे सलीलम्

33 क्रीडन् वने निशि निशा कर रश्मि गौर्याम्

रासोन् मुखः कल पदा यत मूर्च्छि तेन

उद्दीपित स्मर रुजाम् व्रज भृद्व धूनाम्

हर्तुर् हरिष्यति शिरो धन दानु गस्य

34 ये च प्रलम्ब खरदर् दुरकेश् यरिष्ट

मल्लेभ कम्स यवनाः कुज पौण्ड्र काद्याः

अन्ये च शाल्व कपि बल्वल दन्तवक्र

सप्तोक्ष शम्बर विदूरथ रुक्मि मुख्याः

35 ये वा मृधे समिति शालिन आत्त चापाः

काम्बोज मत्स्य कुरु कैकय सृञ्ज याद्याः

यास् यन्त्य दर्शन मलम् बल पार्थ भीम

व्याजाह् वयेन हरिणा निलयम् तदीयम्

36 कालेन मीलित धियाम् अवमृश्य न्ऌणाम्

स्तोका युषाम् स्व निगमो बत दूर पारः

आविर्हितस्त् वनुयुगम् स हि सत्य वत्याम्

वेद द्रुमम् विटपशो विभ जिष्य ति स्म

37 देवद् विषाम् निगम वर्त्मनि निष्ठि तानाम्

पूर्भिर् मयेन विहिताभिर् अदृश्य तूर्भिः

लोकान् घ्नताम् मति विमोह मति प्रलोभम्

वेषम् विधाय बहु भाष्यत औप धर्म्यम्

38 यर्ह् यालयेष् वपि सताम् न हरेः कथाः स्युः

पाखण्डिनो द्विज जना वृषला नृदेवाः
स्वाहा स्वधा वषडि तिस्म गिरो न यत्र
शास्ता भविष् यति कलेर् भगवान् युगान्ते

39 सर्गे तपो ऽहमृ षयो नव ये प्रजेशाः
स्थाने च धर्म मख मन्व मराव नीशाः
अन्ते त्व धर्म हर मन्युव शासु राद्या
माया विभूतय इमाः पुरु शक्ति भाजः

40 विष्णोर्नु वीर्य गणनाम् कतमो ऽर्हे तीह
यः पार्थि वान् यपि कविर् विममे रजाम्सि
चस् कम्भ यः स्वरम् हसास् खलता त्रि पृष्ठम्
यस् मात्त्रि साम्य सदनाद् उरु कम्प यानम्

41 नान्तम् विदाम् यहममी मुनयो ऽग्र जास्ते
माया बलस्य पुरुषस्य कुतो ऽपरेये
गायन् गुणान् दश शतान् अन आदि देवः
शेषो ऽधुनापि सम वस्यति नास्य पारम्

42 येषाम् स एव भगवान् दययेद् अनन्तः
सर्व आत्मना श्रित पदो यदि निर्व्य लीकम्
ते दुस्तराम् अति तरन्ति च देव मायाम्
नैषाम् ममाहम् इति धीः श्वशृ गाल भक्ष्ये

43 वेदाहम् अङ्ग परमस्य हि योग मायाम्
यूयम् भवश् च भगवान् अथ दैत्य वर्यः
पत्नी मनोः स च मनुश्च तद् आत्म जाश् च
प्राचीन बर्हिर् ऋभु रङ्ग उत ध्रुवश् च

44 इक्ष्वाकु रैल मुचुकुन्द विदेह गाधि
रघ् वम्बरीष सगरा गयनाहु षाद्याः
मान्धात्र लर्क शत धन्वनु रन्ति देवा

देव व्रतो बलिर् अमूर्त्तर यो दिलीपः

45 सौभर् युतङ्क शिबि देवल पिप्पलाद

सारस्व तोद्धव पराशर भूरि षेणाः

ये ऽन्ये विभीषण हनूमद् उपेन्द्र दत्त

पार्थार्ष्टि षेण विदुर श्रुत देव वर्याः

46 ते वै विदन्त् यति तरन्ति च देव मायाम्

स्त्री शूद्र हूणश बरा अपि पाप जीवाः

यद् यद्भुत क्रम परायण शील शिक्षाः

तिर् यग्जना अपि किमु श्रुत धारणा ये

47 शश्वत् प्रशान्तम् अभयम् प्रति बोध मात्रम्

शुद्धम् समम् सद सतः परमात्म तत्त्वम्

शब्दो न यत्र पुरु कारक वान्क्रि यार्थो

माया परैत्य भिमुखे च विलज्ज माना

48 तद्वै पदम् भगवतः परमस्य पुम्सो

ब्रह्मेति यद् विदु रजस्र सुखम् विशोकम्

सध्र्यङ् नियम्य यतयो यम कर्त हेतिम्

जह्युः स्वराडिव निपा नख नित्र मिन्द्रः

49 स श्रेयसा मपि विभुर् भगवान् यतो ऽस्य

भाव स्वभाव विहितस्य सतः प्रसिद्धिः

देहे स्वधातु विगमे ऽनु विशीर्य माणे

व्योमेव तत्र पुरुषो न विशीर्य ते ऽजः

50 सो ऽयम् ते ऽभिहि तस् तात भगवान् विश्व भावनः

समासेन हरेर् नान्यद् अन्यस्मात् सद सच् च यत्

51 इदम् भागवतम् नाम यन्मे भगवतो दितम्

सङ्ग्रहो ऽयम् विभूती नाम् त्वमेतद् विपुली कुरु

52 यथा हरौ भगवति नृणाम् भक्तिर् भविष्यति

सर्वात्मन् यखिला धारे इति सङ्कल्प्य वर्णय

53 मायाम् वर्णयतो ऽमुष्य ईश्वरस् यानु मोदतः

शृण्वतः श्रद्धया नित्यम् माय यात्मा न मुह्यति

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

द्वितीय स्कन्दे सप्तमो ऽध्याय ः॥

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ द्वितीय स्कन्दः अष्टमो ऽध्याय ः

स्कन्द- 02: अध्याय- 08

01 राजो उवाच

ब्रह्मणा चोदितो ब्रह्मन् गुणाख् याने ऽगुणस्य च

यस्मै यस्मै यथा प्राह नारदो देव दर्शनः

02 एतद् वेदितु मिच्छामि तत्त्वम् वेद विदाम् वर

हरेर् अद्भुत वीर्यस्य कथा लोक सुमङ्गलाः

03 कथ यस्व महा भाग यथाहम् अखिल् आत्मनि

कृष्णे निवेश्य निः सङ्गम् मनस् त्यक्ष्ये कळेवरम्

04 शृण्वतः श्रद्धया नित्यम् गृण तश् च स्वचेष् टितम्

कालेन नाति दीर्घेण भगवान् विशते हृदि

05 प्रविष्टः कर्ण रन्ध्रेण स्वानाम् भाव सरोरुहम्

धुनोति शमलम् कृष्णः सलिलस्य यथा शरत्

06 धौत् आत्मा पुरुषः कृष्ण पाद मूलम् न मुञ्चति

मुक्त सर्व परिक्लेशः पान्थः स्व शरणम् यथा

07 यदधा तुमतो ब्रह्मन् देहा रम्भो ऽस्य धातुभिः
यद्दृच्छया हेतुना वा भवन्तो जानते यथा
08 आसीद् यदुद रात् पद्मम् लोक सम्स्थान लक्षणम्
यावान् अयम् वै पुरुष इयत्ता वय वैः पृथक्
तावा नसाविति प्रोक्तः सम्स्था वयववा निव
09 अजः सृजति भूतानि भूतात्मा यद् अनुग्रहात्
ददृशे येन तद् रूपम् नाभि पद्म समुद् भवः
10 स चापि यत्र पुरुषो विश्वस्थित् युद् भवाप्ययः
मुक्त्वात्म मायाम् मायेशः शेते सर्व गुहाशयः
11 पुरुषा वय वैर्लोकाः सपालाः पूर्व कल्पिताः
लोकैर् अमुष्या वयवाः सपालैर् इति शुश्रुम
12 यावान् कल्पो विकल्पो वा यथा कालो ऽनुमीयते
भूत भव्य भवच् छब्द आयुर् मानम् च यत्सतः
13 कालस् यानु गतिर् या तु लक्ष्यते ऽण्वी बृहत्यपि
यावत्यः कर्म गतयो यादृशीर् द्विज सत्तम
14 यस्मिन् कर्म समा वायो यथा येनोप गृह्यते
गुणानाम् गुणिनाम् चैव परिणामम् अभीप् सताम्
15 भू पाताळ ककुब् व्योम ग्रहन क्षत्र भू भृताम्
सरित् समुद्र द्वीपानाम् सम्भवश् चैत दोकसाम्
16 प्रमाणम् अण्ड कोशस्य बाह्याभ् यन्तर भेदतः
महताम् चानु चरितम् वर्णाश्रम विनिश् चयः
17 युगानि युगमानम् च धर्मो यश् च युगे युगे
अवतारानु चरितम् यद् आश्चर्य तमम् हरेः
18 नृणाम् साधारणो धर्मः सवि शेषश् च याद् ऋशः
श्रेणीनाम् राजर्षीणाम् च धर्मः कृच्छ्र रेषु जीवताम्
19 तत्त्वानाम् परिसङ्ख् यानम् लक्षणम् हेतु लक्षणम्

पुरुष् आराधन विधिः योगस् याध् यात्मिक स्य च

20 योगेश्वरै श्वर्य गतिः लिङ्ग भङ्गस्तु योगिनाम्

वेदोप वेद धर्माणाम् इतिहास पुराणयोः

21 सम्प्लवः सर्व भूतानाम् विक्रमः प्रति सङ्क्रमः

इष्टा पूर्तस्य काम्यानाम् त्रि वर्गस्य च यो विधिः

22 यश् चानु शायिनाम् सर्गः पाखण्डस्य च सम्भवः

आत्मनो बन्ध मोक्षौ च व्यवस् थानम् स्वरूपतः

23 यथ् आत्म तन्त्रो भगवान् विक्रीडत् यात्म मायया

विसृज्य वा यथा मायाम् उदास्ते साक्षि वद् विभुः

24 सर्वम् एतच् च भगवन् पृच्छतो मे ऽनु पूर्वशः

तत्त्व तो ऽर्हस् युदा हर्तुम् प्रपन्नाय महा मुने

25 अत्र प्रमाणम् हि भवान् परमेष्ठी यथ् आत्मभूः

परे चेहानु तिष्ठन्ति पूर्वेषाम् पूर्वजैः कृतम्

26 न मे ऽसवः परायन्ति ब्रह्मन् अनश नादमी

पिबतो ऽच्युत पीयूषम् अन्यत्र कुबिताद् द्विजात्ः

27 सूत उवाच

स उपा मन्त्रितो राज्ञा कथा याम् इति सत्पतेः

ब्रह्म रातो भृशम् प्रीतो विष्णु रातेन सम्सदि

28 प्राह भागवतम् नाम पुराणम् ब्रह्म सम्मितम्

ब्रह्मणे भगवत् प्रोक्तम् ब्रह्म कल्प उपागते

29 यद् यत् परीक्षिद् ऋषभः पाण्डूनाम् अनु पृच् छति

आनु पूर्व्येण तत् सर्वम् आख्यातुम् उपचक्रमे

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

द्वितीय स्कन्दे अष्टमो ऽध्याय ːǁ

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ द्वितीय स्कन्दः नवमो ऽध्याय :

स्कन्द- 02: अध्याय- 09

01 श्री शुक उवाच

आत्म माया मृते राजन् परस्यानु भवात्मनः

न घटे तार्थ सम्बन्धः स्वप्न द्रष्टु रिवान्जसा

02 बहु रूप इवाभाति मायया बहु रूपया

रममाणो गुणेष् वस्या ममाहम् इति मन्यते

03 यर्हि वाव महिम् निस्वे परस्मिन् काल माययोः

रमेत गत सम्मोहः त्यक्त्वो दास्ते तदो भयम्

04 आत्म तत्त्व विशुद् ध्यर्थम् यदाह भगवान् ऋतम्

ब्रह्मणे दर्शयन् रूपम् अव्यलीक व्रता दृतः

05 स आदि देवो जगताम् परो गुरुः स्वधिष्ण्यम् आस्थाय सिसृक्ष यैक्षत

ताम् नाध्य गच्छद् दृश मत्र सम्मताम् प्रपञ्च निर्माण विधिः यया भवेत्

06 स चिन्तयन् द्व्यक्षरम् एकदाम् भसि उपाशृणोद् द्विर् गदितम् वचो विभुः

स्पर्शेषु यत् षोडशम् एक विम्शम् निष् किञ्च नानाम् नृप यद् धनम् विदुः

07 निशम्य तद् वक्तृद् इदृक्ष या दिशो विलोक्य तत् रान्यद् अपश्य मानः

स्व धिष्ण्य मास् थाय विमृश्य तद् धितम् तपस् युपादिष्ट इवादधे मनः

08 दिव्यम् सहस् राब्दम् अमोघ दर्शनो जितानिल् आत्मा विजितोभ येन्द्रियः

अतप्यत स्माखिल लोक तापनम् तपः तपीयाम्स् तपताम् समाहितः

09 तस्मै स्वलोकम् भगवान् सभाजितः सन्दर्शया मास परम् न यत् परम्

व्यपेत सङ्क्लेश विमोह साध्वसम् स्व दृष्ट वद्भिः विबुदैर् अभिष्टुतम्

10 प्रवर्तते यत्र रजस् तमस् तयोः सत्त्वम् च मिश्रम् न च काल विक्रमः

न यत्र माया किमुता परे हरेः अनुव्रता यत्र सुरा सुरार्चिताः

11 श्यामा वदाताः शत पत्र लोचनाः पिशङ्ग वस्त्राः सुरुचः सुपेशसः

सर्वे चतुर् बाहव उन्मिषन् मणि प्रवेक निष्का भरणाः सुवर्चसः

प्रवाल वैदूर्यम् ऋणाल वर्चसः परिस् फुरत् कुण्डल मौलि मालिनः

12 भ्रा जिष्णु भिर्यः परितो विराजते लसद् विमाना वलिभिर् महात् मनाम्

विद्योत मानः प्रमदोत्त माद् युभिः सविद् युदभ्रा वलिभिः यथा नभः

13 श्रीर् यत्र रूपिनि उरुगाय पादयोः करोति मानम् बहुधा विभूति भिः

प्रेङ्खम् श्रिता या कुसुमा करानुगैः विगीय माना प्रिय कर्म गायती

14 द दर्श तत् राखिल सात्वताम् पतिम् श्रियः पतिम् यज्ञ पतिम् जगत् पतिम्

सुनन्द नन्द प्रबलार् हणादिभिः स्व पार्षद मुख्यैः परि सेवितम् विभुम्

15 भृत्य प्रसादाभि मुखम् दृगासवम् प्रसन्न हासारुण लोचना ननम्

किरीटिनम् कुण्डलिनम् चतुर् भुजम् पीताम्बरम् वक्षसि लक्षितम् श्रिया

16 अध्यर् हणीया सनम् आस्थितम् परम् वृतम् चतुः षोडश पञ्च शक्तिभिः

युक्तम् भगैः स्वैः इतर् अत्र चाध्रुवैः स्व एव धामन् रममाणम् ईश्वरम्

17 तद् दर्शन आह्लाद परि प्लुतान् तरो हृष्यत् तनुः प्रेम भराश्रु लोचनः

ननाम पादाम्बुजम् अस्य विश्व सृग् यत् पारम हम्स्येन पथाधिगम् यते

18 तम् प्रीयमाणम् समुपस्थितम् तदा प्रजा विसर्गे निज शास नार्हणम्

बभाष ईषत् स्मित शोचिषा गिरा प्रियः प्रियम् प्रीतमनाः करे स्पृशन्

19 श्री भगवान् उवाच

त्वयाहम् तोषितः सम्यग् वेद गर्भ सिसृक्षया

चिरम् भृतेन तपसा दुस्तोषः कूट योगिनाम्

20 वरम् वरय भद्रम् ते वरेशम् माभि वाञ्छितम्

ब्रह्मञ् छ्रेयः परिश्रामः पुम्सो मद् दर्शना वधिः

21 मनीषि तानु भावो ऽयम् मम लोकाव लोकनम्

यद् उपश्रुत्य रहसि चकर्थ परमम् तपः

22 प्रत्या दिष्टम् मया तत्र त्वयि कर्म विमोहिते

तपो मे हृदयम् साक्षाद् आत्माहम् तपसो ऽनघ

23 सृजामि तपसै वेदम् ग्रसामि तपसा पुनः

बिभर्मि तपसा विश्वम् वीर्यम् मे दुश्चरम् तपः

24 ब्रह्मो उवाच

भगवन् सर्व भूतानाम् अध्यक्षो ऽवस्थितो गुहाम्

वेद ह्यप्रति रुद्धेन प्रज्ञानेन चिकीर् षितम्

25 तथापि नाथ मानस्य नाथ नाथय नाथितम्

परावरे यथा रूपे जानीयाम् ते त्व रूपिणः

26 यथ् आत्म माया योगेन नाना शक्त् युप बृम्हितम्

विलुम्पन् विसृजन् गृह्णन् बिभ्रद् आत्मानम् आत्मना

27 क्रीडस् यमोघ सङ्कल्प ऊर्ण नाभिर् यथोर्णुते

तथा तद् विषयाम् धेहि मनीषाम् मयि माधव

28 भगवच् छिक्षित महम् करवाणि ह्य तन्द्रितः

नेहमानः प्रजा सर्गम् बध्येयम् यद् अनुग्रहात्

29 या वत् सखा सख् युरिवेश ते कृतः प्रजावि सर्गे विभजामि भोजनम्

अविक्ल वस्ते परिकर्मणि स्थितो मा मे समुन् नद् धमदो ऽज मानिनः

30 श्री भगवान् उवाच

ज्ञानम् परम गुह्यम् मे यद् विज्ञान समन् वितम्

स रहस्यम् तद् अङ्गम् च गृहाण गदितम् मया

31 या वानहम् यथा भावो यद् रूप गुण कर्मकः

तथैव तत्त्व विज्ञानम् अस्तु ते मद् अनुग्रहात्

32 अहम् एव असमे वाग्रे नान्यद् यत् सदसत् परम्

पश् चादहम् यदे तच् च यो ऽवशिष्येत सो ऽस्म्यहम्

33 ऋते ऽर्थम् यत् प्रती येत न प्रतीयेत चात्मनि

तद् विद्याद् आत्मनो मायाम् यथा भासो यथा तमः

34 यथा महान्ति भूतानि भूते षूच् चाव चेष्वनु

प्रविष्टान् य प्रविष्टानि तथा तेषु न तेष् वहम्

35 एताव देव जिज्ञास्यम् तत्त्व जिज्ञासुन् आत्मनः

अन्वय व्यति रेकाभ्याम् यत्स्यात् सर्वत्र सर्वदा

36 एतन् मतम् समातिष्ठ परमेण समाधिना

भवान् कल्प विकल्पेषु न विमुह्यति कर्हिचित्

37 श्री शुक उवाच

सम्प्रदिश् यैवम् अजनो जनानाम् परमेष्ठिनम्

पश्य तस् तस्य तद् रूपम् आत्मनो न्यरुणद् हरिः

38 अन्तर् हितेन्द्रि यार्थाय हरये विहिताञ्जलिः

सर्व भूत मयो विश्वम् ससर् जेदम् स पूर्व वत्

39 प्रजापतिः धर्मपतिः एकदा नियमान् यमान्

भद्रम् प्रजानाम् अन्विच्छन् आतिष्ठत् स्वार्थ काम्यया

40 तम् नारदः प्रियतमो रिक्था दाना मनु व्रतः

शुश्रूष माणः शीलेन प्रश्र येण दमेन च

41 मायाम् विविदिषन् विष्णोः माये शस्य महामुनिः

महा भागवतो राजन् पितरम् पर्य तोषयत्

42 तुष्टम् निशाम्य पितरम् लोकानाम् प्रपिता महम्

देवरुषिः परिप प्रच्छ भवान् यन्मानु पृच्छति

43 तस्मा इदम् भागवतम् पुराणम् दश लक्षणम्

प्रोक्तम् भगवता प्राह प्रीतः पुत्राय भूत कृत्

44 नारदः प्राह मुनये सरस्वत्यास् तटे नृप

ध्यायते ब्रह्म परमम् व्यासायाम् इत तेजसे

45 यदु ताहम् त्वया पृष्टो वैराजात् पुरुषा दिदम्

यथा सीत् तदु पाख्यास्ये प्रश्नान् अन्याम्श्च कृत्स् नशः

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

द्वितीय स्कन्दे नवमो ऽध्याय ː॥

श्री हरये नमː श्री हरये नमː श्री हरये नमː गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ द्वितीय स्कन्दː दशमो ऽध्याय ː

स्कन्द- 02ː अध्याय- 10

01 श्री शुक उवाच

अत्र सर्गो विसर्गश् च स्थानम् पोषणम् ऊतयː

मन्वन्तरे शानु कथा निरोधो मुक्तिर् आश्रयː

02 दशमस्य विशुद् ह्यर्थम् नवा नामिह लक्षणम्

वर्णयन्ति महात् मानː श्रुते नार्थेन चाञ्जसा

03 भूत मात्रेन्द्रि यधियाम् जन्म सर्ग उदाहृतː

ब्रह्मणो गुणवै षम्याद् विसर्गː पौरुषः स्मृतː

04 स्थितिर् वैकुण्ठ विजयː पोषणम् तद् अनुग्रहː

मन्वन्तराणि सद्धर्म ऊतयः कर्म वासनाː

05 अवतारानु चरितम् हरेश् चास् यानु वर्तिनाम्

सताम् ईश कथाः प्रोक्ता नानाख् यानोप बृम्हिताː

06 निरोधो ऽस्यानु शयनम् आत्मनः सह शक्ति भिː

मुक्तिर् हित्वान् यथा रूपम् स्वरूपेण व्यवस् थितिː

07 आभासश् च निरोधश् च यतश् चाध्यवसी यते

स आश्रयः परम् ब्रह्म परमात् मेति शब्द्यते

08 यो ऽध्यात्मिको ऽयम् पुरुषः सो ऽसौ एवाधि दैविकː

यस् तत्रो भय विच्छेदः पुरुषो ह्याधि भौतिकː

09 एकम् एक तरा भावे यदा नोपल भामहे

त्रितयम् तत्र यो वेद स आत्मा स्वाश्रय् आश्रयः

10 पुरुषो ऽण्डम् विनिर् भिद्य यदासौ स विनिर् गतः

आत्मनो ऽयनम् अन्विच्छन् अपो ऽस्राक्षीच् छुचिः शुचीः

11 तास्व वात्सीत् स्व सृष्टासु सहस्र परि वत्सरान्

तेन नारायणो नाम यदापः पुरुषोद् भवाः

12 द्रव्यम् कर्म च कालश् च स्वभावो जीव एव च

यद् अनुग्रहतः सन्ति न सन्ति यद् उपेक्षया

13 एको नानात्वम् अन्विच्छन् योग तल्पात् समुत् थितः

वीर्यम् हिरण्मयम् देवो मायया व्यसृजत् त्रिधा

14 अधि दैवम् अथाध् यात्मम् अधि भूतम् इति प्रभुः

यथैकम् पौरुषम् वीर्यम् त्रिधा भिद् यत तच् छृणु

15 अन्तः शरीर आकाशात् पुरुषस्य विचेष्टतः

ओजः सहो बलम् जज्ञे ततः प्राणो महानसुः

16 अनु प्राणन्ति यम् प्राणाः प्राणन्तम् सर्व जन्तुषु

अपानन्तम् अपानन्ति नरदेव मिवानुगाः

17 प्राणेन क्षिपता क्षुत् तृड् अन्तरा जायते प्रभोः

पिपासतो जक्ष तश् च प्राङ् मुखम् निरभिद् यत

18 मुखतस् तालु निर्भिन्नम् जिह्वा तत्रोप जायते

ततो नाना रसो जज्ञे जिह्वया यो ऽधि गम्यते

19 विवक्षोः मुखतो भूम्नो वह्निर्वाग् व्याहृतम् तयोः

जले वैतस्य सुचिरम् निरोधः सम जायत

20 नासिके निरभिद् येताम् दोधूयति नभस्वति

तत्र वायुर् गन्धवहो घ्राणो नसि जिघृ क्षतः

21 यद् आत्मनि निरा लोकम् आत्मानम् च दिदृ क्षतः

निर्भिन्ने ह्यक्षिणी तस्य ज्योतिश् चक्षुर् गुण ग्रहः

22 बोध्य मानस्य ऋषिभिः आत्मनः तज् जिघृ क्षतः

कर्णौ च निरभिद् येताम् दिशः श्रोत्रम् गुणग्रहः

23 वस्तुनो मृदुका ठिन्य लघु गुर्वोष्णशी त ताम्

जिघृ क्षतः त्वङ् निर्भिन्ना तस्याम् रोम महीरुहाः

तत्र चान्तर् बहिर् वातः त्वचा लब्ध गुणो वृतः

24 हस्तौ रुरुह तुस् तस्य नाना कर्मचि कीर्षया

तयोस्तु बलम् इन्द्रस् च आदानम् उभय् आश्रयम्

25 गतिम् जिगीषतः पादौ रुरुहा ते ऽभि कामिकाम्

पद्भ्याम् यज्ञः स्वयम् हव्यम् कर्मभिः क्रियते नृभिः

26 निरभिद् यत शिश्नो वै प्रजा नन्दाम् ऋतार् थिनः

उपस्थ आसीत् कामानाम् प्रियम् तद् उभ याश्रयम्

27 उत्सि सृक्षोः धातु मलम् निरभिद् यत वै गुदम्

ततः पायुस् ततो मित्र उत्सर्ग उभय् आश्रयः

28 आसिसृप्सोः पुरः पुर्या नाभि द्वारम् अपानतः

तत्रा पानस्ततो मृत्युः पृथक् त्वम् उभ याश्रयम्

29 आदित्सोर् अन्न पानानाम् आसन् कुक्ष्यन्त्र नाडयः

नद्यः समुद्राश् च तयोः तुष्टिः पुष्टिस् तद् आश्रये

30 निदि ध्यासोर् आत्म मायाम् हृदयम् निरभिद् यत

ततो मनश् ततस् चन्द्रः सङ्कल्पः काम एव च

31 त्वक् चर्म माम् स रुधिर मेदो मज्जास्थि धातवः

भूम्यप् तेजो मयाः सप्त प्राणो व्योमाम्बु वायु भिः

32 गुणात्म कान् इन्द्रियाणि भूतादि प्रभवा गुणाः

मनः सर्व विकार् आत्मा बुद्धिः विज्ञान रूपिणी

33 एतद् भगवतो रूपम् स्थूलम् ते व्या हृतम् मया

मह्यादि भिश्चा वरणैः अष्टभिः बहिर् आवृतम्

34 अतः परम् सूक्ष्म तमम् अव्यक्तम् निर् विशेषणम्

अनादि मध्य निधनम् नित्यम् वाङ् मनसः परम्

35 अमुनी भगवद् रूपे मया ते अनु वर्णिते

उभे अपि न गृह्णन्ति माया सृष्टे विपश् चित:

36 स वाच्य वाच कतया भगवान् ब्रह्म रूप धृक्

नाम रूप क्रिया धत्ते स कर्मा कर्मक: पर:

37 प्रजापतीन् मनून् देवान् ऋषीन् पितृ गणान् पृथक्

सिद्ध चारण गन्धर्वान् विद्याध्रा सुर गुह्यकान्

38 किन्नराप् सरसो नागान् सर्पान् किम् पुरुषोरगान्

मात्रू रक्ष: पिशाचाम्श् च प्रेत भूत विनायकान्

39 कूष्माण्डोन् माद वेताळान् यातु धानान् ग्रहान् अपि

खगान् मृगान् पशून् वृक्षान् गिरीन् नृप सरीस् ऋपान्

40 द्वि विधाश् च तुर्विधाये ऽन्ये जलस् थल नभौकस:

कुशला कुशला मिश्रा: कर्मणाम् गत यस्त् विमा:

41 सत्त्वम् रजस् तम इति तिस्र: सुर नृ नारका:

तत्राप् येकै कशो राजन् भिद्यन्ते गतयस् त्रिधा

यदै कैक तरो ऽन्याभ्याम् स्वभाव उप हन्यते

42 स एवेदम् जगद् धाता भगवान् धर्म रूप धृक्

पुष्णाति स्थापयन् विश्वम् तिर्यङ् नर सुरात्म भि:

43 तत: काल अग्नि रुद् रात्मा यत् सृष्टम् इदम् आत्मन:

सन्नि यच्छति कालेन घना नीकम् इवा निल:

44 इत्थम् भावेन कथितो भगवान् भगवत् तम:

नेत्थम् भावेन हि परम् द्रष्टु मर्हन्ति सूरय:

45 नास्य कर्मणि जन्मादौ परस्यानु विधीयते

कर्तृत्व प्रति षेधार्थम् माय यारोपितम् हि तत्

46 अयम् तु ब्रह्मण: कल्प: सविकल्प उदा हृत:

विधि: साधारणो यत्र सर्गा: प्राकृत वैकृता:

47 परिमाणम् च कालस्य कल्प लक्षण विग्रहम्

यथा पुरस् ताद् व्याख्यास्ये पाद्मम् कल्पम् अथो शृणु

48 शौनक उवाच

यद् आहनो भवान् सूत क्षत्ता भागव तोत् तमः

चचार तीर्थानि भुवः त्यक्त्वा बन्धून् सुदुस् त्यजान्

49 कुत्रः कौशार वेस् तस्य सम्वादो ऽध्यात्म सम्श्रितः

यद्वा स भगवाम्स् तस्मै पृष्टः तत्त्वम् उवाच ह

50 ब्रूहि नस् तदिदम् सौम्य विदुरस्य विचेष्टितम्

बन्धु त्याग निमित्तम् च तथै वागत वान्पुनः

51 सूत उवाच

राज्ञा परीक्षिता पृष्टो यद् अवोचन् महामुनिः

तद्वो ऽभिधास् ये शृणुत राज्ञः प्रश्नानु सारतः

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

द्वितीय स्कन्दे दशमो ऽध्याय ः॥

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ त्रुतीय स्कन्दः प्रथमो ऽध्याय ः

स्कन्द- 03: अध्याय- 01

01 श्री शुक उवाच

एवमे तत् पुरा पृष्टो मैत्रेयो भगवान् किल

क्षत्त्रा वनम् प्रविष्टेन त्यक्त्वा स्वगृहम् ऋद्धि मत्

02 यद्वा अयम् मन्त्र कृद्वो भगवान् अखिलेश्वरः

पौर वेन्द्र गृहम् हित्वा प्रविवेश् आत्म सात् कृतम्

03 राजो वाच

कुत्र क्षत्तुर् भगवता मैत्रे येणास सङ्गमः

कदा वा सह सम्वाद एतद् वर्णय नः प्रभो

04 न ह्यल्पार् थोद् अयस् तस्य विदुरस् यामल् आत्मनः

तस्मिन् वरीयसि प्रश्नः साधु वादोप बृम्हितः

05 सूत उवाच

स एवम् ऋषि वर्यो ऽयम् पृष्टो राज्ञा परीक्षिता

प्रत्याह तम् सुबहुवित् प्रीतात्मा श्रूय तामिति

06 श्री शुक उवाच

यदा तु राजा स्वसु तान साधून् पुष्णन् अधर्मेण विनष्ट दृष्टिः

भ्रातुर् यविष्ठस्य सुतान् विबन्धून् प्रवेश्य लाक्षा भवने ददाह

07 यदा सभायाम् कुरु देव देव्याः केशाभि मर्शम् सुत कर्म गर्ह्यम्

न वारया मास नृपः स्नुषायाः स्वास्रैर् हरन्त्याः कुच कुङ्कुमानि

08 द्यूते त्व धर्मेण जितस्य साधोः सत्या वलम्बस्य वना गतस्य

न याचतो ऽदात् समयेन दायम् तमो जुषाणो यद जात शत्रोः

09 यदा च पार्थ प्रहितः सभायाम् जगद् गुरुः यानि जगाद कृष्णः

न तानि पुम्साम् अमृता यनानि राजोरु मेने क्षत पुण्य लेशः

10 यदो पहूतो भवनम् प्रविष्टो मन्त्राय पृष्टः किल पूर्व जेन

अथाह तन् मन्त्र दृशाम् वरीयान् यन् मन्त्रिणो वैदुरिकम् वदन्ति

11 अजात शत्रोः प्रति यच्छ दायम् तितिक्ष तो दुर् विषहम् तवागः

सहानुजो यत्र वृकोदरा हिः श्वसन् रुषा यत् त्वमलम् बिभेषि

12 पार्थाम् स्तु देवो भगवान् मुकुन्दो गृहीतवान् सक्षिति देव देवः

आस्ते स्व पुर्याम् यदु देव देवो विनिर्जिता शेष नृदेव देवः

13 स एष दोषः पुरुष द्विडास्ते गृहान् प्रविष्टो यम पत्य मत्या

पुष्णासि कृष्णा द्विमुखो गतश्रीः त्यजाश्व शैवम् कुल कौशलाय

14 इत् यूचिवाम्स् तत्र सुयोधनेन प्रवृद्ध कोपस् फुरि ताधरेण

असत् कृतः सत्स् पृहणीय शीलः क्षत्ता सकर्णानुज सौबलेन

15 क एन मत्रोप जुहाव जिह्मम् दास्याः सुतम् यद् बलिनैव पुष्टः

तस्मिन् प्रतीपः पर कृत्य आस्ते निर्वास्य ताम् आशु पुराच् छ्वसानः

16 स इत्थम् अत्युल्बण कर्ण बाणैः भ्रातुः पुरो मर्मसु ताडि तो ऽपि

स्वयम् धनुर् द्वारि निधाय मायाम् गतव् यथो ऽयाद् उरु मान यानः

17 स निर्गतः कौरव पुण्य लब्धो गजाह् वयात् तीर्थ पदः पदानि

अन्वा क्रमत् पुण्य चिकीर्ष योर्व्याम् स्व धिष्ठितो यानि सहस्र मूर्तिः

18 पुरेषु पुण्योप वनाद्रि कुञ्जेषु अपङ्क तोयेषु सरित् सरः सु

अनन्त लिङ्गैः सम लङ्कृतेषु चचार तीर्थाय तनेषु अनन्यः

19 गाम् पर्यटन् मेध्य विविक्त वृत्तिः सदा प्लुतो ऽधः शयनो ऽवधूतः

अलक्षि तः स्वैर् अवधूत वेषो व्रतानि चेरे हरि तोषणानि

20 इत्थम् व्रजन् भारतम् एव वर्षम् कालेन यावद् गतवान् प्रभासम्

तावच् छशास क्षितिम् एक चक्राम् एकात पत्राम् अजितेन पार्थः

21 तत्राथ शुश्राव सुहृद् विनष्टिम् वनम् यथा वेणुज वह्नि सम्श्रयम्

सम् स्पर्धया दग्धम् अथानु शोचन् सरस्वतीम् प्रत् यगियाय तूष्णीम्

22 तस्याम् त्रितस् योशनसो मनोश् च पृथो रथाग्ने रसितस्य वायोः

तीर्थम् सुदासस्य गवाम् गुहस्य यच् छ्राद्ध देवस्य स आसिषेवे

23 अन्यानि चेह द्विज देव देवैः कृतानि नाना यत नानि विष्णोः

प्रत्यङ्ग मुख्याङ् कित मन्दिराणि यद् दर्शनात् कृष्णम् अनुस्मरन् ति

24 ततस्त्व तिव्रज्य सुर आष्ट्र मृद्धम् सौवीर मत्स्यान् कुरु जाङ्ग लाम्श् च

कालेन तावद् यमुनाम् उपेत्य तत् रोद्धवम् भागवतम् ददर्श

25 स वासुदेवानु चरम् प्रशान्तम् बृहस्पतेः प्राक् तनयम् प्रतीतम्

आलिङ्ग्य गाढम् प्रणयेन भद्रम् स्वानाम् अपृच्छद् भगवत् प्रजानाम्

26 कच्चित् पुराणौ पुरुषौ स्वनाभ्य पाद्मानु वृत्त्येह किलाव तीर्णौ

आसात उर्व्याः कुशलम् विधाय कृतक्षणौ कुशलम् शूरगेहे

27 कच्चित् कुरूणाम् परमः सुहृन्नो भामः स आस्ते सुख मङ्ग शौरिः

यो वै स्वस्रूणाम् पितृ वद्द दाति वरान् वदान्यो वर तर्पणेन

28 कच्चिद् वरूथाधि पतिर् यदूनाम् प्रद्युम्न आस्ते सुखम् अङ्ग वीरः

यम् रुक्मिणी भगवतो ऽभिलेभे आराध्य विप्रान् स्मरमादि सर्गे

29 कच्चित् सुखम् सात्वत वृष्णि भोज दाशार्ह काणाम् अधिपः स आस्ते

यम् अभ्य षिञ्चन् छत पत्र नेत्रो नृपास नाशाम् परि हृत्य दूरात्

30 कच्चिद् हरेः सौम्य सुतः सदृक्ष आस्ते ऽग्रणी रथिनाम् साधु साम्बः

असूत यम् जाम्बवती व्रताढ्या देवम् गुहम् यो ऽम्बिक या धृतो ऽग्रे

31 क्षेमम् स कच्चिद् युयुधान आस्ते यः फाल्गुनाल् लब्ध धनू रहस्यः

लेभे ऽञ्ज साधोक्षज सेव यैव गतिम् तदीयाम् यतिभिर् दुरापाम्

32 कच्चिद् बुधः स्वस्त्यन मीव आस्ते श्वफल्क पुत्रो भगवत् प्रपन्नः

यः कृष्ण पादाङ्कित मार्ग पाम्सुषु अचेष्ट त प्रेमवि भिन्न धैर्यः

33 कच्चिच् छिवम् देवक भोज पुत्र्या विष्णु प्रजाया इव देव मातुः

या वै स्व गर्भेण दधार देवम् त्रयी यथा यज्ञ वितान मर्थम्

34 अपिस् विदास्ते भगवान् सुखम् वो यः सात् वताम् काम दुघो ऽनिरुद्धः

यमा मनन्ति स्म हि शब्द योनिम् मनोमयम् सत्त्व तुरीय तत्त्वम्

35 अपिस्वि दन्येच निजात्म दैवम् अनन्य वृत्त्या सम नुव्र ता ये

हृदीक सत् यात्मज चारु देष्ण गदादयः स्वस्ति चरन्ति सौम्य

36 अपि स्वदोर्भ्याम् विजय् आच्युताभ्याम् धर्मेण धर्मः परिपाति सेतुम्

दुर्योधनो ऽतप्यत यत् सभायाम् साम्राज्य लक्ष्म्या विजयानु वृत्त्या

37 किम् वा कृताघे ष्वघ मत्य मर्षी भीमो ऽहिवद् दीर्घ तमम् व्यमुञ्चत्

यस्याङ्घ्रि पातम् रण भूर्न सेहे मार्गम् गदायाश् चरतो विचित्रम्

38 कच्चिद् यशोधा रथ यूथ पानाम् गाण्डीव धन्वोप रतारि रास्ते

अलक्षितो यच् छरकूट गूढो माया किरातो गिरिशस् तुतोष

39 यमाव् उतस्वित् तनयौ पृथायाः पार्थैर् वृतौ पक्ष्मभि रक्षि णीव

रेमात उद्दाय मृधे स्वरिक्थम् परात्सु पर्णाविव वज्रि वक्त्रात्

40 अहो पृथापि ध्रियते ऽर्भकार्थे राजर्षि वर्येण विनापि तेन

यस्त् वेक वीरो ऽधिरथो विजिग्ये धनुर् द्वितीयः ककु भश्च तस्रः

41 सौम्यानु शोचे तमधः पतन्तम् भ्रात्रे परेताय विदुद्रु हे यः

निर्यापितो येन सुहृत् स्व पुर्या अहम् स्व पुत्रान् समनु व्रतेन

42 सो ऽहम् हरेर् मर्त्य विडम्बनेन दृशो नृणाम् चालयतो विधातुः

नान्यो पलक्ष्यः पदवीम् प्रसादात् चरामि पश्यन् गतविस् मयो ऽत्र

43 नूनम् नृपाणाम् त्रिम दोत् पथानाम् महीम् मुहुश् चालय ताम् चमूभिः

वधात् प्रपन्नार्ति जिहीर्ष येशो ऽपि उपैक्ष ताघम् भगवान् कुरूणाम्

44 अजस्य जन्मोत् पथ नाश नाय कर्माण्य कर्तुः ग्रहणाय पुम्साम्

नन्वन्यथा को ऽर्हति देह योगम् परो गुणानाम् उत कर्म तन्त्रम्

45 तस्य प्रपन्ना अखिल लोक पानाम् अवस्थि तानाम् अनुशासने स्वे

अर्थाय जातस्य यदुष्व जस्य वार्ताम् सखे कीर्तय तीर्थ कीर्तेः

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

त्रुतीय स्कन्दे प्रथमो ऽध्याय ः||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ त्रुतीय स्कन्दः द्वितीयो ऽध्याय ः

स्कन्द- 03: अध्याय- 02

01 श्री शुक उवाच

इति भागवतः पृष्टः क्षत्त्रा वार्ताम् प्रियाश् रयाम्

प्रति वक्तुम् न चोत्सेह औत् कण्ठ्यात् स्मारि तेश्वरः

02 यः पञ्च हायनो मात्रा प्रात राशाय याचितः

तन्नैच् छद्र चयन् यस्य सपर्याम् बाल लीलया

03 स कथम् सेवया तस्य कालेन जरसम् गतः

पृष्टो वार्ताम् प्रति ब्रूयाद् भर्तुः पादा वनुस्मरन्

04 स मुहूर्तम् अभूत् तूष्णीम् कृष्णाङ्घ्रि सुधया भृशम्

तीव्रेण भक्ति योगेन निमग्नः साधु निर्वृतः

05 पुलकोद् भिन्न सर्वाङ्गो मुञ्चन् मीलद् दृशा शुचः

पूर्णार्थो लक्षि तस्तेन स्नेह प्रसर सम्प्लुतः

06 शनकैः भगवल् लोकान् नृलोकम् पुनर् आगतः

विमृज्य नेत्रे विदुरम् प्रत्या होद्धव उत्स्मयन्

07 उद्धव उवाच

कृष्ण द्युमणि निम्लोचे गीर्णे ष्वजग रेण ह

किम् नु नः कुशलम् ब्रूयाम् गत श्रीषु गृहेष् वहम्

08 दुर्भगो बत लोको ऽयम् यदवो नितराम् अपि

ये सम् वसन्तो न विदुः हरिम् मीना इवोडुपम्

09 इङ्गि तज्ञाः पुरु प्रौढा एका रामाश् च सात् वताः

सात् वताम् ऋषभम् सर्वे भूता वासम् अमम् सत

10 देवस्य मायया स्पृष्टा ये चान् यद् असद् आश्रिताः

भ्राम्यते धीर् न तद् वाक्यैः आत्मन् युप्तात्म नो हरौ

11 प्रदर्श्या तप्त तपसाम् अवि तृप्त दृशाम् नृणाम्

आदायान् तरधाद् यस्तु स्व बिम्बम् लोक लोचनम्

12 यन् मर्त्य लीलौ पयिकम् स्व योग मायाबलम् दर्श यता गृहीतम्

विस्मापनम् स्वस्य च सौभ गर्द्धेः परम् पदम् भूषण भूषणाङ्गम्

13 यद् धर्म सूनोर् बत राज सूये निरीक्ष्य दृक् स्वस्त् ययनम् त्रिलोकः

कार्त्स् न्येन चाद्येह गतम् विधातुः अर्वाक्स् ऋतौ कौशल मित्य मन्यत

14 यस्यानु राग प्लुत हास रास लीला वलोक प्रति लब्ध मानाः

व्रजस् त्रियो दृग्भिर् अनु प्रवृत्त धियो ऽवतस्थुः किल कृत्य शेषाः

15 स्व शान्त रूपेषु इतरैः स्वरूपैः अभ्यर्द्य माने ष्वनुकम् पितात्मा

परावरेशो महदम् शयुक्तो ह्यजो ऽपि जातो भगवान् यथाग्निः
16 माम् खेद यत् येत् अद् अजस्य जन्म विडम्बनम् यद् वसुदेव गेहे
व्रजे च वासो ऽरिभयाद् इव स्वयम् पुराद्व्य वात्सीद् यद नन्त वीर्यः
17 दुनोति चेतः स्मरतो ममैतद् यदाह पादौ अभि वन्द्य पित्रोः
ता ताम्ब कम्साद् उरुशङ्कि तानाम् प्रसीदतम् नो ऽकृत निष् कृतीनाम्
18 को वा अमुष्याङ्घ्रि सरोजरेणुम् विस्मर्तु मीशीत पुमान् विजिघ्रन्
यो विस्फुरद् भ्रू विटपेन भूमेः भारम् कृतान् तेन तिरश् च कार
19 दृष्टा भवद्भिः ननु राज सूये चैद्यस्य कृष्णम् द्विष तो ऽपिसिद्धिः
याम् योगिनः सम्स् पृहयन्ति सम्यग् योगेन कस्तद् विरहम् सहेत
20 तथैव चान्ये नर लोक वीरा य आहवे कृष्ण मुखार विन्दम्
नेत्रैः पिबन्तो नयनाभि रामम् पार्था स्त्रपूतः पदमा पुरस्य
21 स्वयम् त्वसाम् याति शयस्त्र्य धीशः स्वा राज्य लक्ष्म्याप्त समस्त कामः
बलिम् हरद्भिः चिर लोक पालैः किरीट कोट्ये डित पाद पीठः
22 तत् तस्य कैङ्कर्यम् अलम्भ्रु तान्नो विग्लाप यत् यङ्ग यद् उग्रसेनम्
तिष्ठन् निषण्णम् परमेष्ठि धिष्ण्ये न्यबोधयद् देव निधार येति
23 अहो बकीयम् स्तन काल कूटम् जिघाम्सया पायय दप्य साध्वी
लेभे गतिम् धात्र् युचिताम् ततो ऽन्यम् कम् वा दयाळुम् शरणम् व्रजेम
24 मन्ये ऽसुरान् भागवताम्स् त्र्यधीशे सम् रम्भ मार्गाभि निविष्ट चित्तान्
ये सम्युगे ऽचक्षत ताक्ष्र्य पुत्रम् अम्से सुनाभा युधम् आप तन्तम्
25 वसु देवस्य देवक्याम् जातो भोजेन्द्र बन्धने
चिकीर्षुः भगवान् अस्याः शम जेनाभि याचितः
26 ततो नन्द व्रजमितः पित्रा कम्साद् विबिभ् यता
एकादश समास् तत्र गूढार्चिः सबलो ऽवसत्
27 परीतो वत्स पैर् वत्सान्ः चारयन् व्यहरद् विभुः
यमुनो पवने कूजद् द्विज सङ्कुलि ताङ्घ्रिपे
28 कौमारीम् दर्शयम्श् चेष्टाम् प्रेक्षणीयाम् व्रजौ कसाम्

रुदन्निव हसन् मुग्ध बाल सिम्हाव लोकन:

29 स एव गोधनम् लक्ष्म्या निकेतम् सित गोवृषम्

चारयन् अनुगान् गोपान् रणद्वेणु ररीरमत्

30 प्र युक्तान् भोज राजेन मायिन: काम रूपिण:

लीलया व्यनुदत् ताम्स्तान् बाल: क्रीडन कानिव

31 विपन्नान् विष पानेन निगृह्य भुज गाधिपम्

उत्थाप्या पाययद् गाव: तत्तोयम् प्रकृति स्थितम्

32 अयाजयद् गोसवेन गोप राजम् द्वि जोत्तमै:

वित्तस्य चोरु भारस्य चिकीर्षन् सद्व्ययम् विभु:

33 वर्ष तीन्द्रे व्रज: कोपाद् भग्न माने ऽति विह्वल:

गोत्र लीला त पत्रेण त्रातो भद्रानु गृह्णता

34 शरच् छशिकरैर् मृष्टम् मानयन् रजनी मुखम्

गायन् कल पदम् रेमे स्त्रीणाम् मण्डल मण्डन:

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

त्रुतीय स्कन्दे द्वितीयो ऽध्याय :॥

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

32 स्वदम् ष्ट्रयोद् धृत्य महीम् निमग्नाम् स उत्थितः सम् रुरुचे रसायाः

तत्रापि दैत्यम् गद याप तन्तम् सुनाभ सन्दीप् इत तीव्र मन्युः

33 जघान रुन्धानम् असह्य विक्रमम् स लील येभम् मृगराड् इवाम्भसि

तद् रक्त पङ्काङ्कित गण्ड तुण्डो यथा गजेन्द्रो जगतीम् विभिन्दन्

34 तमाल नीलम् सित दन्त कोट्या क्ष्माम् उत्क्षि पन्तम् गज लीलयाङ्ग

प्रज्ञाय बद्धाञ्जलयो ऽनु वाकैर् विरिञ्चि मुख्या उपतस्थु रीशम्

35 ऋषय ऊचुः

जितम् जितम् ते ऽजित यज्ञ भावन त्रयीम् तनुम् स्वाम् परिधुन्वते नमः

यद् रोम गर्तेषु निलिल्युर् अध्वराः तस्मै नमः कारण सूकराय ते

36 रूपम् तवै तन् ननु दुष्कृत् आत्मनाम् दुर् दर्शनम् देव यद् अध्व रात्मकम्

छन्दाम्सि यस्य त्वचि बर्हि रोमसु आज्यम् दृशि त्वङ्घ्रिषु चातुर् होत्रम्

37 स्रुक्तुण्ड आसीत् स्रुव ईश नासयोः इडोदरे चमसाः कर्ण रन्ध्रे

प्राशित्र मास्ये ग्रसने ग्रहास्तु ते यच् चर्वणम् ते भगवन् अग्निहोत्रम्

38 दीक्षानु जन्मोप सदः शिरोधरम् त्वम् प्रायणीयो दयनीय दम्ष्ट्रः

जिह्वा प्रवर्ग्यस् तव शीर्षकम् क्रतोः सभ्याव सथ्यम् चि तयो ऽसवो हि ते

39 सोमस्तु रेतः सवनान्य वस्थितिः सम्स्था विभेदास् तव देव धातवः

सत्राणि सर्वाणि शरीर सन्धिः त्वम् सर्व यज्ञ क्रतुरिष्टि बन्धनः

40 नमो नमस्ते ऽखिल मन्त्र देवता द्रव्याय सर्व क्रतवे क्रियात्मने

वैराग्य भक्त् यात्म जयानु भावित ज्ञानाय विद्या गुरवे नमो नमः

41 दम्ष्ट्राग्र कोट्या भगवम्स् त्वया धृता विराजते भूधर भूः सभू धरा

यथा वनात् निःसरतो दता धृता मतङ् गजेन्द्रस्य सपत्र पद्मिनी

42 त्रयी मयम् रूपम् इदम् च सौकरम् भू मण्डलेनाथ दता धृते न ते

चकास्ति शृङ्गोढ घनेन भूयसा कुलाच लेन्द्रस्य यथैव विभ्रमः

43 सम्स्थाप यैनाम् जगताम् सतस् थुषाम् लोकाय पत्नी मसि मातरम् पिता

विधेम चास्यै नमसा सह त्वया यस्याम् स्वतेजो ऽग्नि मिवारणा वधाः

44 कः श्रद्द धीतान् यतमस् तव प्रभो रसाम् गताया भुव उद्वि बर्हणम्

न विस्मयो ऽसौ त्वयि विश्व विस्मये यो माय येदम् ससृजे ऽति विस्मयम्

45 विधुन् वता वेदमयम् निजम् वपुः जनस् तपः सत्य निवासिनो वयम्

सटाशि खोद् धूत शिवाम्बु बिन्दुभिः विमृज्य माना भृश मीश पाविताः

46 स वै बत भ्रष्ट मतिस्त वैषते यः कर्मणाम् पारम् अपार कर्मणः

यद् योग माया गुण योग मोहितम् विश्वम् समस्तम् भगवन् विधेहि शम्

47 मैत्रेय उवाच

इत् युपस्थीय मानस्तैः मुनिभिर् ब्रह्म वादिभिः

सलिले स्व खुरा क्रान्त उपा धत्ता वितावनिम्

48 स इत्थम् भगवान् उर्वीम् विष्वक्सेनः प्रजापतिः

रसाया लीलयोन् नीताम् अप्सुन्यस्य ययौ हरिः

49 य एवमेताम् हरि मेधसो हरेः कथाम् सुभद्राम् कथनीय मायिनः

शृण्वीत भक्त्या श्रवयेत वोशतीम् जनार्दनो ऽस्याशु हृदि प्रसीदति

50 तस्मिन् प्रसन्ने सकलाशि षाम् प्रभौ किम् दुर्लभम् ताभि रलम् लवात् मभिः

अनन्य दृष्ट्या भजताम् गुहाशयः स्वयम् विधत्ते स्वगतिम् परः पराम्

51 को नाम लोके पुरुषार्थ सारवित् पुरा कथा नाम् भगवत् कथा सुधाम्

आपीय कर्णाञ्जलिभिर् भवा पहाम् अहो विरज्येत विना नरेतरम्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

त्रुतीय स्कन्दे त्रयो दशो ऽध्याय ः||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ त्रुतीय स्कन्दः चतुर् दशो ऽध्याय ः

स्कन्द- 03ः अध्याय- 14

01 श्री शुक उवाच

निशम्य कौषार विणोप वर्णिताम् हरेः कथाम् कारण सूकर् आत्मनः

पुनः स पप्रच्छ तमुद्य ताञ्जलिर् न चाति तृप्तो विदुरो धृत व्रतः

02 विदुर उवाच

तेनैवतु मुनि श्रेष्ठ हरिणा यज्ञ मूर्तिना

आदि दैत्यो हिरण्याक्षो हत इत् यनु शुश्रुम

03 तस्य चोद्धरतः क्षौणीम् स्वदम् ष्ट्राग्रेण लीलया

दैत्य राजस्य च ब्रह्मन् कस्माद् धेतोर भून् मृधः

05 मैत्रेय उवाच

साधु वीर त्वया पृष्टम् अवतार कथाम् हरेः

यत्त्वम् पृच्छसि मर्त्यानाम् मृत्यु पाशवि शातनीम्

06 य योत्तान पदः पुत्रो मुनिना गीतयार् भकः

मृत्योः कृत्वैव मूर्ध्न् यङ्घ्रिम् आरुरोह हरेः पदम्

07 अथ अत्रापीति हासो ऽयम् श्रुतो मे वर्णितः पुरा

ब्रह्मणा देव देवेन देवानाम् अनु पृच्छताम्

08 दितिर् दाक्षायणी क्षत्तः मारीचम् कश्यपम् पतिम्

अपत्य कामा चकमे सन्ध्यायाम् हृच्छ यार्दिता

09 इष्ट्वाग्नि जिह्वम् पयसा पुरुषम् यजुषाम् पतिम्

निम्लो चत्यर्क आसीनम् अग्न्यगारे समाहितम्

10 दितिर् उवाच

एष माम् त्वत् कृते विद्वन् काम आत्त शरासनः

दुनोति दीनाम् विक्रम्य रम्भामिव मतङ्गजः

11 तद् भवान् दह्य मानायाम् स पत्नीनाम् समृद् धिभिः

प्रजा वतीनाम् भद्रम् ते मय्या युङ्क्ताम् अनुग्रहम्

12 भर्तर् याप्तो रुमा नानाम् लोकान् आविशते यशः

पतिर् भवद् विधो यासाम् प्रजया ननु जायते

13 पुरा पिता नो भगवान् दक्षो दुहितृ वत्सलः

कम् वृणीत वरम् वत्सा इत्य पृच्छत नः पृथक्

14 स विदित् वात्म जानाम् नो भावम् सन्तान भावनः

त्रयो दशाद् अदात् तासाम् यास्ते शीलम् अनुव्रताः

15 अथ मे कुरु कल्याणम् कामम् कञ्ज विलोचन

आर्तोप सर्पणम् भूमन् अमोघम् हि महीयसि

16 इति ताम् वीर मारीचः कृपणाम् बहु भाषिणीम्

प्रत्याहानु नयन् वाचा प्रवृद् धानङ्ग कश्मलाम्

17 एष ते ऽहम् विधास्यामि प्रियम् भीरु यदिच् छसि

तस्याः कामम् न कः कुर्यात् सिद्धिस् त्रै वर्गिकी यतः

18 सर्वाश्रमान् उपादाय स्वाश्रमेण कल त्रवान्

व्यस नार्णवम् अत्येति जलयानैर् यथार्णवम्

19 यामाहुर् आत्मनो ह्यर्धम् श्रेयस् कामस्य मानिनि

यस्याम् स्वधुर मध्यस्य पुमाम्श् चरति विज्वरः

20 याम् आश्रित् येन्द्रि याराातीन् दुर्जयान् इतर् आश्रमैः

वयम् जयेम हेलाभिः दस्यून् दुर्ग पतिर् यथा

21 न वयम् प्रभवस् ताम् त्वाम् अनुकर्तुम् गृहेश्वरि

अप्या युषा वा कात्स्न्र्येन ये चान्ये गुण गृध्नवः

22 अथापि काम मेतम् ते प्रजात्यै करवाण् यलम्

यथा माम् नाति वोचन्ति मुहूर्तम् प्रति पालय

23 एषा घोर तमा वेला घोराणाम् घोर दर्शना

चरन्ति यस्याम् भूतानि भूतेशानु चराणि ह

24 एतस्याम् साध्वि सन्ध्यायाम् भगवान् भूत भावनः

परीतो भूत पर्षद्भिः वृषेणा टति भूतराट्

25 श्मशान चक्रानिल धूलि धूम्र विकीर्ण विद्योत जटा कलापः

भस्माव गुण्ठामल रुक्म देहो देवस्त्रिभिः पश्यति देवरस्ते

26 न यस्य लोके स्वजनः परो वा नात्या दृतो नोत कश्चिद् विगर्ह्यः

वयम् व्रतैर् यच् चरणाप विद्धाम् आशास्महे ऽजाम् बत भुक्त भोगाम्

27 यस्यान वद्या चरितम् मनीषिणो गृणन्ति अविद्या पटलम् बिभित् सवः

निरस्त साम्याति शयो ऽपि यत् स्वयम् पिशाच चर्याम् अचरद् गतिः सताम्

28 हसन्ति यस्या चरितम् हि दुर्भगाः स्वात्मन् रतस्या विदुषः समीहितम्

यैर् वस्त्र माल्या भरणानु लेपनैः श्व भोजनम् स्वात्म तयोप लालितम्

29 ब्रह्मादयो यत् कृत सेतु पाला यत् कारणम् विश्वम् इदम् च माया

आज्ञाकरी तस्य पिशाच चर्या अहो विभूम्नः चरितम् विडम्बनम्

30 मैत्रेय उवाच

सैवम् सम्विदिते भर्त्रा मन्मथोन् मथि तेन्द्रिया

जग्राह वासो ब्रह्मर्षेः वृषली वगत त्रपा

31 स विदित् वाथ भार्यायाः तम् निर्बन्धम् विकर्मणि

नत्वा दिष्टा य रहसि तया थोप वि वेश ह

32 अथोपस् पृश्य सलिलम् प्राणा नायम्य वाग्यतः

ध्यायन् जजाप विरजम् ब्रह्म ज्योतिः सनातनम्

33 दितिस्तु व्रीडिता तेन कर्मा वद्येन भारत

उपसङ्गम् य विप्रर्षिम् अधोमुखि अभ्य भाषत

34 दितिर् उवाच

मा मे गर्भम् इमम् ब्रह्मन् भूतानाम् ऋषभो ऽवधीत्

रुद्रः पतिर् हि भूतानाम् यस्या करवम् अम्हसम्

35 नमो रुद्राय महते देवा योग्राय मीढुषे

शिवाय न्यस्त दण्डाय धृत दण्डाय मन्यवे

36 स नः प्रसीद ताम् भामो भगवान् उर्वनुग्रहः

व्याधस्यापि अनुकम्प् यानाम् स्त्रीणाम् देवः सती पतिः

37 मैत्रेय उवाच

स्व सर्गस् याशिषम् लोक्याम् आशा सानाम् प्रवे पतीम्

निवृत्त सन्ध्या नियमो भार्याम् आह प्रजापतिः

38 कश्यप उवाच

अप्रायत् याद् आत्मनस्ते दोषान् मौहूर्ति कादुत

मन् निदेशाति चारेण देवानाम् चाति हेलनात्

39 भविष्य तस् तवा भद्रौ अभद्रे जाठरा धमौ

लोकान् सपालाम् स्त्रीम्श् चण्डि मुहुरा क्रन्द यिष्यतः

40 प्राणिनाम् हन्य मानानाम् दीनानाम् अकृता गसाम्

स्त्रीणाम् निगृह्य माणानाम् कोपितेषु महात् मसु

41 तदा विश्वेश्वरः क्रुद्धो भगवान् लोक भावनः

हनिष्यति अवतीर् यासौ यथा द्रीन् शत पर्वधृक्

42 दितिर् उवाच

वधम् भगवता साक्षात् सुना भोदार बाहुना

आशासे पुत्रयोर् मह्यम् मा क्रुद्धाद् ब्राह्मणाद् विभो

43 न ब्रह्म दण्ड दग्धस्य न भूत भय दस्य च

नारकाश् चानु गृह्णन्ति याम् याम् योनिम् असौ गतः

44 कश्यप उवाच

कृत शोकानु तापेन सद्यः प्रत्यव मर्शनात्

भगवति उरुमानाच् च भवे मय् यपि चाद रात्

45 पुत्रस्यैव तु पुत्राणाम् भवितैकः सताम् मतः

गास्यन्ति यद्यशः शुद्धम् भगवद् यशसा समम्

46 योगैर् हेमेव दुर्वर्णम् भाव यिष्यन्ति साधवः

निर् वैरादिभिर् आत्मानम् यच्छीलम् अनु वर्तितुम्

47 यत् प्रसादा दिदम् विश्वम् प्रसीदति यद् आत्मकम्

स स्वदृग् भगवान् यस्य तोष्यते ऽनन्यया दृशा

48 स वै महा भागवतो महात्मा महानु भावो महताम् महिष्ठः

प्रवृद्ध भक्त्या ह्यनुभावि ताशये निवेश्य वैकुण्ठम् इमम् विहास्यति

49 अलम्पटः शीलधरो गुणा करो हृष्टः परर्द्ध्या व्यथितो दुः खि तेषु

अभूत शत्रुः जगतः शोक हर्ता नैदाघिकम् तापम् इवोडुराजः

50 अन्तर्बहिश् चामलम् अब्ज नेत्रम् स्वपूरुषेच् छानु गृहीत रूपम्

पौत्रस् तव श्री ललनाल लामम् द्रष्टा स्फुरत् कुण्डल मण्डिताननम्

51 मैत्रेय उवाच

श्रुत्वा भागवतम् पौत्रम् अमोदत दितिर् भृशम्

पुत्र योश्च वधम् कृष्णाद् विदित्वासीन् महामनाः

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

त्रुतीय स्कन्दे चतुर् दशो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ त्रुतीय स्कन्द: पञ्च दशो ऽध्याय :

स्कन्द- 03: अध्याय- 15

01 मैत्रेय उवाच

प्राजा पत्यम् तु तत् तेज: पर तेजो हनम् दिति:

दधार वर्षाणि शतम् शङ्कमाना सुरार् दनात्

02 लोके तेन हता लोके लोकपाला हतौजस:

न्यवेदयन् विश्व सृजे ध्वान्तौ यतिकरम् दिशाम्

03 देवा ऊचु:

तम एतद् विभो वेत्थ सम्विग्ना यद् वयम् भृशम्

न ह्य व्यक्तम् भगवत: कालेना स्पृष्ट वर्त्मन:

04 देव देव जगद् धात: लोक नाथ शिखामणे

परेषाम् अपरेषाम् त्वम् भूता नामसि भाववित्

05 नमो विज्ञान वीर्याय माय येद मुपेयुषे

गृहीत गुण भेदाय नमस्ते ऽव्यक्त योनये

06 ये त्वा अनन्येन भावेन भावयन्त् यात्म भावनम्

आत्मनि प्रोत भुवनम् परम् सदसद् आत्मकम्

07 तेषाम् सुपक्व योगानाम् जित श्वासेन्द्रि यात्मनाम्

लब्ध युष्मत् प्रसादानाम् न कुतश् चित् पराभव:

08 यस्य वाचा प्रजा: सर्वा गावस् तन्त्येव यन्त्रिता:

हरन्ति बलिम् आयत्ताः तस्मै मुख्याय ते नमः

09 स त्वम् विधत्स्व शम् भूमन् तमसा लुप्त कर्मणाम्

अदभ्र दयया दृष्ट्या आपन्नान् नर्ह सीक्षितुम्

10 एष देव दितेर् गर्भ ओजः काश्यपम् अर्पितम्

दिशस् तिमिर् अयन् सर्वा वर्धते ऽग्निर् इवैधसि

11 मैत्रेय उवाच

स प्रहस्य महाबाहो भगवान् शब्द गोचरः

प्रत्या चष्ट् आत्म भूर् देवान् प्रीणन् रुचिरया गिरा

12 ब्रह्मो उवाच

मानसा मे सुता युष्मत् पूर्वजाः सनकादयः

चेरुर् विहायसा लोकान् लोकेषु विग तस् पृहाः

13 त एकदा भगवतो वैकुण्ठ स्यामल् आत्मनः

ययुः वैकुण्ठ निलयम् सर्वलोक नमस्कृतम्

14 वसन्ति यत्र पुरुषाः सर्वे वैकुण्ठ मूर्तयः

ये ऽनिमित्त निमित्तेन धर्मेण आराधयन् हरिम्

15 यत्र चाद्यः पुमान् आस्ते भगवान् शब्द गोचरः

सत्त्वम् विष्टभ्य विरजम् स्वानाम् नो मृडयन् वृषः

16 यत्र नैः श्रेयसम् नाम वनम् काम दुघैर् द्रुमैः

सर्वर्तु श्रीभिः विभ्राजत् कैवल्यम् इव मूर्ति मत्

17 वैमानिकाः सललनाः चरितानि यत्र

गायन्ति लोक शमल क्षपणानि भर्तुः

अन्तर्जले ऽनुविकसन् मधुमाध वीनाम्

गन्धेन खण्डितधियो ऽपि अनिलम् क्षिपन्तः

18 पाराव तान्य भृत सारस चक्रवाक

दात् यूह हम्स शुक तित्तिरि बर्हिणाम् यः

कोलाहलो विरमते ऽचिर मात्र मुच्चैः

भृङ्गाधिपे हरि कथाम् इव गायमाने

19 मन्दार कुन्द कुरबोत् पल चम्पकार्ण

पुन्नाग नाग बकुलाम्बुज पारि जाता:

गन्धे ऽर्चिते तुळसि काभरणेन तस्या

यस्मिन् स्तप: सुमनसो बहु मान यन्ति

20 यत् सङ्कुलम् हरि पदान् अति मात्र दृष्टै:

वैदूर्य मारकत हेममयैर् विमानै:

येषाम् बृहत् कटितटा: स्मित शोभि मुख्य:

कृष्ण् आत्मनाम् न रज आदधु: उत्स्म याद्यै:

21 श्री रूपिणी क्वणयती चरणार विन्दम्

लील् आम्बुजेन हरिसद्मनि मुक्त दोषा

सम् लक्ष्यते स्फटिक कुड्य उपेत हेम्नि

सम्मार्ज तीव यद् अनुग्रहणे ऽन्य यत्न:

22 वापीषु विद्रुम तटासु अमलामृ ताप्सु

प्रेष्यान् विता निजवने तुळसी भिरीशम्

अभ्यर्चती स्वलक मुन्नस मीक्ष्य वक्त्रम्

उच्छेषितम् भगवते त्यम ताङ्ग यच्छ्री:

23 यन्न व्रजन्ति अघभिदो रचनानु वादात्

छृण्वन्तिये ऽन्य विषया: कुकथा मतिघ्नी:

यास्तु श्रुता हत भगै: नृभिर् आत्त सारा:

ताम्स् तान्क्षि पन्ति अशरणेषु तम: सु हन्त

24 ये ऽभ्यर्थिताम् अपि च नो नृगतिम् प्रपन्ना

ज्ञानम् च तत्त्व विषयम् सह धर्मम् यत्र

नाराधनम् भगवतो वितरन् त्यमुष्य

सम्मोहिता विततया बत मायया ते

25 यच्च व्रजन्ति अनिमिषाम् ऋषभानु वृत्त्या

दूरे यमा ह्युपरि नः स्पृहणीय शीलाः
भर्तुर् मिथः सुयशसः कथनानु राग
वैक्लव्य बाष्प कलया पुलकी कृताङ्गाः
26 तद् विश्व गुर्वधि कृतम् भुवनैक वन्द्यम्
दिव्यम् विचित्र विबुधाग्र्य विमान शोचिः
आपुः पराम् मुदम् अपूर्व मुपेत्य योग
माया बलेन मुनयः तदथो विकुण्ठम्
27 तस्मिन् नतीत्य मुनयः षड सज्ज मानाः
कक्षाः समान वयसा वथ सप्त मायाम्
देवा वचक्षत गृहीत गदौ परार्ध्य
केयूर कुण्डल किरीट विटङ्क वेषौ
28 मत्तद् विरेफ वन मालिकया निवीतौ
विन्यस् तयासित चतुष्टय बाहु मध्ये
वक्त्रम् भ्रुवा कुटिलया स्फुट निर्ग माभ्याम्
रक्ते क्षणेन च मनाग्रभ सम्द धानौ
29 द्वार् येतयोर् निविविशुर् मिषतोर पृष्ट्वा
पूर्वा यथा पुरट वज्र कपाटिका याः
सर्वत्र ते ऽविषमया मुनयः स्व दृष्ट्या
ये सञ्चरन्ति अविहता विगता भिशङ्काः
30 तान् वीक्ष्य वात रशनान्ः चतुरः कुमारान्
वृद्धान् दशार्ध वयसो विदित् आत्म तत्त्वान्
वेत्रेण चास् खलयताम् अत दर्हणाम् स्तौ
तेजो विहस्य भगवत् प्रतिकूल शीलौ
31 ताभ्याम् मिषत्स्व निमिषेषु निषिध्य मानाः
स्वर् हत्तमा ह्यपि हरेः प्रतिहार पाभ्याम्
ऊचुः सुहृत् तमदि दृक्षित भङ्ग ईषत्

कामानु जेन सहसा त उपप्लु ताक्षाः

32 मुनय ऊचुः

को वाम् इहैत्य भगवत् परिचर्य योच्चैः

तद् धर्मिणाम् निवसताम् विषमः स्वभावः

तस्मिन् प्रशान्त पुरुषे गत विग्रहे वाम्

को वात् मवत् कुहकयोः परिशङ्क नीयः

33 न ह्यन्तरम् भगवती ह समस्त कुक्षौ

आत्मानम् आत्मनि नभो नभ सीव धीराः

पश्यन्ति यत्र युवयोः सुर लिङ्गिनोः किम्

व्युत् पादितम् ह्युदर भेदि भयम् यतो ऽस्य

34 तद्वाम् अमुष्य परमस्य विकुण्ठ भर्तुः

कर्तुम् प्रकृष्ट मिह धीमहि मन्द धीभ्याम्

लोकानितो व्रजतम् अन्तर भाव दृष्ट्या

पापीय सस्त्रय इमे रिपवो ऽस्य यत्र

35 तेषाम् इतीरित मुभौ अवधार्य घोरम्

तम् ब्रह्म दण्डम् अनिवारणम् अस्त्र पूगैः

सद्यो हरेर् अनुचरा वुरु बिभ्य तस्तत्

पाद ग्रहौ अपतताम् अतिकात रेण

36 भूयाद् अघोनि भगवद्भिर् अकारि दण्डो

यो नौ हरेत सुरहेलन मप्य शेषम्

मावो ऽनु ताप कलया भगवत् स्मृतिघ्नो

मोहो भवे दिहतु नौ व्रज तोरधो ऽधः

37 एवम् तदैव भगवान् अरविन्द नाभः

स्वानाम् विबुध्य सद तिक्रमम् आर्य हृद्यः

तस्मिन् ययौ परम हम्स महा मुनीनाम्

अन्वेषणीय चरणौ चलयन् सहश्री ः

38 तम् त्वागतम् प्रति हृत उपयिकम् स्वपुम्भिः
ते ऽचक्ष ताक्ष विषयम् स्व समाधि भाग्यम्
हम्स श्रियोः व्यजनयोः शिव वायु लोलत्
छुभ्रात पत्र शशिके सरशीक राम्बुम्

39 कृत्स्न प्रसाद सुमुखम् स्पृहणीय धाम
स्नेहाव लोक कलया हृदि सम्स् पृशन्तम्
श्यामे पृथा वुरसि शोभित या श्रिया स्वः
चूडामणिम् सुभ गयन्तम् इवात्म धिष्ण्यम्

40 पीताम् शुके पृथु नितम्बिनि विस् फुरन्त्या
काञ्च् यालिभिर् विरुतया वनमालया च
वल्गु प्रकोष्ठ वलयम् विनता सुताम्से
विन्यस्त हस्तम् इतरेण धुनान मब्जम्

41 विद्युत् क्षिपन् मकर कुण्डल मण्ड नार्ह
गण्डस्थलोन् न समुखम् मणिमत् किरीटम्
दोर्दण्ड षण्ड विवरे हरता परार्ध्य
हारेण कन्धर गतेन च कौस्तु भेन

42 अत्रोप सृष्टम् इति चोत्स्मितम् इन्दिरायाः
स्वानाम् धिया विरचितम् बहु सौष्ठ वाढ्यम्
मह्यम् भवस्य भवताम् च भजन्तम् अङ्गम्
नेमुर् निरीक्ष्य न वितृप्त दृशो मुदा कैः

43 तस्य अरविन्द नयनस्य पदार विन्द
किञ्जल्क मिश्र तुळसी मकरन्द वायुः
अन्तर् गतः स्व विवरेण चकार तेषाम्
सङ्क्षोभम् अक्षर जुषाम् अपि चित्त तन्वोः

44 ते वा अमुष्य वदना सित पद्म कोशम्
उद् वीक्ष्य सुन्दर तराधर कुन्द हासम्

लब्धा शिषः पुनर् अवेक्ष्य त दीय मङ्घ्रि
द्वन्द्वम् नखारुण मणि श्रयणम् निदध्युः
45 पुम्साम् गतिम् मृगयता मिह योग मार्गैः
ध्यानास् पदम् बहुमतम् नयनाभि रामम्
पौम्स्नम् वपुर् दर्श यानम् अनन्य सिद्धैः
औत् पत्तिकैः समगृणन् युतम् अष्ट भोगैः
46 कुमारा ऊचुः
यो ऽन्तर् हितो हृदि गतो ऽपि दुर् आत्मनाम् त्वम्
सो ऽद्यैव नो नयन मूलम् अनन्त राद्धः
यर्ह्येव कर्ण विवरेण गुहाम् गतो नः
पित्रानु वर्णि तरहा भवद् उद्भवेन
47 तम् त्वाम् विदाम भगवन् परमात्म तत्त्वम्
सत्त्वेन सम्प्रति रतिम् रचयन्त मेषाम्
यत्ते ऽनु ताप विदितैः दृढ भक्ति योगैः
उद् ग्रन्थयो हृदि विदुः मुनयो विरागाः
48 नात् यन्तिकम् विगण यन्त्यपि ते प्रसादम्
किन्त्वन्यद् अर्पित भयम् भ्रुव उन्नयैस्ते
ये ऽङ्ग त्वदङ्घ्रि शरणा भवतः कथायाः
कीर्तन्य तीर्थ यशसः कुशला रसज्ञाः
49 कामम् भवः स्व वृजिनैर् निरयेषु नः स्ताच्
चेतो ऽलिवद् यदि नु ते पदयो रमेत
वाचश् च नस् तुळसि वद् यदिते ऽङ्घ्रि शोभाः
पूर्येत ते गुण गणैर् यदि कर्ण रन्ध्रः
50 प्रादुश् च कर्थ यदिदम् पुरुहूत रूपम्
तेनेश निर्वृतिम् अवापुर् अलम् दृशो नः
तस्मा इदम् भगवते नम इद् विधेम

यो ऽनात् मनाम् दुरुदयो भगवान् प्रतीत:

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

त्रुतीय स्कन्दे पञ्च दशो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ त्रुतीय स्कन्द: षोडशो ऽध्याय :

स्कन्द- *03:* अध्याय- *16*

*01* ब्रह्मो उवाच

इति तद् गृणताम् तेषाम् मुनीनाम् योग धर्मिणाम्

प्रति नन्द्य जगा देदम् विकुण्ठ निलयो विभु:

*02* श्री भगवान् उवाच

एतौ तौ पार्षदौ मह्यम् जयो विजय एव च

कदर्थी कृत्य माम् यद्वो बह्वक् राताम् अतिक्रमम्

*03* यस्त् वेतयोर् धृतो दण्डो भवद्भिर् माम् अनुव्रतै:

स एवानु मतो ऽस्माभि: मुनयो देव हेलनात्

*04* तद्व: प्रसादयाम् यद्य ब्रह्म दैवम् परम् हि मे

तद् धीत् यात्म कृतम् मन्ये यत्स्व पुम्भि: असत् कृता:

*05* यन् नामानि च गृह्णाति लोको भृत्ये कृता गसि

सो ऽसाधु वाद: तत् कीर्तिम् हन्ति त्वचम् इवामय:

*06* यस्या अमृता मलयश: श्रवणाव गाह:

सद्य: पुनाति जगदाश्व पचाद् विकुण्ठ:

सोऽहम् भवद्भ्य उपलब्ध सुतीर्थ कीर्ति:

छिन्द्याम् स्वबाहुम् अपि वः प्रतिकूल वृत्तिम्

07 यत् सेवया चरण पद्म पवित्र रेणुम्

सद्यः क्षत अखिलमलम् प्रति लब्ध शीलम्

न श्रीः विरक्तम् अपि माम् विजहाति यस्याः

प्रेक्षाल वार्थ इतरे नियमान् वहन्ति

08 नाहम् तथाद्मि यजमान हविर् विताने

श्च्योतद् घृत प्लुतमदन् हुत भुङ् मुखेन

यद् ब्राह्मणस्य मुखतश् चरतो ऽनु घासम्

तुष्टस्य मय्य वहितैः निज कर्म पाकैः

09 येषाम् बिभर्म्यहम् अखण्ड विकुण्ठ योग

माया विभूतिर् अमलाङ्घ्रि रजः किरीटैः

विप्राम्स्तु को न विषहेत यद् अर्हणाम्भः

सद्यः पुनाति सह चन्द्र ललाम लोकान्

10 ये मे तनूर् द्विज वरान् दुह तीर् मदीया

भूतानि अलब्ध शरणानि च भेद बुद्ध्या

द्रक्ष्यन्ति अघक्षत दृशो हयहिमन्य वस्तान्

गृध्रा रुषा मम कुषन् त्यधि दण्डनेतुः

11 ये ब्राह्मणान् मयि धिया क्षिपतो ऽर्चयन्तः

तुष्यद् हृदः स्मित सुधोक्षित पद्म वक्त्राः

वाण्यानु राग कल यात्मज वद् गृणन्तः

सम्बोधयन् त्यहम् इवाहम् उपाहृ तस्तैः

12 तन्मे स्वभर्तुर् अवसायम् अलक्ष माणौ

युष्मद् व्यतिक्रम गतिम् प्रति पद्य सद्यः

भूयो ममान्ति कमिताम् तद् अनुग्रहो मे

यत् कल्पताम् अचिरतो भृतयोर् विवासः

13 ब्रह्मो उवाच

अथ तस् योशतीम् देवीम् ऋषि कुल्याम् सरस्वतीम्

नास्वाद्य मन्यु दष्टानाम् तेषाम् आत्माप्य तृप्यत

14 सतीम् व्यादाय शृण्वन्तो लघ्वीम् गुर्वर्थ गह्वराम्

विगाह्या गाध गम्भीराम् न विदुस् तच्चि कीर्षितम्

15 ते योग मायया रब्ध पारमेष्ठ्य महोदयम्

प्रोचुः प्राञ्जलयो विप्राः प्रहृष्टाः क्षुभि तत् वचः

16 ऋषय ऊचुः

न वयम् भगवन् विद्मः तव देव चिकीर्षितम्

कृतो मे ऽनुग्रहश् चेति यद् अध्यक्षः प्रभाषसे

17 ब्रह्मण्यस्य परम् दैवम् ब्राह्मणाः किल ते प्रभो

विप्राणाम् देव देवानाम् भगवान् आत्म दैवतम्

18 त्वत्तः सनातनो धर्मो रक्ष्यते तनु भिस्तव

धर्मस्य परमो गुह्यो निर्विकारो भवान् मतः

19 तरन्ति ह्यञ्जसा मृत्युम् निवृत्ता यद् अनुग्रहात्

योगिनः स भवान् किम् स्विद् अनुगृह् येत यत् परैः

20 यम् वै विभूति रुपयात् यनुवेल मन्यैः

अर्थार्थिभिः स्व शिरसा धृत पाद रेणुः

धन्यार्पि ताङ्घ्रि तुळसी नव दाम धाम्नो

लोकम् मधु व्रत पते रिव कामयाना

21 यस्ताम् विविक्त चरितैः अनु वर्त मानाम्

नात्या द्रियत् परम भागवत प्रसङ्गः

स त्वम् द्विजानु पथ पुण्य रजः पुनीतः

श्री वत्स लक्ष्म किमगा भग भाज नस्त्वम्

22 धर्मस्य ते भगवतस् त्रि युग त्रिभिः स्वैः

पद्भिश् चराचर मिदम् द्विज देव तार्थम्

नूनम् भृतम् तद् अभिघाति रजस् तमश् च

सत् त्वेन नो वरदया तनुवा निरस्य

23 न त्वम् द्विजोत्तम कुलम् यदि हात्म गोपम्

गोप्ता वृषः स्वर्हणेन स सूनृ तेन

तर्ह्येव नङ्क्ष्यति शिवस् तव देव पन्था

लोको ऽग्रहीष् यद् ऋषभस्य हि तत् प्रमाणम्

24 तत्ते ऽनभीष्ट मिव सत्त्व निधेर् विधित्सोः

क्षेमम् जनाय निज शक्तिभिर् उद्धृ तारेः

नैता वता त्र्यधि पतेर् बत विश्व भर्तुः

तेजः क्षतम् त्ववन तस्य स ते विनोदः

25 यम् वानयोर् दम मधीश भवान् विधत्ते

वृत्तिम् नु वा तद् अनुमन् महि निर्व्य लीकम्

अस्मासु वा य उचितो ध्रियताम् स दण्डो

ये ऽनागसौ वय मयुङ्क्ष् महि किल्बि षेण

26 श्री भगवान् उवाच

एतौ सुरेतर गतिम् प्रति पद्य सद्यः

सम्रम्भ सम्भृत समाध् यनुबद्ध योगौ

भूयः सकाशम् उपयास्यत आशु यो वः

शापो मयैव निमितस् तदवैत विप्राः

27 ब्रह्मो उवाच

अथ ते मुनयो दृष्ट्वा नयना नन्द भाजनम्

वैकुण्ठम् तद् अधिष्ठानम् विकुण्ठम् च स्वयम् प्रभम्

28 भगवन्तम् परिक्रम्य प्रणि पत्यानु मान्य च

प्रति जग्मुः प्रमुदिताः शम्सन्तो वैष्णवीम् श्रियम्

29 भगवान् अनुगावाह यातम् मा भैष्ट मस्तु शम्

ब्रह्मतेजः समर्थो ऽपि हन्तुम् नेच्छे मतम् तु मे

30 एतत् पुरैव निर् दिष्टम् रमया क्रुद्धया यदा

पुराप वारिता द्वारि विशन्ती मय् युपारते

31 मयि सम्रम्भ योगेन निस्तीर्य ब्रहम हेलनम्

प्रत् येष्यतम् निकाशम् मे कालेन अल्पीयसा पुनः

32 द्वाः स्थौ आदिश्य भगवान् विमान श्रेणि भूषणम्

सर्वाति शयया लक्ष्म्या जुष्टम् स्वम् धिष्ण्य माविशत्

33 तौ तु गीर्वाण ऋषभौ दुस्तराद् हरि लोकतः

हत श्रियौ ब्रहम शापाद् अभूताम् विग तस्मयौ

34 तदा विकुण्ठ धिषणात् तयोर् निपत मानयोः

हाहा कारो महा नासीद् विमाना ग्र्येषु पुत्रकाः

35 तावेव ह्यधुना प्राप्तौ पार्षद प्रवरौ हरेः

दितेर् जठर निर्विष्टम् काश्यपम् तेज उल्बणम्

36 तयोर् असुर योरद्य तेजसा य मयोर् हि वः

आक्षिप्तम् तेज एतर्हि भगवाम्स् तद् विधित्सति

37 विश्वस्य यः स्थिति लयोद् भव हेतु राद्यो

योगेश्वरैर् अपि दुरत्यय योग मायः

क्षेमम् विधास् यति स नो भगवाम्स् त्र्य धीशः

तत्रास् मदीय विमृशेन कियानि हार्थः

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

त्रुतीय स्कन्दे षोडशो ऽध्याय ः||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ त्रुतीय स्कन्दः सप्त दशो ऽध्याय ः

*01* मैत्रेय उवाच

निशम् यात्म भुवा गीतम् कारणम् शङ्क योज्झिता:

तत: सर्वे न्यवर् तन्त त्रिदि वाय दिवौकस:

*02* दितिस्तु भर्तुर् आदेशाद् अपत्य परि शङ्किनी

पूर्णे वर्ष शते साध्वी पुत्रौ प्रसुषुवे यमौ

*03* उत्पाता बहवस् तत्र निपेतुर् जाय मानयो:

दिवि भुव्यन्त् अरिक्षे च लोकस्योरु भयावहा:

*04* सहा चला भुवश् चेलु: दिश: सर्वा: प्रजज्वलु:

सोल्काश्चा शनय: पेतु: केतवश् चार्ति हेतव:

*05* ववौ वायु: सुदु: स्पर्श: फूत् कारान् ईरयन् मुहु:

उन्मूलयन् नगपतीन् वात्यानीको रजोध्वज:

*06* उद्धसत् तडिदम् भोद घटया नष्ट भागणे

व्योम्नि प्रविष्ट तमसा न स्म व्या दृश्यते पदम्

*07* चुक्रोश विमना वार्धि: उदूर्मि: क्षुभि तोदर:

सोद पानाश् च सरित: चुक्षुभु: शुष्क पङ्कजा:

*08* मुहु: परिधयो ऽभूवन् सराह्वो: शशि सूर्ययो:

निर्घाता रथ निर्ह्रादा विवरेभ्य: प्रजज्ञिरे

*09* अन्तर् ग्रामेषु मुखतो वमन्त्यो वह्नि मुल्बणम्

सृगा लोलू कटङ्कारै: प्रणेदु: अशिवम् शिवा:

*10* सङ्गीत वद् रोदनवद् उन्नमय्य शिरोधराम्

व्यमुञ्चन् विविधा वाचो ग्राम सिम्हास् ततस् तत:

*11* खराश् च कर्कशै: क्षत्त: खुरैर् घ्नन्तो धरा तलम्

खार्कार रभसा मत्ता: पर्यधावन् वरूथश:

*12* रुदन्तो रास भत्रस्ता नीडाद् उदपतन् खगा:

घोषे ऽरण्ये च पशव: शकृन् मूत्रम् अकुर्वत

13 गावो ऽत्रसन् असृग् दोहाः तोयदाः पूय वर्षिणः
व्यरुदन् देव लिङ्गानि द्रुमाः पेतुर् विनानिलम्
14 ग्रहान् पुण्य तमान् अन्ये भगणाम्श् चापि दीपिताः
अतिचेरुः वक्र गत्या युयुधुश् च परस्परम्
15 दृष्ट्वान् याम्श् च महोत् पातान् अतत् तत्त्व विदः प्रजाः
ब्रह्म पुत्रान् ऋते भीता मेनिरे विश्व सम्प्लवम्
16 तावादि दैत्यौ सहसा व्यज्य मानात्म पौरुषौ
ववृधा ते ऽश्मसारेण काये नाद्रि पती इव
17 दिविस्पृशौ हेम किरीट कोटिभिः निरुद्ध काष्ठौ स्फुरद् अङ्ग दाभुजौ
गाम् कम्पयन्तौ चरणैः पदे पदे कट्या सुकाञ् च्यार्कम् अतीत्य तस्थतुः
18 प्रजापतिर् नाम तयोर् अकार्षीद् यः प्राक्स्व देहा अद्य मयोर जायत
तम् वै हिरण्य कशिपुम् विदुः प्रजा यम् तम् हिरण्याक्षम् असूत साग्रतः
19 चक्रे हिरण्य कशिपुः दोर्भ्याम् ब्रह्म वरेण च
वशे सपालान् लोकाम् स्त्रीन् अकुतो मृत् युरुद्धतः
20 हिरण्याक्षो ऽनुजस् तस्य प्रियः प्रीति कृदन् वहम्
गदापाणिर् दिवम् यातो युयुत्सुः मृगयन् रणम्
21 तम् वीक्ष्य दुः सहजवम् रणत् काञ्चन नूपुरम्
वैजयन्त्या स्रजा जुष्टम् अम्सन्यस् तमहा गदम्
22 मनो वीर्य वरोत् सिक्तम् असृण्यम् अकुतो भयम्
भीता निलिल्यिरे देवाः तार्क्ष् यत्रस्ता इवाहयः
23 स वै तिरोहितान् दृष्ट्वा महसा स्वेन दैत्य राट्
सेन्द्रान् देव गणान् क्षीबान् अपश्यन् व्यनदद् भृशम्
24 ततो निवृत्तः क्रीडिष्यन् गम्भीरम् भीम निस्वनम्
विजगाहे महा सत्त्वो वार्धिम् मत्त इव द्विपः
25 तस्मिन् प्रविष्टे वरुणस्य सैनिका यादोगणाः सन्नधि यः ससाध् वसाः
अहन्य माना अपि तस्य वर्चसा प्रधर्षिता दूरतरम् प्रदु द्रुवुः

26 स वर्ष पूगान् उदधौ महाबलः चरन् महोर्मीञ् छ्वसनेरि तान्मुहुः

मौर्व्याभि जघ्ने गदया विभावरीम् आसेदिवाम् स्तात पुरीम् प्रचेतसः

27 तत्रोप लभ्या सुर लोक पालकम् यादो गणानाम् ऋषभम् प्रचेतसम्

स्मयन् प्रलब्धुम् प्रणिपत्य नीचवत् जगाद मे देहि अधिराज सम्युगम्

28 त्वम् लोक पालो ऽधिपतिर् बृहच् छ्रवा वीर्यापहो दुर्मद वीर मानिनाम्

विजित्य लोके ऽखिल दैत्य दानवान् यद्राज सूयेन पुरा यजत् प्रभो

29 स एवम् उत्सिक्त मदेन विद्विषा दृढम् प्रलब्धो भगवान् अपाम् पतिः

रोषम् समुत्थम् शमयन् स्वया धिया व्यवोचद् अङ्गोपशमम् गता वयम्

30 पश्यामि नान्यम् पुरुषात् पुरातनाद् यः सम्युगे त्वाम् रणमार्ग कोविदम्

आराधयिष् यति असुरर् षभेहि तम् मनस्विनोयम् गृणते भवा दृशाः

31 तम् वीर माराद् अभिपद्य विस्मयः शयिष्यसे वीरशये श्वभिर् वृतः

यस् त्वद् विधानाम् असताम् प्रशान्तये रूपाणि धत्ते सद् अनुग्रहेच् छया

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

त्रुतीय स्कन्दे सप्त दशो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ त्रुतीय स्कन्दः अष्टा दशो ऽध्याय :

स्कन्द- 03: अध्याय- 18

01 मैत्रेय उवाच

तदेव माकर्ण्य जलेश भाषितम् महा मनास् तद् विगणय्य दुर्मदः

हरेर् विदित्वा गतिम् अङ्ग नारदाद् रसातलम् निर्विविशे त्वरान् वितः

02 ददर्श तत्रा भिजितम् धराधरम् प्रोन् नीयमाना वनिम् अग्रदम् ष्ट्रया

मुष्णन्त मक्ष्णा स्वरुचो ऽरुणश्रिया जहास चाहो वनगोचरो मृगः

03 आहैन मेहयज्ञ महीम् विमुञ्च नो रसौ कसाम् विश्व सृजेयम् अर्पिता

न स्वस्ति यास्यसि अनया ममेक्षतः सुराधमा आसादित सूकरा कृते

04 त्वम् नः सपत्नैः अभवाय किम् भृतो यो मायया हन्त् यसुरान् परोक्षजित्

त्वाम् योग माया बलम् अल्प पौरुषम् सम्स्थाप्य मूढ प्रमृजे सुहृच् छुचः

05 त्वयि सम्स्थिते गदया शीर्ण शीर्षणि अस्मद् भुज च्युतया ये च तुभ्यम्

बलिम् हरन्ति ऋषयो ये च देवाः स्वयम् सर्वे न भविष् यन्त्य मूलाः

06 स तुद्य मानो ऽरि दुरुक्त तोमरैः दम्ष्ट्रा ग्रगाम् गाम् उपलक्ष्य भीताम्

तोदम् मृषन् निरगाद् अम्बु मध्याद् ग्राहा हतः स करेणुर् यथेभः

07 तम् निः सरन्तम् सलिलाद् अनुद्रुतो हिरण्यकेशो द्विरदम् यथा झषः

कराल दम्ष्ट्रो ऽशनि निस्वनो ऽब्रवीद् गत ह्रियाम् किम् त्वसताम् विगर् हितम्

08 स गाम् उदस्तात् सलिलस्य गोचरे विन्यस्य तस्याम् अदधात् स्व सत्त्वम्

अभिष्टुतो विश्वसृजा प्रसूनैः आपूर्य माणो विबुधैः पश्यतो ऽरेः

09 परानु षक्तम् तपनी योप कल्पम् महागदम् काञ्चन चित्र दम्शम्

मर्माण्य भीक्ष्णम् प्रतु दन्तम् दुरुक्तैः प्रचण्ड मन्युः प्रहसन् तम् बभाषे

10 श्री भगवान् उवाच

सत्यम् वयम् भो वन गोचरा मृगा युष्मद् विधान् मृगये ग्राम सिम्हान्

न मृत्यु पाशैः प्रति मुक्तस्य वीरा विकत्थनम् तव गृह्णन्त्य भद्र

11 एते वयम् न्यास हरार सौकसाम् गतह्रियो गदया द्रावि तास्ते

तिष्ठा महे ऽथापि कथञ्चि दाजौ स्थेयम् क्वयामो बलिनोत् पाद्य वैरम्

12 त्वम् पद्र थानाम् किल यूथ पाधिपो घटस्व नो ऽस्वस्तय आश्व नूहः

सम्स्थाप्य चास्मान् प्रमृजाश्रु स्वकानाम् यः स्वाम् प्रतिज्ञाम् नाति पिपर्त्य सभ्यः

13 मैत्रेय उवाच

सो ऽधि क्षिप्तो भगवता प्रलब्धश् च रुषा भृशम्

आजहार् ओल्बणम् क्रोधम् क्रीड्यमानो ऽहिराडिव

14 सृजन् अमर्षितः श्वासान् मन्यु प्रचलि तेइन्द्रियः

आसाद्य तरसा दैत्यो गदयाभ्य हनद् हरिम्

15 भगवाम्स्तु गदावेगम् विसृष्टम् रिपुणोरसि

अवञ्चयत् तिरश् चीनो योगा रूढ इवान्तकम्

16 पुनर् गदाम् स्वाम् आदाय भ्रामयन्तम् अभीक्ष्णशः

अभ्यधावद् हरिः क्रुद्धः समम्भाद् दष्ट दच् छदम्

17 ततश् च गद यारातिम् दक्षिणस्याम् भ्रुवि प्रभुः

आजघ्ने स तु ताम् सौम्य गदया कोविदो ऽहनत्

18 एवम् गदाभ्याम् गुर्वीभ्याम् हर्यक्षो हरिर् एव च

जिगीषया सुसम् रब्धौ अन्योन्यम् अभि जघ्नतुः

19 तयोः स्पृधोः तिग्म गदा हताङ्गयोः क्षतास्रव घ्राण विवृद्ध मन्य्वोः

विचित्र मार्गाम्श् चरतोर्जि गीषया व्यभादि लायाम् इव शुष्मिणोर् मृधः

20 दैत्यस्य यज्ञा वयवस्य माया गृहीत वाराह तनोर् महात्मनः

कौरव्य मह्याम् द्विष तोर्वि मर्दनम् दिदृक्षु रागाद् ऋषिभिर् वृतः स्वराट्

21 आसन्न शौण्डीरम् अपेत साध्वसम् कृत प्रतीकार महार्य विक्रमम्

विलक्ष्य दैत्यम् भगवान् सहस्रणीः जगाद नारायणम् आदिसूकरम्

22 ब्रह्मो उवाच

एष ते देव देवानाम् अङ्घ्रि मूलम् उपेयुषाम्

विप्राणाम् सौर भेयीणाम् भूतानाम् अप्य नागसाम्

23 आगस्कृद् भयकृद् दुष्कृद् अस्मद् राद्धवरो ऽसुरः

अन्वेषन् अप्र तिरथो लोकान् अटति कण्टकः

24 मैनम् मायाविनम् दृप्तम् निरङ् कुशम् असत् तमम्

आक्रीड बाल वद् देव यथाशी विष मुत्थितम्

25 न यावदेष वर्धेत स्वाम् वेलाम् प्राप्य दारुणः

स्वाम् देव मायाम् आस्थाय तावज् जह्यघम् अच्युत

26 एषा घोरतमा सन्ध्या लोकच् छम्बट्करी प्रभो

उपसर्पति सर्वात्मन् सुराणाम् जयम् आवह

27 अधुनै षो ऽभि जिन्नाम योगो मौहूर्तिको ह्यगात्

शिवाय नस्त्वम् सुहृदाम् आशु निस्तर दुस्तरम्

28 दिष्ट्या त्वाम् विहितम् मृत्युम् अयम् आसादित: स्वयम्

विक्रम् यैनम् मृधे हत्वा लोकान् आधेहि शर्मणि

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

त्रुतीय स्कन्दे अष्टा दशो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ त्रुतीय स्कन्द: एकोन विम्शो ऽध्याय :

स्कन्द- 03: अध्याय- 19

01 मैत्रेय उवाच

अवधार्य विरिञ्चस्य निर्व्यलीक् आमृतम् वच:

प्रहस्य प्रेम गर्भेण तद पाङ्गेनसो ऽग्रहीत्

02 तत: सपत्नम् मुखत: चरन्तम् अकुतोभयम्

जघान् ओत्पत्य गदया हनौ असुर मक्षज:

03 सा हता तेन गदया विहता भगवत् करात्

विघूर्णिता पतद् रेजे तद् अद्भुतम् इवाभवत्

04 स तदा लब्ध तीर्थो ऽपि न बबाधे निरायुधम्

मानयन् स मृधे धर्मम् विष्वक्सेनम् प्रकोपयन्

05 गदायाम् अप विद्धायाम् हाहा कारे विनिर्गते

मानया मास तद् धर्मम् सुनाभम् चास्मरद् विभु:

06 तम् व्यग्र चक्रम् दिति पुत्राध मेन स्वपार्षद मुख्येन विषज्ज मानम्

चित्रा वाचो ऽतद् विदाम् खेचराणाम् तत्र स्मासन् स्वस्ति ते ऽमुम् जहीति

07 स तम् निशाम्यात् तर थाङ्ग मग्रतो व्यवस् थितम् पद्म पलाश लोचनम्

विलोक्य चामर्ष परिप्लुते इन्द्रियो रुषा स्वदन् तच् छदम् आदशच् छवसन्

08 कराल दम्ष्ट्रश् चक्षुर् भ्याम् सञ्च क्षाणो दहन्निव

अभि प्लुत्य स्व गदया हतो ऽसीत् याहनद् हरिम्

09 पदा सव्येन ताम् साधो भगवान् यज्ञ सूकरः

लीलया मिषतः शत्रोः प्राहरद् वातरम् हसम्

10 आह चायुध माधत्स्व घटस्व त्वम् जिगीषसि

इत् युक्तः स तदा भूयः ताडयन् व्यनदद् भृशम्

11 ताम् स आपततीम् वीक्ष्य भगवान् सम वस्थितः

जग्राह लीलया प्राप्ताम् गरुत् मानिव पन्नगीम्

12 स्व पौरुषे प्रति हते हत मानो महासुरः

नैच्छद् गदाम् दीय मानाम् हरिणा विगत प्रभः

13 जग्राह त्रिशिखम् शूलम् ज्वलज् ज्वलन लोलुपम्

यज्ञाय धृत रूपाय विप्रायाभि चरन्यथा

14 तदो जसा दैत्य महा भटार् पितम् चकास दन्तः ख उदीर्ण दीधिति

चक्रेण चिच्छेद निशात नेमिना हरिर् यथा ताक्ष्र्य पतत्र मुज्झितम्

15 वृक्णे स्वशूले बहु धारिणा हरेः प्रत्येत्य विस्तीर्ण मुरो विभूति मत्

प्रवृद्ध रोषः स कठोर मुष्टिना नदन् प्रहृत्यान् तरधीय तासुरः

16 तेनेत्थम् आहतः क्षत्तः भगवान् आदि सूकरः

नाकम् पत मनाक् क्वापि स्रजा हत इव द्विपः

17 अथोरुधा सृजन् मायाम् योग मायेश्वरे हरौ

याम् विलोक्य प्रजास् त्रस्ता मेनिरे ऽस्योप सम्यमम्

18 प्रववुः वाय वश्चण्डाः तमः पाम्सवम् ऐरयन्

दिग्भ्यो निपेतुर् ग्रावाणः क्षेपणैः प्रहिता इव

19 द्यौर्नष्ट भगणा भ्रौघैः सविद्युत् स्तन यित्नुभिः

वर्षद्भिः पूय केशा सृग् विण्मूत्रा स्थीनि चासकृत्

20 गिरयः प्रत्य दृश् यन्त नानायुध मुचो ऽनघ

दिग्वाससो यातु धान्यः शूलिन्यो मुक्त मूर्धजाः

21 बहुभिः यक्ष रक्षोभिः पत्त्यश्व रथ कुञ्जरैः

आततायिभिर् उत्सृष्टा हिम्स्रा वाचो ऽति वैशसाः

22 प्रादुष् कृतानाम् मायानाम् आसुरीणाम् विनाशयत्

सुदर्शन अस्त्रम् भगवान् प्रायुङ्क्त दयितम् त्रिपात्

23 तदा दितेः समभवत् सहसा हृदि वेपथुः

स्मरन्त्या भर्तु रादेशम् स्तनात् चासृक् प्रसुस्रुवे

24 विनष्टा सु स्व मायासु भूयश्चा व्रज्य केशवम्

रुषोप गूहमानो ऽमुम् ददृशे ऽवस्थितम् बहिः

25 तम् मुष्टिभिर् विनिघ् नन्तम् वज्र सारैर् अधोक्षजः

करेण कर्ण मूले ऽहन् यथा त्वाष्ट्रम् मरुत् पतिः

26 स आहतो विश्वजित् आह्य वज्ञया परिभ्रमद् गात्र उदस्त लोचनः

विशीर्ण बाह्वङ्घ्रि शिरोरुहो ऽपतद् यथा न गेन्द्रो लुलितो नभस् वता

27 क्षितौ शयानम् तम् अकुण्ठ वर्चसम् कराल दम्ष्ट्रम् परिदष्ट दच्छदम्

अजादयो वीक्ष्य शशम्सु रागता अहो इमम् को नु लभेत सम्स्थितिम्

28 यम् योगिनो योग समाधिना रहो ध्यायन्ति लिङ्गाद् असतो मुमुक्षया

तस्यैष दैत्य ऋषभः पदाहतो मुखम् प्रपश्यम्स् तनुमुत् ससर्ज ह

29 एतौ तौ पार्षदौ अस्य शापाद् यातौ असद्गतिम्

पुनः कतिपयैः स्थानम् प्रपत्स् येते ह जन्मभिः

30 देवा ऊचुः

नमो नमस्ते ऽखिल यज्ञ तन्तवे स्थितौ गृहीताम् अल सत्त्व मूर्तये

दिष्ट्या हतो ऽयम् जगताम् अरुन्तुदः त्वत् पाद भक्त्या वयमीश निर्वृताः

31 मैत्रेय उवाच

एवम् हिरण्याक्षम् असह्य विक्रमम् स सादयित्वा हरि रादि सूकरः

जगाम लोकम् स्वम् अखण्डि तोत्सवम् समीडित: पुष्कर विष्टरा दिभि:

32 मया यथा नूक्तम् अवादि ते हरे: कृताव तारस्य सुमित्र चेष्टितम्

यथा हिरण्याक्ष उदार विक्रमो महामृधे क्रीडनवन् निराकृत:

33 सूत उवाच

इति कौषार वाख्याताम् आश्रुत्य भगवत् कथाम्

क्षत्ता अनन्दम् परम् लेभे महा भागवतो द्विज

34 अन्येषाम् पुण्य श्लोकानाम् उद्दाम यशसाम् सताम्

उपश्रुत्य भवेन् मोद: श्रीवत् साङ्कस्य किम् पुन:

35 यो गजेन्द्रम् झषग् रस्तम् ध्यायन्तम् चरणाम् बुजम्

क्रोशन् तीनाम् करेणूनाम् कृच्छ्रतो ऽमोच यद् द्रुतम्

36 तम् सुखा राध्यम् ऋजुभि: अनन्य शरणैर् नृभि:

क्रुतज्ञ: को न सेवेत दुरा राध्यम् असाधुभि:

37 यो वै हिरण्याक्ष वधम् महाद्भुतम् विक्रीडितम् कारण सूकर् आत्मन:

शृणोति गायत् यनुमोद ते ऽञ्जसा विमुच्यते ब्रह्म वधाद् अपि द्विजा:

38 एतन् महा पुण्यमलम् पवित्रम् धन्यम् यशस्यम् पदमायुर् आशिषाम्

प्राणेन्द्रि याणाम् युधि शौर्य वर्धनम् नारायणो ऽन्ते गतिर् अङ्ग शृण्वताम्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

त्रुतीय स्कन्दे एकोन विम्शो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ त्रुतीय स्कन्द: विम्शो ऽध्याय :

स्कन्द- 03: अध्याय- 20

01 शौनक उवाच

महीम् प्रतिष्ठा मध्यस्य सौते स्वायम् भुवो मनु:

कान्यन्व तिष्ठद् द्वाराणि मार्गा यावर जन्मनाम्

02 क्षत्ता महा भागवत: कृष्णस्यै कान्तिक: सुहृत्

यस् तत्या जाग्रजम् कृष्णे सापत्यम् अघवान् इति

03 द्वैपायना दनवरो महित्वे तस्य देहज:

सर्वात्मना श्रित: कृष्णम् तत् पराम्श् चाप् यनुव्रत:

04 किमन् वपृच्छन् मैत्रेयम् विरजास् तीर्थ सेवया

उपगम्य कुशा वर्त आसीनम् तत्त्व वित्तमम्

05 तयो: सम्वदतो: सूत प्रवृत्ता ह्यमला: कथा:

आपो गाङ्गा इवा घघ्नी: हरे: पादाम्बुज् आश्रया:

06 ता न: कीर्तय भद्रम् ते कीर्तन्यो दार कर्मण:

रसज्ञ: को नु तृप् येत हरि लीला मृतम् पिबन्

07 एवम् उग्रश्र वा: पृष्ट ऋषिभिर् नैमिषायनै:

भगवत् यर्पिताध् यात्म: तानाह श्रूयता मिति

08 सूत उवाच

हरेर् धृत क्रोडत नो: स्व मायया निशम्य गो रुद् धरणम् रसा तलात्

लीलाम् हिरण्याक्षम् अवज्ञ या हतम् सञ्जात हर्षो मुनिमाह भारत:

09 विदुर उवाच

प्रजापति पति: सृष्ट्वा प्रजा सर्गे प्रजा पतीन्

किमा रभत मे ब्रह्मन् प्रब्रूहि अव्यक्त मार्गवित्

10 ये मरीच्या दयो विप्रा यस्तु स्वायम् भुवो मनु:

ते वै ब्रह्मण आदेशात् कथमे तद् अभावयन्

11 सद्विती या: किम् असृजन् स्वतन्त्रा उत कर्मसु

आहो स्वित् सम् हता: सर्व इदम् स्म सम कल्पयन्

12 मैत्रेय उवाच

दैवेन दुर्वितर् क्येण परेणा निमिषेण च

जात क्षोभाद् भगवतो महा नासीद् गुण त्रयात्

13 रजः प्रधानान् महतः त्रिलिङ्गो दैव चोदि तात्

जातः ससर्ज भूतादिः वियदादीनि पञ्चशः

14 तानि चैकैकशः स्रष्टुम् असमर्थानि भौतिकम्

सम् हत्य दैव योगेन हैमम् अण्डम् अवासृजन्

15 सो ऽशयिष्ट् आब्धि सलिले आण्ड कोशो निरात्मकः

साग्रम् वै वर्ष साहस्रम् अन्व वात्सीत् तम् ईश्वरः

16 तस्य नाभेर भूत् पद्मम् सहस्रार्को रुदी धिति

सर्व जीव निका यौको यत्र स्वयम् अभूत् स्वराट्

17 सो ऽनुविष्टो भगवता यः शेते सलिलाशये

लोक सम्स्थाम् यथा पूर्वम् निर्ममे सम्स्थया स्वया

18 ससर्जच् छायया विद्याम् पञ्च पर्वाणम् अग्रतः

तामिस्रम् अन्ध तामिस्रम् तमो मोहो महा तमः

19 विससर्ज् आत्मनः कायम् नाभि नन्दम्स् तमो मयम्

जगृहुः यक्ष रक्षाम्सि रात्रिम् क्षुत् तृट् समुद् भवाम्

20 क्षुत् तृड्भ्याम् उप सृष्टास्ते तम् जग्धुम् अभि दुद्रुवुः

मा रक्ष तैनम् जक्षध्वम् इत्यूचुः क्षुत् तृडर् दिताः

21 देवस् ताना ह सम् विग्नो मा माम् जक्षत रक्षत

अहो मे यक्ष रक्षाम्सि प्रजा यूयम् बभू विथ

22 देवताः प्रभया या या दीव्यन् प्रमुखतो ऽसृजत्

ते अहार्षुर् देव यन्तो विसृष्टाम् ताम् प्रभा महः

23 देवो ऽदेवाञ्ज घनतः सृजति स्माति लोलुपान्

त एनम् लोलु पतया मैथुना याभि पेदिरे

24 ततो हसन्स भगवान् असुरैः निरपत् रपैः

अन्वीय मानस् तरसा क्रुद्धो भीतः परा पतत्

25 स उपव्रज्य वरदम् प्रपन् नार्ति हरम् हरिम्

अनुग्रहाय भक्तानाम् अनु रूपात्म दर्शनम्

26 पाहि माम् परमात् मम्स्ते प्रेषणे नासृजम् प्रजाः

ता इमा यभितुम् पापा उपा क्रामन्ति माम् प्रभो

27 त्वमेकः किल लोकानाम् क्लिष्टानाम् क्लेश नाशनः

त्वमेकः क्लेश दस् तेषाम् अनासन्न पदाम् तव

28 सो ऽवधार् यास्य कार्पण्यम् विविक्ताध् यात्म दर्शनः

विमुञ्च् आत्म तनुम् घोराम् इत् युक्तो विमु मोच ह

29 ताम् क्वणच् चरणाम् भोजाम् मद विह्वल लोचनाम्

काञ्ची कलाप विलसद् दुकूलच् छन्न रोधसम्

30 अन्योन्य श्लेषयोत् तुङ्ग निरन्तर पयोधराम्

सुनासाम् सुद्विजाम् स्निग्ध हास लीलाव लोकनाम्

31 गूहन्तीम् व्रीड यात्मानम् नीला लक वरूथिनीम्

उप लभ्या सुरा धर्म सर्वे सम्मुमुहुः स्त्रियम्

32 अहो रूपम् अहो धैर्यम् अहो अस्या नवम् वयः

मध्ये कामय मानानाम् अकामेव विसर्पति

33 वितर्क यन्तो बहुधा ताम् सन्ध्याम् प्रमदा कृतिम्

अभि सम्भाव्य विश्रम्भात् पर्य पृच्छन् कुमेधसः

34 कासि कस्यासि रम्भोरु को वार्थस् ते ऽत्र भामिनि

रूप द्रविण पण्येन दुर्भगान् नो विबा धसे

35 या वा काचित् त्वमबले दिष्ट्या सन्दर्शनम् तव

उत्सुनो षीक्ष माणानाम् कन्दुक क्रीडया मनः

36 नैकत्र ते जयति शालिनि पाद पद्मम्

घ्नन्त्या मुहुः कर तलेन पतत् पतङ्गम्

मध्यम् विषीदति बृहत् स्तन भार भीतम्

शान्त् एव दृष्टिर् अमला सुशिखास मूहः

37 इति सायन्तनीम् सन्ध्याम् असुराः प्रमदा यतीम्

प्रलोभ यन्तीम् जगृहुः मत्वा मूढ धियः स्त्रियम्

38 प्रहस्य भाव गम्भीरम् जिघ्रन्त् यात्मान मात्मना

कान्त्या ससर्ज भगवान् गन्धर्व् आप्सरसाम् गणान्

39 विससर्ज तनुम् ताम् वै ज्योत्स्नाम् कान्ति मतीम् प्रियाम्

त एव चाददुः प्रीत्या विश्वा वसु पुरोगमाः

40 सृष्ट्वा भूत पिशा चाम्श् च भगवान् आत्म तन्द्रिणा

दिग्वाससो मुक्त केशान् वीक्ष्य चामील यद् दृशौ

41 जगृहुः तद् विसृष्टाम् ताम् जृम्भण् आख्याम् तनुम् प्रभोः

निद्राम् इन्द्रिय विक्लेदो यया भूतेषु दृश्यते

येनोच् छिष्टान् धर्षयन्ति तमुन् मादम् प्रचक्षते

42 ऊर्जस् वन्तम् मन्यमान आत्मानम् भगवान् अजः

साध्यान् गणान् पितृ गणान् परोक्षेणा सृजत् प्रभुः

43 त आत्म सर्गम् तम् कायम् पितरः प्रति पेदिरे

साध्येभ् यश् च पितृभ् यश् च कवयो यद् वितन् वते

44 सिद्धान् विद्याधराम्श् चैव तिरो धाने न सो ऽसृजत्

तेभ्यो ऽददात्त मात्मानम् अन्तर् धानाख्यम् अद्भुतम्

45 स किन्नरान् किम् पुरुषान् प्रत् यात्म्येना सृजत् प्रभुः

मानयन् आत्मन् आत्मानम् आत्मा भासम् विलोकयन्

46 ते तु तज् जगृहू रूपम् त्यक्तम् यत् परमेष्ठिना

मिथुनी भूय गायन्तः तमेवो षसि कर्मभिः

47 देहेन वै भोगवता शयानो बहु चिन्तया

सर्गे ऽनुपचिते क्रोधाद् उत्स सर्जह तद् वपुः

48 ये ऽही यन्ता मुतः केशा अहयस्ते ऽङ्ग जज्ञिरे

सर्पाः प्रसर्प तः क्रूरा नागा भो गोरु कन्धराः

49 स आत्मानम् मन्य मानः कृत कृत्यम् इवात्म भूः

तदा मनून् ससर् जान्ते मनसा लोक भावनान्

50 तेभ्य: सो ऽस्त्य सृजत् स्वीयम् पुरम् पुरुषम् आत्मवान्

तान् दृष्ट्वाये पुरा सृष्टा: प्रश शम्सु: प्रजा पतिम्

51 अहो एतज् जग त्स्रष्ट: सुकृतम् बतते कृतम्

प्रतिष्ठिता: क्रिया यस्मिन् साकम् अन्नम् अदाम हे

52 तपसा विद्यया युक्तो योगेन सु समाधिना

ऋषीन् ऋषिर् हृषीकेश: ससर् जाभि मता: प्रजा:

53 तेभ्यश् चै कैकश:स्वस्य देहस् याम्शम् अदादज:

यत्तत् समाधियो गर्द्धि तपो विद्या विरक्ति मत्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

त्रुतीय स्कन्दे विम्शो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ त्रुतीय स्कन्द: एक विम्शो ऽध्याय :

स्कन्द- 03: अध्याय- 21

01 विदुर उवाच

स्वायम्भुवस्य च मनो: वम्श: परम सम्मत:

कथ् यताम् भगवन् यत्र मैथुने नैधिरे प्रजा:

02 प्रिय व्रतो [उ]त्तान पादौ सुतौ स्वायम्भुव स्य वै

यथा धर्मम् जुगुपतु: सप्त द्वीप वतीम् महीम्

03 तस्य वै दुहिता ब्रहमन् देवहूती ति विश्रुता

पत्नी प्रजापते रुक्ता कर्दमस्य त्वया नघ

04 तस्याम् स वै महा योगी युक्तायाम् योग लक्षणै:

ससर्ज कतिधा वीर्यम् तन्मे शुश्रूष वे वद

05 रुचिर्यो भगवान् ब्रह्मन् दक्षो वा ब्रह्मण: सुत:

यथा ससर्ज भूतानि लब्ध्वा भार्याम् च मानवीम्

06 मैत्रेय उवाच

प्रजा: सृजेति भगवान् कर्दमो ब्रह्मणो दित:

सरस् वत्याम् तपस् तेपे सहस्राणाम् समादश

07 तत: समाधि युक्तेन क्रिया योगेन कर्दम:

सम्प्र पेदे हरिम् भक्त्या प्रपन्न वरदा शुषम्

08 तावत् प्रसन्नो भगवान् पुष्क राक्ष: कृते युगे

दर्शया मास तम् क्षत्त: शाब्दम् ब्रह्म दधद् वपु:

09 स तम् विरज मर्काभम् सित पद्मोत् पलस्रजम्

स्निग्ध नीलाल कव्रात वक्त्राब्जम् विरजो ऽम्बरम्

10 किरीटिनम् कुण्डलिनम् शङ्ख चक्र गदा धरम्

श्वेतोत्पल क्रीडन कम् मन: स्पर्श स्मितेक्षणम्

11 विन्यस्त चरण् आम्भोजम् अम्स देशे गरुत् मत:

दृष्ट्वा खे ऽवस्थितम् वक्ष: श्रियम् कौस्तुभ कन्धरम्

12 जात हर्षो ऽपतन् मूर्ध्ना क्षितौ लब्ध मनोरथ:

गीर्भि: त्वभ्य गृणात् प्रीति स्वभा वात्मा कृताञ्जलि:

13 ऋषिर् उवाच

जुष्टम् बताद् याखिल सत्त्व राशे: साम् सिद्ध्य मक्ष्णोस् तव दर्शनान् न:

यद् दर्शनम् जन्म भिरीड्य सद्भि: आशासते योगिनो रूढ योगा:

14 ये मायया ते हत मेध सस्त्वत् पादार विन्दम् भव सिन्धु पोतम्

उपासते कामल वाय तेषाम् रासीश कामान् निरये ऽपि ये स्यु:

15 तथा स चाहम् परिवोढु काम: समान शीलाम् गृहमेध धेनुम्

उपेयि वान् मूलम् अशेष मूलम् दुराशय: काम दुघाङ्घ्रि पस्य

16 प्रजा पतेस्ते वचसा धीश तन्त्या लोकः किलायम् काम हतो ऽनुबद्धः

अहम् च लोकानु गतो वहामि बलिम् च शुक्ला निमिषाय तुभ्यम्

17 लोकाम्श् च लोकानु गतान् पशूम्श् च हित्वा श्रितास्ते चरणात पत्रम्

परस्परम् त्वद् गुण वाद सीधु पीयूष निर्या पित देह धर्माः

18 न ते ऽजराक्ष भ्रमिरायुर् एषाम् त्रयोद शारम् त्रिशतम् षष्टि पर्व

षण्नेम् यनन्तच् छदि यत् त्रिणाभि कराल स्रोतो जगदाच् छिद्य धावत्

19 एकः स्वयम् सन्ज गतः सिसृक्षया अद्वितीय यात्मन् अधि योग मायया

सृजस् यदः पासि पुनर्ग्र सिष्यसे यथोर्ण नाभिः भगवन् स्व शक्तिभिः

20 नैतद् बता धीश पदम् त वेप्सितम् यन् मायया नस् तनुषे भूत सूक्ष्मम्

अनुग्रहायास् त्वपि यर्हि मायया लसत् तुळस्या तनुवा विलक्षितः

21 तम् त्वानु भूत्यो पर त क्रियार्थम् स्व मायया वर्तित लोक तन्त्रम्

नमाम् यभीक्ष्णम् नमनीय पाद सरोजम् अल्पीयसि काम वर्षम्

22 ऋषिर् उवाच

इत् यव्य लीकम् प्रणुतो ऽब्जनाभः तमाब भाषे वचसामृ तेन

सुपर्ण पक्षो परि रोच मानः प्रेमस्मितो द्वीक्षण विभ्र मद् भ्रूः

23 श्री भगवान् उवाच

विदित्वा तव चैत्यम् मे पुरैव सम योजि तत्

यदर्थम् आत्म नियमैः त्वयै वाहम् समर् चितः

24 न वै जातु मृषैव स्यात् प्रजाध् यक्ष मदर्हणम्

भवद् विधेषु अतितराम् मयि सङ्गृभित् आत्मनाम्

25 प्रजापति सुतः सम्राट् मनुर् विख्यात मङ्गळः

ब्रह्मा वर्तम्यो ऽधि वसन् शास्ति सप्तार्णवाम् महीम्

26 स चेह विप्र राजर्षिः महिष्या शत रूपया

आयास् यति दिदृ क्षुस्त्वाम् परश्वो धर्म कोविदः

27 आत्मजाम् असिता पाङ्गीम् वयः शील गुणान् विताम्

मृग यन्तीम् पतिम् दास्यति अनुरूपा य ते प्रभो

28 समाहितम् ते हृदयम् यत्रेमान् परिवत्सरान्

सा त्वाम् ब्रह्मन् नृप वधूः काम माशु भजिष् यति

29 या त आत्म भृतम् वीर्यम् नवधा प्रस विष्यति

वीर्ये त्वदीये ऋषय आधास्यन् त्यन्ज सात्मनः

30 त्वम् च सम्य गनुष्ठाय निदेशम् म उशत् तमः

मयि तीर्थी कृता शेष क्रियार्थो माम् प्रपत्स् यसे

31 कृत्वा दयाम् च जीवेषु दत्त्वा चाभयम् आत्मवान्

मय् यात्मानम् सह जगद् द्रक्ष्यस् यात्मनि चापि माम्

32 सहाहम् स्वाम्श कलया त्वद् वीर्येण महामुने

तव क्षेत्रे देव हूत्याम् प्रणेष्ये तत्त्व सम्हिताम्

33 मैत्रेय उवाच

एवम् तम् अनुभाष् याथ भगवान् प्रत्य गक्षजः

जगाम बिन्दु सरसः सरस्वत्या परिश्रि तात्

34 निरीक्ष तस्तस् य ययौ अशेष सिद्धेश्वरा भिष्टुत सिद्ध मार्गः

आकर्णयन् पत्र रथेन्द्र पक्षैः उच्चारितम् स्तोमम् उदीर्ण साम

35 अथ सम् प्रस्थिते शुक्ले कर्दमो भगवान् ऋषिः

आस्ते स्म बिन्दु सरसि तम् कालम् प्रति पालयन्

36 मनुः स्यन्दन मास्थाय शात कौम्भ परिच् छदम्

आरोप्य स्वाम् दुहितरम् सभार्यः पर्यटन् महीम्

37 तस्मिन् सुधन्वन् न हनि भगवान् यत् समादिशत्

उपायाद् आश्रम पदम् मुनेः शान्त व्रतस्य तत्

38 यस्मिन् भगवतो नेत्रात् न्यपतन् अश्रु बिन्दवः

कृपया सम्परी तस्य प्रपन्ने ऽर्पितया भृशम्

39 तद्वै बिन्दुसरो नाम सरस्वत्या परिप्लुतम्

पुण्यम् शिवा मृत जलम् महर्षि गण सेवितम्

40 पुण्य द्रुमल ताजालैः कूजत् पुण्य मृग द्विजैः

सर्वर्तु फल पुष्पाढ्यम् वन राजि श्रियान् वितम्

41 मत् तद् विज गणैर् घुष्टम् मत् त भ्रमर विभ्रमम्

मत् तबर्हि नटा टोपम् आह्वयन् मत्त कोकिलम्

42 कदम्ब चम्पका शोक करञ्ज बकुलासनैः

कुन्द मन्दार कुटजैः चूत पोतैर् अलङ्कृतम्

43 कारण्डवैः प्लवैर् हम्सैः कुररैः जल कुक्कुटैः

सारसैश् चक्र वाकैश् च चकोरैर् वल्गु कूजितम्

44 तथैव हरिणैः क्रोडैः श्वाविद् गवय कुञ्जरैः

गोपुच्छैर् हरिभिर् मर्कैः नकुलैर् नाभि भिर् वृतम्

45 प्रविश्य तत् तीर्थ वरम् आदिराजः सहात्मजः

ददर्श मुनि मासीनम् तस्मिन् हुत हुताशनम्

46 विद्योत मानम् वपुषा तपस् युग्र युजा चिरम्

नाति क्षामम् भगवतः स्निग्धा पाङ्गाव लोकनात्

तद् व्याहृत् आमृत कला पीयूष श्रवणेन च

47 प्राम्शुम् पद्म पला शाक्षम् जटिलम् चीर वाससम्

उप सम्श्रित्य मलिनम् यथार्हणम् असम्स्कृतम्

48 अथोटजम् उपायातम् नृदेवम् प्रणतम् पुरः

सपर्यया पर्य गृह्णात् प्रति नन्द्यानु रूपया

49 गृहीतार् हणमा सीनम् सम्यतम् प्रीण यन्मुनिः

स्मरन् भगवद् आदेशम् इत्या हश् लक्ष्णया गिरा

50 नूनम् चङ्क्रमणम् देव सताम् सम्रक्षणा य ते

वधाय चासताम् यस्त्वम् हरेः शक्तिर् हि पालिनी

51 यो ऽर्केन्द् वग्नीन्द्र वायूनाम् यम धर्म प्रचेतसाम्

रूपाणि स्थान आधत्से तस्मै शुक्लाय ते नमः

52 न यदा रथम् आस्थाय जैत्रम् मणिगणार् पितम्

विस् फूर्जत् चण्ड कोदण्डो रथेन त्रासयन् नघान्

53 स्व सैन्य चरण क्षुण्णम् वेपयन् मण्डलम् भुवः

विकर्षन् बृहतीम् सेनाम् पर्यटस्यम् शुमानिव

54 तदैव सेतवः सर्वे वर्णाश्रम निबन्धनाः

भगवद् रचिता राजन् भिद्येरन् बत दस्युभिः

55 अधर्मश् च समेधेत लोलुपैः व्यङ्कुशैर् नृभिः

शयाने त्वयि लोको ऽयम् दस्युग् रस्तो विनङ्क्ष् यति

56 अथापि पृच्छे त्वाम् वीर यदर्थम् त्वम् इहागतः

तद्वयम् निर्व्य लीकेन प्रति पद्याम हे हृदा

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

त्रुतीय स्कन्दे एक विम्शो ऽध्याय ः॥

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ त्रुतीय स्कन्दः द्वा विम्शो ऽध्याय ः

स्कन्द- 03ः अध्याय- 22

01 मैत्रेय उवाच

एवम् आविष् कृता शेष गुण कर्मोदयो मुनिम्

सव्रीड इव तम् सम्राड् उपारतम् उवाच ह

02 मनुर् उवाच

ब्रह्मासृ जत्स्व मुखतो युष्मान् आत्म परीप्सया

छन्दो मयस् तपो विद्या योग युक्तान लम्पटान्

03 तत् त्राणाया सृजच् चास्मान् दोः सहस्रात् सहस्र पात्

हृदयम् तस्य हि ब्रह्म क्षत्रम् अङ्गम् प्रचक्षते

04 अतो ह्यन्योन्यम् आत्मानम् ब्रह्म क्षत्रम् च रक्षत:

रक्षति स्माव्ययो देव: स य: सद सदात्मक:

05 तव सन्दर्शना देवच् छिन्ना मे सर्व सम्शया:

यत् स्वयम् भगवान् प्रीत्या धर्म माह रिरक्षिषो:

06 दिष्ट्या मे भगवान् दृष्टो दुर्दर्शो यो ऽकृतात् मनाम्

दिष्ट्या पादरज: स्पृष्टम् शीर्ष्णा मे भवत: शिवम्

07 दिष्ट्या त्वयानु शिष्टो ऽहम् कृतश्च् आनुग्रहो महान्

अपावृतै: कर्ण रन्ध्रै: जुष्टा दिष्ट्योश तीर् गिर:

08 स भवान् दुहि तृस्नेह परि क्लिष्टात्म नो मम

श्रोतु मर्हसि दीनस्य श्रावितम् कृपया मुने

09 प्रियव्रतो [उ]त्तानपदो: स्वसेयम् दुहिता मम

अन्विच्छति पतिम् युक्तम् वय: शील गुणादिभि:

10 यदा तु भवत: शील श्रुत रूप वयो गुणान्

अशृणोन् नारदा देषा त्वय्या सीत् कृत निश्चया

11 तत् प्रतीच् छ द्विजा ग्र्येमाम् श्रद्ध योप हृताम् मया

सर्वात्म नानु रूपाम् ते गृहमेधिषु कर्मसु

12 उद्य तस्य हि कामस्य प्रतिवादो न शस्यते

अपि निर्मुक्त सङ्गस्य काम रक्तस्य किम् पुन:

13 य उद्यतम् अनादृत्य कीनाशम् अभियाचते

क्षीयते तद् यश: स्फीतम् मानश् चावज्ञ या हत:

14 अहम् त्वा शृणवम् विद्वन् विवाहार्थम् समुद्यतम्

अतस्त्वम् उप कुर्वाण: प्रत्ताम् प्रति गृहाण मे

15 ऋषिर् उवाच

बाढम् उद्वोढु कामो ऽहम् अप्रत्ता च तवात् मजा

आवयोर् अनु रूपो ऽसौ आद्यो वैवाहिको विधि:

16 काम: स भूयान् नर देव ते ऽस्या: पुत्र्या: समाम् नाय विधौ प्रतीत:

क एव ते तनयाम् नाद्रि येत स्वयैव कान्त्या क्षिपती मिव श्रियम्

17 याम् हर्म्य पृष्ठे क्वणद् अङ्घ्रि शोभाम् विक्रीडतीम् कन्दुक विह्वलाक्षीम्

विश्वावसुः न्यपतत् स्वाद् विमानाद् विलोक्य सम्मोह विमूढ चेताः

18 ताम् प्रार्थ यन्तीम् ललनाल लामम् असेवितश्री चरणैर् अदृष्टाम्

वत्साम् मनोर् उच्च पदः स्व सारम् को नानु मन्येत बुधो ऽभि याताम्

19 अतो भजिष्ये समयेन साध्वीम् यावत् तेजो बिभृयाद् आत्मनो मे

अतो धर्मान् पारम हम्स्य मुख्यान् शुक्ल प्रोक्तान् बहु मन्ये ऽविहिम्स्रान्

20 यतो ऽभवद् विश्व मिदम् विचित्रम् सम्स्थास्यते यत्र च वाव तिष्ठते

प्रजा पतीनाम् पतिरेष मह्यम् परम् प्रमाणम् भगवान् अनन्तः

21 मैत्रेय उवाच

स उग्र धन्वन् इयदेवा बभाषे आसीच्च तूष्णीम् अरविन्द नाभम्

धियोप गृह्णन् स्मित शोभि तेन मुखेन चेतो लुलुभे देवहूत्याः

22 सो ऽनुज्ञात्वा व्यवसितम् महिष्या दुहितुः स्फुटम्

तस्मै गुणगणाढ्‌ याय ददौ तुल्याम् प्रहर्षितः

23 शतरूपा महा राज्ञी पारि बर्हान् महा धनान्

दम्पत्योः पर्यदात् प्रीत्या भूषा वासः परिच् छदान्

24 प्रत्ताम् दुहितरम् सम्राट् सदृक्षाय गतव् यथः

उपगुह्य च बाहुभ्याम् औत्कण्ठ्‌योन् मथि ताशयः

25 अशक्नुवम् स्तद् विरहम् मुञ्चन् बाष्प कलाम् मुहुः

आसिञ्चद् अम्बवत् सेति नेत्रोदैः दुहितुः शिखाः

26 आमन्त्र्य तम् मुनिवरम् अनुज्ञातः सहानुगः

प्रतस्थे रथ मारुह्य सभार्यः स्वपुरम् नृपः

27 उभयोर् ऋषि कुल्यायाः सरस् वत्याः सुरोधसोः

ऋषीणाम् उप शान्तानाम् पश्यन् आश्रम सम्पदः

28 तमा यान्तम् अभिप्रेत्य ब्रह्मा वर्तात् प्रजाः पतिम्

गीत सम्स्तुति वादित्रैः प्रत् युदीयुः प्रहर् षिताः

29 बर्हिष्मती नाम पुरी सर्व सम्पत् समन्विता

न्यपतन् यत्र रोमाणि यज्ञस् याङ्गम् विधुन् वतः

30 कुशाः काशास्त एवासन् शश्वद् हरित वर्चसः

ऋषयो यैः परा भाव्य यज्ञ घ्नान् यज्ञ मीजिरे

31 कुशकाश मयम् बर्हिः आस्तीर्य भगवान् मनुः

अयजद् यज्ञ पुरुषम् लब्धा स्थानम् यतो भुवम्

32 बर्हिष्मतीम् नाम विभुः याम् निर्विश्य समावसत्

तस्याम् प्रविष्टो भवनम् ताप त्रय विनाशनम्

33 सभार्यः स प्रजः कामान् बुभुजे ऽन्या विरोधतः

सङ्गीय मान सत् कीर्तिः सस्त्रीभिः सुर गायकैः

प्रत्यूषेष् वनु बद्धेन हृदा शृण्वन् हरेः कथाः

34 निष्णातम् योग मायासु मुनिम् स्वायम्भुवम् मनुम्

यदा भ्रम्श यितुम् भोगा न शेकुः भगवत् परम्

35 अयात यामास् तस् यासन् यामाः स्वान् तर यापनाः

शृण्वतो ध्यायतो विष्णोः कुर्वतो ब्रुवतः कथाः

36 स एवम् स्वान्तरम् निन्ये युगानाम् एक सप्ततिम्

वासुदेव प्रसङ्गेन परिभूत गति त्रयः

37 शारीरा मानसा दिव्या वैयासे ये च मानुषाः

भौति काश्च कथम् क्लेशा बाधन्ते हरि सम्श्रयम्

38 यः पृष्टो मुनिभिः प्राह धर्मान् नानाविधान् छुभान्

नृणाम् वर्णाश्र माणाम् च सर्व भूत हितः सदा

39 एतत्त आदि राजस्य मनोः चरितम् अद्भुतम्

वर्णितम् वर्णनी यस्य तद् अपत् योदयम् शृणु

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

त्रुतीय स्कन्दे द्वा विम्शो ऽध्याय ःll

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ त्रुतीय स्कन्दः त्रयो विम्शो ऽध्याय :

स्कन्द- 03: अध्याय- 23

01 मैत्रेय उवाच

पितृभ्याम् प्रस्थिते साध्वी पतिम् इङ्गित कोविदा

नित्यम् पर्यचरत् प्रीत्या भवानीव भवम् प्रभुम्

02 विश्रम्भेण् आत्म शौचेन गौरवेण दमेन च

शुश्रूष या सौहृदेन वाचा मधुरया च भोः

03 विसृज्य कामम् दम्भम् च द्वेषम् लोभम् अघम् मदम्

अप्रमत् तोद् यता नित्यम् तेजी याम्सम् अतोषयत्

04 स वै देवर्षि वर् यस्ताम् मानवीम् सम् अनुव्रताम्

दैवाद् गरीय सः पत्युः आशा सानाम् महाशिषः

05 कालेन भूयसा क्षामाम् कर्शिताम् व्रत चर्यया

प्रेम गद्गदया वाचा पीडितः कृपया ब्रवीत्

06 कर्दम उवाच

तुष्टो ऽहमद्य तव मानवि मानदायाः

शुश्रूषया परमया परया च भक्त्या

यो देहिनाम् अयमतीव सुहृत्स देहो

नावेक्षितः समुचितः क्षपितुम् मदर्थे

07 ये मे स्वधर्म निरत स्य तपः समाधि

विद्यात्म योग विजिता भगवत् प्रसादाः

तानेव ते मद् अनुसेवनया वरुद्धान्

दृष्टिम् प्रपश्य वितरामि अभयान शोकान्

08 अन्ये पुनर् भगवतो भ्रुव उद्वि जृम्भ

विभ्रम्शि तार्थ रचना: किम् उरुक्रमस्य

सिद्धासि भुङ्क्ष्व विभवान् निज धर्म दोहान्

दिव्यान् नरै: दुरधिगान् नृप विक्रियाभि:

09 एवम् ब्रुवाणम् अबलाखिल योग माया

विद्या विचक्षणम् अवेक्ष्य गताधि रासीत्

सम् प्रश्रय प्रणय विह्वलया गिरेषद्

व्रीडाव लोक विलसद् हसितान नाह

10 देवहूतिर् उवाच

राद्धम् बत द्विज वृषै तद् अमोघ योग

मायाधिपे त्वयि विभो तद् अवैमि भर्त:

यस्ते ऽभ्यधायि समय: सकृदङ्ग सङ्गो

भूयाद् गरीयसि गुण: प्रसव: सतीनाम्

11 तत् रेति कृत्यम् उपशिक्ष यथोप देशम्

येनैष मे कर्शितो ऽतिरिरम्स यात्मा

सिद्ध्येत ते कृत मनो भव धर्षि ताया

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ त्रुतीय स्कन्दः त्रयस् त्रिम्शो ऽध्याय :

स्कन्द- 03: अध्याय- 33

01 मैत्रेय उवाच

एवम् निशम्य कपिलस्य वचो जनित्री सा कर्दमस्य दयित् आकिल देवहूतिः

विस्रस्त मोह पटला तम् अभिप्रणम्य तुष्टाव तत्त्व विषयाङ्कित सिद्धि भूमिम्

02 देवहूतिर् उवाच

अथाप् यजो ऽन्तः सलिले शयानम् भूतेन्द्रि यार्थ् आत्म मयम् वपुस्ते

गुण प्रवाहम् सदशेष बीजम् दध्यौ स्वयम् यज् जठराब्ज जातः

03 स एव विश्वस्य भवान् विधत्ते गुण प्रवाहेण विभक्त वीर्यः

सर्गाद्य नीहो ऽवि तथाभि सन्धिः आत्मेश्वरो ऽतर्क्य सहस्र शक्तिः

04 स त्वम् भृतो मे जठरेण नाथ कथम् नु यस्यो दर एतद् आसीत्

विश्वम् युगान्ते वट पत्र एकः शेते स्म माया शिशुर् अङ्घ्रि पानः

05 त्वम् देह तन्त्रः प्रशमाय पाप्मनाम् निदेश भाजाम् च विभो विभूतये

यथ् आवतारास् तव सूक रादयः तथायम् अप्यात्म पथोप लब्धये

06 यन् नाम धेय श्रवणानु कीर्तनाद् यत् प्रह्वणाद् यत् स्मरणाद् अपि क्वचित्

श्वादो ऽपि सद्यः सवनाय कल्पते कुतः पुनस्ते भगवन् नु दर्शनात्

07 अहो बत श्वपचो ऽतो गरीयान् यज् जिह्वाग्रे वर्तते नाम तुभ्यम्

तेपुस् तपस्ते जुहुवुः सस्नु रार्या ब्रह्मा नूचुर् नाम गृणन्ति ये ते

08 तम् त्वामहम् ब्रह्म परम् पुमाम्सम् प्रत्यक् स्रोतस् यात्मनि सम् विभाव्यम्

स्वतेजसा ध्वस्त गुण प्रवाहम् वन्दे विष्णुम् कपिलम् वेद गर्भम्

09 मैत्रेय उवाच

ईडितो भगवान् एवम् कपिलाख्यः परः पुमान्
वाचा विक्ल वयेत् याह मातरम् मातृ वत्सलः

10 कपिल उवाच

मार्गेणानेन मा तस्ते सुसे व्येनो दिते न मे
आस्थितेन पराम् काष्ठाम् अचिराद् अवरोत्स्यसि

11 श्रद्धत् स्वै तन् मतम् मह्यम् जुष्टम् यद् ब्रह्म वादिभिः
येन मा मभयम् याया मृत्यु मृच्छन्त् य तद् विदः

12 मैत्रेय उवाच

इति प्रदर्श्य भगवान् सतीम् ताम् आत्मनो गतिम्
स्व मात्रा ब्रह्म वादिन्या कपिलो ऽनुमतो ययौ

13 सा चापि तनयोक् तेन योगा देशेन योग युक्
तस्मिन् आश्रम आपीडे सरस्वत्याः समाहिता

14 अभीक्ष्णाव गाह कपिशान् जटिलान् कुटिलाल कान्
आत्मानम् चोग्र तपसा बिभ्रती चीरिणम् कृशम्

15 प्रजापतेः कर्द मस्य तपो योग विजृम्भितम्
स्व गार्हस्थ्यम् अनौपम्यम् प्राथ्यम् वैमानिकैर् अपि

16 पयः फेन निभाः शय्या दान्ता रुक्म परिच् छदाः
आसनानि च हैमानि सुस्पर्शास् तरणानि च

17 स्वच् छ स्फटिक कुड्येषु महा मारक तेषु च
रत्न प्रदीपा आभान्ति ललना रत्न सम्युताः

18 गृहो द्यानम् कुसुमितै रम्यम् बह् वमरद् रुमैः
कूजद् विहङ्ग मिथुनम् गायन् मत्त मधु व्रतम्

19 यत्र प्रविष्टम् आत्मानम् विबुधानु चरा जगुः
वाप्याम् उत्पल गन्धिन्याम् कर्द मेनोप लालितम्

20 हित्वा तद् ईप्सि ततमम् अप्या खण्डल योषिताम्
किञ्चिच् चकार वदनम् पुत्र विश्लेषणा तुरा

21 वनम् प्रव्रजिते पत्यौ अपत्य विरहा तुरा

ज्ञात तत् त्वापि अभून् नष्टे वत्से गौर् इव वत्सला

22 तमेव ध्यायती देवम् अपत्यम् कपिलम् हरिम्

बभूवा चिरतो वत्स निः स्पृहा तादृशे गृहे

23 ध्यायती भगवद् रूपम् यदाह ध्यान गोचरम्

सुतः प्रसन्न वदनम् समस्तव् यस्त चिन्तया

24 भक्ति प्रवाह योगेन वैराग्येण बली यसा

युक्त् आनुष्ठान जातेन ज्ञानेन ब्रह्म हेतुना

25 विशुद् धेन तद् आत्मानम् आत्मना विश्वतो मुखम्

स्वानु भूत्या तिरो भूत माया गुण विशेषणम्

26 ब्रह्मणि अवस्थित मतिः भगवत् यात्म सम्श्रये

निवृत्त जीवा पत् तित्वात् क्षीण क्लेशाप् तनिर् वृतिः

27 नित्या रूढ समाधित् वात् परा वृत्त गुण भ्रमा

न सस्मार तद् आत्मानम् स्वप्ने दृष्टम् इवोत्थितः

28 तद् देहः परतः पोषो ऽपि अकृशश् चाध्य सम्भवात्

बभौ मलैर् अवच् छन्नः सधूम इव पावकः

29 स्वाङ्गम् तपो योग मयम् मुक्त केशम् गताम्बरम्

दैव गुप्तम् न बुबुधे वासुदेव प्रविष्टधीः

30 एवम् सा कपिलोक् तेन मार्गेणा चिरतः परम्

आत्मानम् ब्रह्म निर्वाणम् भगवन्तम् अवाप ह

31 तद् वीरा सीत् पुण्य तमम् क्षेत्रम् त्रै लोक्य विश्रुतम्

नाम्ना सिद्ध पदम् यत्र सा सम्सिद्धिम् उपेयुषी

32 तस्याः तद् योग विधुत मार्त्यम् मर्त्यम् अभूत् सरित्

स्रोतसाम् प्रवरा सौम्य सिद्धिदा सिद्ध सेविता

33 कपिलो ऽपि महा योगी भगवान् पितुर् आश्रमात्

मातरम् समनु ज्ञाप्य प्रागु दीचीम् दिशम् ययौ

34 सिद्ध चारण गन्धर्वै: मुनिभि: चाप् सरोगणै:

स्तूयमान: समुद्रेण दत्तार् हण निकेतन:

35 आस्ते योगम् समास्थाय साङ्ख्या चार्यैर् अभिष्टुत:

त्रयाणाम् अपि लोकानाम् उप शान्त्यै समाहित:

36 एतन् निगदितम् तात यत् पृष्टो ऽहम् तवानघ

कपिलस्य च सम्वादो देवहूत् याश्च पावन:

37 य इदम् अनु शृणोतियो ऽभि धत्ते कपिल मुने: मतम् आत्म योग गुह्यम्

भगवति कृतधी: सुपर्ण केतौ उप लभते भगवत् पदार विन्दम्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

त्रुतीय स्कन्दे त्रयस् त्रिम्शो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

श्रीमद् भागवतम्

अथ चतुर्थ्थ स्कन्द: प्रथमो ऽध्याय :

स्कन्द- 04: अध्याय- 01

01 मैत्रेय उवाच

मनोस्तु शतरूपायाम् तिस्र: कन्याश् च जज्ञिरे

आकूतिर् देवहूतिश् च प्रसूतिर् इति विश्रुता:

02 आकूतिम् रुचये प्रादाद् अपि भ्रातृ मतीम् नृप:

पुत्रिका धर्मम् आश्रित्य शतरूप् आनुमोदित:

03 प्रजापति: स भगवान् रुचिस् तस्याम् अजीजनत्

मिथुनम् ब्रह्म वर्चस्वी परमेण समाधिना

04 यस्तयोः पुरुषः साक्षाद् विष्णुर् यज्ञ स्वरूप धृक्

या स्त्री सा दक्षिणा भूतेः अम्श भूत् आनपायिनी

05 आनिन्ये स्वगृहम् पुत्र्याः पुत्रम् वितत रोचिषम्

स्वायम्भुवो मुदा युक्तो रुचिर् जग्राह दक्षिणाम्

06 ताम् कामयानाम् भगवान् उवाह यजुषाम् पतिः

तुष्टायाम् तोषम् आपन्नो ऽजनयद् द्वादश् आत्मजान्

07 तोषः प्रतोषः सन्तोषो भद्रः शान्तिर् इडस्पतिः

इध्मः कविर् विभुः स्वह्नः सुदेवो रोचनो द्विषट्

08 तुषिता नाम ते देवा आसन् स्वायम्भु वान्तरे

मरीचि मिश्रा ऋषयो यज्ञः सुरगणेश्वरः

09 प्रियव्रतो [उ]त्तान पादौ मनु पुत्रौ महौजसौ

तत् पुत्र पौत्र नप्तॄणाम् अनुवृत्तम् तदन्तरम्

10 देवहूतिम् अदात्तात कर्दमा यात्मजाम् मनुः

तत् सम्बन्धि श्रुत प्रायम् भवता गदतो मम

11 दक्षाय ब्रह्म पुत्राय प्रसूतिम् भगवान् मनुः

प्रायच्छद् यत्कृतः सर्गः त्रिलोक्याम् विततो महान्

12 याः कर्दम सुताः प्रोक्ता नव ब्रह्मर्षि पत्नयः

तासाम् प्रसूति प्रसवम् प्रोच्यमानम् निबोध मे

13 पत्नी मरीचेस्तु कला सुषुवे कर्दम् आत्मजा

कश्यपम् पूर्णिमानम् च ययोर् आपूरितम् जगत्

14 पूर्णिमा सूत विरजम् विश्वगम् च परन्तप

देवकुल्याम् हरेः पाद शौचाद् याभूत् सरिद् दिवः

15 अत्रेः पत्न् यनसूया त्रीन् जज्ञे सु यशसः सुतान्

दत्तम् दुर्वाससम् सोमम् आत्मेश ब्रह्म सम्भवान्

16 विदुर उवाच

अत्रेर् गृहे सुर श्रेष्ठाः स्थित् युत्पत्त् यन्त हेतवः

किञ्चिच् चिकीर्षवो जाता एतद् आख्याहि मे गुरो

17 मैत्रेय उवाच

ब्रह्मणा नोदितः सृष्टौ अत्रिर् ब्रह्म विदाम् वरः

सह पत्न्या यया वृक्षम् कुलाद्रिम् तपसि स्थितः

18 तस्मिन् प्रसूनस् तबक पलाशा शोक कानने

वार्भिः स्रवद्भिर् उद्घुष्टे निर्विन् ध्यायाः समन् ततः

19 प्राणायाम् एन सम्यम्य मनो वर्ष शतम् मुनिः

अतिष्ठद् एक पादेन निर्द्वन्द्वो ऽनिल भोजनः

20 शरणम् तम् प्रपद्ये ऽहम् य एव जगद् ईश्वरः

प्रजाम् आत्मसमाम् मह्यम् प्रयच्छतु इति चिन्तयन्

21 तप्यमानम् त्रि भुवनम् प्राणायाम् ऐध साग्निना

निर्गतेन मुनेर् मूर्ध्नः समीक्ष्य प्रभवस् त्रयः

22 अप्सरो मुनि गन्धर्व सिद्ध विद्याधरो रगैः

विताय मान यशसः तद् आश्रम पदम् ययुः

23 तत् प्रादुर् भाव सम्योग विद्योति तमना मुनिः

उत्तिष्ठन् एक पादेन ददर्श विबु धर्षभान्

24 प्रणम्य दण्डवद् भूमौ उपतस्थे ऽर्हणाञ्जलिः

वृषहम् स सुपर्णस्थान् स्वैः स्वैश् चिह्नैश् च चिह्नितान्

25 कृपाव लोकेन हसद् वदने नोप लम्भितान्

तद् रोचिषा प्रति हते निमील्य मुनि रक्षिणी

26 चेतस् तत् प्रवणम् युञ्जन् अस्तावीत् सम्हत् आञ्जलिः

श्लक्ष्णया सूक्तया वाचा सर्व लोक गरीयसः

27 अत्रिर् उवाच

विश्वोद् भवस् थितिलयेषु विभज्य मानैः

माया गुणैर् अनुयुगम् विगृहीत देहाः

ते ब्रह्म विष्णु गिरिशाः प्रणतो ऽस्म्यहम् वः

तेभ्यः क एव भवताम् म इहोपहूतः

28 एको मयेह भगवान् विबुध प्रधानः

चित्ती कृतः प्रजननाय कथम् नु यूयम्

अत्रागताः तनु भृताम् मनसो ऽपि दूराद्

ब्रूत प्रसीदत महानिह विस्मयो मे

29 मैत्रेय उवाच

इति तस्य वचः श्रुत्वा त्रयस्ते विबु धर्षभाः

प्रत्याहुः श्लक्ष्णया वाचा प्रहस्य तम् ऋषिम् प्रभो

30 देवा ऊचुः

यथा कृतस्ते सङ्कल्पो भाव्यम् तेनैव नान्यथा

सत् सङ्कल्पस्य ते ब्रह्मन् यद् वै ध्यायति ते वयम्

31 अथास्मद् अम्श भूतास्ते आत्मजा लोक विश्रुताः

भवितारो ऽङ्ग भद्रम् ते विस्रप्स्यन्ति च ते यशः

32 एवम् काम वरम् दत्त्वा प्रति जग्मुः सुरेश्वराः

सभाजितास् तयोः सम्यग् दम्पत्योर् मिषतोस् ततः

33 सोमो ऽभूद् ब्रह्मणो ऽम्शेन दत्तो विष्णोस्तु योगवित्

दुर्वासाः शङ्करस् याम्शो निबोधाङ्गिर् असः प्रजाः

34 श्रद्धा त्वङ्गिरसः पत्नी चतस्रो ऽसूत कन्यकाः

सिनीवाली कुहू राका चतुर्थ् यनुमतिस् तथा

35 तत् पुत्राव परा वास्ताम् ख्यातौ स्वारोचिषे ऽन्तरे

उतथ्यो भगवान् साक्षाद् ब्रह्मिष्ठश् च बृहस्पतिः

36 पुलस्त्यो ऽजनयत् पत्न्याम् अगस्त्यम् च हविर्भुवि

सो ऽन्य जन्मनि दह्राग्निः विश्रवाश् च महा तपाः

37 तस्य यक्ष पतिर् देवः कुबेरस्त् विडविडा सुतः

रावणः कुम्भ कर्णश् च तथान् यस्याम् विभीषणः

38 पुलहस्य गतिर् भार्या त्रीन् असूत सती सुतान्

कर्म श्रेष्ठम् वरीयाम्सम् सहिष्णुम् च महा मते

39 क्रतोर् अपि क्रिया भार्या वालखिल्यान् असूयत

ऋषीन् षष्टि सहस्राणि ज्वलतो ब्रह्म तेजसा

40 ऊर्जायाम् जज्ञिरे पुत्रा वसिष्ठस्य परन्तप

चित्रकेतु प्रधानास्ते सप्त ब्रह्म ऋषयू ऽमला:

41 चित्रकेतु: सुरोचिश् च विरजा मित्र एव च

उल्बणो वसु भृद्यानो द्युमान् शक्त् यादयो ऽपरे

42 चित्तिस्तु अथर्वण: पत्नी लेभे पुत्रम् धृत व्रतम्

दध्यञ्चम् अश्व शिरसम् भृगोर् वम्शम् निबोध मे

43 भृगु: ख्यात्याम् महा भाग: पत्न्याम् पुत्रान् अजीजनत्

धातारम् च विधातारम् श्रियम् च भगवत् पराम्

44 आयतिम् नियतिम् चैव सुते मे रुस्तयोर् अदात्

ताभ्याम् तयोर् अभवताम् मृकण्ड: प्राण एव च

45 मार्कण्डेयो मृकण्डस्य प्राणाद् वेद शिरा मुनि:

कविश् च भार्गवो यस्य भगवान् उशना सुत:

46 त एते मुनय: क्षत्त: लोकान् सर्गैर् अभावयन्

एष कर्दम दौहित्र सन्तान: कथितस् तव

शृण्वत: श्रद्द धानस्य सद्य: पापहर: पर:

47 प्रसूतिम् मानवीम् दक्ष उपयेमे ह्यजात्मज:

तस्याम् ससर्ज दुहितॄ: षोडश् आमल लोचना:

48 त्रयो दशादाद् धर्माय तथैकाम् अग्नये विभु:

पितृभ्य एकाम् युक्तेभ्यो भवा यैकाम् भवच् छिदे

49 श्रद्धा मैत्री दया शान्ति: तुष्टि: पुष्टि: क्रियोन्नति:

बुद्धिर् मेधा तितिक्षा ह्री: मूर्तिर् धर्मस्य पत्नय:

50 श्रद्धा सूत शुभम् मैत्री प्रसादम् अभयम् दया

शान्ति: सुखम् मुदम् तुष्टि: स्मयम् पुष्टिर् असूयत

51 योगम् क्रियोन्नतिर् दर्पम् अर्थम् बुद्धिर् असूयत

मेधा स्मृतिम् तितिक्षा तु क्षेमम् ह्रीः प्रश्रयम् सुतम्

52 मूर्तिः सर्व गुणो [उ]त्पत्तिः नर नारायणा वृषी

53 ययोर् जन्मन् यदो विश्वम् अभ् यनन्दत् सुनिर् वृतम्

मनाम्सि ककुभो वाताः प्रसेदुः सरितो ऽद्रयः

54 दिव्य वाद्यन्त तूर्याणि पेतुः कुसुम वृष्टयः

मुनयः तुष्टुवुस् तुष्टा जगुर् गन्धर्व किन्नराः

55 नृत्यन्ति स्म स्त्रियो देव्य आसीत् परम मङ्गळम्

देवा ब्रह्मादयः सर्वे उप तस्थुर् अभिष्टवैः

56 देवा ऊचुः

यो मायया विरचितम् निज यात्म नीदम्

खे रूप भेदम् इव तत् प्रति चक्षणाय

एतेन धर्म सदने ऋषि मूर्ति नाद्य

प्रादुश्च कार पुरुषाय नमः परस्मै

57 सो ऽयम् स्थिति व्यति करोप शमाय सृष्टान्

सत्त्वेन नः सुरगणान् अनुमेय तत्त्वः

दृश्याद् अदभ्र करुणेन विलोकनेन

यच् छ्रीनिकेतम् अमलम् क्षिपत् आरविन्दम्

58 एवम् सुरगणैस् तात भगवन्तौ अभिष्टुतौ

लब्धाव लोकैर् ययतुः अर्चितौ गन्ध मादनम्

59 ताविमौ वै भगवतो हरेर् अम्शा विहागतौ

भार व्ययाय च भुवः कृष्णौ यदु कुरूद् वहौ

60 स्वाहा ऽभिमानिनश् चाग्नेः आत्मजाम् स्त्रीन् अजीजनत्

पावकम् पवमानम् च शुचिम् च हुत भोजनम्

61 तेभ्यो ऽग्नयः समभवन् चत्वारिम्शच् च पञ्च च

त एवैकोन पञ्चाशत् साकम् पितृ पितामहैः

62 वैतानिके कर्मणि यन् नामभिर् ब्रह्म वादिभिः

आग्नेय्य इष्टयो यज्ञे निरूप्यन्ते ऽग्नयस्तु ते

63 अग्निष् वात्ता बर्हिषदः सौम्याः पितर आज्यपाः

साग्नयो ऽनग्नयस् तेषाम् पत्नी दाक्षायणी स्वधा

64 तेभ्यो दधार कन्ये द्वे वयुनाम् धारिणीम् स्वधा

उभे ते ब्रह्म वादिन्यौ ज्ञान विज्ञान पारगे

65 भवस्य पत्नी तु सती भवम् देवम् अनुव्रता

आत्मनः सदृशम् पुत्रम् न लेभे गुण शीलतः

66 पितर्य प्रतिरूपे स्वे भवायान् आगसे रुषा

अप्रौढै वात्मन् आत्मानम् अजहाद् योग सम्युता

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

चतुर्थ्थ स्कन्दे प्रथमो ऽध्याय ः||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

अथ चतुर्थ्थ स्कन्दः द्वितीयो ऽध्याय :

स्कन्द- 04: अध्याय- 02

01 विदुर उवाच

भवे शील वताम् श्रेष्ठे दक्षो दुहितृ वत्सलः

विद्वेषम् अकरोत् कस्माद् अनादृत् यात्मजाम् सतीम्

02 कस्तम् चराचर गुरुम् निर्वैरम् शान्त विग्रहम्

आत्मा रामम् कथम् द्वेष्टि जगतो दैवतम् महत्

03 एतद् आख्याहि मे ब्रह्मन् जामातुः श्वशुरस्य च

विद्वेषस्तु यतः प्राणान्ः तत्यजे दुस्त्यजान् सती

04 मैत्रेय उवाच

पुरा विश्व सृजाम् सत्रे समेताः परमर्षयः

तथा मरगणाः सर्वे सानुगा मुनयो ऽग्नयः

05 तत्र प्रविष्टम् ऋषयो दृष्ट्वार्कम् इव रोचिषा

भ्राजमानम् वितिमिरम् कुर्वन्तम् तन् महत् सदः

06 उदतिष्ठन् सदस्यास्ते स्व धिष्ण्येभ्यः सहाग्नयः

ऋते विरिञ्चाम् शर्वम् च तद् भासा क्षिप्त चेतसः

07 सदसस् पतिभिर् दक्षो भगवान् साधु सत्कृतः

अजम् लोक गुरुम् नत्वा निषसाद तद् आज्ञया

08 प्राङ् निषण्णम् मृडम् दृष्ट्वा नामृष्यत् तद् अनादृतः

उवाच वामम् चक्षुर्भ्याम् अभिवीक्ष्य दहन्निव

09 श्रूयताम् ब्रह्मर्षयो मे सहदेवाः सहाग्नयः

साधूनाम् ब्रुवतो वृत्तम् नाज्ञानात् न च मत् सरात्

10 अयम् तु लोक पालानाम् यशोघ्नो निरपत्रपः

सद्भिर् आचरितः पन्था येन स्तब्धेन दूषितः

11 एष मे शिष्यताम् प्राप्तो यन्मे दुहितुर् अग्रहीत्

पाणिम् विप्राग्नि मुखतः सावित्र्या इव साधुवत्

12 गृहीत्वा मृग शावाक्ष्याः पाणिम् मर्कट लोचनः

प्रत् युत्थाना भिवादार्हे वाचाप्य कृत नोचितम्

13 लुप्त क्रियाया शुचये मानिने भिन्न सेतवे

अनिच्छन् अप्यदाम् बालाम् शूद्रायेवो शतीम् गिरम्

14 प्रेता वासेषु घोरेषु प्रेतैर् भूत गणैर् वृतः

अटत् युन्मत्तवन् नग्नो व्युप्त केशो हसन् रुदन्

15 चिता भस्म कृत स्नानः प्रेतस्रङ् न्रस्थि भूषणः

शिवा पदेशो ह्यशिवो मत् तोमत्त जनप्रियः

पतिः प्रमथ भूथानाम् तमो मात्र् आत्म कात्मनाम्

16 तस्मा उन्माद नाथाय नष्ट शौचाय दुर्हृदे

दत्ता बत मया साध्वी चोदिते परमेष्ठिना

17 मैत्रेय उवाच

विनिन्द् यैवम् स गिरिशम् अप्रतीपम् अवस्थितम्

दक्षो ऽथाप उपस्पृश्य क्रुद्धः शप्तुम् प्रचक्रमे

18 अयम् तु देवयजन इन्द्रो [उ]पेन्द्रादिभिर् भवः

सह भागम् न लभताम् देवैः देव गणाधमः

19 निषिध्य मानः स सदस्य मुख्यैः दक्षो गिरित्राय विसृज्य शापम्

तस्माद् विनिष्क्रम्य विवृद्ध मन्युः जगाम कौरव्य निजम् निकेतनम्

20 विज्ञाय शापम् गिरिशानु गाग्रणीः नन्दीश्वरो रोष कषाय दूषितः

दक्षाय शापम् विससर्ज दारुणम् ये चान्व मोदन्ः तद् अवाच्यताम् द्विजाः

21 य एतन् मर्त्य मुद्दिश्य भगवति अप्रति द्रुहि

द्रुह्यत् यज्ञः पृथग् दृष्टिः तत्त्वतो विमुखो भवेत्

22 गृहेषु कूट धर्मेषु सक्तो ग्राम्य सुखेच्छया

कर्म तन्त्रम् वितनुते वेदवाद विपन्नधीः

23 बुद्ध्या पराभिध्या यिन्या विस्मृत् आत्म गतिः पशुः

स्त्री कामः सो ऽस्तु अतितराम् दक्षो बस्तमुखो ऽचिरात्

24 विद्या बुद्धिर् अविद्यायाम् कर्म मय्याम् असौ जडः

सम्सरन्तु इह ये चामुम् अनु शर्वाव मानिनम्

25 गिरः श्रुतायाः पुष्पिण्या मधु गन्धेन भूरिणा

मथ्ना चोन्मथित् आत्मानः सम् मुह्यन्तु हरद्विषः

26 सर्व भक्षा द्विजा वृत्त्यै धृत विद्या तपो व्रताः

वित्त देहेन्द्रिया रामा याचका विचरन्त्विह

27 तस्यैवम् ददतः शापम् श्रुत्वा द्विज कुलाय वै

भृगुः प्रत्य सृजच् छापम् ब्रह्म दण्डम् दुरत्ययम्

28 भव व्रत धरा ये च ये च तान् समनुव्रता:

पाखण्डिन: ते भवन्तु सच् छास्त्र परिपन्थिन:

29 नष्ट शौचा मूढधियो जटा भस्मास्थि धारिण:

विशन्तु शिव दीक्षायाम् यत्र दैवम् सुरासवम्

30 ब्रह्म च ब्राह्मणाम्श् चैव यद् यूयम् परिनिन्दथ

सेतुम् विधारणम् पुम्साम् अत: पाखण्डम् आश्रिता:

31 एष एव हि लोकानाम् शिव: पन्था: सनातन:

यम् पूर्वे चानु सन्तस्थु: यत् प्रमाणम् जनार्दन:

32 तद् ब्रह्म परमम् शुद्धम् सताम् वर्त्म सनातनम्

विगर्ह्य यात पाषण्डम् दैवम् वो यत्र भूतराट्

33 मैत्रेय उवाच

तस्यैवम् वदत: शापम् भृगो: स भगवान् भव:

निश् चक्राम तत: किञ्चिद् विमना इव सानुग:

34 ते ऽपि विश्व सृज: सत्रम् सहस्र परिवत्सरान्

सम्विधाय महेष्वास यत्रेज्य ऋषभो हरि:

35 आप्लुत्याव भृथम् यत्र गङ्गा यमुनयान् विता

विरजेन् आत्मना सर्वे स्वम् स्वम् धाम ययुस् तत:

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

चतुर्थ्थ स्कन्दे द्वितीयो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

अथ चतुर्थ्थ स्कन्द: त्रुतीयो ऽध्याय :

*01* मैत्रेय उवाच

सदा विद् विषतोर् एवम् कालो वै ध्रिय माणयो꞉

जामातु꞉ श्वशुरस् यापि सुमहान् अति चक्रमे

*02* यदाभि षिक्तो दक्षस्तु ब्रह्मणा परमेष्ठिना

प्रजापतीनाम् सर्वेषाम् आधिपत्ये स्मयो ऽभवत्

*03* इष्ट्वा स वाजपेयेन ब्रह्मिष्ठान् अभिभूय च

बृहस्पति सवम् नाम समारेभे क्रत् ऊत्तमम्

*04* तस्मिन् ब्रह्मरुषय꞉ सर्वे देवरुषि पितृ देवता꞉

आसन् कृतस्वस् त्ययना꞉ तत् पत्न्यश् च स भर्तृका꞉

*05* तद् उपश्रुत्य नभसि खेचराणाम् प्रजल्पताम्

सती दाक्षायणी देवी पितुर् यज्ञ महोत्सवम्

*06* व्रजन्ती꞉ सर्वतो दिग्भ्य उपदेव वरस्त्रिय꞉

विमान याना꞉ सप्रेष्ठा निष्क कण्ठी꞉ सुवासस꞉

*07* दृष्ट्वा स्व निलयाभ्याशे लोलाक्षीर् मृष्ट कुण्डला꞉

पतिम् भूत पतिम् देवम् औत्सुक्याद् अभ्य भाषत

*08* सत् युवाच

प्रजा पतेस्ते श्वशुरस्य साम्प्रतम् निर्यापितो यज्ञ महोत्सव꞉ किल

वयम् च तत्राभि सराम वाम ते यद् यर्थितामी विबुधा व्रजन्ति हि

*09* तस्मिन् भगिन्यो मम भर्तृभि꞉ स्वकै꞉ ध्रुवम् गमिष्यन्ति सुहृद् दिदृक्षव꞉

अहम् च तस्मिन् भवताभि कामये सहोपनीतम् परिबर्हम् अर्हितुम्

*10* तत्र स्वसॄर् मे ननु भर्तृ सम्मिता मातृष् वसॄ꞉ क्लिन्नधियम् च मातरम्

द्रक्ष्ये चिरोत् कण्ठ मना महर्षिभि꞉ उन्नीयमानम् च मृडा ऽध्वर ध्वजम्

*11* त्वय् येतद् आश्चर्यम् अजात्म मायया विनिर्मितम् भाति गुण त्र यात्मकम्

तथ् आप्यहम् योषिद् अतत्त्व विच्चते दीना दिदृक्षे भव मे भव क्षितिम्

*12* पश्य प्रयान्तीर् अभवान्य योषितो ऽपि अलङ्कृता꞉ कान्त सखा वरूथश꞉

यासाम् व्रजद्भिः शिति कण्ठ मण्डितम् नभो विमानैः कलहम् स पाण्डुभिः

13 कथम् सुतायाः पितृगेह कौतुकम् निशम्य देहः सुरवर्य नेङ्गते

अनाहुता अप्यभि यन्ति सौहृदम् भर्तुर् गुरोः देह कृतश् च केतनम्

14 तन् मे प्रसीदेदम् अमर्त्य वाञ्छितम् कर्तुम् भवान् कारुणिको बतार् हति

त्वय् आत्मनो ऽर्धे ऽहम् अदभ्र चक्षुषा निरूपिता मानु गृहाण याचितः

15 ऋषिर् उवाच

एवम् गिरित्रः प्रिययाभि भाषितः प्रत्यभ्य धत्त प्रहसन् सुहृत्प्रियः

सम्स्मारितो मर्मभिदः कुवागिषून् यानाह को विश्व सृजाम् समक्षतः

16 श्री भगवान् उवाच

त्वयोदितम् शोभनम् एव शोभने अनाहुता अप्यभि यन्ति बन्धुषु

ते यदि अनुत्पादित दोष दृष्टयो बलीयसान् आत्म्य मदेन मन्युना

17 विद्या तपो वित्त वपुर् वयः कुलैः सताम् गुणैः षड्भिर् असत् त मेतरैः

स्मृतौ हतायाम् भृतमान दुर्दृशः स्तब्धा न पश्यन्ति हि धाम भूयसाम्

18 नैता दृशानाम् स्वजनौ यपेक्षया गृहान् प्रतीयाद् अनवस्थित् आत्मनाम्

ये ऽभ्यागतान् वक्र धियाभि चक्षते आरोपित भ्रूभिः अमर्षणा क्षिभिः

19 तथारिभिर् न व्यथते शिलीमुखैः शेते ऽर्दि ताङ्गो हृदयेन दूयता

स्वानाम् यथा वक्रधियाम् दुरुक्तिभिः दिवानिशम् तप्यति मर्मताडितः

20 व्यक्तम् त्वम् उत्कृष्ट गतेः प्रजापतेः प्रियात्मजानाम् असि सुभ्रु सम्मता

अथापि मानम् न पितुः प्रपत्स्यसे मद् आश्रयात् कः परितप्यते यतः

21 पापच्य मानेन हृदा तुरेन्द्रियः समृद्धिभिः पूरुष बुद्धि साक्षिणाम्

अकल्प एषाम् अधिरोढु मञ्जसा पदम् परम् द्वेष्टि यथासुरा हरिम्

22 प्रत् युद्गम प्रश्रयणाभि वादनम् विधीयते साधु मिथः सुमध्यमे

प्राज्ञैः परस्मै पुरुषाय चेतसा गुहाशया यैव न देह मानिने

23 सत्त्वम् विशुद्धम् वसुदेव शब्दितम् यदीयते तत्र पुमान् अपावृतः

सत्त्वे च तस्मिन् भगवान् वासुदेवो ह्यधोक्षजो मे नमसा विधीयते

24 तत्ते निरीक्ष्यो न पितापि देह कृद् दक्षो मम द्विट् तद् अनुव्रताश् च ये

योे विश्व सृग् यज्ञ गतम् वरोरुमाम् अनागसम् दुर् वचसा करोत्तिरः

25 यदि व्रजिष्यसि अतिहाय मद्‌वचो भद्रम् भवत्या न ततो भविष्यति

सम्भावि तस्य स्वजनात् पराभवो यदा स सद्‌यो मरणाय कल्पते

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

चतुर्थ्थ स्कन्दे त्रुतीयो ऽध्याय :॥

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

अथ चतुर्थ्थ स्कन्दः चतुर्थ्थो ऽध्याय :

स्कन्द- 04: अध्याय- 04

01 मैत्रेय उवाच

एताव दुक्त्वा विरराम शङ्करः पत्न् यङ्गनाशम् हयुभयत्र चिन्तयन्

सुहृद्दि दृक्षुः परिशङ्किता भवान् निष्क्रामती निर्विशती द्‌विधास सा

02 सुहृद्दि दृक्षा प्रतिघात दुर्मनाः स्नेहाद् रुदति अश्रुकलाति विह्वला

भवम् भवान् य प्रति पूरुषम् रुषा प्रधक्ष्यती वैक्षत जात वेपथुः

03 ततो विनिः श्वस्य सती विहाय तम् शोकेन रोषेण च दूयता हृदा

पित्रोर् अगात् स्त्रैण विमूढधीर् गृहान् प्रेम्ण् आत्मनो यो ऽर्धम् अदात् सताम् प्रियः

04 ताम् अन्वगच्छन् द्रुत विक्रमाम् सतीम् एकाम् त्रि नेत्रानु चराः सहस्रशः

स पार्षद यक्षा मणिमन् मदादयः पुरो वृषेन्द्रास् तरसा गतव्यथाः

05 ताम् सारिका कन्दुकद् अर्पणाम्बुज श्वेतात पत्र व्यजन स्रगादिभिः

गीतायनैः दुन्दुभि शङ्ख वेणुभिः वृषेन्द्रम् आरोप्य विटङ्किता ययुः

06 आब्रह्म घोषोर्जित यज्ञ वैशसम् विप्रर्षि जुष्टम् विबुधैश् च सर्वशः

मृद्दार्वयः काञ्चन दर्भ चर्मभिः निसृष्ट भाण्डम् यजनम् समाविशत्

07 ताम् आगताम् तत्र न कश्च नाद्रियद् विमानिताम् यज्ञ कृतो भयाज्जनः

ऋते स्व सॄर्वै जननीम् च सादराः प्रेमाश्रु कण्ठ्यः परिषस्व जुर्मुदा

08 सौदर्य सम्प्रश्न समर्थ वार्तया मात्रा च मातृ ष्वसृभिश् च सादरम्

दत्ताम् सपर्याम् वरमासनम् च सा नादत्त पित्रा प्रति नन्दिता सती

09 अरुद्र भागम् तम् अवेक्ष्य चाध्वरम् पित्रा च देवे कृतहेलनम् विभौ

अनादृता यज्ञ सदस्य धीश्वरी चुकोप लोकानिव धक्ष्यती रुषा

10 जगर्ह सामर्ष विपन्नया गिरा शिव द्विषम् धूम पथश्रम स्मयम्

स्व तेजसा भूत गणान् समुत्थितान् निगृह्य देवी जगतो ऽभि शृण्वतः

11 श्रि देवि उवाच

न यस्य लोके ऽस्ति अतिशायनः प्रियः तथा प्रियो देह भृताम् प्रियात्मनः

तस्मिन् समस्त् आत्मनि मुक्त वैरके ऋते भवन्तम् कतमः प्रतीपयेत्

12 दोषान् परेषाम् हि गुणेषु साधवो गृह्णन्ति केचित् न भवाद् ऋशो द्विज

गुणाम्श् च फल्गून् बहुली करिष्णवो महत् तमास्तेषु अविदद् भवानघम्

13 नाश्चर्य मे तद् यदसत्सु सर्वदा महद् विनिन्दा कुण पात्म वादिषु

सेर्ष्यम् महा पूरुष पाद पाम्सुभिः निरस्त तेजः सु तदेव शोभनम्

14 यद् द्वयक्षरम् नाम गिरेरितम् नृणाम् सकृत् प्रसङ्गाद् अघमाशु हन्ति तत्

पवित्र कीर्तिम् तम् अलङ्घ्य शासनम् भवान् अहो द्वेष्टि शिवम् शिवेतरः

15 यत् पाद पद्मम् महताम् मनो ऽलिभिः निषेवितम् ब्रह्म रसास वार्थिभिः

लोकस्य यद् वर्षति चाशिषो ऽर्थिनः तस्मै भवान् द्रुह्यति विश्व बन्धवे

16 किम् वा शिवाख्यम् अशिवम् न विदुस् त्वद् अन्ये ब्रह्मादयः तम् अवकीर्य जटाः श्मशाने

तन्माल्य भस्म नृकपाल्य वसत् पिशाचैः ये मूर्धभिर् दधति तच् चरणाव सृष्टम्

17 कर्णौ पिधाय निरयाद् यदकल्प ईशे धर्मा वितर्य सृणिभिः नृभिर् अस्यमाने

छिन्द्यात् प्रसह्य रुशतीम् असतीम् प्रभुश्चेत् जिह्वाम् असूनपि ततो विसृजेत् स धर्मः

18 अतस् तवोत्पन्नम् इदम् कळेवरम् न धारयिष्ये शिति कण्ठ गर्हिणः

जग्धस्य मोहाद्धि विशुद्धि मन्धसो जुगुप्सि तस्योद् धरणम् प्रचक्षते

19 न वेद वादान् अनुवर्तते मतिः स्व एव लोके रमतो महामुनेः

यथा गतिः देव मनुष्ययोः पृथक् स्व एव धर्मे न परम् क्षिपेत् स्थितः

20 कर्म प्रवृत्तम् च निवृत्तम् अप्यृतम् वेदे विविच्योभय लिङ्गम् आश्रितम्

विरोधि तद् यौग पदैक कर्तरि द्वयम् तथा ब्रह्मणि कर्म नर्च्छति

21 मा वः पदव्यः पितरस् मद् आस्थिता या यज्ञ शालासु न धूम वर्त्मभिः

तद् अन्न तृप्तैः असुभृद्भिर् ईडिता अव्यक्त लिङ्गा अवधूत सेविताः

22 नैतेन देहेन हरे कृतागसो देहोद् भवेनालम् अलम् कुजन् मना

व्रीडा ममाभूत् कुजन प्रसङ्गतः तज् जन्म धिग्यो महताम् अवद्य कृत्

23 गोत्रम् त्वदीयम् भगवान् वृष ध्वजो दाक्षायणी त्याह यदा सु दुर्मनाः

व्यपेत नर्मस्मितम् आशु तद् ध्यहम् व्युत् स्रक्ष्य एतत् कुणपम् त्वद् अङ्गजम्

24 मैत्रेय उवाच

इत् यध्वरे दक्षम् अनूद्य शत्रुहन् क्षिता वुदीचीम् निषसाद शान्त वाक्

स्पृष्ट्वा जलम् पीत दुकूल सम्वृता निमील्य दृग् योग पथम् समाविशत्

25 कृत्वा समानौ अनिलौ जितासना सोदानम् उत्थाप्य च नाभि चक्रतः

शनैर् हृदि स्थाप्य धियोरसि स्थितम् कण्ठाद् भ्रुवोर् मध्यम् अनिन्दित् आनयत्

26 एवम् स्व देहम् महताम् महीयसा मुहुः समारोपितम् अङ्कम् आदरात्

जिहासती दक्ष रुषा मनस्विनी दधार गात्रेषु अनिलाग्नि धारणाम्

27 ततः स्व भर्तुः चरण् आम्बुजासवम् जगद् गुरोः चिन्त यती न चापरम्

ददर्श देहो हत कल्मषः सती सद्यः प्रज ज्वाल समाधि जाग्निना

28 तत् पश्यताम् खे भुवि चाद्भुतम् महध् हा हेति वादः सुमहान जायत

हन्त प्रिया दैवतम् अस्य देवी जहावसून् केन सती प्रकोपिता

29 अहो अनात्म्यम् महदस्य पश्यत प्रजापतेर् यस्य चराचरम् प्रजाः

जहावसून् यद् विमतात्मजा सती मनस्विनी मानम् अभीक्ष्णम् अर्हति

30 सो ऽयम् दुर्मर्ष हृदयो ब्रह्म ध्रुक्च लोके ऽपकीर्तिम् महतीम् अवाप्स्यति

यद् अङ्गजाम् स्वाम् पुरुषद् विड्डुद्यताम् न प्रत्यषेधन् मृतये ऽपराधतः

31 वदत् येवम् जने सत्या दृष्ट्वासु त्यागम् अद्भुतम्

दक्षम् तत् पार्षदा हन्तुम् उदतिष्ठन् उदायुधाः

32 तेषाम् आपतताम् वेगम् निशाम्य भगवान् भृगु:

यज्ञघ् नघ्नेन यजुषा दक्षिणाग्नौ जुहाव ह

33 अध्वर्युणा हूयमाने देवा उत्पेतुर् ओजसा

ऋभवो नाम तपसा सोमम् प्राप्ता: सहस्रश:

34 तैर् अलातायुधै: सर्वे प्रमथा: सह गुह्यका:

हन्यमाना दिशो भेजु: उशद्भि: ब्रह्म तेजसा

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

चतुर्थ्थ स्कन्दे चतुर्थ्थो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

अथ चतुर्थ्थ स्कन्द: पञ्चमो ऽध्याय :

स्कन्द- 04: अध्याय- 05

01 मैत्रेय उवाच

भवो भवान् या निधनम् प्रजापते: असत् कृताया अवगम्य नारदात्

स्व पार्षद सैन्यम् च तद् अध्वर् अर्भुभि: विद्रावितम् क्रोधम् अपार मादधे

02 क्रुद्ध: सुदष्टोष्ठ पुट: स धूर्जटि: जटाम् तडिद् वह्नि सटोग्र रोचिषम्

उत्कृत्य रुद्र: सहसोत्थि तो हसन् गम्भीर नादो विससर्ज ताम् भुवि

03 ततो ऽतिकाय: तनुवा स्पृशन् दिवम् सहस्र बाहु: घनरुक् त्रिसूर्य दृक्

कराल दम्स्ट्रो ज्वलद् अग्नि मूर्धज: कपाल माली विविधोद्य तायुध:

04 तम् किम् करोमीति गृणन्तमाह बद्धाञ्जलिम् भगवान् भूत नाथ:

दक्षम् स यज्ञम् जहि मद् भटानाम् त्वम् अग्रणी रुद्र भटाम्श को मे

05 आज्ञप्त एवम् कुपितेन मन्युना स देव देवम् परिचक्रमे विभुम्

मेने तद् आत्मानम् असङ्गरम् हसा महीयसाम् तात सहः सहिष्णुम्

06 अन्वीयमानः स तु रुद्र पार्षदैः भृशम् नदद्भिः व्यनदत्सु भैरवम्

उद्यम्य शूलम् जगद् अन्त कान्तकम् स प्राद्रवद् घोषण भूषणाङ्घ्रिः

07 अथर्त्विजो यजमानः सदस्याः ककुभ्यु दीच्याम् प्रसमीक्ष्य रेणुम्

तमः किमेतत् कुत एतद् रजो ऽभूद् इति द्विजा द्विज पत्न्यश् च दध्युः

08 वाता न वान्ति न हि सन्ति दस्यवः प्राचीनबर्हिः जीवति होग्र दण्डः

गावो न काल्यन्त इदम् कुतो रजो लोको ऽधुना किम् प्रलयाय कल्पते

09 प्रसूति मिश्राः स्त्रिय उद्विग्न चित्ता ऊचुर् विपाको वृजिनस् यैष तस्य

यत् पश् यन्तीनाम् दुहितॄणाम् प्रजेशः सुताम् सतीम् अवदध्यौ अनागाम्

10 यस्त्वन्त काले व्युप्त जटा कलापः स्व शूल सूच् यर्पित दिग् गजेन्द्रः

वितत्य नृत्यति उदि तास्त्र दोर् ध्वजान् उच्च् आट्टहासस् तनयित्नु भिन्नदिक्

11 अमर्ष यित्वा तम् असह्य तेजसम् मन्युप्लुतम् दुर्विषहम् भ्रुकुट्या

कराल दम्ष्ट्राभिर् उदस्त भागणम् स्यात्स्वस्ति किम् कोपयतो विधातुः

12 बह्वेवम् उद्विग्न दृश् ओच्यमाने जनेन दक्षस्य मुहुर् महात्मनः

उत्पेतुर् उत्पाततमाः सहस्रशो भयावहा दिवि भूमौ च पर्यक्

13 तावत् स रुद्रानु चरैर् मखो महान् नानायुधैर् वामनकैर् उदायुधैः

पिङ्गैः पिशङ्गैः मकरोद राननैः पर्याद्र वद्भिः विदुर् आन्वरुध्यत

14 केचिद् बभञ्जुः प्राग् वम्शम् पत्नी शालाम् तथापरे

सद आग्नी ध्रशालाम् च तद् विहारम् महानसम्

15 रुरुजुः यज्ञ पात्राणि तथैके ऽग्नीन् अनाशयन्

कुण्डेषु अमूत्रयन् केचिद् बिभिदुर् वेदि मेखलाः

16 अबाधन्त मुनीन् अन्ये एके पत्नीर् अतर्जयन्

अपरे जगृहुर् देवान् प्रत् यासन्नान् पलायितान्

17 भृगुम् बबन्ध मणिमान् वीरभद्रः प्रजापतिम्

चण्डेशः पूषणम् देवम् भगम् नन्दीश्वरो ऽग्रहीत्

18 सर्व एवर्त्विजो दृष्ट्वा सदस्याः सदिवौकसः

तैर् अर्द्य मानाः सुभृशम् ग्रावभिर् नैकध् आद्रवन्

19 जुह्वतः स्रुवहस् तस्य श्मश्रूणि भगवान् भवः

भृगोर् लुलुञ्चे सदसि यो ऽहसत् छ्मश्रु दर्शयन्

20 भगस्य नेत्रे भगवान् पातितस्य रुषा भुवि

उज्जहार सदस्थो ऽक्ष्णा यः शपन्तम् असूसुचत्

21 पूष्णश् चापात यद् दन्तान् कालिङ्गस्य यथा बलः

शप्यमाने गरिमणि यो ऽहसद् दर्शयन् दतः

22 आक्रम् योरसि दक्षस्य शित धारेण हेतिना

छिन्दन् अपि तद् उद्धर्तुम् नाशक्नोत् त्र्यम्बकस् तदा

23 शस्त्रैः अस्त्रान् वितैर् एवम् अनिर्भिन्न त्वचम् हरः

विस्मयम् परमापन्नो दध्यौ पशु पतिश् चिरम्

24 दृष्ट्वा सम्ज्ञपनम् योगम् पशूनाम् स पतिर् मखे

यजमान पशोः कस्य कायात् तेना हरच् छिरः

25 साधुवादस् तदा तेषाम् कर्म तत् तस्य शम्सताम्

भूत प्रेत पिशाचानाम् अन्येषाम् तद् विपर्ययः

26 जुहावै तच् छिरस् तस्मिन् दक्षिण् आग्नौ अमर्षितः

तद् देव यजनम् दग्ध्वा प्रातिष्ठद् गुह्य कालयम्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

चतुर्थ्थ स्कन्दे पञ्चमो ऽध्याय ः||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

अथ चतुर्थ्थ स्कन्दः षष्टो ऽध्याय :

*01* मैत्रेय उवाच

अथ देव गणाः सर्वे रुद्रा नीकैः पराजिताः

शूलपट्टि शनिस् त्रिम्श गदा परिघ मुद्गरैः

*02* सन्छिन्न भिन्न सर्वाङ्गाः सर्त्विक् सभ्या भयाकुलाः

स्वयम्भुवे नमस् कृत्य कात्स्न्येर्ये नैतन्न्य वेदयन्

*03* उपलभ्य पुरै वैतद् भगवान् अब्ज सम्भवः

नारायणश् च विश्वात्मा न कस्याध् वरम् ईयतुः

*04* तद् आकर्ण्य विभुः प्राह तेजीयसि कृतागसि

क्षेमाय तत्र सा भूयात् न प्रायेण बुभूषताम्

*05* अथापि यूयम् कृत किल्बिषा भवम् ये बर्हिषो भाग भाजम् परादुः

प्रसाद यध्वम् परिशुद्ध चेतसा क्षिप्र प्रसादम् प्रगृहीत् आङ्घ्रि पद्मम्

*06* आशासानाम् जीवितम् अध्वरस्य लोकः सपालः कुपिते न यस्मिन्

तमाशु देवम् प्रियया विहीनम् क्षमाप यध्वम् हृदि विद्धम् दुरुक्तैः

*07* नाहम् न यज्ञो न च यूयम् अन्ये ये देह भाजो मुनयश् च तत्त्वम्

विदुः प्रमाणम् बलवीर् ययोर्वा यस् यात्म तन्त्रस्य क उपायम् विधित्सेत्

*08* स इत्थम् आदिश्य सुरान् अजस्तैः समन्वितः पितृभिः सप्रजेशैः

ययौ स्व धिष्ण्यात् निलयम् पुरद्विषः कैलासम् अद्रि प्रवरम् प्रियम् प्रभोः

*09* जन्म् औषधि तपो मन्त्र योग सिद्धैर् नरेतरैः

जुष्टम् किन्नर गन्धर्वैः अप्सरोभिर् वृतम् सदा

*10* नाना मणिमयैः शृङ्गैः नाना धातु विचित्रितैः

नाना द्रुमलता गुल्मैः नाना मृग गणा वृतैः

*11* नाना मल प्रस्रवणैः नाना कन्दर सानुभिः

रमणम् विहरन्तीनाम् रमणैः सिद्ध योषिताम्

*12* मयूर केका भिरुतम् मदान् धालि विमूर्च्छितम्

प्लाविते रक्त कण्ठानाम् कूजितैश् च पतत् त्रिणाम्

13 आह्वयन्तम् इवोद् धस्तैः द्विजान् काम दुघैर् द्रुमैः

व्रजन्तम् इव मातङ्गैः गृणन्तम् इव निर्झरैः

14 मन्दारैः पारिजातैश् च सरलैश् चोप शोभितम्

तमालैः शाल तालैश् च कोविदार् आसन् आर्जुनैः

15 चूतैः कदम्बैर् नीपैश् च नाग पुन्नाग चम्पकैः

पाटला शोक बकुलैः कुन्दैः कुरबकैर् अपि

16 स्वर्णार्ण शत पत्रैश् च वररेणुक जातिभिः

कुब्जकैर् मल्लिका भिश् च माधवी भिश् च मण्डितम्

17 पनसोदुम् बराश् वत्थ प्लक्षन् यग्रोध हिङ्गुभिः

भूर्जैर् ओषधिभिः पूगै राज पूगैश् च जम्बुभिः

18 खर्जूराम् रात काम्राद्यैः प्रियाल मधु केङ्गुदैः

द्रुम जातिभिर् अन्यैश् च राजितम् वेणु कीचकैः

19 कुमुद् ओत्पल कह्लार शत पत्र वनर्द् धिभिः

नलिनीषु कलम् कूजत् खग वृन्दोप शोभितम्

20 मृगैः शाखा मृगैः क्रोडैः मृगेन्द्रैः ऋक्ष शल्यकैः

गवयैः शरभैर् व्याघ्रै रुरुभिर् महिषा दिभिः

21 कर्णान् त्रै कपद् आश्वास्यैः निर्जुष्टम् वृकनाभिभिः

कदली षण्ड समृद्ध नळिनी पुळिन श्रियम्

22 पर्यस्तम् नन्दया सत्याः स्नान पुण्य तरोदया

विलोक्य भूतेश गिरिम् विबुधा विस्मयम् ययुः

23 ददृशुः तत्र ते रम्याम् अलकाम् नाम वै पुरीम्

वनम् सौगन्धिकम् चापि यत्र तन् नाम पङ्कजम्

24 नन्दा चालक नन्दा च सरितौ बाह्यतः पुरः

तीर्थ पाद पदाम्भोज रजसा तीव पावने

25 ययोः सुर स्त्रियः क्षत्तः अवरुह्य स्व धिष्ण्यतः

क्रीडन्ति पुम्सः सिञ्चन्त्यो विगाह्य रति कर्शिताः

26 ययोः तत् स्नान विभ्रष्ट नव कुङ्कुम पिन्जरम्

वितृषो ऽपि पिबन्त् यम्भः पाययन्तो गजा गजीः

27 तारहेम महा रत्न विमान शत सङ्कुलाम्

जुष्टाम् पुण्य जन स्त्रीभिः यथा खम् सत् अडिद्घनम्

28 हित्वा यक्षेश्वर पुरीम् वनम् सौगन्धिकम् च तत्

द्रुमैः काम दुघैर् हृद्यम् चित्र माल्य फलच्छदैः

29 रक्त कण्ठ खगा नीक स्वर मण्डित षट्पदम्

कलहम् स कुल प्रेष्ठ खर दण्ड जलाशयम्

30 वन कुन्जर सङ्घृष्ट हरि चन्दन वायुना

अधि पुण्य जन स्त्रीणाम् मुहुरुन् मथयन् मनः

31 वैदूर्य कृत सोपाना वाप्य उत्पल मालिनीः

प्राप्तः किम्पुरुषैर् दृष्ट्वा त आराद् ददृशुर् वटम्

32 स योजन शतोत् सेधः पादोन विटपायतः

पर्यक् कृताचलच् छायो निर्नीडः ताप वर्जितः

33 तस्मिन् महा योगमये मुमुक्षु शरणे सुराः

ददृशुः शिवम् आसीनम् त्यक्ता मर्षम् इवान्तकम्

34 सनन्द नाद्यैर् महा सिद्धैः शान्तैः सम्शान्त विग्रहम्

उपास्यमानम् सख्या च भर्त्रा गुह्य करक्षसाम्

35 विद्या तपो योग पथम् आस्थितम् तम् अधीश्वरम्

चरन्तम् विश्व सुहृदम् वात्सल्यात् लोक मङ्गळम्

36 लिङ्गम् च तापस् आभीष्टम् भस्म दण्ड जटाजिनम्

अङ्गेन सन्ध्या भ्ररुचा चन्द्र लेखाम् च बिभ्रतम्

37 उपविष्टम् दर्भ मय्याम् बृस्याम् ब्रह्म सनातनम्

नारदाय प्रवोचन्तम् पृच्छते शृण्वताम् सताम्

38 कृत्वोरौ दक्षिणे सव्यम् पाद पद्मम् च जानुनि

बाहुम् प्रकोष्ठे ऽक्ष मालाम् आसीनम् तर्क मुद्रया

39 तम् ब्रह्म निर्वाण समाधिम् आश्रितम् व्युपाश्रितम् गिरिशम् योग कक्षाम्

स लोकपाला मुनयो मनूनाम् आद्यम् मनुम् प्राञ्जलयः प्रणेमुः

40 स तूप लभ्यागतम् आत्म योनिम् सुरा सुरेशैः अभिवन्दि ताङ्घ्रिः

उत्थाय चक्रे शिरसाभि वन्दनम् अर्हत्तमः कस्य यथैव विष्णुः

41 तथापरे सिद्ध गणा महरुषिभिः ये वै समन्ताद् अनु नील लोहितम्

नमस्कृतः प्राह शशाङ्क शेखरम् कृत प्रणामम् प्रहसन् निवात्म भूः

42 ब्रह्मो उवाच

जाने त्वाम् ईशम् विश्वस्य जगतो योनि बीजयोः

शक्तेः शिवस्य च परम् यत् तद् ब्रह्मा निरन्तरम्

43 त्वम् एव भगवन् नेतत् छिव शक्त्योः स्वरूपयोः

विश्वम् सृजसि पास्यत्सि क्रीडन् ऊर्णपटो यथा

44 त्वमेव धर्म् आर्थ दुघाभि पत्तये दक्षेण सूत्रेण स सर्जिथाध् वरम्

त्वयैव लोके ऽवसिताश् च सेतवो यान् ब्राह्मणाः श्रद्द धते धृत व्रताः

45 त्वम् कर्मणाम् मङ्गळ मङ्गलानाम् कर्तुः स्वलोकम् तनुषे स्वः परम् वा

अमङ्गलानाम् च तमिस्रम् उल्बणम् विपर्ययः केन तदेव कस्यचित्

46 न वै सताम् त्वच् चरण् आर्पित् आत्मनाम् भूतेषु सर्वेषु अभि पश्यताम् तव

भूतानि चात्मनि अपृथग्दि दृक्षताम् प्रायेण रोषो ऽभि भवेद् यथा पशुम्

47 पृथग्धियः कर्म दृशो दुराशयाः परोदयेन् आर्पित हृद्रुजो ऽनिशम्

परान् दुरुक्तैः वितुदन्त् यरुन्तुदाः तान् मावधीद् दै ववधान् भवद् विधः

48 यस्मिन् यदा पुष्करनाभ मायया दुरन्तया स्पृष्ट धियः पृथग् दृशः

कुर्वन्ति तत्र ह्यनु कम्पया कृपाम् न साधवो दैव बलात् कृते क्रमम्

49 भवाम्स्तु पुम्सः परमस्य मायया दुरन्तया स्पृष्ट मतिः समस्त दृक्

तया हत् आत्म स्वनु कर्म चेतःसु अनुग्रहम् कर्तुम् इहार्हसि प्रभो

50 कुर्वध् वरस्योद् धरणम् हतस्य भोः त्वया समाप्तस्य मनो प्रजापतेः

न यत्र भागम् तव भागिनो ददुः कुयाजिनो येन मखो निनीयते

51 जीवताद् यजमानो ऽयम् प्रपद्येत आक्षिणी भगः

भृगोः श्मश्रूणि रोहन्तु पूष्णो दन्ताश् च पूर्ववत्

52 देवानाम् भग्न गात्राणाम् ऋत्विजाम् चायु धाश्मभिः

भवत् आनुगृही तानाम् आशु मन्यो ऽस्त्वन् आतुरम्

53 एष ते रुद्र भागो ऽस्तु यदुच् छिष्टो ऽध्वरस्य वै

यज्ञस्ते रुद्र भागेन कल्पताम् अद्य यज्ञहन्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

चतुर्थ्थ स्कन्दे षष्टो ऽध्याय ःII

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

अथ चतुर्थ्थ स्कन्दः सप्तमो ऽध्याय :

स्कन्द- 04: अध्याय- 07

01 मैत्रेय उवाच

इत् यजेनानु नीतेन भवेन परितुष् यता

अभ्यधायि महाबाहो प्रहस्य श्रूयताम् इति

02 श्रि महादेव उवाच

नाघम् प्रजेश बालानाम् वर्णये नानु चिन्तये

देव मायाभि भूतानाम् दण्डस् तत्र धृतो मया

03 प्रजापतेर् दग्ध शीर्ष्णो भवतु अजमुखम् शिरः

मित्रस्य चक्षुषे क्षेत भागम् स्वम् बर्हिषो भगः

04 पूषा तु यजमानस्य दद्भिर् जक्षतु पिष्टभुक्

देवाः प्रकृत सर्वाङ्गा ये म उच्छेषणम् ददुः

05 बाहुभ्याम् अश्विनोः पूष्णो हस्ताभ्याम् कृत बाहवः

भवन्त् वध् वर्य वश्चान्ये बस्त श्मश्रुः भृगुर् भवेत्

06 मैत्रेय उवाच

तदा सर्वाणि भूतानि श्रुत्वा मीढुष्टम् ओदितम्

परितुष्ट् आत्मभिस् तात साधु साधु इत्यथ् आब्रुवन्

07 ततो मीढ्वाम्सम् आमन्त्र्य शुनासीराः सहर्षिभिः

भूयः तद् देव यजनम् समीढ्वद् वेधसो ययुः

08 विधाय कात्स्न्र्येन च तद् यदाह भगवान् भवः

सन्दधुः कस्य कायेन सवनीय पशोः शिरः

09 सन्धीयमाने शिरसि दक्षो रुद्राभि वीक्षितः

सद्यः सुप्त इवोत् तस्थौ ददृशे चाग्रतो मृडम्

10 तदा वृष ध्वज द्वेष कलिल् आत्मा प्रजापतिः

शिवाव लोकाद् अभवत् छरद् ह्रद इवामलः

11 भवस् तवाय कृतधीः नाशक्नोद् अनुरागतः

औत्कण्ठ्याद् बाष्प कलया सम्परेताम् सुताम् स्मरन्

12 कृच्छ्रात् सम्स्तभ्य च मनः प्रेम विह्वलितः सुधीः

शशम्स निर्व्य लीकेन भावेनेशम् प्रजापतिः

13 दक्ष उवाच

भूयान् अनुग्रह अहो भवता कृतो मे

दण्डस् त्वया मयि भृतो यदपि प्रलब्धः

न ब्रह्म बन्धुषु च वाम् भगवन् अवज्ञा

तुभ्यम् हरेश् च कुत एव धृत व्रतेषु

14 विद्या तपो व्रत धरान् मुखतः स्म विप्रान्

ब्रह्म् आत्म तत्त्वम् अवितुम् प्रथमम् त्वमस्राक्

तद् ब्राह्मणान् परम सर्व विपत्सु पासि

पालः पशूनिव विभो प्रगृ हीत दण्डः

15 यो ऽसौ मया विदित तत्त्व दृशा सभायाम्

क्षिप्तो दुरुक्ति विशिखैः अगणय्य तन्माम्

अर्वाक् पतन्तम् अर्हत्तम निन्दया पाद्

दृष्ट्यार् द्रया स भगवान् स्वकृतेन तुष्येत्

16 मैत्रेय उवाच

क्षमाप् यैवम् स मीढ्वाम्सम् ब्रह्मणा चानु मन्त्रितः

कर्म सन्तान यामास सोपाध् यायर्त्वि गादिभिः

17 वैष्णवम् यज्ञ सन्तत्यै त्रि कपालम् द्विजो *[उ]*त्तमाः

पुरोडाशम् निरवपन् वीर सम्सर्ग शुद्धये

18 अध् वर्युणात् त हविषा यजमानो विशाम् पते

धिया विशुद्धया दध्यौ तथा प्रादुर् अभूद् हरिः

19 तदा स्व प्रभया तेषाम् द्योत यन्त्या दिशो दश

मुष्णम्स् तेज उपानीतः तार्क्ष्येण स्तोत्र वाजिना

20 श्यामो हिरण्य रशनो ऽर्क किरीट जुष्टो

नीलालक भ्रमर मण्डित कुण्डलास्यः

कम्ब्वब्ज चक्र शरचाप गदासि चर्म

व्यग्रैः हिरण्मय भुजैर् इव कर्णिकारः

21 वक्षस् यधिश्रित वधूः वनमाल् युदार

हासाव लोक कलया रमयम्श् च विश्वम्

पार्श्व भ्रमद् व्यजन चामर राजहम्सः

श्वेतात पत्र शशिनोपरि रज्य मानः

22 तम् उपागत मालक्ष्य सर्वे सुर गणादयः

प्रणेमुः सहसो *[उ]*त्थाय ब्रह्मेन्द्र त्र्यक्षना यकाः

23 तत् तेजसा हतरुचः सन्न जिह्वाः स साध्वसाः

मूर्ध्ना धृत् आञ्जलि पुटा उपतस्थुः अधोक्षजम्

24 अप्यर्वाग् वृत्तयो यस्य महि त्वात्म भुवादयः

यथामति गृणन्ति स्म कृत् आनुग्रह विग्रहम्

25 दक्षो गृहीत् आर्हण सादनोत् तमम्

यज्ञेश्वरम् विश्व सृजाम् परम् गुरुम्

सुनन्द नन्दाद् यनुगैर् वृतम् मुदा

गृणन् प्रपेदे प्रयतः कृताञ्जलिः

26 दक्ष उवाच

शुद्धम् स्वधाम्न्यु परत् आखिल बुद्ध्य वस्थम्

चिन्मात्रम् एकम् अभयम् प्रतिषिध्य मायाम्

तिष्ठम् स्तयैव पुरुषत्वम् उपेत्य तस्याम्

आस्ते भवान् अपरिशुद्ध इवात्म तन्त्रः

27 ऋत्विज ऊचुः

तत्त्वम् न ते वय मनञ्जन रुद्र शापात्

कर्मण्य वग्रहधियो भगवन् विदामः

धर्मोप लक्षण मिदम् त्रि वृदध् वराख्यम्

ज्ञातम् यदर्थम् अधिदैवम् अदो व्यवस्थाः

28 सदस्या ऊचुः

उत्पत् त्यध् वन्य शरण उरुक्लेश दुर्गे ऽन्त कोग्र

व्यालान् विष्टे विषय मृग तृष् यात्म गेहोरु भारः

द्वन्द्वश् वभ्रे खल मृग भये शोक दावे ऽज्ञ सार्थः

पादौ कस्ते शरण दकदा याति का मोपसृष्टः

29 रुद्र उवाच

तव वरद वराङ्घ्रौ आशिषे हाखिलार्थे

ह्यपि मुनिभिर् असक्तैः आदरेण् आर्हणीये

यदि रचि तधियम् माविद्य लोको ऽपविद्धम्

जपति न गणये तत् त्वत् परा ऽनुग्रहेण

30 भृगुर् उवाच

यन् मायया गहन याप हृत् आत्म बोधा

ब्रह्मा दयस् तनुभृत: तमसि स्व पन्त:

नात्मन् श्रितम् तव विदन्त् यधुनापि तत्त्वम्

सो ऽयम् प्रसीदतु भवान् प्रणत् आत्म बन्धु:

31 ब्रह्मो उवाच

नैतत् स्वरूपम् भवतो ऽसौ पदार्थ भेदग्रहै: पुरुषो यावद् ईक्षेत्

ज्ञानस्य चार्थस्य गुणस्य चाश्रयो माया मयाद् व्यति रिक्तो यतस्त्वम्

32 इन्द्र उवाच

इदम् अप्यच्युत विश्व भावनम् वपुर् आनन्द करम् मनो दृशाम्

सुर विद्विट् क्षपणै: उदायुधै: भुजदण्डै: उपपन्नम् अष्टभि:

33 पत्न्य ऊचु:

यज्ञो ऽयम् तव यजनाय केन सृष्टो विध्वस्त: पशु पति नादय् दक्ष कोपात्

तम् नस्त्वम् शव शयनाभ शान्त मेधम् यज्ञात्मन् नळिन रुचा दृशा पुनीहि

34 ऋषय ऊचु:

अनन्वितम् ते भगवन् विचेष्टितम् यद् आत्मना चरसि हि कर्म नाज्यसे

विभूतये यत उपसेदुर् ईश्वरीम् न मन्यते स्वयम् अनुवर्ततीम् भवान्

35 सिद्धा ऊचु:

अयम् त्वत् कथा मृष्ट पीयूष नद्याम् मनो वारण: क्लेश दावाग्नि दग्ध:

तृषार्तो ऽवगाढो न सस्मार दावम् न निष्क्रामति ब्रह्म सम्पन्न वन्न:

36 यजमान् युवाच

स्वागतम् ते प्रसीदेश तुभ्यम् नम: श्रीनिवास श्रिया कान्तया त्राहि न:

त्वामृते ऽधीश नाङ्गैर् मख: शोभते शीर्षहीन: कबन्धो यथा पूरुष:

37 लोकपाला ऊचु:

दृष्ट: किम् नो दृग्भिर् असद् ग्रहैस्त्वम् प्रत्यग् द्रष्टा दृश्यते येन द्रुश्यम्

माया ह्येषा भवदीया हि भूमन् यस्त्वम् षष्ठ: पञ्चभिर् भासि भूतै:

38 योगेश्वरा ऊचु:

प्रेयान्न ते ऽन्यो ऽस्त्य मुतस् त्वयि प्रभो विश्वात्म नीक्षेन् न पृथग्य आत्मन:

अथापि भक्त्येश तयोप धावताम् अनन्य वृत्त्यानु गृहाण वत्सल

39 जगद् उद्भव स्थिति लयेषु दैवतो बहु भिद्यमान गुण यात्म मायया

रचित् आत्म भेद मतये स्व सम्स्थया विनि वर्तित भ्रम गुणात्मने नमः

40 ब्रह्मो उवाच

नमस्ते श्रित सत्त्वाय धर्मा दीनाम् च सूतये

निर्गुणाय च यत् काष्ठाम् नाहम् वेदापरे ऽपि च

41 अग्निर् उवाच

यत् तेजसाहम् सु समिद्ध तेजा हव्यम् वहे स्वध्वर आज्य सिक्तम्

तम् यज्ञियम् पञ्चविधम् च पञ्चभिः स्विष्टम् यजुर्भिः प्रणतो ऽस्मि यज्ञम्

42 देवा ऊचुः

पुरा कल्पा पाये स्वकृतम् उदरी कृत्य विकृतम्

त्वम् एवाद्यस् तस्मिन् सलिल उरगेन्द्र् आधि शयने

पुमान् शेषे सिद्धैः हृदि विमृशिताध् यात्म पदविः

स एवाद् याक्ष्णोर्यः पथि चरसि भृत्यान् अवसि नः

43 गन्धर्वा ऊचुः

अम्शाम् शास्ते देव मरीच् यादय एते ब्रह्म् एन्द्राद्या देव गणा रुद्र पुरोगाः

क्रीडा भाण्डम् विश्वम् इदम् यस्य विभूमन् तस्मै नित्यम् नाथ नमस्ते करवाम

44 विद्याधरा ऊचुः

त्वन् माययार्थम् अभिपद्य कलेवरे ऽस्मिन्

कृत्वा ममाहम् इति दुर्मतिर् उत्पथैः स्वैः

क्षिप्तो ऽपि असद् विषयलालस आत्ममोहम्

युष्मत् कथामृत निषेवक उद्व्युदस् येत्

45 ब्राह्मणा ऊचुः

त्वम् क्रतुस्त्वम् हविः त्वम् हुताशः स्वयम् त्वम् हि मन्त्रः समिद् दर्भ पात्राणि च

त्वम् सदस् यर्त्विजो दम्पती देवता अग्निहोत्रम् स्वधा सोम आज्यम् पशुः

46 त्वम् पुरा गाम् रसाया महा सूकरो दम्ष्ट्रया पद्मिनीम् वारणेन्द्रो यथा

स्तूय मानो नदल् लीलया योगिभि: व्युज्जहर्थ त्रयी गात्र यज्ञ क्रतु:

47 स प्रसीद त्वम् अस्माकम् आकाङ्क्षताम् दर्शनम् ते परिभ्रष्ट सत् कर्मणाम्

कीर्त्यमाने नृभि: नाम्नि यज्ञेश ते यज्ञ विघ्ना: क्षयम् यान्ति तस्मै नम:

48 मैत्रेय उवाच

इति दक्ष: कविर्यज्ञम् भद्र रुद्राव मर्शितम्

कीर्त्यमाने हृषीकेशे सन्निन्ये यज्ञ भावने

49 भगवान् स्वेन भागेन सर्वात्मा सर्व भागभुक्

दक्षम् बभाष आभाष्य प्रीयमाण इवानघ

50 श्री भगवान् उवाच

अहम् ब्रह्मा च शर्वश् च जगत: कारणम् परम्

आत्मेश्वर उपद्रष्टा स्वयन् दृग विशेषण:

51 आत्म मायाम् समाविश्य सो ऽहम् गुणमयीम् द्विज

सृजन् रक्षन् हरन् विश्वम् दध्रे सम्ज्ञाम् क्रियोचिताम्

52 तस्मिन् ब्रह्मणि अद्वितीये केवले परमात्मनि

ब्रह्म रुद्रौ च भूतानि भेदेन् आज्ञो ऽनुपश्यति

53 यथा पुमान् न स्वाङ्गेषु शिर: पाण्यादिषु क्वचित्

पारक्य बुद्धिम् कुरुते एवम् भूतेषु मत्पर:

54 त्रयाणाम् एक भावानाम् यो न पश्यति वै भिदाम्

सर्व भूत् आत्मनाम् ब्रह्मन् स शान्तिम् अधिगच्छति

55 मैत्रेय उवाच

एवम् भगवता दिष्ट: प्रजापति पतिर् हरिम्

अर्चित्वा क्रतुना स्वेन देवान् उभयतो ऽयजत्

56 रुद्रम् च स्वेन भागेन ह्युपाध् आवत् समाहित:

कर्मणो [उ]दवसान् एन सोमपान् इतरान् अपि

उदवस्य सहर्त् विग्भि: सस्नौ अवभृथम् तत:

57 तस्मा अप्यनु भावेन स्वेनै वावाप्त राधसे

धर्म एव मतिम् दत्त्वा त्रिद शास्ते दिवम् ययु:

58 एवम् दाक्षायणी हित्वा सती पूर्व कळेवरम्

जज्ञे हिमवत: क्षेत्रे मेनायाम् इति शुश्रुम

59 तमेव दयितम् भूय आवृङ्क्ते पतिम् अम्बिका

अनन्य भावै क गतिम् शक्ति: सुप्तेव पूरुषम्

60 एतद् भगवत: शम्भो: कर्म दक्षाध् वर द्रुह:

श्रुतम् भागवताच् छिष्याद् उद्धवान् मे बृहस्पते:

61 इदम् पवित्रम् परमीश चेष्टितम् यशस्यम् आयुष्यम् अघौघ मर्षणम्

यो नित्यदा कर्ण्य नरो ऽनुकीर्तयेद् धुनोत्यघम् कौरव भक्ति भावत:

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

चतुर्थ्थ स्कन्दे सप्तमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

अथ चतुर्थ्थ स्कन्द: अष्टमो ऽध्याय :

स्कन्द- 04: अध्याय- 08

01 मैत्रेय उवाच

सनकाद्या नारदश् च ऋभुर् हम्सो ऽरुणिर् यति:

नैते गृहान् ब्रह्म सुता ह्यावसन् ऊर्ध्व रेतस:

02 मृषा धर्मस्य भार्यासीद् दम्भम् मायाम् च शत्रुहन्

असूत मिथुनम् तत्तु निरृतिर् जगृहे ऽप्रज:

03 तयो: समभवल् लोभो निकृतिश् च महामते

ताभ्याम् क्रोधश् च हिम्सा च यद् दुरुक्ति: स्वसा कलि:

04 दुरुक्तौ कलिर् आधत्त भयम् मृत्युम् च सत्तम

तयोश् च मिथुनम् जज्ञे यातना निरयस् तथा

05 सङ्ग्रहेण मया ख्यातः प्रति सर्गस् तवानघ

त्रिः श्रुत्वै तत् पुमान् पुण्यम् विधुनोत् यात्मनो मलम्

06 अथातः कीर्तये वम्शम् पुण्य कीर्तेः कुरूद्वह

स्वायम्भुवस् यापि मनोः हरेर् अम्शाम्श जन्मनः

07 प्रियव्रतो [उ]त्तान पादौ शतरूपा पतेः सुतौ

वासुदेवस्य कलया रक्षायाम् जगतः स्थितौ

08 जाये उत्तान पादस्य सुनीतिः सुरुचिस् तयोः

सुरुचिः प्रेयसी पत्युः नेतरा यत् सुतो ध्रुवः

09 एकदा सुरुचेः पुत्रम् अङ्कम् आरोप्य लालयन्

उत्तमम् नारु रुक्षन्तम् ध्रुवम् राजाभ्य नन्दत

10 तथा चिकीर्ष माणम् तम् स पत्न्यास् तनयम् ध्रुवम्

सुरुचिः शृण्वतो राज्ञः सेर्ष्यम् आहाति गर्विता

11 न वत्स नृपतेर् धिष्ण्यम् भवान् आरोढु मर्हति

न गृहीतो मया यत्त्वम् कुक्षा वपि नृपात्मजः

12 बालो ऽसि बतन् आत्मानम् अन्य स्त्री गर्भ सम्भृतम्

नूनम् वेद भवान् यस्य दुर्लभे ऽर्थे मनोरथः

13 तपसा आराध्य पुरुषम् तस्यैव् आनुग्रहेण मे

गर्भे त्वम् साध यात्मानम् यदीच्छसि नृपासनम्

14 मैत्रेय उवाच

मातुः स पत्न्याः स दुरुक्ति विद्धः श्वसन् रुषा दण्डहतो यथाहिः

हित्वा मिषन्तम् पितरम् सन्नवाचम् जगाम मातुः प्ररुदन् सकाशम्

15 तम् निःश्वसन्तम् स्फुरिता धरोष्ठम् सुनीतिर् उत्सङ्ग उदूह्य बालम्

निशम्य तत् पौर मुखान् नितान्तम् सा विव्यथे यद् गदितम् स पत्न्या

16 सोत्सृज्य धैर्यम् विललाप शोक दाव् आग्निना दावलतेव बाला

वाक्यम् स पत्न्याः स्मरती सरोज श्रिया दृशा बाष्प कलाम् उवाह

17 दीर्घम् श्वसन्ती वृजिनस्य पारम् अपश्यती बालकम् आह बाला

मामङ्गलम् तात परेषु मम्स्था भुङ्क्ते जनो यत् पर दुःख दस्तत्

18 सत्यम् सुरुच्या भिहितम् भवान् मे यद् दुर्भगाया उदरे गृहीतः

स्तन्येन वृद्धश् च विलज्जते याम् भार्येति वा वोढुम् इडस्पतिर् माम्

19 आतिष्ठ तत् तात विमत्सरस् त्वम् उक्तम् समात्रापि यदव्य लीकम्

आराधया अधोक्षज पाद पद्मम् यदीच्छसे ऽध्यासनम् उत्तमो यथा

20 यस्याङ्घ्रि पद्मम् परिचर्य विश्व विभाव नायात् त गुणाभि पत्तेः

अजो ऽध्य तिष्ठत् खलु पारमेष्ठ्यम् पदम् जितात्मश् वसनाभि वन्द्यम्

21 तथा मनुर्वो भगवान् पितामहो यम् एक मत्या पुरु दक्षिणैर् मखैः

इष्ट्वाभि पेदे दुरवापम् अन्यतो भौमम् सुखम् दिव्यम् अथाप वर्ग्यम्

22 तमेव वत्स् आश्रय भृत्य वत्सलम् मुमुक्षुभिः मृग्य पदाब्ज पद्धतिम्

अनन्य भावे निज धर्म भाविते मनसि अवस्थाप्य भजस्व पूरुषम्

23 नान्यम् ततः पद्म पलाश लोचनाद् दुःख च्छिदम् ते मृगयामि कञ्चन

यो मृग्यते हस्त गृहीत पद्मया श्रियेतरैर् अङ्ग विमृग्य माणया

24 मैत्रेय उवाच

एवम् सञ्जल्पितम् मातुः आकर्ण् यार्थागमम् वचः

सन्नियम् यात्म नात्मानम् निश् चक्राम पितुः पुरात्

25 नारदः तद् उपाकर्ण्य ज्ञात्वा तस्य चिकीर्षितम्

स्पृष्ट्वा मूर्धन् यघघ्नेन पाणिना प्राह विस्मितः

26 अहो तेजः क्षत्रियाणाम् मान भङ्गम् अमृष्यताम्

बालो ऽप्ययम् हृदा धत्ते यत् समातुः असद्वचः

27 नारद उवाच

नाधुनाप् यवमानम् ते सम्मानम् वापि पुत्रक

लक्षयामः कुमारस्य सक्तस्य क्रीडना दिषु

28 विकल्पे विद्यमाने ऽपि न ह्य सन्तोष हेतवः

पुम्सो मोह मृते भिन्ना यल् लोके निज कर्मभिः

29 परितुष्येत् ततस् तात तावन् मात्रेण पूरुषः

दैवोप सादितम् यावद् वीक्ष्येश्वर गतिम् बुधः

30 अथ मात्रोप दिष्टेन योगेन् आव रुरुत्ससि

यत् प्रसादम् स वै पुम्साम् दुर् आराध्यो मतो मम

31 मुनयः पदवीम् यस्य निःसङ्गेनोरु जन्मभिः

न विदुः मृगयन्तो ऽपि तीव्र योग समाधिना

32 अतो निवर्तताम् एष निर्बन्धस् तव निष्फलः

यतिष् यति भवान् काले श्रेयसाम् समुपस्थिते

33 यस्य यद् दैव विहितम् स तेन सुख दुःखयोः

आत्मानम् तोषयन् देही तमसः पार मृच्छति

34 गुणाधिकान् मुदम् लिप्सेद् अनुक्रोशम् गुणाधमात्

मैत्रीम् समानाद् अन्विच्छेत् न तापैर् अभि भूयते

35 ध्रुव उवाच

सो ऽयम् शमो भगवता सुख दुःख हत् आत्मनाम्

दर्शितः कृपया पुम्साम् दुर्दर्शो ऽस्मद् विधैस्तु यः

36 अथापि मे ऽविनी तस्य क्षात्त्रम् घोरम् उपेयुषः

सुरुच्या दुर्वचो बाणैः न भिन्ने श्रयते हृदि

37 पदम् त्रि भुवनोत् कृष्टम् जिगीषोः साधु वर्त्म मे

ब्रूहि यस्मत् पितृभिः ब्रह्मन् अन्यैर् अप् यनधिष्ठितम्

38 नूनम् भवान् भगवतो यो ऽङ्गजः परमेष्ठिनः

वितुदन् अटते वीणाम् हितार्थम् जगतो ऽर्कवत्

39 मैत्रेय उवाच

इत् युदा हृत माकर्ण्य भगवान् नारदस् तदा

प्रीतः प्रत्याहतम् बालम् सद् वाक्यम् अनुकम्पया

40 नारद उवाच

जनन्याभि हितः पन्थाः स वै निःश्रेयसस् य ते

भगवान् वासुदेवस् तम् भज तत् प्रवण् आत्मना

41 धर्म् आर्थ काम मोक्षाख्यम् य इच्छेच् छ्रेय आत्मनः

एकम् एव हरेस् तत्र कारणम् पाद सेवनम्

42 तत् तात गच्छ भद्रम् ते यमुनायास् तटम् शुचि

पुण्यम् मधुवनम् यत्र सान्निध्यम् नित्यदा हरेः

43 स्नात्वानु सवनम् तस्मिन् काळिन्द्याः सलिले शिवे

कृत् वोचितानि निवसन् आत्मनः कल्पितासनः

44 प्राणायामेन त्रि वृता प्राणेन्द्रिय मनोमलम्

शनैर् व्युदस्याभि ध्यायेत् मनसा गुरुणा गुरुम्

45 प्रसादाभि मुखम् शश्वत् प्रसन्न वदने क्षणम्

सुनासम् सुभ्रुवम् चारु कपोलम् सुर सुन्दरम्

46 तरुणम् रमणी याङ्गम् अरुणोष्ठे क्षणाधरम्

प्रणत् आश्रयणम् नृम्णम् शरण्यम् करुणार्णवम्

47 श्रीवत्स् आङ्कम् घन श्यामम् पुरुषम् वनमालिनम्

शङ्ख चक्र गदा पद्मैः अभि व्यक्त चतुर् भुजम्

48 किरीटिनम् कुण्डलिनम् केयूर वलयान् वितम्

कौस्तुभ् आभरण ग्रीवम् पीत कौशेय वाससम्

49 काञ्ची कलाप पर्यस्तम् लसत् काञ्चन नूपुरम्

दर्शनी यतमम् शान्तम् मनो नयन वर्धनम्

50 पद्भ्याम् नख मणि श्रेण्या विलसद्भ्याम् समर्चताम्

हृत् पद्म कर्णिका धिष्ण्यम् आक्रम् यात्मन् यवस्थितम्

51 स्मयमानम् अभि ध्यायेत् सानु रागाव लोकनम्

नियतेनैक भूतेन मनसा वर दर्षभम्

52 एवम् भगवतो रूपम् सुभद्रम् ध्यायतो मनः

निर्वृत्या परया तूर्णम् सम्पन्नम् न निवर्तते

53 जप्यश् च परमो गुह्य: श्रूयताम् मे नृपात्मज

यम् सप्त रात्रम् प्रपठन् पुमान् पश्यति खेचरान्

54 ओम् नमो भगवते वासुदेवाय

मन्त्रेणानेन देवस्य कुर्याद् द्रव्य मयीम् बुध:

सपर्याम् विविधैर् द्रव्यै: देश काल विभागवित्

55 सलिलै: शुचिभिर् माल्यै: वन्यैर् मूल फलादिभि:

शस्ताङ् कुराम् शुकैश् चार्चेत् तुळस्या प्रियया प्रभुम्

56 लब्ध्वा द्रव्य मयी मर्चाम् क्षित्यम्ब् वादिषु वार्चयेत्

आभृत् आत्मा मुनि: शान्तो यतवाङ् मितवन् यभुक्

57 स्वेच् छावतार चरितै: अचिन्त्य निज मायया

करिष्यति उत्तम श्लोक: तद् ध्यायेद् हृद यङ्गमम्

58 परिचर्या भगवतो यावत्य: पूर्व सेविता:

ता मन्त्र हृदयेनैव प्रयुञ्ज्यान् मन्त्र मूर्तये

59 एवम् कायेन मनसा वचसा च मनोगतम्

परिचर्य माणो भगवान् भक्ति मत् परिचर्यया

60 पुम्साम् अमायिनाम् सम्यग् भजताम् भाव वर्धन:

श्रेयो दिशति अभिमतम् यद् धर्मादिषु देहिनाम्

61 विरक्तश् चेन्द्रिय रतौ भक्ति योगेन भूयसा

तम् निरन्तर भावेन भजेत अद्धा विमुक्तये

62 इत् युक्तस्तम् परिक्रम्य प्रणम्य च नृपार्भक:

ययौ मधुवनम् पुण्यम् हरेश् चरण चर्चितम्

63 तपोवनम् गते तस्मिन् प्रविष्टो ऽन्त: पुरम् मुनि:

अर्हितार्हण को राज्ञा सुखासीन उवाच तम्

64 नारद उवाच

राजन् किम् ध्यायसे दीर्घम् मुखेन परिशुष् यता

किम् वा न रिष्यते कामो धर्मो वार्थेन सम्युत:

65 राजो उवाच

सुतो मे बालको ब्रह्मन् स्त्रैणेना अकरुण् आत्मना

निर्वासितः पञ्चवर्षः सह मात्रा महान् कविः

66 अप्यनाथम् वने ब्रह्मन् मा स्मादन्त् यर्भकम् वृकाः

श्रान्तम् शयानम् क्षुधितम् परिम् लान मुखाम्बुजम्

67 अहो मे बत दौरात्म्यम् स्त्री जितस्यो [उ]पधारय

यो ऽङ्कम् प्रेम्णा रुरुक्षन्तम् नाभ् यनन्दम् असत्तमः

68 नारद उवाच

मा मा शुचः स्व तनयम् देव गुप्तम् विशाम्पते

तत् प्रभावम् अविज्ञाय प्रावृङ्क्ते यद् यशो जगत्

69 सुदुष्करम् कर्म कृत्वा लोकपालैर् अपि प्रभुः

ऐष्यति अचिरतो राजन् यशो विपुलयम्स् तव

70 मैत्रेय उवाच

इति देवर्षिणा प्रोक्तम् विश्रुत्य जगती पतिः

राज लक्ष्मीम् अनादृत्य पुत्र मेवान् व चिन्तयत्

71 तत्र अभिषिक्तः प्रयतः ताम् उपोष्य विभावरीम्

समाहितः पर्यचरद् ऋष्या देशेन पूरुषम्

72 त्रि रात्रान्ते त्रि रात्रान्ते कपित्थ बदराशनः

आत्म वृत्त् यनु सारेण मासम् निन्ये ऽर्चयन् हरिम्

73 द्वितीयम् च तथा मासम् षष्ठे षष्ठे ऽर्भको दिने

तृण पर्णादिभिः शीर्णैः कृतान् नो ऽभ् यर्चयत् विभुम्

74 तृतीयम् चानयन् मासम् नवमे नवमे ऽहनि

अब्भक्ष उत्तम श्लोकम् उपाधावत् समाधिना

75 चतुर्थम् अपि वै मासम् द्वादशे द्वादशे ऽहनि

वायु भक्षो जित श्वासो ध्यायन् देवम् अधारयत्

76 पञ्चमे मास् यनुप्राप्ते जित श्वासो नृपात्मजः

ध्यायन् ब्रह्म पदै केन तस्थौ स्थाणुर् इवाचल:

77 सर्वतो मन आकृष्य हृदि भूतेन्द्रि याशयम्

ध्यायन् भगवतो रूपम् नाद्रा क्षीत् किञ्चना परम्

78 आधारम् महद् आदीनाम् प्रधान पुरुषेश्वरम्

ब्रह्म धारय माणस्य त्रयो लोकाश् च कम्पिरे

79 यदैक पादेन स पार्थि वार्भक: तस्थौ तद् अङ्गुष्ठ निपीडिता मही

ननाम तत् रार्धम् इभेन्द्र धिष्ठिता तरीव सव्ये तरत: पदे पदे

80 तस्मिन् नभि ध्यायति विश्वम् आत्मनो द्वारम् निरुध्यासुम् अनन्यया धिया

लोका निरुच् छ्वास निपीडिता भृशम् स लोक पाला: शरणम् ययुर् हरिम्

81 देवा ऊचु:

नैवम् विदामो भगवन् प्राण रोधम् चरा चरस् याखिल सत्त् वधाम्न:

विधेहि तन् नो वृजिनाद् विमोक्षम् प्राप्ता वयम् त्वाम् शरणम् शरण्यम्

82 श्री भगवान् उवाच

मा भैष्ट बालम् तपसो दुरत्ययात् निवर्तयिष्ये प्रतियात स्वधाम

यतो हि व: प्राण निरोध आसीद् औत्तान पादि: मयि सङ्गत् आत्मा

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

चतुर्थ्थ स्कन्दे अष्टमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

अथ चतुर्थ्थ स्कन्द: नवमो ऽध्याय :

स्कन्द- 04: अध्याय- 09

01 मैत्रेय उवाच

त एवम् उत्सन्न भया उरुक्रमे कृताव नामाः प्रययुस् त्रिविष्टपम्

सहस्र शीर्षापि ततो गरुत्मता मधोर् वनम् भृत्य दिदृक्षया गतः

02 स वै धिया योग विपाक तीव्रया हृत् पद्मकोशे स्फुरितम् तडित् प्रभम्

तिरोहितम् सहसैवोप लक्ष्य बहिःस्थितम् तद् अवस्थम् ददर्श

03 तद् दर्शनेना गत साध्वसः क्षितौ अवन्द ताङ्गम् विनमय्य दण्डवत्

दृग्भ्याम् प्रपश्यन् प्रपिबन् निवार्भकः चुम्बन् निवास्येन भुजैर् इवाश्लिषन्

04 स तम् विवक्षन्तम् अतद्विदम् हरिः ज्ञात्वास्य सर्वस्य च हृद्य वस्थितः

कृताञ्जलिम् ब्रह्म मयेन कम्बुना पस्पर्श बालम् कृपया कपोले

05 स वै तदैव प्रति पादिताम् गिरम् दैवीम् परिज्ञात परात्म निर्णयः

तम् भक्ति भावो ऽभ्य गृणाद् असत्वरम् परिश्रुतो रुश्र वसम् ध्रुव क्षितिः

06 ध्रुव उवाच

यो ऽन्तः प्रविश्य मम वाचम् इमाम् प्रसुप्ताम्

सञ्जीव यत् यखिल शक्ति धरः स्वधाम्ना

अन्याम्श् च हस्त चरण श्रवण त्व गादीन्

प्राणान् नमो भगवते पुरुषाय तुभ्यम्

07 एकस् त्वमेव भगवन् इदम् आत्म शक्त्या

मायाख्ययो [उ]रुगुणया महदाद्य शेषम्

सृष्ट्वा नुविश्य पुरुषस् तद सद् गुणेषु

नानेव दारुषु विभावसु वद् विभासि

08 त्वद् दत्तया वयुन येदम् अचष्ट विश्वम्

सुप्त प्रबुद्ध इव नाथ भवत् प्रपन्नः

तस्याप वर्ग्य शरणम् तव पाद मूलम्

विस्मर्यते कृतविदा कथम् आर्त बन्धो

09 नूनम् विमुष्ट मतयस् तव मायया ते

ये त्वाम् भवाप्य य विमोक्षणम् अन्यहेतोः

अर्चन्ति कल्पक तरुम् कुणपोप भोग्यम्

इच्छन्ति यत् स्पर्शजम् निरये ऽपि नॄणाम्
10 या निर्वृतिस् तनु भृताम् तव पाद पद्म
ध्यानाद् भवज् जनकथा श्रवणेन वा स्यात्
सा ब्रह्मणि स्व महिमन् यपि नाथ मा भूत्
किम् त्वन्त कासि लुलितात् पतताम् विमानात्
11 भक्तिम् मुहुः प्रवहताम् त्वयि मे प्रसङ्गो
भूयाद् अनन्त महताम् अमलाश यानाम्
येनाञ्ज सोल्बणम् उरुव्यसनम् भवाब्धिम्
नेष्ये भवद् गुण कथामृत पान मत्तः
12 ते न स्मरन्त् यतितराम् प्रियमीश मर्त्यम्
ये चान्वदः सुत सुहृद् गृहवित्त दाराः
ये त्वब्ज नाभ भवदीय पदारविन्द
सौगन्ध्य लुब्ध हृदयेषु कृत प्रसङ्गाः
13 तिर्यङ् नग द्विज सरीसृप देव दैत्य
मर्त्यादिभिः परिचितम् सदसद् विशेषम्
रूपम् स्थविष्ठम् अज ते महद् आद्यनेकम्
नातः परम् परम वेद्मि न यत्र वादः
14 कल्पान्त एतद् अखिलम् जठरेण गृह्णन्
शेते पुमान् स्वदृग् अनन्त सखस् तदङ्के
यन् नाभि सिन्धु रुह काञ्चन लोक पद्म
गर्भे द्युमान् भगवते प्रणतो ऽस्मि तस्मै
15 त्वम् नित्य मुक्त परिशुद्ध विबुद्ध आत्मा
कूटस्थ आदिपुरुषो भगवाम्स् त्र्यधीशः
यद् बुद् ध्यवस्थितिम् अखण् डितया स्व दृष्ट्या
द्रष्टा स्थिताव् अधिमखो व्यतिरिक्त आस्से
16 यस्मिन् विरुद्ध गतयो ह्यनिशम् पतन्ति

विद्यादयो विविध शक्तय आनु पूर्व्यात्
तद् ब्रह्म विश्व भवम् एकम् अनन्त माद्यम्
आनन्द मात्रम् अविकारम् अहम् प्रपद्ये

17 सत्या शिषो हि भगवम्स् तव पाद पद्मम्
आशीस् तथानु भजतः पुरुषार्थ मूर्तेः
अप्येव मर्य भगवान् परिपाति दीनान्
वाश्रेव वत्सकम् अनुग्रह कातरो ऽस्मान्

18 मैत्रेय उवाच
अथ् आभिष्टुत एवम् वै सत् सङ्कल्पेन धीमता
भृत्यानु रक्तो भगवान् प्रति नन्द्येदम् अब्रवीत्

19 श्री भगवान् उवाच
वेदाहम् ते व्यवसितम् हृदि राजन्य बालक
तत् प्रयच्छामि भद्रम् ते दुरापम् अपि सुव्रत

20 नान्यैर् अधिष्ठितम् भद्र यद् भ्राजिष्णु ध्रुवक्षिति
यत्र ग्रहर्क्ष ताराणाम् ज्योतिषाम् चक्र माहितम्

21 मेढ्याम् गो चक्र वत्स्थास्नु परस्तात् कल्प वासिनाम्
धर्मो ऽग्निः कश्यपः शुक्रो मुनयो ये वनौकसः
चरन्ति दक्षिणी कृत्य भ्रमन्तो यत् सतारकाः

22 प्रस्थिते तु वनम् पित्रा दत्त्वा गाम् धर्म सम्श्रयः
षट् त्रिम्शद् वर्ष साहस्रम् रक्षिताव् याहतेन्द्रियः

23 त्वद् भ्रातर् युत्तमे नष्टे मृगयायाम् तु तन् मनाः
अन्वेषन्ती वनम् माता दावाग्निम् सा प्रवेक्ष्यति

24 इष्ट्वा माम् यज्ञ हृदयम् यज्ञैः पुष्कल दक्षिणैः
भुक्त्वा चेहाशिषः सत्या अन्ते माम् सम् स्मरिष्यसि

25 ततो गन्तासि मत् स्थानम् सर्व लोक नमस्कृतम्
उपरिष्टाद् ऋषिभ्यस् त्वम् यतो नावर्तते गतः

26 मैत्रेय उवाच

इत् यर्चितः स भगवान् अतिदिश् यात्मनः पदम्

बालस्य पश्यतो धाम स्वमगाद् गरुड ध्वजः

27 सो ऽपि सङ्कल्पजम् विष्णोः पाद सेवोप सादितम्

प्राप्य सङ्कल्प निर्वाणम् नाति प्रीतो ऽभ्यगात् पुरम्

28 विदुर उवाच

सु दुर्लभम् यत् परमम् पदम् हरेः माया विनस् तच् चरण् आर्चन् आर्जितम्

लब्ध्वाप्य सिद्धार्थम् इवैक जन्मना कथम् स्वम् आत्मानम् अमन्य तार्थ वित्

29 मैत्रेय उवाच

मातुः स पत्न्या वाग्बाणैः हृदि विद्धस्तु तान् स्मरन्

नैच्छन् मुक्ति पतेर् मुक्तिम् तस्मात् तापम् उपेयिवान्

30 ध्रुव उवाच

समाधिना नैक भवेन यत् पदम् विदुः सनन्दादय ऊर्ध्व रेतसः

मासैरहम् षड्भिर् अमुष्य पादयोः छायाम् उपेत्या पगतः पृथङ्मतिः

31 अहो बत ममान् आत्म्यम् मन्द भाग्यस्य पश्यत

भवच् छिदः पाद मूलम् गत्वा याचे यदन्त वत्

32 मतिर् विदूषिता देवैः पतद्भिः असहिष्णुभिः

यो नारद वचस् तथ्यम् नाग्राहिषम् असत्तमः

33 दैवीम् मायाम् उपाश्रित्य प्रसुप्त इव भिन्न दृक्

तप्ये द्वितीये ऽप्यसति भ्रातृ भ्रातृ व्यहृद्रुजा

34 मयै तत् प्रार्थितम् व्यर्थम् चिकित्सेव गतायुषि

प्रसाद्य जगद् आत्मानम् तपसा दुष् प्रसादनम्

भवच् छिदम् अयाचे ऽहम् भवम् भाग्य विवर्जितः

35 स्वाराज्यम् यच्छतो मौढ्यात् मानो मे भिक्षितो बत

ईश्वरात् क्षीण पुण्येन फलीकारान् इवाधनः

36 मैत्रेय उवाच

न वै मुकुन्दस्य पद् आरविन्दयो रजो जुषस् तात भवा दृशा जनाः

वाञ्छन्ति तद् दास्यम् मृते ऽर्थम् आत्मनो यदृच्छया लब्ध मनः समृद्धयः

37 आकर्ण् यात्मजम् आयान्तम् सम्परेत्य यथागतम्

राजा न श्रद्दधे भद्रम् अभद्रस्य कुतो मम

38 श्रद्धाय वाक्यम् देवर्षेः हर्ष वेगेन धर्षितः

वार्ता हर्तुर् अतिप्रीतो हारम् प्रादान् महाधनम्

39 सदश्वम् रथम् आरुह्य कार्त स्वर परिष्कृतम्

ब्राह्मणैः कुल वृद्धैश् च पर्यस्तो ऽमात्य बन्धुभिः

40 शङ्ख दुन्दुभि नादेन ब्रह्म घोषेण वेणुभिः

निश्चक्राम पुरात् तूर्णम् आत्मजा भीक्षणो [उ]त्सुकः

41 सुनीतिः सुरुचिश् चास्य महिष्यौ रुक्म भूषिते

आरुह्य शिबिकाम् सार्धम् उत्तमेन् आभि जग्मतुः

42 तम् दृष्ट्वोप वनाभ्याश आयान्तम् तर सा रथात्

अवरुह्य नृपस् तूर्णम् आसाद्य प्रेम विह्वलः

43 परिरेभे ऽङ्गजम् दोर्भ्याम् दीर्घो [उ]त्कण्ठ मनाः श्वसन्

विष्वक् सेनाङ्घ्रि सम्स्पर्श हता शेषाघ बन्धनम्

44 अथाजिघ्रन् मुहुर् मूर्ध्नि शीतैः नयन वारिभिः

स्नापया मास तनयम् जातोद् दाम मनोरथः

45 अभिवन्द्य पितुः पादौ आशीर्भिश् चाभि मन्त्रितः

ननाम मातरौ शीर्ष्णा सत्कृतः सज्जना ग्रणीः

46 सुरुचिस्तम् समुत्थाप्य पादा वनतम् अर्भकम्

परिष्वज्याह जीवेति बाष्प गद्गदया गिरा

47 यस्य प्रसन्नो भगवान् गुणैर् मैत्र्यादिभिर् हरिः

तस्मै नमन्ति भूतानि निम्नम् आप इव स्वयम्

48 उत्तमश् च ध्रुवश् चोभौ अन्योन्यम् प्रेम विह्वलौ

अङ्ग सङ्गाद् उत्पुलकौ अस्रौघम् मुहुरूहतुः

49 सुनीतिर् अस्य जननी प्राणेभ्यो ऽपि प्रियम् सुतम्

उपगुह्य जहा वाधिम् तद् अङ्ग स्पर्श निर्वृता

50 पयः स्तनाभ्याम् सुस्राव नेत्रजैः सलिलैः शिवैः

तद् आभिषिच्य मानाभ्याम् वीर वीरसुवो मुहुः

51 ताम् शशम्सुः जना राज्ञीम् दिष्ट्या ते पुत्र आर्तिहा

प्रति लब्धश् चिरम् नष्टो रक्षिता मण्डलम् भुवः

52 अभ् यर्चितस् त्वया नूनम् भगवान् प्रणत् आर्तिहा

यद् अनुध्यायिनो धीरा मृत्युम् जिग्युः सु दुर्जयम्

53 लाल्यमानम् जनैर् एवम् ध्रुवम् सभ्रातरम् नृपः

आरोप्य करिणीम् हृष्टः स्तूयमानो ऽविशत् पुरम्

54 तत्र तत्रोप सङ्क्लृप्तैः लसन् मकर तोरणैः

सवृन्दैः कदलीस् तम्भैः पूग पोतैश् च तद्विधैः

55 चूत पल्लव वासःस्रङ् मुक्तादाम् अविलम्बिभिः

उपस्कृतम् प्रति द्वारम् अपाम् कुम्भैः सदीपकैः

56 प्राकारैर् गोपुरा गारैः शात कुम्भ परिच्छदैः

सर्वतो ऽलङ्कृतम् श्रीमद् विमान शिखरद् युभिः

57 मृष्ट चत्वर रथ्याट्ट मार्गम् चन्दन चर्चितम्

लाजाक्षतैः पुष्प फलैः तण्डुलैर् बलिभिर् युतम्

58 ध्रुवाय पथि दृष्टाय तत्र तत्र पुरस्त्रियः

सिद्धार् थाक्षत दध्यम्बु दूर्वा पुष्प फलानि च

59 उपजह्रुः प्रयुञ्जाना वात्सल्याद् आशिषः सतीः

शृण्वन्स् तद् वल्गु गीतानि प्राविशद् भवनम् पितुः

60 महामणि व्रातमये स तस्मिन् भवनो *[उ]*त्तमे

लालितो नितराम् पित्रा न्यवसद् दिवि देववत्

61 पयः फेन निभाः शय्या दान्ता रुक्म परिच्छदाः

आसनानि महार्हाणि यत्र रौक्मा उपस्कराः

62 यत्र स्फटिक कुड्येषु महा मार कतेषु च

मणि प्रदीपा आभान्ति ललना रत्न सम्युता:

63 उद्यानानि च रम्याणि विचित्रै: अमर द्रुमै:

कूजद् विहङ्ग मिथुनै: गायन् मत्त मधुव्रतै:

64 वाप्यो वैदूर्य सोपाना: पद्मोत्पल कुमुद्वती:

हम्स कारण्ड वकुलै: जुष्टाश् चक्राह्व सारसै:

65 उत्तान पादो राजरुषि: प्रभावम् तनयस्य तम्

श्रुत्वा दृष्ट् वाद्भुत तमम् प्रपेदे विस्मयम् परम्

66 वीक्ष्योढ वयसम् तम् च प्रकृतीनाम् च सम्मतम्

अनुरक्त प्रजम् राजा ध्रुवम् चक्रे भुव: पतिम्

67 आत्मानम् च प्रवयसम् आकलय्य विशाम् पति:

वनम् विरक्त: प्रातिष्ठद् विमृशन् आत्मनो गतिम्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

चतुर्थ्थ स्कन्दे नवमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

अथ चतुर्थ्थ स्कन्द: दशमो ऽध्याय :

स्कन्द- 04: अध्याय- 10

01 मैत्रेय उवाच

प्रजापतेर् दुहितरम् शिशुमारस्य वै ध्रुव:

उपयेमे भ्रमिम् नाम तत्सुतौ कल्प वत्सरौ

02 इलायाम् अपि भार्यायाम् वायो: पुत्र्याम् महाबल:

पुत्रम् उत्कल नामानम् योषिद् रत्नम् अजीजनत्

03 उत्तमस् त्वकृतो द्वाहो मृगयायाम् बलीयसा

हतः पुण्य जनेनाद्रौ तन् मातास्य गतिम् गता

04 ध्रुवो भ्रातृ वधम् श्रुत्वा कोपा मर्ष शुचार्पितः

जैत्रम् स्यन्दनम् आस्थाय गतः पुण्य जनालयम्

05 गत्वो दीचीम् दिशम् राजा रुद्रानु चर सेविताम्

ददर्श हिमवद् द्रोण्याम् पुरीम् गुह्य क सङ्कुलाम्

06 दध्मौ शङ्खम् बृहद् बाहुः खम् दिशश्चानु नादयन्

येनोद् विग्न दृशः क्षत्तः उपदेव्यो ऽत्रसन् भृशम्

07 ततो निष्क्रम्य बलिन उपदेव महाभटाः

असहन्तः तन् निनादम् अभिपेतुर् उदायुधाः

08 स तान् आपततो वीर उग्रधन्वा महारथः

एकैकम् युगपत् सर्वान् अहन् बाणैस् त्रिभिस् त्रिभिः

09 ते वै ललाट लग्नैस् तैः इषुभिः सर्व एव हि

मत्वा निरस्तम् आत्मानम् आशम् सन्कर्म तस्य तत्

10 ते ऽपि चामुम् अमृष्यन्तः पाद स्पर्शम् इवोरगाः

शरैर् अविध्यन् युगपद् द्विगुणम् प्रचिकीर्षवः

11 ततः परिघनिस् त्रिम्शैः प्रास शूल परश्वधैः

शक्ति ऋष्टिभिर् भुशुण्डीभिः चित्रवाजैः शरैर् अपि

12 अभ्यवर्षन् प्रकुपिताः सरथम् सह सारथिम्

इच्छन्तः तत् प्रतीकर्तुम् अयुतानि त्रयोदश

13 औत्तान पादिः स तदा शस्त्र वर्षेण भूरिणा

न उपा दृश्य तच् छन्न आसारेण यथा गिरिः

14 हा हा कारस् तदैवासीत् सिद्धानाम् दिवि पश्यताम्

हतो ऽयम् मानवः सूर्यो मग्नः पुण्य जनार्णवे

15 नदत्सु यातु धानेषु जयकाशिष् वथो मृधे

उदतिष्ठद् रथस् तस्य नीहाराद् इव भास्करः

16 धनुर् विस्फूर्जयन् दिव्यम् द्विषताम् खेदम् उद्वहन्

अस्त्रौघम् व्यध मद् बाणैः घनानीकम् इवानिलः

17 तस्य ते चाप निर्मुक्ता भित्त्वा वर्माणि रक्षसाम्

कायाना विविशुस् तिग्मा गिरीन् अशनयो यथा

18 भल्लैः सञ्छिद्य मानानाम् शिरोभिश् चारु कुण्डलैः

ऊरुभिर् हेमता लाभैः दोर्भिः वलय वल्गुभिः

19 हार केयूर मुकुटैः उष्णीषैश् च महाधनैः

आस्तृतास् ता रणभुवो रेजुर् वीर मनोहराः

20 हता वशिष्टा इतरे रणाजिराद् रक्षोगणाः क्षत्रिय वर्य सायकैः

प्रायो विवृक्णा वयवा विदुद्रुवुः मृगेन्द्र विक्रीडित यूथपा इव

21 अपश्यमानः स तद् आततायिनम् महामृधे कञ्चन मान वोत्तमः

पुरीम् दिदृक्षन् अपि नाविशद् द्विषाम् न मायिनाम् वेद चिकीर्षितम् जनः

22 इति ब्रुवम्श् चित्र रथः स्व सारथिम् यत्तः परेषाम् प्रतियोग शङ्कितः

शुश्राव शब्दम् जलधेर् इवेरितम् नभस्वतो दिक्षु रजो ऽन्व दृश्यत

23 क्षणेन् आच्छादितम् व्योम घनानीकेन सर्वतः

विस्फुरत् तडिता दिक्षु त्रासयत् स्तन यित्नुना

24 ववृषू रुधिरौ घासृक् पूयविण् मूत्र मेदसः

निपेतुर् गगना दस्य कबन्धान् यग्रतो ऽनघ

25 ततः खे ऽदृश्यत गिरिः निपेतुः सर्व तोदिशम्

गदा परिघन् इस्त्रिम्श मुसलाः साश्म वर्षिणः

26 अहयो ऽशनि निः श्वासा वमन्तो ऽग्निम् रुषाक्षिभिः

अभ्यधावन् गजा मत्ताः सिम्ह व्याघ्राश् च यूथशः

27 समुद्र ऊर्मिभिर् भीमः प्लावयन् सर्वतो भुवम्

आससाद महाह्रादः कल्पान्त इव भीषणः

28 एवम् विधान् यनेकानि त्रासनानि अमनस्विनाम्

ससृजुस् तिग्म गतय आसुर्या मायया सुराः

29 ध्रुवे प्रयुक्ताम् असुरैः ताम् मायाम् अति दुस्तराम्

निशम्य तस्य मुनयः शमा शम्सन्स मागताः

30 मुनय ऊचुः

औत्तान पादे भगवाम्स् तव शार्ङ्ग धन्वा

देवः क्षिणोत् ववनत् आर्तिहरो विपक्षान्

यन् नामधेयम् अभिधाय निशम्य चाद्धा

लोको ऽञ्जसा तरति दुस्तरम् अङ्ग मृत्युम्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

चतुर्थ्थ स्कन्दे दशमो ऽध्याय ः||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

अथ चतुर्थ्थ स्कन्दः एका दशो ऽध्याय ः

स्कन्द- 04: अध्याय- 11

01 मैत्रेय उवाच

निशम्य गदताम् एवम् ऋषीणाम् धनुषि ध्रुवः

सन्दधे ऽस्त्रम् उपस्पृश्य यन् नारायण निर्मितम्

02 सन्धीय मान एतस्मिन् माया गुह्यक निर्मिताः

क्षिप्रम् विनेशुर् विदुर क्लेशा ज्ञानोदये यथा

03 तस्यार् षास्त्रम् धनुषि प्रयुञ्जतः सुवर्ण पुङ्खाः कलहम्स वाससः

विनिः सृता आवि विशुर् द्विषद् बलम् यथा वनम् भीमरवाः शिखण्डिनः

04 तैस् तिग्मधारैः प्रधने शिलीमुखैः इतस् ततः पुण्य जना उपद्रुताः

तम् अभ्यधावन् कुपिता उदायुधाः सुपर्णम् उन्नद्ध फणा इवाहयः

05 स तान् पृषत्कैः अभिधावतो मृधे निकृत्त बाहूरु शिरोधरो दरान्

निनाय लोकम् परमर्क मण्डलम् व्रजन्ति निर्भिद्ययम् ऊर्ध्वरेतसः

06 तान् हन्यमानान् अभिवीक्ष्य गुह्यकान् अनागसः चित्र रथेन भूरिशः

औत्तान पादिम् कृपया पितामहो मनुर् जगाद् ओपगतः सहर्षिभिः

07 मनुर् उवाच

अलम् वत्साति रोषेण तमोद् वारेण पाप्मना

येन पुण्य जनान् एतान् अवधीस् त्वम् अनागसः

08 नास्मत् कुलोचितम् तात कर्मै तत् सद् विगर्हितम्

वधो यद् उपदेवानाम् आरब्धस्ते ऽकृतै नसाम्

09 नन् वेकस् यापराधेन प्रसङ्गाद् बहवो हताः

भ्रातुर् वधाभि तप्तेन त्वयाङ्ग भ्रातृ वत्सल

10 नायम् मार्गो हि साधूनाम् हृषीकेशान् उवर्तिनाम्

यद् आत्मानम् पराग्गृह्य पशुवद् भूत वैशसम्

11 सर्व भूतात्म भावेन भूतावासम् हरिम् भवान्

आराध्याप दुराराध्यम् विष्णोस् तत् परमम् पदम्

12 स त्वम् हरेर् अनुध्यातः तत् पुम्साम् अपि सम्मतः

कथम् त्ववद्यम् कृतवान् अनुशिक्षन् सताम् व्रतम्

13 तितिक्षया करुणया मैत्र्या चाखिल जन्तुषु

समत्वेन च सर्वात्मा भगवान् सम् प्रसीदति

14 सम्प्रसन्ने भगवति पुरुषः प्राकृतैर् गुणैः

विमुक्तो जीव निर्मुक्तो ब्रह्म निर्वाण मृच्छति

15 भूतैः पञ्चभिर् आरब्धैः योषित् पुरुष एव हि

तयोर् व्यवायात् सम्भूतिः योषित् पुरुष योरिह

16 एवम् प्रवर्तते सर्गः स्थितिः सम्यम एव च

गुण व्यतिकराद् राजन् मायया परमात्मनः

17 निमित्त मात्रम् तत्रासीत् निर्गुण: पुरुषर्षभ:

व्यक्ता व्यक्तम् इदम् विश्वम् यत्र भ्रमति लोहवत्

18 स खल्विदम् भगवान् काल शक्त्या गुण प्रवाहेण विभक्त वीर्य:

करोत् यकर्तैव निहन्त्य हन्ता चेष्टा विभून्म्न: खलु दुर् विभाव्या

19 सो ऽनन्तो ऽन्तकर: कालो ऽनादिर् आदिकृद् अव्यय:

जनम् जनेन जनयन् मारयन् मृत्यु नान्तकम्

20 न वै स्वपक्षो ऽस्य विपक्ष एव वा परस्य मृत्योर् विशत: समम् प्रजा:

तम् धावमानम् अनुधा वन्त्यनीशा यथा रजाम् स्यनिलम् भूत सङ्घा:

21 आयुषो ऽपचयम् जन्तो: तथैवो पचयम् विभु:

उभाभ्याम् रहित: स्वस्थो दु:स्थस्य विदधात् यसौ

22 केचित् कर्म वदन्त् येनम् स्वभावम् अपरे नृप

एके कालम् परे दैवम् पुम्स: काम मुतापरे

23 अव्यक्तस्या अप्रमेयस्य नाना शक्त् युदयस्य च

न वै चिकीर्षितम् तात को वेदाथ स्व सम्भवम्

24 न चैते पुत्रक भ्रातु: हन्तारो धन दानुगा:

विसर्गाद् आनयोस् तात पुम्सो दैवम् हि कारणम्

25 स एव विश्वम् सृजति स एवावति हन्ति च

अथापि ह्यन हङ्कारात् नाज्यते गुण कर्मभि:

26 एष भूतानि भूतात्मा भूतेशो भूत भावन:

स्व शक्त्या मायया युक्त: सृजत् यत्ति च पाति च

27 तमेव मृत्युम् अमृतम् तात दैवम् सर्वात्मनो पेहि जगत् परायणम्

यस्मै बलिम् विश्वसृजो हरन्ति गावो यथा वै नसि दाम यन्त्रिता:

28 य: पञ्च वर्षो जननीम् त्वम् विहाय मातु: स पत्न्या वचसा भिन्न मर्मा

वनम् गत: तपसा प्रत्य गक्षम् आराध्य लेभे मूर्ध्नि पदम् त्रि लोक्या:

29 तमेनम् अङ्गात्मनि मुक्त विग्रहे व्यपाश्रितम् निर्गुणम् एकम् अक्षरम्

आत्मानम् अन्विच्छ विमुक्तम् आत्मदृग् यस्मिन् निदम् भेदम् असत् प्रतीयते

30 त्वम् प्रत्यग् आत्मनि तदा भगवत् यनन्त आनन्द मात्र उपपन्न समस्त शक्तौ

भक्तिम् विधाय परमाम् शनकैर् अविद्या ग्रन्थिम् विभेत्स्यसि ममाहम् इति प्ररूढम्

31 सम्यच्छ रोषम् भद्रम् ते प्रतीपम् श्रेयसाम् परम्

श्रुतेन भूयसा राजन् अगदेन यथा मयम्

32 येनोप सृष्टात् पुरुषात् लोक उद्विजते भृशम्

न बुधः तद् वशम् गच्छेद् इच्छन् अभयम् आत्मनः

33 हेलनम् गिरिश भ्रातुः धन दस्य त्वया कृतम्

यज् जघ्निवान् पुण्यजनान् भ्रातृघ्नान् इत्य मर्षितः

34 तम् प्रसादय वत्साशु सन्नत्या प्रश्र योक्तिभिः

न यावन् महताम् तेजः कुलम् नो ऽभि भविष्यति

35 एवम् स्वायम्भुवः पौत्रम् अनुशास्य मनुर् ध्रुवम्

तेनाभि वन्दितः साकम् ऋषिभिः स्वपुरम् ययौ

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

चतुर्थ्थ स्कन्दे एका दशो ऽध्याय ः||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

अथ चतुर्थ्थ स्कन्दः द्वा दशो ऽध्याय ः

स्कन्द- 04: अध्याय- 12

01 मैत्रेय उवाच

ध्रुवम् निवृत्तम् प्रति बुद्ध्य वैशसाद् अपेतमन्युम् भगवान् धनेश्वरः

तत् रागतः चारण यक्ष किन्नरैः सम्स्तूय मानो अभ्यवदत् कृताञ्जलिम्

02 धनद उवाच

भो भोः क्षत्रिय दायाद परितुष्टो ऽस्मि ते ऽनघ

यत्त्वम् पितामहा देशाद् वैरम् दुस्त्यजम् अत्यजः

03 न भवान् अवधीद् यक्षान् न यक्षा भ्रातरम् तव

काल एव हि भूतानाम् प्रभुर् अप्यय भावयोः

04 अहम् त्वम् इत्य पार्थाधीः अज्ञानात् पुरुषस्य हि

स्वाप्नी वाभात् यतद् ध्यानाद् यया बन्ध विपर्ययौ

05 तद् गच्छ ध्रुव भद्रम् ते भगवन्तम् अधोक्षजम्

सर्व भूतात्म भावेन सर्व भूतात्म विग्रहम्

06 भजस्व भजनी याङ्घ्रिम् अभवाय भवच् छिदम्

युक्तम् विरहितम् शक्त्या गुणमय् यात्म मायया

07 वृणीहि कामम् नृप यन् मनोगतम् मत्तस्त्वम् औत्तानपदे ऽविशङ्कितः

वरम् वरार्हो ऽम्बुज नाभ पादयोः अनन्तरम् त्वाम् वयमङ्ग शुश्रुम

08 मैत्रेय उवाच

स राज राजेन वराय चोदितो ध्रुवो महा भागवतो महा मतिः

हरौ स वव्रे ऽचलिताम् स्मृतिम् यया तरति अयत्नेन दुरत्ययम् तमः

09 तस्य प्रीतेन मनसा ताम् दत्त्व इड विडस्ततः

पश्यतो ऽन्तर्दधे सो ऽपि स्वपुरम् प्रत्य पद्यत

10 अथायज त यज्ञेशम् क्रतुभिः भूरि दक्षिणैः

द्रव्य क्रिया देवतानाम् कर्म कर्म फलप्रदम्

11 सर्वात्मन् यच्युते ऽसर्वे तीव्रौघाम् भक्ति मुद्वहन्

ददर्श् आत्मनि भूतेषु तमेव् आवस्थितम् विभुम्

12 तमेवम् शील सम्पन्नम् ब्रह्मण्यम् दीन वत्सलम्

गोप्तारम् धर्म सेतूनाम् मेनिरे पितरम् प्रजाः

13 षट् त्रिम्शद् वर्ष साहस्रम् शशास क्षिति मण्डलम्

भोगैः पुण्य क्षयम् कुर्वन् अभोगैः अशुभक्षयम्

14 एवम् बहुसवम् कालम् महात्मा विचलेन्द्रियः

त्रि वर्ग उप यिकम् नीत्वा पुत्रायादान् नृपासनम्

15 मन्यमान इदम् विश्वम् माया रचितम् आत्मनि

अविद्या रचित स्वप्न गन्धर्व नगरोपमम्

16 आत्मस् त्र्य पत्य सुहृदो बलमृद्ध कोशम्

अन्तः पुरम् परिविहार भुवश् च रम्याः

भू मण्डलम् जलधि मेखल माकलय्य

कालोप सृष्टम् इति स प्रययौ विशालाम्

17 तस्याम् विशुद्ध करणः शिव वार्विगाह्य

बद्ध्वासनम् जितमरुन् मनसा हृताक्षः

स्थूले दधार भगवत् प्रतिरूप एतद्

ध्यायम्स् तद् अव्यवहितो व्यसृजत् समाधौ

18 भक्तिम् हरौ भगवति प्रवहन् अजस्रम्

आनन्द बाष्प कलया मुहुर् अर्द्यमानः

विक्लिद्यमान हृदयः पुलकाचित् आङ्गो

नात्मानम् अस्मरद् असौ इति मुक्त लिङ्गः

19 स ददर्श विमानाग्र्यम् नभसो ऽवतरद् ध्रुवः

विभ्रा जयद् दश दिशो राका पतिम् इवोदितम्

20 तत्रानु देव प्रवरौ चतुर् भुजौ

श्यामौ किशोरौ अरुण् आम्बुजेक्षणौ

स्थिताव् अवष्टभ्य गदाम् सुवाससौ

किरीट हाराङ्गद चारु कुण्डलौ

21 विज्ञायता वुत्तम गाय किङ्करौ

अभ्युत्थितः साध्वस विस्मृत क्रमः

ननाम नामानि गृणन् मधु द्विषः

पार्षत् प्रधाना विति सम्हताञ्जलिः

22 तम् कृष्ण पादाभि निविष्ट चेतसम्

बद्धाञ्जलिम् प्रश्रय नम्र कन्धरम्

सुनन्द नन्दा वुपसृत्य सस्मितम्

प्रत्यूचतुः पुष्करनाभ सम्मतौ

23 सुनन्द नन्दा वूचतुः

भो भो राजन् सुभद्रम् ते वाचम् नो ऽवहितः शृणु

यः पञ्च वर्षस् तपसा भवान् देवम् अतीतृपत्

24 तस् याखिल जगद् धातुः आवाम् देवस्य शार्ङ्गिणः

पार्षदा विह सम्प्राप्तौ नेतुम् त्वाम् भगवत् पदम्

25 सु दुर्जयम् विष्णु पदम् जितम् त्वया यत् सूरयो ऽप्राप्य विचक्षते परम्

आतिष्ठ तच् चन्द्र दिवाकरा दयो ग्रहर्क्ष ताराः परियन्ति दक्षिणम्

26 अनास्थितम् ते पितृभिः अन्यैर् अप्यङ्ग कर्हिचित्

आतिष्ठ जगताम् वन्द्यम् तद् विष्णोः परमम् पदम्

27 एतद् विमान प्रवरम् उत्तम श्लोक मौलिना

उपस्थापितम् आयुष्मन् अधिरोढुम् त्वमर्हसि

28 मैत्रेय उवाच

निशम्य वैकुण्ठ नियोज्य मुख्ययोः मधुच्युतम् वाचम् उरुक्रम प्रियः

कृत् आभिषेकः कृत नित्य मङ्गळो मुनीन् प्रणम् याशिषम् अभ्य वादयत्

29 परीत्याभ् यर्च्य धिष्ण् याग्र्यम् पार्षदाव् अभिवन्द्य च

इयेष तद् अधिष्ठातुम् बिभ्रद् रूपम् हिरण्मयम्

30 तदो [उ]त्तानपदः पुत्रो ददर्शान् तकम् आगतम्

मृत्योर् मूर्ध्नि पदम् दत्त्वा आरुरोह् आद्भुतम् गृहम्

31 तदा दुन्दुभयो नेदुः मृदङ्ग पण वादयः

गन्धर्व मुख्याः प्रजगुः पेतुः कुसुम वृष्टयः

32 स च स्वर्लोकम् आरोक्ष्यन् सुनीतिम् जननीम् ध्रुवः

अन्वस् मरदगम् हित्वा दीनाम् यास्ये त्रिविष्टपम्

33 इति व्यवसितम् तस्य व्यवसाय सुरोत्तमौ

दर्शया मासतुर् देवीम् पुरो यानेन गच्छतीम्

34 तत्र तत्र प्रशम् सद्भिः पथि वैमानिकैः सुरैः

अवकीर्यमाणो ददृशे कुसुमैः क्रमशो ग्रहान्

35 त्रि लोकीम् देवयानेन सो ऽतिव्रज्य मुनीन् अपि

परस्ताद् यद् ध्रुव गतिः विष्णोः पदम् अथाभ्यगात्

36 यद् भ्राजमानम् स्वरुचैव सर्वतो लोकास्त्रयो ह्यनु विभ्रा जन्त एते

यन् नाव्रजन् जन्तुषु ये ऽननुग्रहा व्रजन्ति भद्राणि चरन्ति ये ऽनिशम्

37 शान्ताः समदृशः शुद्धाः सर्व भूतानु रञ्जनाः

यान्त् यञ्जस् आच्युत पदम् अच्युत प्रिय बान्धवाः

38 इत् युत्तानपदः पुत्रो ध्रुवः कृष्ण परायणः

अभूत् त्रयाणाम् लोकानाम् चूडामणिर् इवामलः

39 गम्भीर वेगो ऽनिमिषम् ज्योतिषाम् चक्र माहितम्

यस्मिन् भ्रमति कौरव्य मेढ्यामिव गवाम् गणः

40 महिमानम् विलोक्यास्य नारदो भगवान् ऋषिः

आतोद्यम् वितुदन् श्लोकान् सत्रे ऽगायत् प्रचेतसाम्

41 नारद उवाच

नूनम् सुनीतेः पति देवतायाः तपः प्रभावस्य सुतस्य ताम् गतिम्

दृष्ट् वाभ्यु पायान् अपि वेद वादिनो नैवाधि गन्तुम् प्रभवन्ति किम् नृपाः

42 यः पञ्च वर्षो गुरु दार वाक्षरैः भिन्नेन यातो हृदयेन दूयता

वनम् मद् आदेश करो ऽजितम् प्रभुम् जिगाय तद् भक्त गुणैः पराजितम्

43 यः क्षत्र बन्धुः भुवि तस् याधिरूढम् अन्वारु रुक्षेद् अपि वर्षपूगैः

षट् पञ्च वर्षो यद् अहोभिर् अल्पैः प्रसाद्य वैकुण्ठम् अवाप तत् पदम्

44 मैत्रेय उवाच

एतत्ते ऽभिहितम् सर्वम् यत्पृष्टो ऽहम् इह त्वया

ध्रुवस् योद्दाम यशसः चरितम् सम्मतम् सताम्

45 धन्यम् यशस्यम् आयुष्यम् पुण्यम् स्वस्त्ययनम् महत्

स्वर्ग्यम् ध्रौव्यम् सौमनस्यम् प्रशस्यम् अघमर्षणम्

46 श्रुत्वैतत् छ्रद्धया भीक्ष्णम् अच्युत प्रिय चेष्टितम्

भवेद् भक्तिः भगवति यया स्यात् क्लेश सङ्क्षयः

47 महत्त्वम् इच्छताम् तीर्थम् श्रोतुः शीलादयो गुणाः

यत्र तेजस् तदिच् छूनाम् मानो यत्र मनस्विनाम्

48 प्रयतः कीर्तयेत् प्रातः समवाये द्विजन् मनाम्

सायम् च पुण्य श्लोकस्य ध्रुवस्य चरितम् महत्

49 पौर्णमास्याम् सिनीवाल्याम् द्वादश्याम् श्रवणे ऽथवा

दिनक्षये व्यती पाते सङ्क्रमे ऽर्कदिने ऽपि वा

50 श्रावयेच् छ्रद्द धानानाम् तीर्थ पाद पदाश्रयः

नेच्छन्स् तत्रात्मन् आत्मानम् सन्तुष्ट इति सिध्यति

51 ज्ञानम् अज्ञात तत्त्वाय यो दद्यात् सत्पथे ऽमृतम्

कृपालोः दीन नाथस्य देवास् तस् यानुगृह्णते

52 इदम् मया ते ऽभिहितम् कुरूद्वह ध्रुवस्य विख्यात विशुद्ध कर्मणः

हित्वार्भकः क्रीडन कानि मातुः गृहम् च विष्णुम् शरणम् यो जगाम

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

चतुर्थ्थ स्कन्दे द्वा दशो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

अथ चतुर्थ्थ स्कन्दः त्रयो दशो ऽध्याय :

स्कन्द- 04: अध्याय- 13

01 सूत उवाच

निशम्य कौषार विणोप वर्णितम् ध्रुवस्य वैकुण्ठ पदाधि रोहणम्
प्ररूढ भावो भगवत् यधोक्षजे प्रष्टुम् पुनस्तम् विदुरः प्रचक्रमे

02 विदुर उवाच
के ते प्रचेतसो नाम कस्या पत्यानि सुव्रत
कस्यान् ववाये प्रख्याताः कुत्र वा सत्र मासत

03 मन्ये महा भागवतम् नारदम् देव दर्शनम्
येन प्रोक्तः क्रियायोगः परिचर्या विधिर् हरेः

04 स्वधर्म शीलैः पुरुषैर् भगवान् यज्ञ पूरुषः
इज्यमानो भक्ति मता नारदे नेरितः किल

05 यास्ता देवर्षिणा तत्र वर्णिता भगवत् कथाः
मह्यम् शुश्रूषवे ब्रह्मन् कात्स्न्र्येन् आचष्टुम् अर्हसि

06 मैत्रेय उवाच
ध्रुवस्य चोत्कलः पुत्रः पितरि प्रस्थिते वनम्
सार्व भौम श्रियम् नैच्छद् अधि राजासनम् पितुः

07 स जन्मनोप शान्त् आत्मा निः सङ्ग सम दर्शनः
ददर्श लोके विततम् आत्मानम् लोकम् आत्मनि

08 आत्मानम् ब्रह्म निर्वाणम् प्रत्यस्तम् इत विग्रहम्
अवबोध रसै कात्म्यम् आनन्दम् अनुसन्ततम्

09 अव्यवच् छिन्न योगाग्नि दग्ध कर्म मलाशयः
स्वरूपम् अवरुन्धानो नात्मनो ऽन्यम् तद् ऐक्षत

10 जडान्ध बधिरो *[उ]*न्मत्त मूका कृतिर् अतन्मतिः
लक्षितः पथि बालानाम् प्रशान्त् आर्चिर् इवानलः

11 मत्वा तम् जडम् उन्मत्तम् कुल वृद्धाः समन्त्रिणः
वत्सरम् भूपतिम् चक्रुः यवीयाम्सम् भ्रमेः सुतम्

12 स्ववींथिः वत्सरस् येष्टा भार्या सूत षडात्मजान्
पुष्पार्णम् तिग्म केतुम् च इषम् ऊर्जम् वसुम् जयम्

13 पुष्पार्णस्य प्रभा भार्या दोषा चद्वे बभूवतुः

प्रातर् मध्यन्दिनम् सायम् इति ह्यासन् प्रभासुताः

14 प्रदोषो निशिथो व्युष्ट इति दोषा सुतास्त्रयः

व्युष्टः सुतम् पुष्करिण्याम् सर्व तेजस मादधे

15 स चक्षुः सुतम् आकूत्याम् पत्न्याम् मनुम् अवाप ह

मनो रसूत महिषी विरजान् नड्वला सुतान्

16 पुरुम् कुत्सम् त्रितम् द्युम्नम् सत्यवन्तम् ऋतम् व्रतम्

अग्निष्टोमम् अतीर् आत्रम् प्रद्युम्नम् शिबिम् उल्मुकम्

17 उल्मुको ऽजनयत् पुत्रान् पुष्करिण्याम् षडुत्तमान्

अङ्गम् सुमनसम् ख्यातिम् क्रतुम् अङ्गिरसम् गयम्

18 सुनीथ् आङ्गस्य या पत्नी सुषुवे वेनम् उल्बणम्

यद्दौः शील्यात्स राजरुषिः निर्विण्णो निरगात् पुरात्

19 यमङ्ग शेपुः कुपिता वाग् वज्रा मुनयः किल

गतासोस् तस्य भूयस्ते ममन्थुः दक्षिणम् करम्

20 अराजके तदा लोके दस्युभिः पीडिताः प्रजाः

जातो नारायण् आम्शेन पृथुराद्यः क्षितीश्वरः

21 विदुर उवाच

तस्य शीलनिधेः साधोः ब्रह्मण्यस्य महात्मनः

राज्ञः कथम् अभूद् दुष्टा प्रजा यद् विमना ययौ

22 किम् वाम्हो वेन उद्दिश्य ब्रह्म दण्डम् अयूयुजन्

दण्ड व्रत धरे राज्ञि मुनयो धर्म कोविदाः

23 नावध्येयः प्रजापालः प्रजाभिर् अघवान् अपि

यदसौ लोक पालानाम् बिभर्त्योजः स्व तेजसा

24 एतद् आख्याहि मे ब्रह्मन् सुनीथ् आत्मज चेष्टितम्

श्रद्द धानाय भक्ताय त्वम् परावर वित्तमः

25 मैत्रेय उवाच

अङ्गो ऽश्वमेधम् राजरुषि: आजहार महा क्रतुम्

नाजग्मुर् देवतास् तस्मिन् आहूता ब्रह्म वादिभि:

26 तमूचुर् विस्मितास् तत्र यजमानम् अथर्त्विज:

हवीम्षि हूय मानानि न ते गृह्णन्ति देवता:

27 राजन् हवीम्ष्य् दुष्टानि श्रद्धया सादितानि ते

छन्दाम्स् ययात यामानि योजितानि धृत व्रतै:

28 न विदामेह देवानाम् हेलनम् वयम् अण्वपि

यन्न गृह्णन्ति भागान् स्वान् ये देवा: कर्म साक्षिण:

29 मैत्रेय उवाच

अङ्गो द्विजवच: श्रुत्वा यजमान: सु दुर्मना:

तत् प्रष्टुम् व्यसृजद् वाचम् सदस्याम्स् तद् अनुज्ञया

30 नागच्छन्त् याहुता देवा न गृह्णन्ति ग्रहानिह

सदसस् पतयो ब्रूत किम् अवद्यम् मया कृतम्

31 सदसस् पतय ऊचु:

नरदेवेह भवतो नाघम् तावन् मनाक्स्थितम्

अस्त्येकम् प्राक्तन मघम् यदिहे दृक्त्व मप्रज:

32 तथा साधय भद्रम् ते आत्मानम् सुप्रजम् नृप

इष्टस्ते पुत्र कामस्य पुत्रम् दास्यति यज्ञभुक्

33 तथा स्व भाग धेयानि ग्रहीष्यन्ति दिवौकस:

यद् यज्ञ पुरुष: साक्षाद् अपत्याय हरिर् वृत:

34 ताम्स्तान् कामान् हरिर् दद्याद् यान्यान् कामयते जन:

आराधितो तथैवैष यथा पुम्साम् फलोदय:

35 इति व्यवसिता विप्रा: तस्य राज्ञ: प्रजातये

पुरोडाशम् निरवपन् शिपि विष्टाय विष्णवे

36 तस्मात् पुरुष उत्तस्थौ हेममाल् यमलाम्बर:

हिरण्मयेन पात्रेण सिद्ध मादाय पायसम्

37 स विप्रानु मतो राजा गृहीत् वाञ्जलि नौदनम्

अवघ्राय मुदा युक्तः प्रादात् पत्न्या उदारधीः

38 सा तत् पुम्सवनम् राज्ञी प्राश्य वै पत्युर् आदधे

गर्भम् काल उपावृत्ते कुमारम् सुषुवे ऽप्रजा

39 स बाल एव पुरुषो मातामहम् अनुव्रतः

अधर्माम् शोद्भवम् मृत्युम् तेना भवद् अधार्मिकः

40 स शरासनम् उद्यम्य मृगयुः वन गोचरः

हन्त्य साधुः मृगान् दीनान् वेनो ऽसौ इत्य रौज्जनः

41 आक्रीडे क्रीडतो बालान् वयस्यान् अति दारुणः

प्रसह्य निरनुक्रोशः पशुमारम् अमारयत्

42 तम् विचक्ष्य खलम् पुत्रम् शासनैः विविधैर् नृपः

यदा न शासितुम् कल्पो भृशम् आसीत्ः उदुर्मनाः

43 प्रायेणाभ् यर्चितो देवो ये ऽप्रजा गृहमेधिनः

कदपत्य भृतम् दुःखम् ये न विन्दन्ति दुर्भरम्

44 यतः पापी यसी कीर्तिः अधर्मश् च महान् नृणाम्

यतो विरोधः सर्वेषाम् यत आधिः अनन्तकः

45 कस्तम् प्रजापदेशम् वै मोह बन्धनम् आत्मनः

पण्डितो बहु मन्येत यदर्थाः क्लेशदा गृहाः

46 कदपत्यम् वरम् मन्ये सद पत्याच् छुचाम् पदात्

निर्विद्येत गृहान् मर्त्यो यत् क्लेश निवहा गृहाः

47 एवम् स निर्विण्ण मना नृपो गृहात् निशीथ उत्थाय महोदयो दयात्

अलब्ध निद्रो ऽनुप लक्षितो नृभिः हित्वा गतो वेनसुवम् प्रसुप्ताम्

48 विज्ञाय निर्विद्य गतम् पतिम् प्रजाः पुरोहिताम् आत्य सुहृद् गणादयः

विचिक्युः उर्व्याम् अति शोक कातरा यथा निगूढम् पुरुषम् कुयोगिनः

49 अलक्ष यन्तः पदवीम् प्रजापतेः हतोद्यमाः प्रत्युप सृत्य ते पुरीम्

ऋषीन् समेतान् अभिवन्द्य साश्रवो न्यवेदयन् पौरव भर्तृ विप्लवम्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

चतुर्थ्थ स्कन्दे त्रयो दशो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

अथ चतुर्थ्थ स्कन्द: चतुर् दशो ऽध्याय :

स्कन्द- *04:* अध्याय- *14*

*01* मैत्रेय उवाच

भृग्वाद यस्ते मुनयो लोकानाम् क्षेम दर्शिन:

गोप्तर्य सति वै न्ऋृणाम् पश्यन्त: पशुसाम् यताम्

*02* वीर मातर माहूय सुनीथाम् ब्रह्म वादिन:

प्रकृत्य सम्मतम् वेनम् अभ्यषिञ्चन् पतिम् भुव:

*03* श्रुत्वा नृपासन गतम् वेनम् अत्युग्र शासनम्

निलिल्यु: दस्यव: सद्य: सर्प त्रस्ता इवाखव:

*04* स आरूढ नृपस्थान उन्नद्धो ऽष्ट विभूतिभि:

अवमेने महा भागान् स्तब्ध: सम्भावित: स्वत:

*05* एवम् मदान्ध उत्सिक्तो निरङ्कुश इव द्विप:

पर्यटन् रथम् आस्थाय कम्पयन् इव रोदसी

*06* न यष्टव्यम् न दातव्यम् न होतव्यम् द्विजा: क्वचित्

इति न्यवारयद् धर्मम् भेरी घोषेण सर्वश:

*07* वेनस् यावेक्ष्य मुनयो दुर् वृत्तस्य विचेष्टितम्

विमृश्य लोक व्यसनम् कृपयोचु: स्म सत्रिण:

*08* अहो उभयत: प्राप्तम् लोकस्य व्यसनम् महत्

दारुण् युभयतो दीप्त इव तस्कर पालयो:

09 अराजक भया देष कृतो राजा त दर्हण:

ततो ऽप्यासीद् भयम् त्वद्य कथम् स्यात् स्वस्ति देहिनाम्

10 अहेरिव पय: पोष: पोषकस्यापि अनर्थभृत्

वेन: प्रकृत्यैव खल: सुनीथा गर्भ सम्भव:

11 निरूपित: प्रजापाल: स जिघाम् सति वै प्रजा:

तथापि सान्त्वये मामुम् नास्माम्स् तत् पातकम् स्पृशेत्

12 तद् विद्वद्भि: असद्वृत्तो वेनो ऽस्माभि: कृतो नृप:

सान्त्वितो यदि नो वाचम् न ग्रहीष्यति अधर्मकृत्

13 लोकधिक्कार सन्दग्धम् दहिष्याम: स्व तेजसा

एवम् अध्यवसा यैनम् मुनयो गूढ मन्यव:

उपव्रज्या ब्रुवन् वेनम् सान्त्व यित्वा च सामभि:

14 मुनय ऊचु:

नृपवर्य निबोधैतद् यत्ते विज्ञापयाम भो:

आयु: श्री बल कीर्तीनाम् तव तात विवर्धनम्

15 धर्म आचरित: पुम्साम् वाङ्मन: काय बुद्धिभि:

लोकान् विशोकान् वितरति अथानन्त्यम् असङ्गिनाम्

16 स ते मा विनशेद् वीर प्रजानाम् क्षेम लक्षण:

यस्मिन् विनष्टे नृपति: ऐश्वर्याद् अवरोहति

17 राजन् असाध्व मात्येभ्य: चोरादिभ्य: प्रजा नृप:

रक्षन् यथा बलिम् गृह्णन् इह प्रेत्य च मोदते

18 यस्य राष्ट्रे पुरे चैव भगवान् यज्ञ पूरुष:

इज्यते स्वेन धर्मेण जनै: वर्णाश्रमान् वितै:

19 तस्य राज्ञो महा भाग भगवान् भूत भावन:

परितुष्यति विश्वात्मा तिष्ठतो निज शासने

20 तस्मिन् तुष्टे किमप्राप्यम् जगताम् ईश्वरेश्वरे

लोकाः सपाला ह्येतस्मै हरन्ति बलि मादृताः

21 तम् सर्व लोकामर यज्ञ सङ्ग्रहम् त्रयीमयम् द्रव्यमयम् तपोमयम्

यज्ञैः विचित्रैर् यजतो भवाय ते राजन् स्व देशान् अनुरोद्धु मर्हसि

22 यज्ञेन युष्मद् विषये द्विजातिभिः विताय मानेन सुराः कला हरेः

स्विष्टाः सुतुष्टाः प्रदिशन्ति वाञ्छितम् तद् हेलनम् नार्हसि वीर चेष्टितुम्

23 वेन उवाच

बालिशा बत यूयम् वा अधर्मे धर्म मानिनः

ये वृत्तिदम् पतिम् हित्वा जारम् पतिम् उपासते

24 अव जानन्त्यमी मूढा नृप रूपिणम् ईश्वरम्

नानु विन्दन्ति ते भद्रम् इह लोके परत्र च

25 को यज्ञ पुरुषो नाम यत्र वो भक्ति रीदृशी

भर्तृ स्नेह विदूराणाम् यथा जारे कुयोषिताम्

26 विष्णुर् विरिञ्चो गिरिश इन्द्रो वायुर् यमो रविः

पर्जन्यो धनदः सोमः क्षितिर् अग्निर् अपाम्पतिः

27 एते चान्ये च विबुधाः प्रभवो वर शापयोः

देहे भवन्ति नृपतेः सर्व देव मयो नृपः

28 तस्मान् माम् कर्मभिर् विप्रा यजध्वम् गत मत्सराः

बलिम् च मह्यम् हरत मत्तो ऽन्यः को ऽग्र भुक्पुमान्

29 मैत्रेय उवाच

इत्थम् विपर्यय मतिः पापीयान् उत्पथम् गतः

अनुनीय मानस् तद् याच्ञाम् न चक्रे भ्रष्ट मङ्गळः

30 इति ते ऽसत् कृतास्तेन द्विजाः पण्डित मानिना

भग्नायाम् भव्य याच्ञायाम् तस्मै विदुर चुक्रुधुः

31 हन्यताम् हन्यताम् एष पापः प्रकृति दारुणः

जीवन् जगद् असावाशु कुरुते भस्म साद्ध्रुवम्

32 नायम् अर्हत्य सद् वृत्तो नरदेव वरासनम्

यो ऽधि यज्ञपतिम् विष्णुम् विनिन्दति अनपत्रपः

33 को वैनम् परिचक्षीत वेनमेक मृते ऽशुभम्

प्राप्त ईदृशम् ऐश्वर्यम् यद् अनुग्रह भाजनः

34 इत्थम् व्यवसिता हन्तुम् ऋषयो रूढ मन्यवः

निजघ्नुः हुङ्कृतैर् वेनम् हतम् अच्युत निन्दया

35 ऋषिभिः स्वाश्रम पदम् गते पुत्र कळेवरम्

सुनीथा पालया मास विद्या योगेन शोचती

36 एकदा मुनयस्ते तु सरस्वत् सलिलाप्लुताः

हुत् वाग्नीन् सत्कथाश् चक्रुः उपविष्टाः सरित्तटे

37 वीक्ष् योत्थिताम्स् तदो [उ]त्पातान् आहुर् लोक भयङ्करान्

अप्य भद्रम् अनाथाया दस्युभ्यो न भवेद् भुवः

38 एवम् मृशन्त ऋषयो धावताम् सर्वतो दिशम्

पाम्सुः समुत्थितो भूरिः चोराणाम् अभिलुम्पताम्

39 तद् उपद्रवम् आज्ञाय लोकस्य वसु लुम्पताम्

भर्तर् युपरते तस्मिन् अन्योन्यम् च जिघाम् सताम्

40 चोरप्रायम् जनपदम् हीन सत्त्वम् अराजकम्

लोकान् नावारयञ् छक्ता अपि तद् दोष दर्शिनः

41 ब्राह्मणः सम दृक्षान्तो दीनानाम् सम् उपेक्षकः

स्रवते ब्रह्म तस्यापि भिन्न भाण्डात् पयो यथा

42 नाङ्गस्य वम्शो राजरुषेः एष सम्स्थातु मर्हति

अमोघवीर्या हि नृपा वम्शे ऽस्मिन् केशव् आश्रयाः

43 विनिश्चित् यैवम् ऋषयो विपन्नस्य महीपतेः

ममन्थु रूरुम् तरसा तत् रासीद् बाहुको नरः

44 काक कृष्णो ऽति ह्रस्वाङ्गो ह्रस्वबाहुर् महाहनुः

ह्रस्वपान् निम्न नासाग्रो रक्ताक्षः ताम्र मूर्धजः

45 तम् तु ते ऽवनतम् दीनम् किम् करोमीति वादिनम्

निषीदेत् यब्रुवम्स् तात स निषादः ततो ऽभवत्

46 तस्य वम्श्यास्तु नैषादा गिरि कानन गोचराः

येनाहरज् जायमानो वेन कल्मषम् उल्बणम्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

चतुर्थ्थ स्कन्दे चतुर् दशो ऽध्याय ः||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

अथ चतुर्थ्थ स्कन्दः पञ्च दशो ऽध्याय :

स्कन्द- 04: अध्याय- 15

01 मैत्रेय उवाच

अथ तस्य पुनर् विप्रैः अपुत्रस्य महीपतेः

बाहुभ्याम् मथ्य मानाभ्याम् मिथुनम् सम पद्यत

02 तद् दृष्ट्वा मिथुनम् जातम् ऋषयो ब्रह्म वादिनः

ऊचुः परम सन्तुष्टा विदित्वा भगवत् कलाम्

03 ऋषय ऊचुः

एष विष्णोर् भगवतः कला भुवन पालिनी

इयम् च लक्ष्म्याः सम्भूतिः पुरुषस् यानपायिनी

04 अयम् तु प्रथमो राज्ञाम् पुमान् प्रथयिता यशः

पृथुर् नाम महाराजो भविष्यति पृथुश्रवाः

05 इयम् च सुदती देवी गुण भूषण भूषणा

अर्चिर् नाम वरारोहा पृथुम् एवा वरुन्धती

06 एष साक्षाद् हरेर् अम्शो जातो लोक रिरक्षया

इयम् च तत् परा हि श्रीः अनुजज्ञे ऽनपायिनी

07 मैत्रेय उवाच

प्रशम् सन्ति स्म तम् विप्रा गन्धर्व प्रवरा जगुः

मुमुचुः सु मनोधाराः सिद्धा नृत्यन्ति स्वःस्त्रियः

08 शङ्ख तूर्य मृदङ् गाद्या नेदुर् दुन्दुभयो दिवि

तत्र सर्व उपाजग्मुः देवर्षि पित्ऋणाम् गणाः

09 ब्रह्मा जगद्गुरुर् देवैः सहा सृत्य सुरेश्वरैः

वैन्यस्य दक्षिणे हस्ते दृष्ट्वा चिह्नम् गदाभृतः

10 पादयोर् अरविन्दम् च तम् वै मेने हरेः कलाम्

यस्या प्रतिहतम् चक्रम् अम्शः स परमेष्ठिनः

11 तस् याभिषेक आरब्धो ब्राह्मणैः ब्रह्म वादिभिः

आभिषेच निकान् यस्मै आजहुः सर्वतो जनाः

12 सरित् समुद्रा गिरयो नागा गावः खगा मृगाः

द्यौः क्षितिः सर्व भूतानि समाजहुर् उपायनम्

13 सो ऽभिषिक्तो महाराजः सुवासाः साध् वलङ्कृतः

पत्न् यार्चिष् आलङ्कृतया विरेजे ऽग्निर् इवापरः

14 तस्मै जहार धनदो हैमम् वीर वरासनम्

वरुणः सलिलस्रावम् आतपत्रम् शशि प्रभम्

15 वायुश् च वाल व्यजने धर्मः कीर्ति मयीम् स्रजम्

इन्द्रः किरीटम् उत्कृष्टम् दण्डम् सम् यमनम् यमः

16 ब्रह्मा ब्रह्ममयम् वर्म भारती हारम् उत्तमम्

हरिः सुदर्शनम् चक्रम् तत् पत्न् यव्याहताम् श्रियम्

17 दश चन्द्र मसिम् रुद्रः शत चन्द्रम् तथ् आम्बिका

सोमो ऽमृत मया नश्वान् त्वष्टा रूपाश्रयम् रथम्

18 अग्निर् आजगवम् चापम् सूर्यो रश्मि मयानिषून्

भूः पादुके योगमय्यौ द्यौः पुष्पावलिम् अन्वहम्

19 नाट्यम् सुगीतम् वादित्रम् अन्तर्धानम् च खेचरा:

ऋषयश् चाशिष: सत्या: समुद्र: शङ्खम् आत्मजम्

20 सिन्धव: पर्वता नद्यो रथ वीथीर् महात्मन:

सूतो ऽथ मागधो वन्दी तम् स्तोतुम् उपतस्थिरे

21 स्तावकाम् स्तान् अभिप्रेत्य पृथुर् वैन्य: प्रतापवान्

मेघ निर्ह्लादया वाचा प्रहसन् इदम् अब्रवीत्

22 पृथुर् उवाच

भो: सूत हे मागध सौम्य वन्दिन् लोके ऽधुनास् पष्ट गुणस्य मे स्यात्

किमाश्रयो मे स्तव एष योज्यताम् मा मय्य भूवन् वितथा गिरो व:

23 तस्मात् परोक्षे ऽस्मद् उपश्रुत् आन्यलम् करिष्यथ स्तोत्रम् अपीच्य वाच:

सत् युत्तम श्लोक गुणानु वादे जुगुप्सितम् न स्तवयन्ति सभ्या:

24 महद् गुणान् आत्मनि कर्तुमीश: क: स्तावकै: स्तावयते ऽसतो ऽपि

ते ऽस्या भविष्यन् इति विप्रलब्धो जनावहासम् कुमतिर् न वेद

25 प्रभवो ह्यात्मन: स्तोत्रम् जुगुप्सन्त् यपि विश्रुता:

ह्रीमन्त: परमोदारा: पौरुषम् वा विगर्हितम्

26 वयम् तु अविदिता लोके सूताद् यापि वरीमभि:

कर्मभि: कथम् आत्मानम् गाप यिष्याम बालवत्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

चतुर्थ्थ स्कन्दे पञ्च दशो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

अथ चतुर्थ्थ स्कन्द: षोडशो ऽध्याय :

*01* मैत्रेय उवाच

इति ब्रुवाणम् नृपतिम् गायका मुनि चोदिता:

तुष्टुवुस् तुष्ट मनस: तद् वाग् अमृत सेवया

*02* नालम् वयम् ते महिमानु वर्णने यो देव वर्यो ऽवत तार मायया

वेनाङ्ग जातस्य च पौरुषाणि ते वाचस्पती नाम् अपि बभ्र मुर्धिय:

*03* अथाप् युदार श्रवस: पृथोर् हरे: कला ऽवतारस्य कथामृता दृता:

यथोप देशम् मुनिभि: प्रचोदिता: श्लाघ्यानि कर्माणि वयम् वितन्महि

*04* एष धर्म भृताम् श्रेष्ठो लोकम् धर्मे ऽनुवर्तयन्

गोप्ता च धर्म सेतूनाम् शास्ता तत् परि पन्थिनाम्

*05* एष वै लोक पालानाम् बिभर्त् येकस्तनौ तनू:

काले काले यथा भागम् लोक योरुभ योर्हितम्

*06* वसु काल उपादत्ते काले चायम् विमुञ्चति

समः सर्वेषु भूतेषु प्रतपन् सूर्य वद्विभु:

*07* तिति क्षत्य क्रमम् वैन्य उपर्या क्रमताम् अपि

भूतानाम् करुण: शश्वद् आर्तानाम् क्षिति वृत्तिमान्

*08* देवे ऽवर्षत्य सौ देवो नर देव वपुर् हरि:

कृच्छ्र प्राणा: प्रजा ह्येष रक्षिष्यति अञ्ज सेन्द्रवत्

*09* आप्याय यत्य सौ लोकम् वदन् आमृत मूर्तिना

सानु रागाव लोकेन विशद स्मित चारुणा

*10* अव्यक्त वर्त्मैष निगूढ कार्यो गम्भीर वेधा उपगुप्त वित्त:

अनन्त माहात्म्य गुणै कधामा पृथु: प्रचेता इव सम्वृत् आत्मा

*11* दुरासदो दुर्विषह आसन्नो ऽपि विदूरवत्

नैवाभि भवितुम् शक्यो वेनारण् युत्थितो ऽनल:

*12* अन्तर्बहिश् च भूतानाम् पश्यन् कर्माणि चारणै:

उदासीन इवाध् यक्षो वायुर् आत्मेव देहिनाम्

13 नादण्ड्यम् दण्डयत् येष सुतम् आत्म द्विषामपि

दण्डयति आत्मजम् अपि दण्ड्यम् धर्मपथे स्थितः

14 अस्या प्रतिहतम् चक्रम् पृथोर् आमान साचलात्

वर्तते भगवान् अर्को यावत् तपति गोगणैः

15 रञ्ज यिष्यति यल्लोकम् अयम् आत्म विचेष्टितैः

अथा मुमाहू राजानम् मनो रञ्जन कैः प्रजाः

16 दृढव्रतः सत्य सन्धो ब्रह्मण्यो वृद्ध सेवकः

शरण्यः सर्व भूतानाम् मानदो दीन वत्सलः

17 मातृ भक्तिः पर स्त्रीषु पत्न्याम् अर्ध इवात्मनः

प्रजासु पितृवत् स्निग्धः किङ्करो ब्रह्म वादिनाम्

18 देहिनाम् आत्मवत् प्रेष्ठः सुहृदाम् नन्दि वर्धनः

मुक्त सङ्ग प्रसङ्गो ऽयम् दण्डपाणिः असाधुषु

19 अयम् तु साक्षाद् भगवाम्स् त्र्यधीशः कूटस्थ आत्मा कलयाव तीर्णः

यस्मिन् अविद्या रचितम् निरर्थकम् पश्यन्ति नानात्वम् अपि प्रतीतम्

20 अयम् भुवो मण्डल मोदयाद्रेः गोप्तैक वीरो नरदेव नाथः

आस्थाय जैत्रम् रथम् आत्त चापः पर्यस्यते दक्षिणतो यथार्कः

21 अस्मै नृपालाः किल तत्र तत्र बलिम् हरिष्यन्ति स लोकपालाः

मम्स्यन्त एषाम् स्त्रिय आदिराजम् चक्रायुधम् तद् यश उद्धरन्त्यः

22 अयम् महीम् गाम् दुदुहे ऽधिराजः प्रजापतिः वृत्ति करः प्रजानाम्

यो लीलया द्रीन् स्वशरास कोट्या भिन्दन् समाम् गाम् अकरोद् यथेन्द्रः

23 विस्फूर्जयन् आजगवम् धनुः स्वयम् यदा चरत् क्ष्माम् अविषह्य माजौ

तदा निलिल्युः दिशि दिश्य सन्तो लाङ्गूल मुद्यम्य यथा मृगेन्द्रः

24 एषो ऽश्वमेधात्र् शतमाज हार सरस्वती प्रादुर् अभावि यत्र

अहार्षीद् यस्य हयम् पुरन्दरः शत क्रतुश् चरमे वर्तमाने

25 एष स्व सद्मोप वने समेत्य सनत् कुमारम् भगवन्तम् एकम्

आराध्य भक्त्या लभत् आमलम् तत् ज्ञानम् यतो ब्रह्म परम् विदन्ति

26 तत्र तत्र गिरस् तास्ता इति विश्रुत विक्रम:

श्रोष्यति आत्मा श्रिता गाथा: पृथु: पृथु पराक्रम:

27 दिशो विजित्या प्रति रुद्ध चक्र: स्व तेजसोत् पाटित लोकशल्य:

सुरा सुरेन्द्रै: उपगीय मान महानु भावो भविता पतिर् भुव:

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

चतुर्थ्थ स्कन्दे षोडशो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

अथ चतुर्थ्थ स्कन्द: सप्त दशो ऽध्याय :

स्कन्द- 04: अध्याय- 17

01 मैत्रेय उवाच

एवम् स भगवान् वैन्य: ख्यापितो गुण कर्मभि:

छन्दया मास तान् कामै: प्रति पूज्याभि नन्द्य च

02 ब्राह्मण प्रमुखान् वर्णान् भृत्या मात्य पुरोधस:

पौरान् जानपदान् श्रेणी: प्रकृती: सम पूजयत्

03 विदुर उवाच

कस्माद् दधार गोरूपम् धरित्री बहु रूपिणी

याम् दुदोह पृथुस् तत्र को वत्सो दोहनम् च किम्

04 प्रकृत्या विषमा देवी कृता तेन समा कथम्

तस्य मेध्यम् हयम् देव: कस्य हेतोर् अपाहरत्

05 सनत् कुमाराद् भगवतो ब्रह्मन् ब्रह्म विदुत् तमात्

लब्ध्वा ज्ञानम् सविज्ञानम् राजरुषि: काम् गतिम् गत:

06 यच् चान्यद् अपि कृष्णस्य भवान् भगवतः प्रभोः

श्रवः सुश्रवसः पुण्यम् पूर्व देह कथाश्रयम्

07 भक्ताय मे ऽनु रक्ताय तव चाधोक्षजस् य च

वक्तु मर्हसि यो ऽदुह्यद् वैन्य रूपेण गामिमाम्

08 सूत उवाच

चोदितो विदुरेणैवम् वासुदेव कथाम् प्रति

प्रशस्य तम् प्रीतमना मैत्रेयः प्रत्य भाषत

09 मैत्रेय उवाच

यद् आभिषिक्तः पृथुरङ्ग विप्रैः आमन्त्रितो जनत् आयाश् च पालः

प्रजा निरन्ने क्षितिपृष्ठ एत्य क्षुत् क्षाम देहाः पति मभ्य वोचन्

10 वयम् राजन् जाठरेणाभि तप्ता यथ् आग्निना कोटरस् थेन वृक्षाः

त्वाम् अद्य याताः शरणम् शरण्यम् यः साधितो वृत्तिकरः पतिर् नः

11 तन्नो भवान् ईहतु रातवे ऽन्नम् क्षुधार्दि तानाम् नरदेव देव

यावन्न नङ्क्ष्यामह उज्झि तोर्जा वार्ता पतिस्त्वम् किल लोकपालः

12 मैत्रेय उवाच

पृथुः प्रजानाम् करुणम् निशम्य परि देवितम्

दीर्घम् दध्यौ कुरु श्रेष्ठ निमित्तम् सो ऽन्व पद्यत

13 इति व्यवसितो बुद्ध्या प्रगृहीत शरासनः

सन्दधे विशिखम् भूमेः क्रुद्धस् त्रिपुरहा यथा

14 प्रवेपमाना धरणी निशाम्योद् आयुधम् च तम्

गौः सत्य पाद्र वद् भीता मृगीव मृग युद्रुता

15 ताम् अन्वधावत् तद् वैन्यः कुपितो ऽत् यरुणे क्षणः

शरम् धनुषि सन्धाय यत्र यत्र पलायते

16 सा दिशो विदिशो देवी रोदसी चान्तरम् तयोः

धावन्ती तत्र तत्रैनम् ददर्शा नूद्य तायुधम्

17 लोके नाविन्द तत्राणम् वैन्यान् मृत्योर् इव प्रजाः

त्रस्ता तदा निव वृते ह्रदयेन विदूयता

18 उवाच च महा भागम् धर्म ज्ञापन्न वत्सल

त्राहि माम् अपि भूतानाम् पालने ऽवस्थितो भवान्

19 स त्वम् जिघाम्ससे कस्माद् दीनाम् अकृत किल्बिषाम्

अहनिष्यत् कथम् योषाम् धर्मज्ञ इति यो मतः

20 प्रहरन्ति न वै स्त्रीषु कृतागः स्वपि जन्तवः

किमुत त्वद् विधा राजन् करुणा दीन वत्सलाः

21 माम् विपाट्या जराम् नावम् यत्र विश्वम् प्रतिष्ठितम्

आत्मानम् च प्रजाश् चेमाः कथम् अम्भसि धास्यसि

22 पृथुर् उवाच

वसुधे त्वाम् वधिष्यामि मच् छासन पराङ् मुखीम्

भागम् बर्हिषि या वृङ्क्ते न तनोति च नो वसु

23 यवसम् जग्ध् यनुदिनम् नैव दोग्ध्य उध सम्पयः

तस्याम् एवम् हि दुष्टायाम् दण्डो नात्र न शस्यते

24 त्वम् खल् वोषधि बीजानि प्राक्सृष्टानि स्वयम् भुवा

न मुञ्चसि आत्म रुद्धानि माम वज्ञाय मन्दधीः

25 अमूषाम् क्षुत् परीतानाम् आर्तानाम् परि देवितम्

शमयिष्यामि मद् बाणैः भिन्नायास् तव मेदसा

26 पुमान् योषिद् उत क्लीब आत्म सम्भावनो ऽधमः

भूतेषु निरनुक्रोशो नृपाणाम् तद् वधो ऽवधः

27 त्वाम् स्तब्धाम् दुर् मदाम् नीत्वा मायागाम् तिलशः शरैः

आत्म योग बलेनेमा धारयिष्याम् यहम् प्रजाः

28 एवम् मन्युमयीम् मूर्तिम् कृतान्तम् इव बिभ्रतम्

प्रणता प्राञ्जलिः प्राह मही सञ्जात वेपथुः

29 धरो उवाच

नमः परस्मै पुरुषाय मायया विन्यस्त नाना तनवे गुणात्मने

नमः स्वरूपानु भवेन निर्धुत द्रव्य क्रिया कारक विभ्र मोर्मये

30 येनाहम् आत्माय तनम् विनिर्मिता धात्रा यतो ऽयम् गुण सर्ग सङ्ग्रहः

स एव माम् हन्तुम् उदायुधः स्वराड् उपस्थितो ऽन्यम् शरणम् कमाश्रये

31 य एतद् आदौ असृजच् चराचरम् स्व माय यात्मा श्रयया ऽवितर्क्यया

तयैव सो ऽयम् किल गोप्तु मुद्यतः कथम् नु माम् धर्मपरो जिघाम्सति

32 नूनम् बतेशस्य समीहितम् जनैः तन् मायया दुर् जयया कृतात्मभिः

न लक्ष्यते यस् त्वकरोद् अकारयद् यो ऽनेक एकः परतश् च ईश्वरः

33 सर्गादि यो ऽस्यानु रुणद्धि शक्तिभिः द्रव्य क्रिया कारक चेतन् आत्मभिः

तस्मै समुन् नद्ध निरुद्ध शक्तये नमः परस्मै पुरुषाय वेधसे

34 स वै भवान् आत्म विनिर्मितम् जगद् भूतेन्द्रि यान्तः करणात्मकम् विभो

सम्स्थाप यिष्यन् अज माम् रसातलाद् अभ्युज्ज हाराम्भस आदि सूकरः

35 अपाम् उपस्थे मयि नाव्य वस्थिताः प्रजा भवान् अद्य रिरक्षिषुः किल

स वीर मूर्तिः समभूद् धराधरो यो माम् पयस् युग्रशरो जिघाम्ससि

36 नूनम् जनैर् ईहितम् ईश्वराणाम् अस्मद् विधैः तद् गुण सर्ग मायया

न ज्ञायते मोहित चित्त वर्त्मभिः तेभ्यो नमो वीर यशस् करेभ्यः

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

चतुर्थ्थ स्कन्दे सप्त दशो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

अथ चतुर्थ्थ स्कन्दः अष्टा दशो ऽध्याय :

स्कन्द- 04: अध्याय- 18

01 मैत्रेय उवाच

इत्थम् पृथुम् अभिष्टूय रुषा प्रस् फुरिता धरम्
पुनराहा वनिर् भीता सम्स्तभ् यात्मानम् आत्मना
02 सन्नियच् छाभिभो मन्युम् निबोध श्रावितम् च मे
सर्वतः सारम् आदत्ते यथा मधुकरो बुधः
03 अस्मिन् लोके ऽथवा ऽमुष्मिन् मुनिभिः तत्त्व दर्शिभिः
दृष्टा योगाः प्रयुक्ताश् च पुम्साम् श्रेयः प्रसिद्धये
04 तान् आतिष्ठति यः सम्यग् उपायान् पूर्व दर्शितान्
अवरः श्रद्धयो पेत उपेयान् विन्दते ऽञ्जसा
05 तान् अनादृत्य यो ऽविद्वान् अर्थान् आरभते स्वयम्
तस्य व्यभिचरन्त् यर्था आरब्धाश् च पुनः पुनः
06 पुरा सृष्टा ह्योषधयो ब्रह्मणा या विशाम् पते
भुज्यमाना मया दृष्टा असद्भिः अधृत व्रतैः
07 अपालिता नादृता च भवद्भिः लोक पालकैः
चोरी भूते ऽथ लोके ऽहम् यज्ञार्थे ऽग्रसम् ओषधीः
08 नूनम् ता वीरुधः क्षीणा मयि कालेन भूयसा
तत्र योगेन दृष्टेन भवान् आदातु मर्हति
09 वत्सम् कल्पय मे वीर येनाहम् वत्सला तव
धोक्ष्ये क्षीर मयान् कामान् अनुरूपम् च दोहनम्
10 दोग्धारम् च महाबाहो भूतानाम् भूत भावन
अन्नम् ईप्सितम् ऊर्जस्वद् भगवान् वाञ्छते यदि
11 समाम् च कुरु माम् राजन् देव वृष्टम् यथा पयः
अपर्ताव् अपि भद्रम् ते उपावर्ते त मे विभो
12 इति प्रियम् हितम् वाक्यम् भुव आदाय भूपतिः
वत्सम् कृत्वा मनुम् पाणौ अदुहत् सकल् औषधीः
13 तथापरे च सर्वत्र सारम् आददते बुधाः
ततो ऽन्ये च यथा कामम् दुदुहुः पृथु भाविताम्

14 ऋषयो दुदुहुर् देवीम् इन्द्रियेष् वथ सत्तम

वत्सम् बृहस्पतिम् कृत्वा पयश् छन्दोमयम् शुचि

15 कृत्वा वत्सम् सुरगणा इन्द्रम् सोमम् अदूदुहन्

हिरण्मयेन पात्रेण वीर्यम् ओजो बलम् पयः

16 दैतेया दानवा वत्सम् प्रह्लादम् असुरर्षभम्

विधाया दूदुहन् क्षीरम् अयःपात्रे सुरासवम्

17 गन्धर्व् आप्सरसो ऽधुक्षन् पात्रे पद्ममये पयः

वत्सम् विश्वावसुम् कृत्वा गान्धर्वम् मधु सौभगम्

18 वत्सेन पितरो ऽर्यम्णा कव्यम् क्षीर मधुक्षत

आम पात्रे महा भागाः श्रद्धया श्राद्ध देवताः

19 प्रकल्प्य वत्सम् कपिलम् सिद्धाः सङ्कल्प नामयीम्

सिद्धिम् नभसि विद्याम् च ये च विद्याधरा दयः

20 अन्ये च मायिनो मायाम् अन्तर्धान् आद्भुत् आत्मनाम्

मयम् प्रकल्प्य वत्सम् ते दुदुहुर् धारणा मयीम्

21 यक्ष रक्षाम्सि भूतानि पिशाचाः पिशिता शनाः

भूतेश वत्सा दुदुहुः कपाले क्षत जासवम्

22 तथाहयो दन्द शूकाः सर्पा नागाश् च तक्षकम्

विधाय वत्सम् दुदुहुः बिलपात्रे विषम् पयः

23 पशवो यवसम् क्षीरम् वत्सम् कृत्वा च गोवृषम्

अरण्य पात्रे चाधुक्षन् मृगेन्द्रेण च दम्ष्ट्रिणः

24 क्रव्यादाः प्राणिनः क्रव्यम् दुदुहुः स्वे कलेवरे

सुपर्ण वत्सा विहगाः चरम् चाचरम् एव च

25 वट वत्सा वनस् पतयः पृथग्रस मयम् पयः

गिरयो हिमवद् वत्सा नाना धातून् स्वसानुषु

26 सर्वे स्व मुख्य वत्सेन स्वे स्वे पात्रे पृथक्पयः

सर्व काम दुघाम् पृथ्वीम् दुदुहुः पृथु भाविताम्

27 एवम् पृथ्वादयः पृथ्वीम् अन्नादाः स्वन्नम् आत्मनः

दोह वत्सादि भेदेन क्षीर भेदम् कुरूद्वह

28 ततो महीपतिः प्रीतः सर्व काम दुघाम् पृथुः

दुहितृत्वे चकारेमाम् प्रेम्णा दुहितृ वत्सलः

29 चूर्णयन् स्व धनुष्कोट्या गिरिकूटानि राजराट्

भूमण्डलम् इदम् वैन्यः प्रायश् चक्रे समम् विभुः

30 अथास्मिन् भगवान् वैन्यः प्रजानाम् वृत्तिदः पिता

निवासान् कल्पयाम् चक्रे तत्र तत्र यथार् हतः

31 ग्रामान् पुरः पत्तनानि दुर्गाणि विविधानि च

घोषान् व्रजान् स शिबिरान् आकरान् खेट खर्वटान्

32 प्राक् पृथोरिह नैवैषा पुर ग्रामादि कल्पना

यथा सुखम् वसन्ति स्म तत्र तत्रा कुतो भयाः

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

चतुर्थ्थ स्कन्दे अष्टा दशो ऽध्याय ːǁ

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

अथ चतुर्थ्थ स्कन्दः एकोन विम्शो ऽध्याय :

स्कन्द- 04: अध्याय- 19

01 मैत्रेय उवाच

अथा दीक्षत राजा तु हयमेध शतेन सः

ब्रह्मा वर्ते मनोः क्षेत्रे यत्र प्राची सरस्वती

02 तद् अभिप्रेत्य भगवान् कर्मा तिशयम् आत्मनः

शत क्रतुर्न ममृषे पृथोर् यज्ञ महोत्सवम्

03 यत्र यज्ञपतिः साक्षाद् भगवान् हरिर् ईश्वरः

अन्व भूयत सर्वात्मा सर्व लोक गुरुः प्रभुः

04 अन्वितो ब्रह्म शर्वाभ्याम् लोकपालैः सहानुगैः

उपगीय मानो गन्धर्वैः मुनिभिः चाप्सरो गणैः

05 सिद्धा विद्याधरा दैत्या दानवा गुह्य कादयः

सुनन्द नन्द प्रमुखाः पार्षद प्रवरा हरेः

06 कपिलो नारदो दत्तो योगेशाः सनकादयः

तम् अन्वीयुर् भागवता ये च तत् सेवनोत् सुकाः

07 यत्र धर्म दुघा भूमिः सर्व काम दुघा सती

दोग्धि स्मा भीप्सितान् अर्थान् यजमानस्य भारत

08 ऊहुः सर्व रसान् नद्यः क्षीर दध् यन्न गोरसान्

तरवो भूरि वर्ष्माणः प्रासू यन्त मधु च्युतः

09 सिन्धवो रत्न निकरान् गिरयो ऽन्नम् चतुर् विधम्

उपायनम् उपाजह्रुः सर्वे लोकाः सपालकाः

10 इति चाधोक्ष जेशस्य पृथोस्तु परमो दयम्

असूयन् भगवान् इन्द्रः प्रति घातम् अचीकरत्

11 चरमेण् आश्वमेधेन यजमाने यजुष् पतिम्

वैन्ये यज्ञ पशुम् स्पर्धन् अपोवाह तिरोहितः

12 तमत्रिः भगवान् ऐक्षत् त्वरमाणम् विहायसा

आमुक्तम् इव पाखण्डम् यो ऽधर्मे धर्म विभ्रमः

13 अत्रिणा चोदितो हन्तुम् पृथु पुत्रो महारथः

अन्वध् आवत सङ्क्रुद्धः तिष्ठ तिष्ठेति चाब्रवीत्

14 तम् तादृशा कृतिम् वीक्ष्य मेने धर्मम् शरीरिणम्

जटिलम् भस्मनाच् छन्नम् तस्मै बाणम् न मुञ्चति

15 वधान् निवृत्तम् तम् भूयो हन्तवे ऽत्रिर् अचोदयत्

जहि यज्ञहनम् तात महेन्द्रम् विबुधा धमम्

16 एवम् वैन्य सुतः प्रोक्तः त्वरमाणम् विहायसा

अन्व द्रवद् अभिक्रुद्धो रावणम् गृध्र राडिव

17 सो ऽश्वम् रूपम् च तद् हित्वा तस्मा अन्तर् हितः स्वराट्

वीरः स्व पशुम् आदाय पितुर् यज्ञ मुपेयिवान्

18 तत् तस्य चाद्भुतम् कर्म विचक्ष्य परम ऋषयः

नामधेयम् ददुस् तस्मै विजिताश्व इति प्रभो

19 उपसृज्य तमस् तीव्रम् जहार् आश्वम् पुनर् हरिः

चषाल यूपतश् छन्नो हिरण्य रशनम् विभुः

20 अत्रिः सन्दर्शया मास त्वर माणम् विहायसा

कपाल खट्वाङ्ग धरम् वीरो नैनम् अबाधत

21 अत्रिणा चोदितस् तस्मै सन्दधे विशिखम् रुषा

सो ऽश्वम् रूपम् च तद् हित्वा तस्थौ अन्तर्हितः स्वराट्

22 वीरश् चाश्वम् उपादाय पितृ यज्ञम् अथाव्रजत्

तद् अवद्यम् हरे रूपम् जगृहुर् ज्ञान दुर्बलाः

23 यानि रूपाणि जगृहे इन्द्रो हय जिहीर्षया

तानि पापस्य खण्डानि लिङ्गम् खण्डम् इहोच्यते

24 एवम् इन्द्रे हरत् यश्वम् वैन्य यज्ञ जिघाम्सया

तद् गृहीत विसृष्टेषु पाखण्डेषु मतिर् नृणाम्

25 धर्म इत् युप धर्मेषु नग्न रक्त पटादिषु

प्रायेण सज्जते भ्रान्त्या पेशलेषु च वाग्मिषु

26 तद् अभिज्ञाय भगवान् पृथुः पृथु पराक्रमः

इन्द्राय कुपितो बाणम् आदत्तो *[उ]*द्यत कार्मुकः

27 तम् ऋत्विजः शक्र वधाभि सन्धितम् विचक्ष्य दुष् प्रेक्ष्यम् असह्यरम् हसम्

निवारया मासु रहो महा मते न युज्यते ऽत्रान् यवधः प्रचोदि तात्

28 वयम् मरुत् वन्तम् इहार्थ नाशनम् ह्वयामहे त्वच् छ्रवसा हत त्विषम्

अयात यामोप हवैर् अनन्तरम् प्रसह्य राजन् जुहवाम ते ऽहितम्

29 इत् यामन्त्र्य क्रतु पतिम् विदुर् आस्यर्त् विजो रुषा

स्रुग् घस्तान् जुहवतो ऽभ्येत्य स्वयम्भू: प्रत्य षेधत

30 न वध्यो भवताम् इन्द्रो यद् यज्ञो भगवत् तनु:

यम् जिघाम् सथ यज्ञेन यस्येष्टास् तनव: सुरा:

31 तद् इदम् पश्यत महद् धर्म व्यतिकरम् द्विजा:

इन्द्रेण् आनुष्ठितम् राज्ञ: कर्मै तद् विजिघाम् सता

32 पृथु कीर्ते: पृथोर् भूयात् तर्ह् येकोन शत क्रतु:

अलम् ते क्रतुभि: स्विष्टै: यद् भवान् मोक्ष धर्मवित्

33 नैवात्मने महेन्द्राय रोषम् आहर्तु मर्हसि

उभावपि हि भद्रम् ते उत्तम श्लोक विग्रहौ

34 मास्मिन् महाराज कृथा: स्म चिन्ताम् निशामयास् मद् वच आदृत् आत्मा

यद् ध्यायतो दैव हतम् नु कर्तुम् मनो ऽतिरुष्टम् विशते तमो ऽन्धम्

35 क्रतुर् विरमताम् एष देवेषु दुर वग्रह:

धर्म व्यतिकरो यत्र पाखण्डै: इन्द्र निर्मितै:

36 एभिर् इन्द्रोप सम्सृष्टै: पाखण्डै: हारिभिर्जनम्

ह्रियमाणम् विचक्ष्वैनम् यस्ते यज्ञ ध्रुग् अश्वमुट्

37 भवान् परित्रातुम् इहाव तीर्णो धर्मम् जनानाम् समय् आनुरूपम्

वेनाप चाराद् अवलुप्त मद्य तद् देहतो विष्णु कलासि वैन्य

38 स त्वम् विमृश्यास्य भवम् प्रजापते सङ्कल्पनम् विश्व सृजाम् पिपीपृहि

ऐन्द्रीम् च मायाम् उपधर्म मातरम् प्रचण्ड पाखण्ड पथम् प्रभो जहि

39 मैत्रेय उवाच

इत्थम् स लोक गुरुणा समादिष्टो विशाम् पति:

तथा च कृत्वा वात्सल्यम् मघोनापि च सन्दधे

40 कृत् आवभृथ स्नानाय पृथवे भूरि कर्मणे

वरान् ददुस्ते वरदा ये तद् बर्हिषित् अर्पिता:

41 विप्राः सत्याशिषस् तुष्टाः श्रद्धया लब्ध दक्षिणाः

आशिषो युयुजुः क्षत्तः आदिराजाय सत् कृताः

42 त्वया हूता महाबाहो सर्व एव समागताः

पूजिता दान मानाभ्याम् पितृ देवरुषि मानवाः

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

चतुर्थ्थ स्कन्दे एकोन विम्शो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

अथ चतुर्थ्थ स्कन्दः विम्शो ऽध्याय :

स्कन्द- 04: अध्याय- 20

01 मैत्रेय उवाच

भगवान् अपि वैकुण्ठः साकम् मघवता विभुः

यज्ञैः यज्ञ पतिस् तुष्टो यज्ञभुक् तम् अभाषत

02 श्री भगवान् उवाच

एष ते ऽकार्षीद् भङ्गम् हयमेध शतस्य ह

क्षमापय त आत्मानम् अमुष्य क्षन्तु मर्हसि

03 सुधियः साधवो लोके नरदेव नरोत्तमाः

नाभि द्रुह्यन्ति भूतेभ्यो यर्हि नात्मा कळेवरम्

04 पुरुषा यदि मुह्यन्ति त्वादृशा देव मायया

श्रम एव परम् जातो दीर्घया वृद्ध सेवया

05 अतः कायम् इमम् विद्वान् अविद्या काम कर्मभिः

आरब्ध इति नैवास्मिन् प्रति बुद्धो ऽनुषज्जते

06 असम्सक्त: शरीरे ऽस्मिन् अमुनोत् पादिते गृहे

अपत्ये द्रविणे वापि क: कुर्यान् ममताम् बुध:

07 एक: शुद्ध: स्वयम् ज्योति: निर्गुणो ऽसौ गुणाश्रय:

सर्वगो ऽनावृत: साक्षी निरात्मा आत्मा आत्मन: पर:

08 य एवम् सन्तम् आत्मानम् आत्मस्थम् वेद पूरुष:

नाज्यते प्रकृतिस्थो ऽपि तद् गुणै: स मयि स्थित:

09 य: स्व धर्मेण माम् नित्यम् निराशी: श्रद्धयान् वित:

भजते शनकैस् तस्य मनो राजन् प्रसीदति

10 परित्यक्त गुण: सम्यग् दर्शनो विशदाशय:

शान्तिम् मे सम वस्थानम् ब्रह्म कैवल्यम् अश्नुते

11 उदासीनम् इवाध् यक्षम् द्रव्य ज्ञान क्रियात्मनाम्

कूटस्थम् इमम् आत्मानम् यो वेद् आप्नोति शोभनम्

12 भिन्नस्य लिङ्गस्य गुण प्रवाहो द्रव्य क्रिया कारक चेतन् आत्मन:

दृष्टासु सम्पत्सु विपत्सु सूरयो न विक्रियन्ते मयि बद्ध सौहृदा:

13 सम: समानो [उ]त्तम मध्य माधम: सुखे च दु:खे च जितेन्द्रि याशय:

मयोप क्लृत् आखिल लोक सम्युतो विधत्स्व वीरा अखिल लोक रक्षणम्

14 श्रेय: प्रजा पालनम् एव राज्ञो यत् साम्पराये सुकृतात् षष्ठम् अम्शम्

हर्त् आन्यथा हृत पुण्य: प्रजानाम् अरक्षिता कर हारो ऽघमत्ति

15 एवम् द्विजाग्र्यानु मत् आनुवृत्त धर्म प्रधानो ऽन्यतमो ऽवितास्या:

ह्रस्वेन कालेन गृहोप यातान् द्रष्टासि सिद्धान् अनुरक्त लोक:

16 वरम् च मत् कञ्चन मान वेन्द्र वृणीष्व ते ऽहम् गुण शील यन्त्रित:

नाहम् मखैर्वै सुलभस् तपोभि: योगेन वा यत् सम चित्त वर्ती

17 मैत्रेय उवाच

स इत्थम् लोक गुरुणा विष्वक्सेनेन विश्वजित्

अनुशासित आदेशम् शिरसा जगृहे हरे:

18 स्पृशन्तम् पादयो: प्रेम्णा व्रीडितम् स्वेन कर्मणा

शत क्रतुम् परिष्वज्य विद्वेषम् विससर्ज ह

19 भगवान् अथ विश्वात्मा पृथुनोप हृतार्हण:

समुज् जिहानया भक्त्या गृहीत चरण् आम्बुज:

20 प्रस्थानाभि मुखो ऽप्येनम् अनुग्रह विलम्बित:

पश्यन् पद्म पला शाक्षो न प्रतस्थे सुहृत् सताम्

21 स आदि राजो रचित् आञ्जलिर् हरिम् विलोकितुम् नाशकद् अश्रु लोचन:

न किञ्चनो वाच स बाष्प विक्लवो हृदोप गुह्यामुम् अधाद् अवस्थित:

22 अथाव मृज्याश्रु कला विलोकयन् अतृप्त दृग् गोचर माह पूरुषम्

पदा स्पृशन्तम् क्षितिमम्स उन्नते विन्यस्त हस्ताग्रम् उरङ्ग विद्विष:

23 पृथुर् उवाच

वरान् विभो त्वद् वरदेश्वर् आद्बुध: कथम् वृणीते गुण विक्रि यात्मनाम्

ये नारकाणाम् अपि सन्ति देहिनाम् तान् ईश कैवल्य पते वृणे न च

24 न कामये नाथ तद् अप्यहम् क्वचित् न यत्र युष्मच् चरणाम्बुजा सव:

महत् तमान् तर् हृदयान् मुखच्युतो विधत्स्व कर्णायुतम् एष मे वर:

25 स उत्तम श्लोक महन् मुखच्युतो भवत् पदाम्भोज सुधा कणानिल:

स्मृतिम् पुन: विस्मृत तत्त्व वर्त्मनाम् कुयोगिनाम् नो वितरत्यलम् वरै:

26 यश: शिवम् सुश्रव आर्य सङ्गमे यदृच्छया चोप शृणोति ते सकृत्

कथम् गुणज्ञो विरमेद् विना पशुम् श्रीर्यत् प्रवव्रे गुण सङ्ग्र हेच्छया

27 अथाभजे त्वा अखिल पूरुषोत्तमम् गुणालयम् पद्म करेव लालस:

अप्यावयोर् एक पतिस् पृधो: कलि: न स्यात् कृत त्वच् चरणै कतानयो:

28 जगज् जनन्याम् जगदीश वैशसम् स्यादेव यत् कर्मणि न: समीहितम्

करोषि फल्ग्वपि उरु दीन वत्सल: स्व एव धिष्ण्ये ऽभिरतस्य किम् तया

29 भजन्त्यथ त्वाम् अत एव साधवो व्युदस्त माया गुण विभ्र मोदयम्

भवत् पदानु स्मरणादृ ते सताम् निमित्तम् अन्यद् भगवन् न विद्महे

30 मन्ये गिरम् ते जगताम् विमोहिनीम् वरम् वृणीष्वेति भजन्तम् आत्थ यत्

वाचा नु तन्त्या यदि ते जनो ऽसित: कथम् पुन: कर्म करोति मोहित:

31 त्वन् माय याद्धा जन ईश खण्डितो यद् अन्य दाशास्त ॠतात्मनो ऽबुधः

यथा चरेद् बालहितम् पिता स्वयम् तथा त्वम् एवार्हसि नः समीहितुम्

32 मैत्रेय उवाच

इत् यादि राजेन नुतः स विश्वदृक् तमाह राजन् मयि भक्ति रस्तु ते

दिष्ट्ये दृशी धीर् मयि ते कृता यया मायाम् मदीयाम् तरति स्म दुस्त्यजाम्

33 तत्त्वम् कुरु मया दिष्टम् अप्रमत्तः प्रजापते

मद् आदेश करो लोकः सर्व त्राप्नोति शोभनम्

34 मैत्रेय उवाच

इति वैन्यस्य राजरुषेः प्रति नन्द्यार्थ वद्वचः

पूजितो ऽनुगृहीत् वैनम् गन्तुम् चक्रे ऽच्युतो मतिम्

35 देवरुषि पितृ गन्धर्व सिद्ध चारण पन्नगाः

किन्नर् आप्सरसो मर्त्याः खगा भूतान् यनेकशः

36 यज्ञेश्वर धिया राज्ञा वाग् वित् ताञ्जलि भक्तितः

सभाजिता ययुः सर्वे वैकुण्ठानु गतास् ततः

37 भगवान् अपि राजरुषेः सोपाध् यायस्य चाच्युतः

हरन् निव मनो ऽमुष्य स्वधाम प्रत्य पद्यत

38 अदृष्टाय नमस् कृत्य नृपः सन्दर्शित् आत्मने

अव्यक्ताय च देवानाम् देवाय स्वपुरम् ययौ

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

चतुर्थ स्कन्दे विम्शो ऽध्याय ː||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

अथ चतुर्थ्थ स्कन्दः एक विम्शो ऽध्याय :

स्कन्द- 04: अध्याय- 21

01 मैत्रेय उवाच

मौक्तिकैः कुसुम स्रग्भिः दुकूलैः स्वर्ण तोरणैः

महा सुरभिभिर् धूपैः मण्डितम् तत्र तत्र वै

02 चन्दना गुरु तोयार्द्र रथ्या चत्वर मार्गवत्

पुष्पा क्षत फलै स्तोक्मैः लाजैः अर्चिर्भिर् अर्चितम्

03 सवृन्दैः कदली स्तम्भैः पूगपोतैः परिष्कृतम्

तरु पल्लव मालाभिः सर्वतः समलङ्कृतम्

04 प्रजास्तम् दीप बलिभिः सम्भृता शेष मङ्गळैः

अभीयुः मृष्ट कन्याश् च मृष्ट कुण्डल मण्डिताः

05 शङ्ख दुन्दुभि घोषेण ब्रह्म घोषेण चर्त् विजाम्

विवेश भवनम् वीरः स्तूयमानो गतस्मयः

06 पूजितः पूजया मास तत्र तत्र महायशाः

पौरात् जान पदाम्स् ताम्स् तान् प्रीतः प्रियवर प्रदः

07 स एवम् आदीन् यनवद्य चेष्टितः कर्माणि भूयाम्सि महान् महत्तमः

कुर्वन् शशासा वनि मण्डलम् यशः स्फीतम् निधाया रुरुहे परम् पदम्

08 सूत उवाच

तद् आदि राजस्य यशो विजृम्भितम् गुणैर् अशेषैः गुणवत् सभाजितम्

क्षत्ता महा भागवतः सदस् पते कौषारविम् प्राह गृणन्तम् अर्चयन्

09 विदुर उवाच

सो ऽभिषिक्तः पृथुर् विप्रैः लब्धा शेष सुरार्हणः

बिभ्रत्स वैष्णवम् तेजो बाहवोर् याभ्याम् दुदोह गाम्

10 को न्वस्य कीर्तिम् न शृणोत् यभिज्ञो यद् विक्रमोच् छिष्टम् अशेष भूपाः

लोकाः सपाला उपजीवन्ति कामम् अद्यापि तन्मे वद कर्म शुद्धम्

11 मैत्रेय उवाच

गङ्गा यमुनयोर् नद्योः अन्तरा क्षेत्रम् आवसन्

आरब्धान् एव बुभुजे भोगान् पुण्य जिहासया

12 सर्वत्रास् खलिता देशः सप्त द्वीपैक दण्ड धृक्

अन्यत्र ब्राह्मण कुलाद् अन्यत् राच्युत गोत्रतः

13 एकदासीन् महासत्र दीक्षा तत्र दिवौ कसाम्

समाजो ब्रह्म ऋषीणाम् च राज ऋषीणाम् च सत्तम

14 तस्मिन् अर्हत्सु सर्वेषु स्वर्चितेषु यथार्हतः

उत्थितः सदसो मध्ये ताराणाम् उडुराडिव

15 प्राम्शुः पीनायत भुजो गौरः कञ्जारु णेक्षणः

सुनासः सुमुखः सौम्यः पीनाम्सः सुद् विजस्मितः

16 व्यूढ वक्षा बृहच् छ्रोणिः वलि वल्गुद लोदरः

आवर्त नाभिर् ओजस्वी काञ्चनोर् उरुदग्रपात्

17 सूक्ष्म वक्रासित स्निग्ध मूर्धजः कम्बु कन्धरः

महाधने दुकूलाग्र्ये परिधायोप वीय च

18 व्यञ्जिता शेष गात्र श्रीः नियमे न्यस्त भूषणः

कृष्णा जिनधरः श्रीमान् कुशपाणिः कृतोचितः

19 शिशिर स्निग्ध ताराक्षः समैक्षत समन्ततः

ऊचिवान् इदम् उर्वीशः सदः सम्हर्षयन् इव

20 चारु चित्र पदम् श्लक्ष्णम् मृष्टम् गूढम् अविक्लवम्

सर्वेषाम् उपकारार्थम् तदा अनुवदन् निव

21 राजो उवाच

सभ्याः शृणुत भद्रम् वः साधवो य इहागताः

सत्सु जिज्ञासुभिर् धर्मम् आवेद्यम् स्वम् अनीषितम्

22 अहम् दण्डधरो राजा प्रजानाम् इह योजितः

रक्षिता वृत्तिदः स्वेषु सेतुषु स्थापिता पृथक्

23 तस्य मे तद् अनुष्ठानाद् यानाहुर् ब्रह्म वादिनः

लोका: स्यु: काम सन्दोहा यस्य तुष्यति दिष्ट दृक्

24 य उद्धरेत् करम् राजा प्रजा धर्मेषु अशिक्षयन्

प्रजानाम् शमलम् भुङ्क्ते भगम् च स्वम् जहाति स:

25 तत् प्रजा भर्तृ पिण्डार्थम् स्वार्थम् एवान सूयव:

कुरुता धोक्ष जधिय: तर्हि मे ऽनुग्रह: कृत:

26 यूयम् तद् अनुमो दध्वम् पितृ देव ऋषयू ऽमला:

कर्तु: शास्तु: अनुज्ञातु: तुल्यम् यत् प्रेत्य तत् फलम्

27 अस्ति यज्ञ पतिर् नाम केषाञ्चिद् अर्ह सत्तमा:

इहा मुत्र च लक्ष्यन्ते ज्योत्स्ना वत्य: क्वचिद् भुव:

28 मनोर् उत्तान पादस्य ध्रुवस्यापि मही पते:

प्रियव्रतस्य राजरुषे: अङ्गस्यास् मत् पितु: पितु:

29 ईदृशानाम् अथान् येषाम् अजस्य च भवस्य च

प्रह्लादस्य बलेश् चापि कृत्यमस्ति गदा भृता

30 दौहित्रा दीन् ऋते मृत्यो: शोच्यान् धर्म विमोहितान्

वर्ग स्वर्गाप वर्गाणाम् प्रायेणै कात्म्य हेतुना

31 यत् पाद सेवाभि रुचिस् तपस्विनाम् अशेष जन्मोप चितम् मलम् धिय:

सद्य: क्षिणोत् यन्वहम् एधती सती यथा पदाङ्गुष्ठ विनि: सृता सरित्

32 विनिर्धुता शेष मनोमल: पुमान् असङ्ग विज्ञान विशेष वीर्यवान्

यद् अङ्घ्रिमूले कृत केतन: पुन: न सम्सृतिम् क्लेश वहाम् प्रपद्यते

33 तमेव यूयम् भजत् आत्म वृत्तिभि: मनोवच: काय गुणै: स्व कर्मभि:

अमायिन: काम दुघाङ्घ्रि पङ्कजम् यथ् आधिकारा वसितार्थ सिद्धय:

34 असाविहान् एक गुणो ऽगुणो ऽध्वर: पृथग् विध द्रव्य गुण क्रियोक्तिभि:

सम्पद् यते ऽर्थाशय लिङ्गनामभि: विशुद्ध विज्ञान घन: स्वरूपत:

35 प्रधान कालाशय धर्म सङ्ग्रहे शरीर एष प्रतिपद्य चेतनाम्

क्रिया फलत्वेन विभुर् विभाव्यते यथानलो दारुषु तद् गुणात्मक:

36 अहो ममामी वितरन्त् यनुग्रहम् हरिम् गुरुम् यज्ञ भुजा मध् ईश्वरम्

स्व धर्म योगेन यजन्ति मामका निरन्तरम् क्षोणितले दृढ व्रता:

37 मा जातु तेज: प्रभवेन् महर्द्धिभि: तितिक्षया तपसा विद्यया च

देदीप्य माने ऽजित देव तानाम् कुले स्वयम् राज कुलाद् द्विजानाम्

38 ब्रह्मण्य देव: पुरुष: पुरातनो नित्यम् हरि: यच् चरणाभि वन्दनात्

अवाप लक्ष्मीम् अनपायिनीम् यशो जगत् पवित्रम् च महत् तमाग्रणी:

39 यत् सेवया शेष गुहाशय: स्वराड् विप्र प्रिय: तुष्यति कामम् ईश्वर:

तदेव तद् धर्म परैर् विनीतै: सर्वात्मना ब्रह्म कुलम् निषेव्यताम्

40 पुमान् लभेतान् अतिवेलम् आत्मन: प्रसीदतो ऽत्यन्त शमम् स्वत: स्वयम्

यन् नित्य सम्बन्ध निषेवया तत: परम् किम् अत्रास्ति मुखम् हविर् भुजाम्

41 अश्नात् यनन्त: खलु तत्त्व कोविदै: श्रद्धा हुतम् यन् मुख इज्य नामभि:

न वै तथा चेतनया बहिष् कृते हुताशने पारम हम्स्य पर्यगु:

42 यद् ब्रह्म नित्यम् विरजम् सनातनम् श्रद्धा तपो मङ्गळ मौन सम्यमै:

समाधिना बिभ्रति हार्थ दृष्टये यत् रेदम् आदर्श इवाव भासते

43 तेषामहम् पाद सरोज रेणुम् आर्या वहेयाधि किरीट मायु:

यम् नित्यदा बिभ्रत आशु पापम् नश्यत्यमुम् सर्वगुणा भजन्ति

44 गुणायनम् शील धनम् क्रुतज्ञम् वृद् धाश्रयम् सम्वृणते ऽनु सम्पद:

प्रसीदताम् ब्रह्म कुलम् गवाम् च जनार्दन: सानुचरश् च मह्यम्

45 मैत्रेय उवाच

46 इति ब्रुवाणम् नृपतिम् पितृ देव द्विजातय:

तुष्टुवु: हृष्ट मनस: साधु वादेन साधव:

47 पुत्रेण जयते लोकान् इति सत्यवती श्रुति:

ब्रह्म दण्ड हत: पापो यद् वेनो ऽत्य तरत्तम:

48 हिरण्य कशिपुश् चापि भगवन् निन्दया तम:

विविक्षु: अत्यगात् सूनो: प्रह्लादस् यानुभावत:

49 वीरवर्य पित: पृथ्व्या: समा: सन्जीव शाश्वती:

यस्ये दृशि अच्युते भक्ति: सर्व लोकैक भर्तरि

50 अहो वयम् ह्यद्य पवित्र कीर्ते त्वयैव नाथेन मुकुन्द नाथाः

य उत्तम श्लोक तमस्य विष्णोः ब्रह्मण्य देवस्य कथाम् व्यनक्ति

51 नात् यद्भुतम् इदम् नाथ तवा जीव् यानुशासनम्

प्रजानु रागो महताम् प्रकृतिः करुण् आत्मनाम्

52 अद्य नस्तम सः पारः त्वयो पासाद् इतः प्रभो

भ्राम्यताम् नष्ट दृष्टीनाम् कर्मभिः दैव सम्ज्ञितैः

53 नमो विवृद्ध सत्त्वाय पुरुषाय महीयसे

यो ब्रह्म क्षत्र माविश्य बिभर्तीदम् स्व तेजसा

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

चतुर्थ्थ स्कन्दे एक विम्शो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

अथ चतुर्थ्थ स्कन्दः द्वा विम्शो ऽध्याय :

स्कन्द- 04: अध्याय- 22

01 मैत्रेय उवाच

जनेषु प्रगृणत्स्व् एवम् पृथुम् पृथुल विक्रमम्

तत्रोप जग्मुः मुनयः चत्वारः सूर्य वर्चसः

02 ताम्स्तु सिद्धेश्वरान् राजा व्योम्नो ऽवतरतो ऽर्चिषा

लोकान् अपापान् कुर्वत्या सानुगो ऽचष्ट लक्षितान्

03 तद् दर्शनोद् गतान् प्राणान् प्रत्यादित्सुः इवोत्थितः

स सदस् यानुगो वैन्य इन्द्रियेशो गुणानिव

04 गौरवाद् यन्त्रितः सभ्यः प्रश्रयान् अत कन्धरः

विधिवत् पूजयाम् चक्रे गृहीताध् यर्हण् आसनान्

05 तत् पाद शौच सलिलैः मार्जि तालक बन्धनः

तत्र शील वताम् वृत्तम् आचरन् मानयन्न् इव

06 हाटकासन आसीनान् स्व धिष्ण्येषु इव पावकान्

श्रद्धा सम्यम सम्युक्तः प्रीतः प्राह भवा ग्रजान्

07 पृथुर् उवाच

अहो आचरितम् किम् मे मङ्गळम् मङ्गळायनाः

यस्य वो दर्शनम् ह्यासीद् दुर् दर्शानाम् च योगिभिः

08 किम् तस्य दुर्लभ तरम् इह लोके परत्र च

यस्य विप्राः प्रसीदन्ति शिवो विष्णुश् च सानुगः

09 नैव लक्षयते लोको लोकान् पर्यटतो ऽपि यान्

यथा सर्व दृशम् सर्व आत्मानम् ये ऽस्य हेतवः

10 अधना अपि ते धन्याः साधवो गृहमेधिनः

यद् गृहा ह्यर्ह वर्याम्बु तृण भूमी श्वरा वराः

11 व्यालालय द्रुमा वै ते ऽपि अरिक्त् आखिल सम्पदः

यद् गृहाः तीर्थ पादीय पाद तीर्थ विवर्जिताः

12 स्वागतम् वो द्विज श्रेष्ठा यद् व्रतानि मुमुक्षवः

चरन्ति श्रद्धया धीरा बाला एव बृहन्ति च

13 कच्चिन्नः कुशलम् नाथा इन्द्रि यार्थ् आर्थ वेदिनाम्

व्यसना वाप एतस्मिन् पतितानाम् स्व कर्मभिः

14 भवत्सु कुशल प्रश्न आत्मा रामेषु नेष्यते

कुशला कुशला यत्र न सन्ति मति वृत्तयः

15 तदहम् कृत विश्रम्भः सुहृदो वस् तपस्विनाम्

सम्पृच्छे भव एतस्मिन् क्षेमः केनाञ्जसा भवेत्

16 व्यक्तम् आत्मवताम् आत्मा भगवान् आत्म भावनः

स्वानाम् अनुग्रहा येमाम् सिद्ध रूपी चरत्यजः

17 मैत्रेय उवाच

पृथोः तत् सूक्तमा कर्ण्य सारम् सुष्ठु मितम् मधु

स्मयमान इव प्रीत्या कुमारः प्रत् युवाच ह

18 सनत्कुमार उवाच

साधु पृष्टम् महाराज सर्व भूत हितात्मना

भवता विदुषा चापि साधूनाम् मतिर् ईदृशी

19 सङ्गमः खलु साधूनाम् उभयेषाम् च सम्मतः

यत् सम्भाषण सम्प्रश्नः सर्वेषाम् वितनोति शम्

20 अस्त्येव राजन् भवतो मधु द्विषः पाद् आरविन्दस्य गुण आनुवादने

रतिर् दुरापा विधुनोति नैष्ठिकी कामम् कषायम् मलम् अन्तर् आत्मनः

21 शास्त्रेषु इयानेव सुनिश्चितो नृणाम् क्षेमस्य सध्र्यग् विमृशेषु हेतुः

असङ्ग आत्म व्यतिरिक्त आत्मनि दृढा रतिः ब्रह्मणि निर्गुणे च या

22 सा श्रद्धया भगवद् धर्म चर्यया जिज्ञासया आध्यात्मिक योग निष्ठया

योगेश्वरो [उ]पासनया च नित्यम् पुण्यश्रवः कथया पुण्यया च

23 अर्थेन्द्रिया राम स गोष्ठ्य तृष्णया तत् सम्मतानाम् अपरिग्रहेण च

विविक्तरुच्या परितोष आत्मन् विना हरेः गुण पीयूष पानात्

24 अहिम्सया पारम हम्स्य चर्यया स्मृत्या मुकुन्दा चरिताग्र्य सीधुना

यमैर् अकामैः नियमैः चाप्य निन्दया निरीहया द्वन्द्व तितिक्षया च

25 हरेः मुहुः तत् पर कर्णपूर गुणाभि धानेन विजृम्भ माणया

भक्त्या ह्यसङ्गः सद सत्यन् आत्मनि स्यान् निर्गुणे ब्रह्मणि चाञ्जसा रतिः

26 यदा रतिर् ब्रह्मणि नैष्ठिकी पुमान् आचार्यवान् ज्ञान विराग रम्हसा

दहत्य वीर्यम् हृदयम् जीव कोशम् पञ्चात्मकम् योनि मिवोत्थितो ऽग्निः

27 दग् धाशयो मुक्त समस्त तद् गुणो नैवात्मनो बहिर् अन्तर् विचष्टे

परात्मनोर् यद् व्यवधानम् पुरस्तात् स्वप्ने यथा पुरुषः तद् विनाशे

28 आत्मानम् इन्द्रियार्थम् च परम् यद् उभयोर् अपि

सत्याशय उपाधौ वै पुमान् पश्यति नान्यदा

29 निमित्ते सति सर्वत्र जलादाव् अपि पूरुषः

आत्मनश् च परस्यापि भिदाम् पश्यति नान्यदा

30 इन्द्रियैः विषया कृष्टैः आक्षिप्तम् ध्यायताम् मनः

चेतनाम् हरते बुद्धेः स्तम्ब स्तोयमिव ह्रदात्

31 भ्रश्यत् यनुस्मृतिश् चित्तम् ज्ञान भ्रम्शः स्मृतिक्षये

तद् रोधम् कवयः प्राहुः आत्मा पह्नवम् आत्मनः

32 नातः परतरो लोके पुम्सः स्वार्थ व्यतिक्रमः

यदध् यन्यस्य प्रेयस्त्वम् आत्मनः स्वव्यति क्रमात्

33 अर्थ् एन्द्रियार्थ् आभिध्यानम् सर्वार्था पह्नवो नृणाम्

भ्रम्शितो ज्ञान विज्ञानाद् येनाविशति मुख्यताम्

34 न कुर्यात् कर्हिचित् सङ्गम् तमस् तीव्रम् तितीरिषुः

धर्म् आर्थ काम मोक्षाणाम् यद् अत्यन्त विघातकम्

35 तत्रापि मोक्ष एवार्थ आत् यन्तिक तयेष्यते

त्रैवर्ग्यो ऽर्थो यतो नित्यम् कृतान्त भय सम्युतः

36 परे ऽवरे च ये भावा गुण व्यतिकरा दनु

न तेषाम् विद्यते क्षेमम् ईश विध्वम्सि ताशिषाम्

37 तत्त्वम् नरेन्द्र जगताम् अथ तस्थुषाम् च

देहे [इ]न्द्रियासु धिषण् आत्मभिर् आवृतानाम्

यः क्षेत्र वित्तप तया हृदि विश्वगाविः

प्रत्यक्च कास्ति भगवाम्स् तम् अवेहि सो ऽस्मि

38 यस्मिन् निदम् सदसद् आत्म तया विभाति

माया विवेक विधुति स्रजि वाहि बुद्धिः

तम् नित्य मुक्त परिशुद्ध विशुद्ध तत्त्वम्

प्रत्यूढ कर्म कलिल प्रकृतिम् प्रपद्ये

39 यत् पाद पङ्कज पलाश विलास भक्त्या

कर्माशयम् ग्रथितम् उदग्रथ यन्ति सन्तः

तद् वन्न रिक्त मतयो यतयो ऽपि रुद्ध

स्रोतो गणाः तम् अरणम् भज वासुदेवम्

40 कृच्छ्रो महान् इह भवार्णवम् अप्लवेशाम्

षड् वर्ग नक्र मसुखेन तितीरषन्ति

तत्त्वम् हरेर् भगवतो भजनीयम् अङ्घ्रिम्

कृत् वोडुपम् व्यसनम् उत्तर दुस्तरार्णम्

41 मैत्रेय उवाच

स एवम् ब्रह्म पुत्रेण कुमारेण् आत्म मेधसा

दर्शित् आत्म गतिः सम्यक् प्रशस्यो वाच तम् नृपः

42 राजो उवाच

कृतो मे ऽनुग्रहः पूर्वम् हरिणा आर्तानु कम्पिना

तम् आपाद यितुम् ब्रह्मन् भगवन् यूय मागताः

43 निष्पादि तश् च कात्स्र्न् येन भगवद्भिर् घृणालुभिः

साधू उच्छिष्टम् हि मे सर्वम् आत्मना सह किम् ददे

44 प्राणा दाराः सुता ब्रह्मन् गृहाश् च सपरिच् छदाः

राज्यम् बलम् मही कोश इति सर्वम् निवेदितम्

45 सैना पत्यम् च राज्यम् च दण्ड नेतृत्वम् एव च

सर्व लोकाधि पत्यम् च वेद शास्त्र विदर्हति

46 स्वमेव ब्राह्मणो भुङ्क्ते स्वम् वस्ते स्वम् ददाति च

तस्यै वानुग्रहेण् आन्नम् भुञ्जते क्षत्रिया दयः

47 यैर् ईदृशी भगवतो गतिर् आत्म वाद

एकान्ततो निगमिभिः प्रति पादिता नः

तुष्यन् त्वदभ्र करुणाः स्वकृतेन नित्यम्

को नाम तत् प्रतिकरोति विनोद पात्रम्

48 मैत्रेय उवाच

त आत्म योग पतय आदि राजेन पूजिताः

शीलम् तदीयम् शम्सन्तः खे ऽभूवन् मिषताम् नृणाम्

49 वैन्यस्तु धुर्यो महताम् सम्स्थित् याध् यात्म शिक्षया

आप्त कामम् इवात्मानम् मेन आत्मन् यवस्थितः

50 कर्माणि च यथा कालम् यथा देशम् यथा बलम्

यथोचितम् यथा वित्तम् अकरोद् ब्रह्म सात्कृतम्

51 फलम् ब्रह्मणि विन्यस्य निर्विषङ्गः समाहितः

कर्माध् यक्षम् च मन्वान आत्मानम् प्रकृतेः परम्

52 गृहेषु वर्तमानो ऽपि स साम्राज्य श्रियान्वितः

नासज् जतेन्द्रि यार्थेषु निरहम् मतिः अर्कवत्

53 एवम् अध्यात्म योगेन कर्माणि अनुसमा चरन्

पुत्रान् उत्पादया मास पञ्चार्चिषि आत्म सम्मतान्

54 विजिताश्वम् धूम्र केशम् हर्यक्षम् द्रविणम् वृकम्

सर्वेषाम् लोक पालानाम् दधारैकः पृथुर् गुणान्

55 गोपीथाय जगत् सृष्टेः काले स्वे स्वे ऽच्युत् आत्मकः

मनो वाग् वृत्तिभिः सौम्यैः गुणैः सम्रञ्जयन् प्रजाः

56 राजेत् यधान् नामधेयम् सोमराज इवापरः

सूर्य वद् विसृजन् गृहणन् प्रतपम्श् च भुवो वसु

57 दुर् धर्षः तेजसे वाग्निः महेन्द्र इव दुर्जयः

तितिक्षया धरित्रीव द्यौरि वाभीष्ट दो नृणाम्

58 वर्षति स्म यथा कामम् पर्जन्य इव तर्पयन्

समुद्र इव दुर्बोधः सत्त्वेनाच लराडिव

59 धर्मराड् इव शिक्षायाम् आश्चर्ये हिमवान् इव

कुबेर इव कोशाढ्यो गुप्तार्थो वरुणो यथा

60 मातरिश् वेव सर्वात्मा बलेन सह सौजसा

अविषह्य तया देवो भगवान् भूत राडिव

61 कन्दर्प इव सौन्दर्ये मनस्वी मृगराडिव

वात्सल्ये मनुवन् नृणाम् प्रभुत्वे भगवान् अजः

62 बृहस्पतिः ब्रह्मवादे आत्म वत्त्वे स्वयम् हरिः

भक्त्या गोगुरु विप्रेषु विष्वक् सेनानु वर्तिषु

ह्रिया प्रश्रय शीलाभ्याम् आत्म तुल्यः परोद्यमे

63 कीर्त् योर्ध्व गीतया पुम्भिः त्रै लोक्ये तत्र तत्र ह

प्रविष्टः कर्ण रन्ध्रेषु स्त्रीणाम् रामः सतामिव

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

चतुर्थ्थ स्कन्दे द्वा विम्शो ऽध्याय ः||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

अथ चतुर्थ्थ स्कन्दः त्रयो विम्शो ऽध्याय :

स्कन्द- 04: अध्याय- 23

01 मैत्रेय उवाच

दृष्ट् वात्मानम् प्रवयसम् एकदा वैन्य आत्मवान्

आत्मना वर्धिता शेष स्वानु सर्गः प्रजापतिः

02 जगतस् तस्थु षश्चापि वृत्तिदो धर्म भृत् सताम्

निष् पादितेश् वरादेशो यदर्थम् इह जज्ञिवान्

03 आत्मजेषु आत्मजाम् न्यस्य विरहाद् रुदतीम् इव

प्रजासु विमनः स्वेकः सदारो ऽगात् तपोवनम्

04 तत् राप्य दाभ्य नियमो वैखानस सु सम्मते

आरब्ध उग्र तपसि यथा स्वविजये पुरा

05 कन्द मूल फला हारः शुष्क पर्णाशनः क्वचित्

अब्भक्षः कतिचित् पक्षान् वायु भक्षस् ततः परम्

06 ग्रीष्मे पञ्च तपा वीरो वर्षासु आसारषाण् मुनिः

आकण्ठ मग्नः शिशिरे उदके स्थण्डिलेशयः

07 तितिक्षुर् यतवाग् दान्त ऊर्ध्वरेता जितानिलः

आरिराध यिषुः कृष्णम् अचरत् तप उत्तमम्

08 तेन क्रमानु सिद्धेन ध्वस्त कर्म् अमलाशयः

प्राणायामैः सन्नि रुद्ध षड् वर्गः छिन्न बन्धनः

09 सनत्कुमारो भगवान् यदाह् आध्यात्मिकम् परम्

योगम् तेनैव पुरुषम् अभजत् पुरुषर्षभः

10 भगवद् धर्मिणः साधोः श्रद्धया यततः सदा

भक्तिर् भगवति ब्रह्मणि अनन्य विषया भवत्

11 तस्यानया भगवतः परिकर्म शुद्ध

सत्त् वात्मनस् तद् अनुसम् स्मरणानु पूर्त्या

ज्ञानम् विरक्ति मदभून् निशितेन येन

चिच्छेद सम्शय पदम् निज जीव कोशम्

12 छिन्नान्य धीः अधिगत् आत्म गतिर् निरीहः

तत् तत्यजे ऽच्छिन्न दिदम् वयुनेन येन

तावन् न योग गतिभिः यतिर् अप्रमत्तो

यावद् गदा ग्रज कथासु रतिम् न कुर्यात्

13 एवम् स वीर प्रवरः सम्योज् यात्मानम् आत्मनि

ब्रह्म भूतो दृढम् काले तत्याज स्वम् कळेवरम्

14 सम्पीड्य पायुम् पार्ष्णिभ्याम् वायुम् उत्सारयन् छनैः

नाभ्याम् कोष्ठेषु अवस्थाप्य हृदुरः कण्ठ शीर्षणि

15 उत्सर् पयम्स्तु तम् मूर्ध्नि क्रमेणा वेश्य निःस्पृहः

वायुम् वायौ क्षितौ कायम् तेजस् तेजस्य यूयुजत्

16 खान्या काशे द्रवम् तोये यथा स्थानम् विभागशः

क्षितिम् अम्भसि तत् तेजसि अदो वायौ नभस्यमुम्

17 इन्द्रियेषु मनस्तानि तन् मात्रेषु यथोद् भवम्

भूतादि नामून् युत्कृष्य महत् यात्मनि सन्दधे

18 तम् सर्व गुण विन्यासम् जीवे मायामये न्यधात्

तम् चानु शयम् आत्मस्थम् असावनुश यी पुमान्

ज्ञान वैराग्य वीर्येण स्वरूपस्थो ऽजहात् प्रभुः

19 अर्चिर् नाम महा राज्ञी तत् पत्न् यनुगता वनम्

सुकुमारि अतदर्हा च यत् पद्भ्याम् स्पर्शनम् भुवः

20 अतीव भर्तुः व्रत धर्म निष्ठया शुश्रूषया चार्ष देह यात्रया

नाविन्दत् आर्तिम् परिकर्शि तापि सा प्रेयस् कर स्पर्शन मान निर्वृतिः

21 देहम् विपन् नाखिल चेतन् आदिकम् पत्युः पृथिव्या दयितस्य चात्मनः

आलक्ष्य किञ्चिच्च विलप्य सा सती चिताम् अथारोपयद् अद्रि सानुनि

22 विधाय कृत्यम् ह्रदिनी जला प्लुता दत्त्वोदकम् भर्तुर् उदार कर्मणः

नत्वा दिविस्थाम्स् त्रिदशाम्स् त्रिः परीत्य विवेश वह्निम् ध्यायती भर्तृ पादौ

23 विलोक्यानु गताम् साध्वीम् पृथुम् वीरवरम् पतिम्

तुष्टुवुर् वरदा देवैः देव पत्न्यः सहस्रशः

24 कुर्वत्यः कुसुमा सारम् तस्मिन् मन्दर सानुनि

नदत्सु अमर तूर्येषु गृणन्ति स्म परस्परम्

25 देव्य ऊचुः

अहो इयम् वधूर् धन्या या चैवम् भू भुजाम् पतिम्

सर्वात्मना पतिम् भेजे यज्ञेशम् श्रीर्व धूरिव

26 सैषा नूनम् व्रजत् यूर्ध्वम् अनु वैन्यम् पतिम् सती

पश्यत् आस्मान् अतीत्यार्चिः दुर् विभाव्येन कर्मणा

27 तेषाम् दुरापम् किम् त्वन्यत् मर्त्यानाम् भगवत् पदम्

भुवि लोलायुषो ये वै नैष् कर्म्यम् साधयन्त् युत

28 स वञ्चितो बतात्म ध्रुक् कृच्छ्रेण महता भुवि

लब्ध्वाप वर्ग्यम् मानुष्यम् विषयेषु विषज् जते

29 मैत्रेय उवाच

स्तुवतीषु अमरस्त्रीषु पतिलोकम् गता वधू:

यम् वा आत्म विदाम् धुर्यो वैन्य: प्राप् आच्युत् आश्रय:

30 इत्थम् भूत् आनुभावो ऽसौ पृथु: स भगवत् तम:

कीर्तितम् तस्य चरितम् उद्दाम चरितस्य ते

31 य इदम् सुमहत् पुण्यम् श्रद्धया वहित: पठेत्

श्रावयेच् छृणुयाद् वापि स पृथो: पदवीम् इयात्

32 ब्राह्मणो ब्रह्म वर्चस्वी राजन्यो जगती पति:

वैश्य: पठन् विट्पति: स्याच् छूद्र: सत्तमताम् इयात्

33 त्रि: कृत्व इदमाकर्ण्य नरो नार्य थवा दृता

अप्रज: सुप्रज तमो निर्धनो धन वत्तम:

34 अस्पष्ट कीर्ति: सुयशा मूर्खो भवति पण्डित:

इदम् स्वस्त्ययनम् पुम्साम् अमङ्गल्य निवारणम्

35 धन्यम् यशस्यम् आयुष्यम् स्वर्ग्यम् कलिमलापहम्

धर्म् आर्थ काम मोक्षाणाम् सम्यक् सिद्धिम् अभीप्सुभि:

श्रद्ध यै तद् अनुश्राव्यम् चतुर्णाम् कारणम् परम्

36 विजय् आभिमुखो राजा श्रुत्वै तद् अभियाति यान्

बलिम् तस्मै हरन्त्यग्रे राजान: पृथवे यथा

37 मुक्तान्य सङ्गो भगवति अमलाम् भक्ति मुद्वहन्

वैन्यस्य चरितम् पुण्यम् शृणुयात् छ्रावयेत् पठेत्

38 वैचित्र वीर्या भिहितम् महन् माहात्म्य सूचकम्

अस्मिन् कृतमतिर् मर्त्य: पार्थवीम् गतिम् आप्नुयात्

39 अनुदिनम् इदम् आदरेण शृण्वन् पृथु चरितम् प्रथयन् विमुक्त सङ्ग:

भगवति भव सिन्धुपोत पादे स च निपुणाम् लभते रतिम् मनुष्य:

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

चतुर्थ्थ स्कन्दे त्रयो विम्शो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

अथ चतुर्थ्थ स्कन्द: चतुर् विम्शो ऽध्याय :

स्कन्द- *04:* अध्याय- *24*

*01* मैत्रेय उवाच

विजिताश्वो ऽधि राजा आसीत् पृथु पुत्र: पृथुश्रवा:

यवीयोभ्यो ऽददात् काष्ठा भ्रातृभ्यो भ्रातृ वत्सल:

*02* हर्यक्षाय आदिशत् प्राचीम् धूम्र केशाय दक्षिणाम्

प्रतीचीम् वृक सम्ज्ञाय तुर्याम् द्रविणसे विभु:

*03* अन्तर्धान गतिम् शक्रात् लब्ध्व् आन्तर्धान सम्ज्ञित:

अपत्य त्रयम् आधत्त शिखण्डिन्याम् सु सम्मतम्

*04* पावक: पवमानश् च शुचिर् इत् यग्न य: पुरा

वसिष्ठ शापाद् उत्पन्ना: पुनर्योग गतिम् गता:

*05* अन्तर्धानो नभस् वत्याम् हविर्धानम् अविन्दत

य इन्द्रम् अश्व हर्तारम् विद्वान् अपि न जघ्निवान्

*06* राज्ञाम् वृत्तिम् करा दान दण्ड शुल्कादि दारुणाम्

मन्यमानो दीर्घ सत्त्र व्याजेन विससर्ज ह

*07* तत्रापि हम्सम् पुरुषम् परमात्मानम् आत्मदृक्

यजम्स् तल् लोकताम् आप कुशलेन समाधिना

*08* हविर्धानाद् हविर्धानी विदुरा सूत षट्सुतान्

बर्हिषदम् गयम् शुक्लम् कृष्णम् सत्यम् जित व्रतम्

09 बर्हिषत् सु महाभागो हाविर्धानिः प्रजापतिः

क्रिया काण्डेषु निष्णातो योगेषु च कुरूद्वह

10 यस्येदम् देव यजनम् अनुयज्ञम् वितन्वतः

प्राचीनाग्रैः कुशैर् आसीद् आस्तृतम् वसुधा तलम्

11 सामुद्रीम् देव देवोक्ताम् उपयेमे शत द्रुतिम्

याम् वीक्ष्य चारु सर्वाङ्गीम् किशोरीम् सुष्ठ्व् अलङ्कृताम्

परिक्रमन्तीम् उद्वाहे चकमे ऽग्निः शुकीम् इव

12 विबुध् आसुर गन्धर्व मुनि सिद्ध नरोरगाः

विजिताः सूर्यया दिक्षु क्वणयन्त् यैव नूपुरैः

13 प्राचीन बर्हिषः पुत्राः शत द्रुत्याम् दशा भवन्

तुल्य नाम व्रताः सर्वे धर्म स्नाताः प्रचेतसः

14 पित्रा दिष्टाः प्रजा सर्गे तपसे ऽर्णवम् आविशन्

दश वर्ष सहस्राणि तपस् आर्चम्स् तपस् पतिम्

15 यद् उक्तम् पथि दृष्टेन गिरिशेन प्रसीदता

तद् ध्यायन्तो जपन् तश् च पूज यन्तश् च सम्यताः

16 विदुर उवाच

प्रचेतसाम् गिरित्रेण यथासीत् पथि सङ्गमः

यदुताह हरः प्रीतः तन्नो ब्रह्मन् वदार्थ वत्

17 सङ्गमः खलु विप्रर्षे शिवेनेह शरीरिणाम्

दुर्लभो मुनयो दध्युः असङ्गाद्यम् अभीप्सितम्

18 आत्मा रामो ऽपि यस्त्वस्य लोक कल्पस्य राधसे

शक्त्या युक्तो विचरति घोरया भगवान् भवः

19 मैत्रेय उवाच

प्रचेतसः पितुर् वाक्यम् शिरसा दाय साधवः

दिशम् प्रतीचीम् प्रययुः तपस्या दृत चेतसः

20 समुद्रम् उप विस्तीर्णम् अपश्यन् सु महत्सरः

महन्मन इव स्वच्छम् प्रसन्न सलिलाशयम्

21 नील रक्तोत्पलाम् भोज कह्लारेन् दीव राकरम्

हम्स सारस चक्राह्व कारण्डव निकूजितम्

22 मत्त भ्रमर सौस्वर्य हृष्ट रोम लताङ्घ्रिपम्

पद्म कोश रजो दिक्षु विक्षिपत् पवनोत्सवम्

23 तत्र गान्धर्व माकर्ण्य दिव्य मार्ग मनोहरम्

विसिस्म्यू राज पुत्रास्ते मृदङ्ग पण वाद्यनु

24 तर्ह्येव सरसस् तस्मात् निष्क्रा मन्तम् सहानुगम्

उपगीय मानम् अमर प्रवरम् विबुधानुगैः

25 तप्त हेम निकायाभम् शितिकण्ठम् त्रि लोचनम्

प्रसाद सुमुखम् वीक्ष्य प्रणेमुर् जात कौतुकाः

26 स तान् प्रपन्नार्ति हरो भगवान् धर्म वत्सलः

धर्म ज्ञान् शील सम्पन्नान् प्रीतः प्रीतान् उवाच ह

27 श्री रुद्र उवाच

यूयम् वेदिषदः पुत्रा विदितम् वश्चि कीर्षितम्

अनुग्रहाय भद्रम् व एवम् मे दर्शनम् कृतम्

28 यः परम् रम्हसः साक्षात् त्रिगुणाज् जीव सम्ज्ञितात्

भगवन्तम् वासुदेवम् प्रपन्नः स प्रियो हि मे

29 स्वधर्म निष्ठः शत जन्मभिः पुमान् विरिञ्चताम् एति ततः परम् हि माम्

अव्या कृतम् भागवतो ऽथ वैष्णवम् पदम् यथाहम् विबुधाः कलात्यये

30 अथ भागवता यूयम् प्रियाः स्थ भगवान् यथा

न मद् भागवतानाम् च प्रेयान् अन्यो ऽस्ति कर्हिचित्

31 इदम् विविक्तम् जप्तव्यम् पवित्रम् मङ्गलम् परम्

निः श्रेयस करम् चापि श्रूयताम् तद् वदामि वः

32 मैत्रेय उवाच

इत् यनुक्रोश हृदयो भगवान् आह ताञ् छिवः

बद् धाञ्जलीन् राज पुत्रान् नारायण परो वचः

33 श्री रुद्र उवाच

जितम् त आत्म विद्वर्य स्वस्तये स्वस्ति रस्तु मे

भवता राधसा राद्धम् सर्वस्मा आत्मने नमः

34 नमः पङ्कज नाभाय भूत सूक्ष्मेन्द्रि यात्मने

वासुदेवाय शान्ताय कूटस्थाय स्व रोचिषे

35 सङ्कर्षणाय सूक्ष्माय दुरन्ता यान्तकाय च

नमो विश्व प्रबोधाय प्रद्युम्ना यान्तर् आत्मने

36 नमो नमो ऽनिरुद्धाय हृषी केशेन्द्रि यात्मने

नमः परम हम्साय पूर्णाय निभृत् आत्मने

37 स्वर्गाप वर्ग द्वाराय नित्यम् शुचिषदे नमः

नमो हिरण्य वीर्याय चातुर् होत्राय तन्तवे

38 नम ऊर्ज इषे त्रय्याः पतये यज्ञ रेतसे

तृप्ति दाय च जीवानाम् नमः सर्व रसात्मने

39 सर्व सत्त्वात्म देहाय विशेषाय स्थवीयसे

नमस् त्रैलोक्य पालाय सह ओजो बलाय च

40 अर्थ लिङ्गाय नभसे नमो ऽन्तर् बहिर् आत्मने

नमः पुण्याय लोकाय अमुष्मै भूरि वर्चसे

41 प्रवृत्ताय निवृत्ताय पितृ देवाय कर्मणे

नमो ऽधर्म विपाकाय मृत्यवे दुःख दाय च

42 नमस्त आशिषाम् ईश मनवे कारण् आत्मने

नमो धर्माय बृहते कृष्णाया कुण्ठ मेधसे

पुरुषाय पुराणाय साङ्ख्य योगेश्वराय च

43 शक्ति त्रय समेताय मीढुषे ऽहङ्कृत् आत्मने

चेत आकूति रूपाय नमो वाचो विभूतये

44 दर्शनम् नो दिदृक्षूणाम् देहि भागवत् आर्चितम्

रूपम् प्रियतमम् स्वानाम् सर्वेन्द्रिय गुणाञ्जनम्

45 स्निग्ध प्रावृड् घन श्यामम् सर्व सौन्दर्य सङ्ग्रहम्

चार्वायत चतुर् बाहुम् सुजात रुचिराननम्

46 पद्म कोश पला शाक्षम् सुन्दरभ्रु सुनासिकम्

सुद्विजम् सु कपोलास्यम् सम कर्ण विभूषणम्

47 प्रीति प्रहसिता पाङ्गम् अलकै रुप शोभितम्

लसत् पङ्कज किञ्जल्क दुकूलम् मृष्ट कुण्डलम्

48 स्फुरत् किरीट वलय हार नूपुर मेखलम्

शङ्ख चक्र गदा पद्म माला मण्युत्त मर्द्धिमत्

49 सिम्ह स्कन्धत् विषो बिभ्रत् सौभग ग्रीव कौस्तुभम्

श्रियान पायिन्या क्षिप्त निकषाश् मोर सोल्लसत्

50 पूर रेचक सम्विग्न वलिवल्गुद लोदरम्

प्रति सङ्क्राम यद् विश्वम् नाभ्या आवर्त गभीरया

51 श्यामश्रोण् यधिरो चिष्णु दुकूल स्वर्ण मेखलम्

समचार् वङ्घ्रि जङ्घोरु निम्नजानु सुदर्शनम्

52 पदा शरत् पद्म पलाश रोचिषा नखद् युभिर् नो ऽन्तरघम् विधुन् वता

प्रदर्श य स्वीयम् अपास्त साध्वसम् पदम् गुरो मार्ग गुरुस् तमो जुषाम्

53 एतद् रूपम् अनुध्येयम् आत्म शुद्धिम् अभीप् सताम्

यद् भक्ति योगो ऽभयदः स्वधर्मम् अनुतिष्ठताम्

54 भवान् भक्ति मता लभ्यो दुर्लभः सर्व देहिनाम्

स्वाराज् यस्याप्य भिमत एकान्तेन् आत्म विद्गतिः

55 तम् दुराराध्यम् आराध्य सताम् अपि दुरापया

एकान्त भक्त्या को वाञ्छेत् पाद मूलम् विना बहिः

56 यत्र निर्विष्ट मरणम् कृतान्तो नाभि मन्यते

विश्वम् विध्वम् सयन् वीर्य शौर्य विस्फूर्जित भ्रुवा

57 क्षणार् धेनापि तुलये न स्वर्गम् ना पुनर्भवम्

भगवत् सङ्गि सङ्गस्य मर्त्यानाम् किमुताशिषः

58 अथा नघाङ्घ्रेः तव कीर्ति तीर्थयोः अन्तर्बहिः स्नान विधूत पाप्मनाम्

भूतेषु अनुक्रोश सु सत्त्व शीलिनाम् स्यात् सङ्गमो ऽनुग्रह एष नस्तव

59 न यस्य चित्तम् बहिर् अर्थ विभ्रमम् तमो गुहायाम् च विशुद्ध माविशत्

यद् भक्ति योगानु गृहीतम् अञ्जसा मुनिर् विचष्टे ननु तत्र ते गतिम्

60 यत् रेदम् व्यज्यते विश्वम् विश्वस्मिन् नवभाति यत्

तत्त्वम् ब्रह्म परम् ज्योतिः आकाशम् इव विस्तृतम्

61 यो माययेदम् पुरु रूप या सृजद् बिभर्ति भूयः क्षप यत्य विक्रियः

यद् भेद बुद्धिः सदि वात्म दुःस्थया त्वम् आत्म तन्त्रम् भगवन् प्रतीमहि

62 क्रिया कलापैः इदमेव योगिनः श्रद्धान् विताः साधु यजन्ति सिद्धये

भूतेन्द्रि यान्तः करणोप लक्षितम् वेदे च तन्त्रे च त एव कोविदाः

63 त्वम् एक आद्यः पुरुषः सुप्त सक्तिः तया रजः सत्त्व तमो विभिद्यते

महानहम् खम् मरुद् अग्नि वार्धराः सुरर्षयो भूत गणा इदम् यतः

64 सृष्टम् स्व शक्त्येदम् अनुप्रविष्टः चतुर् विधम् पुरम् आत्माम्श केन

अथो विदुस्तम् पुरुषम् सन्त मन्तः भुङ्क्ते हृषीकैः मधु सारघम् यः

65 स एष लोकान् अति चण्ड वेगो विकर्षसि त्वम् खलु कालयानः

भूतानि भूतैः अनुमेय तत्त्वो घनावलीर् वायुर् इवाविषह्यः

66 प्रमत्त मुच्चैः इति कृत्य चिन्तया प्रवृद्ध लोभम् विषयेषु लालसम्

त्वम् अप्रमत्तः सहसाभि पद्यसे क्षुल्ले लिहानो ऽहिर् इवाखुम् अन्तकः

67 कस्त्वत् पदाब्जम् विजहाति पण्डितो यस्ते ऽवमान व्ययमान केतनः

विशङ्कयास् मद् गुरुर् अर्चति स्म यद् विनोप पत्तिम् मन वश्च तुर् दश

68 अथ त्वमसि नो ब्रह्मन् परमात्मन् विपश्चिताम्

विश्वम् रुद्र भय ध्वस्तम् अकुतश् चिद् भया गतिः

69 इदम् जपत भद्रम् वो विशुद्धा नृप नन्दनाः

स्वधर्मम् अनुतिष्ठन्तो भगवत् यर्पित् आशयाः

70 तम् एव आत्मानम् आत्मस्थम् सर्व भूतेष्व वस्थितम्

पूजयध्वम् गृणन्तश् च ध्यायन् तश् चास कृद् हरिम्

71 योगादेशम् उपासाद्य धारयन्तो मुनि व्रता:

समाहित धिय: सर्व एतद् अभ्यसता दृता:

72 इदम् आह पुरास्माकम् भगवान् विश्वसृक् पति:

भृग्वा दीनाम् आत्मजानाम् सिसृक्षु: सम्सि सृक्षताम्

73 ते वयम् नोदिता: सर्वे प्रजासर्गे प्रजेश्वरा:

अनेन ध्वस्त तमस: सिसृक्ष्मो विविधा: प्रजा:

74 अथेदम् नित्यदा युक्तो जपन् अवहित: पुमान्

अचिरात् छ्रेय आप्नोति वासुदेव परायण:

75 श्रेयसाम् इह सर्वेषाम् ज्ञानम् नि: श्रेय सम् परम्

सुखम् तरति दुष् पारम् ज्ञान नौर् व्यसनार्णवम्

76 य इमम् श्रद्धया युक्तो मद् गीतम् भगवत् स्तवम्

अधीयानो दुरार् आध्यम् हरिम् आराधयत् यसौ

77 विन्दते पुरुषो ऽमुष्माद् यद् यदिच् छत्य सत्वरम्

मद् गीत गीतात् सुप्रीतात् छ्रेयसाम् एक वल्लभात्

78 इदम् य: कल्य उत्थाय प्राञ्जलि: श्रद्धयान् वित:

शृणुयात् छ्रावयेन् मर्त्यो मुच्यते कर्म बन्धनै:

79 गीतम् मयेदम् नरदेव नन्दना: परस्य पुम्स: परमात्मन: स्तवम्

जपन्त एका ग्रधियस् तपो महत् चरध्वम् अन्ते तत आप्स्य थेप्सितम्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

चतुर्थ्थ स्कन्दे चतुर् विम्शो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

अथ चतुर्थ्थ स्कन्दः पञ्च विम्शो ऽध्याय :

स्कन्द- *04:* अध्याय- *25*

*01* मैत्रेय उवाच

इति सन्दिश्य भगवान् बार्हिषदैः अभि पूजितः

पश्यताम् राज पुत्राणाम् तत्रै वान्तर् दधे हरः

*02* रुद्र गीतम् भगवतः स्तोत्रम् सर्वे प्रचेतसः

जपन्तस् ते तपस्तेपुः वर्षाणाम् अयुतम् जले

*03* प्राचीन बर्हिषम् क्षत्तः कर्मस्वा सक्त मानसम्

नारदो ऽध्यात्म तत्त्वज्ञः कृपालुः प्रत्यबोध यत्

*04* श्रेयस्त्वम् कतमद् राजन् कर्मण् आत्मन ईहसे

दुःख हानिः सुखा वाप्तिः श्रेयस् तन् नेह चेष्यते

*05* राजो उवाच

न जानामि महा भाग परम् कर्मा पविद्धधीः

ब्रूहि मे विमलम् ज्ञानम् येन मुच्येय कर्मभिः

*06* गृहेषु कूट धर्मेषु पुत्रदार धनार्थधीः

न परम् विन्दते मूढो भ्राम्यन् सम्सार वर्त्मसु

*07* नारद उवाच

भो भोः प्रजापते राजन् पशून् पश्य त्वयाध् वरे

सम्ज्ञापितान् जीव सङ्घान् निर्घृणेन सहस्रशः

*08* एते त्वाम् सम्प्रती क्षन्ते स्मरन्तो वैशसम् तव

सम्परेतम् अयःकूटैः छिन्दन्ति उत्थितम् अन्यवः

*09* अत्र ते कथयिष्ये ऽमुम् इतिहासम् पुरातनम्

पुरञ्जनस्य चरितम् निबोध गदतो मम

*10* आसीत् पुरञ्जनो नाम राजा राजन् बृहच् छ्रवाः

तस्या अविज्ञात नामा सीत् सखा अविज्ञात चेष्टितः

11 सो ऽन्वेषमाणः शरणम् बभ्राम पृथिवीम् प्रभुः
नानु रूपम् यदा विन्दद् अभूत्स विमना इव
12 न साधु मेने ताः सर्वा भूतले यावतीः पुरः
कामान् कामय मानो ऽसौ तस्य तस्योप पत्तये
13 स एकदा हिमवतो दक्षिणेष् वथ सानुषु
ददर्श नवभिर् द्वार्भिः पुरम् लक्षित लक्षणाम्
14 प्राकारोप वनाट्टाल परिखैः अक्ष तोरणैः
स्वर्ण रौप्याय सैः शृङ्गैः सङ्कुलाम् सर्वतो गृहैः
15 नील स्फटिक वैदूर्य मुक्ता मरक तारुणैः
क्लृत हर्म्यस् थलीम् दीप्ताम् श्रिया भोगवतीम् इव
16 सभा चत्वर रथ्याभिः आक्रीडा यत नापणैः
चैत्य ध्वज पता काभिः युक्ताम् विद्रुम् अवेदिभिः
17 पुर्यास्तु बाह्योप वने दिव्य द्रुमल ताकुले
नदद् विहङ्गालि कुल कोलाहल जलाशये
18 हिम निर्झर विप्रुष्मत् कुसुमा कर वायुना
चलत् प्रवाल विटप नळिनी तट सम्पदि
19 नानारण्य मृग व्रातैः अनाबाधे मुनि व्रतैः
आहूतम् मन्यते पान्थो यत्र कोकिल कूजितैः
20 यदृच्छया गताम् तत्र ददर्श प्रमदो [उ]त्तमाम्
भृत्यैः दशभिर् आयान्ती मेकैक शत नायकैः
21 पञ्च शीर्षाहिना गुप्ताम् प्रतीहारेण सर्वतः
अन्वेषमाणाम् ऋषभम् अप्रौढाम् काम रूपिणीम्
22 सुनासाम् सुदतीम् बालाम् सु कपोलाम् वराननाम्
समविन्यस्त कर्णाभ्याम् बिभ्रतीम् कुण्डल श्रियम्
23 पिशङ्गनीवीम् सुश्रोणीम् श्यामाम् कनक मेखलाम्
पद्भ्याम् क्वणद्भ्याम् चलन्तीम् नूपुरैः देवताम् इव

24 स्तनौ व्यञ्जित कैशोरौ सम वृत्तौ निरन्तरौ

वस्त्रान् तेन निगूहन्तीम् व्रीडया गज गामिनीम्

25 तामाह ललितम् वीरः सव्रीड स्मित शोभनाम्

स्निग्धेनाप् आङ्ग पुङ्खेन स्पृष्टः प्रेमोद् भ्रमद् भ्रुवा

26 का त्वम् कञ्ज पला शाक्षि कस्यासीह कुतः सति

इमाम् उप पुरीम् भीरु किम् चिकीर्षसि शम्स मे

27 क एते ऽनुपथा ये त एकादश महाभटाः

एता वा ललनाः सुभ्रु को ऽयम् ते ऽहिः पुरः सरः

28 त्वम् ह्रीर् भवान् यस् यथ वाग्रमा पतिम् विचिन्वती किम् मुनिवद्र् हो वने

त्वद् अङ्घ्रि कामाप्त समस्त कामम् क्व पद्म कोशः पतितः कराग्रात्

29 नासाम् वरोर् वन्यतमा भुविस्पृक् पुरीम् इमाम् वीर वरेण साकम्

अर्हस् यलङ्कर्तुम् अदभ्र कर्मणा लोकम् परम् श्रीरिव यज्ञ पुम्सा

30 यदेष मापाङ्ग विखण्डि तेन्द्रियम् सव्रीड भाव स्मित विभ्रमद् भ्रुवा

त्वयोप सृष्टो भगवान् मनोभवः प्रबाधते ऽथानु गृहाण शोभने

31 त्वद् आननम् सुभ्रु सुतार लोचनम् व्यालम्बिनी लालक वृन्द सम्वृतम्

उन्नीय मे दर्शय वल्गु वाचकम् यद् व्रीडया नाभि मुखम् शुचिस्मिते

32 नारद उवाच

इत्थम् पुरञ्जनम् नारी याचमानम् अधीरवत्

अभ्यनन्द त तम् वीरम् हसन्ती वीर मोहिता

33 न विदाम वयम् सम्यक् कर्तारम् पुरुषर्षभ

आत्मनश् च परस्यापि गोत्रम् नाम च यत् कृतम्

34 इहाद्य सन्तम् आत्मानम् विदाम न ततः परम्

येनेयम् निर्मिता वीर पुरी शरणम् आत्मनः

35 एते सखायः सख्यो मे नरा नार्यश् च मानद

सुप्तायाम् मयि जागर्ति नागो ऽयम् पालयन् पुरीम्

36 दिष्ट्यागतो ऽसि भद्रम् ते ग्राम्यान् कामान् अभीप्ससे

उद्वहिष्यामि ताम्स्ते ऽहम् स्व बन्धुभिर् अरिन्दम

37 इमाम् त्वम् अधितिष्ठस्व पुरीम् नव मुखीम् विभो

मयोप नीतान् गृह्णानः काम भोगान् शतम् समाः

38 कम् नु त्वद् अन्यम् रमये ह्यरतिज्ञम् अकोविदम्

असम्परा याभि मुखम् अश्वस्तन विदम् पशुम्

39 धर्मो ह्यत्र् आर्थ कामौ च प्रजा नन्दो ऽमृतम् यशः

लोका विशोका विरजा यान् न केवलिनो विदुः

40 पितृ देवरुषि मर्त्यानाम् भूतानाम् आत्मनश् च ह

क्षेम्यम् वदन्ति शरणम् भवे ऽस्मिन् यद् गृहाश्रमः

41 का नाम वीर विख्यातम् वदान्यम् प्रिय दर्शनम्

न वृणीत प्रियम् प्राप्तम् मादृशी त्वादृशम् पतिम्

42 कस्या मनस्ते भुवि भोगि भोगयोः स्त्रिया न सज्जेद् भुजयोर् महाभुज

यो ऽनाथ वर्गाधिम् अलम् घृणोद् धत स्मिताव लोकेन चरत्य पोहितुम्

43 नारद उवाच

इति तौ दम्पती तत्र समुद्य समयम् मिथः

ताम् प्रविश्य पुरीम् राजन् मुमुदाते शतम् समाः

44 उपगीय मानो ललितम् तत्र तत्र च गायकैः

क्रीडन् परिवृतः स्त्रीभिः ह्रदिनीम् आविशच् छुचौ

45 सप्तोपरि कृता द्वारः पुरस् तस्यास्तु द्वे अधः

पृथग् विषय गत्यर्थम् तस्याम् यः कश्चनेश् वरः

46 पञ्च द्वारस्तु पौरस्त्या दक्षिणैका तथोत् तरा

पश्चिमे द्वे अमूषाम् ते नामानि नृप वर्णये

47 खद्योत् आविर्मुखी च प्राग् द्वारा वेकत्र निर्मिते

विभ्राजितम् जन पदम् याति ताभ्याम् द्युमत् सखः

48 नळिनी नाळिनी च प्राग् द्वारा वेकत्र निर्मिते

अवधूत सख स्ताभ्याम् विषयम् याति सौरभम्

49 मुख्या नाम पुरस्ताद् द्वाः तया पणब हूदनौ

विषयौ याति पुरराड् रसज्ञ विपणान् वितः

50 पितृहूर् नृप पुर्या द्वार् दक्षिणेन पुरञ्जनः

राष्ट्रम् दक्षिण पञ्चालम् याति श्रुत धरान्वितः

51 देवहूर् नाम पुर्या द्वा उत्तरेण पुरञ्जनः

राष्ट्रम् उत्तर पञ्चालम् याति श्रुत धरान्वितः

52 आसुरी नाम पश्चाद् द्वाः तया याति पुरञ्जनः

ग्रामकम् नाम विषयम् दुर्मदेन समन्वितः

53 निरृतिर् नाम पश्चाद् द्वाः तया याति पुरञ्जनः

वैशसम् नाम विषयम् लुब्धकेन समन्वितः

54 अन्धावम् ईषाम् पौराणाम् निर्वाक् पेशस् कृता वुभौ

अक्षण्वताम् अधिपतिः ताभ्याम् याति करोति च

55 स यर्ह् यन्तः पुर गतो विषूचीन् असमन्वितः

मोहम् प्रसादम् हर्षम् वा याति जायात्मजोद् भवम्

56 एवम् कर्मसु सम्सक्तः कामात्मा वञ्चितो ऽबुधः

महिषी यद् यदीहेत तत् त देवान् ववर्तत

57 क्वचित् पिबन्त्याम् पिबति मदिराम् मद विह्वलः

अश्नन्त्याम् क्वचिद् अश्नाति जक्षत्याम् सह जक्षिति

58 क्वचिद् गायति गायन्त्याम् रुदत्याम् रुदति क्वचित्

क्वचिद् हसन्त्याम् हसति जल्पन्त्याम् अनु जल्पति

59 क्वचिद् धावति धावन्त्याम् तिष्ठन्त्याम् अनु तिष्ठति

अनु शेते शयानायाम् अन्वास्ते क्वचिद् आसतीम्

60 क्वचिच् छृणोति शृण्वन्त्याम् पश्यन्त्याम् अनु पश्यति

क्वचिज् जिघ्रति जिघ्रन्त्याम् स्पृशन्त्याम् स्पृशति क्वचित्

61 क्वचिच् च शोचतीम् जायाम् अनु शोचति दीनवत्

अनु हृष्यति हृष्यन्त्याम् मुदिताम् अनु मोदते

62 विप्रलब्धो महिष्यैवम् सर्व प्रकृति वञ्चित:

नेच्छन् अनुकरोत् यज्ञ: क्लैब्यात् क्रीडा मृगो यथा

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

चतुर्थ्थ स्कन्दे पञ्च विम्शो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

अथ चतुर्थ्थ स्कन्द: षड् विम्शो ऽध्याय :

स्कन्द- 04: अध्याय- 26

01 नारद उवाच

स एकदा महेष्वासो रथम् पञ्चाश्वम् आशुगम्

द्वीषम् द्वि चक्रम् एकाक्षम् त्रिवेणुम् पञ्च बन्धुरम्

02 एकरश्म् येक दमनम् एक नीडम् द्वि कूबरम्

पञ्च प्रहरणम् सप्त वरूथम् पञ्च विक्रमम्

03 हैमोपस्करम् आरुह्य स्वर्ण वर्माक्ष येषुधि:

एका दश चमू नाथ: पञ्च प्रस्थम् अगाद्वनम्

04 चचार मृगयाम् तत्र दृप्त आत्तेषु कार्मुक:

विहाय जायाम् अतदर्हाम् मृग व्यसन लालस:

05 आसुरीम् वृत्तिम् आश्रित्य घोरात्मा निरनुग्रह:

न्यहनन् निशितैर् बाणै: वनेषु वन गोचरान्

06 तीर्थेषु प्रति दृष्टेषु राजा मेध्यान् पशून् वने

यावद् अर्थमलम् लुब्धो हन्याद् इति नियम्यते

07 य एवम् कर्म नियतम् विद्वान् कुर्वीत मानव:

कर्मणा तेन राजेन्द्र ज्ञानेन न स लिप्यते

08 अन्यथा कर्म कुर्वाणो माना रूढो निबध्यते

गुण प्रवाह पतितो नष्ट प्रज्ञो व्रजत् यधः

09 तत्र निर्भिन्न गात्राणाम् चित्र वाजैः शिली मुखैः

विप्लवो ऽभूद् दुःखि तानाम् दुःसहः करुण् आत्मनाम्

10 शशान् वराहान् महिषान् गवयान् रुरु शल्यकान्

मेध्यान् अन्याम्श् च विविधान् विनिघ्नन् श्रमम् अध्यगात्

11 ततः क्षुत् तृट् परिश्रान्तो निवृत्तो गृह मेयिवान्

कृत स्नानोचिता हारः सम्विवेश गत क्लमः

12 आत्मानम् अर्हयाम् चक्रे धूपा लेप स्रगादिभिः

साध् वलङ्कृत सर्वाङ्गो महिष्याम् आदधे मनः

13 तृप्तो हृष्टः सुदृप्तश् च कन्दर्पा कृष्ट मानसः

न व्यचष्ट वरारोहाम् गृहिणीम् गृह मेधिनीम्

14 अन्तः पुर स्त्रियो ऽपृच्छद् विमना इव वेदिषत्

अपि वः कुशलम् रामाः सेश्वरीणाम् यथा पुरा

15 न तथै तर्हि रोचन्ते गृहेषु गृह सम्पदः

यदि न स्याद् गृहे माता पत्नी वा पति देवता

व्यङ्गे रथ इव प्राज्ञः को नामा सीत दीनवत्

16 क्व वर्तते सा ललना मज्जन्तम् व्यसनार्णवे

या माम् उद्धरते प्रज्ञाम् दीप यन्ती पदे पदे

17 रामा ऊचुः

नर नाथ न जानीमः त्वत् प्रिया यद्व्य वस्यति

भूतले निरवस्तारे शयानाम् पश्य शत्रुहन्

18 नारद उवाच

पुरञ्जनः स्व महिषीम् निरीक्ष् यावध् उताम् भुवि

तत् सङ्गोन् मथि तज्ञानो वैक्लव्यम् परमम् ययौ

19 सान्त्वयन् श्लक्ष्णया वाचा हृदयेन विदूयता

प्रेयस्या: स्नेह सम्रम्भ लिङ्गम् आत्मनि नाभ्यगात्

20 अनुनिन्ये ऽथ शनकै : वीरो ऽनुनय कोविद:

पस्पर्श पाद युगलम् आह चोत् सङ्ग लालिताम्

21 पुरञ्जन उवाच

नूनम् त्व कृत पुण्यास्ते भृत्या येष् वीश्वरा: शुभे

कृताग: स्वात्म सात् कृत्वा शिक्षा दण्डम् न युञ्जते

22 परमो ऽनुग्रहो दण्डो भृत्येषु प्रभुण् आर्पित:

बालो न वेद तत् तन्वि बन्धु कृत्यम् अमर्षण:

23 सा त्वम् मुखम् सुदति सुभ्र्व् अनुराग भार व्रीडा विलम्ब विलसद् हसिताव लोकम्

नीलाल कालिभिर् उपस्कृतम् उन्नसम् न: स्वानाम् प्रदर्शय मनस्विनि वल्गु वाक्यम्

24 तस्मिन् दधे दममहम् तव वीर पत्नि यो ऽन्यत्र भूसुर कुलात् कृत किल्बिषस्तम्

पश्ये न वीत भयम् उन्मुदितम् त्रि लोक्याम् अन्यत्र वै मुररि पो: इतरत्र दासात्

25 वक्त्रम् न ते वितिलकम् मलिनम् विहर्षम् सम्रम्भ भीमम् अविमृष्टम् अपेतरागम्

पश्ये स्तना वपि शुचोप हतौ सुजातौ बिम्बाधरम् विगत कुङ्कुम पङ्करागम्

26 तन्मे प्रसीद सुहृद: कृत किल्बिषस्य स्वैरम् गतस्य मृगयाम् व्यसनातु रस्य

का देवरम् वशगतम् कुसुमास्त्र वेग विस्रस्त पौम्स्नम् उशती न भजेत कृत्ये

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

चतुर्थ्थ स्कन्दे षड् विम्शो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

अथ चतुर्थ्थ स्कन्द: सप्त विम्शो ऽध्याय :

*01* नारद उवाच

इत्थम् पुरञ्जनम् सध्र्यग् वशमानीय विभ्रमै:

पुरञ्जनी महाराज रेमे रमयती पतिम्

*02* स राजा महिषीम् राजन् सुस्नाताम् रुचिराननाम्

कृतस्वस् त्ययनाम् तृप्ताम् अभ्य नन्दद् उपागताम्

*03* तयोप गूढ: परिरब्ध कन्धरो रहो ऽनु मन्त्रै: अपकृष्ट चेतन:

न कालरम्हो बुबुधे दुरत्ययम् दिवा निशेति प्रमदा परिग्रह:

*04* शयान उन्नद्ध मदो महा मना महार्ह तल्पे महिषी भुजोपधि:

तामेव वीरो मनुते परम् यत: तमो ऽभिभूतो न निजम् परम् च यत्

*05* तयैवम् रम माणस्य काम कश्मल चेतस:

क्षणार्धम् इव राजेन्द्र व्यति क्रान्तम् नवम् वय:

*06* तस्याम् अजनयत् पुत्रान् पुरञ्जन्याम् पुरञ्जन:

शतान् येकादश विराड् आयुषो ऽर्धम् अथात्य गात्

*07* दुहित्रॄ: दशोत् तर शतम् पितृ मातृ यशस्करी:

शीलौ दार्य गुणोपेता: पौरञ्जन्य: प्रजापते

*08* स पञ्चाल पति: पुत्रान् पितृ वम्श विवर्धनान्

दारै: सम्योज या मास दुहित्रॄ: सदृशैर् वरै:

*09* पुत्राणाम् चाभवन् पुत्रा एकैकस्य शतम् शतम्

यैर्वै पौरञ्जनो वम्श: पञ्चालेषु समेधित:

*10* तेषु तद्रिक्थ हारेषु गृह कोशानु जीविषु

निरूढेन ममत्वेन विषयेषु अन्व बध्यत

*11* ईजे च क्रतुभिर् घोरै: दीक्षित: पशु मारकै:

देवान् पितॄन् भूत पतीन् नाना कामो यथा भवान्

*12* युक्तेष् वेवम् प्रमत् तस्य कुटुम्बा सक्त चेतस:

आस साद स वै कालो यो ऽप्रिय: प्रिय योषिताम्

13 चण्डवेग इति ख्यातो गन्धर्वाधि पतिर् नृप

गन्धर्वास् तस्य बलिनः षष्ट् युत्तर शत त्रयम्

14 गन्धर् व्यस्ताद् ऋशी रस्य मैथुन्यश् च सिता सिताः

परि वृत्त्या विलुम्पन्ति सर्व काम विनिर्मिताम्

15 ते चण्ड वेगानु चराः पुरञ्जन पुरम् यदा

हर्तुम् आरेभिरे तत्र प्रत्य षेधत् प्रजागरः

16 स सप्तभिः शतैर् एको विम्शत्या च शतम् समाः

पुरञ्जन पुराध् यक्षो गन्धर्वैर् युयुधे बली

17 क्षीयमाणे स्व सम्बन्धे एकस्मिन् बहुभिर् युधा

चिन्ताम् पराम् जगा मार्तः सराष्ट्र पुर बान्धवः

18 स एव पुर्याम् मधुभुक् पञ्चालेषु स्व पार्षदैः

उपनीतम् बलिम् गृह्णन् स्त्रीजितो नाविदद् भयम्

19 कालस्य दुहिता काचित् त्रिलोकीम् वरम् इच्छती

पर्यटन्ती न बर्हिष्मन् प्रत् यनन्दत कश्चन

20 दौर् भाग्येन् आत्मनो लोके विश्रुता दुर्भगेति सा

या तुष्टा राजरुषये तु वृतादात् पूरवे वरम्

21 कदाचिद् अटमाना सा ब्रह्म लोकान् महीम् गतम्

वव्रे बृहद् व्रतम् माम् तु जानती काम मोहिता

22 मयि सम्रभ्य विपुलम् अदाच् छापम् सुदुः सहम्

स्थातुम् अर्हसि नै कत्र मद्याच्ञा विमुखो मुने

23 ततो विहत सङ्कल्पा कन्यका यवनेश्वरम्

मयोप दिष्ट मासाद्य वव्रे नाम्ना भयम् पतिम्

24 ऋषभम् यवनानाम् त्वाम् वृणे वीरेप्सितम् पतिम्

सङ्कल्प स्त्वयि भूतानाम् कृतः किल न रिष्यति

25 द्वाविमौ अनुशोचन्ति बालौ असद वग्रहौ

यल् लोक शास्त्रो पनतम् न राति न तदिच् छति

26 अथो भजस्व माम् भद्र भजन्तीम् मे दयाम् कुरु

एतावान् पौरुषो धर्मो यद् आर्तान् अनुकम्पते

27 काल कन्यो दित वचो निशम्य यवनेश्वर:

चिकीर्षु: देव गुह्यम् स सस्मितम् ताम भाषत

28 मया निरूपितस् तुभ्यम् पतिर् आत्म समाधिना

नाभि नन्दति लोको ऽयम् त्वाम् अभद्राम् असम्मताम्

29 त्वम् अव्यक्त गतिर् भुङ्क्ष्व लोकम् कर्म विनिर्मितम्

या हि मे पृतना युक्ता प्रजा नाशम् प्रणेष्यसि

30 प्रज्वारो ऽयम् मम भ्राता त्वम् च मे भगिनी भव

चराम् युभाभ्याम् लोके ऽस्मिन् अव्यक्तो भीम सैनिक:

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

चतुर्थ्थ स्कन्दे सप्त विम्शो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

अथ चतुर्थ्थ स्कन्द: अष्टा विम्शो ऽध्याय :

स्कन्द- 04: अध्याय- 28

01 नारद उवाच

सैनिका भयनाम् नो ये बर्हिष्मन् दिष्ट कारिण:

प्रज्वार काल कन्याभ्याम् विचेरुरव नीमिमाम्

02 त एकदा तु रभसा पुरञ्जन पुरीम् नृप

रुरुधु: भौम भोगाढ्याम् जरत् पन्नग पालिताम्

03 काल कन्यापि बुभुजे पुरञ्जन पुरम् बलात्

ययाभि भूतः पुरुषः सद्यो निःसारताम् इयात्

04 त योप भुज्य मानाम् वै यवनाः सर्वतो दिशम्

द्वार्भिः प्रविश्य सुभृशम् प्रार्दयन् सकलाम् पुरीम्

05 तस्याम् प्रपीड्य मानायाम् अभिमानी पुरञ्जनः

अवापोरु विधाम् स्तापान् कुटुम्बी ममता कुलः

06 कन्योप गूढो नष्टश्रीः कृपणो विषयात्मकः

नष्ट प्रज्ञो हृत् ऐश्वर्यो गन्धर्व यवनैर् बलात्

07 विशीर्णाम् स्वपुरीम् वीक्ष्य प्रतिकूलान् अनादृतान्

पुत्रान् पौत्रानु गामात्यान् जायाम् च गत सौहृदाम्

08 आत्मानम् कन्यया ग्रस्तम् पञ्चालान् अरिदूषितान्

दुरन्त चिन्ताम् आपन्नो न लेभे तत् प्रति क्रियाम्

09 कामान् अभिलषन् दीनो यातया माम्श् च कन्यया

विगत् आत्म गति स्नेहः पुत्र दाराम्श् च लालयन्

10 गन्धर्व यवना क्रान्ताम् काल कन्योप मर्दिताम्

हातुम् प्रचक्रमे राजा ताम् पुरीम् अनिकामतः

11 भय नाम्नो ऽग्रजो भ्राता प्रज्वारः प्रत् युपस्थितः

ददाह ताम् पुरीम् कृत्स्नाम् भ्रातुः प्रियचि कीर्षया

12 तस्याम् सन्दह्य मानायाम् सपौरः सपरिच् छदः

कौटुम्बि कः कुटुम्बिन्या उपातप् यत सान्वयः

13 यवनोप रुद्धाय तनो ग्रस्तायाम् काल कन्यया

पुर्याम् प्रज्वार सम्सृष्टः पुरपालो ऽन्वतप् यत

14 न शेके सो ऽवितुम् तत्र पुरु कृच्छ्रोरु वेपथुः

गन्तुम् ऐच्छत् ततो वृक्ष कोटराद् इव सानलात्

15 शिथिला वयवो यर्हि गन्धर्वैः हृत पौरुषः

यवनैर् अरिभी राजन् उपरुद्धो रुरोद ह

16 दुहितॄः पुत्र पौत्राम्श् च जामि जामातृ पार्षदान्

स्वत्वा वशिष्टम् यत् किञ्चिद् गृह कोश परिच्छदम्

17 अहम् ममेति स्वीकृत्य गृहेषु कुमतिर् गृही

दध्यौ प्रमदया दीनो विप्रयोग उपस्थिते

18 लोकान्तरम् गतवति मय्यनाथा कुटुम्बिनी

वर्तिष्यते कथम् त्वेषा बालकान् अनुशोचती

19 न मय्य नाशिते भुङ्क्ते नास्नाते स्नाति मत्परा

मयि रुष्टे सुसन् त्रस्ता भर्त्सिते यतवाग् भयात्

20 प्रबोधयति माविज्ञम् व्युषिते शोक कर्शिता

वर्त्मै तद् गृहमे धीयम् वीरसूर् अपि नेष्यति

21 कथम् नु दारका दीना दारकीर् वापरायणाः

वर्तिष्यन्ते मयि गते भिन्न नाव इवोदधौ

22 एवम् कृपणया बुद्ध्या शोचन्तम् अत दर्हणम्

ग्रहीतुम् कृत धीरेनम् भय नामाभ्य पद्यत

23 पशु वद् यवनैर् एष नीयमानः स्वकम् क्षयम्

अन्वद्रवन् अनुपथाः शोचन्तो भृश मातुराः

24 पुरीम् विहा योपगत उपरुद्धो भुजङ्गमः

यदा तमेवानु पुरी विशीर्णा प्रकृतिम् गता

25 विकृष्यमाणः प्रसभम् यवनेन बलीयसा

नाविन्दत् तमसा विष्टः सखायम् सुहृदम् पुरः

26 तम् यज्ञ पशवो ऽनेन सम्ज्ञप्ता ये ऽदयालुना

कुठारैः चिच्छिदुः क्रुद्धाः स्मरन्तो ऽमीवम् अस्य तत्

27 अनन्त पारे तमसि मग्नो नष्ट स्मृतिः समाः

शाश्वतीर् अनुभू यार्तिम् प्रमदा सङ्ग दूषितः

28 ताम् एव मनसा गृहणन् बभूव प्रमदो [उ]त्तमा

अनन्तरम् विदर्भस्य राज सिम्हस्य वेश्मनि

29 उपयेमे वीर्य पणाम् वैदर्भीम् मलय ध्वजः

युधि निर्जित्य राजन्यान् पाण्ड्य: पर पुरञ्जय:

30 तस्याम् स जनयाम् चक्र आत्मजाम् असि तेक्षणाम्

यवीयस: सप्त सुतान् सप्त द्रविड भू भृत:

31 एकै कस्या भवत् तेषाम् राजन् अर्बुदम् अर्बुदम्

भोक्ष्यते यद् वम्श धरै: मही मन्वन्तरम् परम्

32 अगस्त्य: प्राग्दु हितरम् उपयेमे धृत व्रताम्

यस्याम् दृढच्युतो जात इध्मवाह् आत्मजो मुनि:

33 विभज्य तनयेभ्य: क्ष्माम् राजरुषिर् मलयध्वज:

आरिराध यिषु: कृष्णम् स जगाम कुलाचलम्

34 हित्वा गृहान् सुतान् भोगान् वैदर्भी मदि रेक्षणा

अन्वधावत पाण्ड्येशम् ज्योत्स्नेव रजनी करम्

35 तत्र चन्द्रवसा नाम ताम्रपर्णी वटोदका

तत् पुण्य सलिलै: नित्यम् उभयत् रात्मनो मृजन्

36 कन्दाष्टिभि: मूलफलै: पुष्प पर्णै: तृणोदकै:

वर्तमान: शनै: गात्र कर्शनम् तप आस्थित:

37 शीतोष्ण वात वर्षाणि क्षुत्पि पासे प्रिया प्रिये

सुख दु:खे इति द्वन्द्वानि अजयत् सम दर्शन:

38 तपसा विद्यया पक्व कषायो नियमैर् यमै:

युयुजे ब्रह्मणि आत्मानम् विजिता क्षानि लाशय:

39 आस्ते स्थाणुर् इवै कत्र दिव्यम् वर्ष शतम् स्थिर:

वासुदेवे भगवति नान्यद् वेदोद् वहन् रतिम्

40 स व्याप कत यात्मानम् व्यति रिक्त तयात्मनि

विद्वान् स्वप्न इवा मर्श साक्षिणम् विरराम ह

41 साक्षाद् भगव तोक्तेन गुरुणा हरिणा नृप

विशुद्ध ज्ञान दीपेन स्फुरता विश्वतो मुखम्

42 परे ब्रह्मणि चात्मानम् परम् ब्रह्म तथ् आत्मनि

वीक्षमाणो विहायेक्षाम् अस्माद् उपरराम ह

43 पतिम् परम धर्मज्ञम् वैदर्भी मलय ध्वजम्

प्रेम्णा पर्यचरद् हित्वा भोगान्सा पति देवता

44 चीरवासा व्रत क्षामा वेणी भूत शिरोरुहा

बभौ उप पतिम् शान्ता शिखा शान्तम् इवानलम्

45 अजानती प्रिय तमम् यदो [उ]परतम् अङ्गना

सुस्थिर् आसनम् आसाद्य यथा पूर्वम् उपाचरत्

46 यदा नोपलभे ताङ्घ्रौ ऊष्माणम् पत्युर् अर्चती

आसीत् सम्विग्न हृदया यूथ भ्रष्टा मृगी यथा

47 आत्मानम् शोचती दीनम् अबन्धुम् विक्ल वाश्रुभिः

स्तनावा सिच्य विपिने सुस्वरम् प्ररुरोद सा

48 उत्तिष्ठो [उ]त्तिष्ठ राजर्षे इमाम् उदधिमे खलाम्

दस्युभ्यः क्षत्र बन्धुभ्यो बिभ्यतीम् पातु मर्हसि

49 एवम् विलपती बाला विपिने ऽनुगता पतिम्

पतिता पादयोर् भर्तू रुदत् यश्रूनि अवर्तयत्

50 चितिम् दारु मयीम् चित्वा तस्याम् पत्युः कळेवरम्

आदीप्य चानु मरणे विलपन्ती मनो दधे

51 तत्र पूर्वतरः कश्चित् सखा ब्राह्मण आत्मवान्

सान्त्वयन् वल्गुना साम्ना तामाह रुदतीम् प्रभो

52 ब्राह्मण उवाच

का त्वम् कस्यासि को वायम् शयानो यस्य शोचसि

जानासि किम् सखायम् माम् येन् आग्रे विचचर्थ ह

53 अपि स्मरसि चात्मानम् अविज्ञात सखम् सखे

हित्वा माम् पदम् अन्विच्छन् भौम भोगरतो गतः

54 हम्सा वहम् च त्वम् चार्य सखायौ मानसा यनौ

अभूताम् अन्तरा वौकः सहस्र परिवत्सरान्

55 स त्वम् विहाय माम् बन्धो गतो ग्राम्य मतिर् महीम्

विचरन् पदम् अद्राक्षीः कयाचिन् निर्मितम् स्त्रिया

56 पञ्चा रामम् नव द्वारम् एकपालम् त्रि कोष्ठकम्

षट्कुलम् पञ्च विपणम् पञ्च प्रकृति स्त्री धवम्

57 पञ्चे [इ]न्द्रियार्था आरामा द्वारः प्राणा नव प्रभो

तेजो ऽबन्नानि कोष्ठानि कुलम् इन्द्रिय सङ्ग्रहः

58 विपणस्तु क्रिया शक्तिः भूत प्रकृतिर् अव्यया

शक्त् यधीशः पुमाम्स् त्वत्र प्रविष्टो नाव बुध्यते

59 तस्मिम् स्त्वम् रामया स्पृष्टो रममाणो ऽश्रुत स्मृतिः

तत् सङ्गाद् ईदृशीम् प्राप्तो दशाम् पापीयसीम् प्रभो

60 न त्वम् विदर्भ दुहिता नायम् वीरः सुहृत् तव

न पतिस्त्वम् पुरञ्जन्या रुद्धो नवमुखे यया

61 माया ह्येषा मया सृष्टा यत् पुमाम्सम् स्त्रियम् सतीम्

मन्यसे नोभयम् यद्वै हम्सौ पश्याव योर्गतिम्

62 अहम् भवान् न चान् यस्त्वम् त्वमे वाहम् विचक्ष्व भोः

न नौ पश्यन्ति कवयः छिद्रम् जातु मनाग् अपि

63 यथा पुरुष आत्मानम् एकम् आदर्श चक्षुषोः

द्विधा भूतम् अवेक्षेत तथै वान्तरम् आवयोः

64 एवम् स मानसो हम्सो हम्सेन प्रति बोधितः

स्वस्थः तद् व्यभिचारेण नष्टाम् आप पुनः स्मृतिम्

65 बर्हिष्मन् एतदध् यात्मम् पारोक्ष्येण प्रदर्शितम्

यत् परोक्ष प्रियो देवो भगवान् विश्व भावनः

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

चतुर्थ्थ स्कन्दे अष्टा विम्शो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

अथ चतुर्थ्थ स्कन्द: एकोन त्रिम्शो ऽध्याय :

स्कन्द- 04: अध्याय- 29

01 प्राचीन बर्हिर् उवाच

भगवम्स्ते वचो ऽस्माभि: न सम्यग् अवगम् यते

कवय: तद् विजानन्ति न वयम् कर्म मोहिता:

02 नारद उवाच

पुरुषम् पुरञ्जनम् विद्याद् यद् व्यनक्त् यात्मन: पुरम्

एकद् वित्रि चतुष् पादम् बहु पादम् अपादकम्

03 यो ऽविज्ञाता हृतस् तस्य पुरुषस्य सखेश्वर:

यन् न विज्ञायते पुम्भि: नामभिर्वा क्रिया गुणै:

04 यदा जिघृक्षन् पुरुष: कात्स्न्र्येन प्रकृतेर् गुणान्

नवद्वारम् द्विहस् ताङ्घ्रि तत्रा मनुत साध्विति

05 बुद्धिम् तु प्रमदाम् विद्यात् ममाहम् इति यत् कृतम्

याम् अधिष्ठाय देहे ऽस्मिन् पुमान् भुङ्क्ते ऽक्षभिर् गुणान्

06 सखाय इन्द्रिय गणा ज्ञानम् कर्म च यत् कृतम्

सख्य: तद् वृत्तय: प्राण: पञ्च वृत्तिर् यथो रग:

07 बृहद्बलम् मनो विद्याद् उभयेन्द्रिय नायकम्

पञ्चाला: पञ्च विषया यन्मध्ये नवखम् पुरम्

08 अक्षिणी नासिके कर्णौ मुखम् शिश्न गुदाविति

द्वे द्वे द्वारौ बहिर्याति यस्तद् इन्द्रिय सम्युत:

09 अक्षिणी नासिके आस्यम् इति पञ्च पुर: कृता:

दक्षिणा दक्षिण: कर्ण उत्तरा चोत्तर: स्मृत:

10 पश्चिमे इत् यधो द्वारौ गुदम् शिश्नम् इहोच्यते

खद्योत् आविर्मुखी चात्र नेत्रे एकत्र निर्मिते

रूपम् विभ्राजितम् ताभ्याम् विचष्टे चक्षु षेश्वरः

11 नळिनी नाळिनी नासे गन्धः सौरभ उच्यते

घ्राणो ऽवधूतो मुख्यास्यम् विपणो वाग्रस विद्रसः

12 आपणो व्यवहारो ऽत्र चित्रम् अन्धो बहूदनम्

पितृहूर् दक्षिणः कर्ण उत्तरो देवहूः स्मृतः

13 प्रवृत्तम् च निवृत्तम् च शास्त्रम् पञ्चाल सञ्ज्ञितम्

पितृयानम् देवयानम् श्रोत्रात् छ्रुतधराद् व्रजेत्

14 आसुरी मेढ्रम् अर्वाग्द्वाः व्यवायो ग्रामिणाम् रतिः

उपस्थो दुर्मदः प्रोक्तो निरृतिर् गुद उच्यते

15 वैशसम् नरकम् पायुः लुब्धको ऽन्धौ तु मे शृणु

हस्त पादौ पुमाम् स्ताभ्याम् युक्तो याति करोति च

16 अन्तः पुरम् च हृदयम् विषूचिर् मन उच्यते

तत्र मोहम् प्रसादम् वा हर्षम् प्राप्नोति तद् गुणैः

17 यथा यथा विक्रियते गुणाक्तो विकरोति वा

तथा तथोप द्रष्ट् आत्मा तद् वृत्तीर् अनुकार्यते

18 देहो रथस्तु इन्द्रियाश्वः सम्वत्सर रयो ऽगतिः

द्वि कर्म चक्रस् त्रिगुण ध्वजः पञ्चासु बन्धुरः

19 मनोरश्मिः बुद्धि सूतो हृन्नीडो द्वन्द्व कूबरः

पञ्चे [इ]न्द्रियार्थ प्रक्षेपः सप्त धातु वरूथकः

20 आकूतिर् विक्रमो बाह्यो मृग तृष्णाम् प्रधावति

एका दशे [इ]न्द्रिय चमूः पञ्च सूनावि नोद कृत्

21 सम्वत्सरश् चण्डवेगः कालो येनोप लक्षितः

तस्या हानीह गन्धर्वा गन्धर्व्यो रात्र यः स्मृताः

हरन्त्यायुः परि क्रान्त्या षष्ट् युत्तर शत त्रयम्

22 काल कन्या जरा साक्षात् लोकस्ताम् नाभि नन्दति

स्वसारम् जगृहे मृत्यु: क्षयाय यवनेश्वर:

23 आधयो व्याधयस् तस्य सैनिका यवनाश् चरा:

भूतोप सर्गा शुरय: प्रज्वारो द्विविधो ज्वर:

24 एवम् बहुविधैर् दु:खै: दैव भूतात्म सम्भवै:

क्लिश्यमान: शतम् वर्षम् देहे देही तमो वृत:

25 प्राणे [इ]न्द्रिय मनो धर्मान् आत्मन् यध्यस्य निर्गुण:

शेते कामलवान् ध्यायन् ममाहम् इति कर्मकृत्

26 यद् आत्मानम् अविज्ञाय भगवन्तम् परम् गुरुम्

पुरुषस्तु विषज्जेत गुणेषु प्रकृते: स्वदृक्

27 गुण् आभिमानी स तदा कर्माणि कुरुते ऽवश:

शुक्लम् कृष्णम् लोहितम् वा यथा कर्माभि जायते

28 शुक्लात् प्रकाश भूयिष्ठान् लोकान् आप्नोति कर्हिचित्

दु:खो दर्कान् क्रिया यासाम्स् तम: शोकोत् कटान् क्वचित्

29 क्वचित् पुमान् क्वचिच् च स्त्री क्वचिन् नोभयम् अन्धधी:

देवो मनुष्य: तिर्यग्वा यथा कर्म गुणम् भव:

30 क्षुत् परीतो यथा दीन: सारमेयो गृहम् गृहम्

चरन् विन्दति यद् दिष्टम् दण्डम् ओदनम् एव वा

31 तथा कामाशयो जीव उच्चावच पथा भ्रमन्

उपर्यधो वा मध्ये वा याति दिष्टम् प्रिया प्रियम्

32 दु:खेषु एकतरेण् आपि दैव भूतात्म हेतुषु

जीवस्य न व्यवच् छेद: स्याच्चेत् तत् तत् प्रति क्रिया

33 यथा हि पुरुषो भारम् शिरसा गुरु मुद्वहन्

तम् स्कन्धेन स आधत्ते तथा सर्वा: प्रतिक्रिया:

34 नैकान्तत: प्रतीकार: कर्मणाम् कर्म केवलम्

द्वयम् ह्यविद्योप सृतम् स्वप्ने स्वप्न इवानघ

35 अर्थे ह्यविद्य माने ऽपि सम्सृतिर् न निवर्तते

मनसा लिङ्ग रूपेण स्वप्ने विचरतो यथा

36 अथात्मनो ऽर्थ भूतस्य यतो ऽनर्थ परम्परा

सम्सृतिः तद् व्यवच्छेदो भक्त्या परमया गुरौ

37 वासुदेवे भगवति भक्ति योगः समाहितः

सध्री चीनेन वैराग्यम् ज्ञानम् च जनयिष्यति

38 सो ऽचिरा देव राजरुषे स्याद् अच्युत कथाश्रयः

शृण्वतः श्रद्ध धानस्य नित्यदा स्याद् अधीयतः

39 यत्र भागवता राजन् साधवो विशदा शयाः

भगवद् गुणानु कथन श्रवण व्यग्र चेतसः

40 तस्मिन् महन् मुखरिता मधुभिच् चरित्र पीयूष शेष सरितः परितः स्रवन्ति

ता ये पिबन्ति अवितृषो नृप गाढ कर्णैः तान्न स्पृशन्ति अशन तृड् भय शोक मोहाः

41 एतैर् उपद्रुतो नित्यम् जीवलोकः स्वभावजैः

न करोति हरेर् नूनम् कथ् आमृत निधौ रतिम्

42 प्रजापति पतिः साक्षाद् भगवान् गिरिशो मनुः

दक्षादयः प्रजाध् यक्षा नैष्ठिकाः सनकादयः

43 मरीचिः अत्रि अङ्गिरसौ पुलस्त्यः पुलहः क्रतुः

भृगुर् वसिष्ठ इत्येते मदन्ता ब्रह्म वादिनः

44 अद्यापि वाचस् पतयः तपो विद्या समाधिभिः

पश्यन्तो ऽपि न पश्यन्ति पश्यन्तम् परमेश्वरम्

45 शब्द ब्रह्मणि दुष्पारे चरन्त उरुविस्तरे

मन्त्र लिङ्गैर् व्यवच् छिन्नम् भजन्तो न विदुः परम्

46 यदा यम् अनुग्रुह्णाति भगवान् आत्म भावितः

स जहाति मतिम् लोके वेदे च परि निष्ठिताम्

47 तस्मात् कर्मसु बर्हिष्मन् अज्ञानाद् अर्थ काशिषु

मार्थ द्रुष्टिम् क्रुथाः श्रोत्र स्पर्शिषु अस्प्रुष्ट वस्तुषु

48 स्वम् लोकम् न विदुस्ते वै यत्र देवो जनार्दन:

आहुर् धूम्र धियो वेदम् सकर्मकम् अतद्विद:

49 आस्तीर्य दर्भै: प्रागग्रै: कात्स्न्र्येन क्षिति मण्डलम्

स्तब्धो बृहद् वधान् मानी कर्म नावैषि यत्परम्

तत्कर्म हरितोषम् यत् सा विद्या तन् मतिर् यया

50 हरि: देह भृताम् आत्मा स्वयम् प्रकृतिर् ईश्वर:

तत् पाद मूलम् शरणम् यत: क्षेमो नृणामिह

51 स वै प्रियतमश् चात्मा यतो न भयम् अण्वपि

इति वेद स वै विद्वान् यो विद्वान् स गुरुर् हरि:

52 नारद उवाच

प्रश्न एवम् हि सञ्छिन्नो भवत: पुरुषर्षभ

अत्र मे वदतो गुह्यम् निशामय सुनिश् चितम्

53 क्षुद्रम् चरम् सु मनसाम् शरणे मिथित्वा

रक्तम् षडङ्घ्रि गणसामसु लुब्ध कर्णम्

अग्रे वृकान् असुतृपो ऽविगणय्य यान्तम्

पृष्ठे मृगम् मृगय लुब्धक बाण भिन्नम्

54 अस्यार्थ: सुमन :स धर्मणाम् स्त्रीणाम् शरण आश्रमे पुष्प मधु गन्धवत् क्षुद्र तमम् काम्य कर्म विपाकजम्-काम सुखलवम् जैह्वव्यौपस् थ्यादि विचिन् वन्तम्-मिथुनी भूय तद् अभि निवेशित मनसम् षडङ्घ्रि गण साम गीतवद् अति मनोहर वनितादि जना लापेषु अतितराम् अति प्रलोभित कर्ण मग्रे-व्रुक यूथवद् आत्मन आयुर् हरतो ऽहो रात्रान् तान् काल लव विशेषान् अविगणय्य गृहेषु विहरन्तम् पृष्ठत एव परोक्षम् अनु प्रवृत्तो लुब्धक:-कृतान्तो ऽन्त: शरेण यमिह परा विध्यति तम् इमम् आत्मानम् अहो राजन् भिन्न हृदयम् द्रष्टु मर्हसी ति

55 स त्वम् विचक्ष्य मृग चेष्टितम् आत्मनो ऽन्त:

चित्तम् नियच्छ हृदि कर्ण धुनीम् च चित्ते

जह्यङ्गन् आश्रमम् असत्तम यूथ गाथम्

प्रीणीहि हम्स शरणम् विरम क्रमेण

56 राजो उवाच

श्रुतम् अन्वीक्षितम् ब्रह्मन् भगवान् यद भाषत

नैतज् जानन्त् युपाध्याया: किम् न ब्रूयु: विदुर् यदि

57 सम्शयो ऽत्र तु मे विप्र सञ्छिन्न: तत् कृतो महान्

ऋषयो ऽपि हि मुह्यन्ति यत्र नेन्द्रिय वृत्तय:

58 कर्माण् या रभते येन पुमान् इह विहाय तम्

अमुत्रान् येन देहेन जुष्टानि स यदश्नुते

59 इति वेद विदाम् वाद: श्रूयते तत्र तत्र ह

कर्म यत् क्रियते प्रोक्तम् परोक्षम् न प्रकाशते

60 नारद उवाच

येनैवा रभते कर्म तेनैवा मुत्र तत् पुमान्

भुङ्क्ते ह्यव्यव धानेन लिङ्गेन मनसा स्वयम्

61 शयानम् इमम् उत्सृज्य श्वसन्तम् पुरुषो यथा

कर्मात्मन् याहितम् भुङ्क्ते तादृशे नेतरेण वा

62 ममैते मनसा यद् यद् असौ अहम् इति ब्रुवन्

गृह्णीयात् तत् पुमान् राद्धम् कर्म येन पुनर्भव:

63 यथानु मीयते चित्तम् उभयैर् इन्द्रि येहितै:

एवम् प्राग् देहजम् कर्म लक्ष्यते चित्त वृत्तिभि:

64 नानु भूतम् क्व चानेन देहेना दृष्ट मश्रुतम्

कदाचिद् उपलभ्येत यद् रूपम् यादृ गात्मनि

65 तेनास्य तादृशम् राजन् लिङ्गिनो देह सम्भवम्

श्रद्धत् स्वान् अनुभूतो ऽर्थो न मन: स्प्रष्टु मर्हति

66 मन एव मनुष्यस्य पूर्व रूपाणि शम्सति

भविष्य तश् च भद्रम् ते तथैव न भविष् यत:

67 अदृष्टम् अश्रुतम् चात्र क्वचिन् मनसि दृश्यते

यथा तथानु मन्तव्यम् देश काल क्रियाश्रयम्

68 सर्वे क्रमानु रोधेन मनस् ईन्द्रिय गोचरा:

आयान्ति बहुशो यान्ति सर्वे समनसो जना:

69 सत्त्वैक निष्ठे मनसि भगवत् पार्श्व वर्तिनि

तमश् चन्द्र मसी वेदम् उपरज्याव भासते

70 नाहम् ममेति भावो ऽयम् पुरुषे व्यवधी यते

यावद् बुद्धि मनो ऽक्षार्थ गुण व्यूहो ह्यनादिमान्

71 सुप्ति मूर्च्छोप तापेषु प्राणायन विघा ततः

नेहते ऽहमिति ज्ञानम् मृत्यु प्रज्वारयोर् अपि

72 गर्भे बाल्ये ऽप्य पौष् कल्याद् एकादश विधम् तदा

लिङ्गम् न दृश्यते यूनः कुहवाम् चन्द्रमसो यथा

73 अर्थे ह्यविद्य माने ऽपि सम्सृतिर् न निवर्तते

ध्यायतो विषयान् अस्य स्वप्ने ऽनर्थागमो यथा

74 एवम् पञ्चविधम् लिङ्गम् त्रिवृत् षोडश विस्तृतम्

एष चेतनया युक्तो जीव इत् यभि धीयते

75 अनेन पुरुषो देहान् उपादत्ते विमुञ्चति

हर्षम् शोकम् भयम् दुःखम् सुखम् चानेन विन्दति

76 यथा त्रुण जलू केयम् नापयात् यपयाति च

न त्यजेन् म्रियमाणो ऽपि प्राग् देहाभि मतिम् जनः

77 यावद् अन्यम् न विन्देत व्यवधानेन कर्मणाम्

मन एव मनुष् येन्द्र भूतानाम् भव भावनम्

78 यदा क्षैः चरितान् ध्यायन् कर्माण्या चिनुते ऽसकृत्

सति कर्मण्य विद्यायाम् बन्धः कर्मण्यन् आत्मनः

79 अतः तद् अपवाद् आर्थम् भज सर्वात्मना हरिम्

पश्यम्स् तद् आत्मकम् विश्वम् स्थित् युत्पत् त्यप्य या यतः

80 मैत्रेय उवाच

भागवत मुख्यो भगवान् नारदो हम्सयोर् गतिम्

प्रदर्श्य ह्यमुमा मन्त्र्य सिद्ध लोकम् ततो ऽगमत्

81 प्राचीन बर्ही राजरुषिः प्रजा सर्गाभि रक्षणे

आदिश्य पुत्रान् अगमत् तपसे कपिल् आश्रमम्

82 तत् रैकाग्र मना धीरो गोविन्द चरणाम्बुजम्

विमुक्त सङ्गो ऽनु भजन् भक्त्या तत् साम्यता मगात्

83 एतद् अध्यात्म पारोक्ष्यम् गीतम् देवरुषि णानघ

य: श्राव येद् य: शृणुयात् स लिङ्गेन विमुच्यते

84 एतन् मुकुन्द यशसा भुवनम् पुनानम्

देवरुषि वर्य मुख नि: सृतम् आत्म शौचम्

य: कीर्त्य मानम् अधिगच् छति पारमेष्ठ्यम्

नास्मिन् भवे भ्रमति मुक्त समस्त बन्ध:

85 अध्यात्म पारोक्ष्यम् इदम् मया धिगतम् अद्भुतम्

एवम् स्त्रि याश्रम: पुम्स: छिन्नो ऽमुत्र च सम्शय:

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

चतुर्थ्थ स्कन्दे एकोन त्रिम्शो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

अथ चतुर्थ्थ स्कन्द: त्रिम्शो ऽध्याय :

स्कन्द- 04: अध्याय- 30

01 विदुर उवाच

ये त्वयाभि हिता ब्रह्मन् सुता: प्राचीन बर्हिष:

ते रुद्र गीतेन हरिम् सिद्धिम् आपु: प्रतोष्य काम्

02 किम् बार्हस् पत्येह परत्र वाथ कैवल्य नाथ प्रिय पार्श्व वर्तिन:

आसाद्य देवम् गिरिशम् यद्द्च् छया प्रापु: परम् नूनम् अथ प्रचेतस:

03 मैत्रेय उवाच

प्रचेतसो ऽन्तर् उदधौ पितुर् आदेश कारिणः

जप यज्ञेन तपसा पुरञ्जन मतोषयन्

04 दश वर्ष सहस्रान्ते पुरुषस्तु सनातनः

तेषाम् आविरभूत् कृच्छ्रम् शान्तेन शमयन् रुचा

05 सुपर्ण स्कन्धम् आरूढो मेरु शृङ्गम् इवाम्बुदः

पीतवासा मणिग्रीवः कुर्वन् वितिमिर् आदिशः

06 काशिष्णुना कनक वर्ण विभूषणेन

भ्राजत् कपोल वदनो विलसत् किरीटः

अष्टायुधैः अनुचरैः मुनिभिः सुरेन्द्रैः

आसेवितो गरुड किन्नर गीत कीर्तिः

07 पीनाय ताष्ट भुज मण्डल मध्य लक्ष्म्या

स्पर्धच् छ्रिया परिवृतो वन मालयाद्यः

बर्हिष्मतः पुरुष आह सुतान् प्रपन्नान्

पर्जन् य नाद रुतया सघृणाव लोकः

08 श्री भगवान् उवाच

वरम् वृणीध्वम् भद्रम् वो यूयम् मे नृप नन्दनाः

सौहार् देन अपृथग् धर्माः तुष्टो ऽहम् सौहृदेन वः

09 यो ऽनुस्मरति सन्ध्यायाम् युष्मान् अनुदिनम् नरः

तस्य भ्रातृषु आत्म साम्यम् तथा भूतेषु सौहृदम्

10 ये तु माम् रुद्र गीतेन सायम् प्रातः समाहिताः

स्तुवन्त् यहम् काम वरान् दास्ये प्रज्ञाम् च शोभनाम्

11 यद् यूयम् पितुरादेशम् अग्रहीष्ट मुदान् विताः

अथो व उशती कीर्तिः लोकान् अनु भविष्यति

12 भविता विश्रुतः पुत्रो ऽनवमो ब्रह्मणो गुणैः

य एताम् आत्म वीर्येण त्रिलोकीम् पूर यिष्यति

13 कण्डोः प्रम्लोचया लब्धा कन्या कमल लोचना

ताम् चाप विद्धाम् जगृहुः भूरुहा नृप नन्दनाः

14 क्षुत् क्षामाया मुखे राजा सोमः पीयूष वर्षिणीम्

देशिनीम् रोद मानाया निदधे स दयान् वितः

15 प्रजा विसर्ग आदिष्टाः पित्रा माम् अनुवर्तता

तत्र कन्याम् वरारोहाम् ताम् उद्वहत मा चिरम्

16 अपृथग् धर्म शीलानाम् सर्वेषाम् वः सु मध्यमा

अपृथग् धर्म शीलेयम् भूयात् पत्न् यर्पिता शया

17 दिव्य वर्ष सहस्राणाम् सहस्र महतौ जसः

भौमान् भोक्ष्यथ भोगान् वै दिव्याम्श् चानुग्रहान् मम

18 अथ मय् यनपायिन्या भक्त्या पक्व गुणाशयाः

उपयास्यथ मद् धाम निर्विद्य निरयादतः

19 गृहेषु आविशताम् चापि पुम्साम् कुशल कर्मणाम्

मद् वार्तया तया मानाम् न बन्धाय गृहा मताः

20 नव्यवद् हृदये यज्ज्ञो ब्रह्मै तद् ब्रह्म वादिभिः

न मुह्यन्ति न शोचन्ति न हृष्यन्ति यतो गताः

21 मैत्रेय उवाच

एवम् ब्रुवाणम् पुरुषार्थ भाजनम् जनार्दनम् प्राञ्जलयः प्रचेतसः

तद् दर्शन ध्वस्त तमो रजो मला गिरा गृणन् गद् गदया सुहृत् तमम्

22 प्रचेतस ऊचुः

नमो नमः क्लेश विनाशनाय निरूपितो दार गुणाह्व याय

मनो वचो वेग पुरोजवाय सर्वाक्ष मार्गैः अगताध्वने नमः

23 शुद्धाय शान्ताय नमः स्वनिष्ठया मनस्य पार्थम् विलसद् द्वयाय

नमो जगत् स्थान लयोदयेषु गृहीत माया गुण विग्रहाय

24 नमो विशुद्ध सत्त्वाय हरये हरिमेधसे

वासुदेवाय कृष्णाय प्रभवे सर्व सात्वताम्

25 नमः कमल नाभाय नमः कमल मालिने

नमः कमल पादाय नमस्ते कमलेक्षण

26 नमः कमल किञ्जल्क पिशङ्गामल वाससे

सर्व भूत निवासाय नमो ऽयुङ्क्ष्महि साक्षिणे

27 रूपम् भगवता त्वेतद् अशेष क्लेश सङ्क्षयम्

आविष् कृतम् नः क्लिष्टानाम् किमन्यद् अनुकम्पितम्

28 एता वत्त्वम् हि विभुभिः भाव्यम् दीनेषु वत्सलैः

यद् अनुस्मर्यते काले स्व बुद्ध्या अभद्र रन्धन

29 येनोप शान्तिः भूतानाम् क्षुल्ल कानाम् अपीहताम्

अन्तर्हितो ऽन्तर् हृदये कस्मान् नो वेद नाशिषः

30 असावेव वरो ऽस्माकम् ईप्सितो जगतः पते

प्रसन्नो भगवान् येषाम् अपवर्गः गुरुर् गतिः

31 वरम् वृणीमहे ऽथापि नाथ त्वत् परतः परात्

न ह्यन्तः त्वद् विभूतीनाम् सो ऽनन्त इति गीयसे

32 पारिजाते ऽञ्जसा लब्धे सारङ्गो ऽन्यन्न सेवते

त्वद् अङ्घ्रि मूलम् आसाद्य साक्षात् किम् किम् वृणीमहि

33 यावत्ते मायया स्पृष्टा भ्रमाम इह कर्मभिः

तावद् भवत् प्रसङ्गानाम् सङ्गः स्यान्नो भवे भवे

34 तुलया मलवेन् आपि न स्वर्गम् ना पुनर्भवम्

भगवत् सङ्गि सङ्गस्य मर्त्यानाम् किमुताशिषः

35 यत् रेड् यन्ते कथा मृष्टाः तृष्णायाः प्रशमो यतः

निर्वैरम् यत्र भूतेषु नोद्वेगो यत्र कश्चन

36 यत्र नारायणः साक्षाद् भगवान् न्यासिनाम् गतिः

सम्स्तूयते सत् कथासु मुक्त सङ्गैः पुनः पुनः

37 तेषाम् विचरताम् पद्भ्याम् तीर्थानाम् पावनेच् छया

भीतस्य किम् न रोचेत ताव कानाम् समागमः

38 वयम् तु साक्षाद् भगवन् भवस्य प्रियस्य सख्युः क्षण सङ्गमेन

सु दुश्चि कित्स्यस्य भवस्य मृत्योः भिषक् तमम् त्वाद्य गतिम् गताः स्म

39 यन्नः स्व धीतम् गुरवः प्रसादिता विप्राश् च वृद्धाश् च सद् आनु वृत्त्या

आर्या नताः सुहृदो भ्रातरश् च सर्वाणि भूतानि अनसूय यैव

40 यन्नः सुतप्तम् तप एतदीश निरन्धसाम् कालम् अदभ्र मप्सु

सर्वम् तदे तत् पुरुषस्य भूम्नो वृणीमहे ते परितोषणाय

41 मनुः स्वयम्भूः भगवान् भवश् च ये ऽन्ये तपो ज्ञान विशुद्ध सत्त्वाः

अदृष्ट पारा अपि यन् महिम्नः स्तुवन्त् यथो त्वात्म समम् गृणीमः

42 नमः समाय शुद्धाय पुरुषाय पराय च

वासुदेवाय सत्त्वाय तुभ्यम् भगवते नमः

43 मैत्रेय उवाच

इति प्रचेतोभिर् अभिष्टुतो हरिः प्रीतः तथेत् याह शरण्य वत्सलः

अनिच् छताम् यानम् अतृप्त चक्षुषाम् ययौ स्व धाम् आनपवर्ग वीर्यः

44 अथ निर्याय सलिलात् प्रचेतस उदन् वतः

वीक्ष्या कुप्यन् द्रुमैश् छन्नाम् गाम् गाम् रोद्धुम् इवोच् छ्रितैः

45 ततो ऽग्नि मारुतौ राजन् अमुञ्चन् मुखतो रुषा

महीम् निर्वीरुधम् कर्तुम् सम्वर्तक इवात्यये

46 भस्मसात् क्रिय माणाम् स्तान् द्रुमान् वीक्ष्य पितामहः

आगतः शमया मास पुत्रान् बर्हिष्मतो नयैः

47 तत्राव शिष्टा ये वृक्षा भीता दुहितरम् तदा

उज्जह् रुस्ते प्रचेतोभ्य उपदिष्टाः स्वयम्भुवा

48 ते च ब्रह्मण आदेशान् मारिषाम् उपयेमिरे

यस्याम् महद् अवज्ञानाद् अजन्य जनयोनिजः

49 चाक्षुषे त्वन्तरे प्राप्ते प्राक्सर्गे काल विद्रुते

यः ससर्ज प्रजा इष्टाः स दक्षो दैव चोदितः

50 यो जायमानः सर्वेषाम् तेजस् तेजस् विनाम् रुचा

स्वयोपा दत्त दाक्ष् याच्च कर्मणाम् दक्षम् अब्रुवन्

51 तम् प्रजा सर्ग रक्षायाम् अनादि: अभिषिच्य च

युयोज युयुजे ऽन्याम्श् च स वै सर्व प्रजापतीन्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

चतुर्थ्थ स्कन्दे त्रिम्शो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

अथ चतुर्थ्थ स्कन्द: एक त्रिम्शो ऽध्याय :

स्कन्द- 04: अध्याय- 31

01 मैत्रेय उवाच

तत उत्पन्न विज्ञाना आश्व धोक्षज भाषितम्

स्मरन्त आत्मजे भार्याम् विसृज्य प्राव्रजन् गृहात्

02 दीक्षिता ब्रह्म सत्रेण सर्व भूतात्म मेधसा

प्रतीच्याम् दिशि वेलायाम् सिद्धो ऽभूद् यत्र जाजलि:

03 तान् निर्जित प्राण मनो वचो दृशो जितासनान् शान्त समान विग्रहान्

परे ऽमले ब्रह्मणि योजित् आत्मन: सुरा सुरेड्यो ददृशे स्म नारद:

04 तमा गतम् त उत्थाय प्रणि पत्याभि नन्द्य च

पूज यित्वा यथा देशम् सुखासीनम् अथाब्रुवन्

05 प्रचेतस ऊचु:

स्वागतम् ते सुरर्षे ऽद्य दिष्ट्या नो दर्शनम् गत:

तव चङ्क्रमणम् ब्रह्मन् अभयाय यथा रवे:

06 यद् आदिष्टम् भगवता शिवेन् आधोक्षजेन च

तद् गृहेषु प्रसक् तानाम् प्रायशः क्षपितम् प्रभो

07 तन्नः प्रद्योत याध् यात्म ज्ञानम् तत्त्वार्थ दर्शनम्

येनाञ्जसा तरिष् यामो दुस्तरम् भव सागरम्

08 मैत्रेय उवाच

इति प्रचेतसाम् पृष्टो भगवान् नारदो मुनिः

भगवति उत्तम श्लोक आविष्ट् आत्मा ब्रवीन् नृपान्

09 नारद उवाच

तज् जन्म तानि कर्माणि तदायुः तन् मनो वचः

नृणाम् येनह विश्वात्मा सेव्यते हरिर् ईश्वरः

10 किम् जन्मभिः त्रिभिर् वेह शौक्ल सावित्र याज्ञिकैः

कर्म भिर्वा त्रयी प्रोक्तैः पुम्सो ऽपि विबुधायुषा

11 श्रुतेन तपसा वा किम् वचोभिः चित्त वृत्तिभिः

बुद्ध्या वा किम् निपुणया बलेन् एन्द्रिय राधसा

12 किम् वा योगेन साङ्ख्येन न्यास स्वाध्याय योर् अपि

किम् वा श्रेयोभिर् अन्यैश् च न यत् रात्म प्रदो हरिः

13 श्रेयसाम् अपि सर्वेषाम् आत्मा ह्यवधिर् अर्थतः

सर्वेषाम् अपि भूतानाम् हरिर् आत्म् आत्मदः प्रियः

14 यथा तरोर् मूल निषेचनेन तृप् यन्ति तत् स्कन्ध भुजोप शाखाः

प्राणोप हाराच्च यथेन्द्रि याणाम् तथैव सर्वार्हणम् अच्युतेज्या

15 यथैव सूर्यात् प्रभवन्ति वारः पुनश् च तस्मिन् प्रविशन्ति काले

भूतानि भूमौ स्थिर जङ्ग मानि तथा हरावेव गुण प्रवाहः

16 एतत् पदम् तज् जगद् आत्मनः परम् सकृद् विभातम् सवितुर् यथा प्रभा

यथासवो जाग्रति सुप्त शक्तयो द्रव्य क्रिया ज्ञान भिदा भ्रमात्य यः

17 यथा नभसि अभ्रतमः प्रकाशा भवन्ति भूपा न भवन्त् यनु क्रमात्

एवम् परे ब्रह्मणि शक्तयस् त्वमू रजस् तमः सत्त्वम् इति प्रवाहः

18 तेनैकम् आत्मानम् अशेष देहिनाम् कालम् प्रधानम् पुरुषम् परेशम्

स्व तेजसा ध्वस्त गुण प्रवाहम् आत्मैक भावेन भजध्व मद्धा

19 दयया सर्व भूतेषु सन्तुष्ट्या येन केन वा

सर्व् एन्द्रियोप शान्त्या च तुष्यति आशु जनार्दनः

20 अपहत सकलैषण् आमल् आत्मनि अविरत मेधित भावनोप हूतः

निज जन वशगत्वम् आत्मनो ऽयम् न सरति छिद्र वद् अक्षरः सताम् हि

21 न भजति कुमनीषिणाम् स इज्याम् हरिः अधन् आत्म धनप्रियो रसज्ञः

श्रुत धन कुल कर्मणाम् मदैर्ये विद धति पापम् अकिञ्चनेषु सत्सु

22 श्रियम् अनुचरतीम् तद् अर्थिनश् च द्वि पद पतीन् विबुधाम्श् च यत्स्व पूर्णः

न भजति निज भृत्य वर्ग तन्त्रः कथममुम् उद्विसृजेत् पुमान् क्रुतज्ञः

23 मैत्रेय उवाच

इति प्रचेतसो राजन् अन्याश् च भगवत् कथाः

श्राव यित्वा ब्रह्म लोकम् ययौ स्वायम्भुवो मुनिः

24 ते ऽपि तन् मुख निर्यातम् यशो लोक मलापहम्

हरेर् निशम्य तत् पादम् ध्यायन्तः तद् गतिम् ययुः

25 एतत् ते ऽभिहितम् क्षत्तः यन्माम् त्वम् परि पृष्टवान्

प्रचेतसाम् नारदस्य सम्वादम् हरि कीर्तनम्

26 श्री शुक उवाच

य एष उत्तान पदो मानवस् यानु वर्णितः

वम्शः प्रियव्रतस् यापि निबोध नृप सत्तम

27 यो नारदाद् आत्म विद्याम् अधिगम्य पुनर् महीम्

भुक्त्वा विभज्य पुत्रेभ्य ऐश्वरम् समगात् पदम्

28 इमाम् तु कौषार विणोप वर्णिताम् क्षत्ता निशम्या जित वाद सत् कथाम्

प्रवृद्ध भावो ऽश्रु कला कुलो मुनेः दधार मूर्ध्ना चरणम् हृदा हरेः

29 विदुर उवाच

सो ऽयमद्य महा योगिन् भवता करुणात्मना

दर्शितः तमसः पारो यत्रा किञ्चन गो हरिः

30 श्री शुक उवाच

इत् यानम्य तमा मन्त्र्य विदुरो गज साह्वयम्

स्वानाम् दिदृक्षु: प्रययौ ज्ञातीनाम् निर्वृ ताशय:

31 एतद्य: शृणुयाद् राजन् राज्ञाम् हर् यर्पित् आत्मनाम्

आयुर् धनम् यश: स्वस्ति गतिम् ऐश्वर्यम् आप्नुयात्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

चतुर्थ्थ स्कन्दे एक त्रिम्शो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ✡ ☆ ✡

श्रीमद् भागवतम्

अथ पञ्चम स्कन्द: प्रथमो ऽध्याय :

स्कन्द- 05: अध्याय- 01

01 राजो उवाच

प्रियव्रतो भागवत आत्मा राम: कथम् मुने

गृहे ऽरमतयन् मूल: कर्म बन्ध: पराभव:

02 न नूनम् मुक्त सङ्गानाम् ता दृशानाम् द्विजर्षभ

गृहेषु अभिनिवेशो ऽयम् पुम्साम् भवितुम् अर्हति

03 महताम् खलु विप्रर्षे उत्तम श्लोक पादयो:

छाया निर्वृत चित्तानाम् न कुटुम्बे स्पृहामति:

04 सम्शयो ऽयम् महान् ब्रह्मन् दारागार सुतादिषु

सक्तस्य यत् सिद्धिर् अभूत् कृष्णे च मतिर् अच्युता

05 श्री शुक उवाच

बाढमुक्तम् भगवत उत्तम श्लोकस्य श्रीमच् चरणारविन्द मकरन्द रस आवेशित चेतसो भागवत परम हम्स दयित कथाम् किञ्चिद् अन्तराय विहताम् स्वाम् शिवतमाम् पदवीम् न प्रायेण हिन्वन्ति

06 यर्हि वाव ह राजन् स राज पुत्रः प्रियव्रतः परम भागवतो नारदस्य चरणोप सेवया अञ्जसा वगत परमार्थ सतत्त्वो ब्रह्म सत्रेण दीक्षिष्य माणो- ऽवनितल परिपालनाय आम्नात प्रवर गुण गणै कान्त भाजनतया स्व पित्रो पामन्त्रितो भगवति वासुदेव एव अव्यव धान समाधि योगेन समावेशित सकल कारक क्रिया कलापो- नैवाभ्य नन्दद् यद्यपि तद् अप्रत् याम्ना तव्यम् तदधि करण आत्मनो ऽन्यस्माद् असतो ऽपि पराभवम् अन्वीक्ष माणः

07 अथ ह भगवान् आदिदेव एतस्य गुण विसर्गस्य परि बृम्हणानु ध्यान व्यवसित सकल जगद् अभिप्राय आत्मयोनिः अखिल निगम निज गण परिवेष्टितः स्व भवनाद् अवततार

08 स तत्र तत्र गगन तल उडुपतिर् इव विमाना वलिभिः अनुपथम् अमर परिवृढैः अभि पूज्यमानः पथि पथि च वरूथशः सिद्ध गन्धर्व साध्य चारण मुनि गणैः उपगीय मानो गन्ध मादन द्रोणीम् अवभासयन् उपससर्प

09 तत्र ह वा एनम् देवर्षिः हम्सयानेन पितरम् भगवन्तम् हिरण्य गर्भम् उपलभ मानः सह सैवोत्थाय अर्हणेन सह पिता पुत्राभ्याम् अवहित् आञ्जलिः उपतस्थे

10 भगवान् अपि भारत तद् उपनीतार् हणः सूक्त वाकेन अतितरा मुदित गुण गण् आवतार सुजयः प्रिय व्रतम् आदि पुरुषस्तम् सदय हासाव लोक इति होवाच

11 श्री भगवान् उवाच

निबोध तातेदम् ऋतम् ब्रवीमि मासूयितुम् देव मर्हस् यप्रमेयम्

वयम् भवस्ते तत एष महर्षिः वहाम सर्वे विवशा यस्य दिष्टम्

12 न तस्य कश्चित् तपसा विद्यया वा न योग वीर्येण मनीषया वा

नैवार्थ धर्मैः परतः स्वतो वा कृतम् विहन्तुम् तनु भृद्वि भूयात्

13 भवाय नाशाय च कर्म कर्तुम् शोकाय मोहाय सदा भयाय

सुखाय दुःखाय च देह योगम् अव्यक्त दिष्टम् जनताङ्ग धत्ते

14 यद्वाचि तन्त्याम् गुण कर्म दामभिः सुदु स्तरैर् वत्स वयम् सुयोजिताः

सर्वे वहामो बलिम् ईश्वराय प्रोता नसीव द्विपदे चतुष् पदः

15 ईशाभि सृष्टम् ह्यवरुन्ध् महे ऽङ्ग दुःखम् सुखम् वा गुण कर्म सङ्गात्

आस्थाय तत् यद् यदयुङ्क्त नाथः चक्षुष् मतान्धा इव नीयमानाः

16 मुक्तो ऽपि तावद् बिभृयात् स्वदेहम् आरब्धम् अश्नन् अभिमान शून्यः

यथानु भूतम् प्रतियात निद्रः किम् त्वन्य देहाय गुणान् न वृङ्क्ते

17 भयम् प्रमत् तस्य वनेषु अपि स्याद् यतः स आस्ते सह षट्स पत्नः

जितेन्द्रियस् यात्म रतेर् बुधस्य गृहाश्रमः किम् नु करोत् यवद्यम्

18 यः षट् स पत्नान् विजिगीष माणो गृहेषु निर्विश्य यतेत पूर्वम्

अत्येति दुर्ग् आश्रित ऊर्जितारीन् क्षीणेषु कामम् विचरेद् विपश्चित्

19 त्वम् त्वब्ज नाभाङ्घ्रि सरोजकोश दुर्गाश्रितो निर्जित षट्स पत्नः

भुङ्क्ष्वेह भोगान् पुरुषाति दिष्टान् विमुक्त सङ्गः प्रकृतिम् भजस्व

20 श्री शुक उवाच

इति सम भिहितो महा भागवतो भगवतः त्रि भुवन गुरोः अनुशासनम् आत्मनो लघुतया वनत शिरोधरो बाढम् इति सबहुमानम् उवाह

21 भगवान् अपि मनुना यथावद् उप कल्पिता पचितिः प्रिय व्रत नारदयोः अविषमम् अभिसम् ईक्ष माणयोः आत्म समवस्थानम् अवाङ्मनसम् क्षयम् अव्यव हृतम् प्रवर्तयन् अगमत्

22 मनुर् अपि परेणैवम् प्रति सन्धित मनोरथः सुर ऋषि वरानु मतेन अत्मजम् अखिलधरा मण्डल स्थिति गुप्तय आस्थाप्य स्वयम् अतिविषम विषय विषजलाश याशाया उपर राम

23 इति ह वाव स जगती पतिः ईश्वरेच् छ्य अधि निवेशित कर्म् आधिकारो ऽखिल जगद् बन्धध्वम् सन परानु भावस्य भगवत आदि पुरुषस्य अङ्घ्रि युगळान वरत ध्यान् आनुभावेन परि रन्धित कषा याशयो ऽवदातो ऽपि मान वर्धनो महताम् महीतलम् अनुशशास

24 अथ च दुहितरम् प्रजापतेः विश्व कर्मण उपयेमे बर्हिष् मतीम् नाम तस्यामु ह वाव आत्मजान् आत्म समान शील गुण कर्म रूप वीर्यो दारान् दश भावयाम् बभूव कन्याम् च यवीयसीम् ऊर्जस्वतीम् नाम

25 आग्नीध्र इध्मजिह्व यज्ञ बाहु महावीर हिरण्य रेतो घृत पृष्ठ सवन मेधातिथि वीति होत्र कवय इति सर्व एवाग्नि नामानः

26 एतेषाम् कविर् महावीरः सवन इति त्रय आसन् ऊर्ध्व रेतसः त आत्म विद्यायाम् अर्भ भावाद् आरभ्य कृत परिचयाः पारम हम्स्यम् एवाश्रमम् अभजन्

27 तस्मिन् नु ह वा उपशम शीलाः परम ऋषयः सकल जीव निकायावा सस्य भगवतो वासु देवस्य भीतानाम् शरण भूतस्य श्रीमच् चरण् आरविन्द अविरत स्मरणा विगलित परम भक्ति योगानु भावेन परिभावित अन्तर् हृदयाधि गते भगवति सर्वेषाम् भूतानाम् आत्म भूते प्रत्यग् आत्मन् येवात्मनः तादात्म्यम् अविशेषेण समीयुः

28 अन्यस्याम् अपि जायायाम् त्रयः पुत्रा आसन् उत्तम स्तामसो रैवत इति मन्वन्तर् आधिपतयः

29 एवम् उप शमायनेषु स्व तनयेषु अथ जगती पतिः जगतीम् अर्बुदान् येका दश परिवत्सराणाम् अव्याहत् आखिल पुरुष कार सार सम्भृत दोर्दण्ड युगळा पीडित मौर्वी गुण स्तनित विरमित धर्म प्रतिपक्षो बर्हिष्मत् याश् चानु दिनम् एधमान प्रमोद प्रसरण यौषिण्य व्रीडा प्रमुषित हासाव लोक रुचिर क्ष्वेल्यादिभिः परा भूय मान विवेक इव अनव बुध्यमान इव महा मना बुभुजे

30 यावद् अवभास यति सुरगिरिम् अनु परिक्रामन् भगवान् आदित्यो वसुधा तलम् अर्धेनैव प्रत पति अर्धेनावच् छादयति तदा हि भगवद् उपासनो पचित् आति पुरुष प्रभाव: तद् अनभि नन्दन् समजवेन रथेन ज्योतिर् मयेन रजनीम् अपि दिनम् करिष्यामीति सप्त कृत्व: तरणिम् अनुपर्य क्रामद् द्वितीय इव पतङ्ग:

31 ये वा उ ह तद् रथ चरण नेमि कृत परिखाता: ते सप्त सिन्धव आसन् यत एव कृता: सप्त भुवो द्वीपा:

32 जम्बू प्लक्ष शाल्मलि कुश क्रौञ्च शाक पुष्कर सम्ज्ञास् तेषाम् परिमाणम् पूर्वस्मात् पूर्वस्माद् उत्तर उत्तरो यथा सङ्ख्यम् द्वि गुणमानेन बहि: समन्तत उपक्लृता:

33 क्षारोद इक्षुरसोद सुरोद घृतोद क्षीरोद दधि मण्डोद सुद्धोदा: सप्त जलधय: सप्त द्वीप परिखा इवाभ् यन्तर द्वीप समाना एकैक श्येन यथानु पूर्वम् सप्तस् वपि बहिर् द्वीपेषु पृथक् परित उप कल्पिता: तेषु जम्ब्वादिशु बर्हिष्मती पति: अनुव्रतान् आत्मजान् आग्नीध्र इध्मजिह्व यक्ज्ञबाहु हिरण्यरेतो घृत प्रुष्ट मेधातिथि वीति होत्र सम्क्ज्ञान् यथा सङ्ख्येन एकै कस्मिन् एकम् एवाधि पतिम् विदधे

दुहितरम् चोर्जस्वतीम् नाम उशनसे प्रायच्छद् यस्याम् आसीद् देवयानी नाम काव्य सुता

34 नैवम् विध: पुरुषकार उरुक्रमस्य

पुम्साम् तद् अङ्घ्रि रजसा जित षड् गुणानाम्

चित्रम् विदूर विगत: सकृद् आददीत

यन् नामधेयम् अधुना स जहाति बन्धम्

35 स एवम् अपरिमित बल पराक्रम एकदातु देवरुषि चरणानु शयनानु पतित गुण विसर्ग सम्सर्गेण अनिर्वृतम् इवात्मानम् मन्यमान आत्म निर्वेद इदमाह

36 अहो असाध् वनुष्ठितम् यद् अभि निवेशितो ऽहम् इन्द्रियै: अविद्या रचित विषम विषयान्ध कूपे तद् अलम् अलम् अमुष्या वनिताया विनोद मृगम् माम् धिग्धिग् इति गर्हयाम् चकार

37 पर देवता प्रसादाधि गत आत्म प्रत्यव मर्शेन अनुप्रवृत् तेभ्य: पुत्रेभ्य इमाम् यथा दायम् विभज्य भुक्त भोगाम् च महिषीम् मृतकम् इव सह महा विभूतिम् अपहाय स्वयम् निहित निर्वेदो हृदि गृहीत हरि विहार् आनुभावो भगवतो नारदस्य पदवीम् पुनर् एवानु ससार

38 तस्य ह वा एते श्लोका:

प्रिय व्रत कृतम् कर्म को नु कुर्याद् विनेश्वरम्

यो नेमि निम्नैर् अकरोत् छायाम् घ्नन् सप्त वारिधीन्

39 भू सम्स्थानम् कृतम् येन सरिद् गिरि वनादिभि:

सीमा च भूत निर्वृत्यै द्वीपे द्वीपे विभागश:

40 भौमम् दिव्यम् मानुषम् च महित्वम् कर्म योगजम्

यश् चक्रे निरयौ पम्यम् पुरुषानु जनप्रिय:

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

पञ्चम स्कन्दे प्रथमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ पञ्चम स्कन्द: द्वितीयो ऽध्याय :

स्कन्द- *05:* अध्याय- *02*

*01* श्री शुक उवाच

एवम् पितरि सम्प्र वृत्ते तद् अनुशासने वर्तमान आग्नीध्रो जम्बू द्वीपौ कस: प्रजा औरसवद् धर्मा वेक्ष माण: पर्य गोपायत्

*02* स च कदाचित् पितृ लोककाम: सुरवर वनिता क्रीडाचल द्रोण्याम् भगवन्तम् विश्वसृजाम् पतिम् आभृत परिचर्योप करण आत्मै काग्र्येण तपस्वि आराधयाम् बभूव

*03* तद् उपलभ्य भगवान् आदि पुरुष: सदसि गायन्तीम् पूर्व चित्तिम् नाम् आप्सरसम् अभियापया मास

*04* सा च तद् आश्रमो पवनम् अति रमणीयम् विविध निबिड विटपि विटप निकर सम्श्लिष्ट पुरट लतारूढ स्थल विहङ्गम मिथुनै: प्रोच्यमान श्रुतिभि: प्रति बोध्यमान सलिल कुक्कुट कारण्डव कल हम्सादिभि: विचित्रम् उप कूजितामल जलाशय कमलाकरम् उप बभ्राम

*05* तस्या: सुललित गमन पद विन्यास गति विलासा याश् चानु पदम् खणखणाय मान रुचिर चरण् आभरण स्वनम् उपाकर्ण्य नर देव कुमार: समाधि योगेन आमीलित नयन नळिन मुकुल युगळम् ईषद् विकचय्य व्यचष्ट

*06* ताम् एवा विदूरे मधु करीम् इव सुमनस उप जिघ्रन्तीम् दिविज मनुज म नोनयन् आह्लाद दुघै: गति विहार व्रीडा विनयाव लोक सुस्वरा क्षरा वयवै: मनसि नृणाम् कुसुमा युधस्य विदधतीम् विवरम् निज मुख विगलित् आमृतासव सहास भाषणा मोद मदान् ध मधु कर निकरोप रोधेन द्रुत पद विन्यासेन वल्गु स्पन्दन स्तन कलश कबर भार रशनाम् देवीम् तद् अवलोकनेन विवृताव सरस्य भगवतो मकर ध्वजस्य वशम् उपनीतो जडवद् इति होवाच

*07* का त्वम् चिकीर्षसि च किम् मुनि वर्य शैले

मायासि कापि भगवत् परदेव ताया:

विज्ये बिभर्षि धनुषी सुहृद् आत्मनो ऽर्थे

किम् वा मृगान् मृगयसे विपिने प्रमत्तान्

08 बाणा विमौ भगवत: शत पत्र पत्रौ

शान्ताव पुङ्ख रुचिरौ अति तिग्म दन्तौ

कस्मै युयुङ्क्षसि वने विचरन्न विघ्न:

क्षेमाय नो जड धियाम् तव विक्रमो ऽस्तु

09 शिष्या इमे भगवत: परित: पठन्ति

गायन्ति साम सरहस्यम् अजस्र मीशम्

युष्मच् छिखा विलुलिता: सुमनो ऽभि वृष्टी:

सर्वे भजन्ति ऋषिगणा इव वेद शाखा:

10 वाचम् परम् चरण पञ्जर तित्तिरीणाम्

ब्रह्मन् अरूप मुखराम् शृणवाम तुभ्यम्

लब्धा कदम्ब रुचिर् अङ्क विटङ्क बिम्बे

यस् यामलात परिधि: क्व च वल्कलम् ते

11 किम् सम्भृतम् रुचिर् अयोर्द्विज शृङ्ग योस्ते

मध्ये कृशो वहसि यत्र दृशि: श्रिता मे

पङ्को ऽरुण: सुरभिर् आत्म विषाण ईदृग्

येन् आश्रमम् सुभग मे सुरभी करोषि

12 लोकम् प्रदर्शय सुहृत् तम तावकम् मे

यत् रत्य इत्थम् उरसावय वाव पूर्वौ

अस्मद् विधस्य मन उन्नयनौ बिभर्ति

बह् वद्भुतम् सरस रास सुधादि वक्त्रे

13 का वात्म वृत्तिर् अदनाद् हविरङ्ग वाति

विष्णो: कलासि अनिमिषोन् मकरौ च कर्णौ

उद्विग्न मीन युगळम् द्विज पङ्क्ति शोचि:

आसन् न भृङ्ग निकरम् सर इन्मुखम् ते

14 यो ऽसौ त्वया कर सरोजह तः पतङ्गो

दिक्षु भ्रमन् भ्रमत एजयते ऽक्षिणी मे

मुक्तम् न ते स्मरसि वक्र जटाव रूथम्

कष्टो ऽनिलो हरति लम्पट एष नीवीम्

15 रूपम् तपो धन तपश्चर ताम् तपोघ्नम्

ह्येतत्तु केन तपसा भवतोप लब्धम्

चर्तुम् तपो ऽर्हसि मया सह मित्र मह्यम्

किम् वा प्रसीददति स वै भव भावनो मे

16 न त्वाम् त्यजामि दयितम् द्विज देव दत्तम्

यस्मिन् मनो दृगपि नो न वियाति लग्नम्

माम् चारु शृङ्ग् यर्हसि नेतुम् अनुव्रतम् ते

चित्तम् यतः प्रति सरन्तु शिव आः सचिव्यः

17 श्री शुक उवाच

इति ललनानु नयाति विशारदो ग्राम्य वै दग्ध्यया परिभाषया ताम् विबुध वधूम् विबुध मतिः अधि सभाजया मास

18 सा च ततस् तस्य वीर यूथ पतेः बुद्धि शील रूप वयः श्रियौ दार्येण पराक्षिप्त मनाः तेन सहायुत् आयुत परिवत्सरोप लक्षणम् कालम् जम्बू द्वीप पतिना भौम स्वर्ग भोगान् बुभुजे

19 तस्यामु ह वा आत्मजान् स राजवर आग्नीध्रो नाभि किम्पुरुष हरिवर्ष इलाव्रुत रम्यक हिरण्मय कुरु भद्राश्व केतुमाल सम्ज्ञान् नव पुत्रान् अजनयत्

20 सा सूत्वाथ सुतान् नवानु वत्सरम् गृह एवाप हाय पूर्व चित्तिः भूय एवा अजम् देवम् उपतस्थे

21 आग्नीध्र सुतास्ते मातुः अनुग्रहाद् औत्पत्तिके नैव सम्हनन बलोपेताः पित्रा विभक्ता आत्म तुल्य नामानि यथा भागम् जम्बू द्वीप वर्षाणि बुभुजुः

22 आग्नीध्रो राजा अतृप्तः कामानाम् अप्सरसम् एवानुदिनम् अधिमन्य मानः तस्याः सलोकताम् श्रुतिभिर् अवारुन्ध यत्र पितरो मादयन्ते

23 सम्परेते पितरि नव भ्रातरो मेरु दुहित्रः मेरुदेवीम् प्रति रूपाम् उग्रदम्ष्ट्रीम् लताम् रम्याम् श्यामाम् नारीम् भद्राम् देव वीतिम् इति सम्ज्ञा नवोदवहन्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

पञ्चम स्कन्दे द्वितीयो ऽध्याय ::||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ पञ्चम स्कन्दः त्रुतीयो ऽध्याय :

स्कन्द- *05:* अध्याय- *03*

*01* श्री शुक उवाच

नाभिः अपत्य कामो ऽप्रजया मेरु देव्या भगवन्तम् यज्ञ पुरुषम् अवहित् आत्मा यजत

*02* तस्य ह वाव श्रद्धया विशुद्ध भावेन यजतः प्रवर्ग्येषु प्रचरत्सु द्रव्य देश काल मन्त्र र्त्विग् दक्षिणा विधान योगोप पत्त्या दुरधिगमो ऽपि भगवान् भागवत वात्सल्य तया सुप्रतीक आत्मानम् अपराजितम् निज जनाभि प्रेतार्थ विधित्सया गृहीत हृदयो हृद यङ्गमम् मनो नयन् आनन्दना वयवाभि रामम् आविश् चकार

*03* अथ ह तम् आविष्कृत भुज युगळ द्वयम् हिरण्मयम् पुरुष विशेषम् कपिश कौशे याम्बर धरम् उरसि विलसच् छ्रीवत्स ललामम् दर वर वन रुह वनमालाच् छूर्य मृत मणि गदादिभिः उपलक्षितम् स्फुट किरण प्रवर मुकुट कुण्डल कटक कटि सूत्र हार केयूर नूपुरादि अङ्ग भूषण विभूषितम् ऋत्विक् सदस्य गृह पतयो ऽधना इवोत्तम धनम् उपलभ्य सबहु मानम् अर्हणेन अवनत शीर्षाण उपतस्थुः

*04* ऋत्विज ऊचुः

अर्हसि मुहुर् अर्हत्तम अर्हणम् अस्माकम् अनुपथानाम् नमो नम इत्येत् आवत् सद् उप शिक्षितम् को ऽर्हति पुमान् प्रकृति गुण व्यतिकर मतिः अनीश ईश्वरस्य परस्य प्रकृति पुरुषयोः अर्वाक्त नाभिः नाम रूपा कृतिभी रूप निरूपणम्- सकल जन निकाय वृजिन निरसन शिवतम प्रवर गुण गणैक देश कथना दृते

*05* परि जनानु राग विरचित शबल सम्शब्द सलिल सित किसलय तुळसिका दूर्वाङ्कुरैर् अपि सम्भृतया सपर्य याकिल परम परितुष्यसि

*06* अथान यापि न भवत इज्य योरु भार भरया समुचितम् अर्थम् इहोप लभामहे

*07* आत्मनि एवानु सवनम् अञ्जसाव् यति रेकेण बोभूय मान अशेष पुरुषार्थ स्वरूपस्य किन्तु नाथाशिष आशा सानानाम् एतद् अभि सम्राधन मात्रम् भवितुम् अर्हति

08 तद् यथा बालिशानाम् स्वयम् आत्मनः श्रेयः परम् अविदुषाम् परम परम पुरुष प्रकर्ष करुणया स्व महिमानम् चाप वर्गाख्यम् उपकल्प यिष्यन् स्वयम् नाप चित एव इतरवद् इहोप लक्षितः

09 अथायम् एव वरो ह्यर्हत्तम यर्हि बर्हिषि राजरुषेः वर दर्षभो भवान् निज पुरुषेक्षण विषय आसीत्

10 असङ्ग निशित ज्ञानानल विधूत् आशेष् अमलानाम् भवत् स्वभावानाम् आत्मा रामाणाम् मुनीनाम् अनवरत परिगुणित गुणगण परम मङ्गलायन गुण गण कथनो ऽसि

11 अथ कथञ्चित् स्खलन क्षुत् पतन जृम्भण दुरवस्था नादिषु विवशानाम् नः स्मरणाय ज्वर मरण दशायाम् अपि सकल कश्मल निरसनानि तव गुण कृत नामधेयानि वचन गोचराणि भवन्तु

12 किञ्चायम् राजरुषिः अपत्य कामः प्रजाम् भवाद् ऋशीम् आशासान ईश्वरम् आशिषाम् स्वर्गाप वर्गयोर् अपि भवन्तम् उपधावति प्रजायाम् अर्थ प्रत्ययो धनदम् इवाधनः फलीकरणम्

13 को वा इह ते ऽपराजितो ऽपराजितया मायया अनवसित पदव्याना वृतमतिः विषय विषरयाना वृत प्रकृतिः अनुपासित महच् चरणः

14 यदु ह वाव तव पुनर् अदभ्र कर्तरिह समाहूतः तत्रार् थधियाम् मन्दानाम् नस्तद् यद् देव हेलनम् देव देवार्हसि साम्येन सर्वान् प्रतिवोढुम् अविदुषाम्

15 श्री शुक उवाच

इति निगदेन् आभिष्टूय मानो भगवान् अनिमिषर्षभो वर्षधराभि वादिताभि वन्दित चरणः सदयम् इदमाह

16 श्री भगवान् उवाच

अहो बताहम् ऋषयो भवद्भिः अवितथ गीर्भिः वरम् असुलभम् अभियाचितो यद् अमुष् यात्मजो मया सदृशो भूयाद् इति ममाहम् एवाभि रूपः कैवल्याद् अथापि ब्रह्मवादो न मृषा भवितु मर्हति ममैव हि मुखम् यद् द्विज देवकुलम्

17 तत आग्नीध्रीये ऽम्श कलयाव तरिष्यामि आत्म तुल्यम् अनुप लभमानः

18 श्री शुक उवाच

इति निशाम यन्त्या मेरु देव्याः पतिम् अभिधाय अन्तर्दधे भगवान्

19 बर्हिषि तस्मिन् नेव विष्णु दत्त भगवान् परम ऋषिभिः प्रसादितो नाभेः प्रिय चिकीर्षया तद वरोधायने मेरुदेव्याम् धर्मान् दर्श यितु कामो वात रशनानाम् श्रमणानाम् ऋषीणाम् ऊर्ध्व मन्थिनाम् शुक्लया तनुवा अवततार

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

पञ्चम स्कन्दे त्रुतीयो ऽध्याय ः॥

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ पञ्चम स्कन्दः चतुर्थो ऽध्याय :

स्कन्द- 05: अध्याय- 04

01 श्री शुक उवाच

अथ ह तम् उत्पत्त्यै वाभिव् यज्यमान भगवल् लक्षणम् साम्योप शम वैराग्य ऐश्वर्य महा विभूतिभिः अनुदिनम् एधमानानु भावम् प्रकृतयः प्रजा ब्राह्मणा देवताश् च अवनितल समवनाय अतितराम् जगृधुः

02 तस्य ह वा इत्थम् वर्ष्मणा वरीयसा बृहच् छलोकेन चौजसा बलेन श्रिया यशसा वीर्य शौर्याभ्याम् च पिता ऋषभ इतीदम् नाम चकार

03 तस्य हीन्द्रः स्पर्धमानो भगवान् वर्षे न ववर्ष तद् अवधार्य भगवान् ऋषभ देवो योगेश्वरः प्रहस्य आत्म योग मायया स्ववर्षम् अजनाभम् नामाभ्य वर्षत्

04 नाभिस्तु यथाभि लषितम् सुप्रजस्त्वम् अवरुध्य अति प्रमो दभर विह्वलो गद्गदा क्षरया गिरा स्वैरम् गृहीत नर लोक सधर्मम् भगवन्तम् पुराण पुरुषम् माया विलसित मतिः वत्स तातेति सानुरागम् उपलालयन् पराम् निर्वृतिम् उपगतः

05 विदित् आनुरागम् आपौर प्रकृति जनपदो राजा नाभिः आत्मजम् समय सेतु रक्षायाम् अभिषिच्य ब्राह्मणेषू उपनिधाय सह मेरुदेव्या विशालायाम् प्रसन्न निपुणेन तपसा समाधि योगेन नर नारायण् आख्यम् भगवन्तम् वासुदेवम् उपासीनः कालेन तन् महिमानम् अवाप

06 यस्य ह पाण्डवेय श्लोकौ उदाहरन्ति

को नु तत् कर्म राजर्षेः नाभेर् अन्वा चरेत् पुमान्

अपत्यताम् अगाद्यस्य हरिः शुद्धेन कर्मणा

07 ब्रह्मण्यो ऽन्यः कुतो नाभेः विप्रा मङ्गल पूजिताः

यस्य बर्हिषि यज्ञेशम् दर्शयाम् आसुरोजसा

08 अथ ह भगवान् ऋषभ देवः स्व वर्षम् कर्म क्षेत्रम् अनुमन्य मानः प्रदर्शित गुरु कुल वासो लब्ध वरैः गुरुभिः अनुज्ञातो गृह मेधिनाम् धर्मान् अनुशिक्ष माणो जयन्त्याम् इन्द्र दत्तायाम् उभय लक्षणम् कर्म समाम् नायाम् नातम् अभियुञ्जन् आत्मजानाम् आत्म समानानाम् शतम् जनया मास

09 येषाम् खलु महायोगी भरतो ज्येष्ठः श्रेष्ठ गुण आसीद् येनेदम् वर्षम् भारतम् इति व्यपदि शन्ति

10 तमनु कुशा वर्त इलावर्तो ब्रह्मा वर्तो मलयः केतुः भद्रसेन इन्द्र स्पृग् विदर्भः कीकट इति नव नवति प्रधानाः

11 कविर् हविर् अन्तरिक्षः प्रबुद्धः पिप्पलायनः

आविर्होत्रो ऽथ द्रुमिलः चमसः करभाजनः

12 इति भागवत धर्म दर्शना नव महा भागवताः तेषाम् सु चरितम् भगवन् महिमोप बृम्हितम् वसुदेव नारद सम्वादम् उपशमा यनम् उपरिष्टाद् वर्णयिष्यामः

13 यवी याम्स एकाशीतिर् जायन्तेयाः पितुर् आदेश करा महा शालीना महा श्रोत्रिया यज्ञ शीलाः कर्म विशुद्धा ब्राह्मणा बभूवुः

14 भगवान् ऋषभ सम्ज्ञ आत्म तन्त्रः स्वयम् नित्य निवृत्तान् अर्थ परम्परः केवल् आनन्द् आनुभव ईश्वर एव विपरीत वत् कर्माणि आरभमाणः कालेनानु गतम् धर्मम् आचरणेन उपशिक्षयन् अत द्विदाम् सम उपशान्तो मैत्रः कारुणिको धर्म अर्थ यशः प्रजा नन्दाम् ऋताव रोधेन गृहेषु लोकम् नियमयत्

15 यद् यच् छीर्षण्या चरितम् तत् तद् अनुवर्तते लोकः

16 यद् यपि स्व विदितम् सकल धर्मम् ब्राहमम् गुह्यम् ब्राहमणैः दर्शित मार्गेण सामादिभिः उपायैः जनताम् अनुशशास

17 द्रव्य देश कालवयः श्रद्ध ऋत्विग् विविधोद् देशोप चितैः सर्वैर् अपि क्रतुभिः यथो [उ]पदेशम् शत कृत्व इयाज

18 भगवत ऋषभेण परिरक्ष्य माण एतस्मिन् वर्षे न कश्चन पुरुषो वाञ्छति अविद्य मानमिव आत्मनो ऽन्यस्मात् कथञ्चन किमपि कर्हिचिद् अवेक्षते भर्तरि अनुसवनम् विजृम्भित स्नेहा तिशयम् अन्तरेण

19 स कदाचिद् अटमानो भगवान् ऋषभो ब्रह्मा वर्तगतो ब्रह्म ऋषि प्रवर सभायाम् प्रजानाम् निशामयन्ती नाम् आत्मजान् अवहित् आत्मनः प्रश्रय प्रणय भरसु यन्त्रितान् अपि उपशिक्षयन् इति होवाच

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

पञ्चम स्कन्दे चतुर्थो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ पञ्चम स्कन्दः पञ्चमो ऽध्याय :

स्कन्द- 05: अध्याय- 05

01 ऋषभ उवाच

नायम् देहो देह भाजाम् नृलोके कष्टान् कामान् अर्हते विड्भुजाम् ये

तपो दिव्यम् पुत्रका येन सत्त्वम् शुद्ध्येद् यस्माद् ब्रह्म सौख्यम् त्वनन्तम्

02 महत् सेवाम् द्वारमाहुर् विमुक्तेः तमो द्वारम् योषिताम् सङ्गि सङ्गम्

महान् तस्ते सम चित्ताः प्रशान्ता विमन्यवः सुहृदः साधवो ये

03 ये वा मयीशे कृत सौहृद् आर्था जनेषु देहम् भरवार्ति केषु

गृहेषु जायात्म जराति मत्सु न प्रीति युक्ता यावद् अर्थाश्च लोके

04 नूनम् प्रमत्तः कुरुते विकर्म यद् इन्द्रिय प्रीतय आपृणोति

न साधु मन्ये यत आत्मनो ऽयम् असन्नपि क्लेशद आस देहः

05 पराभवस् तावद् अबोधजातो यावन्न जिज्ञासत आत्म तत्त्वम्

यावत् क्रियास् तावद् इदम् मनो वै कर्मात्मकम् येन शरीर बन्धः

06 एवम् मनः कर्म वशम् प्रयुङ्क्ते अविद्यया आत्मन् युपधीय माने

प्रीतिर्न यावन् मयि वासुदेवे न मुच्यते देह योगेन तावत्

07 यदा न पश्यति अयथा गुणेहाम् स्वार्थे प्रमत्तः सहसा विपश्चित्

गत स्मृतिः विन्दति तत्र तापान् आसाद्य मैथुन्यम् अगारम् अज्ञः

08 पुम्सः स्त्रिया मिथुनी भावमेतम् तयोर् मिथो हृदय ग्रन्थिम् आहुः

अतो गृह क्षेत्र सुताप्त वित्तैः जनस्य मोहो ऽयम् अहम् ममेति

09 यदा मनो हृदय ग्रन्थि रस्य कर्मानु बद्धो दृढ आश्लथेत

तदा जनः सम्परि वर्तते ऽस्माद् मुक्तः परम् याति अतिहाय हेतुम्

10 हम्से गुरौ मयि भक्त्यानु वृत्या वितृष्णया द्वन्द्वति तिक्षया च

सर्वत्र जन्तोः व्यसना वगत्या जिज्ञासया तपसे हानि वृत्त्या

11 मत् कर्मभिः मत् कथया च नित्यम् मद् देव सङ्गाद् गुण कीर्तनान् मे

निर्वैरसाम् योप शमेन पुत्रा जिहासया देह गेहात्म बुद्धेः

12 अध्यात्म योगेन विविक्त सेवया प्राणेन्द्रि यात्माभि जयेन सध्र्यक्

सच् छ्रद्धया ब्रह्म चर्येण शश्वद् असम् प्रमादेन यमेन वाचाम्

13 सर्वत्र मद् भाव विचक्षणेन ज्ञानेन विज्ञान विराजितेन

योगेन धृत् युद्यम सत्त्व युक्तो लिङ्गम् व्यपोहेत् कुशलो ऽहमाख्यम्

14 कर्माशयम् हृदय ग्रन्थि बन्धम् अविद्यया सादितम् अप्रमत्त:

अनेन योगेन यथो [उ]पदेशम् सम्यग् व्यपोह्यो परमेत योगात्

15 पुत्राम्श्च शिष्याम्श्च नृपो गुरुर्वा मल् लोककामो मद् अनुग्रहार्थ:

इत्थम् विमन्यु: अनुशिष्याद् अतज्ज्ञान् न योजयेत् कर्मसु कर्म मूढान्

कम् योजयन् मनुजो ऽर्थम् लभेत निपातयन् नष्ट दृशम् हि गर्ते

16 लोक: स्वयम् श्रेयसि नष्ट दृष्टि: यो ऽर्थान् समीहेत निकाम काम:

अन्योन्य वैर: सुखलेश हेतो: अनन्त दु:खम् च न वेद मूढ:

17 कस्तम् स्वयम् तद् अभिज्ञो विपश्चिद् अविद्यायाम् अन्तरे वर्त मानम्

दृष्ट्वा पुनस्तम् सघृण: कुबुद्धिम् प्रयोजयेद् उत्पथगम् यथान्धम्

18 गुरुर्न स स्यात् स्वजनो न स स्यात् पिता न स स्याज् जननी न सा स्यात्

दैवम् न तत्स्यान् न पतिश्च स स्यात् न मोचयेद्य: समुपेत मृत्युम्

19 इदम् शरीरम् मम दुर् विभाव्यम् सत्त्वम् हि मे हृदयम् यत्र धर्म:

पृष्ठे कृतो मे यद् अधर्म आराद् अतो हि माम् ऋषभम् प्राहुर् आर्या:

20 तस्माद् भवन्तो हृदयेन जाता: सर्वे महीयाम् सम् अमुम् सनाभम्

अक्लिष्ट बुद्ध्या भरतम् भजध्वम् शुश्रूषणम् तद् भरणम् प्रजानाम्

21 भूतेषु वीरुद्भ्य उदुत्तमा ये सरी सृपास्तेषु सबोध निष्ठा:

ततो मनुष्या: प्रमथास् ततो ऽपि गन्धर्व सिद्धा विबुधानु गा ये

22 देवा सुरेभ्यो मघवत् प्रधाना दक्षादयो ब्रह्म सुतास्तु तेषाम्

भव: पर: सो ऽथ विरिञ्च वीर्य: स मत्परो ऽहम् द्विज देव देव:

23 न ब्राह्मणै: तुलये भूतम् अन्यत् पश्यामि विप्रा: किमत: परम् तु

यस्मिन् नृभि: प्रहुतम् श्रद्धयाहम् अश्नामि कामम् न तथ् आग्निहोत्रे

24 धृता तनूर् उशती मे पुराणी येनेह सत्त्वम् परमम् पवित्रम्

शमो दम: सत्यम् अनुग्रहश्च तपस् तितिक्षानु भवश्च यत्र

25 मत्तो ऽप्यनन्तात् परत: परस्मात् स्वर्गाप वर्गाधि पतेर्न किञ्चित्

येषाम् किमु स्याद् इतरेण तेषाम् अकिञ्चनानाम् मयि भक्ति भाजाम्

26 सर्वाणि मद् धिष्ण्य तया भवद्भिः चराणि भूतानि सुता ध्रुवाणि

सम्भावितव् यानि पदे पदे वो विविक्त दृग्भिः तद् उहार्हणम् मे

27 मनो वचो दृक् करणेहि तस्य साक्षात् कृतम् मे परिबर्हणम् हि

विना पुमान् येन महा विमोहात् कृतान् त पाशान् न विमोक्तु मीशेत्

28 श्री शुक उवाच

एवम् अनुशास्य आत्मजान् स्वयम् अनुशिष्टान् अपि लोक आनुशास नार्थम् महानु भावः परम सुहृद् भगवान् ऋषभाप देश उप शम शीलानाम् उपरत कर्मणाम् महा मुनीनाम् भक्ति ज्ञान वैराग्य लक्षणम् पारम हम्स्य धर्मम् उपशिक्ष माणः स्व तनय शत ज्येष्ठम् परम भागवतम् भगवज् जन परायणम् भरतम् धरणि पालनाय अभिषिच्य स्वयम् भवन एवोर् वरित शरीर मात्र परिग्रह उन्मत्त इव गगन परिधानः प्रकीर्ण केश आत्मन् यारोपिता हवनीयो ब्रह्मा वर्तात् प्रवव्राज

29 जडान् ध मूक बधिर पिशाच् ओन्मादक वद् अवधूत वेषो ऽभि भाष्यमाणो ऽपि जनानाम् गृहीत मौन व्रतः तूष्णीम् बभूव

30 तत्र तत्र पुरग्रामा कर खेट वाट खर्वट शिबिर व्रज घोष सार्थ गिरि वनाश्रम् आदिषु अनुपथम् अवनि चराप सदैः परिभूय मानो मक्षिकाभिर् इव वन गजः तर्जन ताडनाव मेहन ष्ठीवन ग्राव शकृद् रजः प्रक्षेप पूतिवात दुरुक्तैः तद् अविगणयन् नेव असत् सम्स्थान एतस्मिन् देहोप लक्षणे सद् अपदेश उभयानु भव स्वरूपेण स्व महिम् आवस्थानेन असम् आरोपित अहम् मम आभिमान त्वाद् अविखण्डित मनाः पृथिवीम् एकचरः परि बभ्राम

31 अति सुकुमार कर चरणोरः स्थल विपुल बाह्वम्स गल वदनादि अवयव विन्यासः प्रकृति सुन्दर स्वभाव हास सुमुखो नव नळिन दलाय मान शिशिर तारारुणाय त नयन रुचिरः सदृश सुभग कपोल कर्ण कण्ठनासो विगूढ स्मित वदन महोत्सवेन पुर वनितानाम् मनसि कुसुम शरासनम् उपदधानः परा गवलम्ब मान कुटिल जटिल कपिश केश भूरि भारो ऽवधूत मलिननिज शरीरेण ग्रह गृहीत इवा दृश्यत

32 यर्हि वाव स भगवान् लोकमिमम् योगस् याद्धा प्रतीपम् इवा चक्षाणः तत् प्रतिक्रिया कर्म बीभत्सितम् इति व्रतम् आजगरम् आस्थितः शयान एव अश्नाति पिबति खादति अवमेहति हदति स्म चेष्टमान उच्चरित आदिग्धोद् देशः

33 तस्य ह यः पुरीष सुरभि सौगन्ध्य वायुः तम् देशम् दश योजनम् समन्तात् सुरभिम् चकार

34 एवम् गो मृग काक चर्यया व्रजम्स् तिष्ठन् आसीनः शयानः काक मृग गो चरितः पिबति खादति अवमेहति स्म

35 इति नाना योग चर्या चरणो भगवान् कैवल्य पतिः ऋषभो ऽविरत परम महानन्द् आनुभव आत्मनि सर्वेषाम् भूतानाम् आत्मभूते भगवति वासुदेव आत्मनो ऽव्यव धान अनन्त रोदर भावेन सिद्ध समस्तार्थ परिपूर्णो योगैश् वर्याणि वैहायस मनोजव अन्तर्धान परकाय प्रवेश दूर ग्रहणादीनि यदृच्छ योप गतानि नाञ्जसा नृप हृदयेन् आभ्य नन्दत्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

पञ्चम स्कन्दे पन्चमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अ थ पन्चम स्कन्द: षष्टो ऽध्याय :

स्कन्द- *05:* अध्याय- *06*

*01* राजो उवाच

न नूनम् भगव आत्मा रामाणाम् योग समीरित ज्ञानाव भर्जित कर्म बीजानाम् ऐश्वर्याणि पुन: क्लेशदानि भवितु मर्हन्ति यदृच्छ योप गतानि

*02* ऋषिर् उवाच

सत्य मुक्तम् किन्त्विह वा एके न मनसो ऽद्धा विश्रम्भम् अनवस् थानस्य शठ किरात इव सङ्गच् छन्ते

*03* तथा चोक्तम्

न कुर्यात् कर्हिचित् सख्यम् मनसि ह्यन वस्थिते

यद् विश्रम्भात् चिराच् चीर्णम् चस्कन्द तप ऐश्वरम्

*04* नित्यम् ददाति कामस्यच् छिद्रम् तमनु ये ऽरय:

योगिन: कृत मैत्रस्य पत्युर् जायेव पुम्श्चली

*05* कामो मन्युर् मदो लोभ: शोक मोह भयादय:

कर्म बन्धश्च यन्मूल: स्वीकुर् यात् को नु तद्बुध:

*06* अथैवम् अखिल लोक पाल ललामो ऽपि विलक्षणैर् जडवद् अवधूत वेष भाषा चरितै: अविलक्षित भगवत् प्रभावो योगिनाम् साम्पराय विधिम् अनुशिक्षयन् स्व कलेवरम् जिहासु: आत्मनि आत्मानम् असम् व्यवहितम् अनर्थ् आन्तर भावेन अन्वीक्ष माण उपरतानु वृत्ति: उपरराम

07 तस्य ह वा एवम् मुक्त लिङ्गस्य भगवत ऋषभस्य योग माया वासनया देह इमाम् जगतीम् अभिमान्
आभासेन सङ्क्रम माणः कोङ्क वेङ्क कुटकान् दक्षिण कर्णाटकान् देशान् यदृच्छ योप गतः कुटकाचलोप वन
आस्य कृताश्म कवल उन्माद इव मुक्त मूर्धजो ऽसम्वीत एव विचचार

08 अथ समीर वेग विधूत वेणु विकर्षण जातो ग्रदावा नलः तद् वनम् आलेलिहानः सह तेन ददाह

09 यस्य किलानु चरितम् उपाकर्ण्य कोङ्क वेङ्क कुटकानाम् राजार्हन् नाम उपशिक्ष्य कलौ अधर्म उत्कृष्य माणे
भवितव्येन विमोहितः स्वधर्म पथम् अकुतोभयम् अपहाय कुपथ पाखण्डम् असमञ्जसम् निज मनीषया मन्दः
सम्प्रवर्त यिष्यते

10 येन ह वाव कलौ मनुजाप सदा देव माया मोहिताः स्व विधि नियोग शौच चारित्र विहीना देव हेलनानि
अपव्रतानि निज निजेच्छया गृह्णाना अस्नान अनाचमन अशौच केशोल् लुञ्चनादीनि कलिन अधर्म बहुलेन
उपहतधियो ब्रह्म ब्राह्मण यज्ञ पुरुष लोक विदूषकाः प्रायेण भविष्यन्ति

11 ते च ह्यर्वाक् तनया निज लोक यात्रया अन्ध परम्परया आश्वस्ताः तमस् यन्धे स्वयमेव प्रपतिष् यन्ति

12 अयम् अवतारो रजसोप प्लुत कैवल्योप शिक्षण् आर्थः

13 तस्यानु गुणान् श्लोकान् गायन्ति

अहो भुवः सप्त समुद्र वत्या द्वीपेषु वर्षेषु अधि पुण्यमे तत्

गायन्ति यत्रत् यजना मुरारेः कर्माणि भद्राणि अवतार वन्ति

14 अहो नु वम्शो यशस् आवदातः प्रैयव्रतो यत्र पुमान् पुराणः

कृत् आवतारः पुरुषः स आद्यः चचार धर्मम् यद् अकर्म हेतुम्

15 को न्वस्य काष्ठाम् अपरो ऽनुगच्छेत् मनो रथैन् आप् यभवस्य योगी

यो योग मायाः स्पृहयत् युदस्ता ह्यसत् तया येन कृत प्रयत्नाः

16 इति ह स्म सकल वेद लोक देव ब्राह्मण गवाम् परम गुरोः भगवत ऋषभाख् यस्य विशुद्धा चरितम् ईरितम्
पुम्साम् समस्त दुश् चरिताभि हरणम् परम महा मङ्गलायनम् इदम् अनु श्रद्धयोप चितया अनुशृणोति
आश्रावयति वावहितो भगवति तस्मिन् वासुदेव एकान्ततो भक्तिः अनयोर् अपि समनु वर्तते

17 यस्याम् एव कवय आत्मानम् अविरतम् विविध वृजिन सम्सार परितापोप तप्य मानम् अनुसवनम् स्नाप
यन्तः तयैव परया निर्वृत्या ह्यप वर्गम् आत्यन्तिकम् परम पुरुषार्थम् अपि स्वयम् आसादितम् नो एवाद्रि यन्ते
भगवदी यत्वेनैव परिसमाप्त सर्वार्थाः

18 राजन् पतिर् गुरुरलम् भवताम् यदूनाम्

दैवम् प्रियः कुलपतिः क्वच किङ्करो वः

अस्त्वेव मङ्ग भगवान् भजताम् मुकुन्दो

मुक्तिम् ददाति कर्हिचित् स्म न भक्ति योगम्

19 नित् यानुभूत निज लाभ निवृत्त तृष्ण:

श्रेयस् यतद् रचनया चिर सुप्त बुद्धे:

लोकस्य य: करुणया भयम् आत्म लोकम्

आख्यान् नमो भगवते ऋषभाय तस्मै

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

पञ्चम स्कन्दे षष्टो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ पञ्चम स्कन्द: सप्तमो ऽध्याय :

स्कन्द- 05: अध्याय- 07

01 श्री शुक उवाच

भरतस्तु महा भागवतो यदा भगवत अवनितल परिपालनाय सञ्चिन्तित: तद् अनुशासन पर: पञ्चजनीम् विश्वरूप दुहितरम् उपयेमे

02 तस्यामु ह वा आत्मजान् कात्स्न्र्येन अनुरूपान् आत्मन: पञ्च जनया मास भूता दिरिव भूत सूक्ष्माणि सुमतिम् राष्ट्र भृतम् सुदर्शनम् आवरणम् धूम्र केतुम् इति

03 अजनाभम् नाम एतद् वर्षम् भारतम् इति यत आरभ्य व्यपदि शन्ति

04 स बहुविन् महीपति: पितृ पितामह वदु: उवत्सल तया स्वे स्वे कर्मणि वर्तमाना: प्रजा: स्व धर्मम् अनु वर्तमान: पर्य पालयत्

05 ईजे च भगवन्तम् यज्ञ क्रतुरूपम् क्रतुभि: उच्चावचै: श्रद्धया आहृत् आग्नि होत्र दर्श पूर्णमास चातुर् मास्य पशु सोमानाम् प्रकृति विकृतिभि: अनुसवनम् चातुर् होत्र विधिना

06 सम्प्र चरत्सु नाना यागेषु विरचित् आङ्ग क्रियेषु अपूर्वम् यत् तत् क्रिया फलम् धर्माख्यम् परे ब्रह्मणि यज्ञ पुरुषे सर्व देवता लिङ्गानाम् मन्त्राणाम् अर्थ नियाम कतया साक्षात् कर्तरि पर देवतायाम् भगवति वासुदेव एव

भावय मान आत्मनै पुण्य मृदित कषायो हविःषु अध्वर्युभिः गृहय माणेषु स यजमानो यज्ञ भाजो देवाम् स्तान् पुरुषा वयवेषु अभ्य ध्यायत्

07 एवम् कर्म विशुद्ध्या विशुद्ध सत्त्वस्य अन्तर् हृद याकाश शरीरे ब्रह्मणि भगवति वासुदेवे महा पुरुष रूपोप लक्षणे श्रीवत्स कौस्तुभ वन मालार् इदर गदादिभिः उपलक्षिते निज पुरुष हृल् लिखितेन आत्मनि पुरुष रूपेण विरोचमान उच्चैस् तराम् भक्तिः अनुदिनम् एधमान रया जायत

08 एवम् वर्षायुत सहस्र पर्यन्ता वसित कर्म निर्वाणा वसरो ऽधि भुज्यमानम् स्व तनयेभ्यो रिक्थम् पितृ पैतामहम् यथा दायम् विभज्य स्वयम् सकल सम्पन्निके तात् स्व निकेतात् पुलह् आश्रमम् प्रवव्राज

09 यत्र ह वाव भगवान् हरिः अद्यापि तत् रत्यानाम् निजजनानाम् वात्सल्येन सन्निधाप् यत इच्छा रूपेण

10 यत् राश्रम पदानि उभयतो नाभिभिः दृष च्चक्रैः चक्र नदी नाम सरित् प्रवरा सर्वतः पवित्री करोति

11 तस्मिन् वाव किल स एकलः पुलह् आश्रमोप वने विविध कुसुम किसलय तुळसि काम्बुभिः कन्द मूल फलोप हारैश्च समीहमानो भगवत आराधनम् विविक्त उपरत विषय आभिलाष उपभृतोप शमः पराम् निर्वृतिम् अवाप

12 त येत् थम् अविरत पुरुष परिचर्यया भगवति प्रवर्ध मानानु राग भर द्रुत हृदय शैथिल्यः प्रहर्ष वेगेन आत्मनि उद्भिद्य मान रोम पुलक कुलक औत्कण्ठ्य प्रवृत्त प्रणय बाष्प निरुद्धाव लोक नयन एवम् निज रमणारुण चरण् आरविन्दानु ध्यान परिचित भक्ति योगेन परिप्लुत परम् आह्लाद गम्भीर हृदय हृदाव गाढ धिषणः तामपि क्रियमाणाम् भगवत् सपर्याम् न सस्मार

13 इत्थम् धृत भगवद् व्रत ऐणेयाजिन वाससा अनु सवन् आभिषेकार्द्र कपिश कुटिल जटा कलापेन च विरोच मानः सूर्यर्चा भगवन्तम् हिरण्मयम् पुरुषम् उज्जिहाने सूर्य मण्डले ऽभ् युपतिष्ठन् एतदु होवाच

14 परोरजः सवितुर् जातवेदो देवस्य भर्गो मनसेदम् जजान

सुरेतसादः पुनर् आविश्य चष्टे हम्सम् गृध्राणम् नृषद् रिङ्गि रामिमः

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

पञ्चम स्कन्दे सप्तमो ऽध्याय ः||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ पञ्चम स्कन्दः अष्टमो ऽध्याय ः

स्कन्द- *05:* अध्याय- *08*

*01* श्री शुक उवाच

एकदा तु महा नद्याम् कृत् आभिषेक नैयमिका वश्यको ब्रह्म् आक्षरम् अभि गृणानो मुहूर्त त्रयम् उदकान्त उपविवेश

*02* तत्र तदा राजन् हरिणी पिपासया जलाश याभ्याशम् एकै वोप जगाम

*03* तया पेपीय मान उदके तावद् एवावि दूरेण नदतो मृग पतेर् उन्नादो लोक भयङ्कर उदपतत्

*04* तम् उपश्रुत्य सा मृग वधूः प्रकृति विक्लवा चकित निरीक्षणा सुतराम् अपि हरि भयाभि निवेश व्यग्र हृदया पारिप्लव दृष्टिः अगत तृषा भयात् सहसैवोच् चक्राम

*05* तस्या उत् पतन्त्या अन्तर् वत्न्या उरुभयाव गलितो योनि निर्गतो गर्भः स्रोतसि निपपात

*06* तत् प्रसवोत् सर्पण भय खेदा तुरा स्वगणेन वियुज्यमाना कस्याञ्चिद् दर्याम् कृष्ण सारसती निप पात अथ च ममार

*07* तम् त्वेण कुणकम् कृपणम् स्रोत सानूहय मानम् अभि वीक्ष्य अपविद्धम् बन्धुर् इवानु कम्पया राजर्षिः भरत आदाय मृत मातरम् इति आश्रम पदम् अनयत्

*08* तस्य ह वा एण कुणक उच्चैर् एतस्मिन् कृत निजाभि मानस्य अहरहः तत् पोषण पालन लालन प्रीणन आनुध्यानेन आत्म नियमाः सहयमाः पुरुष परिचर्यादय एकै कशः कतिपयेन् आहर्गणेन वियुज्य मानाः किल सर्व एवोदवसन्

*09* अहो बतायम् हरिण कुणकः कृपण ईश्वर रथ चरण परिभ्रमण रयेण स्वगण सुहृद् बन्धुभ्यः परिवर्जितः शरणम् च मोप सादितो मामेव माता पितरौ भ्रातृ ज्ञातीन् यौथिकाम्श् चैवोपेयाय नान्यम् कञ्चन वेद मय् यति विस्रब्धश्च अत एव मया मत् परायणस्य पोषण पालन प्रीणन लालनम् अनसूयुन् आनुष्ठेयम् शरण्यो पेक्षा दोष विदुषा

*10* नूनम् ह्यार्याः साधव उपशम शीलाः कृपण सुहृद एवम् विधार्थे स्वार्थान् अपि गुरुतरान् उपेक्षन्ते

*11* इति कृतानु षङ्ग आसन शयनाटन स्थान् आशना दिषु सह मृगज हुना स्नेहानु बद्ध हृदय आसीत्

*12* कुश कुसुम समित् पलाश फल मूलोदकानि आहरिष्य माणो वृकसाला वृकादिभ्यो भयम् आशम्स मानो यदा सह हरिण कुणकेन वनम् समा विशति

*13* पथिषु च मुग्ध भावेन तत्र तत्र विषक्तम् अति प्रणय भर हृदयः कार्पण्यात् स्कन्धेनोद् वहति एवम् उत्सङ्ग उरसि चाधाय उपलालयन् मुदम् परमाम् अवाप

*14* क्रियायाम् निर्वर्त्य मानायाम् अन्तराले ऽपि उत्थायो उत्थाय यदैनम् अभि चक्षीत तर्हि वाव स वर्ष पतिः प्रकृति स्थेन मनसा तस्मा आशिष आशास्ते स्वस्ति स्ताद् वत्स ते सर्वत इति

15 अन्यदा भृशम् उद्विग्नमना नष्ट द्रविण इव कृपणः स करुणम् अतितर्षेण हरिण कुणक विरह विह्वल हृदय सन्तापः तम् एव आनुशोचन् किल कश्मलम् महद् अभिरम्भित इति होवाच

16 अपि बत स वै कृपण एण बालको मृत हरिणी सुतो ऽहो ममान् आर्यस्य शठ किरात मतेः अकृत सुकृतस्य कृत विस्रम्भ आत्म प्रत्ययेन तद् अविगणयन् सुजन इवागम् इष्यति

17 अपि क्षेमेण अस्मिन् आश्रमोप वने शष्पाणि चरन्तम् देव गुप्तम् द्रक्ष्यामि

18 अपि च न वृकः साला वृको ऽन्यतमो वा नैकचर एकचरो वा भक्षयति

19 निम्लोचति ह भगवान् सकल जगत् क्षेमोदयः त्रय् यात्मा अद्यापि मम न मृग वधून् यास आगच्छति

20 अपि स्विद् अकृत सुकृतम् आगत्य माम् सुखयिष् यति हरिण राज कुमारो विविध रुचिर दर्शनीय निज मृग दारक विनोदैः असन्तोषम् स्वानाम् अपनुदन्

21 क्ष्वेलि कायाम् माम् मृषा समाधिना आमीलित दृशम् प्रेम सम्रम्भेण चकित चकित आगत्य पृषद् अपरुष विषाणाग्रेण लुठति

22 आसादित हविषि बर्हिषि दूषिते मयोपा लब्धो भीत भीतः सपद् युपरतरास ऋषि कुमारवद् अवहित करण कलाप आस्ते

23 किम् वा अरे आचरितम् तपस् तपस् विन्यानया यद् इयम् अवनिः सविनय कृष्ण सार तनय तनुतर सुभग शिव तमाखर खुर पद पङ्क्तिभिः द्रविण विधुरा तुरस्य कृपणस्य मम द्रविण पदवीम् सूचयन्ति आत्मानम् च सर्वतः कृत कौतुकम् द्विजानाम् स्वर्गाप वर्ग कामानाम् देव यजनम् करोति

24 अपि स्विद् असौ भगवान् उडुपतिरेनम् मृगपति भयात् मृत मातरम् मृग बालकम् स्वाश्रम परिभ्रष्टम् अनुकम्पया कृपण जन वत्सलः परिपाति

25 किम् वात्मज विश्लेष ज्वर दव दहन शिखाभिः उपतप्यमान हृदय स्थल नळिनीकम् माम् उपसृत मृगी तनयम् शिशिर शान्त् आनुराग गुणित निज वदन सलिलामृत मय गभस्तिभिः स्वधय तीति च

26 एवम् अघटमान मनोरथा कुल हृदयो मृग दारका भासेन स्वारब्ध कर्मणा योगा रम्भणतो विभ्रम्शितः स योग तापसो भगवद् आराधन लक्षणाच्च कथम् इतरथा जात् यन्तर एण कुणक आसङ्गः साक्षात् निःश्रेयस प्रति पक्षतया प्राक् परित्यक्त दुस्त्यज हृदयाभि जातस्य तस्यैवम् अन्तराय विहत योगा रम्भणस्य राजर्षेः भरतस्य तावन् मृगार् भक पोषण पालन प्रीणन लालन अनुषङ्गेण अविगणयत आत्मानम् अहिरिवा खुबिलम् दुरति क्रमः कालः कराल रभस आपद्यत

27 तद् आनीम् अपि पार्श्व वर्तिनम् आत्मजम् इवानु शोचन्तम् अभिवीक्ष माणो मृग एवाभि निवेशित मना विसृज्य लोकम् इमम् सह मृगेण कलेवरम् मृतम् अनु न मृत जन्मानु स्मृतिः इतरवत् मृग शरीरम् अवाप

28 तत् रापि ह वा आत्मनो मृगत्व कारणम् भगवद् आराधन समीह् आनुभावेन अनुस्मृत्य भृशम् अनुतप्य मान आह

29 अहो कष्टम् भ्रष्टो ऽहम् आत्मवताम् अनुपथाद् यद् विमुक्त समस्त सङ्गस्य विविक्त पुण्यारण्य शरणस्य आत्मवत आत्मनि सर्वेषाम् आत्मनाम् भगवति वासुदेवे तद् अनुश्रवण मनन सङ्कीर्तन् आराधनानु स्मरणाभि योगेन अशून्य सकल यामेन कालेन समा वेशितम् समाहितम् कात्स्न्र्येन मनः तत् तु पुनः ममा बुधस्य आरान् मृग सुतम् अनु परि सुस्राव

30 इत् येवम् निगूढ निर्वेदो विसृज्य मृगीम् मातरम् पुनः भगवत् क्षेत्रम् उपशम शील मुनिगण दयितम् शाल ग्रामम् पुलस्त्य पुलहाश्रमम् कालञ्जरात् प्रत्या जगाम

31 तस्मिन् अपि कालम् प्रतीक्ष माणः सङ्गाच्च भृशम् उद्विग्न आत्म सहचरः शुष्क पर्ण तृण वीरुधा वर्तमानो मृगत्व निमित्ताव सानम् एव गणयन् मृग शरीरम् तीर्थोदक क्लिन्नम् उत्ससर्ज

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

पञ्चम स्कन्दे अष्टमो ऽध्याय ः॥

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ पञ्चम स्कन्दः नवमो ऽध्याय ः

स्कन्द- 05: अध्याय- 09

01 श्री शुक उवाच

अथ कस्यचिद् द्विज वरस्य अङ्गिरः प्रवरस्य शम दम तपः स्वाध्याया अध्ययन त्याग सन्तोष तितिक्षा प्रश्रय विद्यानसूय आत्म ज्ञानानन्द युक्तस्य आत्म सदृश श्रुत शील आचार रूपौदार्य गुणा नव सोदर्या अङ्गजा बभूवुः मिथुनम् च यवी यस्याम् भार्यायाम् यस्तु तत्र पुमान् तम् परम भागवतम् राज ऋषि प्रवरम् भरतम् उत्सृष्ट मृग शरीरम् चरम शरीरेण विप्रत्वम् गतमाहुः

02 तत् रापि स्वजन सङ्गाच्च भृशम् उद्विज मानो भगवतः कर्म बन्ध विध्वम्सन श्रवण स्मरण गुण विवरण चरण् आरविन्द युगळम् मनसा विदधद् आत्मनः प्रति घातम् आशङ्क मानो भगवद् अनुग्रहेण अनुस्मृत स्व पूर्व जन्मावलिः आत्मानम् उन्मत्त जडान्ध बधिर स्वरूपेण दर्शया मास लोकस्य

03 तस्यापि ह वा आत्म जस्य विप्रः पुत्र स्नेहानु बद्धमना आसमा वर्तनात् सम्स्कारान् यथो उपदेशम् विदधान उपनीतस्य च पुनः शौच् आचमना दीन् कर्म नियमान् अनभिप्रेतान् अपि सम शिक्षयद् अनुशिष्टेन हि भाव्यम् पितुः पुत्रेणेति

*04* स चापि तदु ह पितृ सन्निधावेव असध्री चीनम् इव स्म करोति छन्दाम्सि अध्याप यिष्यन् सह व्याहृतिभि: स प्रणव शिर: त्रि पदीम् सावित्रीम् ग्रैष्म वासन्तिकान् मासान् अधीयानम् अपि असम वेत रूपम् ग्राहया मास

*05* एवम् स्व तनुज आत्मनि अनुरागा वेशित चित्त: शौचा अध्ययन व्रत नियम गुर्वनल शुश्रूषणाद् यौप कुर्वाणक कर्माणि अनभि युक्तान् यपि समनु शिष्टेन भाव्यम् इति असदाग्रह: पुत्रम् अनुशास्य स्वयम् तावद् अनधिगत मनोरथ: कालेन अप्रमत् तेन स्वयम् गृह एव प्रमत्त उप सम्हृत:

*06* अथ यवीयसी द्विज सती स्व गर्भ जातम् मिथुनम् स पत्न्या उपन्यस्य स्वयम् अनुसम्स्थया पतिलोकम् अगात्

*07* पितर् युपरते भ्रातर एनम् अतत् प्रभाव विद: त्रय्याम् विद्यायाम् एव पर्यवसित मतयो न पर विद्यायाम् जड मतिर् इति भ्रातु: अनुशासन निर्बन्धात् न्यवृत् सन्त

*08* स च प्राकृतै: द्वि पद पशुभि: उन्मत्त जड बधिरेत् यभि भाष्य माणो यदा तद् अनुरूपाणि प्रभाषते कर्माणि च कार्य माण: परेच्छया करोति विष्टितो वेतनतो वा याच्ञ्या यदृच् छया वोप सादितम् अल्पम् बहु मृष्टम् कदन्नम् वाभ्यव हरति परम् नेन्द्रिय प्रीति निमित्तम् नित्य निवृत्त निमित्त स्व सिद्ध विशुद्ध आनुभवान् अन्द स्वात्म लाभाधिगम: सुख दु:खयो: द्वन्द्व निमित्तयो: असम्भावित देह् आभिमान:

*10* शीतोष्ण वात वर्षेषु वृष इवाना वृताङ्ग: पीन: सम्हन नाङ्ग: स्थण्डिल सम्वेशनान् उन्मर्दना मज् जन रजसा महा मणिर् इव अनभि व्यक्त ब्रह्म वर्चस: कुपटा वृत कटि: उपवीते नोरुमषिणा द्विजातिर् इति ब्रह्म बन्धुर् इति सम्ज्ञया अतज्ज्ञ जनाव मतो विचचार

*11* यदातु परत आहारम् कर्म वेतनत ईहमान: स्व भ्रातृभिर् अपि केदार कर्मणि निरूपित: तद् अपि करोति किन्तु न समम् विषमम् न्यूनम् अधिकम् इति वेद कणपिण्याक फली करण कुल्माष स्थाली पुरी षादीन् यपि अमृत वद् अभ्यव हरति

*12* अथ कदाचित् कश्चिद् वृषल पति: भद्र काळ्यै पुरुष पशुम् आलभत अपत्य काम:

*13* तस्य ह दैव मुक्तस्य पशो: पदवीम् तद् अनुचरा: परिधा वन्तो निशि निशीथ समये तमसा वृतायाम् अनधिगत पशव आकस्मिकेन विधिना केदारान् वीरासनेन मृग वराहा दिभ्य: सम्रक्ष माणम् अङ्गिर: प्रवर सुतम् अपश्यन्

*14* अथ त एनम् अनवद्य लक्षणम् अवमृश्य भर्तृ कर्म निष्पत्तिम् मन्यमाना बद्ध्वा रशनया चण्डिका गृहम् उपनिन्यु: मुदा विकसित वदना:

*15* अथ पणयस्तम् स्व विधिनाभि षिच्या हतेन वाससा आच्छाद्य भूषणा लेप स्रक् तिलकादिभि: उपस्कृतम् भुक्त वन्तम् धूप दीप माल्य लाज किसलयाङ् कुर फलोप हारो पेतया वैशस सम्स्थया महता गीत स्तुति मृदङ्ग पणव घोषेण च पुरुष पशुम् भद्र काळ्या: पुरत उपवेशया मासु:

*16* अथ वृषल राज पणि: पुरुष पशो: असृगास वेन देवीम् भद्र काळीम् यक्ष्य माण: तद् अभि मन्त्रितम् असिम् अतिकराल निशितम् उपाददे

17 इति तेषाम् वृष लानाम् रजस् तमः प्रकृतीनाम् धन मद रज उत्सिक्त मनसाम् भगवत् कला वीर कुलम् कदर्थी कृत्य उत्पथेन स्वैरम् विहरताम् हिम्सा विहाराणाम् कर्माति दारुणम् यद् ब्रह्म भूतस्य साक्षाद् ब्रह्मर्षि सुतस्य निर्वैरस्य सर्व भूत सुहृदः सूनायाम् अपि अननुमतम् आलम्भनम् तद् उपलभ्य ब्रह्म तेजसा ति दुर्विषहेण दन्दह्य मानेन वपुषा सहसोच् चचाट सैव देवी भद्र काळी

18 भृशम् अमर्ष रोष आवेश रभस विलसित भ्रुकुटि विटप कुटिल दम्ष्ट्रारु णेक्षणा टोपा अति भयानक वदना हन्तु कामे वेदम् महा अट्टहासम् अति सम्रम्भेण विमुञ्चन्ती तत उत्पत्य पापीयसाम् दुष्टानाम् तेनै वासिना विवृक्ण शीर्ष्णाम् गलात् स्रवन्तम् असृगासवम् अत्युष्णम् सह गणेन निपीय अति पानमद विह्वलोच् चैस्तराम् स्व पार्षदैः सह जगौ ननर्त च विजहार च शिरः कन्दुक लीलया

19 एवम् एव खलु महद् अभिचाराति क्रमः कात्स्न्र्येन आत्मने फलति

20 न वा एतद् विष्णु दत्त महद् अद्भुतम् यद् असम्भ्रमः स्व शिरश् छेदन आपतिते ऽपि विमुक्त देहादि आत्म भावसु दृढ हृदय ग्रन्थीनाम् सर्व सत्त्व सुहृद् आत्मनाम् निर्वैराणाम् साक्षाद् भगवता अनिमिषारि वरायुधेन अप्रमत्तेन तैस्तैर् भावैः परिरक्ष्य माणानाम् तत् पाद मूलम् अकुतश् चिद् भयम् उपसृतानाम् भागवत परम हम्सानाम्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

पञ्चम स्कन्दे नवमो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ पञ्चम स्कन्दः दशमो ऽध्याय :

स्कन्द- 05: अध्याय- 10

01 श्री शुक उवाच

अथ सिन्धु सौवीर पते रहूगणस्य व्रजत इक्षु मत्यास् तटे तत् कुल पतिना शिबिकावाह पुरुषान् वेषण समये दैवेनोप सादितः स द्विज वर उपलब्ध एष पीवा युवा सम्हन् अनाङ्गो गो खरवद् धुरम् वोढुम् अलमिति पूर्व विष्टि गृहीतैः सह गृहीतः प्रसभम् अतदर्ह उवाह शिबिकाम् स महानु भावः

02 यदा हि द्विज वरस्य इषु मात्राव लोकानु गतेः न समाहिता पुरुष गतिः तदा विषम गताम् स्व शिबिकाम् रहूगण उपधार्य पुरुषान् अधिवहत आह हे वोढारः साध्व् अतिक्रमत किमिति विषमम् उह्यते यानम् इति

03 अथ त ईश्वर वचः सोपालम्भम् उपाकर्ण्य उपाय तुरीयात् छङ्कित मनसः तम् विज्ञापयाम् बभूवुः

04 न वयम् नरदेव प्रमत्ता भवन् नियमानु पथाः साध्वेव वहामः अयम् अधुनैव नियुक्तो ऽपि न द्रुतम् व्रजति नानेन सह वोढुमु ह वयम् पारयाम इति

05 साम् सर्गिको दोष एव नूनम् एकस् यापि सर्वेषाम् साम् सर्गिकाणाम् भवितुम् अर्हतीति निश्चित्य निशम्य कृपण वचो राजा रहूगण उपासित वृद्धो ऽपि निसर्गेण बलात् कृत ईषद् उत्थित मन्युः अविस्पष्ट ब्रह्म तेजसम् जात वेदसम् इव रजसा वृतमति राह

06 अहो कष्टम् भ्रातः व्यक्तम् उरु परिश्रान्तो दीर्घम् अध्वानम् एक एव ऊहिवान् सुचिरम् नाति पीवा न सम्हन नाङ्गो जरसा चोप द्रुतो भवान् सखे नो एवापर एते सङ्घट्टिन इति बहु विप्रलब्धो ऽपि अविद्यया रचित द्रव्य गुण कर्माशय स्व चरम कलेवरे ऽवस्तुनि सम्स्थान विशेषे ऽहम् ममेति अनध् यारोपित मिथ्या प्रत्ययो ब्रह्म भूतः तूष्णीम् शिबिकाम् पूर्ववद् उवाह

07 अथ पुनः स्वशिबि कायाम् विषम गतायाम् प्रकुपित उवाच रहूगणः किमिदम् अरे त्वम् जीवन् मृतो माम् कदर्थी कृत्य भर्तृ शासनम् अतिचरसि प्रमत् तस्य च ते करोमि चिकित्साम् दण्ड पाणिर् इव जनताया यथा प्रकृतिम् स्वाम् भजिष्यस इति

08 एवम् बह्व बद्धम् अपि भाषमाणम् नरदेव् आभिमानम् रजसा तमसानु विद्धेन मदेन तिरस्कृता शेष भगवत् प्रिय निकेतम् पण्डित मानिनम् स भगवान् ब्राह्मणो ब्रह्म भूतः सर्व भूत सुहृद् आत्मा योगेश्वर चर्यायाम् नातिव् युत्पन्न मतिम् स्मयमान इव विगतस्मय इदम् आह

09 ब्राह्मण उवाच

त्वयो दितम् व्यक्तम् अविप्र लब्धम् भर्तुः स मे स्याद् यदि वीर भारः

गन्तुर् यदि स्याद् अधिगम् यमध्वा पीवेति राशौ न विदाम् प्रवादः

10 स्थौल्यम् कार्श्यम् व्याधय आधयश्च क्षुत्तृड् भयम् कलिर् इच्छा जरा च

निद्रा रतिर् मन्युर् अहम् मदः शुचो देहेन जातस्य हि मे न सन्ति

11 जीवन् मृत त्वम् नियमेन राजन् आद्यन्त वद् यद् विकृतस्य दृष्टम्

स्व स्वाम्य भावो ध्रुव ईड्य यत्र तर्ह् युच्यते ऽसौ विधि कृत्य योगः

12 विशेष बुद्धेः विवरम् मनाक्च पश्याम यन्न व्यवहार तो ऽन्यत्

क ईश्वरः तत्र किमीशि तव्यम् तथापि राजन् करवाम किम् ते

13 उन्मत्त मत्त जडवत् स्वसम्स्थाम् गतस्य मे वीर चिकित्सि तेन

अर्थः कियान् भवता शिक्षितेन स्तब्ध प्रमत् तस्य च पिष्टपेषः

14 श्री शुक उवाच

एतावद् अनुवाद परि भाषया प्रत् युदीर्य मुनिवर उपशम शील उपरतान् आत्म्य निमित्त उपभोगेन कर्मा रब्धम् व्यपनयन् राजयानम् अपि तथो वाह

15 स चापि पाण्डवेय सिन्धु सौवीर पतिः तत्त्व जिज्ञासायाम् सम्यक् श्रद्धयाधि कृताधि कारः तद् हृदय ग्रन्थि मोचनम् द्विज वच आश्रुत्य बहु योग ग्रन्थ सम्मतम् त्वरयाव रुह्य शिरसा पाद मूलम् उपसृतः क्षमापयन् विगत नृप देव स्मय उवाच

16 कस्त्वम् निगूढश् चरसि द्विजानाम् बिभ ऋषि सूत्रम् कतमो ऽवधूतः

कस्यासि कुत्रत्य इहापि कस्मात् क्षेमाय नश्चेद् असि नोत शुक्लः

17 नाहम् विशङ्के सुरराज वज्रात् न त्र्यक्ष शूलात् न यमस्य दण्डात्

नाग् न्यर्क सोमानिल वित्त पास्त्राच् छङ्के भृशम् ब्रह्म कुलाव मानात्

18 तद् ब्रूह्य सङ्गो जडवन् निगूढ विज्ञान वीर्यो विचरस्य पारः

वचाम्सि योग ग्रथितानि साधो न नः क्षमन्ते मनसापि भेत्तुम्

19 अहम् च योगेश्वरम् आत्म तत्त्व विदाम् मुनीनाम् परमम् गुरुम् वै

प्रष्टुम् प्रवृत्तः किमिहारणम् तत् साक्षाद् हरिम् ज्ञान कलाव तीर्णम्

20 स वै भवान् लोक निरीक्ष णार्थम् अव्यक्त लिङ्गो विचरत् यपि स्वित्

योगेश् वराणाम् गतिम् अन्ध बुद्धिः कथम् विचक्षीत गृहानु बन्धः

21 दृष्टः श्रमः कर्मत आत्मनो वै भर्तुर् गन्तुः भवतश् चानु मन्ये

यथा सतो दान यनाद्य भावात् समूल इष्टो व्यवहार मार्गः

22 स्थाल् यग्नि तापात् पयसो ऽभि तापः तत् तापतः तण्डुल गर्भ रन्धिः

देहेन्द्रिया स्वा शय सन्निकर्षात् तत् सम्सृतिः पुरुषस् यानुरोधात्

23 शास्ताभि गोप्ता नृपतिः प्रजानाम् यः किङ्करो वै न पिनष्टि पिष्टम्

स्व धर्मम् आराधनम् अच्युतस्य यदीह मानो विजहात्य घौघम्

24 तन्मे भवान् नर देव् आभिमान मदेन तुच्छी कृत सत्तमस्य

कृषीष्ट मैत्री दृशम् आर्त बन्धो यथा तरे सद् अवध्यानम् अम्हः

25 न विक्रिया विश्व सुहृत् सखस्य साम्येन वीताभि मतेस् तवापि

महद् विमानात् स्व कृताद्धि मादृङ् नङ्क्ष्यति अदूराद् अपि शूल पाणिः

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

पञ्चम स्कन्दे दशमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ पञ्चम स्कन्द: एका दशो ऽध्याय :

स्कन्द- 05: अध्याय- 11

01 ब्राह्मण उवाच

अकोविद: कोविद वाद वादान् वदस्यथो नाति विदाम् वरिष्ठ:

न सूरयो हि व्यवहार मेनम् तत्त्वाव मर्शेन सहा मनन्ति

02 तथैव राजन् उरुगार्ह मेध वितान विद्योरु विजृम्भि तेषु

न वेद वादेषु हि तत्त्व वाद: प्रायेण शुद्धो नु चकास्ति साधु:

03 न तस्य तत्त्व ग्रहणाय साक्षाद् वरीयसीर् अपि वाच: समासन्

स्वप्ने निरुक्त्या गृहमेधि सौख्यम् न यस्य हेयानु मितम् स्वयम् स्यात्

04 यावन् मनो रजसा पूरुषस्य सत्त्वेन वा तमसा वानु रुद्धम्

चेतोभिर् आकूतिभिर् आतनोति निरङ्कुशम् कुशलम् चेतरम् वा

05 स वासन् आत्मा विषयोप रक्तो गुण प्रवाहो विकृत: षोडश् आत्मा

बिभ्रत् पृथङ् नामभि रूप भेदम् अन्तर् बहिष्ट्वम् च पुरैस् तनोति

06 दु:खम् सुखम् व्यतिरिक्तम् च तीव्रम् कालोप पन्नम् फलम् आव्यनक्ति

आलिङ्ग्य माया रचित अन्तर् आत्मा स्व देहिनम् सम्सृति चक्रकूट:

07 तावानयम् व्यवहार: सदावि: क्षेत्रज्ञ साक्ष्यो भवति स्थूल सूक्ष्म:

तस्मान् मनो लिङ्गम् अदो वदन्ति गुणा गुणत्वस्य परावरस्य

08 गुणानु रक्तम् व्यसनाय जन्तो: क्षेमाय नैर् गुण्य मथो मन: स्यात्

यथा प्रदीपो घृत वर्ति मश्नन् शिखा: सधूमा भजति ह्यन्यदा स्वम्

पदम् तथा गुण कर्मानु बद्धम् वृत्तीर् मन: श्रयते ऽन्यत्र तत्त्वम्

09 एका दशासन् मनसो हि वृत्तय आकूतय: पञ्च धियो ऽभिमान:

मात्राणि कर्माणि पुरम् च तासाम् वदन्ति हैकादश वीर भूमी:

10 गन्धा कृति स्पर्श रस श्रवाम्सि विसर्ग रत्यर्त् यभि जल्प शिल्पा:

एका दशम् स्वीकरणम् ममेति शय्यामहम् द्वादशम् एक आहु:

11 द्रव्य स्वभावा शय कर्म कालै: एका दशामी मनसो विकारा:

सहस्रश: शतश: कोटि शश्च क्षेत्रज्ञतो न मिथो न स्वत: स्यु:

12 क्षेत्रज्ञ एता मनसो विभूती: जीवस्य माया रचितस्य नित्या:

आविर् हिता: क्वापि तिरोहि ताश्च शुद्धो विचष्टे हयवि शुद्ध कर्तु:

13 क्षेत्रज्ञ आत्मा पुरुष: पुराण: साक्षात् स्वयम् ज्योतिर् अज: परेश:

नारायणो भगवान् वासुदेव: स्व मायया आत्मन् यवधीय मान:

14 यथानिल: स्थावर जङ्ग मानाम् आत्म स्वरूपेण निविष्ट ईशेत्

एवम् परो भगवान् वासुदेव: क्षेत्रज्ञ आत्मेदम् अनुप्रविष्ट:

15 न यावद् एताम् तनुभृन् नरेन्द्र विधूय मायाम् वयुनोद येन

विमुक्त सङ्गो जितषट् स पत्नो वेद् आत्म तत्त्वम् भ्रमतीह तावत्

16 न यावदे तन् मन आत्म लिङ्गम् सम्सार तापा वपनम् जनस्य

यच् छोक मोहा मय राग लोभ वैरानु बन्धम् ममताम् विधत्ते

17 भ्रातृ व्यमेनम् तद् अदभ्र वीर्यम् उपेक्षयाध् येधितम् अप्रमत्त:

गुरो: हरे: चरणो उपासनास् त्रो जहि व्यलीकम् स्वयम् आत्म मोषम्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

पञ्चम स्कन्दे एका दशो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ पञ्चम स्कन्दः द्वा दशो ऽध्याय :

स्कन्द- *05:* अध्याय- *12*

*01* रहूगण उवाच

नमो नमः कारण विग्रहाय स्वरूप तुच्छी कृत विग्रहाय

नमो ऽवधूत द्विज बन्धु लिङ्ग निगूढ नित् यानुभवाय तुभ्यम्

*02* ज्वरा मयार्तस्य यथा गदम् सत् निदाघ दग्धस्य यथा हिमाम्भः

कुदेह मानाहि विदष्ट दृष्टेः ब्रह्मन् वचस्ते ऽमृतम् औषधम् मे

*03* तस्माद् भवन्तम् मम सम्श यार्थम् प्रक्ष्यामि पश्चाद् अधुना सुबोधम्

अध्यात्म योग ग्रथितम् तवोक्तम् आख्याहि कौतूहल चेतसो मे

*04* यदाह योगेश्वर दृश्य मानम् क्रिया फलम् सद् व्यवहार मूलम्

न ह्यञ्जसा तत्त्व विमर्शनाय भवान् अमुष्मिन् भ्रमते मनो मे

*05* ब्राह्मण उवाच

अयम् जनो नाम चलन् पृथिव्याम् यः पार्थिवः पार्थिव कस्य हेतोः

तस्यापि चाङ्घ्र्योर् अधि गुल्फ जङ्घा जानूरु मध्योर शिरोधर् आम्साः

*06* अम्से ऽधि दार्वी शिबिका च यस्याम् सौवीर राजेत्य पदेश आस्ते

यस्मिन् भवान् रूढ निज् आभिमानो राजास्मि सिन्धुषु इति दुर् मदान्धः

*07* शोच्यान् इमाम्स् त्वम् अधिकष्ट दीनान् विष्ट्या निगृह्णन् निर् अनुग्रहो ऽसि

जनस्य गोप्तास्मि विकत्थ मानो न शोभसे वृद्ध सभासु धृष्टः

*08* यदा क्षितावेव चरा चरस्य विदाम निष्ठाम् प्रभवम् च नित्यम्

तन् नामतो ऽन्यद् व्यवहार मूलम् निरूप्यताम् सत् क्रिययानु मेयम्

*09* एवम् निरुक्तम् क्षिति शब्द वृत्तम् असन्नि धानात् परमाणवो ये

अविद्यया मनसा कल्पितास्ते येषाम् समूहेन कृतो विशेषः

*10* एवम् कृशम् स्थूलम् अणुर् बृहद् यद् असच्च सज्जीवम् अजीवम् अन्यत्

द्रव्य स्व भावाशय काल कर्म नाम्ना जयावेहि कृतम् द्वितीयम्

*11* ज्ञानम् विशुद्धम् परमार्थ मेकम् अनन्तरम् त्वबहिर् ब्रह्म सत्यम्

प्रत्यक् प्रशान्तम् भगवच् छब्द सम्ज्ञम् यद् वासुदेवम् कवयो वदन्ति

12 रहूगणै तत् तपसा न याति न चेज्यया निर्व पणाद् गृहाद्वा

न च्छन्दसा नैव जलाग्नि सूर्यैः विना महत् पाद रजो ऽभिषेकम्

13 यत् रोत्तम श्लोक गुणानु वादः प्रस्तूयते ग्राम्य कथा विघातः

निषेव्य माणो ऽनुदिनम् मुमुक्षोः मतिम् सतीम् यच्छति वासुदेवे

14 अहम् पुरा भरतो नाम राजा विमुक्त दृष्ट श्रुत सङ्ग बन्धः

आराधनम् भगवत ईहमानो मृगो ऽभवम् मृग सङ्गाद् हतार्थः

15 सा माम् स्मृतिः मृग देहे ऽपि वीर कृष्णार्चन प्रभवा नो जहाति

अथो अहम् जन सङ्गाद् असङ्गो विशङ्क मानो ऽविवृतश् चरामि

16 तस्मान् नरो ऽसङ्ग सुसङ्ग जात ज्ञानासिने हैव विवृक्णमोहः

हरिम् तद् ईहा कथन श्रुताभ्याम् लब्ध स्मृतिः याति अतिपार मध्वनः

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

पञ्चम स्कन्दे द्वा दशो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ पञ्चम स्कन्दः त्रयो दशो ऽध्याय :

स्कन्द- 05: अध्याय- 13

01 ब्राह्मण उवाच

दुरत्यये ऽध्वन्य जया निवेशितो रजस् तमः सत्त्व विभक्त कर्म दृक्

स एष सार्थो ऽर्थ परः परिभ्रमन् भवाटवीम् याति न शर्म विन्दति

02 यस्यामि मे षण् नरदेव दस्यवः सार्थम् विलुम्पन्ति कुनायकम् बलात्

गोमायवो यत्र हरन्ति सार्थिकम् प्रमत् तमा विश्य यथोरणम् वृकाः

03 प्रभूत वीरुत् तृण गुल्म गह्वरे कठोरदम्शैः मशकैर् उपद्रुतः

क्वचित्तु गन्धर्व पुरम् प्रपश्यति क्वचित् क्वचिच् चाशुरयोल् मुकग्रहम्

04 निवासतो य द्रविण् आत्म बुद्धिः ततस् ततो धावति भो अटव्याम्

क्वचिच् च वात् योत्थित पाम्सु धूम्रा दिशो न जानाति रज स्वलाक्षः

05 अदृश्य झिल्लीस् वन कर्णशूल उलूक वाग्भिः व्यथित् आन्तर् आत्मा

अपुण्य वृक्षान् श्रयते क्षुधार्दितो मरीचि तोयान् यभिधावति क्वचित्

06 क्वचिद् वितोयाः सरितो ऽभियाति परस्परम् चालषते निरन्धः

आसाद्य दावम् क्वचिद् अग्नि तप्तो निर्विद्यते क्व च यक्षैर् हृतासुः

07 शूरैर् हृतस्वः क्व च निर्विण्ण चेताः शोचन् विमुह्यन् उपयाति कश्मलम्

क्वचिच् च गन्धर्व पुरम् प्रविष्टः प्रमोदते निर्वृतवन् मुहूर्तम्

08 चलन् क्वचित् कण्टक शर्कराङ्घ्रिः नगारु रुक्षुः विमना इवास्ते

पदे पदे ऽभ्यन्तर वह्नि नार्दितः कौटुम्बिकः क्रुध् यति वै जनाय

09 क्वचिन् निगीर्णो ऽजगराहि ना जनो नावैति किञ्चिद् विपिने ऽपविद्धः

दष्टः स्म शेते क्व च दन्द शूकैः अन्धो ऽन्धकूपे पतितस् तमिस्रे

10 कर्हि स्म चित् क्षुद्र रसान् विचिन्वन् तन् मक्षिकाभिर् व्यथितो विमानः

तत् राति कृच्छ्रात् प्रति लब्धमानो बलाद् विलुम्पन् त्यथ तम् ततो ऽन्ये

11 क्वचिच् च शीता तप वात वर्ष प्रतिक्रियाम् कर्तुम् अनीश आस्ते

क्वचिन् मिथो विपणन् यच्च किञ्चिद् विद्वेष मृच्छत् युत वित्त शाठ्यात्

12 क्वचित् क्वचित् क्षीण धनस्तु तस्मिन् शय्यासन स्थान विहार हीनः

याचन् पराद् अप्रति लब्ध कामः पारक्य दृष्टिः लभते ऽवमानम्

13 अन्योन्य वित्त व्यति षङ्ग वृद्ध वैरानु बन्धो विवहन् मिथश्च

अध्वन् यमुष्मिन् उरुकृच् छ्रवित्त बाधोप सर्गैः विहरन् विपन्नः

14 ताम् स्तान् विपन्नान् स हि तत्र तत्र विहाय जातम् परिगृह्य सार्थः

आवर्तते ऽद्यापि न कश्चिद् अत्र वीरा ध्वनः पारम् उपैति योगम्

15 मनस्विनो निर्जित दिग् गजेन्द्रा ममेति सर्वे भुवि बद्ध वैराः

मृधे शयीरन् न तु तद् व्रजन्ति यन्न्यस्त दण्डो गतवैरो ऽभियाति

16 प्रसज्जति क्वापि लता भुज् आश्रयः तद् आश्रया व्यक्त पद द्विज स्पृहः

क्वचित् कदाचिद् हरि चक्र तस् त्रसन् सख्यम् विधत्ते बक कङ्क गृध्रै:

17 तैर् वञ्चितो हम्स कुलम् समाविशन् अरोचयन् शीलम् उपैति वानरान्

तज् जाति रासेन सुनिर् वृतेन्द्रिय: परस्परोद् वीक्षण विस्मृता वधि:

18 द्रुमेषु रम्स्यन् सुत दार वत्सलो व्यवाय दीनो विवश: स्व बन्धने

क्वचित् प्रमादाद् गिरि कन्दरे पतन् वल्लीम् गृहीत्वा गज भीत आस्थित:

19 अत: कथञ्चित् स विमुक्त आपद: पुनश्च सार्थम् प्रविशत् यरिन्दम

अध्वन् यमुष्मिन् अजया निवेशितो भ्रमञ्जनो ऽद्यापि न वेद कश्चन

20 रहूगण त्वम् अपि हयध्वनो ऽस्य सन्न्यस्त दण्ड: कृत भूत मैत्र:

असज्जित् आत्मा हरिसेवया शितम् ज्ञानासि मादाय तराति पारम्

21 राजो उवाच

अहो नृ जन्म् आखिल जन्म शोभनम् किम् जन्मभि: त्वपरैर् अप्य मुष्मिन्

न यद् हृषीकेश यश: कृत् आत्मनाम् महात्मनाम् व: प्रचुर: समागम:

22 न हयद्भुतम् त्वच् चरणाब्ज रेणुभि: हताम् हसो भक्तिर् अधोक्षजे ऽमला

मौहूर्तिकाद् यस्य समाग माच्च मे दुस्तर्क मूलो ऽपहतो ऽविवेक:

23 नमो महद्भ्यो ऽस्तु नम: शिशुभ्यो नमो युवभ्यो नम आवटुभ्य:

ये ब्राह्मणा गाम् अवधूत लिङ्गा: चरन्ति तेभ्य: शिवमस्तु राज्ञाम्

24 श्री शुक उवाच

इत् येवम् उत्तरा मात: स वै ब्रह्म ऋषि सुत: सिन्धु पतये आत्म स तत्त्वम् विगणयत: परानुभाव: परम कारुणिक तयोप दिश्य रहूगणेन स करुणम् अभिवन्दित चरण आपूर्णार्णव इव निभृत करणोर् म्याशयो धरणिम् इमाम् विचचार

25 सौवीर पतिर् अपि सुजन सम वगत परमात्म स तत्त्व आत्मनि अविद्याध् यारोपिताम् च देहात्म मतिम् विससर्ज - एवम् हि नृप भगवद् आश्रिता श्रितानु भाव:

26 राजो उवाच

यो ह वा इह बहुविदा महा भागवत त्वया भिहित: परोक्षेण वचसा जीव लोक भवाध्वा स हयार्य मनीषया कल्पित विषयो न अञ्जसा व्युत्पन्न लोक समधिगम: अथ तदै वै तद् दुरवगमम् सम वेतानु कल्पेन निर्दिश्यताम् इति

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

पञ्चम स्कन्दे त्रयो दशो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ पञ्चम स्कन्द: चतुर् दशो ऽध्याय :

स्कन्द- 05: अध्याय- 14

01 स होवाच

स एष देह् आत्म मानिनाम् सत्त्वादि गुण विशेष विकल्पित कुशला कुशल समवहार विनिर्मित विविध देहा वलिभि: वियोग सम्योगादि अनादि सम्सार् आनुभवस्य द्वार भूतेन षड् इन्द्रिय वर्गेण तस्मिन् दुर्गाध् ववद् असुगमे ऽध्वन् यापतित ईश्वरस्य भगवतो विष्णो: वश वर्तिन्या मायया जीवलोको ऽयम् यथा वणिक्सार्थो ऽर्थपर: स्व देह निष्पादित कर्म् आनुभव: श्मशान वद् अशिवत मायाम् सम्सारा टव्याम् गतो नाद्यापि विफल बहु प्रति योगेह: तत् तापोप शमनीम् हरि गुरु चरण् आरविन्द मधुकरानु पदवीम् अवरुन्धे यस्यामु ह वा एते षड् इन्द्रिय नामान: कर्मणा दस्यव एव ते

02 तद् यथा पुरुषस्य धनम् यत् किञ्चिद् धर्म उपयिकम् बहु कृच्छ्राधि गतम् साक्षात् परम पुरुष् आराधन लक्षणो यो ऽसौ धर्म: तम् तु साम्पराय उदा हरन्ति तद् धर्म्यम् धनम् दर्शन स्पर्शन श्रवणा स्वादना वघ्राण सङ्कल्प व्यवसाय गृह ग्राम्योप भोगेन कुना थस्याजित् आत्मनो यथा सार्थस्य विलुम्पन्ति

03 अथ च यत्र कौटुम्बिका दारा पत्यादयो नाम्ना कर्मणा वृक सृगाला एव अनिच्छतो ऽपि कदर् यस्य कुटुम्बिन उरणकवत् सम्रक्ष्य माणम् मिषतो ऽपि हरन्ति

04 यथा हि अनुवत्सरम् कृष्यमाणम् अपि अदग्ध बीजम् क्षेत्रम् पुनर् एवा वपनकाले गुल्मतृण वीरुद्भि: गह्वरमिव भवति एवमेव गृहाश्रम: कर्म क्षेत्रम् यस्मिन् न हि कर्माणि उत्सीदन्ति यदयम् काम करण्ड एष आवसथ:

05 तत्र गतो दम्श मशक समापसदै: मनुजै: शलभ शकुन्त तस्कर मूषकादिभि: उपरुध्यमान बहि:प्राण: क्वचित् परिवर्तमानो ऽस्मिन् नध्वनि अविद्या काम कर्मभि: उपरक्त मनसानुप पन्नार्थम् नरलोकम् गन्धर्व नगरम् उपपन्नम् इति मिथ्या दृष्टि: अनुपश्यति

06 तत्र च क्वचिद् आतपोदक निभान् विषयान् उपधावति पान भोजन व्यवायादि व्यसन लोलुप:

07 क्वचिच् च अशेष दोष निषदनम् पुरीष विशेषम् तद् वर्ण गुण निर्मित मतिः सुवर्णम् उपादित् सति अग्नि काम कातर इव उल्मुक पिशाचम्

08 अथ कदाचित् निवास पानीय द्रविणादि अनेक् आत्मोप जीवनाभि निवेश एतस्याम् सम्सारा टव्याम् इतस् ततः परिधावति

09 क्वचिच् च वात्य उपम्यया प्रमदय आरोहम् आरोपितः तत् काल रजसा रजनी भूत इवा साधु मर्यादो रज स्व लाक्षो ऽपि दिग् देवता अतिरज स्वलमतिः न विजानाति

10 क्वचित् सकृद् अवगत विषय वैतथ्यः स्वयम् पराभि ध्यानेन विभ्रम्शित स्मृतिः तयैव मरीचि तोय प्रायाम् स्ताने वाभि धावति

11 क्वचिद् उलूक झिल्लीस् वनवद् अति परुष रभसाटोपम् प्रत्यक्षम् परोक्षम् वा रिपुराज कुल निर्भर्त्सितेन अति व्यथित कर्ण मूल हृदयः

12 स यदा दुग्ध पूर्व सुकृतः तदा कारस्कर काक तुण्डादि अपुण्य द्रुमलता विषोद पानवद् उभयार्थ शून्य द्रविणान् जीवन् मृतान् स्वयम् जीवन् म्रियमाण उपधावति

13 एकदा असत् प्रसङ्गान् निकृतमतिः व्युद कस्रोतः स्खलनवद् उभयतो ऽपि दुःखदम् पाखण्डम् अभियाति

14 यदा तु परबाधय अन्ध आत्मने नोपनमति तदा हि पितृ पुत्र बर्हिष्मतः पितृ पुत्रान् वा स खलु भक्षयति

15 क्वचिद् आसाद्य गृहम् दाववत् प्रियार्थ विधुरम् असुखोदर्कम् शोकाग्निना दह्यमानो भृशम् निर्वेदम् उपगच्छति

16 क्वचित् काल विषमित राज कुल रक्षसा पहृत प्रियतम धनासुः प्रमृतक इव विगत जीव लक्षण आस्ते

17 कदाचिन् मनो रथोप गत पितृ पितामहादि असत्सद् इति स्वप्न निर्वृति लक्षणम् अनुभवति

18 क्वचिद् गृहाश्रम कर्म चोदना तिभर गिरिम् आरुरुक्ष माणो लोक व्यसन कर्षित मनाः कण्टक शर्करा क्षेत्रम् प्रविशन् इव सीदति

19 क्वचिच् च दुःसहेन कायाभ् यन्तर वह्निना गृहीत सारः स्व कुटुम्बाय क्रुध्यति

20 स एव पुनः निद्राजगर गृहीतो ऽन्धे तमसि मग्नः शून् यारण्य इव शेते नान्यत् किञ्चन वेद शव इवाप विद्धः

21 कदाचिद् भग्न मान दम्ष्ट्रो दुर्जन दन्द शूकैः अलब्ध निद्राक्षणो व्यथित हृदयेनानु क्षीयमाण विज्ञानो ऽन्धकूपे ऽन्धवत् पतति

22 कर्हि स्म चित् काम मधुलवान् विचिन्वन् यदा परदार पर द्रव्याणि अवरुन्धानो राज्ञा स्वामिभिर् वा निहतः पतति अपारे निरये

23 अथ च तस्माद् उभयथापि हि कर्मास्मिन् आत्मनः सम्सारा वपनम् उदाहरन्ति

24 मुक्तस् ततो यदि बन्धाद् देव दत्त उपाच् छिनत्ति तस्माद् अपि विष्णु मित्र इत् यनवस्थितिः

25 क्वचिच् च शीत वातादि अनेक आधि दैविक भौतिक् आत्मी यानाम् दशानाम् प्रति निवारणे ऽकल्पो दुरन्त चिन्तया विषण्ण आस्ते

26 क्वचिन् मिथो व्यवहरन् यत् किञ्चिद् धनम् अन्येभ्यो वा काकिणिका मात्रम् अपि अपहरन् यत् किञ्चिद्वा विद्वेषम् एति वित्त शाठ्यात्

27 अध्वन् यमुष्मिन् इम उपसर्गाः तथा सुख दुःख राग द्वेष भय अभिमान प्रमादो [उ]न्माद शोक मोह लोभ मात्सर्य ईर्ष् यावमान क्षुत् पिपासाधि व्याधि जन्म जरा मरणादयः

28 क्वापि देव मायया स्त्रिया भुज लतोप गूढः प्रस्कन्न विवेक विज्ञानो यद् विहार गृहा रम्भाकुल हृदयः तद् आश्रयाव सक्त सुत दुहितृ कलत्र भाषित् आवलोक विचेष्टि ताप हृत हृदय आत्मानम् अजित् आत्मा पारे ऽन्धे तमसि प्रहिणोति

29 कदाचिद् ईश्वरस्य भगवतो विष्णोः चक्रात् परमाण् वादि द्विपरार् धाप वर्ग कालोप लक्षणात् परिवर्तितेन वयसा रम्हसा हरत आब्रह्म तृण स्तम्बा दीनाम् भूतानाम् अनिमिषतो मिषताम् वित्रस्त हृदयः तम् एवेश्वरम् कालचक्र निजायुधम् साक्षाद् भगवन्तम् यज्ञ पुरुषम् अनादृत्य पाखण्ड देवताः कङ्क गृध्र बक वटप्राया आर्य समय परिहृताः साङ्केत् येनाभि धत्ते

30 यदा पाखण्डिभिः आत्म वञ्चितैः तैरुरु वञ्चितो ब्रह्म कुलम् समावसन् तेषाम् शीलम् उपनयनादि श्रौत स्मार्त कर्म आनुष्ठानेन भगवतो यज्ञ पुरुषस्य आराधनम् एव तद् अरोचयन् शूद्र कुलम् भजते निगम् आचारे ऽशुद्धितो यस्य मिथुनी भावः कुटुम्ब भरणम् यथा वानर जातेः

31 तत्रापि निरवरोधः स्वैरेण विहरन् अति कृपण बुद्धिः अन्योन्य मुख निरीक्षण आदिना ग्राम्य कर्मण इव विस्मृत कालावधिः

32 क्वचिद् द्रुमव दैहि कार्थेषु गृहेषु रम्स्यन् यथा वानरः सुत दार वत्सलो व्यवाय क्षणः

33 एवम् अध्वनि अवरुन्धानो मृत्यु गज भयात् तमसि गिरि कन्दर प्राये

34 क्वचिच् छीत वातादि अनेक दैविक भौतिक् आत्मी यानाम् दुःखानाम् प्रति निवारणे ऽकल्पो दुरन्त विषय विषण्ण आस्ते

35 क्वचिन् मिथो व्यवहरन् यत् किञ्चिद् धनम् उपयाति वित्त शाठ्येन

36 क्वचित् क्षीण धनः शय्यासना शनादि उपभोग विहीनो यावद् अप्रतिलब्ध मनो रथोप गतादाने ऽवसित मतिः ततस् ततो ऽवमाना दीनि जनाद् अभिलभते

37 एवम् वित्त व्यति षङ्ग विवृद्ध वैरानु बन्धो ऽपि पूर्व वासनया मिथ उद्वहति अथाप वहति

38 एतस्मिन् सम्सारा ध्वनि नाना क्लेशोप सर्ग बाधित आपन्न विपन्नो यत्र यस्तमु ह वावेतरः तत्र विसृज्य जातम् जातम् उपादाय शोचन् मुह्यन् बिभ्यद् विवदन् क्रन्दन् सम्हृष्यन् गायन् नह्यमानः साधु वर्जितो नैवा वर्तते ऽद्यापि यत आरब्ध एष नरलोक सार्थो यमध्वनः पारम् उपदिशन्ति

39 यदिदम् योगानु शासनम् न वा एतद् अवरुन्धते यन् न्यस्त दण्डा मुनय उपशम शीला उपरत् आत्मान: समवगच् छन्ति

40 यद् अपि दिगि भजयिनो यज्विनो ये वै राज ऋषय: किम् तु परम् मृधे शयीरन् अस्यामेव ममेयम् इति कृत वैरानु बन्धायाम् विसृज्य स्वयम् उपसम्हृता:

41 कर्म वल्लीम् अवलम्ब्य तत आपद: कथञ्चिन् नरकाद् विमुक्त: पुनरप् येवम् सम्सारा ध्वनि वर्तमानो नर लोक सार्थम् उपयाति एवम् उपरि गतो ऽपि

42 तस्येदम् उपगायन्ति

आर्षभस् येह राजर्षे: मनसापि महात्मन:

नानुवर्त् मार्हति नृपो मक्षि केव गरुत्मत:

43 यो दुस्त् यजान् दार सुतान् सुहृद् राज्यम् हृदि स्पृश:

जहौ युवैव मलवद् उत्तम श्लोक लालस:

44 यो दुस्त्यजान् क्षिति सुत स्वजनार्थ दारान्

प्रार्थ्याम् श्रियम् सुरवरै: सदयाव लोकाम्

नैच्छन् नृप: तद् उचितम् महताम् मधु द्विट्

सेवानु रक्त मनसाम् अभवो ऽपि फल्गु:

45 यज्ञाय धर्म पतये विधिनै पुणाय

योगाय साङ्ख्य शिरसे प्रकृत् ईश्वराय

नारायणाय हरये नम इत् युदारम्

हास्यन् मृगत्वम् अपि य: समुद् आजहार

46 य इदम् भागवत सभाजिताव दात गुण कर्मणो राजर्षे: भरतस् यानु चरितम् स्वस्त्ययनम् आयुष्यम् धन्यम् यशस्यम् स्वर्ग्याप वर्ग्यम् वानु शृणोति आख्यास्यति अभिनन्दति च सर्वा एवाशिष आत्मन आशास्ते न काञ्चन परत इति

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

पञ्चम स्कन्दे चतुर् दशो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ पञ्चम स्कन्दः पञ्च दशो ऽध्याय :

स्कन्द- 05: अध्याय- 15

01 श्री शुक उवाच

भरतस् यात्मजः सुमतिर् नामा भिहितो यमु ह वाव केचित् पाखण्डिन ऋषभ पदवीम् अनुवर्त मानम् च आनार्या अवेद समाम् नाताम् देवताम् स्व मनीषया पापीयस्या कलौ कल्पयिष् यन्ति

02 तस्माद् वृद्ध सेनायाम् देवता जिन्नाम पुत्रो ऽभवत्

03 अथा सुर्याम् तत् तनयो देव द्युम्नः ततो धेनु मत्याम् सुतः परमेष्ठी तस्य सुवर्च लायाम् प्रतीह उपजातः

04 य आत्म विद्याम् आख्याय स्वयम् सम्शुद्धो महा पुरुषम् अनुसस्मार

05 प्रतीहात् सुवर्च लायाम् प्रति हर्त्रादयः त्रय आसन् इज्या कोविदाः सूनवः प्रतिहर्तुः स्तुत्याम् अज भूमानौ अज निषाताम्

06 भूम्न ऋषि कुल्यायाम् उद्गीथः ततः प्रस्तावो देव कुल्यायाम् प्रस्तावान् नियुत्सायाम् हृदयज आसीद् विभुः विभो रत्याम् च पृथुषेणः तस्मान् नक्त आकूत्याम् जज्ञे नक्ताद् द्रुति पुत्रो गयो राजर्षि प्रवर उदारश्रवा अजायत साक्षाद् भगवतो विष्णोः जगद् रिरक्षि षया गृहीत सत्त्वस्य कला आत्मवत् त्वादि लक्षणेन महा पुरुषताम् प्राप्तः

07 स वै स्वधर्मेण प्रजा पालन पोषण प्रीणनो पलालनानु शासन लक्षणेन इज्यादिना च भगवति महा पुरुषे परावरे ब्रह्मणि सर्वात्मन् आर्पित परमार्थ लक्षणेन ब्रह्मविच् चरण् आनुसेवया आपादित भगवद् भक्ति योगेन च अभीक्ष्णशः परिभावित अति शुद्ध मतिः उपरतान् आत्म्य आत्मनि स्वयम् उपलभ्य मान ब्रह्म् आत्मानु भवो ऽपि निरभिमान एव अवनिम् अजूगुपत्

08 तस् येमाम् गाथाम् पाण्डवेय पुराविद उपगायन्ति

09 गयम् नृपः कः प्रति याति कर्मभिः यज्वाभि मानी बहुविद् धर्म गोप्ता

समागत श्रीः सदसस् पतिः सताम् सत्सेव को ऽन्यो भगवत् कलामृते

10 यम् अभ्य षिञ्चन् परया मुदा सतीः सत्याशिषो दक्ष कन्याः सरिद्भिः

यस्य प्रजानाम् दुदुहे धराशिषो निराशिषो गुणवत् सस्नुतोधाः

11 छन्दाम्सि अकामस्य च यस्य कामान् दुदूहु राजहुर् अथो बलिम् नृपाः

प्रत् यञ्चिता युधि धर्मेण विप्रा यद् आशिषाम् षष्ठम् अम्शम् परेत्य

12 यस् याध्वरे भगवान् अध्वर् आत्मा मघोनि माद्यति उरुसोम पीथे

श्रद्धा विशुद्ध् आचल भक्ति योग समर्पि तेज्या फलम् आजहार

13 यत् प्रीणनाद् बर्हिषि देव तिर्यङ् मनुष्य वीरुत् तृणम् आविरिञ्चात्

प्रीयेत सद्यः स ह विश्वजीवः प्रीतः स्वयम् प्रीतिम् अगाद्ग यस्य

14 गयाद् गयन्त्याम् चित्र रथः सुगतिः अवरोधन इति त्रयः पुत्रा बभूवुः चित्र रथाद् ऊर्णायाम् सम्राड् अजनिष्ट तत उत्कलायाम् मरीचिः मरीचेः बिन्दु मत्याम् बिन्दुमान् उदपद् यत तस्मात् सरघायाम् मधुर् नामा भवन् मधोः सुमनसि वीर व्रतः ततो भोजायाम् मन्थु प्रमन्थू जज्ञाते मन्थोः सत्यायाम् भौवनः ततो दूषणायाम् त्वष्टा जनिष्ट त्वष्टुः विरोचनायाम् विरजो विरजस्य शतजित् प्रवरम् पुत्र शतम् कन्या च विषूच्याम् किल जातम्

15 तत् रायम् श्लोकः

प्रैय व्रतम् वम्शम् इमम् विरजश् चरमोद् भवः

अकरोदत् यलम् कीर्त्या विष्णुः सुरगणम् यथा

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

पञ्चम स्कन्दे पञ्च दशो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ पञ्चम स्कन्दः षोडशो ऽध्याय :

स्कन्द- 05: अध्याय- 16

01 राजो उवाच

उक्तस्त्वया भू मण्डलायाम् अविशेषो यावद् आदित्यस् तपति यत्र चासौ ज्योतिषाम् गणैः चन्द्रमा वा सह दृश्यते

02 तत्रापि प्रिय व्रत रथ चरण परिखातैः सप्तभिः सप्त सिन्धव उपक्लृता यत एतस्याः सप्त द्वीप विशेष विकल्पः त्वया भगवन् खलु सूचित एतद् एवा अखिलमहम् मानतो लक्षण तश्च सर्वम् विजिज्ञासामि

03 भगवतो गुणमये स्थूल रूपे आवेशितम् मनो ह्यगुणे ऽपि सूक्ष्म तम आत्म ज्योतिषि परे ब्रह्मणि भगवति वासुदेवाख्ये क्षमम् आवेशितुम् तदु हैतद् गुरो ऽर्हसि अनुवर्णयितुम् इति

04 ऋषिर् उवाच

न वै महाराज भगवतो माया गुण विभूतेः काष्ठाम् मनसा वचसा वाधि गन्तुमलम् विबुधायुषापि पुरुषः तस्मात् प्राधान् येनैव भू गोलक विशेषम् नाम रूप मान लक्षणतो व्याख्यास् यामः

05 यो वायम् द्वीपः कुवलय कमल कोशाभ् यन्तर कोशो नियुत योजन विशालः सम वर्तुलो यथा पुष्कर पत्रम्

06 यस्मिन् नव वर्षाणि नव योजन सहस्रा यामानि अष्टभिः मर्यादा गिरिभिः सु विभक्तानि भवन्ति

07 एषाम् मध्ये इलावृतम् नामाभ् यन्तर वर्षम् यस्य नाभ्याम् अवस्थितः सर्वतः सौवर्णः कुल गिरिराजो मेरुः द्वीपा याम समुन्नाहः कर्णिका भूतः कुवलय कमलस्य मूर्धनि द्वात्रिम्शत् सहस्र योजन विततो मूले षोडश सहस्रम् तावत् आन्तर् भूम्याम् प्रविष्टः

08 उत्तरो उत्तरेण इलाव्रुतम् नीलः श्वेतः शृङ्गवान् इति त्रयो रम्यक हिरण्मय कुरूणाम् वर्षाणाम् मर्यादा गिरयः प्रागायता उभयतः क्षारो दावधयो द्वि सहस्र पृथव एकैकशः पूर्वस्मात् पूर्वस्माद् उत्तर उत्तरो दशाम् शाधि काम्शेन दैर्घ्य एव ह्रसन्ति

09 एवम् दक्षिणेन इलाव्रुतम् निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादयो ऽयुत योजनोत् सेधा हरिवर्ष किम्पुरुष भारतानाम् यथा सङ्ख्यम्

10 तथैव इलाव्रुतम् अपरेण पूर्वेण च माल्यवद् गन्ध मादनौ आनील निषधायतौ द्विसहस्रम् पप्रथतुः केतुमाल भद्राश्वयोः सीमानम् विदधाते

11 मन्दरो मेरु मन्दरः सुपार्श्वः कुमुद इति अयुत योजन विस्तारोन् नाहा मेरोः चतुर् दिशम् अवष्टम्भ गिरय उपक्लृताः

12 चतुर्षु एतेषु चूत जम्बू कदम्ब न्यग्रोधाः चत्वारः पादप प्रवराः पर्वत केतव इव अधि सहस्र योजनोन् नाहाः तावद् विटप विततयः शत योजन परिणाहाः

13 ह्रदाः चत्वारः पयोमध् विक्षु रस मृष्ट जला यदुपस् पर्शिन उपदेव गणा योग् ऐश्वर्याणि स्वाभाविकानि भरतर्षभ धार यन्ति

14 देवो द्यानानि च भवन्ति चत्वारि नन्दनम् चैत्र रथम् वैभ्राजकम् सर्वतो भद्रम् इति

15 येषु अमर परिवृढाः सह सुर ललना ललाम यूथ पतय उपदेव गणैः उपगीय मान महिमानः किल विहरन्ति

16 मन्दरोत् सङ्ग एकादश शत योजनोत् तुङ्ग देव चूत शिरसो गिरिशिखर स्थूलानि फलानि अमृत कल्पानि पतन्ति

17 तेषाम् विशीर्य माणानाम् अति मधुर सुरभि सुगन्धि बहुलारुण रसोदेन अरुणोदा नाम नदी मन्दर गिरि शिखरात् निपतन्ती पूर्वेण इलाव्रुतम् उपप्लावयति

18 यद् उपजोषणाद् भवान्या अनुचरीणाम् पुण्य जन वधूनाम् अवयव स्पर्श सुगन्धवातो दश योजनम् समन्ताद् अनुवासयति

19 एवम् जम्बू फलानाम् अत्युच्च निपात विशीर्णानाम् अनस्थि प्रायाणाम् इभकाय निभानाम् रसेन जम्बू नाम नदी मेरु मन्दर शिखराद् अयुत योजनाद् अवनितले निपतन्ती दक्षिणेन आत्मानम् यावद् इलावृतम् उपस्यन्द यति

20 तावद् उभयोर् अपि रोधसोर्या मृत्तिका तद्रसेन अनु विध्यमाना वाइ वर्क सम्योग विपाकेन सदामर लोकाभरणम् जाम्बू नदम् नाम सुवर्णम् भवति

21 यदु ह वाव विबुधादय: सह युवतिभि: मुकुट कटक कटि सूत्रादि आभरण रूपेण खलु धारयन्ति

22 यस्तु महा कदम्ब: सुपार्श्व निरूढो यास्तस्य कोटरेभ्यो विनि: सृता: पञ्चायाम परिणाहा: पञ्च मधुधारा: सुपार्श्व शिखरात् पतन्त्यो ऽपरेण् आत्मानम् इलावृतम् अनुमोद यन्ति

23 या ह्युप युञ्जानानाम् मुख निर्वासितो वायु: समन्तात् छत योजनम् अनुवासयति

24 एवम् कुमुद निरूढो य: शत वल्शो नाम वट: तस्य स्कन्धेभ्यो नीचीना: पयोदधि मधु घृत गुडान्नादि अम्बर शय्यासना भरणादय: सर्व एव काम दुघा नदा: कुमुदाग्रात् पतन्त: तम् उत्तरेण इलाव्रुतम् उपयोज यन्ति

25 यान् उप जुषाणानाम् न कदाचिद् अपि प्रजानाम् वली पलित क्लम स्वेद दौर्गन्ध्य जरामय मृत्यु शीतोष्ण वैवर्ण्योप सर्गादय: ताप विशेषा भवन्ति यावज् जीवम् सुखम् निरतिशयम् एव

26 कुरङ्ग कुरर कुसुम्भ वैकङ्क त्रिकूट शिशिर पतङ्ग रुचक निषध शिनीवास कपिल शङ्ख वैदूर्य जारुधि हम्स ऋषभ नाग कालञ्जर नारद आदयो विम्शति गिरयो मेरो: कर्णिकाया इव केसर भूता मूलदेशे परित उपक्लृता:

27 जठर देवकूटौ मेरुम् पूर्वेण अष्टादश योजन सहस्रम् उदगायतौ द्विसहस्रम् पृथु तुङ्ग उभवत: एवम् अपरेण पवन पारियात्रौ दक्षिणेन कैलास करवीरौ प्रागायतौ एवम् उत्तरत: त्रिशृङ्ग मकरौ अष्टभिर् एतै: परिसृतो ऽग्निरिव परित: चकास्ति काञ्चन गिरि:

28 मेरोर् मूर्धनि भगवत आत्मयोने: मध्यत उप क्लृताम् पुरीम् अयुत योजन साहश्रीम् सम चतुरस्राम् शात कौम्भीम् वदन्ति

29 ताम् अनुपरितो लोक पालानाम् अष्टानाम् यथा दिशम् यथा रूपम् तुरीय मानेन पुरो ऽष्टौ उपक्लृता:

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

पञ्चम स्कन्दे षोडशो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ पञ्चम स्कन्दः सप्त दशो ऽध्याय ः

स्कन्द- 05: अध्याय- 17

01 श्री शुक उवाच

तत्र भगवतः साक्षाद् यज्ञ लिङ्गस्य विष्णोः विक्रमतो वाम पाद् आङ्गुष्ठ नख निर्भिन्नोर् ध्वाण्ड कटाह विवरेण अन्तः प्रविष्टा या बाहय जलधारा तच् चरण पङ्कजा वने जनारुण किञ्जल्को परञ्जित् आखिल जगद् अघमलाप होप स्पर्शन् आमला साक्षाद् भगवत् पदीति अनुप लक्षित वचो ऽभि धीयमाना अतिमहता कालेन युग सहस्रोप लक्षणेन दिवो मूर्धन् यवततार यत् तद् विष्णु पदम् आहुः

02 यत्र ह वाव वीरव्रत औत्तान पादिः परम भागवतो ऽस्मत् कुल देवता चरण् आरविन्दो दकम् इति याम् अनुसवनम् उत्कृष्यमाण भगवद् भक्ति योगेन दृढम् क्लिद्यमानान् तर् हृदय औत्कण्ठ्य विवशा मीलित लोचन युगळ कुड्मल विगलित अमल बाष्प कलय अभिव् यज्यमान रोम पुलक कुलको ऽधुनापि परमादरेण शिरसा बिभर्ति

03 ततः सप्त ऋषयः तत् प्रभाव् आभिज्ञा याम् ननु तपस आत्यन्तिकी सिद्धिः एतावती भगवति सर्वात्मनि वासुदेवे ऽनुपरत भक्ति योग लाभेनैव उपेक्षितान् यार्थ् आत्म गतयो मुक्ति मिवागताम् मुमुक्षव इव स बहुमानम् अद्यापि जटाजूटैः उद्वहन्ति

04 ततो ऽनेक सहस्र कोटि विमाना नीक सङ्कुल देव यानेन अवतरन्ती इन्दु मण्डलम् आवार्य ब्रह्म सदने निपतति

05 तत्र चतुर्धा भिद्यमाना चतुर्भिः नामभिः चतुर् दिशम् अभिस्पन्दन्ती नदनदी पतिम् एवाभि निविशति सीता अलकनन्दा चक्षुः भद्रेति

06 सीता तु ब्रह्म सदनात् केसरा चलादि गिरि शिखरेभ्यो ऽधो ऽधः प्रस्रवन्ती गन्ध मादन मूर्धसु पतित्वा अन्तरेण भद्राश्व वर्षम् प्राच्याम् दिशि क्षार समुद्रम् अभि प्रविशति

07 एवम् माल्यवच् छिखरान् निष्पतन्ती ततो ऽनुपरत वेगा केतुमालम् अभि चक्षुः प्रतीच्याम् दिशि सरित् पतिम् प्रविशति

08 भद्रा च उत्तरतो मेरुशिरसो निपतिता गिरि शिखराद् गिरि शिखरम् अतिहाय शृङ्गवतः शृङ्गाद् अवस्यन्द माना उत्तराम्स्तु कुरून् अभित उदीच्याम् दिशि जलधिम् अभि प्रविशति

09 तथैव अलकनन्दा दक्षिणेन ब्रह्म सदनाद् बहूनि गिरि कूटानि अतिक्रम्य हेम कूटाद् धैम कूटानि अतिरभस तर रम्हसा लुठयन्ती भारतम् अभिवर्षम् दक्षिणस्याम् दिशि जलधिम् अभि प्रविशति यस्याम् स्नानार्थम् चागच् छतः पुम्सः पदे पदे ऽश्वमेध राजसूया दीनाम् फलम् न दुर्लभम् इति

10 अन्ये च नदा नद्यश्च वर्षे वर्षे सन्ति बहुशो मेर्वादि गिरि दुहितरः शतशः

11 तत्रापि भारतम् एव वर्षम् कर्म क्षेत्रम् अन्यानि अष्ट वर्षाणि स्वर्गिणाम् पुण्य शेषोप भोग स्थानानि भौमानि स्वर्ग पदानि व्यपदि शन्ति

12 एषु पुरुषाणाम् अयुत पुरुषायुर् वर्षाणाम् देव कल्पानाम् नागायुत प्राणानाम् वज्र सम्हनन बल वयोमोद प्रमुदित महासौरत मिथुन व्यवायाप वर्ग वर्ष धृतैक गर्भ कलत्राणाम् तत्र तु त्रेता युग समः कालो वर्तते

13 यत्र ह देव पतयः स्वैः स्वैर् गण नायकैः विहित महार्हणाः सर्वर्तु कुसुम स्तबक फल किसलय श्रियानम्य मान विटप लता विटपिभिः उप शुम्भमान रुचिर कानन् आश्रमाय तन वर्ष गिरि द्रोणीषु तथा च अमल जलाशयेषु विकच विविध नववन रुहामोद मुदित राज हम्स जल कुक्कुट कारण्डव सारस चक्र वाकादिभिः मधुकर निकरा कृतिभिः उपकूजितेषु जल क्रीडादिभिः विचित्र विनोदैः सु ललित सुर सुन्दरीणाम् काम कलिल विलास हास लीलावलोका कृष्ट मनो दृष्टयः स्वैरम् विहरन्ति

14 नवस्वपि वर्षेषु भगवान् नारायणो महा पुरुषः पुरुषाणाम् तद् अनुग्रहाय आत्म तत्त्व व्यूहेन आत्मना अद्यापि सन्निधीयते

15 इलावृते तु भगवान् भव एक एव पुमान् न ह्यन्यः तत्रापरो निर्विशति भवान्याः शाप निमित्तज्ञो यत् प्रवेक्ष्यतः स्त्री भावः तत् पश्चाद् वक्ष्यामि

16 भवानी नाथैः स्त्री गणार्बुद सहस्रैः अवरुध्यमानो भगवतः चतुर् मूर्तेः महा पुरुषस्य तुरीयाम् तामसीम् मूर्तिम् प्रकृतिम् आत्मनः सङ्कर्षण सम्ज्ञाम् आत्म समाधि रूपेण सन्निधाप्य एतद् अभिगृणन् भव उपधावति

17 श्री भगवान् उवाच

ओम् नमो भगवते महा पुरुषाय सर्व गुण सङ्ख्यानाय अनन्ताय अव्यक्ताय नम इति

भजे भजन् यारण पाद पङ्कजम् भगस्य कृत्स्नस्य परम् परायणम्

भक्तेष्वलम् भावित भूत भावनम् भवापहम् त्वा भव भावम् ईश्वरम्

18 न यस्य माया गुण चित्त वृत्तिभिः निरीक्षतो ह्यण्वपि दृष्टिर् अज्यते

ईशे यथा नो ऽजित मन्युर् अम्हसाम् कस्तम् न मन्येत जिगीषुर् आत्मनः

19 असद्दृशो यः प्रतिभाति मायया क्षीबेव मध्वासव ताम्र लोचनः

न नाग वध्वो ऽर्हण ईशिरे ह्रिया यत् पादयोः स्पर्शन धर्षित् एन्द्रियाः

20 यमा हुरस्य स्थिति जन्म सम्यमम् त्रिभिर् विहीनम् यम् अनन्तम् ऋषयः

न वेद सिद्धार्थम् इव क्वचित् स्थितम् भू मण्डलम् मूर्ध सहस्र धामसु

21 यस्याद्य आसीद् गुणविग्रहो महान् विज्ञान धिष्ण्यो भगवान् अजः किल

यत् सम्भवो ऽहम् त्रिवृता स्वतेजसा वैकारिकम् तामसम् ऐन्द्रियम् सृजे

22 एते वयम् यस्य वशे महात्मनः स्थिताः शकुन्ता इव सूत्र यन्त्रिताः

महानहम् वैकृत तामस् एन्द्रियाः सृजाम सर्वे यद् अनुग्रहा दिदम्

23 यन् निर्मिताम् कर्ह्यपि कर्म पर्वणीम् मायाम् जनो ऽयम् गुण सर्ग मोहितः

न वेद निस्तारण योगम् अञ्जसा तस्मै नमस्ते विलयोद यात्मने

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

पञ्चम स्कन्दे सप्त दशो ऽध्याय ::||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ पञ्चम स्कन्दः अष्टा दशो ऽध्याय :

स्कन्द- *05:* अध्याय- *18*

*01* श्री शुक उवाच

तथा च भद्र श्रवा नाम धर्म सुतः तत् कुल पतयः पुरुषा भद्राश्व वर्षे साक्षाद् भगवतो वासुदेवस्य प्रियाम् तनुम् धर्म मयीम् हय शीर्षाभि धानाम् परमेण समाधिना सन्निधाप्य इदम् अभिगृणन्त उपधावन्ति

*02* भद्र श्रवस ऊचुः

ओम् नमो भगवते धर्माय आत्म विशोधनाय नम इति

*03* अहो विचित्रम् भगवद् विचेष्टितम् घ्नन्तम् जनो ऽयम् हि मिषन्न पश्यति

ध्यायन् असद्यर्हि विकर्म सेवितुम् निर्हृत्य पुत्रम् पितरम् जिजीविषति

*04* वदन्ति विश्वम् कवयः स्म नश्वरम् पश्यन्ति चाध् यात्म विदो विपश्चितः

तथापि मुह्यन्ति तवाज मायया सु विस्मितम् कृत्यम् अजम् नतो ऽस्मि तम्

*05* विश्वोद्भवस् थान निरोध कर्म ते ह्यकर्तुः अङ्गी कृतम् अप्य पावृतः

युक्तम् न चित्रम् त्वयि कार्य कारणे सर्वात्मनि व्यति रिक्ते च वस्तुतः

*06* वेदान् युगान्ते तमसा तिरस् कृतान् रसातलाद् यो नृ तुरङ्ग विग्रहः

प्रत्याददे वै कवये ऽभियाचते तस्मै नमस्ते ऽवितथेहि ताय इति

*07* हरिवर्षे चापि भगवान् नर हरि रूपेणास्ते तद् रूप ग्रहण निमित्तम् उत्तरत्राभि धास्ये तद् दयितम् रूपम् महा पुरुष गुण भाजनो महा भागवतो दैत्य दानव कुल तीर्थी करण शीला चरितः प्रह्लादो ऽव्यव धान अनन्य भक्ति योगेन सह तद् वर्ष पुरुषैः उपास्ते इदम् चोदा हरति

08 ओम् नमो भगवते नरसिम्हाय नमस् तेजस् तेजसे आविर् आविर्भव वज्रनख वज्र दम्ष्ट्र कर्माशयान् रन्धय रन्धय तमो ग्रस ग्रस ओम् स्वाहा अभयम् अभयम् आत्मनि भूयिष्ठा ओम् क्ष्रौम्

09 स्वस्त्यस्तु विश्वस्य खलः प्रसीदताम् ध्यायन्तु भूतानि शिवम् मिथो धिया

मनश्च भद्रम् भजताद् अधोक्षजे आवेश्यताम् नो मतिर् अपि अहैतुकी

10 मागार दार् आत्मज वित्त बन्धुषु सङ्गो यदि स्याद् भगवत् प्रियेषु नः

यः प्राण वृत्त्या परितुष्ट आत्मवान् सिद्ध् यत्य दूरान् न तथेन्द्रिय प्रियः

11 यत् सङ्ग लब्धम् निज वीर्य वैभवम् तीर्थम् मुहुः सम्स्पृशताम् हि मानसम्

हरत्यजो ऽन्तः श्रुतिभिर् गतो ऽङ्गजम् को वै न सेवेत मुकुन्द विक्रमम्

12 यस्यास्ति भक्तिः भगवत् य किञ्चना सर्वैर् गुणैस् तत्र समासते सुराः

हराव भक्तस्य कुतो महद् गुणा मनोरथेन् आसति धावतो बहिः

13 हरिर्हि साक्षाद् भगवान् शरीरिणाम् आत्मा झषाणाम् इव तोयम् ईप्सितम्

हित्वा महाम्स्तम् यदि सज्जते गृहे तदा महत्त्वम् वयसा दम्पतीनाम्

14 तस्माद् रजो राग विषाद मन्यु मानस्पृहा भय दैन्याधि मूलम्

हित्वा गृहम् सम्सृति चक्रवालम् नृसिम्ह पादम् भजता कुतोभयम् इति

15 केतुमाले ऽपि भगवान् काम देव स्वरूपेण लक्ष्म्याः प्रिय चिकीर्षया प्रजापतेः दुहित्णाम् पुत्राणाम् तद् वर्ष पतीनाम् पुरुष् आयुषाहो रात्र परिसङ्ख्या नानाम् यासाम् गर्भा महा पुरुष महास्त्र तेजसोद् वेजित मनसाम् विध्वस्ता व्यसवः सम्वत्सरान् ते विनि पतन्ति

16 अतीव सु ललित गति विलास विलसित रुचिर हास लेशाव लोक लीलया किञ्चिद् उत्तम्भित सुन्दर भ्रू मण्डल सुभग वदन् आरविन्द श्रिया रमाम् रमयन् इन्द्रियाणि रमयते

17 तद् भगवतो माया मयम् रूपम् परम समाधि योगेन रमा देवी सम्वत्सरस्य रात्रिषु प्रजा पतेः दुहितृभिर् उपेता हः सु च तद् भर्तृभिः उपास्ते इदम् चोदा हरति

18 ओम् ह्राम् ह्रीम् ह्रूम् ओम् नमो भगवते हृषी केशाय सर्व गुण विशेषैः विलक्षित् आत्मने आकूतीनाम् चित्तीनाम् चेतसाम् विशेषाणाम् च अधिपतये षोडश कलाय च्छन्दो मयाय अन्न मयाय अमृत मयाय सर्व मयाय सहसे ओजसे बलाय कान्ताय कामाय नमस्ते उभयत्र भूयात्

19 स्त्रियो व्रतैस् त्वा हृषी केश्वरम् स्वतो ह्याराध्य लोके पतिम् आशासते ऽन्यम्

तासाम् न ते वै परिपान्त्य पत्यम् प्रियम् धना यूम्षि यतो ऽस्व तन्त्राः

20 स वै पतिः स्याद् अकुतोभयः स्वयम् समन्ततः पाति भयातुरम् जनम्

स एक एवेतरथा मिथो भयम् नैवात्म लाभाद् अधि मन्यते परम्

21 या तस्य ते पाद सरोरु हार्हणम् निकामयेत् सा अखिल कामलम् पटा

तदेव रास् ईप्सितम् ईप्सितो ऽर्चितो यद् भग्न याच्ञा भगवन् प्रतप्यते

22 मत् प्राप्तये ऽजेश सुरा सुरादयः तप्यन्त उग्रम् तप ऐन्द्रिये धियः

ऋते भवत् पाद परायणान् न माम् विन्दन्त् यहम् त्वद् हृदया यतो ऽजित

23 स त्वम् ममाप् यच्युत शीर्ष्णि वन्दितम् कराम्बुजम् यत्त्वद् अधायि सात्वताम्

बिभ ऋषि माम् लक्ष्म वरेण्य मायया क ईश्वरस् येहितम् ऊहितुम् विभुरिति

24 रम्यके च भगवतः प्रियतमम् मात्स्यम् अवतार रूपम् तद् वर्ष पुरुषस्य मनोः प्राक् प्रदर्शितम् स इदानीम् अपि महता भक्ति योगेन अराधयती इदम् चोदा हरति

25 ओम् नमो भगवते मुख्य तमाय नमः सत्त्वाय प्राणाय उजसे सहसे बलाय महा मत्स्याय नम इति

26 अन्तर् बहिश् चाखिल लोक पालकैः अदृष्ट रूपो विचरस् युरुस्वनः

स ईश्वरस् त्वम् य इदम् वशे ऽनयन् नाम्ना यथा दारुमयीम् नरः स्त्रियम्

27 यम् लोक पालाः अकिल मत्सरज्वरा हित्वा यतन्तो ऽपि पृथक् समेत्य च

पातुम् न शेकुः द्विपदश् च तुष्पदः सरीसृपम् स्थाणु यदत्र दृश्यते

28 भवान् युगान्तार्णव ऊर्मि मालिनि क्षोणीम् इमाम् ओषधि वीरुधाम् निधिम्

मया सहोरु क्रमते ऽज ओजसा तस्मै जगत् प्राण गणात्मने नम इति

29 हिरण्मये ऽपि भगवान् निवसति कूर्म तनुम् बिभ्राणः तस्य तत् प्रियतमाम् तनुम् अर्यमा सह वर्ष पुरुषैः पितृ गणाधि पतिर् उपधावति मन्त्रम् इमम् चानु जपति

30 ओम् नमो भगवते अकूपाराय सर्व सत्त्व गुण विशेषणाय अनुप लक्षित स्थानाय नमो वर्ष्मणे नमो भूम्ने नमो नमो ऽवस्थानाय नमस्ते

31 यद् रूपम् एतत् निज माय यार्पितम् अर्थ स्वरूपम् बहु रूप रूपितम्

सङ्ख्या न यस्यास्ति अयथोप लम्भनात् तस्मै नमस्ते ऽव्य पदेश रूपिणे

32 जरायुजम् स्वेदजम् अण्डजोद् भिदम् चराचरम् देवर्षि पितृ भूत मैन्द्रियम्

द्यौः खम् क्षितिः शैल सरित् समुद्र द्वीप ग्रहर् क्षेत् यभि धेय एकः

33 यस्मिन् असङ्ख्येय विशेष नाम रूपा कृतौ कविभिः कल्पितेयम्

सङ्ख्या यया तत्त्व दृशाप नीयते तस्मै नमः साङ्ख्य निदर्शनाय ते इति

34 उत्तरेषु च कुरुषु भगवान् यज्ञ पुरुषः कृत वराह रूप आस्ते तम् तु देवी हैषा भूः सह कुरुभिः अस्खलित भक्ति योगेन उपधावति इमाम् च परमाम् उपनिषदम् आवर्तयति

35 ओम् नमो भगवते मन्त्र तत्त्व लिङ्गाय यज्ञ क्रतवे महा ध्वरावय वाय महा पुरुषाय नमः कर्म शुक्लाय त्रियुगाय नमस्ते

36 यस्य स्वरूपम् कवयो विपश्चितो गुणेषु दारुष्विव जात वेदसम्

मथ्नन्ति मथ्ना मनसा दिदृक्षवो गूढम् क्रियार्थैः नम ईरित् आत्मने

37 द्रव्य क्रिया हेत् वयनेश कर्तृभिः माया गुणैर् वस्तु निरीक्षित् आत्मने

अन्वीक्षया अङ्गाति शयात्म बुद्धिभिः निरस्त माया कृतये नमो नमः

38 करोति विश्व स्थिति सम्य मोदयम् यस्येप्सितम् नेप्सितम् ईक्षितुर् गुणैः

माया यथायो भ्रमते तद् आश्रयम् ग्राव्णो नमस्ते गुण कर्म साक्षिणे

39 प्रमथ्य दैत्यम् प्रति वारणम् मृधे यो माम् रसाया जगद् आदि सूकरः

कृत्वा ग्रदम्ष्ट्रे निरगाद् उदन्वतः क्रीडन् निवेभः प्रणतास्मि तम् विभुमिति

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

पञ्चम स्कन्दे अष्टा दशो ऽध्याय ः||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ पञ्चम स्कन्दः एकोन विम्शो ऽध्याय ः

स्कन्द- 05ः अध्याय- 19

01 श्री शुक उवाच

किम्पुरुषे वर्षे भगवन्तम् आदि पुरुषम् लक्ष्मणा ग्रजम् सीताभि रामम् रामम् तच् चरण सन्नि कर्षाभिर् अतः परम भागवतो हनुमान् सह किम्पुरुषैः अविरत भक्तिर् उपास्ते

02 आर्ष्टिषेणे न सह गन्धर्वैः अनुगीय मानाम् परम कल्याणीम् भर्तृ भगवत् कथाम् समुप शृणोति स्वयम् चेदम् गायति

03 ओम् नमो भगवते उत्तम श्लोकाय नम आर्य लक्षण शील व्रताय नम उपशिक्षित् आत्मन उपासित लोकाय नमः साधु वाद निकषणाय नमो ब्रह्मण्य देवाय महा पुरुषाय महा राजाय नम इति

04 यत् तद् विशुद्ध् आनुभवम् आत्रमेकम् स्व तेजसा ध्वस्त गुण व्यवस्थम्

प्रत्यक् प्रशान्तम् सुधियोप लम्भनम् ह्यनाम रूपम् निरहम् प्रपद्ये

05 मर्त् यावतारस् त्विह मर्त्य शिक्षणम् रक्षोव धायैव न केवलम् विभोः

कुतो ऽन्यथा स्याद् रमतः स्व आत्मनः सीता कृतानि व्यसनानि ईश्वरस्य

06 न वै स आत् मात्म वताम् सुहृत्तमः सक्तस् त्रिलोक्याम् भगवान् वासुदेवः

न स्त्री कृतम् कश्मलम् अश्नुवीत न लक्ष्मणम् चापि विहातु मर्हति

07 न जन्म नूनम् महतो न सौभगम् न वाङ्न बुद्धिः नाकृतिः तोष हेतुः

तैर्यद् विसृष्टान् अपि नो वनौ कसः चकार सख्ये बत लक्ष्मण् आग्रजः

08 सुरो ऽसुरो वाप् यथ वानरो नरः सर्वात्मना यः सुकृत् अज्ञम् उत्तमम्

भजेत रामम् मनुजा कृतिम् हरिम् य उत्तरान् अनयत् कोसलान् दिवम् इति

09 भारते ऽपि वर्षे भगवान् नर नारायणाख्य आ कल्पान्तम् उपचित धर्म ज्ञान वैराग्य ऐश्वर्य उपशमोप
रमात्मोप लम्भनम् अनुग्रहाय आत्मवताम् अनुकम्पया तपो ऽव्यक्त गतिः चरति

10 तम् भगवान् नारदो वर्णाश्रम वतीभिः भारतीभिः प्रजाभिः भगवत् प्रोक्ताभ्याम् साङ्ख्य योगाभ्याम् भगवद्
अनुभावोप वर्णनम् सावर्णेर् उपदेक्ष्य माणः परम भक्ति भावेन उपसरति इदम् चाभि गृणाति

11 ओम् नमो भगवते उपशम शीलाय उपरतान् आत्म्याय नमो ऽकिञ्चन वित्ताय ऋषि ऋषभाय नर नारायणाय
परम हम्स परम गुरवे आत्मा रामाधि पतये नमो नम इति

12 गायति चेदम्

कर्तास्य सर्गादिषु यो न बध्यते न हन्यते देहगतो ऽपि दैहिकैः

द्रष्टुर्न दृग्यस्य गुणैर् विदूष्यते तस्मै नमो ऽसक्त विविक्त साक्षिणे

13 इदम् हि योगेश्वर योग नैपुणम् हिरण्य गर्भो भगवान् जगाद यत्

यद् अन्तकाले त्वयि निर्गुणे मनो भक्त्या दधी तोज्झित दुष्कलेवरः

14 यथैहि कामुष्मिक काम लम्पटः सुतेषु दारेषु धनेषु चिन्तयन्

शङ्केत विद्वान् कु कलेवरात् ययाद् यस्तस्य यत्नः श्रम एव केवलम्

15 तन्नः प्रभो त्वम् कु कलेवर् आर्पिताम् त्वन् मायया अहम् ममताम् अधोक्षज

भिन्द्याम येनाशु वयम् सु दुर्भिदाम् विधेहि योगम् त्वयि नः स्वभावम् इति

16 भारते ऽप्यस्मिन् वर्षे सरिच्छैलाः सन्ति बहवो मलयो मङ्गल प्रस्थो मैनाकः त्रिकूट ऋषभः कूटकः कोल्लकः
सह्यो देवगिरिः ऋष्यमूकः श्रीशैलो वेङ्कटो महेन्द्रो वारिधारो विन्ध्यः शुक्ति मान् ऋक्षगिरिः पारियात्रो द्रोणः

चित्रकूटो गोवर्धनो रैवतकः ककुभो नीलो गोकामुख इन्द्रकीलः काम गिरिर् इति च अन्ये च शत सहस्रशः शैलाः तेषाम् नितम्ब प्रभवा नदा नद्यश्च सन्ति असङ्ख्याताः

17 एतासाम् अपो भारत्यः प्रजा नामभिर् एव पुनन्तीनाम् आत्मना चोपस् पृशन्ति

18 चन्द्रवसा ताम्रपर्णी अवटोदा कृतमाला वैहायसी कावेरी वेणी पयस्विनी शर्करा वर्ता तुङ्गभद्रा कृष्णा वेण्या भीम रथी गोदावरी निर्विन्ध्या पयोष्णी तापी रेवा सुरसा नर्मदा चर्मण्वती सिन्धु रन्धः शोणश्च नदौ महानदी वेदस्मृतिः ऋषिकुल्या त्रिसामा कौशिकी मन्दाकिनी यमुना सरस्वती दृषद्वती गोमती सरयू रोधस्वती सप्तवती सुषोमा शत द्रूः चन्द्र भागा मरुद्वृधा वितस्ता असिक्नी विश्वेति महानद्यः

19 अस्मिन् एव वर्षे पुरुषैः लब्ध जन्मभिः शुक्ल लोहित कृष्ण वर्णेन स्वारब्धेन कर्मणा दिव्य मानुष नारक गतयो बह्व्य आत्मन आनुपूर्व्येण सर्वा ह्येव सर्वेषाम् विधीयन्ते यथावर्ण विधानम् अपवर्गश् चापि भवति

20 यो ऽसौ भगवति सर्व भूत् आत्मनि अनात्म्ये ऽनिरुक्ते ऽनिलयने परम् आत्मनि वासुदेवे ऽनन्य निमित्त भक्ति योग लक्षणो नाना गति निमित्त अविद्या ग्रन्थि रन्धन द्वारेण यदा हि महा पुरुष पुरुष प्रसङ्गः

21 एत देव हि देवा गायन्ति

अहो अमीषाम् किमकारि शोभनम् प्रसन्न एषाम् स्विदुत स्वयम् हरिः

यैर् जन्म लब्धम् नृषु भारताजिरे मुकुन्द सेवौप यिकम् स्पृहा हि नः

22 किम् दुष्करैर् नः क्रतुभिस् तपो व्रतैः दानादि भिर्वा द्युजयेन फल्गुना

न यत्र नारायण पाद पङ्कज स्मृतिः प्रमुष्टाति शयेन्द्रिय उत्सवात्

23 कल्प् आयुषाम् स्थान जयात् पुनर् भवात् क्षण् आयुषाम् भारत भूजयो वरम्

क्षणेन मर्त्येन कृतम् मनस्विनः सन्न्यस्य सम्यान्त् यभयम् पदम् हरेः

24 न यत्र वैकुण्ठ कथा सुधापगा न साधवो भागवतास् तद् आश्रयाः

न यत्र यज्ञेश मखा महोत्सवाः सुरेशलोको ऽपि न वै स सेव्यताम्

25 प्राप्ता नृजातिम् त्विह ये च जन्तवो ज्ञान क्रिया द्रव्य कलाप सम्भृताम्

न वै यतेरन् अपुनर् भवाय ते भूयो वनौका इव यान्ति बन्धनम्

26 यैः श्रद्धया बर्हिषि भागशो हविः निरुप्तम् इष्टम् विधि मन्त्र वस्तुतः

एकः पृथङ् नामभिर् आहुतो मुदा गृह्णाति पूर्णः स्वयम् आशिषाम् प्रभुः

27 सत्यम् दिशति अर्थितम् अर्थितो नृणाम् नैवार्थदो यत् पुनर् अर्थिता यतः

स्वयम् विधत्ते भजताम् अनिच्छताम् इच्छापि धानम् निज पाद पल्लवम्

28 यद् यत्र नः स्वर्ग सुखाव शेषितम् स्विष्टस्य सूक्तस्य कृतस्य शोभनम्

तेनाज नाभे स्मृति मज् जन्म नः स्याद् वर्षे हरिः यद् भजताम् शम् तनोति

29 श्री शुक उवाच

जम्बू द्वीपस्य च राजन् उपद्वीपान् अष्टौ हैक उपदिशन्ति सगर् आत्मजैः अश्वान् वेषण इमाम् महीम् परितो निखनद्भिः उपकल्पितान्

30 तद् यथा स्वर्ण प्रस्थश् चन्द्र शुक्ल आवर्तनो रमणको मन्दर हरिणः पाञ्चजन्यः सिम्हलो लङ्केति

31 एवम् तव भारत उत्तम जम्बू द्वीप वर्ष विभागो यथ उपदेशम् उपवर्णित इति

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

पञ्चम स्कन्दे एकोन विम्शो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ पञ्चम स्कन्दः विम्शो ऽध्याय :

स्कन्द- 05: अध्याय- 20

01 श्री शुक उवाच

अतः परम् प्लक्षा दीनाम् प्रमाण लक्षण सम्स्थानतो वर्ष विभाग उपवर्ण्यते

02 जम्बू द्वीपो ऽयम् यावत् प्रमाण विस्तारः तावता क्षारो दधिना परिवेष्टितो यथा मेरुः जम्ब्वाख् येन लवणो दधिर् अपि ततो द्विगुण विशालेन प्लक्षाख् येन परिक्षिप्तो यथा परिखा बाह्योप वनेन प्लक्षो जम्बू प्रमाणो द्वीपाख्या करो हिरण्मय उत्थितो यत् राग्निर् उपास्ते सप्त जिह्वः तस् याधिपतिः प्रिय व्रत आत्मज इध्मजिह्वः स्वम् द्वीपम् सप्त वर्षाणि विभज्य सप्त वर्ष नामभ्य आत्मजेभ्य आकलय्य स्वयम् आत्म योगेन उपरराम

03 शिवम् यवसम् सुभद्रम् शान्तम् क्षेमम् अमृतम् अभयम् इति वर्षाणि तेषु गिरयो नद्यश्च सप्तैवा अभिज्ञाताः

04 मणिकूटो वज्रकूट इन्द्रसेनो ज्योतिष्मान् सुपर्णो हिरण्यष्ठीवो मेघमाल इति सेतु शैलाः अरुणा नृम्णा आङ्गिरसी सावित्री सुप्तभाता ऋतम्भरा सत्यम्भरा इति महा नद्यः यासाम् जलोप स्पर्शन विधूत रजस् तमसो हम्स पतङ्ग उर्ध्वायन सत्याङ्ग सम्ज्ञाः चत्वारो वर्णाः सहस्र् आयुषो विबुधोपम सन्दर्शन प्रजननाः स्वर्ग द्वारम् त्रय्या विद्यया भगवन्तम् त्रयी मयम् सूर्यम् आत्मानम् यजन्ते

05 प्रत्नस्य विष्णो रूपम् यत् सत्यस् यर्तस्य ब्रह्मण:

अमृतस्य च मृत्योश्च सूर्यम् आत्मानम् ईमहीति

06 प्लक्षा दिषु पञ्चसु पुरुषाणाम् आयु: इन्द्रियम् ओज: सहो बलम् बुद्धि: विक्रम इति च सर्वेषाम् औत्पत्तिकी सिद्धि: अविशेषेण वर्तते

07 प्लक्ष: स्व समानेन इक्षु रसोदेन आवृतो यथा तथा द्वीपो ऽपि शाल्मलो द्विगुण विशाल: समानेन सुरोदेन आवृत: परिवृङ्क्ते

08 यत्र ह वै शाल्मली प्लक्षायामा यस्याम् वाव किल निलयम् आहु: भगवत: छन्द: स्तुत: पतत्त्रि राजस्य सा द्वीप हूतये उपलक्ष्यते

09 तद् द्वीपाधि पति: प्रियव्रत् आत्मजो यज्ञबाहु: स्व सुतेभ्य: सप्तभ्य: तन् नामानि सप्त वर्षाणि व्यभजत् सुरोचनम् सौमनस्यम् रमणकम् देव वर्षम् पारि भद्रम् आप्यायनम् अविज्ञातम् इति

10 तेषु वर्षाद्रयो नद्यश्च सप्तैवा अभिज्ञाता: स्वरस: शत शृङ्गो वामदेव: कुन्दो मुकुन्द: पुष्प वर्ष: सहस्र श्रुतिर् इति अनुमति: सिनीवाली सरस्वती कुहू रजनी नन्दा राकेति

11 तद् वर्ष पुरुषा: श्रुतधर वीर्य धर वसुन्धर इषन्धर सम्ज्ञा भगवन्तम् वेद मयम् सोमम् आत्मानम् वेदेन यजन्ते

12 स्वगोभि: पितृ देवेभ्यो विभजन् कृष्ण शुक्लयो:

प्रजानाम् सर्वासाम् राजा न्ध: सोमो न आस्त्विति

13 एवम् सुरोदाद् बहि: तद् द्विगुण: समानेन आवृतो घृतोदेन यथा पूर्व: कुश द्वीपो यस्मिन् कुश स्तम्बो देव कृत: तद् द्वीपाख्या करो ज्वलन इवापर: स्व शष्प रोचिषा दिशो विराजयति

14 तद् द्वीप पति: प्रैयव्रतो राजन् हिरण्यरेता नाम स्वम् द्वीपम् सप्तभ्य: स्व पुत्रेभ्यो यथा भागम् विभज्य स्वयम् तप आतिष्ठत वसु वसुदान दृढ रुचि नाभि गुप्त स्तुत्य व्रत विविक्त वामदेव नामभ्य:

15 तेषाम् वर्षेषु सीमा गिरयो नद्यश्चा अभिज्ञाता: सप्त सप्तैव चक्र: चतु: शृङ्ग: कपिल: चित्रकूटो देवानीक ऊर्ध्व रोमा द्रविण इति रसकुल्या मधुकुल्या मित्र विन्दा श्रुत विन्दा देव गर्भा घृत् अच्युता मन्त्र मालेति

16 यासाम् पयोभि: कुश द्वीपौ कस: कुशल कोविदाभि युक्त कुलक सम्ज्ञा भगवन्तम् जात वेद सरूपिणम् कर्म कौशलेन यजन्ते

17 परस्य ब्रह्मण: साक्षाज् जातवेदो ऽसि हव्यवाट्

देवानाम् पुरुष् आङ्गानाम् यज्ञेन पुरुषम् यजेति

18 तथा घृतोदाद् बहि: क्रौञ्च द्वीपो द्विगुण: स्वमानेन क्षीरोदेन परित उपक्लृतो वृतो यथा कुश द्वीपो घृतो देन यस्मिन् क्रौञ्चो नाम पर्वत राजो द्वीप नाम निर्वर्तक आस्ते

19 यो ऽसौ गुह प्रहरण उन्मथित नितम्ब कुञ्जो ऽपि क्षीरोदेन आसिच्य मानो भगवता वरुणेनाभि गुप्तो विभयो बभूव

20 तस्मिन् अपि प्रैयव्रतो घृत पृष्ठो नामाधि पतिः स्वे द्वीपे वर्षाणि सप्त विभज्य तेषु पुत्र नामसु सप्त रिक्थादान् वर्षपान् निवेश्य स्वयम् भगवान् भगवतः परम कल्याण यशस आत्म भूतस्य हरेः चरण् आरविन्दम् उपजगाम

21 आमो मधुरुहो मेघ पृष्ठः सुधामा भ्राजिष्ठो लोहितार्णो वनस् पतिर् इति घृत पृष्ठ सुताः तेषाम् वर्ष गिरयः सप्त सप्तैव नद्यश् च अभिख्याताः शुक्लो वर्धमानो भोजन उपबर्हिणो नन्दो नन्दनः सर्वतो भद्र इति अभया अमृतौ घा आर्यका तीर्थवती व्रुत्ति रूपवती पवित्रवती शुक्लेति

22 यासाम् अम्भः पवित्रम् अमलम् उपयुञ्जानाः पुरुष ऋषभ द्रविण देवक सम्ज्ञा वर्ष पुरुषा आपोमयम् देवम् अपाम् पूर्णेन अञ्जलिना यजन्ते

23 आपः पुरुष वीर्याः स्थ पुनन्तीर् भूर् भुवः सुवः

ता नः पुनीतामी वघ्नीः स्पृशताम् आत्मना भुव इति

24 एवम् पुरस्तात् क्षीरो दात् परित उपवेशितः शाक द्वीपो द्वात्रिम् शल् लक्ष योजना यामः समानेन च दधि मण्डोदेन परीतो यस्मिन् शाको नाम महीरुहः स्व क्षेत्र व्यप देशको यस्य ह महा सुरभि गन्धः तम् द्वीपम् अनुवासयति

25 तस्यापि प्रैय व्रत एवाधि पतिः नाम्ना मेधातिथिः सो ऽपि विभज्य सप्त वर्षाणि पुत्र नामानि तेषु स्वात्मजान् पुरोजव मनोजव पवमान धूम्रानीक चित्ररेफ बहुरूप विश्वधार सम्ज्ञान् निधाप्य अधिपतीन् स्वयम् भगवति अनन्त आवेशित मतिः तपोवनम् प्रविवेश

26 एतेषाम् वर्ष मर्यादा गिरयो नद्यश्च सप्त सप्तैव ईशान उरुशृङ्गो बल भद्रः शत केसरः सहस्र स्रोतो देवपालो महानस इति अनघा आयुर्दा उभयस्पृष्टिः अपराजिता पञ्च पदी सहस्र स्रुतिः निजधृतिर् इति

27 तद् वर्ष पुरुषा ऋतव्रत सत्यव्रत दानव्रत अनुव्रत नामानो भगवन्तम् वाइ वात्मकम् प्राणायाम विधूत रजस् तमसः परम समाधिना यजन्ते

28 अन्तः प्रविश्य भूतानि यो बिभर्त् यात्म केतुभिः

अन्तर्याम् ईश्वरः साक्षात् पातु नो यद्वशे स्फुटम्

29 एवम् एव दधि मण्डोदात् परतः पुष्कर द्वीपः ततो द्वि गुणायामः समन्तत उपकल्पितः समानेन स्वादूद केन समुद्रेण बहिर् आवृतो यस्मिन् बृहत् पुष्करम् ज्वलन शिखामल कनक पत्रा युतायुतम् भगवतः कमल् आसनस्य अध्यासनम् परिकल्पितम्

30 तद् द्वीप मध्ये मानस उत्तर नामैक एव अर्वाचीन पराचीन वर्षयोः मर्याद् आचलो ऽयुत योजनो च्छ्राया यामो यत्र तु चतसृषु दिक्षु चत्वारि पुराणि लोक पालानाम् इन्द्रा दीनाम् यदु परिष्टात् सूर्य रथस्य मेरुम् परि भ्रमतः सम्वत्सर् आत्मकम् चक्रम् देवानाम् अहोरात् राभ्याम् परिभ्रमति

31 तद् द्वीप स्यापि अधिपतिः प्रैयव्रतो वीति होत्रो नाम एतस् यात्मजौ रमणक धातकि नामानौ वर्ष पती नियुज्य स स्वयम् पूर्वज वद् भगवत् कर्मशील एवास्ते

32 तद् वर्ष पुरुषा भगवन्तम् ब्रह्म रूपिणम् स कर्मकेण कर्मणा आराधयन् तीदम् चोदा हरन्ति

33 यत् तत् कर्म मयम् लिङ्गम् ब्रह्म लिङ्गम् जनो ऽर्चयेत्

एकान्तम् अद्वयम् शान्तम् तस्मै भगवते नम इति

34 ऋषिर् उवाच

ततः परस्तात् लोका लोक नामाचलो लोका लोकयोर् अन्तराले परित उपक्षिप्तः

35 यावन् मानस उत्तर मेर्वोर् अन्तरम् तावती भूमिः काञ्चन् यन्या आदर्शत लोपमा यस्याम् प्रहितः पदार्थो न कथञ्चित् पुनः प्रत् युपलभ्यते तस्मात् सर्व सत्त्व परिहृत आसीत्

36 लोकालोक इति समाख्या यद् अनेन् आचलेन लोकालोक स्यान्तर् वर्तिना वस्थाप्यते

37 स लोक त्रयान्ते परित ईश्वरेण विहितो यस्मात् सूर्या दीनाम् ध्रुवाप वर्गाणाम् ज्योतिर् गणानाम् गभस्तयो ऽर्वा चीनाम् स्त्रीन् लोकान् आवि तन्वाना न कदाचित् पराचीना भवितुम् उत्सहन्ते तावद् उन्नहना यामः

38 एतावान् लोक विन्यासो मान लक्षण सम्स्थाभिः विचिन्तितः कविभिः स तु पञ्चाशत् कोटि गणितस्य भू गोलस्य तुरीय भागो ऽयम् लोका लोकाचलः

39 तद् उपरिष्टात् चतसृषु आशासु आत्म योनिना अखिल जगद् गुरुणा अधि निवेशिता ये द्विरद पतय ऋषभः पुष्कर चूडो वामनो ऽपराजित इति सकल लोक स्थिति हेतवः

40 तेषाम् स्व विभूतीनाम् लोक पालानाम् च विविध वीर्योप बृम्हणाय भगवान् परम महा पुरुषो महा विभूति पतिः अन्तर्यामि आत्मनो विशुद्ध सत्त्वम् धर्म ज्ञान वैराग्य ऐश्वर्यादि अष्ट महासिद्धि उपलक्षणम् विष्वक् सेनादिभिः स्व पार्षद प्रवरैः परिवारितो निज वरायुधोप शोभितैः निज भुज दण्डैः सन्धारय माणः तस्मिन् गिरिवरे समन्तात् सक ललोक स्वस्तय आस्ते

41 आकल्पम् एवम् वेषम् गत एष भगवान् आत्म योग मायया विरचित विविध लोक यात्रा गोपीथायेत् यर्थः

42 यो ऽन्तर् विस्तार एतेन ह्यलोक परिमाणम् च व्याख्यातम् यद् बहिर् लोका लोका चलात् ततः परस्ताद् योगेश्वर गतिम् विशुद्धाम् उदाहरन्ति

43 अण्ड मध्य गतः सूर्यो द्यावा भूम्योर् यद् अन्तरम्

सूर् याण्ड गोलयोर् मध्ये कोट्यः स्युः पञ्च विम्शतिः

44 मृते ऽण्ड एष एतस्मिन् यद् अभूत् ततो मार्तण्ड इति व्यपदेशः हिरण्य गर्भ इति यद् हिरण्याण्ड समुद्भवः

45 सूर्येण हि विभज्यन्ते दिशः खम् द्यौर् मही भिदा

स्वर्गाप वर्गौ नरका रसौकाम्सि च सर्वशः

46 देव तिर्यङ् मनुष्याणाम् सरीसृप सवीरुधाम्

सर्व जीव निकायानाम् सूर्य आत्मा दृगीश्वरः

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

पञ्चम स्कन्दे विम्शो ऽध्याय ः॥

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ पञ्चम स्कन्दः एक विम्शो ऽध्याय :

स्कन्द- 05: अध्याय- 21

01 श्री शुक उवाच

एतावान् एव भू वलयस्य सन्निवेशः प्रमाण लक्षणतो व्याख्यातः

02 एतेन हि दिवो मण्डल मानम् तद् विद उपदिशन्ति यथा द्विदलयोः निष्पावा दीनाम् ते अन्तरेण अन्तरिक्षम् तद् उभय सन्धितम्

03 यन् मध्य गतो भगवान्स् तपताम् पतिः तपन आतपेन त्रिलोकीम् प्रतपति अव भासयति आत्म भासा स एष उदगयन दक्षिणायन वैषुवत सम्ज्ञाभिः मान्द्य शैघ्र्य समानाभिः गतिभिः आरोहण अवरोहण समान स्थानेषु यथा सवनम् अभिपद्य मानो मकरादिषु राशिषु अहो रात्राणि दीर्घ ह्रस्व समानानि विधत्ते

04 यदा मेष तुलयोर् वर्तते तद अहो रात्राणि समानानि भवन्ति यदा वृषभा दिषु पञ्चसु च राशिषु चरति तदाहान् येव वर्धन्ते ह्रसति च मासि मास्यैकैका घटिका रात्रिषु

05 यदा वृश्चिका दिषु पञ्चसु वर्तते तदाहो रात्राणि विपर्ययाणि भवन्ति

06 यावद् दक्षिणायनम् अहानि वर्धन्ते यावद् उदगयनम् रात्रयः

07 एवम् नव कोटय एक पञ्चाशल् लक्षाणि योजनानाम् मानसो उत्तर गिरि परिवर्तनस्य उपदिशन्ति तस्मिन् ऐन्द्रीम् पुरीम् पूर्वस्मान् मेरोः देवधानीम् नाम दक्षिणतो याम्याम् सम्यमनीम् नाम पश्चाद् वारुणीम् निम्लोचनीम् नाम उत्तरतः सौम्याम् विभावरीम् नाम तासू उदय मध्याह्न अस्तमय निशीथा नीति भूतानाम् प्रवृत्ति निवृत्ति निमित्तानि समय विशेषेण मेरोः चतुर् दिशम्

08 तत् रत्यानाम् दिवस मध्यङ्गत एव सदा आदित्यः तपति सव्येन् आचलम् दक्षिणेन करोति

09 यत्रोदेति तस्य ह समान सूत्र निपाते निम्लोचति यत्र क्वचन स्यन्देनाभित पति तस्य हैष समान सूत्र निपाते प्रस्वा पयति तत्र गतम् न पश्यन्ति ये तम् समनु पश्येरन्

10 यदा चैन्द्र्याः पुर्याः प्रचलते पञ्च दश घटिकाभिर् याम्याम् सपाद कोटिद्वयम् योजनानाम् सार्ध द्वादश लक्षाणि साधिकानि चोपयाति

11 एवम् ततो वारुणीम् सौम्याम् ऐन्द्रीम् च पुनः तथान्ये च ग्रहाः सोमादयो नक्षत्रैः सह ज्योतिश् चक्रे समभ् युद्यन्ति सह वा निम्लोचन्ति

12 एवम् मुहूर्तेन चतुस् त्रिम्शल् लक्ष योजनानि अष्ट शताधिकानि सौरो रथः त्रयी मयो ऽसौ चतसृषु परिवर्तते पुरीषु

13 यस्यैकम् चक्रम् द्वादशारम् षण्नेमि त्रिणाभि सम्वत्सर् आत्मकम् समा मनन्ति तस्याक्षो मेरोः मूर्धनि कृतो मानसो उत्तरे कृतेतर भागो यत्र प्रोतम् रविरथ चक्रम् तैल यन्त्र चक्रवद् भ्रमन् मानसो उत्तर गिरौ परिभ्रमति

14 तस्मिन् अक्षे कृतमूलो द्वितीयो ऽक्षः तुर्य मानेन सम्मितः तैल यन्त्रा क्षवद् ध्रुवे कृतोपरि भागः

15 रथनीडस्तु षट् त्रिम्शल् लक्ष योजना यतः तत् तुरीय भाग विशालः तावान् रवि रथ युगो यत्र हयाः छन्दो नामानः सप्त अरुण योजिता वहन्ति देवम् आदित्यम्

16 पुरस्तात् सवितुः अरुणः पश्चाच्च नियुक्तः सौत्ये कर्मणि किलास्ते

17 तथा वालिखिल्या ऋषयो ऽङ्गुष्ठ पर्व मात्राः षष्टि सहस्राणि पुरतः सूर्यम् सूक्त वाकाय नियुक्ताः सम्स्तुवन्ति

18 तथान्ये च ऋषयो गन्धर्व् आप्सरसो नागा ग्रामण्यो यातुधाना देवा इति एकैकशो गणाः सप्त चतुर् दश मासि मासि भगवन्तम् सूर्यम् आत्मानम् नाना नामानम् पृथङ् नाना नामानः पृथक् कर्मभिः द्वन्द्वश उपासते

19 लक्षोत्तरम् सार्ध नव कोटि योजन परिमन्डलम् भू वलयस्य क्षणेन सग व्यूत् युत्तरम् द्वि सहस्र योजनानि स भुङ्क्ते

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

पञ्चम स्कन्दे एक विम्शो ऽध्याय ः||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ पञ्चम स्कन्दः द्वा विम्शो ऽध्याय ः

स्कन्द- 05: अध्याय- 22

01 राजो उवाच

यदे तद् भगवत आदित्यस्य मेरुम् ध्रुवम् च प्रदक्षिणेन परिक्रामतो राशीनाम् अभिमुखम् प्रचलितम् च अप्रदक्षिणम् भगवतोप वर्णितम् अमुष्य वयम् कथम् अनुमिमी महीति

02 स होवाच

यथा कुलाल चक्रेण भ्रमता सह भ्रमताम् तद् आश्रयाणाम् पिपीलिका दीनाम् गतिर् अन्यैव प्रदेश् आन्तरेष्व् अपि उपलभ्य मानत्वाद् एवम् नक्षत्र राशिभिः उपलक्षितेन काल चक्रेण ध्रुवम् मेरुम् च प्रदक्षिणेन परिधावता सह परिधाव मानानाम् तद् आश्रयाणाम् सूर्यादीनाम् ग्रहाणाम् गतिर् अन्यैव नक्षत् रान्तरे राश्यन्तरे च उपलभ्य मानत्वात्

03 स एष भगवान् आदि पुरुष एव साक्षान् नारायणो लोकानाम् स्वस्तय आत्मानम् त्रयी मयम् कर्म विशुद्धि निमित्तम् कविभिर् अपि च वेदेन विजिज्ञास्य मानो द्वा दशधा विभज्य षट्सु वसन्तादिषु ऋतुषु यथोप जोषम् ऋतु गुणान् विदधाति

04 तम् एतमिह पुरुषाः त्रय्या विद्यया वर्ण् आश्रमा चारानु पथा उच्चावचैः कर्मभिः आम्नातैः योग वितानैश् च श्रद्धया यजन्तो ऽञ्जसा श्रेयः समधि गच्छन्ति

05 अथ स एष आत्मा लोकानाम् द्यावा पृथिव्योर् अन्तरेण नभो वलयस्य काल चक्र गतो द्वा दश मासान् भुङ्क्ते राशिसम्ज्ञान् सम्वत्सरा वयवान् मासः पक्ष द्वयम् दिवा नक्तम् चेति सपा दर्क्ष द्वयम् उपदिशन्ति यावता षष्ठ मम्शम् भुञ्जीत स वै ऋतुर् इति उपदिश्यते सम्वत्सरा वयवः

06 अथ च यावतार् धेन नभो वीथ्याम् प्रचरति तम् कालम् अयनम् आचक्षते

07 अथ च यावन् न भोमण्डलम् सह द्यावा पृथिव्योः मण्डलाभ्याम् कात्स्न्र्येन स ह भुञ्जीत तम् कालम् सम्वत्सरम् परिवत्सरम् इडावत्सरम् अनुवत्सरम् वत्सरम् इति भानोः मान्द्य शैघ्र्य सम गतिभिः समा मनन्ति

08 एवम् चन्द्रमा अर्क गभस्तिभ्य उपरिष्टात् लक्ष योजनत उपलभ्य मानो ऽर्कस्य सम्वत्सर भुक्तिम् पक्षाभ्याम् मास भुक्तिम् सपा दर्क्षाभ्याम् दिनेनैव पक्ष भुक्तिम् अग्रचारी द्रुत तर गमनो भुङ्क्ते

09 अथ च आपूर्यमाणा भिश्च कलाभिः अमराणाम् क्षीयमाणा भिश्च कलाभिः पित्णाम् अहोरात्राणि पूर्व पक्ष अपर पक्षाभ्याम् वितन्वानः सर्व जीव निवह प्राणो जीवः च एकमेकम् नक्षत्रम् त्रिम्शता मुहूर्तैः भुङ्क्ते

10 स एष षोडशकलः पुरुषो भगवान् मनोमयो ऽन्नमयो ऽमृतमयो देव पितृ मनुष्य भूत पशु पक्षि सरी सृप वीरुधाम् प्राणाप् यायन शीलत्वात् सर्वमय इति वर्णयन्ति

11 तत उपरिष्टाद् त्रि लक्ष योजनतो नक्षत्राणि मेरुम् दक्षिणेनैव कालायन ईश्वर योजितानि सहा भिजिताष्टा विम्शतिः

12 तत उपरिष्टाद् उशना द्वि लक्ष योजनत उपलभ्यते पुरतः पश्चात् सहैव वार्कस्य शैघ्र्य मान्द्य साम्याभिः गतिभिः अर्कवत् चरति लोकानाम् नित्यद् आनुकूल एव प्रायेण वर्षयम्श् चारेणानु मीयते स वृष्टि विष्टम् भग्रहोप शमनः

13 उशनसा बुधो व्याख्यातः तत उपरिष्टाद् द्वि लक्ष योजनतो बुधः सोम सुत उपलभ्य मानः प्रायेण शुभ कृद् यद् आर्काद् व्यति रिच्येत तद अतिवाता भ्रप्राया अनावृष्टि आदिभयम् आशम्सते

14 अत ऊर्ध्वम् अङ्गारको ऽपि योजन लक्ष द्वितय उपलभ्य मानः त्रिभिस् त्रिभिः पक्षैः एकैकशो राशीन् द्वा दशानु भुङ्क्ते यदि न वक्रेण अभिवर्तते प्रायेण अशुभ ग्रहो ऽघशम्सः

15 तत उपरिष्टाद् द्वि लक्ष योजन अन्तर गता भगवान् बृहस्पतिः एकैकस्मिन् राशौ परिवत्सरम् परिवत्सरम् चरति यदि न वक्रः स्यात् प्रायेण अनुकूलो ब्राह्मण कुलस्य

16 तत उपरिष्टाद् योजन लक्ष द्वयात् प्रतीय मानः शनैश्चर एकैकस्मिन् राशौ त्रिम्शन् मासान् विलम्बमानः सर्वान् एवानु पर्येति तावद्भिः अनुवत्सरैः प्रायेण हि सर्वेषाम् अशान्ति करः

17 तत उत्तर स्माद् ऋषय एका दश लक्ष योजन अन्तर उपलभ् यन्ते य एव लोकानाम् शम् अनुभाव यन्तो भगवतो विष्णोः यत् परमम् पदम् प्रदक्षिणम् प्रक्रमन्ति

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

पञ्चम स्कन्दे द्वा विम्शो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ पञ्चम स्कन्दः त्रयो विम्शो ऽध्याय :

स्कन्द- 05: अध्याय- 23

01 श्री शुक उवाच

अथ तस्मात् परतः त्रयो दश लक्ष योजनान् तरतो यत् तद् विष्णोः परमम् पदम् अभि वदन्ति यत्र ह महा भागवतो ध्रुव औत्तान पादिः अग्निन इन्द्रेण प्रजापतिना कश्यपेन धर्मेण च समकाल युग्भिः स बहुमानम् दक्षिणतः क्रियमाण इदानीम् अपि कल्प जीविनाम् आजीव्य उपास्ते तस्येहानु भाव उपवर्णितः

02 स हि सर्वेषाम् ज्योतिर् गणानाम् ग्रह नक्षत्रा दीनाम् अनिमिषेण अव्यक्तरम् हसा भगवता कालेन भ्राम्य माणानाम् स्थाणुर् इवा वष्टम्भ ईश्वरेण विहितः शश्वद् अवभासते

03 यथा मेढी स्तम्भ आक्रमण पशवः सम्योजिताः त्रिभिस् त्रिभिः सवनैः यथा स्थानम् मण्डलानि चरन्ति एवम् भगणा ग्रहादय एतस्मिन् अन्तर् बहिर् योगेन काल चक्र आयोजिता ध्रुवम् एवा वलम्ब्य वायुनो दीर्य माणा आ कल्पान्तम् परिचङ् क्रमन्ति नभसि यथा मेघाः श्येनादयो वायु वशाः कर्म सारथयः परिवर्तन्ते एवम् ज्योतिर् गणाः प्रकृति पुरुष सम्योगानु गृहीताः कर्म निर्मित गतयो भुवि न पतन्ति

04 केचन् ऐतज् ज्योतिर् अनीकम् शिशुमार सम्स्थानेन भगवतो वासुदेवस्य योग धारणायाम् अनुवर्णयन्ति

05 यस्य पुच्छाग्रे ऽवाक्शिरसः कुण्डली भूत देहस्य ध्रुव उपकल्पितः तस्य लाङ्गूले प्रजापतिः अग्निर् इन्द्रो धर्म इति पुच्छ मूले धाता विधाता च कट्याम् सप्त ऋषयः तस्य दक्षिणा वर्त कुण्डली भूत शरीरस्य यान् युदगयनानि दक्षिण पार्श्वे तु नक्षत्राणि उपकल्पयन्ति दक्षिणायनानि तु सव्ये यथा शिशु मारस्य कुण्डला भोग सन्निवेशस्य पार्श्वयोर् उभयोर् अपि अवयवाः समसङ्ख्या भवन्ति पृष्ठे तु अजवीथी आकाश गङ्गा च उदरतः

06 पुनर्वसु पुष्यौ दक्षिण वामयोः श्रोण्योः आर्द्रा श्लेषे च दक्षिण वामयोः पश्चिमयोः पादयोः अभिजिद् उत्तराषाढे दक्षिण वामयोः नासिकयोः यथासङ्ख्यम् श्रवण पूर्वाषाढे दक्षिण वामयोः लोचनयोः धनिष्ठा मूलम् च दक्षिण वामयोः कर्णयोः मघादीनि अष्ट नक्षत्राणि दक्षिणायनानि वाम पार्श्ववङ् क्रिषु युञ्जीत तथैव मृग शीर्षादीनि उदगयनानि दक्षिण पार्श्ववङ् क्रिषु प्राति लोम्येन प्रयुञ्जीत शतभिषा ज्येष्ठे स्कन्धयोः दक्षिण वामयोः न्यसेत्

07 उत्त राहनाउ अगस्तिः अधराहनौ यमो मुखेषु चाङ्गारकः शनैश्चर उपस्थे बृहस्पतिः ककुदि वक्षसि आदित्यो हृदये नारायणो मनसि चन्द्रो नाभ्या मुशना स्तनयोः अश्विनौ बुधः प्राणा पानयो राहुर्गले केतवः सर्वाङ्गेषु रोमसु सर्वे तारागणाः

08 एतदु हैव भगवतो विष्णोः सर्व देवता मयम् रूपम् अहरहः सन्ध्यायाम् प्रयतो वाग्यतो निरीक्षमाण उपतिष्ठेत नमो ज्योतिर् लोकाय कालायनाया अनिमिषाम् पतये महा पुरुषाय अभि धीमहीति

09 ग्रहर्क्ष तारा मयम् आधि दैविकम् पापापहम् मन्त्र कृताम् त्रिकालम्

नमस्यतः स्मरतो वा त्रिकालम् नश्येत तत् कालजम् आशु पापम्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

पञ्चम स्कन्दे त्रयो विम्शो ऽध्याय ः||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ पञ्चम स्कन्दः चतुर् विम्शो ऽध्याय ः

01 श्री शुक उवाच

अधस्तात् सवितु: योजनायुते स्वर्भानु: नक्षत्र वच् चरतीत् येके यो ऽसौ अमरत्वम् ग्रहत्वम् चालभत भगवद् अनुकम्पया स्वयम् असुरापसद: सैम्हिकेयो ह्यत दर्ह: तस्य तात जन्म कर्माणि चोपरिष्टाद् वक्ष्याम:

02 यददस् तरणेर् मण्डलम् प्रत पत: तद् विस्तरतो योजनायुतम् आचक्षते द्वादश सहस्रम् सोमस्य त्रयो दश सहस्रम् राहो: य: पर्वणि तद् व्यवधान कृद् वैरानु बन्ध: सूर्या चन्द्रमसौ अभिधावति

03 तन्निशम्य उभयत्रापि भगवता रक्षणाय प्रयुक्तम् सुदर्शनम् नाम भागवतम् दयितम् अस्त्रम् तत् तेजसा दुर्विषहम् मुहु: परिवर्त मानम् अभ्यवस्थितो मुहूर्तम् उद्विज मान: चकित हृदय आरादेव निवर्तते तद् उपरागमिति वदन्ति लोका:

04 ततो ऽधस् तात् सिद्ध चारण विद्याधराणाम् सदनानि तावन् मात्र एव

05 ततो ऽधस् ताद् यक्ष रक्ष: पिशाच प्रेत भूत गणानाम् विहाराजिरम् अन्तरिक्षम् यावद् वायु: प्रवाति यावन् मेघा उपलभ्यन्ते

06 ततो ऽधस्तात् छत योजनान् तर इयम् पृथिवी यावद् हम्स भास श्येन सुपर्णादय: पतत्त्रि प्रवरा उत्पतन्ती ति

07 उपवर्णितम् भूमे: यथा सन्निवेश् आवस्थानम् अवनेरप् यधस्तात् सप्त भूविवरा एकैकशो योजनायुतान् तरेणायाम विस्तारेण उपक्लृता अतलम् वितलम् सुतलम् तलातलम् महातलम् रसातलम् पातालम् इति

08 एतेषु हि बिल स्वर्गेषु स्वर्गादपि अधिक काम भोग् ऐश्वर् यानन्द भूति विभूतिभि: सु समृद्ध भवनो द्याना क्रीड विहारेषु दैत्य दानव काद्रवेया नित्य प्रमुदि ताअनु रक्त कलत्रा पत्य बन्धु सुहृद् अनुचरा गृह पतय ईश्वराद् अपि अप्रतिहत कामा माया विनोदा निवसन्ति

09 येषु महाराज मयेन मायाविना विनिर्मिता: पुरो नाना मणि प्रवर प्रवेक विरचित विचित्र भवन प्राकार गोपुर सभा च इत्य चत्वरा यतनादिभि: नागासुर मिथुन पारावत शुक सारिका कीर्ण कृत्रिम भूमिभि: विवरेश्वर गृहोत्तमै: समलङ्कृता: चकासति

10 उद्यानानि चाति तराम् मन इन्द्रिया नन्दिभि: कुसुम फल स्तबक सुभग किसलया वनत रुचिर विटप विटपिनाम् लताङ्गा लिङ्गितानाम् श्रीभि: स मिथुन विविध विहङ्गम जलाशयानाम् अमल जल पूर्णानाम् झष कुलोल् लङ्घन क्षुभित नीर नीरज कुमुद कुवलय कह्लार नीलोत्पल लोहित शत पत्रादि वनेषु कृत निकेतनानाम् एक विहारा कुल मधुर विविध स्वनादिभि: इन्द्रि योत्सवै: अमर लोक श्रियम् अतिशयितानि

11 यत्र ह वाव न भयम् अहो रात्रादिभि: काल विभागै: उपलक्ष्यते

12 यत्र हि महाहि प्रवर शिरोमणय: सर्वम् तम: प्रबाधन्ते

13 न वा एतेषु वसताम् दिव् यौषधि रस रसायनान् अपान स्नानादिभि: आधयो व्याधयो वलीपलित जराद यश्च देह वैवर्ण्य दौर्गन्ध्य स्वेद क्लम ग्लानिर् इति वयो ऽवस्थाश्च भवन्ति

14 न हि तेषाम् कल्याणानाम् प्रभवति कुतश्चन मृत्युः विना भगवत् तेजसः चक्राप देशात्

15 यस्मिन् प्रविष्टे ऽसुर वधूनाम् प्रायः पुम्सवनानि भयादेव स्रवन्ति पतन्ति च

16 अथातले मय पुत्रो ऽसुरो बलो निवसति येन ह वा इह सृष्टाः षण्णवतिर् मायाः काश्चन अद्यापि मायाविनो धारयन्ति यस्य च जृम्भ माणस्य मुखतः त्रयः स्त्रीगणा उदपद् यन्त स्वैरिण्यः कामिन्यः पुम्श्चल्य इति या वै बिलायनम् प्रविष्टम् पुरुषम् रसेन हाटकाख्येन साधयित्वा स्व विलासाव लोकनानु राग स्मित सम्लापोप गूहनादिभिः स्वैरम् किल रमयन्ति यस्मिन् उपयुक्ते पुरुष ईश्वरो ऽहम् सिद्धो ऽहम् इति अयुत महा गज बलम् आत्मानम् अभिमन्यमानः कत्थते मदान्ध इव

17 ततो ऽधस्ताद् वितले हरो भगवान् हाट केश्वरः स्व पार्षद भूत गणावृतः प्रजापति सर्गोप बृम्हणाय भवो भवान्या सह मिथुनी भूत आस्ते यतः प्रवृत्ता सरित् प्रवरा हाटकी नाम भवयोर् वीर्येण यत्र चित्रभानुः मातरिश् वना समिध्यमान ओजसा पिबति तन् निष्ठ्यूतम् हाटकाख्यम् सुवर्णम् भूषणेन असुर इन्द्राव रोधेषु पुरुषाः सह पुरुषीभिः धारयन्ति

18 ततो ऽधस्तात् सुतले उदार श्रवाः पुण्यश्लोको विरोचन् आत्मजो बलिः भगवता महेन्द्रस्य प्रियम् चिकीर्ष माणेन अदितेः लब्धकायो भूत्वा वटु वामन रूपेण पराक्षिप्त लोकत्रयो भगवद् अनुकम्पयैव पुनः प्रवेशित इन्द्रादिषु अविद्यमानया सु समृद्धया श्रियाभि जुष्टः स्व धर्मेण आराधयन् तमेव भगवन्तम् आराधनीयम् अपगत साध्वस आस्ते ऽधुनापि

19 नो एवै तत् साक्षात् कारो भूमि दानस्य यत् तद् भगवति अशेष जीव निकायानाम् जीव भूतात्म भूते परमात्मनि वासुदेवे तीर्थ तमे पात्र उपपन्ने परया श्रद्धया परमादर समाहित मनसा सम्प्रति पादितस्य साक्षाद् अपवर्ग द्वारस्य यद् बिल निलय ऐश्वर्यम्

20 यस्य ह वाव क्षुत पतन प्रस्खल नादिषु विवशः सकृन् नामाभि गृणन् पुरुषः कर्म बन्धनम् अञ्जसा विधुनोति यस्य हैव प्रति बाधनम् मुमुक्षवो ऽन्य थैवोप लभन्ते

21 तद् भक्तानाम् आत्मवताम् सर्वेषाम् आत्मनि आत्मद आत्म तयैव

22 न वै भगवान् नूनम् अमुष् यानुजग्राह यदुत पुनर् आत्मानु स्मृति मोषणम् माया मय भोग् ऐश्वर्यम् एवा तनुतेति

23 यत् तद् भगवता अनधिगता अन्योपायेन याच् ञाच्छलेन अपहृत स्व शरीराव शेषित लोकत्रयो वरुण पाशैश्च सम्प्रति मुक्तो गिरिदर्याम् चाप विद्ध इति हो वाच

24 नूनम् बतायम् भगवान् अर्थेषु न निष्णातो यो ऽसौ इन्द्रो यस्य सचिवो मन्त्राय वृत एकान्ततो बृहस्पतिस् तम् अतिहाय स्वयम् उपेन्द्रेण आत्मानम् अयाचत् आत्मनश् चाशिषो नो एव तद् दास्यम् अति गम्भीर वयसः कालस्य मन्वन्तर परिवृत्तम् कियल् लोक त्रयम् इदम्

25 यस्यानु दास्यम् एव अस्मत् पितामहः किल वव्रे न तु स्व पित्र्यम् यदुता कुतोभयम् पदम् दीयमानम् भगवतः परम् इति भगवतो परते खलु स्व पितरि

26 तस्य महानु भावस्य अनुपथम् अमृजित कषाय: को वास्मद् विध: परिहीण भगवद् अनुग्रह उपजिगमिषती ति

27 तस्यानु चरितम् उपरिष्टाद् विस्तरिष्यते यस्य भगवान् स्वयम् अखिल जगद् गुरु: नारायणो द्वारि गदापाणि रवतिष्ठते निज जनानु कम्पित हृदयो येन् आङ्गुष्ठेन पदा दश कन्धरो योजन् आयुतायुतम् दिग् विजय उच्चाटित:

28 ततो ऽधस्तात् तलातले मयो नाम दानवेन्द्र: त्रिपुर आधिपति: भगवता पुरारिणा त्रिलोकीशम् चिकीर्षुणा निर्दग्ध स्व पुरत्रय: तत् प्रसादात् लब्धपदो मायाविनाम् आचार्यो महादेवेन परिरक्षितो विगत सुदर्शन भयो महीयते

29 ततो ऽधस्तात् महातले काद्र वेयाणाम् सर्पाणाम् नैकशिरसाम् क्रोधवशो नाम गण: कुहक तक्ष ककालिय सुषेणादि प्रधाना महा भोगवन्त: पतत् त्रि राजाधिपते: पुरुष वाहाद् अनवरतम् उद्विजमाना: स्व कलत्रापत्य सुहृत् कुटुम्ब सङ्गेन क्वचित् प्रमत्ता विहरन्ति

30 ततो ऽधस्ताद् रसातले दैतेया दानवा: पणयो नाम निवात कवचा: कालेया हिरण्यपुर वासिन इति विबुध प्रत्यनीका उत्पत्त्या महौजसो महा साहसिनो भगवत: सकल लोकानु भावस्य हरेर् एव तेजसा प्रतिहत बलावलेपा बिलेशया इव वसन्ति ये वै सरमय इन्द्र दूत्या वाग्भि: मन्त्र वर्णाभि: इन्द्राद् बिभ्यति

31 ततो ऽधस्तात् पाताले नागलोक पतयो वासुकिप्र मुखा: शङ्ख कुलिक महाशङ्ख श्वेत धनञ्जय धृतराष्ट्र शङ्ख चूड कम्बलाश् वतर देव दत्तादयो महा भोगिनो महा मर्षा निवसन्ति येषामु ह वै पञ्च सप्त दश शत सहस्र शीर्षाणाम् फणासु विरचिता महामणयो रोचिष्णव: पाताल विवर तिमिर निकरम् स्वरोचिषा विधमन्ति

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

पञ्चम स्कन्दे चतुर् विम्शो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम् अ: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ पञ्चम स्कन्द: पञ्च विम्शो ऽध्याय :

स्कन्द- 05: अध्याय- 25

01 श्री शुक उवाच

तस्य मूल देशे त्रिम्शद् योजन सहस्रान्तर आस्ते या वै कला भगवतस् तामसी समाख्याता नन्त इति सात्व तीया द्रष्टृ दृश्ययोः सङ्कर्षणम् अहम् इति अभिमान लक्षणम् यम् सङ्कर्षणम् इत्या चक्षते

02 यस् येदम् क्षिति मण्डलम् भगवतो ऽनन्त मूर्तेः सहस्र शिरस एकस्मिन् नेव शीर्षणि ध्रियमाणम् सिद्धार्थ इव लक्ष्यते

03 यस्य ह वा इदम् कालेनोप सन्जिहीर्षतो ऽमर्ष विरचित रुचिर भ्रमद् भ्रुवोर् अन्तरेण साङ्कर्षणो नाम रुद्र एकादश व्यूहः त्र्यक्षस् त्रिशिखम् शूलम् उत्तम् भयन् उदतिष्ठत्

04 यस्याङ्घ्रि कमल युगलारुण विशदन खमणि षण्ड मण्डलेषु अहिपतयः सह सात्व तर्षभैः एकान्त भक्ति योगेन अवनमन्तः स्व वदनानि परिस्फुरत् कुण्डल प्रभा मण्डित गण्ड स्थलानि अति मनोहराणि प्रमुदित मनसः खलु विलोकयन्ति

05 यस्यैव हि नाग राज कुमार्य आशिष आशासानाः चार् वङ्ग वलय विलसित विशद विपुल धवल सुभग रुचिर भुजरजत स्तम्भेषु अगुरु चन्दन कुङ्कुम पङ्कानु लेपेन अवलिम्प मानाः तद् अभि मर्श नोन्मथित हृदय मकर ध्वजावेश रुचिर ललित स्मिताः तद् अनुराग मद मुदित मद विघूर्णि तारुण करुणाव लोक नयन वदन् आरविन्दम् सव्रीडम् किल विलोकयन्ति

06 स एव भगवान् अनन्तो ऽनन्त गुणार्णव आदिदेव उपसम्हृता मर्ष रोषवेगो लोकानाम् स्वस्तय आस्ते

07 ध्यायमानः सुरासुरो रग सिद्ध गन्धर्व विद्याधर मुनिगणैः अनवरत मद मुदित विकृत विह्वल लोचनः सु ललित मुखरिका मृतेन आप्याय मानः स्व पार्षद विबुध यूथ पतीन् अपरिम्लान राग नव तुळसि कामोद मध् वासवेन माद्यन् मधुकर व्रात मधुर गीत श्रियम् वैजयन्तीम् स्वाम् वनमालाम् नील वासा एक कुण्डलो हलककुदि कृत सुभग सुन्दर भुजो भगवान् माहेन्द्रो वारणेन्द्र इव काञ्चनीम् कक्षाम् उदारलीलो बिभर्ति

08 य एष एवम् अनुश्रुतो ध्यायमानो मुमुक्षूणाम् अनादि काल कर्म वासना ग्रथितम् अविद्यामयम् हृदय ग्रन्थिम् सत्त्व रजस् तमो मयम् अन्तर् हृदयम् गतः आशु निर्भिनत्ति तस्यानु भावान् भगवान् स्वायम्भुवो नारदः सह तुम्बुरुणा सभायाम् ब्रह्मणः सम्श्लोकया मास

09 उत्पत्ति स्थिति लय हेतवो ऽस्य कल्पाः

सत्त्वाद्याः प्रकृति गुणा यदीक्ष यासन्

यद् रूपम् ध्रुवम् अकृतम् यदेकम् आत्मन्

नानाधात् कथमु ह वेद तस्य वर्त्म

10 मूर्तिम् नः पुरु कृपया बभार सत्त्वम्

सम्शुद्धम् सद सदिदम् विभाति तत्र

यल्लीलाम् मृगपति राददे ऽनवद्याम्

आदातुम् स्वजन मनाम् स्युदार वीर्यः

11 यन् नाम श्रुतम् अनुकीर्तयेद् अकस्माद्

आर्तो वा यदि पतित: प्रलम्भ नाद्वा

हन्त्यम्ह: सपदि नृणाम् अशेषम् अन्यम्

कम् शेषाद् भगवत आश्रयेन् मुमुक्षु:

12 मूर्ध्न् यर्पितम् अणुवत् सहस्र मूर्ध्नो

भूगोलम् स गिरि सरित् समुद्र सत्त्वम्

आनन्त्याद् अनिमित विक्रमस्य भूम्न:

को वीर्याणि अधि गणयेत् सहस्रजिह्व:

13 एवम् प्रभावो भगवान् अनन्तो

दुरन्त वीर्योरु गुणानु भाव:

मूले रसाया: स्थित आत्म तन्त्रो

यो लीलया क्ष्माम् स्थितये बिभर्ति

14 एता ह्येवेह नृभिर् उपगन्तव्या गतयो यथा कर्म विनिर्मिता यथो [उ]पदेशम् अनुवर्णिता: कामान् कामय मानै:

15 एतावतीर्हि राजन् पुम्स: प्रवृत्ति लक्षणस्य धर्मस्य विपाक गतय उच्चावचा विसदृशा यथा प्रश्नम् व्याचख्ये किमन्यत् कथयाम इति

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

पञ्चम स्कन्दे पञ्च विम्शो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ पञ्चम स्कन्द: षड् विम्शो ऽध्याय :

स्कन्द- 05: अध्याय- 26

01 राजो उवाच

महर्ष एतद् वैचित्र्यम् लोकस्य कथम् इति

02 ऋषिर् उवाच

त्रिगुण त्वात् कर्तुः श्रद्धया कर्म गतयः पृथग् विधाः सर्वा एव सर्वस्य तार तम्येन भवन्ति

अथेदानीम् प्रतिषिद्ध लक्षणस्य अधर्मस्य तथैव कर्तुः श्रद्धाया वैसादृश्यात् कर्म फलम् विसदृशम् भवति या हि अनाद्य विद्यया कृत कामानाम् तत् परिणाम लक्षणाः सृतयः सहस्रशः प्रवृत्ताः तासाम् प्राचुर्येण अनुवर्ण यिष्यामः

03 राजो उवाच

नरका नाम भगवन् किम् देश विशेषा अथवा बहिस् त्रिलोक्या आहोस्विद् अन्तराल इति

04 ऋषिर् उवाच

अन्तराल एव त्रि जगत् यास्तु दिशि दक्षिणस्याम् अधस्ताद् भूमेः उपरिष्टाच्च जलाद् यस्याम् अग्निष् वात्तादयः पितृगणा दिशि स्वानाम् गोत्राणाम् परमेण समाधिना सत्या एवाशिष आशासाना निवसन्ति

05 यत्र ह वाव भगवान् पितृराजो वैवस्वतः स्वविषयम् प्रापितेषु स्व पुरुषैः जन्तुषु सम्परेतेषु यथा कर्मा वद्यम् दोषम् एवानुल् लङ्घित भगवच् छासनः सगणो दमम् धारयति

06 तत्र हैके नरकान् एक विम्शतिम् गणयन्ति अथ ताम्स् ते राजन् नाम रूप लक्षणतो ऽनुक्रमिष् यामः तामिस्रो ऽन्ध तामिस्रो रौरवो महा रौरवः कुम्भी पाकः कालसूत्रम् असिपत्रवनम् सूकर मुखम् अन्धकूपः कृमिभोजनः सन्दम्शस् तप्त सूर्मिः वज्र कण्टक शाल्मली वैतरणी पूयोदः प्राणरोधो विशसनम् लालाभक्षः सारमे यादनम् अवीचिरयः पानम् इति किञ्च क्षार कर्दमो रक्षोगण भोजनः शूलप्रोतो दन्दशूको ऽवट निरोधनः पर्या वर्तनः सूची मुखम् इति अष्टा विम्शतिः नरका विविध यातना भूमयः

07 तत्र यस्तु परवित्ता पत्य कलत्राणि अपहरति स हि काल पाश बद्धो यम पुरुषैः अति भयानकैः तामिस्रे नरके बलान् निपात्यते अनशन अनुदपान दण्ड ताडन सन्तर् जनादिभिः यातनाभिः यात्यमानो जन्तुः यत्र कश्मलम् आसादित एकदैव मूर्च्छाम् उपयाति तामिस्र प्राये

08 एवम् एव अन्ध तामिस्रे यस्तु वञ्चयित्वा पुरुषम् दारादीन् उपयुङ्क्ते यत्र शरीरी निपात्यमानो यातनास्थो वेदनया नष्ट मतिः नष्ट दृष्टिश् च भवति यथा वनस्पतिः वृश्च्यमान मूलः तस्माद् अन्ध तामिस्रम् तम् उपदिशन्ति

09 यस्त्विह वा एतदहम् इति ममेदम् इति भूत द्रोहेण केवलम् स्व कुटुम्बमेव अनुदिनम् प्रपुष्णाति स तदिह विहाय स्वयम् एव तद् अशुभेन रौरवे निपतति

10 ये त्विह यथैवा मुना विहिम्सिता जन्तवः परत्र यम यातनाम् उपगतम् त एव रुरवो भूत्वा तथा तमेव विहिम्सन्ति तस्माद् रौरवम् इत्याहू रुरुरिति सर्पाद् अति क्रूर सत्त्वस्याप देशः

11 एवमेव महा रौरवो यत्र निपतितम् पुरुषम् क्रव्यादा नाम रुरवः तम् क्रव्येण घात यन्ति यः केवलम् देहम् भरः

12 यस्त्विह वा उग्रः पशून् पक्षिणो वा प्राणत उपरन् धयति तम् अपकरुणम् पुरुषादैर् अपि विगर्हितम् अमुत्र यमानु चराः कुम्भीपाके तप्त तैले उपरन्ध यन्ति

13 यस्त्विह पित्रु विप्र ब्रह्म ध्रुक् स काल सूत्र सम्ज्ञके नरके अयुत योजन परिमण्डले ताम्रमये तप्त खले उपर्य धस्ताद् अग्न् यर्काभ्याम् अति तप्यमाने ऽभि निवेशितः क्षुत् पिपासाभ्याम् च दह्यमान अन्तर्बहिः शरीर आस्ते शेते चेष्टते ऽवतिष्ठति परिधावति च यावन्ति पशु रोमाणि तावद् वर्ष सहस्राणि

14 यस्त्विह वै निज वेद पथाद् अनापदि अपगतः पाखण्डम् चोप गतः तम् असिपत्र वनम् प्रवेश्य कशया प्रहरन्ति तत्र हासौ इतस् ततो धावमान उभयतो धारैः ताल वनासि पत्रैः छिद्यमान सर्वाङ्गो हा हतो ऽस्मीति परमया वेदनया मूर्च्छितः पदे पदे निपतति स्व धर्महा पाखण्डानु गतम् फलम् भुङ्क्ते

15 यस्त्विह वै राजा राज पुरुषो वा अदण्ड्ये दण्डम् प्रणयति ब्राह्मणे वा शरीर दण्डम् स पापीयान् नरके ऽमुत्र सूकर मुखे निपतति तत्र अतिबलैः विनिष्पिष्य माणा वयवो यथै वेहेक्षु खण्ड आर्त स्वरेण स्वनयन् क्वचिन् मूर्च्छितः कश्मलम् उपगतो यथै वेहा दृष्ट दोषा उपरुद्धाः

16 यस्त्विह वै भूतानाम् ईश्वरोप कल्पित वृत्तीनाम् अविविक्त परव् यथानाम् स्वयम् पुरुषोप कल्पित वृत्तिः विविक्त परव्यथो व्यथाम् आचरति स परत् रान्धकूपे तद् अभि द्रोहेण निपतति तत्र हासौ तैर् जन्तुभिः पशु मृग पक्षि सरी सृपैः मशक यूका मत्कुण मक्षिकादिभिः ये के च अभिद्रुग्धाः तैः सर्वतो ऽभि द्रुह्य माणः तमसि विहत निद्रा निर्वृतिः अलब्ध् आवस्थानः परिक्रामति यथा कुशरीरे जीवः

17 यस्त्विह वा असम् विभज्य अश्नाति यत् किञ्चनोपन तम् अनिर्मित पञ्च यज्ञो वायस सम्स्तुतः स परत्र कृमि भोजने नरकाधमे निपतति तत्र शत सहस्रयोजने कृमिकुण्डे कृमि भूतः स्वयम् कृमिभिरेव भक्ष्यमाणः कृमि भोजनो यावत् तद् अप्रत्ता प्रहूतादो ऽनिर्वेशम् आत्मानम् यातयते

18 यस्त्विह वै स्तेयेन बलाद्वा हिरण्य रत्नादीनि ब्राह्मणस्य वापहरति अन्यस्य वा नापदि पुरुषः तम् अमुत्र राजन् यम पुरुषा अयस्मयैः अग्निपिण्डैः सन्दम्शैः त्वचि निष्कुषन्ति

19 यस्त्विह वा अगम्याम् स्त्रियम् अगम्यम् वा पुरुषम् योषिद् अभिगच्छति तावमुत्र कशया ताडयन्तः तिग्मया सूर्म्या लोहमय्या पुरुषम् आलिङ्गयन्ति स्त्रियम् च पुरुष रूपया सूर्म्या

20 यस्त्विह वै सर्वाभिगमः तम् अमुत्र निरये वर्तमानम् वज्र कण्टक शाल्मलीम् आरोप्य निष्कर्षन्ति

21 ये त्विह वै राजन्या राज पुरुषा वा अपाखण्डा धर्म सेतून् भिन्दन्ति ते सम्परेत्य वैतरण्याम् निपतन्ति भिन्न मर्यादाः तस्याम् निरय परिखा भूतायाम् नद्याम् यादोगणैः इतस् ततो भक्ष्यमाणा आत्मना न वियुज्यमानाः च असुभिः उह्यमानाः स्वाघेन कर्म पाकम् अनुस्मरन्तो विण् मूत्र पूय शोणित केश नखास्थि मेदो माम्सव सावाहिन्याम् उप तप्यन्ते

22 ये त्विह वै वृषली पतयो नष्ट शौचाचार नियमाः त्यक्त लज्जाः पशु चर्याम् चरन्ति ते चापि प्रेत्य पूय विण् मूत्र श्लेष्म मला पूर्णार्णवे निपतन्ति तद् एव अति बीभत्सितम् अश्नन्ति

23 ये त्विह वै श्व गर्दभ पतयो ब्राह्मणादयो मृगया विहारा अतीर्थे च मृगान् निघ्नन्ति तानपि सम्परेतान् लक्ष्य भूतान् यम पुरुषा इषुभिः विध्यन्ति

24 ये त्विह वै दाम्भिका दम्भ यज्ञेषु पशून् विशसन्ति तान् अमुष्मिन् लोके वैशसे नरके पतितान् निरयपतयो यात यित्वा विशसन्ति

25 यस्त्विह वै सवर्णाम् भार्याम् द्विजो रेतः पाययति काम मोहितः तम् पापकृतम् अमुत्र रेतः कुल्यायाम् पातयित्वा रेतः सम्पाय यन्ति

26 ये त्विह वै दस्यवो ऽग्निदा गरदा ग्रामान् सार्थान्वा विलुम्पन्ति राजानो राजभटा वा ताम्श् चापि हि परेत्य यम दूता वज्र दम्ष्ट्राः श्वानः सप्त शतानि विम्शतिश् च सरभसम् खादन्ति

27 यस्त्विह वा अनृतम् वदति साक्ष्ये द्रव्य विनिमये दाने वा कथञ्चित् स वै प्रेत्य नरके ऽवीचिमत् यधः शिरा निरवकाशे योजन शतोच् छ्रायाद् गिरिमूर्ध्नः सम्पात्यते यत्र जलमिव स्थलम् अश्म पृष्ठम् अवभासते तद् अवीचि मत् तिलशो विशीर्यमाण शरीरो न म्रियमाणः पुनर् आरोपितो निपतति

28 यस्त्विह वै विप्रो राजन्यो वैश्यो वा सोमपीथः तत् कलत्रम् वा सुराम् व्रतस्थो ऽपि वा पिबति प्रमादतः तेषाम् निरयम् नीतानाम् उरसि पद आक्रम्य आस्ये वह्निना द्रवमाणम् कार्ष्णायसम् निषिञ्चन्ति

29 अथ च यस्त्विह वा आत्म सम्भावनेन स्वयम् अधमो जन्म तपो विद्याचार वर्णाश्रम वतो वरीयसो न बहु मन्येत स मृतक एव मृत्वा क्षार कर्दमे निरये ऽवाक्शिरा निपातितो दुरन्ता यातना हि अश्नुते

30 ये त्विह वै पुरुषाः पुरुषमेधेन यजन्ते याश्च स्त्रियो नृपशून् खादन्ति ताम्श्च ते पशव इव निहता यमसदने यातयन्तो रक्षोगणाः सौनिका इव स्व धिति नावदाय असृक् पिबन्ति नृत्यन्ति च गायन्ति च हृष्य माणा यथेह पुरुषादाः

31 ये त्विह वा अनागसो ऽरण्ये ग्रामे वा वैश्रम्भकैः उपसृतान् उप विश्रम्भय्य जिजीविषून् शूल सूत्रादिषू उप प्रोतान् क्रीडन कतया यातयन्ति ते ऽपि च प्रेत्य यम यातनासु शूलादिषु प्रोतात्मानः क्षुत्तृड्भ्याम् चाभिहताः कङ्क वटादिभिः च इतस् ततस् तिग्म तुण्डैः आहन्य माना आत्म शमलम् स्मरन्ति

32 ये त्विह वै भूतानि उद्वेजयन्ति नरा उल्बण स्वभावा यथा दन्द शूकाः ते ऽपि प्रेत्य नरके दन्द शूकाख्ये निपतन्ति यत्र नृप दन्द शूकाः पञ्च मुखाः सप्त मुखा उपसृत्य ग्रसन्ति यथा बिलेशयान्

33 ये त्विह वा अन्धावट कुसूल गुहादिषु भूतानि निरुन्धन्ति तथा मुत्र तेष्वेवोप वेश्य सगरेण वह्निना धूमेन निरुन्धन्ति

34 यस्त्विह वा अतिथीन् अभ्यागतान् वा गृह पतिः असकृद् उपगत मन्युः दिधक्षुर् इव पापेन चक्षुषा निरीक्षते तस्य चापि निरये पाप दृष्टेः अक्षिणी वज्रतुण्डा गृध्राः कङ्क काक वटादयः प्रसह्य उरु बलाद् उत्पाटयन्ति

35 यस्त्विह वा आढ्याभि मतिः अहङ्कृतिः तिर्यक् प्रेक्षणः सर्वतो ऽभिविशङ्की अर्थ व्ययनाश चिन्तया परिशुष्य माण हृदय वदनो निर्वृतिम् अनवगतो ग्रह इवार्थम् अभिरक्षति स चापि प्रेत्य तद् उत्पादनोत् कर्षण सम्रक्षण शमलग्रहः सूची मुखे नरके निपतति यत्र ह वित्त ग्रहम् पाप पुरुषम् धर्मराज पुरुषा वायका इव सर्वतो ऽङ्गेषु सूत्रैः परिवयन्ति

36 एवम् विधा नरका यमालये सन्ति शतश: सहस्रश: तेषु सर्वेषु च सर्व एव अधर्म वर्तिनो ये केचिद् इहोदिता अनुदिताश् च अवनिपते पर्यायेण विशन्ति तथैव धर्मानु वर्तिन इतरत्र इह तु पुनर्भवे त उभय शेषाभ्याम् निविशन्ति

37 निवृत्ति लक्षण मार्ग आदावेव व्याख्यात: एतावान् एवाण्डकोशो यश् चतुर् दशधा पुराणेषु विकल्पित उपगीयते यत् तद् भगवतो नारायणस्य साक्षान् महापुरुषस्य स्थविष्ठम् रूपम् आत्म माया गुणमयम् अनुवर्णितम् आदृत: पठति शृणोति श्रावयति स उपगेयम् भगवत: परमात्मनो ऽग्राह्यम् अपि श्रद्धा भक्ति विशुद्ध बुद्धिर्वेद

38 श्रुत्वा स्थूलम् तथा सूक्ष्मम् रूपम् भगवतो यति:

स्थूले निर्जितम् आत्मानम् शनै: सूक्ष्मम् धिया नयेदिति

39 भू द्वीप वर्ष सरिद् अद्रि नभ: समुद्र

पाताल दिङ् नरक भागण लोक सम्स्था

गीता मया तव नृप् आद्भुतम् ईश्वरस्य

स्थूलम् वपु: सकल जीव निकाय धाम

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

पञ्चम स्कन्दे षड् विम्शो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

श्रीमद् भागवतम्

अथ षष्ट स्कन्द: प्रथमो ऽध्याय:

स्कन्द- 06: अध्याय- 01

01 श्री राजो उवाच

निवृत्ति मार्ग: कथित आदौ भगवता यथा

क्रम योगोप लब्धेन ब्रह्मणा यद सम्सृति:

02 प्रवृत्ति लक्षणश् चैव त्रै गुण्य विषयो मुने

यो ऽसौ अलीन प्रकृते: गुणसर्ग: पुन: पुन:

03 अधर्म लक्षणा नाना नरकाश् चानु वर्णिता:

मन्वन्तरश् च व्याख्यात आद्य: स्वायम्भुवो यत:

04 प्रियव्रतो [उ]त्तानपदो: वम्श: तच् चरितानि च

द्वीप वर्ष समुद्राद्रि नद् युद्यान वनस्पतीन्

05 धरा मण्डल सम्स्थानम् भाग लक्षण मानत:

ज्योतिषाम् विवराणाम् च यथेदम् असृजद् विभु:

06 अधुनेह महा भाग यथैव नरकान् नर:

नानोग्र यातनान् नेयात् तन्मे व्या ख्यातु मर्हसि

07 श्री शुक उवाच

न चेद् इहैवा पचितिम् यथाम्हस: कृतस्य कुर्यान् मन उक्ति पाणिभि:

ध्रुवम् स वै प्रेत्य नरकानु पैति ये कीर्तिता मे भवतस् तिग्म यातना:

08 तस्मात् पुरैवाश् विह पाप निष्कृतौ यतेत मृत्योर् अविपद्यत् आत्मना

दोषस्य दृष्ट्वा गुरु लाघवम् यथा भिषक्चि कित्सेत रुजाम् निदानवित्

09 श्री राजो वाच

दृष्ट श्रुताभ्याम् यत् पापम् जानन् नप्यात्मनो ऽहितम्

करोति भूयो विवश: प्रायश् चित्तम् अथो कथम्

10 क्वचिन् निवर्तते ऽभद्रात् क्वचिच् चरति तत् पुन:

प्रायश्चित्तम् अथो ऽपार्थम् मन्ये कुन्जर शौचवत्

11 श्री शुक उवाच

कर्मणा कर्म निर्हारो न ह्यात् यन्तिक इष्यते

अविद् वद् अधिकारित् वात् प्रायश् चित्तम् विमर्शनम्

12 नाश्नत: पथ्यम् एवान्नम् व्याधयो ऽभि भवन्ति हि

एवम् नियमकृद् राजन् शनै: क्षेमाय कल्पते

13 तपसा ब्रह्मचर्येण शमेन च दमेन च

त्यागेन सत्य शौचाभ्याम् यमेन नियमेन च

14 देह वाग् बुद्धिजम् धीरा धर्मज्ञाः श्रद्धयान् विताः

क्षिपन्त् यघम् महद् अपि वेणु गुल्मम् इवानलः

15 केचित् केवलया भक्त्या वासुदेव परायणाः

अघम् धुन्वन्ति कात्स्न्र्येन नीहारम् इव भास्करः

16 न तथा ह्ययघवान् राजन् पूयेत तप आदिभिः

यथा कृष्ण् आर्पित प्राणः तत् पूरुष निषेवया

17 सध्री चीनो ह्ययम् लोके पन्थाः क्षेमो ऽकुतोभयः

सुशीलाः साधवो यत्र नारायण परायणाः

18 प्रायश् चित्तानि चीर्णानि नारायण पराङ्मुखम्

न निष्पुनन्ति राजेन्द्र सुरा कुम्भम् इवापगाः

19 सकृन् मनः कृष्ण पद् आरविन्दयोः निवेशितम् तद् गुणरागि यैरिह

न ते यमम् पाश भृतश् च तद् भटान् स्वप्ने ऽपि पश्यन्ति हि चीर्ण निष्कृताः

20 अत्र चोदा हरन् तीमम् इतिहासम् पुरातनम्

दूतानाम् विष्णु यमयोः सम्वादस् तम् निबोध मे

21 कान्य कुब्जे द्विजः कश्चिद् दासी पतिर् अजामिलः

नाम्ना नष्ट सदाचारो दास्याः सम्सर्ग दूषितः

22 बन्द्यक्ष कैतवैः चौर्यैः गर्हिताम् वृत्ति मास्थितः

बिभ्रत् कुटुम्बम् अशुचिः यातया मास देहिनः

23 एवम् निवसतस् तस्य लालया नस्य तत् सुतान्

कालो ऽत्यगान् महान् राजन् अष्टाशीत् यायुषः समाः

24 तस्य प्रवयसः पुत्रा दश तेषाम् तु यो ऽवमः

बालो नारायणो नाम्ना पित्रोश्च दयितो भृशम्

25 स बद्ध हृदयः तस्मिन् अर्भके कल भाषिणि

निरीक्ष माणः तल्लीलाम् मुमुदे जरठो भृशम्

26 भुञ्जानः प्रपिबन् खादन् बालक स्नेह यन्त्रितः

भोजयन् पाययन् मूढो न वेदागत मन्तकम्

27 स एवम् वर्तमानो ऽज्ञो मृत्यु काल उपस्थिते

मतिम् चकार तनये बाले नारायण् आह्वये

28 स पाश हस्ताम् स्त्रीन् दृष्ट्वा पुरुषान् भ्रुश दारुणान्

वक्रतुण्डान् ऊर्ध्व रोम्ण आत्मानम् नेतुम् आगतान्

29 दूरे क्रीडन कासक्तम् पुत्रम् नारायण् आह्वयम्

प्लावितेन स्वरेणो [उ]च्चैः आजुहाव आकुलेन्द्रियः

30 निशम्य म्रियमाणस्य ब्रुवतो हरि कीर्तनम्

भर्तुर् नाम महाराज पार्षदाः सहसा पतन्

31 विकर्षतो ऽन्तर् हृदयाद् दासी पतिम् अजामिलम्

यम प्रेष्यान् विष्णु दूता वारयाम् आसुरोजसा

32 ऊचुः निषेधितास् ताम्स्ते वैवस्वत पुरः सराः

के यूयम् प्रति षेद्धारो धर्म राजस्य शासनम्

33 कस्य वा कुत आयाताः कस्माद् अस्य निषेधथ

किम् देवा उपदेवा या यूयम् किम् सिद्ध सत्तमाः

34 सर्वे पद्म पला शाक्षाः पीत कौशेय वाससः

किरीटिनः कुण्डलिनो लसत् पुष्कर मालिनः

35 सर्वे च नूत्न वयसः सर्वे चारु चतुर् भुजाः

धनुर् निषङ्गासि गदा शङ्ख चक्राम्बुज श्रियः

36 दिशो वितिमिर् आलोकाः कुर्वन्तः स्वेन रोचिषा

किमर्थम् धर्म पालस्य किङ्करान् नो निषेधथ

37 श्री शुक उवाच

इत् युक्ते यम दूतैस्तैः वासुदेवोक्त कारिणः

तान् प्रत्यूचुः प्रहस्येदम् मेघ निर्ह्लादया गिरा

38 श्री विष्णु दूता ऊचुः

यूयम् वै धर्म राजस्य यदि निर्देश कारिणः

ब्रूत धर्मस्य नस् तत्त्वम् यच्च धर्मस्य लक्षणम्

39 कथम् स्विद् ध्रियते दण्डः किम् वास्य स्थानम् ईप्सितम्

दण्ड्याः किम् कारिणः सर्वे आहो स्वित् कतिचिन् नृणाम्

40 यम दूता ऊचुः

वेद प्रणिहितो धर्मो ह्यधर्मस् तद् विपर्ययः

वेदो नारायणः साक्षात् स्वयम्भूर् इति शुश्रुम

41 येन स्वधाम् न्यमी भावा रजः सत्त्व तमो मयाः

गुण नाम क्रिया रूपैः विभाव्यन्ते यथा तथम्

42 सूर्यो ऽग्निः खम् मरुद्गावः सोमः सन्ध्याहनी दिशः

कम् कुः कालो धर्म इति ह्येते दैह्यस्य साक्षिणः

43 एतैर् अधर्मो विज्ञातः स्थानम् दण्डस्य युज्यते

सर्वे कर्मानु रोधेन दण्ड मर्हन्ति कारिणः

44 सम्भवन्ति हि भद्राणि विपरीतानि चानघाः

कारिणाम् गुण सङ्गो ऽस्ति देहवान् न ह्य कर्मकृत्

45 येन यावान् यथा धर्मो धर्मो वेह समीहितः

स एव तत् फलम् भुङ्क्ते तथा तावद् अमुत्र वै

46 यथेह देव प्रवराः त्रै विध्यम् उपलभ्यते

भूतेषु गुण वैचित्र्यात् तथान् यत्रानु मीयते

47 वर्तमानो ऽन्ययोः कालो गुणाभिज्ञाप को यथा

एवम् जन्मान् ययोर् एतद् धर्मा धर्म निदर्शनम्

48 मनसैव पुरे देवः पूर्व रूपम् विपश्यति

अनु मीमाम्स ते ऽपूर्वम् मनसा भगवान् अजः

49 यथाज्ञः तमसा युक्त उपास्ते व्यक्तमेव हि

न वेद पूर्वम् अपरम् नष्ट जन्म स्मृतिस् तथा

50 पञ्चभिः कुरुते स्वार्थान् पञ्च वेदाथ पञ्चभिः

एकस्तु षोडशेन त्रीन् स्वयम् सप्त दशो ऽश्नुते

51 तद् एतत् षोडश कलम् लिङ्गम् शक्ति त्रयम् महत्

धत्ते ऽनु सम्सृतिम् पुम्सि हर्ष शोक भयार्तिदाम्

52 देहयज्ञो ऽजित षड्वर्गो नेच्छन् कर्माणि कार्यते

कोशकार इवात्मानम् कर्मणा आच्छाद्य मुह्यति

53 न हि कश्चित् क्षणम् अपि जातु तिष्ठत् य कर्मकृत्

कार्यते ह्यवशः कर्म गुणैः स्वाभाविकैर् बलात्

54 लब्ध्वा निमित्तम् अव्यक्तम् व्यक्ता व्यक्तम् भवत्युत

यथा योनि यथा बीजम् स्वभावेन बलीयसा

55 एष प्रकृति सङ्गेन पुरुषस्य विपर्ययः

आसीत् स एव न चिराद् ईश सङ्गाद् विलीयते

56 अयम् हि श्रुत सम्पन्नः शील वृत्त गुणालयः

धृत व्रतो मृदुर् दान्तः सत्यवाङ् मन्त्रविच् छुचिः

57 गुर्व् अग्नि अतिथि वृद्धानाम् शुश्रूषुः निरहङ्कृतः

सर्व भूत सुहृत् साधुः मितवाग् अनसूयकः

58 एकदासौ वनम् यातः पितृ सन्देश कृद् द्विजः

आदाय तत आवृत्तः फल पुष्प समित् कुशान्

59 ददर्श कामिनम् कञ्चित् छूद्रम् सह भुजिष्यया

पीत्वा च मधु मैरेयम् मदा घूर्णित नेत्रया

60 मत्तया विश्लथन् नीव्या व्यपेतम् निरपत्रपम्

क्रीडन्तम् अनुगायन्तम् हसन्तम् अनयान्तिके

61 दृष्ट्वा ताम् काम लिप्तेन बाहुना परि रम्भिताम्

जगाम हृच्छय वशम् सहसैव विमोहितः

62 स्तम्भयन् आत्मन् आत्मानम् यावत् सत्त्वम् यथा श्रुतम्

न शशाक समा धातुम् मनो मदन वेपितम्

63 तन् निमित्त स्मरव्याज ग्रह ग्रस्तो विचेतनः

ताम् एव मनसा ध्यायन् स्वधर्माद् विरराम ह

64 तामेव तोषया मास पित्र्येण् आर्थेन यावता

ग्राम्यैः मनोरमैः कामैः प्रसीदेत यथा तथा

65 विप्राम् स्व भार्याम् अप्रौढाम् कुले महति लम्भिताम्

विससर्ज अचिरात् पापः स्वैरिण्या पाङ्ग विद्धधीः

66 यतस् ततश् चोपनिन्ये न्यायतो ऽन्यायतो धनम्

बभा रास्याः कुटुम्बिन्याः कुटुम्बम् मन्द धीरयम्

67 यदसौ शास्त्रम् उल्लङ्घ्य स्वैरचार् यार्य गर्हितः

अवर्तत चिरम् कालम् अघायुः अशुचिर् मलात्

68 तत एनम् दण्ड पाणेः सकाशम् कृत किल्बिषम्

नेष्यामो ऽकृत निर्वेशम् यत्र दण्डेन शुद्ध्यति

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

षष्ट स्कन्दे प्रथमो ऽध्याय ː||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ षष्ट स्कन्दः द्वितीयो ऽध्याय ː

स्कन्द- 06: अध्याय- 02

01 श्री शुक उवाच

एवम् ते भगवद् दूता यम दूताभि भाषितम्

उपधार्याथ तान् राजन् प्रत्याहुः नयकोविदाः

02 श्री विष्णु दूता ऊचुः

अहो कष्टम् धर्म दृशाम् अधर्मः स्पृशते सभाम्

यत्रा दण्ड्येषु अपापेषु दण्डो यैर् ध्रियते वृथा

03 प्रजानाम् पितरो ये च शास्तारः साधवः समाः

यदि स्यात् तेषु वैषम्यम् कम् यान्ति शरणम् प्रजाः

04 यद् यदाचरति श्रेयान् इतरः तत् तदीहते

स यत् प्रमाणम् कुरुते लोकः तद् अनुवर्तते

05 यस्याङ्के शिर आधाय लोकः स्वपिति निर्वृतः

स्वयम् धर्मम् अधर्मम् वा न हि वेद यथा पशुः

06 स कथम् न्यर्पित् आत्मानम् कृत मैत्रम् अचेतनम्

विस्रम्भणीयो भूतानाम् सघृणो दोग्धु मर्हति

07 अयम् हि कृत निर्वेशो जन्मकोट् यम्हसाम् अपि

यद् व्याजहार विवशो नाम स्वस्त्ययनम् हरेः

08 एतेनैव ह्यघोनो ऽस्य कृतम् स्याद् अघनिष् कृतम्

यदा नारायणा येति जगाद चतुर् अक्षरम्

09 स्तेनः सुरापो मित्रध्रुग् ब्रह्महा गुरु तल्पगः

स्त्री राज पितृ गोहन्ता ये च पातकिनो ऽपरे

10 सर्वेषाम् अपि अघवताम् इदमेव सुनिष् कृतम्

नाम व्याहरणम् विष्णोः यतस् तद् विषया मतिः

11 न निष्कृतैर् उदितैर् ब्रह्म वादिभिः तथा विशुद् ह्यत् यघवान् व्रतादिभिः

यथा हरेः नाम पदैर् उदाहृतैः तद् उत्तम श्लोक गुणोप लम्भकम्

12 नै कान्तिकम् तद्धि कृते ऽपि निष्कृते मनः पुनर्धावति चेद् असत्पथे

तत् कर्म निर्हारम् अभीप्सताम् हरेः गुणानु वादः खलु सत्त्व भावनः

13 अथैनम् मापनयत कृता शेषाघ निष्कृतम्

यदसौ भगवन् नाम म्रियमाणः समग्रहीत्

14 साङ्केत्यम् पारिहास्यम् वा स्तोभम् हेलनम् एव वा

वैकुण्ठ नाम ग्रहणम् अशेषाघ हरम् विदुः

15 पतितः स्खलितो भग्नः सन्दष्टः तप्त आहतः

हरिर् इति अवशेनाह पुमान् नार्हति यातनाः

16 गुरूणाम् च लघूनाम् च गुरूणि च लघूनि च

प्रायश् चित्तानि पापानाम् ज्ञात् वोक्तानि महर्षिभि:

17 तैस् तान् यघानि पूयन्ते तपो दान जपादिभि:

नाधर्मजम् तद् हृदयम् तद् अपीशाङ्घ्रि सेवया

18 अज्ञानाद् अथवा ज्ञानाद् उत्तम श्लोक नाम यत्

सङ्कीर्तितम् अघम् पुम्सो दहेद् एधो यथानल:

19 यथा गदम् वीर्य तमम् उपयुक्तम् यदृच्छया

अजानतो ऽप् यात्म गुणम् कुर्यान् मन्त्रो ऽप्युदा हृत:

20 श्री शुक उवाच

त एवम् सु विनिर्णीय धर्मम् भागवतम् नृप

तम् याम्य पाशान् निर्मुच्य विप्रम् मृत्योर् अमूमुचन्

21 इति प्रत् युदिता याम्या दूता यात्वा यमान्तिके

यमराज्ञे यथा सर्वम् आचचक्षुर् अरिन्दम

22 द्विज: पाशाद् विनिर्मुक्तो गतभी: प्रकृतिम् गत:

ववन्दे शिरसा विष्णो: किङ्करान् दर्शन् ओत्सव:

23 तम् विवक्षुम् अभिप्रेत्य महा पुरुष किङ्करा:

सहसा पश्यतस् तस्य तत् रान्तर् दधिरे ऽनघ

24 अजामिलो ऽप्यथा कर्ण्य दूतानाम् यम कृष्णयो:

धर्मम् भागवतम् शुद्धम् त्रै विद्यम् च गुणाश्रयम्

25 भक्तिमान् भगवत् याशु माहात्म्य श्रवणाद् हरे:

अनुतापो महा नासीत् स्मरतो ऽशुभम् आत्मन:

26 अहो मे परमम् कष्टम् अभूद् अविजित् आत्मन:

येन विप्लावितम् ब्रह्म वृषल्याम् जायत् आत्मना

27 धिङ्माम् विगर्हितम् सद्भि: दुष्कृतम् कुल कज्जलम्

हित्वा बालाम् सतीम् यो ऽहम् सुरापाम् असतीम् अगाम्

28 वृद्धाव नाथौ पितरौ नान्य बन्धू तपस्विनौ

अहो मयाधुना त्यक्तौ अक्रुतज्ञेन नीचवत्

29 सो ऽहम् व्यक्तम् पतिष्यामि नरके भृश दारुणे

धर्मघ्ना: कामिनो यत्र विन्दन्ति यम यातना:

30 किमिदम् स्वप्न आहो स्वित् साक्षाद् दृष्टम् इहाद्भुतम्

क्व याता अद्य ते ये माम् व्यकर्षन् पाश पाणय:

31 अथ ते क्व गता: सिद्धा: चत्वार: चारु दर्शना:

व्यामोचयन् नीयमानम् बद्ध्वा पाशैर् अधो भुव:

32 अथापि मे दुर् भगस्य विबुधोत्तम दर्शने

भवितव्यम् मङ्गलेन येनात्मा मे प्रसीदति

33 अन्यथा म्रिय माणस्य नाशुचेर् वृषली पते:

वैकुण्ठ नाम ग्रहणम् जिहवा वक्तुम् इहार्हति

34 क्व चाहम् कितव: पापो ब्रह्मघ्नो निरपत्रप:

क्व च नारायणेत् येतद् भगवन् नाम मङ्गलम्

35 सो ऽहम् तथा यतिष्यामि यत चित् तेन्द्रिया निल:

यथा न भूय आत्मानम् अन्धे तमसि मज्जये

36 विमुच्य तमिमम् बन्धम् अविद्या काम कर्मजम्

सर्व भूत सुहृच् छान्तो मैत्र: करुण आत्मवान्

37 मोचये ग्रस्तम् आत्मानम् योषिन् मय्यात्म मायया

विक्रीडितो ययै वाहम् क्रीडा मृग इवाधम:

38 ममाहम् इति देहादौ हित्वा मिथ्यार्थ धीर्मतिम्

धास्ये मनो भगवति शुद्धम् तत् कीर्तनादिभि:

39 श्री शुक उवाच

इति जातसु निर्वेद: क्षण सङ्गेन साधुषु

गङ्गा द्वारम् उपेयाय मुक्त सर्वानु बन्धन:

40 स तस्मिन् देव सदन आसीनो योगम् आश्रित:

प्रत्या हृतेन्द्रिय ग्रामो युयोज मन आत्मनि

41 ततो गुणेभ्य आत्मानम् वियुज्यात्म समाधिना

युयुजे भगवद् धाम्नि ब्रह्मणि अनुभव् आत्मनि

42 यर्हि उपारतधीस् तस्मिन् अद्राक्षीत् पुरुषान् पुरः

उपलभ्योप लब्धान् प्राग् ववन्दे शिरसा द्विजः

43 हित्वा कळेवरम् तीर्थे गङ्गायाम् दर्श नादनु

सद्यः स्वरूपम् जगृहे भगवत् पार्श्व वर्तिनाम्

44 साकम् विहायसा विप्रो महा पुरुष किङ्करैः

हैमम् विमानम् आरुह्य ययौ यत्र श्रियः पतिः

45 एवम् स विप्लावित सर्व धर्मा दास्याः पतिः पतितो गर्ह्य कर्मणा

निपात्यमानो निरये हत व्रतः सद्यो विमुक्तो भगवन् नाम गृह्णन्

46 नातः परम् कर्म निबन्ध कृन्तनम् मुमुक्षताम् तीर्थ पदानु कीर्तनात्

न यत् पुनः कर्मसु सज्जते मनो रजस् तमोभ्याम् कलिलम् ततो ऽन्यथा

47 य एतम् परमम् गुह्यम् इतिहासम् अघापहम्

शृणुयात् छ्रद्धया युक्तो यश्च भक्त्यानु कीर्तयेत्

48 न वै स नरकम् याति नेक्षितो यम किङ्करैः

यद् यप् यमङ्गलो मर्त्यो विष्णुलोके महीयते

49 म्रियमाणो हरेर् नाम गृणन् पुत्रोप चारितम्

अजामिलो ऽप्यगाद् धाम किम् पुनः श्रद्धया गृणन्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

षष्ट स्कन्दे द्वितीयो ऽध्याय ः॥

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ षष्ट स्कन्दः त्रुतीयो ऽध्याय :

स्कन्द- 06: अध्याय- 03

01 श्री राजो वाच

निशम्य देवः स्व भटोप वर्णितम् प्रत्याह किम् तान् प्रति धर्मराजः

एवम् हताज्ञो विहतान् मुरारेः नैदेशिकैर् यस्य वशे जनो ऽयम्

02 यमस्य देवस्य न दण्ड भङ्गः कुतश् चनर्षे श्रुत पूर्व आसीत्

एतन् मुने वृश्चति लोक सम्शयम् न हि त्वद् अन्य इति मे विनिश् चितम्

03 श्री शुक उवाच

भगवत् पुरुषै राजन् याम्याः प्रति हतोद् यमाः

पतिम् विज्ञापया मासुः यमम् सम्यमनी पतिम्

04 यम दूता ऊचुः

कति सन्तीह शास्तारो जीव लोकस्य वै प्रभो

त्रै विध्यम् कुर्वतः कर्म फलाभि व्यक्ति हेतवः

05 यदिस्युर् बहवो लोके शास्तारो दण्ड धारिणः

कस्य स्याताम् न वा कस्य मृत्युश् चामृत मेव वा

06 किन्तु शास्तृ बहुत्वे स्याद् बहूनाम् इह कर्मिणाम्

शास्तृत्वम् उपचारो हि यथा मण्डल वर्तिनाम्

07 अतस्त्वम् एको भूतानाम् सेश्वराणाम् अधीश्वरः

शास्ता दण्डधरो न्रृणाम् शुभा शुभ विवेचनः

08 तस्य ते विहतो दण्डो न लोके वर्तते ऽधुना

चतुर्भिः अद्भुतैः सिद्धैः आज्ञा ते विप्र लम्भिता

09 नीयमानम् तवा देशाद् अस्माभिः यातना गृहान्

व्यामोचयन् पातकिनम् छित्त्वा पाशान् प्रसह्य ते

10 ताम्स्ते वेदितु मिच्छामो यदि नो मन्यसे क्षमम्

नारायणेत् यभिहिते माभैर् इत्याय युर्द्रुतम्

11 श्री शुक उवाच

इति देवः स आपृष्टः प्रजा सम्यमनो यमः

प्रीतः स्व दूतान् प्रत्याह स्मरन् पादाम्बुजम् हरेः

12 यम उवाच

परो मदन्यो जगतस् तस्थु षश्च ओतम् प्रोतम् पटवद् यत्र विश्वम्

यदम् शतो ऽस्य स्थिति जन्म नाशा नस्योतवद् यस्य वशे च लोकः

13 यो नामभिर् वाचि जनम् निजायाम् बध्नाति तन्त्र्याम् इव दाम भिर्गाः

यस्मै बलिम् त इमे नाम कर्म निबन्ध बद्धाः चकिता वहन्ति

14 अहम् महेन्द्रो निरृतिः प्रचेताः सोमो ऽग्निरीशः पवनो ऽर्को विरिञ्चिः

आदित्य विश्वे वसवो ऽथ साध्या मरुद्गणा रुद्र गणाः स सिद्धाः

15 अन्ये च ये विश्वसृजो ऽमरेशा भृग्वादयो ऽस्पृष्ट रजस् तमस्काः

यस्येहितम् न विदुः स्पृष्ट मायाः सत्त्व प्रधाना अपि किम् ततो ऽन्ये

16 यम् वै न गोभिः मनसा सुभिर्वा हृदा गिरा वासु भृतो विचक्षते

आत्मानम् अन्तर्हृदि सन्तम् आत्मनाम् चक्षुर् यथैवा कृत यस् ततः परम्

17 तस् यात्म तन्त्रस्य हरेर् अधीशितुः परस्य मायाधि पतेर् महात्मनः

प्रायेण दूता इह वै मनो हराः चरन्ति तद् रूप गुण स्वभावाः

18 भूतानि विष्णोः सुर पूजितानि दुर् दर्श लिङ्गानि महा अद्भुतानि

रक्षन्ति तद् भक्ति मतः परेभ्यो मत् तश्च मर्त्यान् अथ सर्वतश्च

19 धर्मम् तु साक्षाद् भगवत् प्रणीतम् न वै विदुः ऋषयो नापि देवाः

न सिद्ध मुख्या असुरा मनुष्याः कुतश्च विद्याधर चारणा दयः

20 स्वयम्भूर् नारदः शम्भुः कुमारः कपिलो मनुः

प्रह्लादो जनको भीष्मो बलिर् वैयासकिर् वयम्

21 द्वा दशैते विजानीमो धर्मम् भागवतम् भटाः

गुह्यम् विशुद्धम् दुर्बोधम् यम् ज्ञात्वा अमृत मश्नुते

22 एतावान् एव लोके ऽस्मिन् पुम्साम् धर्मः परः स्मृतः

भक्ति योगो भगवति तन् नाम ग्रहणादिभिः

23 नामो [उ]च्चारण माहात्म्यम् हरेः पश्यत पुत्रकाः

अजामिलो ऽपि येनैव मृत्यु पाशाद् अमुच्यत

24 एताव तालम् अघ निर्हरणाय पुम्साम्

सङ्कीर्तनम् भगवतो गुण कर्मनाम् नाम्

विक्रुश्य पुत्र मघवान् यद् अजामिलो ऽपि

नारायणेति म्रियमाण इयाय मुक्तिम्

25 प्रायेण वेद तदिदम् न महाजनो ऽयम्

देव्या विमोहित मतिर् बत माययालम्

त्रय्याम् जडीकृत मतिर् मधु पुष्पितायाम्

वैतानिके महति कर्मणि युज्यमानः

26 एवम् विमृश्य सुधियो भगवत् यनन्ते

सर्वात्मना विदधते खलु भाव योगम्

ते मे न दण्ड मर्हन्त् यथ यद् यमीषाम्

स्यात् पातकम् तद् अपि हन्त्युर् उगायवादः

27 ते देव सिद्ध परिगीत पवित्र गाथा

ये साधवः सम दृशो भगवत् प्रपन्नाः

तान् नोपसीद् अत हरेर् गदयाभि गुप्तान्

नैषाम् वयम् न च वयः प्रभवाम दण्डे

28 तान् आनयध्वम् असतो विमुखान् मुकुन्द

पाद् आरविन्द मकरन्द रसाद् अजस्रम्

निष् किञ्चनैः परम हम्स कुलैर् असङ्गैः

जुष्टाद् गृहे निरय वर्त्मनि बद्ध तृष्णान्

29 जिह्वा न वक्ति भगवद् गुण नाम धेयम्

चेतश्च न स्मरति तच् चरण् आरविन्दम्

कृष्णाय नो नमति यच्छिर एकदापि

तान् आनयध्वम् असतो ऽकृत विष्णु कृत्यान्

30 तत् क्षम्यताम् स भगवान् पुरुषः पुराणो

नारायणः स्व पुरुषैः यद सत्कृतम् नः

स्वानाम् अहो न विदुषाम् रचित् आञ्जलीनाम्

क्षान्तिर् गरीयसि नमः पुरुषाय भूम्ने

31 तस्मात् सङ्कीर्तनम् विष्णोः जगन् मङ्गलम् अम्हसाम्

महताम् अपि कौरव्य विद्ध्यै कान्तिक निष्कृतम्

32 शृण्वताम् गृणताम् वीर्याणि उद्दामानि हरेर् मुहुः

यथा सुजातया भक्त्या शुद्ध्येन् आत्मा व्रतादिभिः

33 कृष्णाङ्घ्रि पद्म मधुलिण्न पुनर् विसृष्ट

माया गुणेषु रमते वृजिनाव हेषु

अन्यस्तु काम हत आत्म रजः प्रमार्ष्टुम्

ईहेत कर्म यत एव रजः पुनः स्यात्

34 इत्थम् स्व भर्तृ गदितम् भगवन् महित्वम्

सम्स्मृत्य विस्मितधियो यम किङ्करास्ते

नैवाच्युत् आश्रय जनम् प्रति शङ्क माना

द्रष्टुम् च बिभ्यति ततः प्रभृति स्म राजन्

35 इतिहासम् इमम् गुह्यम् भगवान् कुम्भ सम्भवः

कथया मास मलय आसीनो हरिम् अर्चयन्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

षष्ट स्कन्दे त्रुतीयो ऽध्याय ःll

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ षष्ट स्कन्दः चतुर्थ्थो ऽध्याय ः

*01* श्री राजो वाच

देव् आसुर नृणाम् सर्गो नागानाम् मृग पक्षिणाम्

सामासिकस् त्वया प्रोक्तो यस्तु स्वायम्भुवे ऽन्तरे

*02* तस्यैव व्यासम् इच्छामि ज्ञातुम् ते भगवन् यथा

अनुसर्गम् यया शक्त्या ससर्ज भगवान् पर:

*03* श्री सूत उवाच

इति सम्प्रश्न माकर्ण्य राजर्षे: बादरायणि:

प्रतिनन्द्य महा योगी जगाद मुनि सत्तमा:

*04* श्री शुक उवाच

यदा प्रचेतस: पुत्रा दश प्राचीन बर्हिष:

अन्त: समुद्राद् उन्मग्ना ददृशुर् गाम् द्रुमैर् वृताम्

*05* द्रुमेभ्य: क्रुध्य मानास्ते तपो दीपित मन्यव:

मुखतो वायु मग्निम् च ससृजु: तद् दिधक्षया

*06* ताभ्याम् निर्दह्य मानाम् स्तान् उपलभ्य कुरूद्वह

राजोवाच महान् सोमो मन्युम् प्रशमयन् इव

*07* मा द्रुमेभ्यो महा भागा दीनेभ्यो द्रोग्धुम् अर्हथ

विवर्धयिषवो यूयम् प्रजानाम् पतय: स्मृता:

*08* अहो प्रजापति पति: भगवान् हरिर् अव्यय:

वनस्पतीन् ओषधीश् च ससर्जोर्ज मिषम् विभु:

*09* अन्नम् चराणाम् अचरा ह्यपद: पाद चारिणाम्

अहस्ता हस्त युक्तानाम् द्वि पदाम् च चतुष् पद:

*10* यूयम् च पित्रान् वादिष्टा देव देवेन चानघा:

प्रजा सर्गाय हि कथम् वृक्षान् निर्दग्धुम् अर्हथ

*11* आतिष्ठत सताम् मार्गम् कोपम् यच्छत दीपितम्

पित्रा पितामहेन् आपि जुष्टम् व: प्रपितामहै:

12 तोकानाम् पितरौ बन्धू दृशः पक्ष्म स्त्रियाः पतिः

पतिः प्रजानाम् भिक्षूणाम् गृहि अज्ञानाम् बुधः सुहृत्

13 अन्तर् देहेषु भूतानाम् आत्मास्ते हरिर् ईश्वरः

सर्वम् तद् धिष्ण्यम् ईक्षध्वम् एवम् वस्तोषितो ह्यसौ

14 यः समुत् पतितम् देह आकाशान् मन्युम् उल्बणम्

आत्म जिज्ञासया यच् छेत् स गुणान् अतिवर्तते

15 अलम् दग्धैर् द्रुमैर् दीनैः खिलानाम् शिवमस्तु वः

वार्क्षी ह्येषा वरा कन्या पत्नी त्वे प्रति गृह्यताम्

16 इत्या मन्त्र्य वरारोहाम् कन्याम् आप्सरसीम् नृप

सोमो राजा ययौ दत्त्वा ते धर्मे णोपयेमिरे

17 तेभ्यस् तस्याम् सम भवद् दक्षः प्राचेतसः किल

यस्य प्रजा विसर्गेण लोका आपूरितास् त्रयः

18 यथा ससर्ज भूतानि दक्षो दुहितृ वत्सलः

रेतसा मनसा चैव तन् ममा वहितः शृणु

19 मनसैव असृजत् पूर्वम् प्रजापतिर् इमाः प्रजाः

देव् आसुर मनुष्यादीन् नभः स्थल जलौकसः

20 तमबृम् हितम् आलोक्य प्रजा सर्गम् प्रजापतिः

विन्ध्य पादान् उपव्रज्य सो ऽचरद् दुष्करम् तपः

21 तत् राघ मर्षणम् नाम तीर्थम् पापहरम् परम्

उपस् पृश्यानु सवनम् तपसा तोष यद् हरिम्

22 अस्तौषीद् हम्स गुह्येन भगवन्तम् अधोक्षजम्

तुभ्यम् तद् अभिधास्यामि कस्या तुष्यद् यथो हरिः

23 श्री प्रजापतिर् उवाच

नमः परायाव् इतथानु भूतये गुण त्रया भास निमित्त बन्धवे

अदृष्ट धाम्ने गुण तत्त्व बुद्धिभिः निवृत्त मानाय दधे स्वयम्भुवे

24 न यस्य सख्यम् पुरुषो ऽवैति सख्युः सखा वसन् सम्वसतः पुरे ऽस्मिन्

गुणो यथा गुणिनो व्यक्त दृष्टेः तस्मै महेशाय नमस् करोमि

25 देहो ऽसवो ऽक्षा मनवो भूत मात्रा नात्मान् अमन्यम् च विदुः परम् यत्

सर्वम् पुमान् वेद गुणाम्श्च तज्ज्ञो न वेद सर्वज्ञम् अनन्तमीडे

26 यदोपरामो मनसो नाम रूप रूपस्य दृष्ट स्मृति सम् प्रमोषात्

य ईयते केवलया स्व सम्स्थया हम्साय तस्मै शुचि सद्मने नमः

27 मनीषिणो ऽन्तर् हृदि सन्निवेशितम् स्व शक्तिभिः नव भिश्च त्रि वृद्भिः

वह्निम् यथा दारुणि पाञ्च दश्यम् मनीषया निष्कर्षन्ति गूढम्

28 स वै ममाशेष विशेष माया निषेध निर्वाण सुख् आनुभूतिः

स सर्व नामा स च विश्वरूपः प्रसीदताम् अनिरुक्त् आत्म शक्तिः

29 यद् यन् निरुक्तम् वचसा निरूपितम् धिया क्षभिर्वा मनसा वोत यस्य

मा भूत् स्वरूपम् गुणरूपम् हि तत् तत् स वै गुणा पाय विसर्ग लक्षणः

30 यस्मिन् यतो येनच यस्य यस्मै यद्यो यथा कुरुते कार्यते च

परा वरेषाम् परमम् प्राक् प्रसिद्धम् तद् ब्रह्म तद् हेतुर् अनन्य देकम्

31 यच् छक्तयो वदताम् वादिनाम् वै विवाद सम्वाद भुवो भवन्ति

कुर्वन्ति चैषाम् मुहुर् आत्म मोहम् तस्मै नमो ऽनन्त गुणाय भूम्ने

32 अस्तीति नास्तीति च वस्तु निष्ठयोः एकस् थयोः भिन्न विरुद्ध धर्मयोः

अवेक्षितम् किञ्चन योग साङ्ख्ययोः समम् परम् ह्यनु कूलम् बृहत् तत्

33 यो ऽनुग्र हार्थम् भजताम् पाद मूलम् अनाम रूपो भगवान् अनन्तः

नामानि रूपाणि च जन्म कर्मभिः भेजे स मह्यम् परमः प्रसीदतु

34 यः प्राकृतैः ज्ञान पथैर् जनानाम् यथाशयम् देह गतो विभाति

यथा निलः पार्थिवम् आश्रितो गुणम् स ईश्वरो मे कुरुताम् मनोरथम्

35 श्री शुक उवाच

इति स्तुतः सम्स्तुवतः स तस्मिन् अघमर्षणे

आविरासीत् कुरु श्रेष्ठ भगवान् भक्त वत्सलः

36 कृत पादः सुपर्णाम्से प्रलम्बाष्ट महाभुजः

चक्र शङ्खासि चर्मेषु धनुः पाश गदाधरः

37 पीत वासा घन श्यामः प्रसन्न वदनेक्षणः

वन माला निवीताङ्गो लसच् छ्रीवत्स कौस्तुभः

38 महा किरीट कटकः स्फुरन् मकर कुण्डलः

काञ्च् यङ्गुलीय वलय नूपुराङ् गद भूषितः

39 त्रै लोक्य मोहनम् रूपम् बिभ्रत् त्रि भुवनेश्वरः

वृतो नारद नन्दाद्यैः पार्षदैः सुरयू थपैः

40 स्तूयमानो ऽनु गायद्भिः सिद्ध गन्धर्व चारणैः

रूपम् तन् महद् आश्चर्यम् विचक्ष्या गत साध्वसः

41 ननाम दण्डवद् भूमौ प्रहृष्ट् आत्मा प्रजापतिः

न किञ्चनो दीर यितुम् अशकत् तीव्रया मुदा

आपूरित मनो द्वारैः ह्रदिन्य इव निर्झरैः

42 तम् तथाव् अनतम् भक्तम् प्रजा कामम् प्रजापतिम्

चित्तज्ञः सर्व भूतानाम् इदमाह जनार्दनः

43 श्री भगवान् उवाच

प्राचेतस महा भाग सम्सिद्धस् तपसा भवान्

यच् छ्रद्धया मत् परया मयि भावम् परम् गतः

44 प्रीतो ऽहम् ते प्रजा नाथ यत्ते ऽस्योद् बृम्हणम् तपः

ममैष कामो भूतानाम् यद् भूयासुर् विभूतयः

45 ब्रह्मा भवो भवन् तश्च मनवो विबुधेश्वराः

विभूतयो मम ह्येता भूतानाम् भूति हेतवः

46 तपो मे हृदयम् ब्रह्मन् तनुर् विद्या क्रिया कृतिः

अङ्गानि क्रतवो जाता धर्म आत्मा सवः सुराः

47 अहम् एवासम् एवाग्रे नान्यत् किञ्चान्तरम् बहिः

सम्ज्ञान मात्रम् अव्यक्तम् प्रसुप्तम् इव विश्वतः

48 मय् यनन्त गुणे ऽनन्ते गुणतो गुण विग्रहः

यद् आसीत् तत एवाद्यः स्वयम्भूः सम भूदजः

49 स वै यदा महादेवो मम वीर्योप बृम्हित:

मेने खिलम् इवात्मानम् उद्यत: स्वर्ग कर्मणि

50 अथ मे ऽभिहितो देव: तपो ऽतप्यत दारुणम्

नव विश्वसृजो युष्मान् येनादौ असृजद्विभु:

51 एषा पञ्च जनस्याङ्ग दुहिता वै प्रजापते:

असिक्नी नाम पत्नीत्वे प्रजेश प्रति गृह्यताम्

52 मिथुन व्यवाय धर्मस्त्वम् प्रजा सर्गम् इमम् पुन:

मिथुन व्यवाय धर्मिण्याम् भूरिशो भावयिष्यसि

53 त्वत्तो ऽधस् तात् प्रजा: सर्वा मिथुनी भूय मायया

मदीयया भविष्यन्ति हरिष्यन्ति च मे बलिम्

54 श्री शुक उवाच

इत् युक्त्वा मिषतस् तस्य भगवान् विश्व भावन:

स्वप्नोप लब्धार्थ इव तत्रैवान् तर्दधे हरि:

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

षष्ट स्कन्दे चतुर्थ्थो ऽध्याय :॥

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ षष्ट स्कन्द: पञ्चमो ऽध्याय :

स्कन्द- 06: अध्याय- 05

01 श्री शुक उवाच

तस्याम् स पाञ्च जन्याम् वै विष्णु मायोप बृम्हित:

हर्यश्व सम्ज्ञान युतम् पुत्रान् अजन यद् विभु:

02 अपृथग् धर्म शीलास्ते सर्वे दाक्षायणा नृप

पित्रा प्रोक्ताः प्रजासर्गे प्रतीचीम् प्रय युर्दिशम्

03 तत्र नारायण सरः तीर्थम् सिन्धु समुद्रयोः

सङ्गमो यत्र सुमहन् मुनि सिद्ध निषेवितम्

04 तद् उप स्पर्शना देव विनिर् धूत मलाशयाः

धर्मे पारमहम् स्ये च प्रोत्पन्न मतयो ऽप्युत

05 तेपिरे तप एवोग्रम् पित्रा देशे न यन्त्रिताः

प्रजा विवृद्ध ये यत्तान् देवर्षि स्तान् ददर्श ह

06 उवाच चाथ हर्यश्वाः कथम् स्रक्ष्यथ वै प्रजाः

अदृष्ट् वान्तम् भुवो यूयम् बालिशा बत पालकाः

07 तथैक पुरुषम् राष्ट्रम् बिलम् चादृष्ट निर्गमम्

बहु रूपाम् स्त्रियम् चापि पुमाम् सम्पुम्श्च लीपतिम्

08 नदीम् उभयतो वाहाम् पञ्च पञ्च् आद्भुतम् गृहम्

क्वचिद् हम्सम् चित्र कथम् क्षौरपव्यम् स्वयम् भ्रमिम्

09 कथम् स्व पितुरा देशम् अविद्वाम्सो विपश्चितः

अनुरूपम् अविज्ञाय अहो सर्गम् करिष्यथ

10 श्री शुक उवाच

तन् निशम्याथ हर्यश्वा औत् पत्तिक मनीषया

वाचः कूटम् तु देवर्षेः स्वयम् विममृशुर् धिया

11 भूः क्षेत्रम् जीव सम्ज्ञम् यद् अनादि निज बन्धनम्

अदृष्ट्वा तस्य निर्वाणम् किमसत् कर्मभिर् भवेत्

12 एक एवेश्वरस् तुर्यो भगवान् स्वाश्रयः परः

तम् अदृष्ट्वा भवम् पुम्सः किमसत् कर्मभिर् भवेत्

13 पुमान् नैवैति यद् गत्वा बिल स्वर्गम् गतो यथा

प्रत्यग् धामाविद इह किम् असत् कर्मभिर् भवेत्

14 नानारूप् आत्मनो बुद्धिः स्वैरिणीव गुणान् विता

तन् निष्ठाम् अगतस् येह किम् असत् कर्मभिर् भवेत्

15 तत् सङ्ग भ्रम्शित् ऐश्वर्यम् सम्सरन्तम् कुभार्य वत्

तद् गतीर् अबुधस्येह किम् असत् कर्मभिर् भवेत्

16 सृष्ट् यप्यय करीम् मायाम् वेलाकूलान् त वेगिताम्

मत् तस्य ताम् अविज्ञस्य किम् असत् कर्मभिर् भवेत्

17 पञ्च विम्शति तत्त्वानाम् पुरुषो ऽद्भुत दर्पणम्

अध्यात्मम् अबुधस्येह किम् असत् कर्मभिर् भवेत्

18 ऐश्वरम् शास्त्रम् उत्सृज्य बन्ध मोक्षानु दर्शनम्

विविक्त पदम् अज्ञाय किम् असत् कर्मभिर् भवेत्

19 काल चक्रम् भ्रमि तीक्ष्णम् सर्वम् निष्कर्ष यज् जगत्

स्वतन्त्रम् अबुधस्येह किम् असत् कर्मभिर् भवेत्

20 शास्त्रस्य पितुरा देशम् यो न वेद निवर्तकम्

कथम् तद् अनुरूपाय गुण विस्रम्भ् युपक्रमेत्

21 इति व्यवसिता राजन् हर्यश्वा एक चेतसः

प्रययुस्तम् परिक्रम्य पन्थानम् अनिवर्तनम्

22 स्वर ब्रह्मणि निर्भात हृषी केश पदाम्बुजे

अखण्डम् चित्तम् आवेश्य लोकान् अनुचरन् मुनिः

23 नाशम् निशम्य पुत्राणाम् नारदात् छील शालिनाम्

अन्व तप्यत कः शोचन् सु प्रजस्त्वम् शुचाम् पदम्

24 स भूयः पाञ्च जन्यायाम् अजेन परिसान्त् वितः

पुत्रान् अजनयद् दक्षः सवलाश्वान् सहस्रशः

25 ते ऽपि पित्रा समा दिष्टाः प्रजासर्गे धृत व्रताः

नारायण सरो जग्मुः यत्र सिद्धाः स्व पूर्वजाः

26 तद् उप स्पर्शनाद् एव विनिर् धूत् अमलाशयाः

जपन्तो ब्रह्म परमम् तेपुस्ते ऽत्र महत् तपः

27 अब्भक्षाः कतिचिन् मासान् कतिचिद् वायु भोजनाः

आराधयन् मन्त्रम् इमम् अभ्यस् यन्त इडस्पतिम्

28 ओम् नमो नारायणाय पुरुषाय महात्मने

विशुद्ध सत्त्व धिष्ण्याय महा हम्साय धीमहि

29 इति तान् अपि राजेन्द्र प्रजासर्ग धियो मुनिः

उपेत्य नारदः प्राह वाचः कूटानि पूर्ववत्

30 दाक्षायणाः सम्शृणुत गदतो निगमम् मम

अन्विच्छत् आनु पदवीम् भ्रातॄणाम् भ्रातृ वत्सलाः

31 भ्रातॄणाम् प्रायणम् भ्राता यो ऽनु तिष्ठति धर्म वित्

स पुण्य बन्धुः पुरुषो मरुद्भिः सह मोदते

32 एतावद् उक्त्वा प्रययौ नारदो ऽमोघ दर्शनः

ते ऽपि च अन्वगमन् मार्गम् भ्रातॄणाम् एव मारिष

33 सध्री चीनम् प्रती चीनम् परस् यानुपथम् गताः

नाद्यापि ते निवर्तन्ते पश्चिमा यामिनीर् इव

34 एतस्मिन् काल उत्पातान् बहून् पश्यन् प्रजापतिः

पूर्ववन् नारद कृतम् पुत्र नाशम् उपाशृणोत्

35 चुक्रोध नारदा यासौ पुत्र शोक विमूर्च्छितः

देवर्षिम् उपलभ्याह रोषाद् विस्फुरिता धरः

36 श्री दक्ष उवाच

अहो असाधो साधूनाम् साधु लिङ्गेन नस्त्वया

असाध्व् अकारि अर्भकाणाम् भिक्षोर् मार्गः प्रदर्शितः

37 ऋणैस् त्रिभिर् अमुक्तानाम् अमीमाम् सित कर्मणाम्

विघातः श्रेयसः पाप लोकयोरुभ योः कृतः

38 एवम् त्वम् निरनुक्रोशो बालानाम् मतिभिद् हरेः

पार्षद मध्ये चरसि यशोहा निरपत्रपः

39 ननु भागवता नित्यम् भूत् आनुग्रह कातराः

ऋते त्वाम् सौहृदघ्नम् वै वैरङ्करम् अवैरिणाम्

40 नेत्थम् पुम्साम् विरागः स्यात् त्वया केवलिना मृषा

मन्यसे यद् युपशमम् स्नेह पाश निकृन्तनम्

41 नानुभूय न जानाति पुमान् विषय तीक्ष्णताम्

निर्विद्यते स्वयम् तस्माट्ज्ह् न तथा भिन्नधीः परैः

42 यन् नस्त्वम् कर्म सन्धानाम् साधूनाम् गृहमेधिनाम्

कृतवानसि दुर् मर्षम् विप्रियम् तव मर्षितम्

43 तन्तु कृन्तन यन् नस्त्वम् अभद्रम् अचरः पुनः

तस्माल् लोकेषु ते मूढ न भवेद् भ्रमतः पदम्

44 श्री शुक उवाच

प्रति जग्राह तद् बाढम् नारदः साधु सम्मतः

एतावान् साधुवादो हि तितिक्षे तेश्वरः स्वयम्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

षष्ट स्कन्दे पञ्चमो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ षष्ट स्कन्दः षष्टो ऽध्याय :

स्कन्द- 06: अध्याय- 06

01 श्री शुक उवाच

ततः प्राचेतसो ऽसिक्न्याम् अनुनीतः स्वयम्भुवा

02 षष्टिम् सन्जन यामास दुहितॄः पितृ वत्सलाः

दश धर्माय कायेन्दोः द्विषट् त्रिणव दत्तवान्

03 भूत् आङ्गिरः कृशाश् वेभ्यो द्वे द्वे तार्क्ष्याय चापराः

नामधेयान् यमूषाम् त्वम् सापत् यानाम् च मे शृणु

04 यासाम् प्रसूति प्रसवैः लोका आपूरित् आस्त्रयः

भानुर् लम्बा ककुद्यामिः विश्वा साध्या मरुत् वती

05 वसुर् मुहूर्ता सङ्कल्पा धर्म पत्न्यः सुतात्र् शृणु

भानोस्तु देव ऋषभ इन्द्रसेनस् ततो नृप

06 विद्योत आसील् लम्बायाः ततश् च स्तन यित्नवः

ककुभः सङ्कटस् तस्य कीकटस् तनयो यतः

07 भुवो दुर्गाणि जामेयः स्वर्गो नन्दिस् ततो ऽभवत्

विश्वे देवास्तु विश्वाया अप्रजाम् स्तान् प्रचक्षते

08 साध्यो गणस्तु साध्याया अर्थ सिद्धिस्तु तत् सुतः

मरुत्वाम्श् च जयन्तश् च मरुत् वत्याम् बभूवतुः

09 जयन्तो वासुदेव् आम्श उपेन्द्र इति यम् विदुः

मौहूर्तिका देव गणा मुहूर्ता याश्च जज्ञिरे

10 ये वै फलम् प्रयच् छन्ति भूतानाम् स्वस्व कालजम्

सङ्कल्पा याश्च सङ्कल्पः कामः सङ्कल्पजः स्मृतः

11 वसवो ऽष्टौ वसोः पुत्राः तेषाम् नामानि मे शृणु

द्रोणः प्राणो ध्रुवो ऽर्को ऽग्निः दोषो वसुर् विभावसुः

12 द्रोणस् याभिमतेः पत्न्या हर्ष शोक भयादयः

प्राणस् योर्जस्वती भार्या सह आयुः पुरोजवः

13 ध्रुवस्य भार्या धरणिः असूत विविधाः पुरः

अर्कस्य वासना भार्या पुत्रास् तर्षादयः स्मृताः

14 अग्नेर् भार्या वसोर् धारा पुत्रा द्रविणका दयः

स्कन्दश् च कृत्तिका पुत्रो ये विशाखा दयस् ततः

15 दोषस्य शर्वरी पुत्रः शिशुमारो हरेः कला

वासोर् आङ्गिरसी पुत्रो विश्व कर्मा कृती पतिः

16 ततो मनुश् चाक्षुषो ऽभूद् विश्वे साध्या मनोः सुताः

विभावसोर् असूतोषा व्युष्टम् रोचिष मातपम्

17 पञ्चयामो ऽथ भूतानि येन जाग्रति कर्मसु

सरूपा सूत भूतस्य भार्या रुद्राम्श् च कोटिश:

18 रैवतो ऽजो भवो भीमो वाम उग्रो वृषाकपि:

अजैक पादहिर् बुध्न्यो बहुरूपो महानिति

19 रुद्रस्य पार्षदाश् चान्ये घोरा: भूत विनायका:

प्रजापतेर् अङ्गिरस: स्वधा पत्नी पितॄन् अथ

20 अथर्व् आङ्गिरसम् वेदम् पुत्रत्वे च अकरोत् सती

कृशाश्वो ऽर्चिषि भार्यायाम् धूम्रकेशम् अजीजनत्

21 धिषणायाम् वेद शिरो देवलम् वयुनम् मनुम्

तार्क्ष् यस्य विनता कद्रू: पतङ्गी यामिनीति च

22 पतङ्ग् यसूत पतगान् यामिनी शल भानथ

सुपर्णा सूत गरुडम् साक्षाद् यज्ञेश वाहनम्

सूर्य सूतम् अनूरुम् च कद्रू: नागान नेकश:

23 कृत्तिका दीनि नक्षत्राणी इन्दो: पत्न्यस्तु भारत

दक्ष शापात् सो ऽन पत्य: तासु यक्ष्म ग्रहार् दित:

24 पुन: प्रसाद्य तम् सोम: कला लेभे क्षये दिता:

शृणु नामानि लोकानाम् मातॄणाम् शङ्कराणि च

25 अथ कश्यप पत्नीनाम् यत् प्रसूतम् इदम् जगत्

अदितिर् दितिर् दनु: काष्ठा अरिष्टा सुरसा इला

26 मुनि: क्रोधवशा ताम्रा सुरभि: सरमा तिमि:

तिमेर् यादो गणा आसन् श्वा पदा: सरमा सुता:

27 सुरभेर् महिषा गावो ये चान्ये द्विशफा नृप

ताम्राया: श्येन गृध्राद्या मुनेर् अप्सरसाम् गणा:

28 दन्द शूकादय: सर्पा राजन् क्रोधवश् आत्मजा:

इलाया भूरुहा: सर्वे यातु धानाश् च सौरसा:

29 अरिष्टायाश् च गन्धर्वा: काष्ठाया द्विश फेतरा:

सुता दनोर् एक षष्टि: तेषाम् प्राधानिकात्र् शृणु

30 द्वि मूर्धा शम्बरो ऽरिष्टो हयग्रीवो विभावसु:

अयोमुख: शङ्कु शिरा: स्वर्भानु: कपिलो ऽरुण:

31 पुलोमा वृष पर्वा च एक चक्रो ऽनुतापन:

धूम्रकेशो विरूपाक्षो विप्र चित्तिश् च दुर्जय:

32 स्वर्भानो: सुप्रभाम् कन्याम् उवाह नमुचि: किल

वृष पर्वणस्तु शर्मिष्ठाम् ययाति: नाहुषो बली

33 वैश्वानर सुता याश् च चतस्रश् चारु दर्शना:

उपदानवी हय शिरा पुलोमा कालका तथा

34 उप दानवीम् हिरण्याक्ष: क्रतुर् हयशिराम् नृप

पुलोमाम् कालकाम् च द्वे वैश्वानर सुते तु क:

35 उपयेमे ऽथ भगवान् कश्यपो ब्रह्म चोदित:

पौलोमा: कालके याश्च दानवा युद्ध शालिन:

36 तयो: षष्टि सहस्राणि यज्ञ घ्नान्स् ते पितु: पिता

जघान स्वर्गतो राजन् एक इन्द्र प्रियङ्कर:

37 विप्र चित्ति: सिम्हिकायाम् शतम् चैकम् अजीजनत्

राहुज् येष्ठम् केतु शतम् ग्रहत्वम् य उपागता:

38 अथात: श्रूयताम् वम्शो यो ऽदितेर् अनुपूर्वश:

यत्र नारायणो देव: स्वाम् शेनाव अतरद् विभु:

39 विवस्वान् अर्यमा पूषा त्वष्टाथ सविता भग:

धाता विधाता वरुणो मित्र: शक्र उरुक्रम:

40 विवस्वत: श्राद्ध देवम् सम्ज्ञा सूयत वै मनुम्

मिथुनम् च महा भागा यमम् देवम् यमीम् तथा

सैव भूत्वाथ वडवा नासत्यौ सुषुवे भुवि

41 छाया शनैश् चरम् लेभे सावर्णिम् च मनुम् तत:

कन्याम् च तपतीम् या वै वव्रे सम्वरणम् पतिम्

42 अर्यम्णो मातृका पत्नी तयोः चर्षण यः सुताः

यत्र वै मानुषी जातिः ब्रहमणा चोप कल्पिता

43 पूषान पत्यः पिष्टादो भग्न दन्तो ऽभवत् पुरा

यो ऽसौ दक्षाय कुपितम् जहास विवृतद् विजः

44 त्वष्टुर् दैत्यानुजा भार्या रचना नाम कन्यका

सन्नि वेशस् तयोर् जज्ञे विश्वरूपश् च वीर्यवान्

45 तम् वव्रिरे सुरगणा स्व स्त्रीयम् द्विषताम् अपि

विमतेन परित् यक्ता गुरुणा आङ्गिरसेन यत्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

षष्ट स्कन्दे षष्टो ऽध्याय ::||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ षष्ट स्कन्दः सप्तमो ऽध्याय :

स्कन्द- 06: अध्याय- 07

01 श्री राजो वाच

कस्य हेतोः परित्यक्ता आचार्येण् आत्मनः सुराः

एतद् आचक्ष्व भगवन् छिष्याणाम् अक्रमम् गुरौ

02 श्री शुक उवाच

इन्द्रस् त्रिभुवन् ऐश्वर्य मदोल् लङ्घित सत् पथः

मरुद्भिः वसुभी रुद्रैः आदित्यैः ऋभुभिर् नृप

03 विश्वे देवैश्च साध्यैश् च नासत् याभ्याम् परिश्रितः

सिद्ध चारण गन्धर्वैः मुनिभिः ब्रह्म वादिभिः

04 विद्याधर् आप्सरो भिश्च किन्नरैः पत गोरगैः

निषेव्य माणो मघवान् स्तूय मानश्च भारत

05 उपगीयमानो ललितम् आस्थानाध् यासन् आश्रितः

पाण्डु रेणात पत्रेण चन्द्र मण्डल चारुणा

06 युक्तश् चान्यैः पारमेष्ठ्यैः चामर व्यजनादिभिः

विराजमानः पौलम्या सहार् धासनया भृशम्

07 स यदा परम् आचार्यम् देवानाम् आत्मनश् च ह

नाभ्य नन्दत सम्प्राप्तम् प्रत्युत्थान् आसनादिभिः

08 वाचस् पतिम् मुनिवरम् सुर आसुर नमस्कृतम्

नोच्च चाला सनाद् इन्द्रः पश्यन् अपि सभागतम्

09 ततो निर्गत्य सहसा कविर् आङ्गिरसः प्रभुः

आययौ स्वगृहम् तूष्णीम् विद्वान् श्रीमद् अविक्रियाम्

10 तर्ह्येव प्रति बुध्येन्द्रो गुरु हेलनम् आत्मनः

गर्हयामास सदसि स्वयम् आत्मानम् आत्मना

11 अहो बत ममा साधु कृतम् वै दभ्र बुद्धिना

यन् मै ऐश्वर्य मत्तेन गुरुः सदसि कात् कृतः

12 को गृध्येत् पण्डितो लक्ष्मीम् त्रि पिष्टप पतेर् अपि

ययाहम् आसुरम् भावम् नीतो ऽद्य विबुधेश्वरः

13 ये पारमेष्ठ्यम् धिषणम् अधितिष्ठन् न कञ्चन

प्रत् युत्तिष्ठेद् इति ब्रूयुः धर्मम् ते न परम् विदुः

14 तेषाम् कुपथ देष्ट्ॠणाम् पतताम् तमसि ह्यधः

ये श्रद्दध्युः वचस्ते वै मज्जन्ति अश्मप्लवा इव

15 अथाहम् अमर् आचार्यम् अगाध धिषणम् द्विजम्

प्रसाद यिष्ये निशठः शीर्ष्णा तच् चरणम् स्पृशन्

16 एवम् चिन्तयतस् तस्य मघोनो भगवान् गृहात्

बृहस्पतिः गतो ऽदृष्टाम् गतिम् अध्यात्म मायया

17 गुरोर् नाधिगतः सम्ज्ञाम् परीक्षन् भगवान् स्वराट्

ध्यायन् धिया सुरैर् युक्तः शर्म नालभत् आत्मनः

18 तच् छ्रुत्वैव् आसुराः सर्व आश्रित् यौशन सम् मतम्

देवान् प्रत् युद्यमम् चक्रुः दुर्मदा आततायिनः

19 तैर् विसृष्टेषुभिस् तीक्ष्णैः निर्भिन्नाङ् गोरु बाहवः

ब्रह्माणम् शरणम् जग्मुः सहेन्द्रा नत कन्धराः

20 ताम्स् तथाभ् यर्दितान् वीक्ष्य भगवान् आत्म भूरजः

कृपया परया देव उवाच परिसान् त्वयन्

21 श्री ब्रह्मो उवाच

अहो बत सुर श्रेष्ठा ह्यभद्रम् वः कृतम् महत्

ब्रह्मिष्ठम् ब्राह्मणम् दान्तम् ऐश्वर्यान् नाभ्य नन्दत

22 तस्यायम् अनयस् यासीत् परेभ्यो वः पराभवः

प्रक्षीणेभ्यः स्व वैरिभ्यः समृद् धानाम् च यत् सुराः

23 मघवन् द्विषतः पश्य प्रक्षीणान् गुर्वति क्रमात्

सम्प्रति उपचितान् भूयः काव्यम् आराध्य भक्तितः

आददीरन् निलयनम् ममापि भृगु देवताः

24 त्रि विष्टपम् किम् गणयन्त्य भेद्य मन्त्रा भृगूणाम् अनुशिक्षित् आर्थाः

न विप्र गोविन्द गवीश् वराणाम् भवन्त् यभद्राणि नरेश्वराणाम्

25 तद् विश्वरूपम् भजताशु विप्रम् तपस्विनम् त्वाष्ट्रम् अथात्म वन्तम्

सभाजितो ऽर्थान्स विधास्यते वो यदि क्षमिष् यध्व मुतास्य कर्म

26 श्री शुक उवाच

त एवम् उदिता राजन् ब्रह्मणा विगतज्वराः

ऋषिम् त्वाष्ट्रम् उपव्रज्य परिष् वज्येद् अमब्रुवन्

27 श्री देवा ऊचुः

वयम् ते ऽतिथयः प्राप्ता आश्रमम् भद्रमस्तु ते

कामः सम्पाद्य ताम् तात पित्‌ऋणाम् सम योचितः

28 पुत्राणाम् हि परो धर्मः पितृ शुश्रूषणम् सताम्

अपि पुत्र वताम् ब्रह्मन् किमुत ब्रह्म चारिणाम्

29 आचार्यो ब्रह्मणो मूर्तिः पिता मूर्तिः प्रजापतेः

भ्राता मरुत् पतेर् मूर्तिः माता साक्षात् क्षितेस्तनुः

30 दयाया भगिनी मूर्तिः धर्मस् यात्मातिथिः स्वयम्

अग्नेर् अभ्यागतो मूर्तिः सर्व भूतानि चात्मनः

31 तस्मात् पित्‌ऋणाम् आर्तानाम् आर्तिम् पर पराभवम्

तपसा पनयम्स् तात सन्देशम् कर्तु मर्हसि

32 वृणीमहे त्वोपा ध्यायम् ब्रह्मिष्ठम् ब्राह्मणम् गुरुम्

यथाञ्जसा विजेष्यामः सपत्नाम्स् तव तेजसा

33 न गर्हयन्ति ह्यर्थेषु यविष्ठाङ्घ्र् यभि वादनम्

छन्दोभ्यो ऽन्यत्र न ब्रह्मन् वयो ज्यैष्ठ्यस्य कारणम्

34 श्री ऋषिर् उवाच

अभ्यर्थितः सुरगणैः पौरोहित्ये महा तपाः

स विश्वरूपः तानाह प्रसन्नः श्लक्ष्णया गिरा

35 श्री विश्वरूप उवाच

विगर्हितम् धर्म शीलैः ब्रह्मवर्च उपव्ययम्

कथम् नु मद्विधो नाथा लोकेशैर् अभि याचितम्

प्रत् याख्यास् यति तच् छिष्यः स एव स्वार्थ उच्यते

36 अकिञ्चनानाम् हि धनम् शिलोञ्छनम् तेनेह निर्वर्तित साधु सत्क्रियः

कथम् विगर्ह्यम् नु करोम्यध् ईश्वराः पौरोधसम् हृष्यति येन दुर्मतिः

37 तथापि न प्रति ब्रूयाम् गुरुभिः प्रार्थितम् कियत्

भवताम् प्रार्थितम् सर्वम् प्राणैर् अर्थैश् च साधये

38 श्री शुक उवाच

तेभ्य एवम् प्रति श्रुत्य विश्वरूपो महा तपाः

पौरोहित्यम् वृतश् चक्रे परमेण समाधिना

39 सुरद् विषाम् श्रियम् गुप्ताम् औशनस् यापि विद्यया

आच्छिद् यादान् महेन्द्राय वैष्णव्या विद्यया विभु:

40 यया गुप्त: सहस्राक्षो जिग्ये ऽसुरच मूर्विभु:

ताम् प्राह स महेन्द्राय विश्वरूप उदारधी:

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

षष्ट स्कन्दे सप्तमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ षष्ट स्कन्द: अष्टमो ऽध्याय :

स्कन्द- 06: अध्याय- 08

01 श्री राजो वाच

यया गुप्त: सहस्राक्ष: सवाहान् रिपु सैनिकान्

क्रीडन् इव विनिर्जित्य त्रिलोक्या बुभुजे श्रियम्

02 भगवम्स् तन् ममाख्याहि वर्म नारायण् आत्मकम्

यथा आततायिन: शत्रून् येन गुप्तो ऽजयन् मृधे

03 श्री शुक उवाच

वृत: पुरोहितस् त्वाष्ट्रो महेन्द्रा यानु पृच्छते

नारायणाख्यम् वर्माह तदि हैकमना: शृणु

04 श्री विश्वरूप उवाच

धौताङ्घ्रि पाणिर् आचम्य स पवित्र उदङ्मुख:

कृत स्वाङ्ग करन्यासो मन्त्राभ्याम् वाग्यत: शुचि:

05 नारायण मयम् वर्म सन्नह्येद् भय आगते

पादयोर् जानुनोर् ऊर्वोः उदरे हृद्यथोर् असि

06 मुखे शिरस् यानु पूर्व्याद् ओम्कारा दीनि विन्यसेत्

ओम् नमो नारायणा येति विपर्ययम् अथापि वा

07 कर न्यासम् ततः कुर्याद् द्वा दशाक्षर विद्यया

प्रणवादि यकारान्तम् अङ्गुल् यङ्गुष्ठ पर्वसु

08 न्यसेद् हृदय ओम्कारम् विकारम् अनु मूर्धनि

षकारम् तु भ्रुवोर् मध्ये णकारम् शिखया दिशेत्

09 वेकारम् नेत्रयोर् युञ्ज्यान् नकारम् सर्व सन्धिषु

मकारम् अस्त्रम् उद्दिश्य मन्त्र मूर्तिर् भवेद्बुधः

10 सविसर्गम् फडन्तम् तत् सर्व दिक्षु विनिर्दिशेत्

ओम् विष्णवे नम इति

11 आत्मानम् परमम् ध्यायेद् ध्येयम् षट् शक्तिभिर् युतम्

विद्या तेजस् तपो मूर्तिम् इमम् मन्त्रम् उदाहरेत्

12 ओम् हरिर् विदध्यान् मम सर्व रक्षाम् न्यस्ताङ्घ्रि पद्मः पतगेन्द्र पृष्ठे

दरारि चर्मासि गदेषु चाप पाशान्द धानो ऽष्ट गुणो ऽष्ट बाहुः

13 जलेषु माम् रक्षतु मत्स्य मूर्तिः यादो गणेभ्यो वरुणस्य पाशात्

स्थलेषु माया वटु वामनो ऽव्यात् त्रि विक्रमः खे ऽवतु विश्वरूपः

14 दुर्गेषु अटव्याजि मुखादिषु प्रभुः पायान् नृसिम्हो ऽसुरयूथ पारिः

विमुञ्चतो यस्य महाट्टहासम् दिशो विनेदुः न्यपतम्श् च गर्भाः

15 रक्षत्वसौ माध्वनि यज्ञ कल्पः स्व दम्ष्ट्रयोन् नीत धरो वराहः

रामो ऽद्रिकूटेषु अथ विप्रवासे स लक्ष्मणो ऽव्याद् भरता ग्रजो ऽस्मान्

16 माम् उग्र धर्माद् अखिलात् प्रमादात् नारायणः पातु नरश्च हासात्

दत् तस्त्व योगाद् अथ योग नाथः पायाद् गुणेशः कपिलः कर्म बन्धात्

17 सनत् कुमारो ऽवतु काम देवाद् हयशीर्षा माम् पथि देव हेलनात्

देवर्षि वर्यः पुरुष् आर्चन् आन्तरात् कूर्मो हरिर् माम् निरयाद् अशेषात्

18 धन्वन्तरि: भगवान् पात्व पथ्याद् द्वन्द्वाद् भयाद् ऋषभो निर्जित् आत्मा

यज्ञश्च लोकाद् अवताज् जनान्ताद् बलो गणात् क्रोध वशाद् अहीन्द्र:

19 द्वैपायनो भगवान् अप्रबोधाद् बुद्धस्तु पाखण्ड गण प्रमादात्

कल्कि: कले: काल मलात् प्रपातु धर्माव् अनायोरु कृतावतार:

20 माम् केशवो गदया प्रातरव्याद् गोविन्द आसङ्गवम् आत्तवेणु:

नारायण: प्राह्ण उदात्त शक्ति: मध् यन्दिने विष्णुर् अरीन्द्र पाणि:

21 देवो ऽपराह्णे मधुहोग्र धन्वा सायम् त्रि धामावतु माधवो माम्

दोषे हृषीकेश उतार्ध रात्रे निशीथ एको ऽवतु पद्म नाभ:

22 श्रीवत्स धामा पर रात्र ईश: प्रत्यूष ईशो ऽसिधरो जनार्दन:

दामोदरो ऽव्याद् अनुसन्ध्यम् प्रभाते विश्वेश्वरो भगवान् काल मूर्ति:

23 चक्रम् युगान्ता नल तिग्मनेमि भ्रमत् समन्ताद् भगवत् प्रयुक्तम्

दन्दग्धि दन्दग्धि अरिसैन्य माशु कक्षम् यथा वातसखो हुताश:

24 गदे ऽश निस्पर्शन विस्फुलिङ्गे निष्पिण्ढि निष्पिण्ढ् यजित प्रियासि

कूष्माण्ड वैनायक यक्ष रक्षो भूत ग्रहाम्श् चूर्णय चूर्णयारीन्

25 त्वम् यातु धान प्रमथ प्रेत मातृ पिशाच विप्र ग्रह घोर दृष्टीन्

दरेन्द्र विद्रावय कृष्ण पूरितो भीमस्वनो अरेर् हृदयानि कम्पयन्

26 त्वम् तिग्म धारासि वरारि सैन्यम् ईश प्रयुक्तो मम छिन्धि छिन्धि

चक्षूम्षि चर्मन् छत चन्द्र छादय द्विषाम घोनाम् हर पाप चक्षुषाम्

27 यन्नो भयम् ग्रहेभ्यो ऽभूत् केतुभ्यो नृभ्य एव च

सरी सृपेभ्यो दम्ष्ट्रिभ्यो भूतेभ्यो ऽम्होभ्य एव च

28 सर्वाण् येतानि भगवन् नाम रूपास्त्र कीर्तनात्

प्रयान्तु सम्क्षयम् सद्यो ये न: श्रेय: प्रतीपका:

29 गरुडो भगवान् स्तोत्र स्तोभश् छन्दोमय: प्रभु:

रक्षतु अशेष कृच्छ्रेभ्यो विष्वक्सेन: स्वनामभि:

30 सर्वा पद्भ्यो हरेर् नाम रूप याना युधानि न:

बुद्ध् ईन्द्रिय मन: प्राणान् पान्तु पार्षद भूषणा:

31 यथा हि भगवान् एव वस्तुतः सदसच् च यत्

सत्येनानेन नः सर्वे यान्तु नाशम् उपद्रवाः

32 यथै कात्म्यानु भावानाम् विकल्प रहितः स्वयम्

भूषण् आयुध लिङ्गाख्या धत्ते शक्तीः स्व मायया

33 तेनैव सत्य मानेन सर्वज्ञो भगवान् हरिः

पातु सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वगः

34 विदिक्षु दिक्षूर् ध्वम् अधः समन्ताद् अन्तर्बहिः भगवान् नारसिम्हः

प्रहापयन् लोकभयम् स्वनेन स्वतेजसा ग्रस्त समस्त तेजाः

35 मघवन् निद माख्यातम् वर्म नारायण् आत्मकम्

विजेष्यसि ऽञ्जसा येन दम्शितो ऽसुरयू थपान्

36 एतद् धारय माणस्तु यम् यम् पश्यति चक्षुषा

पदा वा सम्स्पृशेत् सद्यः साध्व सात्स विमुच्यते

37 न कुतश्चिद् भयम् तस्य विद्याम् धारयतो भवेत्

राज दस्यु ग्रहा दिभ्यो व्याघ्रादिभ् यश्च कर्हिचित्

38 इमाम् विद्याम् पुरा कश्चित् कौशिको धारयन् द्विजः

योग धारणया स्वाङ्गम् जहौ स मरुधन्वनि

39 तस्योपरि विमानेन गन्धर्व पतिरेकदा

ययौ चित्र रथः स्त्रीभिः वृतो यत्र द्विजक्षयः

40 गगनात् न्यपतत् सद्यः सविमानो हयवाक्शिराः

स वालिखिल्य वचनाद् अस्थीन् यादाय विस्मितः

प्रास्य प्राची सरस्वत्याम् स्नात्वा धाम स्व मन्वगात्

41 श्री शुक उवाच

य इदम् शृणुयात् काले यो धारयति चादृतः

तम् नमस्यन्ति भूतानि मुच्यते सर्वतो भयात्

42 एताम् विद्याम् अधिगतो विश्वरूपात् छतक्रतुः

त्रैलोक्य लक्ष्मीम् बुभुजे विनिर्जित्य मृधे ऽसुरान्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

षष्ट स्कन्दे अष्टमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ षष्ट स्कन्द: नवमो ऽध्याय :

स्कन्द- 06: अध्याय- 09

01 श्री शुक उवाच

तस्यासन् विश्वरूपस्य शिराम्सि त्रीणि भारत

सोमपीथम् सुरापीथम् अन्नादम् इति शुश्रुम

02 स वै बर्हिषि देवेभ्यो भागम् प्रत्यक्षम् उच्चकै:

अवदद् यस्य पितरो देवा: सप्रश्रयम् नृप

03 स एव हि ददौ भागम् परोक्षम् असुरान् प्रति

यजमानो ऽवहद् भागम् मातृ स्नेह वशानुग:

04 तद् देव हेलनम् तस्य धर्मालीकम् सुरेश्वर:

आलक्ष्य तरसा भीत: तच् छीर्षाणि अच्छिनद् रुषा

05 सोमपीथम् तु यत् तस्य शिर आसीत् कपिञ्जल:

कलविङ्क: सुरापीथम् अन्नादम् यत्स तित्तिरि:

06 ब्रह्महत्याम् अञ्जलिना जग्राह यद् अपीश्वर:

सम्वत्सरान् ते तदघम् भूतानाम् स विशुद्धये

भूम् यम्बु द्रुम योषिद्भ्य: चतुर्धा व्यभजद् हरि:

07 भूमि: तुरीयम् जग्राह खातपूर वरेण वै

ईरिणम् ब्रह्म हत्याया रूपम् भूमौ प्रदृश्यते

08 तुर्यम् छेद विरोहेण वरेण जगृहुर् द्रुमाः
तेषाम् निर्यास रूपेण ब्रह्महत्या प्रदृश् यते
09 शश्वत् काम वरेणाम्हः तुरीयम् जगृहुः स्त्रियः
रजो रूपेण तास्वम्हो मासि मासि प्रदृश् यते
10 द्रव्य भूयो वरेणापः तुरीयम् जगृहुर् मलम्
तासु बुद्बुद फेनाभ्याम् दृष्टम् तद् हरति क्षिपन्
11 हत पुत्रस् ततस् त्वष्टा जुहा वेन्द्राय शत्रवे
इन्द्र शत्रो विवर्धस्व मा चिरम् जहि विद्विषम्
12 अथान् वाहार्य पचनाद् उत्थितो घोर दर्शनः
कृतान् त इव लोकानाम् युगान् त समये यथा
13 विष्वग् विवर्धमानम् तम् इषुमात्रम् दिने दिने
दग्ध शैल प्रतीकाशम् सन्ध्या भ्रानीक वर्चसम्
14 तप्त ताम्र शिखाश् मश्रुम् मध् याह्नार्को ग्रलोचनम्
15 देदीप्य माने त्रिशिखे शूल आरोप्य रोदसी
नृत्यन्तम् उन्नदन्तम् च चालयन्तम् पदा महीम्
16 दरी गम्भीर वक्त्रेण पिबता च नभस्तलम्
लिहता जिह्व यर्क्षाणि ग्रसता भुवन त्रयम्
17 महता रौद्र दम्ष्ट्रेण जृम्भमाणम् मुहुर् मुहुः
वित्रस्ता दुद्रुवुर् लोका वीक्ष्य सर्वे दिशो दश
18 येनावृता इमे लोकाः तमसा त्वाष्ट्र मूर्तिना
स वै वृत्र इति प्रोक्तः पापः परम दारुणः
19 तम् निजघ्नुः अभिद्रुत्य सगणा विबुधर्षभाः
स्वैः स्वैर् दिव्यास्त्र शस्त्रौघैः सो ऽग्रसत् तानि कृत्स्नशः
20 ततस्ते विस्मिताः सर्वे विषण्णा ग्रस्त तेजसः
प्रत्यञ्चम् आदि पुरुषम् उपतस्थुः समाहिताः
21 श्री देवा ऊचुः

वाइ वम्बर् आग्न्यप् क्षितयस् त्रिलोका ब्रह्मादयो ये वयम् उद्विजन्तः

हराम यस्मै बलिम् अन्तको ऽसौ बिभेति यस्माद् अरणम् ततो नः

22 अविस्मितम् तम् परिपूर्ण कामम् स्वेनैव लाभेन समम् प्रशान्तम्

विनोप सर्पत्य परम् हि बालिशः श्वलाङ्गु लेनाति तितर्ति सिन्धुम्

23 यस्योरु शृङ्गे जगतीम् स्वनावम् मनुर् यथा बध्य ततार दुर्गम्

स एव नः त्वाष्ट्र भयाद् दुरन्तात् त्रात् आश्रितान् वारिचरो ऽपि नूनम्

24 पुरा स्वयम्भूर् अपि सम्यमाम् भसि उदीर्ण वातोर्मि रवैः कराले

एको ऽरविन्दात् पतितस् ततार तस्माद् भयाद् येन स नो ऽस्तु पारः

25 य एक ईशो निज मायया नः ससर्ज येनानु सृजाम विश्वम्

वयम् न यस्यापि पुरः समीहतः पश्याम लिङ्गम् पृथगीश मानिनः

26 यो नः सपत्नैः भृशम् अर्द्यमानान् देवर्षि तिर्यङ् नृषु नित्य एव

कृत् आवतारः तनुभिः स्व मायया कृत् वात्मसात् पाति युगे युगे च

27 तमेव देवम् वयम् आत्म दैवतम् परम् प्रधानम् पुरुषम् विश्वमन्यम्

व्रजाम सर्वे शरणम् शरण्यम् स्वानाम् स नो धास्यति शम् महात्मा

28 श्री शुक उवाच

इति तेषाम् महाराज सुराणाम् उपतिष्ठताम्

प्रतीच्याम् दिश्य भूदाविः शङ्ख चक्र गदाधरः

29 आत्म तुल्यैः षोडशभिः विना श्रीवत्स कौस्तुभौ

पर्युपासितम् उन्निद्र शरदम्बुरु हेक्षणम्

30 दृष्ट्वा तम् अवनौ सर्व ईक्षण् आह्लाद विक्लवाः

दण्डवत् पतिता राजन् छनैः उत्थाय तुष्टुवुः

31 श्री देवा ऊचुः

नमस्ते यज्ञ वीर्याय वयसे उत ते नमः

नमस्ते ह्यस्त चक्राय नमः सु पुरुहूतये

32 यत्ते गतीनाम् तिसृणाम् ईशितुः परमम् पदम्

नार्वाचीनो विसर्गस्य धातर् वेदितु मर्हति

33 ओम् नमस्ते ऽस्तु भगवन् नारायण वासुदेव आदि पुरुष महा पुरुष महानुभाव परम मङ्गल परम कल्याण परम कारुणिक केवल जगद् आधार लोकैक नाथ सर्वेश्वर लक्ष्मी नाथ परमहम्स परिव्राजकैः परमेण आत्मयोग समाधिना परिभावित परिस्फुट पारमहम्स्य धर्मेण उद्घाटित तमः कपाट द्वारे चित्ते ऽपावृत आत्मलोके स्वयम् उपलब्ध निज सुखानुभवो भवान्

34 दुरवबोध इव तवायम् विहार योगो यद् अशरणो ऽशरीर इदम् अनवेक्षितास् मत् समवाय आत्मनैवा विक्रियमाणेन सगुणम् अगुणः सृजसि पासि हरसि

35 अथ तत्र भवान् किम् देव दत्त वदिह गुण विसर्ग पतितः पार तन्त्र्येण स्वकृत कुशला कुशलम् फलम् उपाददाति आहोस्विद् आत्माराम उप शमशीलः समञ्जस दर्शन उदास्त इति ह वाव न विदामः

36 न हि विरोध उभयम् भगवति अपरिगणित गुणगणे ईश्वरे ऽनवगाह्य माहात्म्ये ऽर्वाचीन विकल्प वितर्क विचार प्रमाण् आभास कुतर्क शास्त्र कलिलान्तः करण् आश्रय दुर वग्रह वादिनाम् विवादान वसर उपरत समस्त मायामये केवल एवात्म मायाम् अन्तर्धाय को न्वर्थो दुर्घट इव भवति स्वरूप द्वया भावात्

37 सम विषम मतीनाम् मतम् अनुसरसि यथा रज्जु खण्डः सर्पादि धियाम्

38 स एव हि पुनः सर्व वस्तुनि वस्तु स्वरूपः सर्वेश्वरः सकल जगत् कारण भूतः सर्व प्रत्यग् आत्मत्वात् सर्व गुणा भासोप लक्षित एक एव पर्यव शेषितः

39 अथ ह वाव तव महिम् आमृत रस समुद्र विप्रुषा सकृदव लीढया स्वमनसि निष्यन्द मान अनवरत सुखेन विस्मारित दृष्ट श्रुत विषय सुखलेश् आभासाः परम भागवता एकान्तिनो भगवति सर्व भूत प्रिय सुहृदि सर्वात्मनि नितराम् निरन्तरम् निर्वृत मनसः कथमु ह वा एते मधु मथन पुनः स्वार्थ कुशला हि आत्मप्रिय सुहृदः साधवः त्वच् चरण् आम्बुजानु सेवाम् विसृजन्ति न यत्र पुनरयम् सम्सार पर्यावर्तः

40 त्रिभुवन् आत्म भवन त्रिविक्रम त्रिनयन त्रिलोक मनोहर् आनुभाव तवैव विभूतयो दितिज दनुजादयश् चापि तेषाम् अनुपक्रम समयो ऽयमिति स्वात्म मायया सुर नर मृग मिश्रित जलचरा कृतिभिः यथ आपराधम् दण्डम् दण्डधर दधर्थ एवम् एनम् अपि भगवन् जहि त्वाष्ट्रम् उतयदि मन्यसे

41 अस्माकम् तावकानाम् तव नतानाम् तत ततामह तव चरण नळिन युगळ ध्यानानु बद्ध हृदय निगडानाम् स्वलिङ्ग विवरणेन आत्म सात्कृतानाम् अनुकम्पानु रञ्जित विशद रुचिर शिशिर स्मिताव लोकेन विगलित मधुर मुख रसामृत कलया च अन्तस् तापम् अनघार्हसि शमयितुम्

42 अथ भगवन् तवास्माभिः अखिल जगद् उत्पत्ति स्थिति लय निमित्ताय मान दिव्य माया विनोदस्य सकल जीव निकायानाम् अन्तर् हृदयेषु बहिरपि च ब्रह्म प्रत्यग् आत्म स्वरूपेण प्रधान रूपेण च यथा देश काल देह् आवस्थान विशेषम् तद् उपादानो पलम् भकतयानु भवतः सर्व प्रत्यय साक्षिण आकाश शरीरस्य साक्षात् परब्रह्मणः परमात्मनः कियानिह वार्थ विशेषो विज्ञापनीयः स्याद् विस्फु लिङ्गादिभिर् इव हिरण्य रेतसः

43 अत एव स्वयम् तद् उपकल्पय अस्माकम् भगवतः परम गुरोः तव चरण शत पलाशच् छायाम् विविध वृजिन सम्सार परि श्रमोप शमनीम् उपसृतानाम् वयम् यत् कामेनोप सादिताः

44 अथो ईश जहि त्वाष्ट्रम् ग्रसन्तम् भुवन त्रयम्

ग्रस्तानि येन नः कृष्ण तेजाम्सि अस्त्रायुधानि च

45 हम्साय दह्र निलयाय निरीक्षकाय कृष्णाय मृष्ट यशसे निरुप क्रमाय

सत् सङ्ग्रहाय भव पान्थ निजाश्रम् आप्तौ अन्ते परीष्ट गतये हरये नमस्ते

46 श्री शुक उवाच

अथैवम् ईडितो राजन् सादरम् त्रिदशैर् हरिः

स्वम् उपस्थान माकर्ण्य प्राह तान् अभि नन्दितः

47 श्री भगवान् उवाच

प्रीतो ऽहम् वः सुर श्रेष्ठा मदुपस् थान विद्यया

आत्म् ऐश्वर्य स्मृतिः पुम्साम् भक्तिश् चैव यया मयि

48 किम् दुरापम् मयि प्रीते तथापि विबु धर्षभाः

मय् येकान्त मतिः नान्यत् मत्तो वाञ्छति तत्त्व वित्

49 न वेद कृपणः श्रेय आत्मनो गुण वस्तु दृक्

तस्य तानिच्छतो यच्छेद् यदि सो ऽपि तथाविधः

50 स्वयम् निःश्रेयसम् विद्वान् न वक्त् यज्ञाय कर्म हि

न राति रोगिणो ऽपथ्यम् वाञ्छतो हि भिषक्तमः

51 मघवन् यात भद्रम् वो दध्यञ्चम् ऋषि सत्तमम्

विद्या व्रत तपः सारम् गात्रम् याचत मा चिरम्

52 स वा अधिगतो दध्यङ् अश्विभ्याम् ब्रह्म निष्कलम्

यद्वा अश्व शिरो नाम तयोर् अमरताम् व्यधात्

53 दध्यङ् आथर्वणस् त्वष्ट्रे वर्मा भेद्यम् मद् आत्मकम्

विश्वरूपाय यत् प्रादात् त्वष्टा यत्त्वम् अधास् ततः

54 युष्मभ्यम् याचितो ऽश्विभ्याम् धर्मज्ञो ऽङ्गानि दास्यति

ततस्तैर् आयुध श्रेष्ठो विश्वकर्म विनिर्मितः

येन वृत्रशिरो हर्ता मत् तेज उपबृम्हितः

55 तस्मिन् विनिहते यूयम् तेजो ऽस्त्रायुध सम्पदः

भूयः प्राप्स्यथ भद्रम् वो न हिम्सन्ति च मत्परान्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

षष्ट स्कन्दे नवमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ षष्ट स्कन्द: दशमो ऽध्याय :

स्कन्द- *06:* अध्याय- *10*

*01* श्री शुक उवाच

इन्द्रम् एवम् समादिश्य भगवान् विश्व भावन:

पश्यताम् अनिमेषाणाम् तत्रैवान् तर्दधे हरि:

*02* तथाभि याचितो देवै: ऋषिर् आथर्वणो महान्

मोदमान उवाचेदम् प्रहसन् इव भारत

*03* अपि वृन्दारका यूयम् न जानीथ शरीरिणाम्

सम्स्थायाम् यस्त् वभिद्रोहो दु:सह: चेतनापह:

*04* जिजी विषूणाम् जीवानाम् आत्मा प्रेष्ठ इहेप्सित:

क उत्सहेत तम् दातुम् भिक्ष माणाय विष्णवे

*05* श्री देवा ऊचु:

किम् नु तद् दुस्त्यजम् ब्रह्मन् पुम्साम् भूतानु कम्पिनाम्

भवद् विधानाम् महताम् पुण्य श्लोकेड्य कर्मणाम्

*06* ननु स्वार्थपरो लोको न वेद परसङ्कटम्

यदि वेद न याचेत नेति नाह यद् ईश्वर:

*07* श्री ऋषिर् उवाच

धर्मम् व: श्रोतु कामेन यूयम् मे प्रत्युदा हृता:

एष वः प्रियम् आत्मानम् त्यजन्तम् सन्त्यजाम् यहम्

08 यो ऽध्रुवेण् आत्मना नाथा न धर्मम् न यशः पुमान्

ईहेत भूत दयया स शोच्यः स्थावरैर् अपि

09 एतावान् अव्ययो धर्मः पुण्य श्लोकैर् उपासितः

यो भूत शोक हर्षाभ्याम् आत्मा शोचति हृष्यति

10 अहो दैन्यम् अहो कष्टम् पारक्यैः क्षण भङ्गुरैः

यन् नोप कुर्याद् अस्वार्थैः मर्त्यः स्वज्ञाति विग्रहैः

11 श्री शुक उवाच

एवम् कृत व्यवसितो दध्यङ्ङा अथर्वणस् तनुम्

परे भगवति ब्रह्मणि आत्मानम् सन्नयन् जहौ

12 यता क्षासु मनो बुद्धिः तत्त्व दृग् ध्वस्त बन्धनः

आस्थितः परमम् योगम् न देहम् बुबुधे गतम्

13 अथेन्द्रो वज्र मुद्यम्य निर्मितम् विश्व कर्मणा

मुनेः शक्तिभिर् उत्सिक्तो भगवत् तेजसान् वितः

14 वृतो देवगणैः सर्वैः गजेन् द्रोपर्य शोभत

स्तूयमानो मुनि गणैः त्रैलोक्यम् हर्षयन् निव

15 वृत्रम् अभ् यद्रवच् छेत्तुम् असुरानीक यूथपैः

पर्यस्तम् ओजसा राजन् क्रुद्धो रुद्र इवान्तकम्

16 ततः सुराणाम् असुरै रणः परम दारुणः

त्रेता मुखे नर्मदायाम् अभवत् प्रथमे युगे

17 रुद्रैर् वसुभिर् आदित्यैः अश्विभ्याम् पितृवह्निभिः

मरुद्भिः ऋभुभिः साध्यैः विश्वेदेवैर् मरुत् पतिम्

18 दृष्ट्वा वज्र धरम् शक्रम् रोचमानम् स्वया श्रिया

नामृष्यन् असुरा राजन् मृधे वृत्रपुरः सराः

19 नमुचिः शम्बरो ऽनर्वा द्विमूर्धा ऋषभो ऽम्बरः

हयग्रीवः शङ्कुशिरा विप्रचित्तिर् अयोमुखः

20 पुलोमा वृषपर्वा च प्रहेतिर् हेतिर् उत्कलः

दैतेया दानवा यक्षा रक्षाम्सि च सहस्रशः

21 सुमालि मालि प्रमुखाः कार्तस्वर परिच्छदाः

प्रति षिध्येन्द्र् सेनाग्रम् मृत्योर् अपि दुरासदम्

22 अभ्यर्दयन् असम्भ्रान्ताः सिम्ह नादेन दुर्मदाः

गदाभिः परिघैर् बाणैः प्रासम् उद्गर तोमरैः

23 शूलैः परश्वधैः खड्गैः शतघ्नीभिर् भुशुण्डिभिः

सर्वतो ऽवाकिरन् शस्त्रैः अस्त्रैश् च विबुधर्षभान्

24 न ते ऽदृश्यन्त सञ्छन्नाः शरजालैः समन्ततः

पुङ्खानु पुङ्ख पतितैः ज्योतीम् षीव नभोघनैः

25 न ते शस्त् रास्त्र वर्षौघा ह्यासेदुः सुर सैनिकान्

छिन्नाः सिद्ध पथे देवैः लघुहस्तैः सहस्रधा

26 अथ क्षीणास्त्र शस्त्रौघा गिरि शृङ्ग द्रुमोपलैः

अभ्यवर्षन् सुरबलम् चिच्छि दुस्ताम्श् च पूर्ववत्

27 तान् अक्षतान् स्वस्तिमतो निशाम्य शस्त् रास्त्र पूगैर् अथ वृत्र नाथाः

द्रुमैः दृषद्भिः विविधाद्रि शृङ्गैः अविक्षताम्स् तत्रसुर् इन्द्र सैनिकान्

28 सर्वे प्रयासा अभवन् विमोघाः कृताः कृता देव गणेषु दैत्यैः

कृष्णानु कूलेषु यथा महत्सु क्षुद्रैः प्रयुक्ता रुषती रूक्षवाचः

29 ते स्वप्रयासम् वितथम् निरीक्ष्य हरौ अभक्ता हत युद्ध दर्पाः

पलायना याजि मुखे विसृज्य पतिम् मनस्ते दधुर् आत्तसाराः

30 वृत्रो ऽसुरान् स्तान् अनुगान् मनस्वी प्रधावतः प्रेक्ष्य बभाष एतत्

पलायितम् प्रेक्ष्य बलम् च भग्नम् भयेन तीव्रेण विहस्य वीरः

31 कालोप पन्नाम् रुचिराम् मनस्विनाम् उवाच वाचम् पुरुष प्रवीरः

हे विप्र चित्ते नमुचे पुलोमन् मया नर्वन् छम्बर मे शृणुध्वम्

32 जातस्य मृत्युः ध्रुव एव सर्वतः प्रति क्रिया यस्य न चेह क्लृता

लोको यशश् चाथ ततो यदि ह्यमुम् को नाम मृत्युम् न वृणीत युक्तम्

33 द्वौ सम्मताविह मृत्यू दुरापौ यद् ब्रह्म सन्धारणया जितासुः

कळेवरम् योगरतो विजह्याद् यद् अग्रणीः वीरशये ऽनिवृत्तः

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

षष्ट स्कन्दे दशमो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ षष्ट स्कन्दः एका दशो ऽध्याय :

स्कन्द- 06: अध्याय- 11

01 श्री शुक उवाच

त एवम् शम्सतो धर्मम् वचः पत्युर् अचेतसः

नैवा गृह्णन् भयत्रस्ताः पलायन परा नृप

02 विशीर्य माणाम् पृतनाम् आसुरीम् असुरर्षभः

काल् आनुकूलैः त्रिदशैः काल्यमानाम् अनाथवत्

03 दृष्ट्वा तप्यत सङ्क्रुद्ध इन्द्र शत्रुर् अमर्षितः

तान् निवार् यौजसा राजन् निर्भत्स्येदम् उवाच ह

04 किम् व उच्चरितैर् मातुः धावद्भिः पृष्ठतो हतैः

न हि भीत वधः श्लाघ्यो न स्वर्ग्यः शूर मानिनाम्

05 यदि वः प्रधने श्रद्धा सारम् वा क्षुल्लका हृदि

अग्रे तिष्ठ त मात्रम् मे न चेद् ग्राम्य सुखे स्पृहा

06 एवम् सुरगणान् क्रुद्धो भीषयन् वपुषा रिपून्

व्यनदत् सुमहा प्राणो येन लोका विचेतसः

07 तेन देव गणाः सर्वे वृत्र विस्फोटनेन वै

निपेतुः मूर्च्छिता भूमौ यथै वाशनि ना हताः

08 ममर्द पद्भ्याम् सुर सैन्य मातुरम् निमीलिताक्षम् रणरङ्ग दुर्मदः

गाम् कम्पयन् उद्यत शूल ओजसा नालम् वनम् यूथ पतिः यथोन्मदः

09 विलोक्य तम् वज्रधरो ऽत् यमर्षितः स्व शत्रवे ऽभिद्र वते महा गदाम्

चिक्षेप ताम् आपततीम् सुदुः सहाम् जग्राह वामेन करेण लीलया

10 स इन्द्र शत्रुः कुपितो भृशम् तया महेन्द्र वाहम् गदयोग्र विक्रमः

जघान कुम्भस्थल उन्नदन् मृधे तत् कर्म सर्वे समपूजयन् नृप

11 ऐरावतो वृत्र गदाभि मृष्टो विघूर्णितो ऽद्रिः कुलिशा हतो यथा

अपासरद् भिन्न मुखः सहेन्द्रो मुञ्चन् नसृक् सप्त धनुर् भृशार्तः

12 न सन्न वाहाय विषण्ण चेतसे प्रायुङ्क्त भूयः स गदाम् महात्मा

इन्द्रो ऽमृतस् यन्दि कराभि मर्श वीतव्यथ क्षत वाहो ऽवतस्थे

13 स तम् नृपेन्द्रा अहवकाम्यया रिपुम् वज्रायुधम् भ्रातृ हणम् विलोक्य

स्मरम्श् च तत् कर्म नृशम्स मम्हः शोकेन मोहेन हसन् जगाद

14 श्री वृत्र उवाच

दिष्ट्या भवान् मे समवस्थितो रिपुः यो ब्रह्महा गुरुहा भ्रातृहा च

दिष्ट्या अनृणो ऽद्याहम् असत्तम त्वया मच् छूल निर्भिन्न दृषद् हृदा चिरात्

15 यो नो ऽग्रजस् यात्म विदो द्विजातेः गुरोर् अपापस्य च दीक्षितस्य

विश्रभ्य खड्गेन शिराम्स्य वृश्चत् पशोर् इवा करुणः स्वर्ग कामः

16 ह्री श्री दया कीर्तिभिर् उज्झितम् त्वाम् स्व कर्मणा पुरुषा दैश्च गर्ह्यम्

कृच्छ्रेण मच् छूल विभिन्न देहम् अस्पृष्ट वह्निम् समदन्ति गृध्राः

17 अन्ये ऽनु ये त्वेह नृशम्स मज्ञा ये हुद्य तास्त्राः प्रहरन्ति मह्यम्

तैर् भूत नाथान् सगणान् निशात त्रिशूल निर्भिन्न गलैर् यजामि

18 अथो हरे मे कुलिशेन वीर हर्ता प्रमथ्यैव शिरो यदीह

तत्रा अनृणो भूत बलिम् विधाय मनस्विनाम् पाद रजः प्रपत्स्ये

19 सुरेश कस्मान् न हिनोषि वज्रम् पुरः स्थिते वैरिणि मय्य मोघम्

मा सम्शयिष्ठा न गदेव वज्रम् स्यान् निष्फलम् कृपणार्थेव याच्त्रा

20 नन्वेष वज्रस्तव शक्र तेजसा हरेर् दधीचेस् तपसा च तेजित:

तेनैव शत्रुम् जहि विष्णु यन्त्रितो यतो हरिर् विजय: श्रीर् गुणास् तत:

21 अहम् समाधाय मनो यथाह सङ्कर्षण: तच् चरण् आरविन्दे

त्वद् वज्र रम्हो लुलित ग्राम्य पाशो गतिम् मुनेर् यामि अपविद्ध लोक:

22 पुम्साम् किलैकान् तधियाम् स्वकानाम् या: सम्पदो दिवि भूमौ रसायाम्

न राति यद् द्वेष उद्वेग आधि: मद: कलिर् व्यसनम् सम्प्रयास:

23 त्रै वर्गिकायास विघा तमस्मत् पतिर् विधत्ते पुरुषस्य शक्र

ततो ऽनुमेयो भगवत् प्रसादो यो दुर्लभो ऽकिञ्चन गोचरो ऽन्यै:

24 अहम् हरे तव पादैक मूल दासानु दासो भवितास्मि भूय:

मन: स्मरेत् आसुपतेर् गुणाम्स्ते गृणीत वाक् कर्म करोतु काय:

25 न नाक पृष्ठम् न च पार मेष्ठ्यम् न सार्व भौमम् न रसाधि पत्यम्

न योग सिद्धी: अपुनर्भवम् वा समञ्जस त्वा विरहय्य काङ्क्षे

26 अजात पक्षा इव मातरम् खगा: स्तन्यम् यथा वत्स तरा: क्षुधार्ता:

प्रियम् प्रियेव व्युषितम् विषण्णा मनो ऽरविन्दाक्ष दिदृक्षते त्वाम्

27 मम् ओत्तम श्लोक जनेषु सख्यम् सम्सार चक्रे भ्रमत: स्व कर्मभि:

त्वन् मायया आत्मात्म जदार गेहेषु आसक्त चित्तस्य न नाथ भूयात्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

षष्ट स्कन्दे एका दशो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ षष्ट स्कन्द: द्वा दशो ऽध्याय :

स्कन्द- 06: अध्याय- 12

01 श्री ऋषिर् उवाच

एवम् जिहासुः नृप देह माजौ मृत्युम् वरम् विजयान् मन्यमानः

शूलम् प्रगृह् याभ्य पतत् सुरेन्द्रम् यथा महा पुरुषम् कैटभो ऽप्सु

02 ततो युगान्त् आग्नि कठोर जिह्वम् आविध्य शूलम् तरस् आसुरेन्द्रः

क्षिप्त्वा महेन्द्राय विनद्य वीरो हतो ऽसि पापेति रुषा जगाद

03 ख आप तत् तद् विचलद् ग्रहोल्कवत् निरीक्ष्य दुष् प्रेक्ष्यम् अजात विक्लवः

वज्रेण वज्री शत पर्वणाच् छिनद् भुजम् च तस्योरग राज भोगम्

04 छिन्नैकबाहुः परिघेण वृत्रः समब्ध आसाद्य गृहीत वज्रम्

हनौ तताड् एन्द्रम् अथामरेभम् वज्रम् च हस्तात् न्यपतन् मघोनः

05 वृत्रस्य कर्माति महाद्भुतम् तत् सुरा सुराः चारण सिद्ध सङ्घाः

अपूजयम्स् तत् पुरुहूत सङ्कटम् निरीक्ष्य हा हेति विचुक्रुशुर् भृशम्

06 इन्द्रो न वज्रम् जगृहे विलज्जितः च्युतम् स्व हस्ताद् अरिसन्निधौ पुनः

तमाह वृत्रो हर आत्त वज्रो जहि स्व शत्रुम् न विषाद कालः

07 युयुत् सताम् कुत्र चिद् आततायिनाम् जयः सदै कत्र न वै परात्मनाम्

विनैकम् उत्पत्तिलयस् थितीश्वरम् सर्वज्ञ माद्यम् पुरुषम् सनातनम्

08 लोकाः सपाला यस्येमे श्वसन्ति विवशा वशे

द्विजा इव शिचा बद्धाः स काल इह कारणम्

09 ओजः सहो बलम् प्राणम् अमृतम् मृत्युमेव च

तम् अज्ञाय जनो हेतुम् आत्मानम् मन्यते जडम्

10 यथा दारुमयी नारी यथा यन्त्रमयो मृगः

एवम् भूतानि मघवन् ईश तन्त्राणि विद्धि भोः

11 पुरुषः प्रकृतिर् व्यक्तम् आत्मा भूतेन्द्रि याशयाः

शक्नु वन्त्यस्य सर्गादौ न विना यद् अनुग्रहात्

12 अविद्वान् एवम् आत्मानम् मन्यते ऽनीशम् ईश्वरम्

भूतैः सृजति भूतानि ग्रसते तानि तैः स्वयम्

13 आयुः श्रीः कीर्तिर् ऐश्वर्यम् आशिषः पुरुषस्य याः

भवन्त्येव हि तत् काले यथा निच्छोर् विपर्यया:

14 तस्माद् अकीर्ति यशसो: जयाप जययोर् अपि

समः स्यात् सुख दुःखाभ्याम् मृत्युजी वितयोस् तथा

15 सत्त्वम् रजस् तम इति प्रकृतेर् नात्मनो गुणा:

तत्र साक्षिणम् आत्मानम् यो वेद न स बध्यते

16 पश्य माम् निर्जितम् शक्र वृक्णायुध भुजम् मृधे

घटमानम् यथा शक्ति तव प्राण जिहीर्षया

17 प्राणग्लहो ऽयम् समर इष्वक्षो वाहनासन:

अत्र न ज्ञायते ऽमुष्य जयो ऽमुष्य पराजय:

18 श्री शुक उवाच

इन्द्रो वृत्र वच: श्रुत्वा गतालीकम् अपूजयत्

गृहीत वज्र: प्रहसन् तमाह गत विस्मय:

19 इन्द्र उवाच

अहो दानव सिद्धो ऽसि यस्य ते मतिर् ईदृशी

भक्त: सर्वात्मन् आत्मानम् सुहृदम् जगद् ईश्वरम्

20 भवान् अतार्षीन् मायाम् वै वैष्णवीम् जन मोहिनीम्

यद् विहाय आसुरम् भावम् महा पुरुष ताम् गत:

21 खल्विदम् महद् आश्चर्यम् यद् रज:प्रकृतेस् तव

वासुदेवे भगवति सत्त्वात्मनि दृढा मति:

22 यस्य भक्तिर् भगवति हरौ नि: श्रेय सेश्वरे

विक्रीडतो ऽमृताम् भोधौ किम् क्षुद्रै: खात कोदकै:

23 श्री शुक उवाच

इति ब्रुवाणौ अन्योन्यम् धर्म जिज्ञासया नृप

युयुधाते महावीर्यौ इन्द्र वृत्रौ युधाम् पती

24 आविध्य परिघम् वृत्र: कार्ष्णायसम् अरिन्दम:

इन्द्राय प्राहिणोद् घोरम् वाम हस्तेन मारिष

25 स तु वृत्रस्य परिघम् करम् च करभोपमम्

चिच्छेद युग पद्देवो वज्रेण शत पर्वणा

26 दोर्भ्याम् उत्कृत्त मूलाभ्याम् बभौ रक्तस्रवो ऽसुर:

छिन्न पक्षो यथा गोत्र: खाद् भ्रष्टो वज्रिणा हत:

27 कृत्वा धराम् हनुम् भूमौ दैत्यो दिव् युत्तराम् हनुम्

28 नभो गम्भीर वक्त्रेण लेलिहोल् बण जिह्वया

दम्ष्ट्राभि: काल कल्पाभि: ग्रसन् इव जगत्त्रयम्

29 अति मात्र महाकाय आक्षिपन्स् तरसा गिरीन्

गिरिराट् पाद चारीव पद्भ्याम् निर्जरयन् महीम्

30 जग्रास स समा साद्य वज्रिणम् सह वाहनम्

महा प्राणो महा वीर्यो महा सर्प इव द्विपम्

वृत्र ग्रस्तम् तमा लक्ष्य स प्रजा पतय: सुरा:

हा कष्टम् इति निर्विण्णा: चुक्रुशु: सम हर्षय:

31 निगीर्णो ऽप् यसुरेन्द्रेण न ममा रोदरम् गत:

महा पुरुष सन्नद्धो योगमाया बलेन च

32 भित्त्वा वज्रेण तत् कुक्षिम् निष्क्रम्य बलभिद् विभु:

उच्चकर्त शिर: शत्रो: गिरि शृङ्गम् इवौजसा

33 वज्रस्तु तत् कन्धरम् आशुवेग: कृन्तन् समन्तात् परिवर्त मान:

न्यपातयत् तावद् अहर्गणेन यो ज्योतिषाम् अयने वार्त्र हत्ये

34 तदा च खे दुन्दुभयो विनेदु: गन्धर्व सिद्धा: स महर्षि सङ्घा:

वार्त्रघ्न लिङ्गै: तम् अभिष्टुवाना मन्त्रैर् मुदा कुसुमै: अभ्यवर्षन्

35 वृत्रस्य देहान् निष्क्रान्तम् आत्म ज्योतिर् अरिन्दम

पश्यताम् सर्व लोकानाम् अलोकम् समपद् यत

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

षष्ट स्कन्दे द्वा दशो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ षष्ट स्कन्दः त्रयो दशो ऽध्याय :

स्कन्द- *06:* अध्याय- *13*

*01* श्री शुक उवाच

वृत्रे हते त्रयो लोका विना शक्रेण भूरिद

सपाला ह्यभवन् सद्यो विज्वरा निर्वृत् एन्द्रियाः

*02* देवर्षि पितृ भूतानि दैत्या देवानुगाः स्वयम्

प्रति जग्मुः स्व धिष्ण्यानि ब्रह्मे शेन्द्रा दयस् ततः

*03* श्री राजो वाच

इन्द्रस्या निर्वृतेर् हेतुम् श्रोतु मिच्छामि भो मुने

येनासन् सुखिनो देवा हरेर् दुःखम् कुतो ऽभवत्

*04* श्री शुक उवाच

वृत्र विक्रम सम्विग्नाः सर्वे देवाः सहर्षिभिः

तद् वधा यार्थयन् इन्द्रम् नैच् छद्भीतो बृहद् वधात्

*05* इन्द्र उवाच

स्त्री भू जल द्रुमैर् एनो विश्वरूप वधोद् भवम्

विभक्तम् अनु गृह्णद्भिः वृत्र हत्याम् क्व माज्म्र्यहम्

*06* श्री शुक उवाच

ऋषयः तद् उपाकर्ण्य महेन्द्रम् इदम् अब्रुवन्

याज यिष्याम भद्रम् ते ह्यमेधेन मा स्म भैः

*07* ह्यमेधेन पुरुषम् परम् आत्मानम् ईश्वरम्

इष्ट्वा नारायणम् देवम् मोक्ष्यसे ऽपि जगद् वधात्

08 ब्रह्महा पितृहा गोघ्नो मातृहा आचार्य हाघवान्

श्वादः पुल्कसको वापि शुद्ध्येरन् यस्य कीर्तनात्

09 तम् अश्व मेधेन महा मखेन श्रद्धान् वितो ऽस्माभिर् अनुष्ठितेन

हत्वापि स ब्रह्म चराचरम् त्वम् न लिप्यसे किम् खल निग्रहेण

10 श्री शुक उवाच

एवम् सञ्चोदितो विप्रैः मरुत्वान् अहनद्रिपुम्

ब्रह्महत्या हते तस्मिन् आससाद वृषा कपिम्

11 तयेन्द्रः स्मासहत् तापम् निर्वृतिर् नामुमा विशत्

ह्रीमन्तम् वाच्यताम् प्राप्तम् सुखयन्त् यपि नो गुणाः

12 ताम् द दर्शानु धावन्तीम् चाण्डाळीम् इव रूपिणीम्

जरया वेप मानाङ्गीम् यक्ष्म ग्रस्ताम् असृक्पटाम्

13 विकीर्य पलितान् केशान् तिष्ठ तिष्ठेति भाषिणीम्

मीन गन्धि असुगन्धेन कुर्वतीम् मार्ग दूषणम्

14 नभो गतो दिशः सर्वाः सहस्राक्षो विशाम् पते

प्रागु दीचीम् दिशम् तूर्णम् प्रविष्टो नृप मानसम्

15 स आवसत् पुष्कर नाल तन्तून् अलब्ध भोगो यदि हाग्नि दूतः

वर्षाणि साहस्रम् अलक्षितो ऽन्तः सञ्चिन्तयन् ब्रह्म वधाद् विमोक्षम्

16 तावत् त्रिणाकम् नहुषः शशास विद्या तपो योग बलानु भावः

स सम्पद् ऐश्वर्यम् अदान्ध बुद्धिः नीतस् तिरश्चाम् गतिम् इन्द्र पत्न्या

17 ततो गतो ब्रह्म गिरोप हूत ऋतम्भर ध्यान निवारि ताघः

पापस्तु दिग् देवतया हतौजाः तम् नाभ्य भूद् अवितम् विष्णु पत्न्या

18 तम् च ब्रह्म र्षयो ऽभ्येत्य हय मेधेन भारत

यथावद् दीक्षयाम् चक्रुः पुरुष् आराधनेन ह

19 अथेज्यमाने पुरुषे सर्व देव मयात्मनि

अश्वमेधे महेन्द्रेण वितते ब्रह्म वादिभिः

20 स वै त्वाष्ट्रवधो भूयान् अपि पापचयो नृप

नीतस् तेनैव शून्याय नीहार इव भानुना

21 स वाजिमेधेन यथोदितेन विताय मानेन मरीचि मिश्रै:

इष्ट्वाधि यज्ञम् पुरुषम् पुराणम् इन्द्रो महानास विधूत पाप:

22 इदम् महाख्यानम् अशेष पाप्मनाम् प्रक्षालनम् तीर्थ पदानु कीर्तनम्

भक्त्युच् छ्रयम् भक्त जनानु वर्णनम् महेन्द्र मोक्षम् विजयम् मरुत् वत:

23 पठेयुर् आख्यानम् इदम् सदा बुधा: शृण्वन्त् यथो पर्वणि पर्वण् ईन्द्रियम्

धन्यम् यशस्यम् निखिलाघ मोचनम् रिपुञ्जयम् स्वस्त्ययनम् तथ् आयुषम्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

षष्ट स्कन्दे त्रयो दशो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ षष्ट स्कन्द: चतुर् दशो ऽध्याय :

स्कन्द- 06: अध्याय- 14

01 श्री परीक्षिद् उवाच

रजस् तम:स्वभावस्य ब्रह्मन् वृत्रस्य पाप्मन:

नारायणे भगवति कथम् आसीद् दृढा मति:

02 देवानाम् शुद्ध सत्त्वानाम् ऋषीणाम् चामल् आत्मनाम्

भक्ति: मुकुन्द चरणे न प्रायेणोप जायते

03 रजोभि: सम सङ्ख्याता: पार्थि वैरिह जन्तव:

तेषाम् ये केचने हन्ते श्रेयो वै मनुजादय:

04 प्रायो मुमुक्षवस् तेषाम् केचनैव द्विजोत्तम

मुमुक्षूणाम् सहस्रेषु कश्चिन् मुच्येत सिध्यति

05 मुक्तानाम् अपि सिद्धानाम् नारायण परायणः

सु दुर्लभः प्रशान्त् आत्मा कोटिष्वपि महामुने

06 वृत्रस्तु स कथम् पापः सर्व लोकोप तापनः

इत्थम् दृढ मतिः कृष्ण आसीत् सङ्ग्राम उल्बणे

07 अत्र नः सम्शयो भूयात् छ्रोतुम् कौतूहलम् प्रभो

यः पौरुषेण समरे सहस्राक्षम् अतोषयत्

08 श्री सूत उवाच

परीक्षितो ऽथ सम्प्रश्नम् भगवान् बादरायणिः

निशम्य श्रद्द धानस्य प्रति नन्द्य वचो ऽब्रवीत्

09 श्री शुक उवाच

शृणुष्वा वहितो राजन् इतिहासम् इमम् यथा

श्रुतम् द्वैपायन मुखात् नारदाद् देवलाद् अपि

10 आसीद् राजा सार्व भौमः शूरसेनेषु वै नृप

चित्रकेतुर् इति ख्यातो यस्यासीत् काम धुङ्मही

11 तस्य भार्या सहस्राणाम् सहस्राणि दशा भवन्

सान्तानि कश्चापि नृपो न लेभे तासु सन्ततिम्

12 रूपौ दार्य वयो जन्म विद् यैश्वर्य श्रियादिभिः

सम्पन् नस्य गुणैः सर्वैः चिन्ता बन्ध्यापतेर् अभूत्

13 न तस्य सम्पदः सर्वा महिष्यो वाम लोचनाः

सार्व भौमस्य भूश् चेयम् अभवन् प्रीति हेतवः

14 तस्यै कदा तु भवनम् अङ्गिरा भगवान् ऋषिः

लोकान् अनुचरन् नेतान् उपागच्छद् यदृच्छया

15 तम् पूजयित्वा विधिवत् प्रत् युत्थानार् हणादिभिः

कृत् आतिथ्यम् उपासीदत् सुखासीनम् समाहितः

16 महर्षिः तम् उपासीनम् प्रश्रया वनतम् क्षितौ

प्रति पूज्य महाराज समा भाष्येद् अमब्रवीत्

17 अङ्गिरा उवाच

अपि ते ऽनामयम् स्वस्ति प्रकृतीनाम् तथ् आत्मनः

यथा प्रकृतिभिर् गुप्तः पुमान् राजापि सप्तभिः

18 आत्मानम् प्रकृतिषु अद्धा निधाय श्रेय आप्नुयात्

राज्ञा तथा प्रकृतयो नर देवा आहिताधयः

19 अपि दाराः प्रजा मात्या भृत्याः श्रेण्यो ऽथ मन्त्रिणः

पौरा जानपदा भूपा आत्मजा वश वर्तिनः

20 यस् यात्मानु वशश् चेत्स्यात् सर्वे तद् वशगा इमे

लोकाः सपाला यच्छन्ति सर्वे बलिम् अतन्द्रिताः

21 आत्मनः प्रीयते नात्मा परतः स्वत एव वा

लक्षये ऽलब्ध कामम् त्वाम् चिन्तया शबलम् मुखम्

22 एवम् विकल्पितो राजन् विदुषा मुनिनापि सः

प्रश्रया वनतो ऽभ्याह प्रजा कामस् ततो मुनिम्

23 चित्रकेतुर् उवाच

भगवन् किम् न विदितम् तपो ज्ञान समाधिभिः

योगिनाम् ध्वस्त पापानाम् बहिर् अन्तः शरीरिषु

24 तथापि पृच्छतो ब्रूयाम् ब्रह्मन् आत्मनि चिन्तितम्

भवतो विदुषश् चापि चोदितस् त्वद् अनुज्ञया

25 लोक पालैर् अपि प्रार्थ्याः साम्राज् यैश्वर्य सम्पदः

न नन्दयन्ति अप्रजम् माम् क्षुत् तृट् कामम् इवापरे

26 ततः पाहि महा भाग पूर्वैः सह गतम् तमः

यथा तरेम दुस्तारम् प्रजया तद् विधेहि नः

27 श्री शुक उवाच

इत् यर्थितः स भगवान् कृपालुर् ब्रह्मणः सुतः

श्रप यित्वा चरुम् त्वाष्ट्रम् त्वष्टारम् अयजद् विभुः

28 ज्येष्ठा श्रेष्ठा च या राज्ञो महिषीणाम् च भारत

नाम्ना कृतद्युतिः तस्यै यज्ञोच् छिष्टम् अदाद्द्विजः

29 अथाह नृपतिम् राजन् भवितै कस्तव् आत्मजः

हर्ष शोक प्रदस् तुभ्यम् इति ब्रह्म सुतो ययौ

30 सापि तत् प्राशना देव चित्रकेतोर् अधारयत्

गर्भम् कृतद्युतिर् देवी कृत्तिकाग्नेर् इवात्मजम्

31 तस्या अनुदिनम् गर्भः शुक्ल पक्ष इवोडुपः

ववृधे शूर सेनेश तेजसा शनकैर् नृप

32 अथ काल उपावृत्ते कुमारः समजायत

जनयन् शूर सेनानाम् शृण्वताम् परमाम् मुदम्

33 हृष्टो राजा कुमारस्य स्नातः शुचिर् अलङ्कृतः

वाचयित्वा शिषो विप्रैः कारया मास जातकम्

34 तेभ्यो हिरण्यम् रजतम् वासाम्सि आभरणानि च

ग्रामान् हयान् गजान् प्रादाद् धेनूनाम् अर्बुदानि षट्

35 ववर्ष कामान् अन्येषाम् पर्जन्य इव देहिनाम्

धन्यम् यशस्यम् आयुष्यम् कुमारस्य महामनाः

36 कृच्छ्र लब्धे ऽथ राजर्षेः तनये ऽनुदिनम् पितुः

यथा निः स्वस्य कृच् छ्राप्ते धने स्नेहो ऽन्व वर्धत

37 मातुस्त्वति तराम् पुत्रे स्नेहो मोह समुद्भवः

कृतद्युतेः स पत्नीनाम् प्रजा काम ज्वरो ऽभवत्

38 चित्रकेतोर् अति प्रीतिः यथा दारे प्रजावति

न तथा अन्येषु सञ्जज्ञे बालम् लालयतो ऽन्वहम्

39 ताः पर्यतप्यन् आत्मानम् गर्हयन्त्यो ऽभ्य सूयया

आनपत्येन दुःखेन राज्ञो अनादरेण च

40 धिग् अप्रजाम् स्त्रियम् पापाम् पत्युश् चा गृह सम्मताम्

सुप्रजाभिः स पत्नीभिः दासीम् इव तिरस् कृताम्

41 दासीनाम् को नु सन्तापः स्वामिनः परिचर्यया

अभीक्ष्णम् लब्ध मानानाम् दास्या दासीव दुर्भगाः

42 एवम् सन्दह्य मानानाम् स पत्न्याः पुत्र सम्पदा

राज्ञो ऽसम्मत वृत्तीनाम् विद्वेषो बलवान् अभूत्

43 विद्वेष नष्ट मतयः स्त्रियो दारुण चेतसः

गरम् ददुः कुमाराय दुर्मर्षा नृपतिम् प्रति

44 कृतद्युतिर् अजानन्ती स पत्नीनाम् अघम् महत्

सुप्त एवेति सञ्चिन्त्य निरीक्ष्य व्यचरद् गृहे

45 शयानम् सुचिरम् बालम् उपधार्य मनीषिणी

पुत्रम् आनय मे भद्रे इति धात्रीम् अचोदयत्

46 सा शयानम् उपव्रज्य दृष्ट्वा चोत्तार लोचनम्

प्राणेन्द्रि यात्मभिस् त्यक्तम् हतास्मीत् यप तद् भुवि

47 तस्यास् तदा कर्ण्य भृशातुरम् स्वरम् घ्नन्त्याः कराभ्याम् उर उच्चकैर् अपि

प्रविश्य राज्ञी त्वर यात्म जान्तिकम् ददर्श बालम् सहसा मृतम् सुतम्

48 पपात भूमौ परि वृद्धया शुचा मुमोह विभ्रष्ट शिरोरु हाम्बरा

49 ततो नृपान्तः पुरवर्तिनो जना नराश्च नार्यश्च निशम्य रोदनम्

आगत्य तुल्य व्यसनाः सु दुःखिताः ताश्च व्यलीकम् रुरुदुः कृतागसः

50 श्रुत्वा मृतम् पुत्रम् अलक्षितान् तकम् विनष्ट दृष्टिः प्रपतन् स्खलन् पथि

स्नेहानु बन्धै धितया शुचा भृशम् विमूर्च्छितो ऽनु प्रकृतिर् द्विजैर् वृतः

51 पपात बालस्य स पाद मूले मृतस्य विस्रस्त शिरोरु हाम्बरः

दीर्घम् श्वसन् बाष्प कलोप रोधतो निरुद्ध कण्ठो न शशाक भाषितुम्

52 पतिम् निरीक्ष्योरु शुचार्पितम् तदा मृतम् च बालम् सुतम् एक सन्ततिम्

जनस्य राज्ञी प्रकृतेश्च हृद्रुजम् सती दधाना विललाप चित्रधा

53 स्तन द्वयम् कुङ्कुम गन्ध मण्डितम् निषिञ्चती साञ्जन बाष्प बिन्दुभिः

विकीर्य केशान् विगलत् स्रजः सुतम् शुशोच चित्रम् कुररीव सुस्वरम्

54 अहो विधातस् त्वम् अतीव बालिशो यस्त् वात्म सृष्ट्य प्रति रूप मीहसे

परे नु जीवत्य परस्य या मृतिः विपर्ययश् चेत् त्वमसि ध्रुवः परः

55 न हि क्रमश् चेदिह मृत्यु जन्मनोः शरीरिणाम् अस्तु तद् आत्म कर्मभिः

य: स्नेह पाशो निज सर्ग वृद्धये स्वयम् कृतस्ते तम् इमम् विवृश्चसि

56 त्वम् तात नार्हसि च माम् कृपणा मनाथाम्

त्यक्तुम् विचक्ष्व पितरम् तव शोक तप्तम्

अञ्जस्तरेम भवता प्रज दुस्तरम् यद्

ध्वान्तम् न याहि अकरुणेन यमेन दूरम्

57 उत्तिष्ठ तात त इमे शिशवो वयस्याः

त्वाम् आह्वयन्ति नृप नन्दन सम् विहर्तुम्

सुप्तश् चिरम् ह्य् अशनया च भवान् परीतो

भुङ्क्ष्व स्तनम् पिब शुचो हर नः स्व कानाम्

58 नाहम् तनूज दद्दशे हत मङ्गला ते

मुग्ध स्मितम् मुदित वीक्षणम् आननाब्जम्

किम् वा गतो ऽसि अपुनर् अन्वयम् अन्यलोकम्

नीतो ऽघृणेन न शृणोमि कला गिरस्ते

59 श्री शुक उवाच

विलपन्त्या मृतम् पुत्रम् इति चित्र विलापनैः

चित्रकेतुर् भृशम् तप्तो मुक्त कण्ठो रुरोद ह

60 तयोर् विलपतोः सर्वे दम्पत्योस् तद् अनुव्रताः

रुरुदुः स्म नरा नार्यः सर्वमासीद् अचेतनम्

61 एवम् कश्मलम् आपन्नम् नष्ट सम्ज्ञम् अनायकम्

ज्ञात् वाङ्गिरा नाम मुनिः आजगाम सनारदः

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

षष्ट स्कन्दे चतुर् दशो ऽध्याय ः॥

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ षष्ट स्कन्द: पञ्च दशो ऽध्याय :

स्कन्द- 06: अध्याय- 15

01 श्री शुक उवाच

ऊचतुर् मृत कोपान्ते पतितम् मृत कोपमम्

शोकाभि भूतम् राजानम् बोधयन्तौ स दुक्तिभि:

02 को ऽयम् स्यात्तव राजेन्द्र भवान् यम् अनुशोचति

त्वम् चास्य कतम: सृष्टौ पुरेदानी मत: परम्

03 यथा प्रयान्ति सम्यान्ति स्रोतो वेगेन वालुका:

सम्युज्यन्ते वियुज्यन्ते तथा कालेन देहिन:

04 यथा धानासु वै धाना भवन्ति न भवन्ति च

एवम् भूतेषु भूतानि चोदितानि ईशमायया

05 वयम् च त्वम् च ये चेमे तुल्य कालाश् चराचरा:

जन्म मृत्योर् यथा पश्चात् प्राङ् नैवम् अधुनापि भो:

06 भूतैर् भूतानि भूतेश: सृजत्यवति हन्त्यच

आत्म सृष्टै: अस्वतन्त्रै: अनपेक्षो ऽपि बालवत्

07 देहेन देहिनो राजन् देहाद् देहो ऽभिजायते

बीजा देव यथा बीजम् देह्यर्थ इव शाश्वत:

08 देह देहि विभागो ऽयम् अविवेक कृत: पुरा

जाति व्यक्ति विभागो ऽयम् यथा वस्तुनि कल्पित:

09 श्री शुक उवाच

एवम् आश्वासितो राजा चित्रकेतु: द्विजोक्तिभि:

प्रमृज्य पाणिना वक्त्रम् आधिम् लानम् अभाषत

10 श्री राजो वाच

कौ युवाम् ज्ञान सम्पन्नौ महिष्ठौ च महीयसाम्

अवधूतेन वेषेण गूढाविह समागतौ

11 चरन्ति ह्यवनौ कामम् ब्राह्मणा भगवत् प्रिया:

मादृशाम् ग्राम्य बुद्धीनाम् बोधाय उन्मत्त लिङ्गिन:

12 कुमारो नारद ऋभु: अङ्गिरा देवलो ऽसित:

अपान् तरतमो व्यासो मार्कण्डेयो ऽथ गौतम:

13 वसिष्ठो भगवान् राम: कपिलो बादरायणि:

दुर्वासा याज्ञ वल्क्यश् च जातु कर्णस्त थारुणि:

14 रोमशश् च्यवनो दत्त आसुरि: सपत् अञ्जलि:

ऋषि: वेदशिरा बोध्यो मुनि: पञ्च शिरास् तथा

15 हिरण्यनाभ: कौशल्य: श्रुत देव ऋतध्वज:

एते परे च सिद्धेशा: चरन्ति ज्ञान हेतव:

16 तस्माद् युवाम् ग्राम्य पशो: मम मूढधिय: प्रभू

अन्धे तमसि मग्नस्य ज्ञान दीप उदीर्यताम्

17 श्री अङ्गिरा उवाच

अहम् ते पुत्र कामस्य पुत्रदो ऽस्म् यङ्गिरा नृप

एष ब्रह्म सुत: साक्षात् नारदो भगवान् ऋषि:

18 इत्थम् त्वाम् पुत्र शोकेन मग्नम् तमसि दुस्तरे

अत दर्हम् अनुस्मृत्य महा पुरुष गोचरम्

19 अनुग्रहाय भवत: प्राप्तौ आवामिह प्रभो

ब्रह्मण्यो भगवद् भक्तो नावईद् इतुमर्हसि

20 तदैव ते परम् ज्ञानम् ददामि गृहम् आगत:

ज्ञात्वान् याभि निवेशम् ते पुत्रमेव ददावहम्

21 अधुना पुत्रिणाम् तापो भवतैव् आनुभूयते

एवम् दारा गृहा रायो विविध् ऐश्वर्य सम्पद:

22 शब्दाद यश्च विषया: चला राज्य विभूतय:

मही राज्यम् बलम् कोषो भृत्या मात्य सुहृज् जनाः

23 सर्वे ऽपि शूरसेने मे शोक मोह भयार्तिदाः

गन्धर्व नगर प्रख्याः स्वप्न माया मनोरथाः

24 दृश्यमाना विनार्थेन न दृश्यन्ते मनो भवाः

कर्मभिः ध्यायतो नाना कर्माणि मनसो ऽभवन्

25 अयम् हि देहिनो देहो द्रव्य ज्ञान क्रियात्मकः

देहिनो विविध क्लेश सन्ताप कृद् उदाहृतः

26 तस्मात् स्वस्थेन मनसा विमृश्य गतिम् आत्मनः

द्वैते ध्रुवार्थ विश्रम्भम् त्यज उपशमम् आविश

27 श्री नारद उवाच

एताम् मन्त्रोप निषदम् प्रतीच्छ प्रयतो मम

याम् धारयन् सप्त रात्राद् द्रष्टा सङ्कर्षणम् प्रभुम्

28 यत् पाद मूलम् उपसृत्य नरेन्द्र पूर्वे

शर्वादयो भ्रमम् इमम् द्वितयम् विसृज्य

सद्यस् तदीयम् अतुलान् अधिकम् महित्वम्

प्रापुर् भवान् अपि परम् न चिराद् उपैति

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

षष्ट स्कन्दे पञ्च दशो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ षष्ट स्कन्दः षोडशो ऽध्याय :

स्कन्द- 06: अध्याय- 16

01 श्री शुक उवाच

अथ देव ऋषी राजन् सम्परेतम् नृपात्मजम्

दर्शयित् वेति होवाच ज्ञातीनाम् अनुशोचताम्

02 श्री नारद उवाच

जीवात्मन् पश्य भद्रम् ते मातरम् पितरम् च ते

सुहृदो बान्धवास् तप्ता: शुचा त्वत् कृतया भृशम्

03 कळेवरम् स्वम् आविश्य शेषम् आयु: सुहृद् वृत:

भुङ्क्ष्व भोगान् पितृ प्रत्तान् अधितिष्ठ नृपासनम्

04 जीव उवाच

कस्मिन् जन्मन् यमी मह्यम् पितरो मातरो ऽभवन्

कर्मभिर् भ्राम्य माणस्य देव तिर्यङ् नृयोनिषु

05 बन्धु ज्ञात्य रिमध्यस्थ मित्रो दासीन विद्विष:

सर्व एव हि सर्वेषाम् भवन्ति क्रमशो मिथ:

06 यथा वस्तूनि पण्यानि हेमादीनि ततस् तत:

पर्यटन्ति नरेष्वेवम् जीवो योनिषु कर्तृषु

07 नित्यस्य अर्थस्य सम्बन्धो ह्यनित्यो दृश्यते नृषु

यावद् यस्य हि सम्बन्धो ममत्वम् ताव देव हि

08 एवम् योनिगतो जीव: स नित्यो निरहङ्कृत:

यावद् यत्रोप लभ्येत तावत् स्वत्वम् हि तस्य तत्

09 एष नित्यो ऽव्यय: सूक्ष्म एष सर्वाश्रय: स्वदृक्

आत्म माया गुणैर् विश्वम् आत्मानम् सृजति प्रभु:

10 न ह्यस्यास्ति प्रिय: कश्चित् नाप्रिय: स्व: परो ऽपि वा

एक: सर्व धियाम् द्रष्टा कर्तृऋणाम् गुण दोषयो:

11 नादत्त आत्मा हि गुणम् न दोषम् न क्रिया फलम्

उदासीन वद् आसीन: परावर दृग् ईश्वर:

12 श्री शुक उवाच

इत् युदीर्य गतो जीवो ज्ञात यस्तस्य ते तदा

विस्मिता मुमुचु: शोकम् छित्त्वा आत्म स्नेह शृङ्खलाम्

13 निर्हृत्य ज्ञातयो ज्ञाते: देहम् कृत् वोचिता: क्रिया:

तत् यजु: दुस्त्यजम् स्नेहम् शोक मोह भयार्तिदम्

14 बालघ्न्यो व्रीडितास् तत्र बालहत्या हत प्रभा:

बालहत्या व्रतम् चेरु: ब्राह्मणै: यन् निरूपितम्

यमुनायाम् महाराज स्मरन्त्यो द्विज भाषितम्

15 स इत्थम् प्रति बुद्धात्मा चित्रकेतुर् द्विजोक्तिभि:

गृह् आन्धकूपान् निष्क्रान्त: सर: पङ्कादिव द्विप:

16 काळिन्द्याम् विधिवत् स्नात्वा कृत पुण्य जलक्रिय:

मौनेन सम्यत प्राणो ब्रह्म पुत्राव वन्दत

17 अथ तस्मै प्रपन्नाय भक्ताय प्रयत् आत्मने

भगवान् नारद: प्रीतो विद्या मेताम् उवाच ह

18 ओम् नमस् तुभ्यम् भगवते वासुदेवाय धीमहि

प्रद्युम्नाय अनिरुद्धाय नम: सङ्कर्षणाय च

19 नमो विज्ञान मात्राय परमानन्द मूर्तये

आत्मा रामाय शान्ताय निवृत्त द्वैत दृष्टये

20 आत्म् आनन्दानु भूत्यैव न्यस्त शक्त्यूर् मये नम:

हृषीकेशाय महते नमस्ते विश्वमूर्तये

21 वचस् युपरते ऽप्राप्य य एको मनसा सह

अनाम रूप: चिन्मात्र: सो ऽव्यान्न: सदसत् पर:

22 यस्मिन् इदम् यतश् चेदम् तिष्ठत् यप्येति जायते

मृण्मयेष् विव मृज्जाति: तस्मै ते ब्रह्मणे नम:

23 यन्न स्पृशन्ति न विदु: मनो बुद्ध् ईन्द्रिया सव:

अन्तर् बहिश्च विततम् व्योमवत् तन्नतो ऽस्म्यहम्

24 देहेन्द्रिय प्राण मनोधियो ऽमी यदम्श विद्धा: प्रचरन्ति कर्मसु

नैवान् यदा लोहम् इवाप्र तप्तम् स्थानेषु तद् द्रष्ट्र पदेश मेति

25 ओम् नमो भगवते महा पुरुषाय महानु भावाय महा विभूति पतये

सकल सात्वत परिव्रुढ निकर कर कमल कुड्मलोप लालित चरण् आरविन्द युगळ परम परमेष्ठिन् नमस्ते

26 श्री शुक उवाच

भक्ता यैताम् प्रपन्नाय विद्याम् आदिश्य नारदः

ययौ अङ्गिरसा साकम् धाम स्वायम् भुवम् प्रभो

27 चित्रकेतुस्तु विद्याम् ताम् यथा नारद भाषिताम्

धारया मास सप्ताहम् अब्भक्षः सु समाहितः

28 ततः स सप्त रात्रान्ते विद्यया धार्य माणया

विद्याधर् आधिपत्यम् च लेभे ऽप्रतिहतम् नृप

29 ततः कतिपया होभिः विद्य येद्ध मनोगतिः

जगाम देव देवस्य शेषस्य चरणान्तिकम्

30 मृणाल गौरम् शितिवाससम् स्फुरत् किरीट केयूर कटित्र कङ्कणम्

प्रसन्न वक्त्रारुण लोचनम् वृतम् ददर्श सिद्धेश्वर मण्डलैः प्रभुम्

31 तद् दर्शन ध्वस्त समस्त किल्बिषः स्वच् छामलान्तः करणो ऽभ्ययान् मुनिः

प्रवृद्ध भक्त्या प्रणयाश्रु लोचनः प्रहृष्ट रोमान मद् आदि पूरुषम्

32 स उत्तम श्लोक पदाब्ज विष्टरम् प्रेम् आश्रु लेशैः उपमेहयन् मुहुः

प्रेमोप रुद् धाखिल वर्ण निर्गमो नैवाशकत् तम् प्रसमीडितुम् चिरम्

33 ततः समाधाय मनो मनीषया बभाष एतत् प्रतिलब्ध वागसौ

नियम्य सर्वेन्द्रिय बाह्य वर्तनम् जगद् गुरुम् सात्वत शास्त्र विग्रहम्

34 चित्रकेतुर् उवाच

अजित जितः सम मतिभिः साधुभिर् भवान् जितात्मभिर् भवता

विजितास्ते ऽपि च भजताम् अकाम् आत्मनाम् य आत्मदो ऽति करुणः

35 तव विभवः खलु भगवन् जगद् उदय स्थिति लयादीनि

विश्व सृजस्ते ऽम्शाम्शाः तत्र मृषा स्पर्धन्ति पृथग् अभिमत्या

36 परमाणु परम महतोः त्वम् आद्यन्तान् तरवर्ती त्रय विधुरः

आदावन्ते ऽपि च सत्त्वानाम् यद् ध्रुवम् तद् एव अन्तराले ऽपि

37 क्षित्यादिभिर् एष किलावृतः सप्तभिः दश गुणोत्तरैर् आण्डकोशः

यत्र पतत् यणुकल्पः सहाण्ड कोटि कोटिभिस् तद् अनन्तः

38 विषय तृषो नर पशवो य उपासते विभूतीर् न परम् त्वाम्

तेषाम् आशिष ईश तदनु विनश्यन्ति यथा राजकुलम्

39 कामधियः त्वयि रचिता न परम रोहन्ति यथा करम्भ बीजानि

ज्ञानात्मनि अगुणमये गुण गणतो ऽस्य द्वन्द्व जालानि

40 जितम् अजित तदा भवता यदाह भागवतम् धर्मम् अनवद्यम्

निष्किञ्चना ये मुनय आत्मारामा यम् उपासते ऽपवर्गाय

41 विषममतिः न यत्र नृणाम् त्वम् अहम् इति मम तवेति च यदन् यत्र

विषमधिया रचितो यः स ह्यवि शुद्धः क्षयिष्णुः अधर्म बहुलः

42 कः क्षेमो निजपरयोः कियानर्थः स्व परद्रुहा धर्मेण

स्व द्रोहात् तव कोपः परसम् पीडया च तथ अधर्मः

43 न व्यभि चरति तवेक्षा यया ह्यभिहितो भागवतो धर्मः

स्थिरचर सत्त्व कदम्बेषु अपृथग्धियो यमुपासते त्वार्याः

44 न हि भगवन् अघटितम् इदम् त्वद् दर्शनात् नृणाम् अखिल पाप क्षयः

यन् नाम स कृच् छ्रवणात् पुल्कशो ऽपि विमुच्यते सम्सारात्

45 अथ भगवन् वयम् अधुना त्वदव लोक परि मृष्टाश यमलाः

सुरऋषिणा यद् उदितम् तावकेन कथम् अन्यथा भवति

46 विदितम् अनन्ता समस्तम् तव जगद् आत्मनो जनैर् इहा चरितम्

विज्ञाप्यम् परमगुरोः कियदिव सवितुरिव खद्योतैः

47 नमस् तुभ्यम् भगवते सकल जगत् स्थिति लयो दयेशाय

दुरवसित् आत्म गतये कुयोगिनाम् भिदा परम हम्साय

48 यम् वै श्वसन्तम् अनु विश्वसृजः श्वसन्ति

यम् चेकितानम् अनु चित्तय उच्चकन्ति

भू मण्डलम् सर्ष पायति यस्य मूर्ध्नि

तस्मै नमो भगवते ऽस्तु सहस्र मूर्ध्ने

49 श्री शुक उवाच

सम्स्तुतो भगवान् एवम् अनन्तस्तम् अभाषत

विद्याधर पतिम् प्रीतः चित्रकेतुम् कुरूद्वह

50 श्री भगवान् उवाच

यन् नारद् आङ्गिरोभ्याम् ते व्याहृतम् मे ऽनुशासनम्

सम्सिद्धो ऽसि तया राजन् विद्यया दर्शनाच्च मे

51 अहम् वै सर्व भूतानि भूतात्मा भूत भावनः

शब्द ब्रह्म परम् ब्रह्म ममोभे शाश्वती तनू

52 लोके विततम् आत्मानम् लोकम् चात्मनि सन्ततम्

उभयम् च मया व्याप्तम् मयि चैवोभयम् कृतम्

53 यथा सुषुप्तः पुरुषो विश्वम् पश्यति चात्मनि

आत्मानम् एक देशस्थम् मन्यते स्वप्न उत्थितः

54 एवम् जागरणादीनि जीवस् थानानि चात्मनः

माया मात्राणि विज्ञाय तद् द्रष्टारम् परम् स्मरेत्

55 येन प्रसुप्तः पुरुषः स्वापम् वेद् आत्मनस् तदा

सुखम् च निर्गुणम् ब्रह्म तम् आत्मानम् अवेहिमाम्

56 उभयम् स्मरतः पुम्सः प्रस्वाप प्रति बोधयोः

अन्वेति व्यतिर् इच्येत तज् ज्ञानम् ब्रह्म तत्परम्

57 यदेतद् विस्मृतम् पुम्सो मद् भावम् भिन्नम् आत्मनः

ततः सम्सार एतस्य देहाद् देहो मृतेर् मृतिः

58 लब्ध्वेह मानुषीम् योनिम् ज्ञान विज्ञान सम्भवाम्

आत्मानम् यो न बुद्ध्येत न क्वचित् छमम् आप्नुयात्

59 स्मृत्वे हायाम् परिक्लेशम् ततः फल विपर्ययम्

अभयम् चाप्य नीहायाम् सङ्कल्पाद् विरमेत् कविः

60 सुखाय दुःख मोक्षाय कुर्वाते दम्पती क्रियाः

ततो ऽनिवृत्तिः अप्राप्तिः दुःखस्य च सुखस्य च

61 एवम् विपर्ययम् बुद्ध्वा नृणाम् विज्ञाभि मानिनाम्

आत्मनश्च गतिम् सूक्ष्माम् स्थान त्रय विलक्षणाम्

62 दृष्ट श्रुताभिः मात्राभिः निर्मुक्तः स्वेन तेजसा

ज्ञान विज्ञान सन्तुष्टो मद् भक्तः पुरुषो भवेत्

63 एतावान् एव मनुजैः योग नैपुण बुद्धिभिः

स्वार्थः सर्वात्मना ज्ञेयो यत् परात्मैक दर्शनम्

64 त्वमेतत् छ्रद्धया राजन् अप्रमत्तो वचो मम

ज्ञान विज्ञान सम्पन्नो धारयन् आशु सिध्यसि

65 श्री शुक उवाच

आश्वास्य भगवान् इत्थम् चित्रकेतुम् जगद् गुरुः

पश्यतस् तस्य विश्वात्मा ततश् चान्तर् दधे हरिः

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

षष्ट स्कन्दे षोडशो ऽध्याय ः||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ षष्ट स्कन्दः सप्त दशो ऽध्याय ः

स्कन्द- 06: अध्याय- 17

01 श्री शुक उवाच

यतश् चान्तर् हितो ऽनन्तः तस्यै कृत्वा दिशे नमः

विद्याधरः चित्रकेतुः चचार गगने चरः

02 स लक्षम् वर्ष लक्षाणाम् अव्याहत बलेन्द्रियः

स्तूयमानो महा योगी मुनिभिः सिद्ध चारणैः

03 कुला चलेन्द्र द्रोणीषु नाना सङ्कल्प सिद्धिषु

रेमे विद्याधर स्त्रीभिः गापयन् हरिम् ईश्वरम्

04 एकदा स विमानेन विष्णु दत्तेन भास्वता

गिरिशम् ददृशे गच्छन् परीतम् सिद्ध चारणैः

05 आलिङ्ग् याङ्की कृताम् देवीम् बाहुना मुनि सम्सदि

उवाच देव्याः शृण्वन्त्या जहासोच्चैः तदन्तिके

06 चित्रकेतुर् उवाच

एष लोक गुरुः साक्षाद् धर्मम् वक्ता शरीरिणाम्

आस्ते मुख्यः सभायाम् वै मिथुनी भूय भार्यया

07 जटाधरः तीव्र तपा ब्रह्मवादि सभापतिः

अङ्कीकृत्य स्त्रियम् चास्ते गतह्रीः प्राकृतो यथा

08 प्रायशः प्राकृताश् चापि स्त्रियम् रहसि बिभ्रति

अयम् महा व्रत धरो बिभर्ति सदसि स्त्रियम्

09 श्री शुक उवाच

भगवान् अपि तच् छ्रुत्वा प्रहस्या गाधधीर् नृप

तूष्णीम् बभूव सदसि सभ्याश् च तद् अनुव्रताः

10 इत् यतद् वीर्य विदुषि ब्रुवाणे बह्व शोभनम्

रुषाह देवी धृष्टाय निर्जित् आत्माभि मानिने

11 श्री पार्वत् युवाच

अयम् किमधुना लोके शास्ता दण्ड धरः प्रभुः

अस्मद् विधानाम् दुष्टानाम् निर्लज्जानाम् च विप्रकृत्

12 न वेद धर्मम् किल पद्मयोनिः न ब्रह्म पुत्रा भृगु नारदाद्याः

न वै कुमारः कपिलो मनुश्च ये नो निषेधन्त् यतिवर्तिनम् हरम्

13 एषाम् अनुध्येय पदाब्ज युग्मम् जगद् गुरुम् मङ्गळ मङ्गलम् स्वयम्

यः क्षत्र बन्धुः परिभूय सूरीन् प्रशास्ति धृष्टः तदयम् हि दण्ड्यः

14 नायमर्हति वैकुण्ठ पाद मूलोप सर्पणम्

सम्भावित मतिः स्तब्धः साधुभिः पर्युपासितम्

15 अतः पापीयसीम् योनिम् आसुरीम् याहि दुर्मते

यथेह भूयो महताम् न कर्ता पुत्र किल्बिषम्

16 श्री शुक उवाच

एवम् शप्तः चित्रकेतुः विमानाद् अवरुह्य सः

प्रसादया मास सतीम् मूर्ध्ना नम्रेण भारत

17 चित्रकेतुर् उवाच

प्रति गृह्णामि ते शापम् आत्मनो ऽञ्जलिन् आम्बिके

देवैर् मर्त्याय यत् प्रोक्तम् पूर्व दिष्टम् हि तस्य तत्

18 सम्सार चक्र एतस्मिन् जन्तुः अज्ञान मोहितः

भ्राम्यन् सुखम् च दुःखम् च भुङ्क्ते सर्वत्र सर्वदा

19 नैवात्मा न परश् चापि कर्ता स्यात् सुख दुःखयोः

कर्तारम् मन्यते ऽप्राज्ञ आत्मानम् परमेव च

20 गुण प्रवाह एतस्मिन् कः शापः को न्वनुग्रहः

कः स्वर्गो नरकः को वा किम् सुखम् दुःखम् एव वा

21 एकः सृजति भूतानि भगवान् आत्म मायया

एषाम् बन्धम् च मोक्षम् च सुखम् दुःखम् च निष्कलः

22 न तस्य कश्चिद् दयितः प्रतीपो न ज्ञाति बन्धुः न परो न च स्वः

समस्य सर्वत्र निरञ्जनस्य सुखे न रागः कुत एव रोषः

23 तथापि तच् छक्ति विसर्ग एषाम् सुखाय दुःखाय हिता हिताय

बन्धाय मोक्षाय च मृत्यु जन्मनोः शरीरिणाम् सम्सृतये ऽवकल्पते

24 अथ प्रसादये न त्वाम् शाप मोक्षाय भामिनि

यन् मन्यसे असाधूक्तम् मम तत् क्षम्यताम् सति

25 श्री शुक उवाच

इति प्रसाद्य गिरिशौ चित्रकेतुर् अरिन्दम

जगाम स्व विमानेन पश्यतोः स्मयतोस् तयोः

26 ततस्तु भगवान् रुद्रो रुद्राणीम् इदम् अब्रवीत्

देवर्षि दैत्य सिद्धानाम् पार्षदानाम् च शृण्वताम्

27 श्री रुद्र उवाच

दृष्टवत् यसि सुश्रोणि हरेर् अद्भुत कर्मणः

माहात्म्यम् भृत्य भृत्यानाम् निःस्पृहाणाम् महात्मनाम्

28 नारायण पराः सर्वे न कुतश् चन बिभ्यति

स्वर्गाप वर्ग नरकेष्व् अपि तुल्यार्थ दर्शिनः

29 देहिनाम् देह सम्योगाद् द्वन्द्वान् ईश्वर लीलया

सुखम् दुःखम् मृतिर् जन्म शापो ऽनुग्रह एव च

30 अविवेक कृतः पुम्सो ह्यर्थ भेद इवात्मनि

गुण दोष विकल्पश्च भिदेव स्रजि वत्कृतः

31 वासुदेवे भगवति भक्तिम् उद्वहताम् नृणाम्

ज्ञान वैराग्य वीर्याणाम् नेह कश्चिद् व्यपाश्रयः

32 नाहम् विरिञ्चो न कुमार नारदौ न ब्रह्म पुत्रा मुनयः सुरेशाः

विदाम यस् येहितम् अम्श काम्शका न तत् स्वरूपम् पृथगीश मानिनः

33 न ह्यस्यास्ति प्रियः कश्चित् नाप्रियः स्वः परो ऽपि वा

आत्मत्वात् सर्व भूतानाम् सर्व भूत प्रियो हरिः

34 तस्य चायम् महा भागः चित्रकेतुः प्रियो ऽनुगः

सर्वत्र सम दृक्षान्तो ह्यहम् चै वाच्युत प्रियः

35 तस्मान् न विस्मयः कार्यः पुरुषेषु महात्मसु

महा पुरुष भक्तेषु शान्तेषु सम दर्शिषु

36 श्री शुक उवाच

इति श्रुत्वा भगवतः शिवस्योम् आभि भाषितम्

बभूव शान्तधी राजन् देवी विगत विस्मया

37 इति भागवतो देव्याः प्रति शप्तुम् अलन्तमः

मूर्ध्नो सञ्जगृहे शापम् एतावत् साधु लक्षणम्

38 जज्ञे त्वष्टुर् दक्षिण् आग्नौ दानवीम् योनिम् आश्रित:

वृत्र इत्यभि विख्यातो ज्ञान विज्ञान सम्युत:

39 एतत्ते सर्वम् आख्यातम् यन्माम् त्वम् परिपृच्छसि

वृत्रस् यासुर जातेश्च कारणम् भगवन् मते:

40 इतिहासम् इमम् पुण्यम् चित्रकेतोर् महात्मन:

माहात्म्यम् विष्णु भक्तानाम् श्रुत्वा बन्धाद् विमुच्यते

41 य एतत् प्रातर् उत्थाय श्रद्धया वाग्यत: पठेत्

इतिहासम् हरिम् स्मृत्वा स याति परमाम् गतिम्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

षष्ट स्कन्दे सप्त दशो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ षष्ट स्कन्द: अष्टा दशो ऽध्याय :

स्कन्द- 06: अध्याय- 18

01 श्री शुक उवाच

पृश्निस्तु पत्नी सवितु: सावित्रीम् व्याहृतिम् त्रयीम्

अग्निहोत्रम् पशुम् सोमम् चातुर् मास्यम् महा मखान्

02 सिद्धिर् भगस्य भार्याङ्ग महिमानम् विभुम् प्रभुम्

आशिषम् च वरारोहाम् कन्याम् प्रासूत सुव्रताम्

03 धातु: कुहू: सिनीवाली राका चानु मतिस् तथा

सायम् दर्श मथ प्रात: पूर्ण मास मनुक्रमात्

04 अग्नीन् पुरीष्यान् आधत्त क्रियायाम् समनन्तरः

चर्षणी वरुणस् यासीद् यस्याम् जातो भृगुः पुनः

05 वाल्मीकिश्च महायोगी वल्मीकाद् अभवत्किल

अगस्त्यश् च वसिष्ठश् च मित्रा वरुणयोर् ऋषी

06 रेतः सिषिचतुः कुम्भे उर्वश्याः सन्निधौ द्रुतम्

रेवत्याम् मित्र उत्सर्गम् अरिष्टम् पिप्पलम् व्यधात्

07 पौलोम्याम् इन्द्र आधत्त त्रीन् पुत्रान् इति नः श्रुतम्

जयन्तम् ऋषभम् तात तृतीयम् मीढुषम् प्रभुः

08 उरुक्रमस्य देवस्य माया वामन रूपिणः

कीर्तौ पत्न्याम् बृहच् छलोकः तस्या सन्सौ भगादयः

09 तत् कर्म गुण वीर्याणि काश्यपस्य महात्मनः

पश्चाद् वक्ष्यामहे ऽदित्याम् यथा वाव ततार ह

10 अथ कश्यप दायादान् दैतेयान् कीर्तयाम् इते

यत्र भागवतः श्रीमान् प्रह्लादो बलिर् एव च

11 दितेर् द्वावेव दायादौ दैत्य दान ववन्दितौ

हिरण्य कशिपुः नाम हिरण्याक्षश् च कीर्तितौ

12 हिरण्य कशिपोर् भार्या कयाधुर् नाम दानवी

जम्भस्य तनया दत्ता सुषुवे चतुरः सुतान्

13 सम्ह्लादम् प्राग् अनुह्लादम् ह्लादम् प्रह्लादम् एव च

तत् स्वसा सिम्हिका नाम राहुम् विप्रचितो ऽग्रहीत्

14 शिरो ऽहरद्यस्य हरिः चक्रेण पिबतो ऽमृतम्

सम्ह्लादस्य कृतिर् भार्या सूत पञ्चजनम् ततः

15 ह्लादस्य धमनिर् भार्या सूत वातापि मिल्वलम्

यो ऽगस्त्या यत् वतिथये पेचे वातापि मिल्वलः

16 अनुह्लादस्य सूर्म्यायाम् बाष्कलो महिषस् तथा

विरोचनस्तु प्राह्लादिः देव्यास् तस्याभ वद्बलिः

17 बाण ज्येष्ठम् पुत्र शतम् अशनायाम् ततो ऽभवत्

तस् यानुभावः सुश्लोक्यः पश्चा देवाभि धास्यते

18 बाण आराध्य गिरिशम् लेभे तद् गण मुख्यताम्

यत् पार्श्वे भगवान् आस्ते हयद्यापि पुरपालकः

19 मरुतश्च दितेः पुत्राः चत्वारिम्शन् नवाधिकाः

त आसन् अप्रजाः सर्वे नीता इन्द्रेण सात्मताम्

20 श्री राजो वाच

कथम् त आसुरम् भावम् अपोह् यौत्पत्तिकम् गुरो

इन्द्रेण प्रापिताः सात्म्यम् किम् तत् साधु कृतम् हि तैः

21 इमे श्रद्द धते ब्रह्मन् ऋषयो हि मया सह

परिज्ञानाय भगवन् तन्नो व्याख्यातु मर्हसि

22 श्री सूत उवाच

तद् विष्णुरातस्य स बादरायणिः वचो निशम्य अद्दतम् अल्पम् अर्थवत्

सभाजयन् सन् निभृतेन चेतसा जगाद सत्रायण सर्व दर्शनः

23 श्री शुक उवाच

हत पुत्रा दितिः शक्र पार्ष्णि ग्राहेण विष्णुना

मन्युना शोक दीप्तेन ज्वलन्ती पर्य चिन्तयत्

24 कदा नु भ्रातृ हन्तारम् इन्द्रिया रामम् उल्बणम्

अक्लिन्न हृदयम् पापम् घातयित्वा शये सुखम्

25 कृमिविड् भस्म सम्ज्ञासीद् यस्येशाभि हितस्य च

भूत ध्रुक् तत् कृते स्वार्थम् किम् वेद निरयो यतः

26 आशासानस्य तस् येदम् ध्रुवम् उन्नद्ध चेतसः

मद शोषक इन्द्रस्य भूयाद्येन सुतो हि मे

27 इति भावेन सा भर्तुः आचचा रास कृत्प्रियम्

शुश्रूषयानु रागेण प्रश्रयेण दमेन च

28 भक्त्या परमया राजन् मनोज्ञैः वल्गु भाषितैः

मनो जग्राह भावज्ञा सुस्मिता पाङ्ग वीक्षणैः

29 एवम् स्त्रिया जडी भूतो विद्वान् अपि विदग्धया

बाढम् इत्याह विवशो न तच् चित्रम् हि योषिति

30 विलोक्यै कान्त भूतानि भूतान् यादौ प्रजापतिः

स्त्रियम् चक्रे स्व देहार्धम् यया पुम्साम् मतिर् हृता

31 एवम् शुश्रूषितस् तात भगवान् कश्यपः स्त्रिया

प्रहस्य परम प्रीतो दितिम् आहाभि नन्द्य च

32 श्री कश्यप उवाच

वरम् वरय वामोरु प्रीतस्ते ऽहम् अनिन्दिते

स्त्रिया भर्तरि सुप्रीते कः काम इह चागमः

33 पतिर् एव हि नारीणाम् दैवतम् परमम् स्मृतम्

मानसः सर्व भूतानाम् वासुदेवः श्रियः पतिः

34 स एव देवता लिङ्गैः नाम रूप विकल्पितैः

इज्यते भगवान् पुम्भिः स्त्री भिश्च पति रूपधृक्

35 तस्मात् पतिव्रता नार्यः श्रेयस् कामाः सुमध्यमे

यजन्ते ऽनन्य भावेन पतिम् आत्मानम् ईश्वरम्

36 सो ऽहम् त्व यार्चितो भद्रे ईदृग् भावेन भक्तितः

तत्ते सम्पादये कामम् असतीनाम् सु दुर्लभम्

37 दितिर् उवाच

वरदो यदि मे ब्रह्मन् पुत्रम् इन्द्रहणम् वृणे

अमृत्युम् मृत पुत्राहम् येन मे घातितौ सुतौ

38 निशम्य तद् वचो विप्रो विमनाः पर्यतप् यत

अहो अधर्मः सुमहान् अद्य मे सम् उपस्थितः

39 अहो अर्थेन्द्रिया रामो योषिन् मय्येह मायया

गृहीत चेताः कृपणः पतिष्ये नरके ध्रुवम्

40 को ऽतिक्रमो ऽनु वर्तन्त्याः स्वभावम् इह योषितः

धिङ्माम् बता बुधम् स्वार्थे यदहम् त्वजित् एन्द्रियः

41 शरत् पद्मोत्सवम् वक्त्रम् वचश् च श्रवण् आमृतम्

हृदयम् क्षुरधा राभम् स्त्रीणाम् को वेद चेष्टितम्

42 न हि कश्चित् प्रियः स्त्रीणाम् अञ्जसा स्वाशिष् आत्मनाम्

पतिम् पुत्रम् भ्रातरम् वा घ्नन्त्यर्थे घात यन्ति च

43 प्रति श्रुतम् ददामीति वचस्तन्न मृषा भवेत्

वधम् नार्हति चेन्द्रो ऽपि तत् रेदम् उपकल्पते

44 इति सञ्चिन्त्य भगवान् मारीचः कुरु नन्दन

उवाच किञ्चित् कुपित आत्मानम् च विगर्हयन्

45 श्री कश्यप उवाच

पुत्रस्ते भविता भद्रे इन्द्र हादेव बान्धवः

सम्वत्सरम् व्रतम् इदम् यद्यञ्जो धारयिष्यसि

46 दितिर् उवाच

धारयिष्ये व्रतम् ब्रह्मन् ब्रूहि कार्याणि यानि मे

यानि चेह निषिद्धानि न व्रतम् घ्नन्ति यानि तु

47 श्री कश्यप उवाच

न हिम्स्याद् भूत जातानि न शपेन् नानृतम् वदेत्

न छिन्द्यान् नख रोमाणि न स्पृशेद् यद् अमङ्गलम्

48 नाप्सु स्नायान् न कुप्येत न सम्भाषेत दुर्जनैः

न वसीत अधौतवासः स्रजम् च विधृताम् क्वचित्

49 नोच् छिष्टम् चण्डिकान्नम् च सामिषम् वृषला हृतम्

भुञ्जीत उदक्यया दृष्टम् पिबेन् आञ्जलिना त्वपः

50 नोच्छिष्टा स्पृष्ट सलिला सन्ध्यायाम् मुक्त मूर्धजा

अनर्चितासम् यतवाङ् नासम् वीता बहिश् चरेत्

51 नाधौत पाद् आप्रयता नार्द्र पान्नो उदक्शिराः

शयीत नापराङ् नान्यैः न नग्ना न च सन्ध्ययोः

52 धौतवासा शुचिर् नित्यम् सर्व मङ्गल सम्युता

पूजयेत् प्रातर् आशात् प्राग् गोविप्रान् श्रियम् अच्युतम्

53 स्त्रियो वीरवतीश् चार्चेत् स्रग् गन्ध बलि मण्डनैः

पतिम् चार्च्योप तिष्ठेत ध्यायेत् कोष्ठ गतम् च तम्

54 साम्वत्सरम् पुम्सवनम् व्रतम् एतद् अविप्लुतम्

धारयिष्यसि चेत् तुभ्यम् शक्रहा भविता सुतः

55 बाढम् इत् यभि प्रेत्याथ दिती राजन् महामनाः

कश्यपाम् गर्भम् आधत्त व्रतम् चाञ्जो दधार सा

56 मातृष् वसुः अभिप्रायम् इन्द्र आज्ञाय मानद

शुश्रूषणेन् आश्रमस् थाम् दितिम् पर्य चरत् कविः

57 नित्यम् वनात्सु मनसः फल मूल समित् कुशान्

पत्राङ्कुर मृदो ऽपश्च काले काले उपाहरत्

58 एवम् तस्या व्रतस्थाया व्रतच् छिद्रम् हरिर् नृप

प्रेप्सुः पर्यचरज् जिह्मो मृगहेव मृगा कृतिः

59 नाध्य गच्छद् व्रतच् छिद्रम् तत्परो ऽथ महीपते

चिन्ताम् तीव्राम् गतः शक्रः केन मे स्याच् छिवम् त्विह

60 एकदा सा तु सन्ध्यायाम् उच्छिष्टा व्रत कर्शिता

अस्पृष्ट वार्यध उताङ्घ्रिः सुष्वाप विधि मोहिता

61 लब्ध्वा तद् अन्तरम् शक्रो निद्रा पहृत चेतसः

दितेः प्रविष्ट उदरम् योगेशो योग मायया

62 चकर्त सप्तधा गर्भम् वज्रेण कनक प्रभम्

रुदन्तम् सप्त धैकैकम् मा रोदीर् इति तान्पुनः

63 ते तमूचुः पाट्यमानाः सर्वे प्राञ्जलयो नृप

नो जिघाम्ससि किम् इन्द्र भ्रातरो मरुतस् तव

64 मा भैष्ट भ्रातरो मह्यम् यूयम् इत्याह कौशिकः

अनन्य भावान् पार्षदान् आत्मनो मरुताम् गणान्

65 न ममार दितेर् गर्भः श्रीनिवास अनुकम्पया

बहुधा कुलिशक्षुण्णो द्रौण् यस्त्रेण यथा भवान्

66 सकृदिष्ट्वा आदि पुरुषम् पुरुषो याति साम्यताम्

सम्वत्सरम् किञ्चिदूनम् दित्या यद् हरिर् अर्चितः

67 सजूर् इन्द्रेण पञ्चाशद् देवास्ते मरुतो ऽभवन्

व्यपोह्य मातृ दोषम् ते हरिणा सोमपाः कृताः

68 दितिर् उत्थाय ददृशे कुमारान् अनलप्रभान्

इन्द्रेण सहितान् देवी पर्य तुष्यद् अनिन्दिता

69 अथेन्द्रम् आह ताताहम् आदित्यानाम् भयावहम्

अपत्यम् इच्छन्त् यचरम् व्रतम् एतत् सुदुष्करम्

70 एकः सङ्कल्पितः पुत्रः सप्त सप्ता भवन् कथम्

यदि ते विदितम् पुत्र सत्यम् कथय मा मृषा

71 इन्द्र उवाच

अम्ब ते ऽहम् व्यवसितम् उपधार् यागतो ऽन्तिकम्

लब्धान्तरो ऽच्छिदम् गर्भम् अर्थ बुद्धिर् न धर्मवित्

72 कृत्तो मे सप्तधा गर्भ आसन् सप्त कुमारकाः

ते ऽपि चैकैकशो वृक्णाः सप्तधा नापि मम्रिरे

73 ततस् तत् परम् आश्चर्यम् वीक्ष्य व्यवसितम् मया

महा पुरुष पूजायाः सिद्धिः काप् यानुषङ्गिणी

74 आराधनम् भगवत ईहमाना निराशिषः

ये तु नेच्छन्त् यपि परम् ते स्वार्थ कुशलाः स्मृताः

75 आराध् यात्म प्रदम् देवम् स्वात्मानम् जगद् ईश्वरम्

को वृणीत गुण स्पर्शम् बुधः स्यात् नरके ऽपि यत्

76 तद् इदम् मम दौर्जन्यम् बालिशस्य महीयसि

क्षन्तु मर्हसि मातस्त्वम् दिष्ट्या गर्भो मृतोत्थितः

77 श्री शुक उवाच

इन्द्रस् तयाभ् यनुज्ञात: शुद्ध भावेन तुष्टया

मरुद्भि: सह ताम् नत्वा जगाम त्रिदिवम् प्रभु:

78 एवम् ते सर्वम् आख्यातम् यन्माम् त्वम् परिपृच्छसि

मङ्गलम् मरुताम् जन्म किम् भूय: कथयामि ते

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

षष्ट स्कन्दे अष्टा दशो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ षष्ट स्कन्द: एकोन विम्शो ऽध्याय :

स्कन्द- 06: अध्याय- 19

01 श्री राजो वाच

व्रतम् पुम्सवनम् ब्रह्मन् भवता यद् उदीरितम्

तस्य वेदितुम् इच्छामि येन विष्णु: प्रसीदति

02 श्री शुक उवाच

शुक्ले मार्ग शिरे पक्षे योषिद् भर्तुर् अनुज्ञया

आरभेत व्रतम् इदम् सार्व कामिक मादित:

03 निशम्य मरुताम् जन्म ब्राह्मणान् अनुमन्त्र्य च

स्नात्वा शुक्ल दती शुक्ले वसीत् आलङ्कृत् आम्बरे

पूजयेत् प्रातरा शात् प्राग् भगवन्तम् श्रिया सह

04 अलम् ते निरपेक्षाय पूर्णकाम नमो ऽस्तु ते

महा विभूति पतये नम: सकल सिद्धये

05 यथा त्वम् कृपया भूत्या तेजसा महिनौजसा

जुष्ट ईश गुणैः सर्वैः ततो ऽसि भगवान् प्रभुः

06 विष्णु पत्नि महामाये महा पुरुष लक्षणे

प्रीयेथा मे महा भागे लोक मातर् नमो ऽस्तु ते

07 ओम् नमो भगवते महा पुरुषाय महानु भावाय महा विभूति पतये सह महा विभूतिभिः बलिम् उपहराणीति अनेन अहरहर् मन्त्रेण विष्णोर् आवाहन अर्घ्य पाद्योप स्पर्शन स्नान वास उपवीत विभूषण गन्ध पुष्प धूप दीपोप हारादि उपचाराम्श् च समाहित उपाहरेत्

08 हविः शेषम् च जुहुयाद् अनले द्वादश आहुतीः

ओम् नमो भगवते महा पुरुषाय महा विभूति पतये स्वाहेति

09 श्रियम् विष्णुम् च वरदौ आशिषाम् प्रभवा वुभौ

भक्त्या सम्पूजयेन् नित्यम् यदीच्छेत् सर्व सम्पदः

10 प्रणमेद् दण्डवद् भूमौ भक्ति प्रह्वेण चेतसा

दश वारम् जपेन् मन्त्रम् ततः स्तोत्रम् उदीरयेत्

11 युवाम् तु विश्वस्य विभू जगतः कारणम् परम्

इयम् हि प्रकृतिः सूक्ष्मा माया शक्तिर् दुरत्यया

12 तस्या अधीश्वरः साक्षात् त्वमेव पुरुषः परः

त्वम् सर्व यज्ञ इज्येयम् क्रियेयम् फल भुग्भवान्

13 गुण व्यक्तिर् इयम् देवी व्यञ्जको गुण भुग्भवान्

त्वम् हि सर्व शरीर् यात्मा श्रीः शरीरेन्द्रि याशयाः

नाम रूपे भगवती प्रत्ययस् त्वम् अपाश्रयः

14 यथा युवाम् त्रि लोकस्य वरदौ परमेष्ठिनौ

तथा म उत्तम श्लोक सन्तु सत्या महाशिषः

15 इत् यभिष्टूय वरदम् श्रीनिवासम् श्रिया सह

तन् निः सार्योप हरणम् दत्त्वा आचमनम् अर्चयेत्

16 ततः स्तुवीत स्तोत्रेण भक्ति प्रह्वेण चेतसा

यज्ञो उच्छिष्टम् अवघ्राय पुनर् अभ्यर्चयेद् हरिम्

17 पतिम् च परया भक्त्या महा पुरुष चेतसा

प्रियैस् तैस्तैर् उपनमेत् प्रेमशीलः स्वयम् पतिः

बिभृयात् सर्व कर्माणि पत्न्या उच्चावचानि च

18 कृतम् एकतरेण् आपि दम्पत्योर् उभयोरपि

पत्न्याम् कुर्याद् अनर्हायाम् पतिर् एतत् समाहितः

19 विष्णोः व्रतम् इदम् बिभ्रन् न विहन्यात् कथञ्चन

विप्रान् स्त्रियो वीरवतीः स्रग् गन्ध बलि मण्डनैः

अर्चेद् अहरहर् भक्त्या देवम् नियमम् आस्थिता

20 उद्वास्य देवम् स्वे धाम्नि तन् निवेदितम् अग्रतः

अद्याद् आत्म विशुद् ह्यर्थम् सर्व कामर्द् धये तथा

21 एतेन पूजा विधिना मासान् द्वादश हायनम्

नीत्वा थोपचरेत् साध्वी कार्तिके चरमे ऽहनि

22 श्वोभूते ऽप उपस्पृश्य कृष्णम् अभ्यर्च्य पूर्ववत्

पयः शृतेन जुहुयाच् चरुणा सह सर्पिषा

पाकय ज्ञ विधानेन द्वादशै वाहुतीः पतिः

23 आशिषः शिरसादाय द्विजैः प्रीतैः समीरिताः

प्रणम्य शिरसा भक्त्या भुञ्जीत तद् अनुज्ञया

24 आचार्यम् अग्रतः कृत्वा वाग्यतः सह बन्धुभिः

दद्यात् पत्न्यै चरोः शेषम् सुप्रजास्त्वम् सुसौभगम्

25 एतच् चरित्वा विधिवद् व्रतम् विभोः अभीप्सि तार्थम् लभते पुमानिह

स्त्री त्वेतद् आस्थाय लभेत सौभगम् श्रियम् प्रजाम् जीव पतिम् यशो गृहम्

26 कन्या च विन्देत समग्र लक्षणम् वरम् त्ववीरा हत किल्बिषा गतिम्

मृत प्रजा जीव सुता धनेश्वरी सु दुर्भगा सुभगा रूपम् अग्र्यम्

27 विन्देद् विरूपा विरुजा विमुच्यते य आमया वीन्द्रिय कल्पदेहम्

एतत् पठन् अभ्युदये च कर्मणि अनन्त तृप्तिः पितृ देव तानाम्

28 तुष्टाः प्रयच् छन्ति समस्त कामान् होमावसाने हुतभुक् श्री हरिश् च

राजन् महन् मरुताम् जन्म पुण्यम् दितेर् व्रतम् चाभि हितम् महत् ते

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

षष्ट स्कन्दे एकोन विम्शो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

श्रीमद् भागवतम्

अथ सप्तम स्कन्दः प्रथमो ऽध्याय :

स्कन्द- *07:* अध्याय- *01*

*01* श्री राजो उवाच

समः प्रियः सुहृद् ब्रह्मन् भूतानाम् भगवान् स्वयम्

इन्द्रस् यार्थे कथम् दैत्यान् अवधीद् विष मो यथा

*02* न ह्यस् यार्थः सुरगणैः साक्षान् निः श्रेयस् आत्मनः

नै वासुरेभ्यो विद्वेषो नोद्वेगश् चागुणस् य हि

*03* इति नः सुमहा भाग नारायण गुणान् प्रति

सम्शयः सुमहान् जातः तद् भवाम्श् छेत्तु मर्हति

*04* श्री शुक उवाच

साधु पृष्टम् महाराज हरेश् चरितम् अद्भुतम्

यद् भागवत माहात्म्यम् भगवद् भक्ति वर्धनम्

*05* गीयते परमम् पुण्यम् ऋषिभिः नारदा दिभिः

नत्वा कृष्णाय मुनये कथ यिष्ये हरेः कथाम्

*06* निर्गुणो ऽपि ह्यजो ऽव्यक्तो भगवान् प्रकृतेः परः

स्व माया गुण माविश्य बाध्य बाधक ताम् गतः

*07* सत्त्वम् रजस् तम इति प्रकृतेर् नात्मनो गुणाः

न तेषाम् युग पद् राजन् ह्रास उल्लास एव वा

08 जय काले तु सत्त्वस्य देवर्षीन् रजसो ऽसुरान्

तमसो यक्ष रक्षाम्सि तत् कालानु गुणो ऽभजत्

09 ज्योतिर् आदि रिवा भाति सङ्घा तान्न विविच् यते

विदन्त् यात्मान मात्मस्थम् मथित्वा कवयो ऽन्ततः

10 यदा सिसृक्षुः पुर आत्मनः परो रजः सृजत् येष पृथक् स्व मायया

सत्त्वम् विचित्रासु रिरम्सुर् ईश्वरः शयिष्य माणः तम ईर यत् यसौ

11 कालम् चरन्तम् सृज तीश आश्रयम् प्रधान पुम्भ्याम् नरदेव सत्य कृत्

य एष राजन् अपि काल ईशिता सत्त्वम् सुरानीक मिवैध यत् यतः

तत् प्रत्य नीकान् असुरान् सुर प्रियो रजस् तमस् कान् प्रमिणोत् युरुश् रवाः

12 अत्रै वोदा हृतः पूर्वम् इतिहासः सुरर्षिणा

प्रीत्या महा क्रतौ राजन् पृच्छते ऽजात शत्रवे

13 दृष्ट्वा महाद् भुतम् राजा राजसूये महा क्रतौ

वासुदेवे भगवति सायुज्यम् चेदि भूभुजः

14 तत्रा सीनम् सुर ऋषिम् राजा पाण्डु सुतः क्रतौ

पप्रच् छ विस्मित मना मुनीनाम् शृण्वताम् इदम्

15 श्री युधिष्ठिर उवाच

अहो अत् यद्भुतम् ह्येतद् दुर्लभै कान्ति नामपि

वासुदेवे परे तत्त्वे प्राप्तिश् चैद् यस्य विद् विषः

16 एतद् वेदितु मिच्छामः सर्व एव वयम् मुने

भगवन् निन्दया वेनो द्विजैः तमसि पातितः

17 दम घोष सुतः पाप आरभ्य कल भाषणात्

सम्प्रत्य मर्षी गोविन्दे दन्तवक्रश् च दुर्मतिः

18 शपतोः असकृद् विष्णुम् यद् ब्रह्म परम व्ययम्

श्वित्रो न जातो जिह्वायाम् नान्धम् विविश तुस् तमः

19 कथम् तस्मिन् भगवति दुर वग्रा ह्यधामनि

पश्यताम् सर्व लोकानाम् लयम् ईयतु रञ्जसा

20 एतद् भ्राम्यति मे बुद्धिः दीपार् चिरिव वायुना

ब्रूह् येतद् अद्भुत तमम् भगवान्स् तत्र कारणम्

21 श्री शुक उवाच

राज्ञस् तद् वच आकर्ण्य नारदो भगवान् ऋषिः

तुष्टः प्राह तमा भाष्य शृण्वत्याः तत् सदः कथाः

22 श्री नारद उवाच

निन्दनस् तव सत् कार न्यक्का रार्थम् कळेवरम्

प्रधान परयो राजन् अविवेकेन कल्पितम्

23 हिम्सा तद् अभिमानेन दण्ड पारुष्य योर् यथा

वैषम्यम् इह भूतानाम् ममाहम् इति पार्थिव

24 यन्नि बद्धो ऽभिमानो ऽयम् तद् वधात् प्राणिनाम् वधः

तथा न यस्य कैवल्याद् अभिमानो ऽखिल् आत्मनः

परस्य दम कर्तुर्हि हिम्सा केनास्य कल्प्यते

25 तस्माद् वैरानु बन्धेन निर्वैरेण भयेन वा

स्नेहात् कामेन वा युञ्ज्यात् कथञ्चिन् नेक्षते पृथक्

26 यथा वैरानु बन्धेन मर्त्यः तन् मयताम् इयात्

न तथा भक्ति योगेन इति मे निश्चिता मतिः

27 कीटः पेशस् कृता रुद्धः कुड्यायाम् तम् अनुस्मरन्

सम्रम्भ भय योगेन विन्दते तत् स्वरूप ताम्

28 एवम् कृष्णे भगवति माया मनुज ईश्वरे

वैरेण पूत पाप् मानः तम् आपुर् अनुचिन्तया

29 कामाद् द्वेषाद् भयात् स्नेहाद् यथा भक्त्येश् वरे मनः

आवेश्य तद् अघम् हित्वा बहवः तद् गतिम् गताः

30 गोप्यः कामाद् भयात् कम्सो द्वेषाच् चैद् यादयो नृपाः

सम्बन्धाद् वृष्णयः स्नेहाद् यूयम् भक्त्या वयम् विभो

31 कतमो ऽपि न वे नः स्यात् पञ्चानाम् पुरुषम् प्रति

तस्मात् केनाप् युपायेन मनः कृष्णे निवेशयेत्

32 मातृष्व स्रेयो वश् चैद्यो दन्त वक्रश्च पाण्डव

पार्षद प्रवरौ विष्णोः विप्र शापात् पद् अच्युतौ

33 श्री युधिष्ठिर उवाच

कीद् ऋशः कस्य वा शापो हरि दासा अभि मर्शनः

अश्रद् धेय इवाभाति हरेर् एकान्तिनाम् भवः

34 देहेन्द्रि यासु हीनानाम् वैकुण्ठ पुर वासिनाम्

देह सम्बन्ध सम्बद्धम् एतद् आख्यातु मर्हसि

35 श्री नारद उवाच

एकदा ब्रह्मणः पुत्रा विष्णोर् लोकम् यदृच्छया

सनन्द नाद यो जग्मुः चरन्तो भुवन त्रयम्

36 पञ्च षड्ढाय नार् भाभाः पूर्वेषाम् अपि पूर्वजाः

दिग्वाससः शिशून् मत्वा द्वाः स्थौ तान् प्रत्य षेधताम्

37 अशपन् कुपिता एवम् युवाम् वासम् न चार्हथः

रजस् तमोभ्याम् रहिते पाद मूले मधु द्विषः

पापिष्ठाम् आसुरीम् योनिम् बालिशौ यात माश्वतः

38 एवम् शप्तौ स्व भवनात् पतन्तौ तै कृपालुभिः

प्रोक्तौ पुनर् जन्म भिर्वाम् त्रिभिर् लोकाय कल्पताम्

39 जज्ञाते तौ दितेः पुत्रौ दैत्य दानव वन्दितौ

हिरण्य कशिपुर् ज्येष्ठो हिरण्याक्षो ऽनुजस् ततः

40 हतो हिरण्य कशिपुः हरिणा सिम्ह रूपिणा

हिरण्याक्षो धरोद् धारे बिभ्रता शौकरम् वपुः

41 हिरण्य कशिपुः पुत्रम् प्रह्लादम् केशव प्रियम्

जिघाम्सुः अकरोन् नाना यातना मृत्यु हेतवे

42 सर्व भूतात्म भूतम् तम् प्रशान्तम् सम दर्शनम्

भगवत् तेजसा स्पृष्टम् नाशक्नोद् हन्तुम् उद्यमैः

43 ततस्तौ राक्षसौ जातौ केशिन्याम् विश्र वः सुतौ

रावणः कुम्भ कर्णश् च सर्व लोकोप तापनौ

44 तत्रापि राघवो भूत्वा न्यहनत् छाप मुक्तये

राम वीर्यम् श्रोष्य सि त्वम् मार्कण्डेय मुखात् प्रभो

45 तावेव क्षत्रियौ जातौ मातृष्वस् रात्मजौ तव

अधुना शाप निर्मुक्तौ कृष्ण चक्र हताम् हसौ

46 वैरानु बन्ध तीव्रेण ध्यानेन् आच्युत सात् मताम्

नीतौ पुनर् हरेः पार्श्वम् जग्मतुर् विष्णु पार्षदौ

47 श्री युधिष्ठिर उवाच

विद्वेषो दयिते पुत्रे कथम् आसीन् महात्मनि

ब्रूहि मे भगवन् येन प्रह्लादस् याच्यु तात्मता

🎤🎻🎺☸✡☩ ✤ ✣ ✦ ✧ ☆ ✮ ✯✯ ✭ ☆ ✱ ✲ ✳ ❃ ❂ ❁❀ ✿ ✶ ✴ ❄ ❉ ❋ ❖☆☸🎺🎻🎤

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

सप्तम स्कन्दे प्रथमो ऽध्याय ः॥

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

🎤🎻🎺☸✡☩ ✤ ✣ ✦ ✧ ☆ ✮ ✯✯ ✭ ☆ ✱ ✲ ✳ ❃ ❂ ❁❀ ✿ ✶ ✴ ❄ ❉ ❋ ❖☆☸🎺🎻🎤

अथ सप्तम स्कन्दः द्वितीयो ऽध्याय ः

स्कन्द- 07: अध्याय- 02

01 श्री नारद उवाच

भ्रातर् येवम् विनिहते हरिणा क्रोड मूर्तिना

हिरण्य कशिपू राजन् पर्यतप् यद्रुषा शुचा

02 आह चेदम् रुषा पूर्णः सन्दष्ट दशनच् छदः

कोपोज् ज्वलद् भ्याम् चक्षुर् भ्याम् निरीक्षन् धूम् रमम्बरम्

03 करालदम् ष्ट्रोग्र दृष्ट्या दुष् प्रेक्ष्य भ्रुकुटी मुखः

शूलम् उद्यम्य सदसि दान वानिदम् अब्रवीत्

04 भो भो दानव दैतेया द्विमूर्धम् स्त्र्यक्ष शम्बर

शतबाहो हयग्रीव नमुचे पाक इल्वल

05 विप्र चित्ते मम वचः पुलोमन् शकुना दयः

शृणुता नन्तरम् सर्वे क्रियताम् आशु मा चिरम्

06 सपत्नैर् घातितः क्षुद्रैः भ्राता मे दयितः सुहृत्

पार्ष्णि ग्राहेण हरिणा समेनाप् युप धावनैः

07 तस्य त्यक्त स्वभावस्य घृणेर् माया वनौ कसः

भजन्तम् भज मानस्य बालस् येवास् थिरात्मनः

08 मच् छूल भिन्न ग्रीवस्य भूरिणा रुधिरेण वै

रुधिर प्रियम् तर्प यिष्ये भ्रातरम् मे गतव् यथः

09 तस्मिन् कूटे ऽहिते नष्टे कृत्त मूले वनस् पतौ

विटपा इव शुष् यन्ति विष्णु प्राणा दिवौकसः

10 तावद् यात भुवम् यूयम् विप्र क्षत्र समेधिताम्

सूद यध्वम् तपो यज्ञ स्वाध्याय व्रत दानिनः

11 विष्णुर् द्विज क्रिया मूलो यज्ञो धर्म मयः पुमान्

देवर्षि पितृ भूतानाम् धर्मस् य च परायणम्

12 यत्र यत्र द्विजा गावो वेदा वर्णाश् रमक्रियाः

तम् तम् जनपदम् यात सन्दीप यत वृश्चत

13 इति ते भर्तृ निर्देशम् आदाय शिरसा दृताः

तथा प्रजानाम् कदनम् विदधुः कदन प्रियाः

14 पुरग्राम व्रजो द्यान क्षेत्रा रामाश्र माकरान्

खेट खर्वट घोषाम्श् च ददहुः पत्त नानि च

15 केचित् खनित्रैर् बिभिदुः सेतु प्राकार गोपुरान्

आजीव्याम्श् चिच्छिदुर् वृक्षान् केचित् परशु पाणयः

प्रादहन् शरणान् यन्ये प्रजानाम् ज्वलितो अल्मुकैः

16 एवम् विप्र कृते लोके दैत् येन्द्रानु चरैर् मुहुः

दिवम् देवाः परित् यज्य भुवि चेरुर् अलक्षिताः

17 हिरण्य कशिपुर् भ्रातुः सम्परे तस्य दुः खितः

कृत्वा कटोद कादीनि भ्रातृ पुत्रान सान्त् वयत्

18 शकुनिम् शम्बरम् धृष्टम् भूत सन्तापनम् वृकम्

काल नाभम् महा नाभम् हरिश् मश्रुम् अथोत् कचम्

19 तन् मातरम् रुषा भानुम् दितिम् च जननीम् गिरा

श्लक्ष्णया देश कालज्ञ इदमाह जनेश्वर

20 श्री हिरण्य कशिपुर् उवाच

अम्बाम्ब हे वधूः पुत्रा वीरम् मार्हथ शोचितुम्

रिपोर् अभिमुखे श्लाघ्यः शूराणाम् वध ईप्सितः

21 भूता नामिह सम्वासः प्रपाया मिव सुव्रते

दैवेनै कत्र नीतानाम् उन्नीतानाम् स्व कर्मभिः

22 नित्य आत्मा व्ययः शुद्धः सर्वगः सर्व वित्परः

धत्ते ऽसौ आत्मनो लिङ्गम् मायया विसृजन् गुणान्

23 यथाम्भ सा प्रचलता तरवो ऽपि चला इव

चक्षुषा भ्राम्य माणेन दृश्यते चलती व भूः

24 एवम् गुणैर् भ्राम्य माणे मनस्य विकलः पुमान्

याति तत् साम्यताम् भद्रे ह्यलिङ्गो लिङ्ग वानिव

25 एष आत्म विपर्यासो ह्यलिङ्गे लिङ्ग भावना

एष प्रिया प्रियैर् योगो वियोगः कर्म सम्सृतिः

26 सम्भवश् च विनाशश् च शोकश् च विविधः स्मृतः

अविवेकश् च चिन्ता च विवेका स्मृतिर् एव च

27 अत्र अप्युदा हरन् तीमम् इतिहासम् पुरातनम्

यमस्य प्रेत बन्धूनाम् सम्वादम् तम् निबोधत

28 उशीन रेष्व भूद् राजा सुयज्ञ इति विश्रुतः

सपत्नैर् निहतो युद्धे ज्ञात यस्तम् उपासत

29 विशीर्ण रत्न कवचम् विभ्रष्टा भरणस्रजम्

शर निर्भिन्न हृदयम् शयानम् असृगा विलम्

30 प्रकीर्ण केशम् ध्वस् ताक्षम् रभसा दष्टद् अच्छदम्

रजः कुण्ठ मुखाम् भोजम् छिन्ना युध भुजम् मृधे

31 उशी नरेन्द्रम् विधिना तथा कृतम् पतिम् महिष्यः प्रसमीक्ष्य दुः खिताः

हताः स्म नाथेति करैरु रो भृशम् घ्नन्त्यो मुहुः तत् पदयो रुपा पतन्

32 रुदत्य उच्चैः दयिताङ्घ्रि पङ्कजम् सिञ्चन्त्य अस्रैः कुच कुङ्कुमारुणैः

विस्रस्त केशा भरणाः शुचम् नृणाम् सृजन्त्य आक्रन् दनया विलेपिरे

33 अहो विधात्रा करुणेन नः प्रभो भवान् प्रणीतो दृ गगो चराम् दशाम्

उशी नराणाम् असि वृत्ति दः पुरा कृतो ऽधुना येन शुचाम् विवर्धनः

34 त्वया कृतज्ञेन वयम् मही पते कथम् विना स्याम सुहृत्त मेन ते

तत्रानु यानम् तव वीर पादयोः शुश्रूष तीनाम् दिश यत्र यास् यसि

35 एवम् विलपती नाम् वै परिगृहय मृतम् पतिम्

अनिच्छ तीनाम् निर्हारम् अर्को ऽस्तम् सन्न्य वर्तत

36 तत्र ह प्रेत बन्धूनाम् आश्रुत्य परि देवितम्

आहतान् बालको भूत्वा यमः स्वयम् उपागतः

37 श्री यम उवाच

अहो अमीषाम् वयसाधि कानाम् विपश् यताम् लोक विधिम् विमोहः

यत्रा गतस् तत्र गतम् मनुष्यम् स्वयम् सधर्मा अपि शोचन्त्य पार्थम्

38 अहो वयम् धन्य तमा य दत्र त्यक्ताः पितृभ्याम् न विचिन्त यामः

अभक्ष्य माणा अबला वृकादिभिः स रक्षिता रक्षति यो हि गर्भे

39 य इच्छ येशः सृज तीद मव्ययो य एव रक्षति अवलुम्प ते च यः

तस्या बलाः क्रीडन माहुरी शितुः चराचरम् निग्रह सङ्ग्रहे प्रभुः

40 पथि च्युतम् तिष्ठति दिष्ट रक्षितम् गृहे स्थितम् तद् विहतम् विनश्यति

जीवति अनाथो ऽपि तदीक्शि तो वने गृहे ऽपि गुप्तो ऽस्य हतो न जीवति

41 भूतानि तैस्तैः निज योनि कर्मभिः भवन्ति काले न भवन्ति सर्वशः

न तत्र हात्मा प्रकृता वपि स्थितः तस्या गुणैः अन्यत मोनि बध्यते

42 इदम् शरीरम् पुरुषस्य मोहजम् यथा पृथग् भौतिकम् ईयते गृहम्

यथौदकैः पार्थिव तैज सैर्जनः कालेन जातो विकृतो विनश्यति

43 यथानलो दारुषु भिन्न ईयते यथानिलो देहगतः पृथक् स्थितः

यथा नभः सर्वगतम् न सज्जते तथा पुमान् सर्व गुणाश्रयः परः

44 सुयज्ञो नन्वयम् शेते मूढायम् अनुशोचथ

यः श्रोता यो ऽनुवक् तेह स न दृश् येत कर्हिचित्

45 न श्रोता नानुवक् तायम् मुख्यो ऽप्यत्र महानसुः

यस् त्विहेन् द्रिय वान् आत्मा स चान्यः प्राण देहयोः

46 भूतेन्द्रिय मनो लिङ्गान् देहान् उच्चाव चान् विभुः

भजत् युत् सृजति हयन्यः तच्चापि स्वेन तेजसा

47 यावल् लिङ्गान् वितो हयात्मा तावत् कर्म निबन्धनम्

ततो विपर्य यः क्लेशो माया योगो ऽनु वर्तते

48 वितथा भिनि वेशो ऽयम् यद् गुणेषु अर्थ दृग् वचः

यथा मनोरथः स्वप्नः सर्वम् ऐन्द्रिय कम् मृषा

49 अथ नित्यम् अनित्यम् वा नेह शोचन्ति तद् विदः

नान्यथा शक्यते कर्तुम् स्वभावः शोचताम् इति

50 लुब्धको विपिने कश्चित् पक्षिणाम् निर्मितो ऽन्तकः

वितत्य जालम् विदधे तत्र तत्र प्रलोभयन्

51 कुलिङ्ग मिथुनम् तत्र विचरत् सम दृश्यत

तयोः कुलिङ्गी सहसा लुब्ध केन प्रलोभिता

52 सा सज्जत सिचस् तन्त्र्याम् महिषीः काल यन्त्रिता

कुलिङ्गस्ताम् तथा पन्नाम् निरीक्ष्य भृश दुः खितः

स्नेहाद् अकल्पः कृपणः कृपणाम् पर्य देवयत्

53 अहो अकरुणो देवः स्त्रिया अकरुणया विभुः

कृपणम् मामनुशो चन्त्या दीनया किम् करिष् यति

54 कामम् न यतु माम् देवः किमर्धेन् आत्मनो हि मे

दीनेन जीवता दुः खम् अनेन विधुर् आयुषा

55 कथम् त्वजात पक्षाम् स्तान् मातृ हीनान् बिभर् म्यहम्

मन्द भाग्याः प्रतीक् षन्ते नीडे मे मातरम् प्रजाः

56 एवम् कुलिङ्गम् विलपन्तम् आरात् प्रिया वियोगा तुरम् अश्रु कण्ठम्

स एव तम् शाकु निकः शरेण विव्याध काल प्रहितो विलीनः

57 एवम् यूयम् अपश् यन्त्य आत्मा पायम् अबुद्धयः

नैनम् प्राप्स्यथ शोचन्त्यः पतिम् वर्ष शतैर् अपि

58 श्री हिरण्य कशिपुर् उवाच

बाल एवम् प्रवदति सर्वे विस्मित चेतसः

ज्ञातयो मेनिरे सर्वम् अनित्यम् अय थोत्थितम्

59 यम एतद् उपाख्याय तत्रैवान् तर धीयत

ज्ञातयो हि सुयज्ञस्य चक्रुर् यत् साम्प रायिकम्

60 ततः शोचत मा यूयम् परम् चात्मान मेव च

क आत्मा कः परो वात्र स्वीयः पारक्य एव वा

स्वपराभि निवेशेन विना ज्ञानेन देहिनाम्

61 श्री नारद उवाच

इति दैत्य पतेर् वाक्यम् दितिरा कर्ण्य सस्नुषा

पुत्र शोकम् क्षणात् त्यक्त्वा तत्त्वे चित्तम् अधारयत्

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

सप्तम स्कन्दे द्वितीयो ऽध्याय ः॥

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

✐🎻🎺❆✡✢ ✤ ✣ ✦ ✧ ☆ ✫ ✬✭ ✮ ☆ ✱ ✳ ✳ ❃ ❂ ❁❀ ✿ ✶ ✷ ❈ ❊ ❋ ❖☆❆🎺🎻✐

अथ सप्तम स्कन्दः त्रुतीयो ऽध्याय :

स्कन्द- 07: अध्याय- 03

01 श्री नारद उवाच

हिरण्य कशिपू राजन् अजेयम् अजरामरम्

आत्मानम् अप्रति द्वन्द्वम् एकराजम् व्यधित् सत

02 स तेपे मन्दर द्रोण्याम् तपः परम दारुणम्

ऊर्ध्व बाहुः नभो दृष्टिः पादाङ् गुष्ठाश्रि तावनिः

03 जटा दीधि तिभी रेजे सम्वर्तार्क इवाम्शुभिः

तस्मिम् स्तपस् तप्य माने देवाः स्थानानि भेजिरे

04 तस्य मूर्ध्नः समुद् भूतः सधूमो ऽग्निस् तपो मयः

तिर्य गूर्ध्वम् अधो लोकान् अतपद् विष्व गीरितः

05 चुक्षुभुर् नद् युदन् वन्तः सद्वीपा द्रिश्च चाल भूः

निपेतुः सग्र हास्तारा जज्व लुश्च दिशो दश

06 तेन तप्ता दिवम् त्यक्त्वा ब्रह्म लोकम् ययुः सुराः

धात्रे विज्ञापया मासुः देव देव जगत् पते

07 दैत्येन्द्र तपसा तप्ता दिवि स्थातुम् न शक्नुमः

तस्य चोप शमम् भूमन् विधेहि यदि मन्यसे

लोका न यावन् नङ्क्ष्यन्ति बलिहारास् तवा भिभूः

08 तस्यायम् किल सङ्कल्पः चरतो दुश्चरम् तपः

श्रूयताम् किम् न विदितः तवा थापि निवेदितः

09 सृष्ट्वा चराचरम् इदम् तपो योग समाधिना

अध्यास्ते सर्व धिष्ण्येभ्य : परमेष्ठी निजासनम्

10 तदहम् वर्ध मानेन तपो योग समाधिना

कालात् मनोश् च नित्यत् वात् साधयिष्ये तथ् आत्मनः

11 अन्यथेदम् विधास् ये ऽहम् अयथा पूर्वम् ओजसा

किमन्यैः काल निर्धूतैः कल्पान्ते वैष्णवा दिभिः

12 इति शुश्रुम निर्बन्धम् तपः परम मास्थितः

विधत् स्वानन् तरम् युक्तम् स्वयम् त्रि भुवनेश् वर

13 तवासनम् द्विज गवाम् पार मेष्ठ्यम् जगत् पते

भवाय श्रेयसे भूत्यै क्षेमाय विजया य च

14 इति विज्ञापितो देवैः भगवान् आत्म भूर् नृप

परितो भृगु दक्षाद् यैः ययौ दैत्येश्वर् आश्रमम्

15 न ददर्श प्रतिच् छन्नम् वल्मीक तृण कीचकैः

पिपीलिका भिराचीर्णम् एदस्त्वङ् माम्स शोणितम्

16 तपन्तम् तपसा लोकान् यथा भ्रापि हितम् रविम्

विलक्ष्य विस्मितः प्राह प्रहसन् हम्स वाहनः

17 श्री ब्रह्मो उवाच

उत्तिष्ठो *[उ]*त्तिष्ठ भद्रम् ते तपः सिद्धो ऽसि काश्यप

वरदो ऽहम् अनुप्राप्तो व्रियताम् ईप्सितो वरः

18 अद्राक्षम् अहमे तत् ते हृत्सारम् महद् अद्भुतम्

दम्श भक्षित देहस्य प्राणा ह्यस्थिषु शेरते

19 नैतत् पूर्व ऋषयश् चक्रुः न करिष्यन्ति चापरे

निरम्बुः धार येत् प्राणान् को वै दिव्य समाः शतम्

20 व्यवसा येन ते ऽनेन दुष्करेण मनस्विनाम्

तपो निष्ठेन भवता जितो ऽहम् दिति नन्दन

21 ततस्त आशिषः सर्वा ददामि असुर पुङ्गव

मर्तस्य ते ह्यमर्तस्य दर्शनम् नाफलम् मम

22 श्री नारद उवाच

इत् युक्त्वादि भवो देवो भक्षि ताङ्गम् पिपीलिकैः

कमण्डलु जलेन् औक्षद् दिव्येना मोघर् आधसा

23 स तत् कीचक वल्मीकात् सह ओजो बलान् वितः

सर्वा वयव सम्पन्नो वज्र सम्हन नो युवा

उत्थितः तप्त हेमाभो विभावसुर् इवैधसः

24 स निरीक्ष् याम्बरे देवम् हम्सवाहम् अवस्थितम्

ननाम शिरसा भूमौ तद् दर्शन महोत्सवः

25 उत्थाय प्राञ्जलिः प्रह्व ईक्ष माणो दृशा विभुम्

हर्षाश्रु पुलकोद् भेदो गिरा गद्गदया गृणात्

26 श्री हिरण्य कशिपुर् उवाच

कल्पान्ते काल सृष्टेन यो ऽन्धेन तमसा वृतम्

अभिव्यनग् जगदिदम् स्वयञ् ज्योतिः स्वरोचिषा

27 आत्मना त्रिवृता चेदम् सृजत्य वति लुम्पति

रजः सत्त्व तमो धाम्ने पराय महते नमः

28 नम आद्याय बीजाय ज्ञान विज्ञान मूर्तये

प्राणेन्द्रिय मनो बुद्धि विकारैः व्यक्ति मीयुषे

29 त्वम् ईशिषे जगतस् तस्थु षश् च प्राणेन मुख्येन पतिः प्रजानाम्

चित्तस्य चित्तैर् मन इन्द्रियाणाम् पतिर् महान् भूत गुणाश येशः

30 त्वम् सप्त तन्तून् वितनोषि तन्वा त्रय्या चतुर् होत्र क विद्यया च

त्वमेक आत्मात्म वता मनादिः अनन्त पारः कविर् अन्तर् आत्मा

31 त्वमेव कालो ऽनिमिषो जनानाम् आयुर् लवाद्य वयवैः क्षिणोषि

कूटस्थ आत्मा परमेष्ठ्यजो महाम् स्त्वम् जीव लोकस्य च जीव आत्मा

32 त्वत्तः परम् नापरम् अप्यनेजद् एजच्च किञ्चिद् व्यति रिक्त मस्ति

विद्याः कलास्ते तन वश्च सर्वा हिरण्य गर्भो ऽसि बृहत्त्रि पृष्ठः

33 व्यक्तम् विभो स्थूलम् इदम् शरीरम् येनेन्द्रिय प्राण मनो गुणाम्स् त्वम्

भुङ्क्षे स्थितो धामनि पार मेष्ठ्ये अव्यक्त आत्मा पुरुषः पुराणः

34 अनन्ता व्यक्त रूपेण येनेदम् अखिलम् ततम्

चिदचिच् छक्ति युक्ताय तस्मै भगवते नमः

35 यदि दास्यसि अभिमतान् वरान् मे वरदोत्तम

भूतेभ्यः त्वद् विसृष् टेभ्यो मृत्युर् मा भून् मम प्रभो

36 नान्तर् बहिर् दिवा नक्तम् अन्यस्माद् अपि चायुधैः

न भूमौ नाम्बरे मृत्युः न नरैः न मृगैर् अपि

37 व्यसुभिर् वासु मद्भिर्वा सुरा सुर महोरगैः

अप्रति द्वन्द्व ताम् युद्धे ऐकपत्यम् च देहिनाम्

38 सर्वेषाम् लोक पालानाम् महिमानम् यथ् आत्मनः

तपो योग प्रभा वाणाम् यन्न रिष्यति कर्हिचित्

✐✎✍❁✡✢ ✤ ✥ ✦ ✧ ☆ ✫ ✬✭ ✮ ☆ ✱ ✲ ✳ ❃ ❂ ❁❀ ✿ ✶ ✴ ❄ ❊ ❋ ❖☆❁✍✎✐

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

सप्तम स्कन्दे त्रुतीयो ऽध्याय ः||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

✐✎✍❁✡✢ ✤ ✥ ✦ ✧ ☆ ✫ ✬✭ ✮ ☆ ✱ ✲ ✳ ❃ ❂ ❁❀ ✿ ✶ ✴ ❄ ❊ ❋ ❖☆❁✍✎✐

अथ सप्तम स्कन्दः चतुर्थ्थो ऽध्याय ः

स्कन्द- 07: अध्याय- 04

01 श्री नारद उवाच

एवम् वृतः शत धृतिः हिरण्य कशिपोर् अथ

प्रादात् तत् तपसा प्रीतो वराम्स् तस्य सु दुर्लभान्

02 श्री ब्रह्मो उवाच

ताते मे दुर्लभाः पुम्साम् यान् वृणीषे वरान् मम

तथापि वितराम् यङ्ग वरान् यद्यपि दुर्लभान्

03 ततो जगाम भगवान् अमोघा अनुग्रहो विभु:

पूजितो ऽसुर वर्येण स्तूय मान: प्रजेश् वरै:

04 एवम् लब्ध वरो दैत्यो बिभ्रद् हेम मयम् वपु:

भगवति अकरोद् द्वेषम् भ्रातुर् वधम् अनुस्मरन्

05 स विजित्य दिश: सर्वा लोकाम्श्च त्रीन् महासुर:

देवासुर मनुष् येन्द्रान् गन्धर्व गरुडो रगान्

06 सिद्ध चारण विद्याध्रान् ऋषीन् पितृ पतीन् मनून्

यक्ष रक्ष: पिशा चेशान् प्रेत भूत पतीन् अत

07 सर्व सत्त्व पतीन् जित्वा वश मानीय विश्वजित्

जहार लोक पालानाम् स्थानानि सह तेजसा

08 देवो द्यान श्रिया जुष्टम् अध्यास्ते स्म त्रि विष्टपम्

महेन्द्र भवनम् साक्षात् निर्मितम् विश्व कर्मणा

त्रै लोक्य लक्ष्म्या यतनम् अध्युवा साखि लर्द्धि मत्

09 यत्र विद्रुम सोपाना महा मार कता भुव:

यत्र स्फाटिक कुड्यानि वैदूर्य स्तम्भ पङ्क्तय:

10 यत्र चित्र वितानानि पद्म रागा सनानि च

पय: फेन निभा: शय्या मुक्ता दाम परिच् छदा:

11 कूजद्भि: नूपुरैर् देव्य: शब्द यन्त्य इतस् तत:

रत्न स्थलीषु पश्यन्ति सुदती: सुन्दरम् मुखम्

12 तस्मिन् महेन्द्र भवने महा बलो महा मना निर्जित लोक एकराट्

रेमे ऽभि वन्द्याङ्घ्रि युग: सुरादिभि: प्रता पितै: ऊर्जित चण्ड शासन:

13 तम् अङ्ग मत्तम् मधुनोरु गन्धिना विवृत्त ताम् राक्षम् अशेष धिष्ण्यपा:

उपास तोपायन पाणि भिर्विना त्रिभि: तपो योग बलौ जसाम् पदम्

14 जगुर् महेन्द्र आसनम् ओज सा स्थितम् विश्वावसु: तुम्बुरु रस्मद् आदय:

गन्धर्व सिद्धा ऋषयो ऽस्तु वन्मुहु: विद्याधरा: अप्सर सश् च पाण्डव

15 स एव वर्णाश्रमिभि: क्रतुभिर् भूरि दक्षिणै:

इज्य मानो हविर् भागान् नग्रहीत् स्वेन तेजसा

16 अकृष्ट पच्या तस् यासीत् सप्त द्वीप वती मही

तथा काम दुघा द्योउस्तु नान् आश्चर्य पदम् नभः

17 रत्ना कराश् च रत्नौघान् तत् पत्न्यश् चोहु रूर्मिभिः

क्षार सीधु घृत क्षौद्र दधि क्षीर् आमृतो दकाः

18 शैला द्रोणीभि राक्रीडम् सर्वर्तुषु गुणान् द्रुमाः

दधार लोक पालानाम् एक एव पृथग् गुणान्

19 स इत्थम् निर्जित ककुब् एकराड् विषयान् प्रियान्

यथोप जोषम् भुञ्जानो ना तृप्यद् अजितेन्द्रियः

20 एवम् ऐश्वर्य मत् तस्य दृप्तस् योच् छास्त्र वर्तिनः

कालो महान् व्यती याय ब्रह्म शापम् उपेयुषः

21 तस्योग्र दण्ड सम्विग्नाः सर्वे लोकाः सपालकाः

13 स मुक्तो ऽस्त्राग्नि तापेन दुर्वासाः स्वस्ति माम्स् ततः

प्रश शम्स तमुर् वीशम् युञ्जानः परमाशिषः

14 दुर्वासा उवाच

अहो अनन्त दासानाम् महत्त्वम् दृष्ट मद्य मे

कृतागसो ऽपि यद् राजन् मङ्गळानि समीहसे

15 दुष्करः को नु साधूनाम् दुस्त्यजो वा महात्मनाम्

यैः सङ्गृ हीतो भगवान् सात्वताम् ऋषभो हरिः

16 यन् नाम श्रुति मात्रेण पुमान् भवति निर्मलः

तस्य तीर्थ पदः किम् वा दासानाम् अवशिष्यते

17 राजन् अनुगृहीतो ऽहम् त्वयाति करुण् आत्मना

मद् अघम् पृष्ठतः कृत्वा प्राणा यन् मेऽभि रक्षिताः

18 राजा तम् अकृता हारः प्रत्या गमन काङ्क्षया

चरणौ उप सङ्गृह्य प्रसाद्य सम भोजयत्

19 सोऽशित्वा दृत मानीतम् आतिथ्यम् सार्व कामिकम्

तृप्त् आत्मा नृपतिम् प्राह भुज्यताम् इति सादरम्

20 प्रीतोऽस्मि अनुगृही तोऽस्मि तव भागवतस्य वै

दर्शन स्पर्शन् आलापैर् आतिथ्येन् आत्म मेधसा

21 कर्माव दातम् एतत् ते गायन्ति स्वः स्त्रियो मुहुः

कीर्तिम् परमपुण्याम् च कीर्त यिष्यति भूरियम्

22 श्री शुक उवाच

एवम् सङ्कीर्त्य राजानम् दुर्वासाः परितोषितः

ययौ विहा य सामन्त्र्य ब्रह्म लोकम् अहैतुकम्

23 सम्वत्सरो ऽत्य गात् तावद् यावता नागतो गतः

मुनिः तद् दर्शना काङ्क्षो राजाब् भक्षो बभूव ह

24 गते च दुर्वाससि सो ऽम्बरीषो द्विजोप योगाति पवित्रम् आहरत्

ऋषेर् विमोक्षम् व्यसनम् च बुद्ध्वा मेने स्ववीर्यम् च परानु भावम्

25 एवम् विधान् एक गुणः स राजा परात्मनि ब्रह्मणि वासुदेवे

क्रिया कलापैः समुवाह भक्तिम् यय् आविरिञ्च्यान् निरयाम्श् च कार

26 श्री शुक उवाच

अथ् आम्बरीषस् तनयेषु राज्यम् समान शीलेषु विसृज्य धीरः

वनम् विवेश् आत्मनि वासुदेवे मनो दधद् ध्वस्त गुण प्रवाहः

27 इत् येतत् पुण्य माख्यानम् अम्बरीषस्य भूपते

सङ्कीर्तयन् अनुध्यायन् भक्तो भगवतो भवेत्

✐🎻✐❁✡☩ ✤ ✣ ✦ ✧ ✩ ✫ ✭✭ ✯ ☆ ✱ ✲ ✳ ❃ ✪ ❁❀ ✿ ✶ ✴ ❄ ❊ ❋ ❖☆❁✐🎻✐

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

नवम स्कन्दे पञ्चमो ऽध्याय ।।

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

✐🎻✐❁✡☩ ✤ ✣ ✦ ✧ ✩ ✫ ✭✭ ✯ ☆ ✱ ✲ ✳ ❃ ✪ ❁❀ ✿ ✶ ✴ ❄ ❊ ❋ ❖☆❁✐🎻✐

अथ नवम स्कन्दः षष्टो ऽध्याय :

स्कन्द- 09: अध्याय- 06

01 श्री शुक उवाच

विरूपः केतुमान् छम्भुः अम्बरीष सुता स्त्रयः

विरूपात् पृषदश्वो ऽभूत् तत् पुत्रस्तु रथी तरः

02 रथीतरस् या प्रजस्य भार्यायाम् तन्त वेऽर्थितः

अङ्गिरा जनया मास ब्रह्म वर्चस् विनः सुतान्

03 एते क्षेत्रे प्रसूता वै पुनस्त् वाङ्गि रसाः स्मृताः

रथीत राणाम् प्रवराः क्षत्रो पेता द्विजा तयः

04 क्षुव तस्तु मनोर् जज्ञे इक्ष्वाकुर् घ्राण तः सुतः

तस्य पुत्र शत ज्येष्ठा विकुक्षि निमि दण्डकाः

05 तेषाम् पुरस्ताद् अभवन् नार्या वर्ते नृपा नृप

पञ्च विम्शतिः पश्चाच् च त्रयो मध्ये ऽपरे ऽन्यतः

06 स एक दाष्ट काश्राद्धे इक्ष्वाकुः सुत मादिशत्

माम्सम् आनीयताम् मेध्यम् विकुक्षे गच्छ मा चिरम्

07 तथेति स वनम् गत्वा मृगान् हित्वा क्रियार्हणान्

श्रान्तो बुभुक्षितो वीरः शशम् चादद पस्मृतिः

08 शेषम् निवेद या मास पित्रे तेन च तद् गुरुः

चोदितः प्रोक्षणा याह दुष्टमे तद् अकर्मकम्

09 ज्ञात्वा पुत्रस्य तत् कर्म गुरुणा भिहितम् नृपः

देशान् निः सारया मास सुतम् त्यक्त विधिम् रुषा

10 स तु विप्रेण सम्वादम् जापकेन समाचरन्

त्यक्त्वा कलेवरम् योगी स तेना वाप यत् परम्

11 पितर् युपर ते ऽभ्येत्य विकुक्षिः पृथिवी मिमाम्

शासद् ईजे हरिम् यज्ञैः शशाद इति विश्रुतः

12 पुरञ्जयस् तस्य सुत इन्द्र वाह इतीरितः

ककुत्स्थ इति चाप् युक्तः शृणु नामानि कर्मभिः

13 कृतान्त आसीत् समरो देवानाम् सह दानवैः

पार्ष्णि ग्राहो वृतो वीरो देवैर् दैत्य पराजितैः

14 वचनाद् देव देवस्य विष्णोर् विश्वात्मनः प्रभोः

वाहनत्वे वृतस् तस्य बभू वेन्द्रो महा वृषः

15 स सन्नद्धो धनुर् दिव्यम् आदाय विशिखान् छितान्

स्तूय मानस् समारुह्य युयुत्सुः ककुदि स्थितः

16 तेजसाप् यायितो विष्णोः पुरुषस्य परात्मनः

प्रतीच्याम् दिशि दैत् यानाम् न्यरुणत् त्रिद शैः पुरम्

17 तैस् तस्य चाभूत् प्रधनम् तुमुलम् लोम हर्षणम्

यमाय भल्लैर् अनयद् दैत्यान् एभि ययुर् मृधे

18 तस्येषु पाताभि मुखम् युगान्त् आग्नि मिवोल्बणम्

विसृज्य दुद्रुवुर् दैत्या हन्यमानाः स्व मालयम्

19 जित्वा परम् धनम् सर्वम् सश्रीकम् वज्र पाणये

प्रत्य यच्छत् स राजर्षिः इति नामभिर् आहृतः

20 पुरञ्ज यस्य पुत्रो ऽभूद् अनेनास् तत् सुतः पृथुः

विश्व रन्धिस् ततश् चन्द्रो युवनाश्वश् च तत् सुतः

21 श्रावस् तस् तत् सुतो येन श्रावस् ती निर् ममे पुरी

बृह दश् वस्तु श्रावस्तिः ततः कुवलयाश् वकः

22 यः प्रियार्थम् उतङ्कस्य धुन्धु नामा सुरम् बली

सुतानाम् एक विम्शत्या सहस्रैर् अह नद् वृतः

23 धुन्धु मार इति ख्यातः तत् सुतास् ते च जज्वलुः

धुन्धोर् मुखाग्नि ना सर्वे त्रय एवाव शेषिताः

24 दृढाश्वः कपिलाश् वश् च भद्राश्व इति भारत

दृढाश्व पुत्रो हर्यश्वो निकुम्भस् तत् सुतः स्मृतः

25 बर्हणाश्वो निकुम्भस्य कृशाश्वो ऽथास्य सेनजित्

युवनाश्वो ऽभ वत् तस्य सोऽन पत्यो वनम् गतः

26 भार्या शतेन निर्विण्ण ऋषयो ऽस्य कृपालवः

इष्टिम् स्म वर्तयाम् चक्रुः ऐन्द्रीम् ते सु समाहिताः

27 राजा तद् यज्ञ सदनम् प्रविष्टो निशि तर्षितः

दृष्ट्वा शयानान् विप्राम्स् तान् पपौ मन्त्र जलम् स्वयम्

28 उत्थि तास्ते निशाम् याथ व्युदकम् कलशम् प्रभो

पप्रच्छुः कस्य कर्मेदम् पीतम् पुम्स वनम् जलम्

29 राज्ञा पीतम् विदित्वा त ईश्वर प्रहिते न ते

ईश्वराय नमश् चक्रुः अहो दैव बलम् बलम्

30 ततः काल उपा वृत्ते कुक्षिम् निर्भिद्य दक्षिणम्

युवनाश् वस्य तनयः चक्रवर्ती जजान ह

31 कम् धास्यति कुमारोऽयम् स्तन्यम् रोरूयते भृशम्

माम् धाता वत्स मा रोदीः इतीन्द्रो देशिनी मदात्

32 न ममार पिता तस्य विप्र देव प्रसादतः

युवनाश्वो ऽथ तत् रैव तपसा सिद्धिम् अन्वगात्

33 त्रसद् दस्युः इतीन्द्रो ऽङ्ग विदधे नाम तस्य वै

यस्मात् त्रसन्ति ह्युद् विग्ना दस्यवो रावणा दयः

34 यौवनाश्वो ऽथ मान्धाता चक्रवर्त् यवनीम् प्रभुः

सप्त द्वीप वती मेकः शशा साच्युत तेजसा

35 ईजे च यज्ञम् क्रतुभिः आत्म विद् भूरि दक्षिणैः

सर्व देव मयम् देवम् सर्वात्मकम् अतीन्द्रियम्

36 द्रव्यम् मन्त्रो विधिर् यज्ञो यजमानस् तथर्त् विजः

धर्मो देशश् च कालश् च सर्वमेतद् यद् आत्मकम्

37 यावत् सूर्य उदेति स्म यावच्च प्रति तिष्ठति

सर्वम् तत् यौवनाश् वस्य मान्धातुः क्षेत्रम् उच्यते

38 शशबिन्दोर् दुहितरि बिन्दु मत्याम धान् नृपः

पुरु कुत्सम् अम्बरीषम् मुचुकुन्दम् च योगिनम्

तेषाम् स्वसारः पञ्चाशत् सौभरिम् वव्रिरे पतिम्

39 यमुनान्तर् जले मग्नः तप्य मानः परम् तपः

निर्वृतिम् मीन राजस्य वीक्ष्य मैथुन धर्मिणः

40 जातस् पृहो नृपम् विप्रः कन्याम् एकाम् अयाचत

सोऽप् याह गृह्यताम् ब्रह्मन् कामम् कन्या स्वयम्वरे

41 स विचिन्त्या प्रियम् स्त्रीणाम् जरठोऽयम् असम्मतः

वलीपलित एजत्क इत्यहम् प्रत् युदा हृतः

42 साधयिष्ये तथ् आत्मानम् सुर स्त्रीणाम् अभीप्सितम्

किम् पुनर् मनु जेन्द्राणाम् इति व्यवसितः प्रभुः

43 मुनिः प्रवेशितः क्षत्रा कन्यान्तः पुरम् ऋद्धिमत्

वृतः स राज कन्याभिः एक पञ्चा शता वरः

44 तासाम् कलिर् अभूद् भूयाम् स्तदर्थे ऽपोह्य सौहृदम्

ममानु रूपो नायम् व इति तद् गत चेतसाम्

45 स बह्वृचस् ताभिर् अपारणीय तपः श्रिया नर्घ्य परिच् छदेषु

गृहेषु नानो पवनाम् अलाम्भः सरः सु सौगन्धिक काननेषु

46 महार्ह शय्यासन वस्त्र भूषण स्नानानु लेपाभ् यवहार माल्यकैः

स्वलङ्कृत स्त्री पुरुषेषु नित् यदा रेमेऽनु गायद् द्विज भृङ्ग वन्दिषु

47 यद् गार्हस्थ्यम् तु सम् वीक्ष्य सप्त द्वीप वती पतिः

विस्मितः स्तम्भम् अजहात् सार्व भौम श्रियान् वितम्

48 एवम् गृहेषु अभिरतो विषयान् विविधैः सुखैः

सेवमानो न चातुष्यद् आज्यस् तोकैर् इवानलः

49 स कदाचिद् उपासीन आत्मा पह्नवम् आत्मनः

द दर्श बह्वृचा चार्यो मीन सङ्ग समुत्थितम्

50 अहो इमम् पश्यत मे विनाशम् तपस्विनः सच् चरित व्रतस्य

अन्तर् जले वारिचर् अप्रसङ्गात् प्रच्यावितम् ब्रह्म चिरम् धृतम् यत्

51 सङ्गम् त्यजेत मिथुन व्रतीनाम् मुमुक्षुः

सर्वात् मना न विसृजेद् बहिर् इन्द्रियाणि

एकश् चरन् रहसि चित्तम् अनन्त ईशे

युञ्जीत तद् व्रतिषु साधु षु चेत् प्रसङ्गः

52 एकस् तपस्व्यहम् अथाम्भसि मत्स्य सङ्गात्

पञ्चाश दासम् उत पञ्च सहस्र सर्गः

नान्तम् व्रजामि उभय कृत्य मनो रथानाम्

माया गुणैर् हृत मतिः विषये ऽर्थ भावः

53 एवम् वसन् गृहे कालम् विरक्तो न्यास मास्थितः

वनम् जगा मानु ययुः तत् पत्न्यः पति देवताः

54 तत्र तप्त्वा तपस् तीक्ष्णम् आत्म कर्शनम् आत्मवान्

सहै वाग्नि भिर् आत्मानम् युयोज परम् आत्मनि

55 ताः स्व पत्युर् महाराज निरीक्ष्याध् यात्मिकीम् गतिम्

अन्वीयुस् तत् प्रभावेण अग्निम् शान्तम् इवार्चिषः

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

नवम स्कन्दे षष्टो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

अथ नवम स्कन्दः सप्तमो ऽध्याय :

स्कन्द- 09: अध्याय- 07

01 श्री शुक उवाच

मान्धातुः पुत्र प्रवरो यो ऽम्बरीषः प्रकीर्तितः

पिता महेन प्रवृतो यौवनाश् वस्च तत् सुतः

हारीतस् तस्य पुत्रो ऽभूत् मान्धा तृ प्रवरा इमे

02 नर्मदा भ्रातृभिर् दत्ता पुरु कुत्साय योरगैः

तया रसातलम् नीतो भुजगेन्द्र प्रयुक्तया

03 गन्धर्वान् अवधीत् तत्र वध्यान् वै विष्णु शक्ति धृक्

नागाल् लब्ध वरः सर्पाद् अभयम् स्मरताम् इदम्

04 त्रसद् दस्युः पौरु कुत्सो यो ऽनरण्यस्य देह कृत्

हर्यश्वः तत्सु तस् तस्मात् अरुणो ऽथ त्रि बन्धनः

05 तस्य सत्य व्रतः पुत्रः त्रिशङ्कुर् इति विश्रुतः

प्राप्तश् चाण्डाल ताम् शापाद् गुरोः कौशिक तेजसा

06 स शरीरो गतः स्वर्गम् अद्यापि दिवि दृश् यते

पातितो ऽवाक्शिरा देवैः तेनैव स्तम्भितो बलात्

07 त्रै शङ्कवो हरिश् चन्द्रो विश्वामित्र वसिष्ठयोः

यन् निमित्तम् अभूद् युद्धम् पक्षिणोर् बहुवार् षिकम्

08 सोऽन पत्यो विषण्णात्मा नारदस् योपदेशतः

वरुणम् शरणम् यातः पुत्रो मे जायताम् प्रभो

09 यदि वीरो महाराज तेनैव त्वाम् यजे इति

तथेति वरुणे नास्य पुत्रो जातस्तु रोहितः

10 जातः सुतो ह्यने नाङ्ग माम् यजस्वेति सोऽब्रवीत्

यदा पशुर् निर्द शः स्याद् अथ मेध्यो भवेदिति

11 निर्दशे च स आगत्य यजस्वेत् याह सोऽब्रवीत्

दन्ताः पशोर् यज्जा येरन् अथ मेध्यो भवेदिति

12 जाता दन्ता यजस्वेति स प्रत् याहा थ सोऽब्रवीत्

यदा पतन्त् यस्य दन्ता अथ मेध्यो भवेदिति

13 पशोर् निपतिता दन्ता यजस्वेत् याह सोऽब्रवीत्

यदा पशोः पुनर् दन्ता जायन्ते ऽथ पशुः शुचिः

14 पुनर् जाता यजस् वेति स प्रत्याहा थ सोऽब्रवीत्

सान् नाहिको यदा राजन् राजन्यो ऽथ पशुः शुचिः

15 इति पुत्रानु रागेण स्नेहयन् त्रि त चेतसा

कालम् वञ्चयता तम् तम् उक्तो देवस् तम् ऐक्षत

16 रोहितस् तद् अभिज्ञाय पितुः कर्म चिकीर्षितम्

प्राण प्रेप्सुः धनुष् पाणिः अरण्यम् प्रत्य पद् यत

17 पितरम् वरुण ग्रस्तम् श्रुत्वा जात महोदरम्

रोहितो ग्राममे याय तम् इन्द्रः प्रत्यषे धत

18 भूमेः पर्यटनम् पुण्यम् तीर्थ क्षेत्र निषेवणैः

रोहिता यादि शच् छक्रः सोऽप् यरण्ये ऽव सत् समाम्

19 एवम् द्वितीये तृतीये चतुर्थे पञ्चमे तथा

अभ्येत् याभ्येत् य स्थविरो विप्रो भूत् वाह वृत्रहा

20 षष्ठम् सम्वत्सरम् तत्र चरित्वा रोहितः पुरीम्

उप व्रजन्न् अजी गर्ताद् अक्रीणान् मध्यमम् सुतम्

21 शुनःशेफम् पशुम् पित्रे प्रदाय सम वन्दत

ततः पुरुषमे धेन हरिश् चन्द्रो महा यशाः

22 मुक्तोदरो ऽयजद् देवान् वरुणादीन् महत् कथ:

विश्वामित्रो ऽभवत् तस्मिन् होता चाध्वर् युरात्मवान्

23 जमदग्निर् अभूद् ब्रह्मा वसिष्ठो ऽयास्य: सामग:

तस्मै तुष्टो ददा विन्द्र: शात कौम्भमयम् रथम्

24 शुन:शेफस् य माहात्म्यम् उपरिष्टात् प्रचक्ष् यते

सत्यम् सारम् धृतिम् दृष्ट्वा सभार् यस्य च भू पते:

25 विश्वामित्रो भृशम् प्रीतो ददाव विहताम् गतिम्

मन: पृथिव्याम् ताम् अद्भि: तेजसापो ऽनिलेन तत्

26 खे वायुम् धारयम्स् तच् च भूतादौ तम् महात्मनि

तस्मिन् ज्ञान कलाम् ध्यात्वा तया ज्ञानम् विनिर्दहन्

27 हित्वा ताम् स्वेन भावेन निर्वाण सुखसम् विदा

अनिर्देश् याप्र तर्क्येण तस्थौ विध्वस् त बन्धन:

✐✐✐❁✡✢ ✤ ✣ ✦ ✧ ☆ ✫ ✭✮ ✯ ☆ ✱ ✲ ✳ ❃ ❂ ❁❀ ✿ ✶ ✴ ❄ ❉ ❋ ❖☆❁✐✐✐

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

नवम स्कन्दे सप्तमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

✐✐✐❁✡✢ ✤ ✣ ✦ ✧ ☆ ✫ ✭✮ ✯ ☆ ✱ ✲ ✳ ❃ ❂ ❁❀ ✿ ✶ ✴ ❄ ❉ ❋ ❖☆❁✐✐✐

अथ नवम स्कन्द: अष्टमो ऽध्याय :

स्कन्द- 09: अध्याय- 08

01 श्री शुक उवाच

हरितो रोहित सुत: चम्पस् तस्माद् विनिर्मिता

चम्पापुरी सुदेवो ऽतो विजयो यस्य चात्मज:

02 भरुकस् तत् सुतस् तस्माद् वृकस् तस्यापि बाहुक:

सोऽरिभिर् हृतभू राजा सभार्यो वनम् आविशत्

03 वृद्धम् तम् पञ्चताम् प्राप्तम् महिष् यनु मरिष्यती

और्वेण जानत् आत्मानम् प्रजावन्तम् निवारिता

04 आज्ञा यास्यै स पत्नी भिः गरो दत्तो ऽन्धसा सह

सह तेनैव सञ्जातः सगराख्यो महा यशाः

05 सगरश् चक्रवर्त् यासीत् सागरो यत् सुतैः कृतः

यस् ताल जङ्घान् यवनाञ् छकान् हैहय बर्बरान्

06 नावधीद् गुरु वाक्येन चक्रे विकृत वेषिणः

मुण्डान् छमश्रु धरान् काम्श्चिन् मुक्त केशार्ध मुण्डितान्

07 अनन्तर् वाससः काम्श्चिद् अबहिर् वास सोऽपरान्

सोऽश्व मेधैर् अयजत सर्व वेद सुरात्मकम्

08 और्वो पदिष्टयो गेन हरिम् आत्मानम् ईश्वरम्

तस्योत् सृष्टम् पशुम् यज्ञे जहार् आश्वम् पुरन्दरः

09 सुमत्यास् तनया दृप्ताः पितुर् आदेश कारिणः

हयम् अन्वेषम् आणास्ते समन्तान् न्यखनन् महीम्

10 प्रागुद् ईच्याम् दिशि हयम् दद् ऋशुः कपिलान्तिके

एष वाजि हरश् चौर आस्ते मीलित लोचनः

11 हन्यताम् हन्यताम् पाप इति षष्टि सहस्रिणः

उदायुधा अभिययुः उन्मिमेष तदा मुनिः

12 स्व शरीर् आग्निना तावन् महेन्द्र हृत चेतसः

महद् व्यतिक्रम हता भस्मसाद् अभवन् क्षणात्

13 न साधु वादो मुनि कोप भर्जिता नृपेन्द्र पुत्रा इति सत्त्व धामनि

कथम् तमो रोषमयम् विभौ यते जगत् पवित् रात्मनि खे रजो भुवः

14 यस्येरिता साङ्ख्य मयी दृढेह नौः यया मुमुक्षुः तरते दुरत्ययम्

भवार्णवम् मृत्यु पथम् विपश्चितः परात्म भूतस्य कथम् पृथङ् मतिः

15 यो ऽसमञ्ज स इत् युक्तः स केशिन्या नृपात्मजः

तस्य पुत्रो ऽम्शुमान् नाम पितामह हिते रतः

16 असमञ्जस आत्मानम् दर्शयन् असमञ्जसम्

जातिस्मरः पुरा सङ्गाद् योगी योगाद् विचालितः

17 आचरन् गर्हितम् लोके ज्ञातीनाम् कर्म विप्रियम्

सरय्वाम् क्रीडतो बालान् प्रास्यद् उद्वेज यन्जनम्

18 एवम् वृत्तः परित्यक्तः पित्रा स्नेहम् अपोह्य वै

योग् ऐश्वर्येण बालाम्स् तान् दर्श यित्वा ततो ययौ

19 अयोध्या वासिनः सर्वे बालकान् पुनर् आगतान्

दृष्ट्वा विसिस्मिरे राजन् राजा चाप्यन् वतप्यत

20 अम्शुमाम्श् चोदितो राज्ञा तुरगान् वेषणे ययौ

पितृ व्यखातानु पथम् भस्मान्ति ददृशे हयम्

21 तत्रा सीनम् मुनिम् वीक्ष्य कपिलाख्यम् अधोक्षजम्

अस्तौत् समाहित मनाः प्राञ्जलिः प्रणतो महान्

22 अम्शुमान् उवाच

न पश्यति त्वाम् परमात्मनो ऽजनो न बुध् यते ऽद्यापि समाधि युक्तिभिः

कुतोऽपरे तस्य मनः शरीरधी विसर्ग सृष्टा वयम् अप्रकाशाः

23 ये देह भाजस् त्रिगुण प्रधाना गुणान् विपश्यन्त् युत वा तमश् च

यन् मायया मोहित चेत सस्ते विदुः स्व सम्स्थम् न बहिः प्रकाशाः

24 तम् त्वाम् अहम् ज्ञान घनम् स्वभाव प्रध् वस्त माया गुण भेद मोहैः

सनन्दनाद् यैः मुनिभिर् विभाव्यम् कथम् विमूढः परिभाव यामि

25 प्रशान्त माया गुण कर्म लिङ्गम् अनाम रूपम् सद सद् विमुक्तम्

ज्ञानोप देशाय गृही त देहम् नमामहे त्वाम् पुरुषम् पुराणम्

26 त्वन् माया रचिते लोके वस्तु बुद्ध्या गृहादिषु

भ्रमन्ति काम लोभेर्ष् या मोह विभ्रान् त चेतसः

27 अद्य नः सर्व भूतात्मन् काम कर्मेन्द्रिया शयः

मोह पाशो दृढश् छिन्नो भगवम्स् तव दर्शनात्

28 श्री शुक उवाच

इत्थम् गीतानु भावस् तम् भगवान् कपिलो मुनि:

अम्शुमन्तम् उवाचेदम् अनुग्राह्य धिया नृप

29 श्री भगवान् उवाच

अश्वोऽयम् नीयताम् वत्स पितामह पशुस् तव

इमे च पितरो दग्धा गङ्गाम् भोऽर् हन्ति नेतरत्

30 तम् परिक्रम्य शिरसा प्रसाद्य हयम् आनयत्

सगरस् तेन पशुना क्रतुशेषम् समापयत्

31 राज्यम् अम्शुमति न्यस्य नि:स्पृहो मुक्त बन्धन:

और्वोप दिष्ट मार्गेण लेभे गतिम् अनुत्तमाम्

🎤🎻🎺☸✡✢ ✤ ✣ ✦ ✧ ☆ ✯ ✪✭ ✰ ☆ ✱ ✳ ✳ ❃ ❂ ❁❀ ✿ ✶ ✴ ❄ ❅ ❋ ❖☆☸🎺🎻🎤

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

नवम स्कन्दे अष्टमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

🎤🎻🎺☸✡✢ ✤ ✣ ✦ ✧ ☆ ✯ ✪✭ ✰ ☆ ✱ ✳ ✳ ❃ ❂ ❁❀ ✿ ✶ ✴ ❄ ❅ ❋ ❖☆☸🎺🎻🎤

अथ नवम स्कन्द: नवमो ऽध्याय :

स्कन्द- 09: अध्याय- 09

01 श्री शुक उवाच

अम्शुमाम्श् च तपस् तेपे गङ्गा नयन काम् यया

कालम् महान्तम् नाशक्नोत् तत: कालेन सम्स्थित:

02 दिलीपस् तत् सुतस् तद् वद् अशक्त: कालमेयिवान्

भगीरथस् तस्य पुत्र: तेपे स सु महत् तप:

03 दर्शया मास तम् देवी प्रसन्ना वरदास्मि ते

इत् युक्तः स्वम् अभिप्रायम् शशम्सा वन तो नृपः

04 कोऽपि धार यिता वेगम् पतन्त्या मे मही तले

अन्यथा भूतलम् भित् त्वा नृप यास्ये रसातलम्

05 किम् चाहम् न भुवम् यास्ये नरा मय्या मृजन्त् यघम्

मृजामि तद् अघम् कुत्र राजम्स् तत्र विचिन्त् यताम्

06 श्री भगीरथ उवाच

साधवो न्यासिनः शान्ता ब्रह्मिष्ठा लोक पावनाः

हरन्त् यघम् ते ऽङ्ग सङ्गात् ते ष्वास्ते ह्यघभिद् हरिः

07 धारयिष् यति ते वेगम् रुद्रस् त्वात्मा शरीरिणाम्

यस्मिन् ओतम् इदम् प्रोतम् विश्वम् शाटीव तन् तुषु

08 इत् युक्त्वा स नृपो देवम् तपसा तोष यच् छिवम्

कालेन् आल्पी यसा राजन्ः तस् येशश् सम तुष् यत

09 तथेति राज्ञा भिहितम् सर्व लोक हितः शिवः

दधा राव हितो गङ्गाम् पाद पूत जलाम् हरेः

10 भगीरथः स राजर्षिः निन्ये भुवन पावनीम्

यत्र स्व पित्ॠणाम् देहा भस्मी भूताः स्म शेरते

11 रथेन वायु वेगेन प्रयान्तम् अनुधावती

देशान् पुनन्ती निर् दग्धान् आसिञ्चत् सगर् आत्मजान्

12 यज् जल स्पर्श मात्रेण ब्रह्म दण्ड हता अपि

सगर् आत्मजा दिवम् जग्मुः केवलम् देह भस्मभिः

13 भस्मी भूताङ्ग सङ्गेन स्वर्याताः सगर् आत्मजाः

किम् पुनः श्रद्धया देवीम् येसे वन्ते धृत व्रताः

14 न ह्येतत् परम् आश्चर्यम् स्वर्धुन्या यदि होदितम्

अनन्त चरणाम् भोज प्रसूताया भवच् छिदः

15 सन् निवेश्य मनो यस्मिञ् छ्रद्धया मुनयो ऽमलाः

त्रै गुण्यम् दुस्त् यजम् हित्वा सद्यो यातास् तद् आत्मताम्

16 श्रुतो भगीरथाज् जज्ञे तस्य नाभो ऽपरो ऽभवत्

सिन्धु द्वीपस् ततस् तस्माद् अयुतायुस् ततो ऽभवत्

17 रुतुपर्णो नलसखो यो ऽश्व विद्या मयान् नलात्

दत् त्वाक्ष हृदयम् चास्मै सर्व कामस्तु तत् सुतः

18 ततः सुदा सस् तत् पुत्रो मद यन्ती पतिर् नृपः

आहुर् मित्र सहम् यम् वै कल्माषाङ्घ्रि मुत क्वचित्

वसिष्ठ शापाद् रक्षो ऽभूद् अनपत्यः स्व कर्मणा

19 श्री राजो वाच

किम् निमित्तो गुरोः शापः सौदा सस्य महात्मनः

एतद् वेदितु मिच्छामः कथ्य ताम् न रहो यदि

20 श्री शुक उवाच

सौदासो मृगयाम् किञ्चिच् चरन् रक्षो जघान ह

मुमोच भ्रातरम् सोऽथ गतः प्रतिचि कीर्षया

21 स चिन्तयन् नघम् राज्ञः सूद रूप धरो गृहे

गुरवे भोक्तु कामाय पक्त्वा निन्ये नरामिषम्

22 परिवेक्ष्य माणम् भगवान् विलोक्या भक्ष्य मञ्जसा

राजानम् अशपत् क्रुद्धो रक्षो ह्येवम् भविष्यसि

23 रक्षः कृतम् तद् विदित्वा चक्रे द्वादश वार्षिकम्

सोऽप्य पोऽञ्जलि मादाय गुरुम् शप्तुम् समुद् यतः

24 वारितो मदयन्त् यापो रुशतीः पाद योर् जहौ

दिशः खम् अवनीम् सर्वम् पश्यन् जीव मयम् नृपः

25 राक्षसम् भाव मापन्नः पादे कल्माष ताम् गतः

व्यवाय काले ददृशे वनौ कोदम् पती द्विजौ

26 क्षुधार्तो जगृहे विप्रम् तत् पत्न्याहा कृतार्थ वत्

न भवान् राक्षसः साक्षाद् इक्ष्वाकूणाम् महा रथः

27 मद यन्त्याः पतिर् वीर नाधर्मम् कर्तु मर्हसि

देहि मे ऽपत्य कामाया अकृतार्थम् पतिम् द्विजम्

28 देहोऽयम् मानुषो राजन् पुरुषस् याखिल् आर्थदः

तस्माद् अस्य वधो वीर सर्वार्थ वध उच्यते

29 एष हि ब्राह्मणो विद्वान्स् तपः शील गुणान् वितः

आरिराध यिषुर् ब्रह्म महा पुरुष सञ्ज्ञितम्

सर्व भूतात्म भावेन भूतेष् वन्तर् हितम् गुणैः

30 सोऽयम् ब्रह्म ऋषि वर्यस् ते राजर्षि प्रवर् आद्विभो

कथम् अर्हति धर्मज्ञ वधम् पितुर् इवात्मजः

31 तस्य साधोर पापस्य भ्रूणस्य ब्रह्म वादिनः

कथम् वधम् यथा बभ्रोः मन्यते सन् मतो भवान्

32 यद् ययम् क्रियते भक्ष्यः तर्हि माम् खाद पूर्वतः

न जीविष्ये विना येन क्षणम् च मृतकम् यथा

33 एवम् करुण भाषिण्या विलपन्त्या अनाथवत्

व्याघ्रः पशुम् इवा खादत् सौदासः शाप मोहितः

34 ब्राह्मणी वीक्ष्य दिधिषुम् पुरुषा देन भक्षितम्

शोचन्त् यात्मान मुर्वीशम् अशपत् कुपिता सती

35 यस्मान्मे भक्षितः पाप काम् आर्तायाः पतिस् त्वया

तवापि मृत्यु राधानाद् अकृत प्रज्ञ दर्शितः

36 एवम् मित्र सहम् शप्त्वा पति लोक परायणा

तद् अस्थीनि समिद् धेऽग्नौ प्रास्य भर्तुर् गतिम् गता

37 विशापो द्वाद शाब् दान्ते मैथुनाय समुद् यतः

विज्ञाप्य ब्राह्मणी शापम् महिष्या स निवारितः

38 तत ऊर्ध्वम् स तत् याज स्त्री सुखम् कर्मणा प्रजाः

वसिष्ठस् तद् अनुज्ञातो मद यन्त्याम् प्रजाम धात्

39 सा वै सप्त समा गर्भम् अबिभ्रन्न व्यजायत

जघ्ने ऽश्म नोदरम् तस्याः सोऽश्म कस्तेन कथ् यते

40 अश्मकान् मूलको जज्ञे य: स्त्रीभि: परि रक्षित:

नारीक वच इत् युक्तो नि: क्षत्रे मूल को ऽभवत्

41 ततो दशरथस् तस्मात् पुत्र ऐड विडस् तत:

राजा विश्वसहो यस्य खट्वाङ्गश् चक्रवर्त् यभूत्

42 यो देवैर् अर्थितो दैत्यान् अवधीद् युधि दुर्जय:

मुहूर्तम् आयुर् ज्ञात् वैत्य स्वपुरम् सन्दधे मन:

43 न मे ब्रह्म कुलात् प्राणा: कुल दैवान् न चात्मजा:

न श्रियो न मही राज्यम् न दाराश् चाति वल्लभा:

44 न बाल्येऽपि मतिर् मह्यम् अधर्मे रमते क्वचित्

नापश्यम् उत्तम श्लोकाद् अन्यत् किञ्चन वस्त् वहम्

45 देवै: कामवरो दत्तो मह्यम् त्रि भुवनेश् वरै:

न वृणे तमहम् कामम् भूत भावन भावन:

46 ये विक्षिप् तेन्द्रिय धियो देवास्ते स्वहृदि स्थितम्

न विन्दन्ति प्रियम् शश्वद् आत्मानम् किमुतापरे

47 अथेश माया रचितेषु सङ्गम् गुणेषु गन्धर्व पुरोप मेषु

रूढम् प्रकृत् यात्मनि विश्व कर्तु: भावेन हित्वा तमहम् प्रपद्ये

48 इति व्यवसितो बुद्ध्या नारायण गृही तया

हित्वान् य भावम् अज्ञानम् तत: स्वम् भावम् आस्थित:

49 यत् तद् ब्रह्म परम् सूक्ष्मम् अशून्यम् शून्य कल्पितम्

भगवान् वासुदेवेति यम् गृणन्ति हि सात् वता:

✎✐✑✒✡✣ ✤ ✥ ✦ ✧ ☆ ✩ ✪✫ ✬ ☆ ✱ ✲ ✳ ✺ ✪ ❁❀ ✿ ✶ ✴ ❄ ❊ ✻ ❖☆✵✒✑✐✎

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

नवम स्कन्दे नवमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

✐✐✐❁✡✢ ✤ ✣ ✦ ✧ ✩ ✫ ✬✭ ✮ ☆ ✱ ✲ ✳ ❃ ❂ ❁❀ ✿ ✶ ✴ ❄ ❉ ❋ ❖☆☸✐✐✐

अथ नवम स्कन्दः दशमो ऽध्याय :

स्कन्द- *09:* अध्याय- *10*

*01* श्री शुक उवाच

खट्वाङ्गाद् दीर्घ बाहुश् च रघुस् तस्मात् पृथुश्रवाः

अजस् ततो महाराजः तस्माद् दशरथो ऽभवत्

*02* तस्यापि भगवान् एष साक्षाद् ब्रह्म मयो हरिः

अम्शाम् शेन चतुर् धागात् पुत्र त्वम् प्रार्थितः सुरैः

राम लक्ष्मण भरत शत्रुघ्ना इति सम्ज्ञया

*03* तस्यानु चरितम् राजन् ऋषिभिः तत्त्व दर्शिभिः

श्रुतम् हि वर्णितम् भूरि त्वया सीता पतेर् मुहुः

*04* गुर्वर्थे त्यक्त राज्यो व्यचरद् अनुवनम् पद्म पद्भ्याम् प्रिया याः

पाणि स्पर्शा क्षमाभ्याम् मृजित पथ रुजो यो हरीन् द्रानु जाभ्याम्

वैरूप्याच् छूर्पणख्याः प्रिय विरह रुषा आरोपित भ्रू विजृम्भ

त्रस् ताब्धिः बद्ध सेतुः खल दव दहनः कोसलेन्द्रो ऽवतान् नः

*05* विश्वा मित्राध् वरे येन मारीचाद् या निशा चराः

पश्यतो लक्ष्मणस् यैव हता नैर् ऋत पुङ्गवाः

*06* यो लोक वीर समितौ धनुरैश मुग्रम्

सीता स्वयम् वर गृहे त्रि शतोप नीतम्

आदाय बाल गजलील इवेक्षु यष्टिम्

सज्जी कृतम् नृप विकृष्य बभञ्ज मध्ये

*07* जित्वानु रूप गुण शील वयोऽङ्ग रूपाम्

सीता भिधाम् श्रिय मुरस् यभि लब्ध मानाम्

मार्गे व्रजन् भृगु पतेर् व्यनयत् प्ररूढम्

दर्पम् महीम कृत यस् त्रिर राज बीजाम्

08 यः सत्य पाश परिवीत पितुर् निदेशम्
स्त्रैणस्य चापि शिरसा जगृहे सभार्यः
राज्यम् श्रियम् प्रणयिनः सुहृदो निवासम्
त्यक्त्वा ययौ वन मसूनिव मुक्त सङ्गः
09 रक्षः स्वसुः व्यकृत रूपम् अशुद्ध बुद्धेः
तस्याः खर त्रिशिर दूषण मुख्य बन्धून्
जघ्ने चतुर् दश सहस्र मपारणीय
कोदण्ड पाणिः अटमान उवास कृच्छ्रम्
10 सीता कथा श्रवण दीपित हृच्छ येन
सृष्टम् विलोक्य नृपते दश कन्धरेण
जघ्ने ऽद्भुतैण वपुषा अश्रमतो ऽपकृष्टो
मारीच माशु विशिखेन यथा कमुग्रः
11 रक्षो ऽधमेन वृकवद् विपिने ऽस मक्षम्
वैदेह राज दुहितर् यपया पितायाम्
भ्रात्रा वने कृपण वत् प्रियया वियुक्तः
स्त्री सङ्गिनाम् गतिम् इति प्रथयम्श् च चार
12 दग् ध्वात्म कृत्य हत कृत्य महन्क बन्धम्
सख्यम् विधाय कपिभिर् दयिता गतिम् तैः
बुद्ध्वाथ वालि नि हते प्लवगेन्द्र सैन्यैः
वेलाम गात्स मनुजो ऽजभवार्चि ताङ्घ्रिः
13 यद् रोष विभ्रम विवृत्त कटाक्ष पात
सम्भ्रान्तन क्रमकरो भय गीर्ण घोषः
सिन्धुः शिरस् यर्हणम् परिगृह्य रूपी
पादार विन्दम् उपगम्य बभाष एतत्
14 न त्वाम् वयम् जडधियो नु विदाम भूमन्
कूटस्थम् आदि पुरुषम् जगताम धीशम्

यत् सत्त्वत: सुरगणा रजस: प्रजेशा
मन्योश् च भूत पतय: स भवान् गुणेश:

15 कामम् प्रयाहि जहि विश्रव सो ऽवमेहम्
त्रैलोक्य रावणम् अवाप्नुहि वीर पत्नीम्
बध्नीहि सेतु मिह ते यशसो वितत्यै
गायन्ति दिग् विजयिनो यम् उपेत्य भूपा:

16 बद्ध्वो दधौ रघु पतिर् विविधाद्रि कूटै:
सेतुम् कपीन्द्र करकम् पितु भूरु हाङ्गै:
सुग्रीव नील हनुमत् प्रमुखैर नीकै:
लङ्काम् विभीषण दृशा विशदग्र दग्धाम्

17 सा वा नरेन्द्र बल रुद्ध विहार कोष्ठ
श्री द्वार गोपुर सदो वलभी विटङ्का
निर्भज्यमान धिषण ध्वज हेम कुम्भ
शृङ्गाटका गज कुलैर् ह्रदि नीव घूर्णा

18 रक्ष: पतिस् तद् अवलोक्य निकुम्भ कुम्भ
धूम् राक्ष दुर् मुख सुरान्त नरान्त कादीन्
पुत्रम् प्रहस्तम् अतिकाय विकम्प नादीन्
सर्वानुगान् समहिनो दथ कुम्भकर्णम्

19 ताम् यातु धान पृत नाम सिशूल चाप
प्रासर्ष्टि शक्ति शरतो मर खड्ग दुर्गाम्
सुग्रीव लक्ष्मण मरुत् सुत गन्ध माद
नीलाङ्ग दर्क्ष पनसा दिभिरन् वितोऽगात्

20 ते ऽनीकपा रघु पतेर् अभि पत्य सर्वे
द्वन् द्वम् वरूथम् इभ पत्ति रथाश्व योधै:
जघ्नुर् द्रुमैर् गिरि गदेषुभिर् अङ्ग दाद्या:
सीताभि मर्ष हत मङ्गळ रावणेशान्

21 रक्षः पतिः स्व बलनष्टिम् अवेक्ष्य रुष्ट

आरुह्य यानकम् अथाभि स सार रामम्

स्वः स्यन्दने द्युमति मातलि नोपनीते

विभ्राज मानम् अहनन् निशितैः क्षुरप्रैः

22 रामस् तम् आह पुरुषाद पुरीष यन्नः

कान्तासम् अक्षम् अस ताप हृता श्व वत्ते

त्यक् तत् रपस्य फल मद्य जुगुप्सि तस्य

यच् छामि काल इव कर्तुर् अलङ्घ्य वीर्यः

23 एवम् क्षिपन् धनुषि सन्धित मुत्स सर्ज

बाणम् स वज्रम् इव तद् हृदयम् बिभेद

सो ऽसृग् वमन् दश मुखैर् न्यप तद् विमानाद्

हा हेति जल्पति जने सुकृतीव रिक्तः

24 ततो निष्क्रम्य लङ्काया यातु धान्यः सहस्रशः

मन्दोदर्या समम् तस्मिन् प्ररु दत्य उपाद्रवन्

25 स्वान् स्वान् बन्धून् परिष्वज्य लक्ष्मणेषु भिर् अर्दितान्

रुरुदुः सुस्वरम् दीनाम् घ्नन्त्य आत्मानम् आत्मना

26 हा हताः स्म वयम् नाथ लोक रावण रावणा

कम् यायाच् छरणम् लङ्का त्वद् विहीना परार् दिता

27 नैवम् वेद महा भाग भवान् काम वशम् गतः

तेजो ऽनुभावम् सीताया येन नीतो दशा मिमाम्

28 कृतैषा विधवा लङ्का वयम् च कुल नन्दन

देहः कृतोऽन्नम् गृध्राणाम् आत्मा नर कहेतवे

29 श्री शुक उवाच

स्वानाम् विभीषणश् चक्रे कोसलेन्द्रानु मोदितः

पितृ मेध विधानेन यदुक्तम् साम्प रायिकम्

30 ततो द दर्श भगवान् अशोकवनि काश्रमे

क्षामाम् स्व विरह व्याधिम् शिम्शपा मूलम् आस्तिताम्

31 रामः प्रियतमाम् भार्याम् दीनाम् वीक्ष्यान् वकम् पत

आत्म सन्दर्शन आह्लाद विकसन् मुख पङ्कजाम्

32 आरोप् या रुरुहे यानम् भ्रातृ भ्याम् हनुमद् युतः

विभीषणाय भगवान् दत्त्वा रक्षो गणे शताम्

33 लङ्काम् आयुश् च कल्पान्तम् ययौ चीर्ण व्रतः पुरीम्

अवकीर्य माणः कुसुमैः लोक पालार् पितैः पथि

34 उपगीय मान चरितः शत धृत् यादिभिर् मुदा

गो मूत्र यावकम् श्रुत्वा भ्रातरम् वल्कल् आम्बरम्

35 महा कारुणि को ऽतप्यज् जटिलम् स्थण्डि लेशयम्

भरतः प्राप्त माकर्ण्य पौरा मात्य पुरोहितैः

36 पादुके शिरसि न्यस्य रामम् प्रत् युद्य तो ऽग्रजम्

नन्दि ग्रामात् स्वशिबिराद् गीत वादित्र निःस्वनैः

37 ब्रह्म घोषेण च मुहुः पठद्भिर् ब्रह्म वादिभिः

स्वर्ण कक्ष पता काभिर् हैमैश् चित्र ध्वजै रथैः

38 सदश्वै रुक्म सन्नाहैः भटैः पुरट वर्मभिः

श्रेणीभिर् वार मुख्याभिः भृत्यैश् चैव पदानुगैः

39 पारमेष्ठ्यान् युपादाय पण्यानि उच्चाव चानि च

पादयोः न्यप तत् प्रेम्णा प्रक्लिन्न हृदये क्षणः

40 पादुके न्यस्य पुरतः प्राञ्जलिर् बाष्प लोचनः

तम् आश्लिष्य चिरम् दोर्भ्याम् स्नापयन् नेत्र जैर् जलैः

41 रामो लक्ष्मण सीताभ्याम् विप्रेभ्यो येऽर्ह सत्तमाः

तेभ्यः स्वयम् नमश् चक्रे प्रजाभिश् च नमस् कृतः

42 धुन् वन्त उत्तरा सङ्गान् पतिम् वीक्ष्य चिरागतम्

उत्तराः कोसला माल्यैः किरन्तो ननृतुर् मुदा

43 पादुके भरतो ऽगृह्णाच् चामर व्यज नोत्तमे

विभीषणः ससुग्रीवः श्वेतच् छत्रम् मरुत् सुतः

44 धनुर् निषङ्गान् छत्रुघ्नः सीता तीर्थ कमण्डलुम्

अबिभ्रद् अङ्गदः खड्गम् हैमम् चर्मर्क्षराण् नृप

45 पुष्प कस्थोऽन् वितः स्त्रीभिः स्तूय मानश् च वन्दिभिः

विरेजे भगवान् राजन् ग्रहैः चन्द्र इवोदितः

46 भ्रातृभिर् नन्दितः सोऽपि सोत्सवाम् प्राविशत् पुरीम्

प्रविश्य राज भवनम् गुरु पत्नीः स्व मातरम्

47 गुरून् वयस्या वरजान् पूजितः प्रत्य पूजयत्

वैदेही लक्ष्मणश् चैव यथा वत् सम् उपेयतुः

48 पुत्रान् स्वम् आतरस् तास्तु प्राणाम्स् तन्व इवोत्थिताः

आरोप्याङ् केऽभि षिञ्चन्त्यो बाष्पौघैर् विजहुः शुचः

49 जटा निर्मुच्य विधिवत् कुल वृद्धैः समम् गुरुः

अभ्य षिञ्चद् यथै वेन्द्रम् चतुः सिन्धु जलादिभिः

50 एवम् कृत शिरःस्नानः सुवासाः स्रग् व्यलङ्कृतः

स्वलङ्कृतैः सु वासोभिर् भ्रातृभिर् भार्यया बभौ

51 अग्र हीदासनम् भ्रात्रा प्रणि पत्य प्रसादितः

प्रजाः स्व धर्म निरता वर्णाश्रम गुणान् विताः

जुगोप पितृ वद् रामो मेनिरे पितरम् च तम्

52 त्रेतायाम् वर्त मानायाम् कालः कृत समो ऽभवत्

रामे राजनि धर्मज्ञे सर्व भूत सुखा वहे

53 वनानि नद्यो गिरयो वर्षाणि द्वीप सिन्धवः

सर्वे काम दुघा आसन् प्रजानाम् भरतर् षभ

54 ना धिव्याधि जराग्लानि दुःख शोक भय क्लमाः

मृत्युश् चानिच् छताम् नासीद् रामे राजन्य धोक्षजे

55 एक पत्नी व्रत धरो राजर्षि चरितः शुचिः

स्व धर्मम् गृहमे धीयम् शिक्षयन् स्वयम् आचरत्

56 प्रेम्णानु वृत्त्या शीलेन प्रश्रया वनता सती

भिया ह्रिया च भावज्ञा भर्तु: सीता हरन् मन:

✐🎸✍✡✢ ✤ ✣ ✦ ✧ ✩ ✫ ✭✮ ✯ ☆ ✱ ✲ ✳ ❃ ❂ ❁❀ ✿ ✶ ✴ ❄ ❉ ❋ ❖☆✡✍🎸✐

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

नवम स्कन्दे दशमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: जानकि कान्त स्मरणम्-

जय् जय् राम राम ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

✐🎸✍✡✢ ✤ ✣ ✦ ✧ ✩ ✫ ✭✮ ✯ ☆ ✱ ✲ ✳ ❃ ❂ ❁❀ ✿ ✶ ✴ ❄ ❉ ❋ ❖☆✡✍🎸✐

अथ नवम स्कन्द: एका दशो ऽध्याय :

स्कन्द- 09: अध्याय- 11

01 श्री शुक उवाच

भगवान् आत्मन् आत्मानम् राम उत्तम कल्पकै:

सर्वदेव मयम् देवम् ईजे आचार्य वान्मखै:

02 होत्रे ऽददाद् दिशम् प्राचीम् ब्रह्मणे दक्षिणाम् प्रभु:

अध्वर्यवे प्रतीचीम् च उदीचीम् साम गाय स:

03 आचार्याय ददौ शेषाम् यावती भूस्त दन्तरा

मन्यमान इदम् कृत्स्नम् ब्राह्मणो ऽर्हति नि:स्पृह:

04 इत्ययम् तद् अलङ्कार वासोभ्याम् अवशेषित:

तथा राज्ञ्यपि वैदेही सौमङ्गल्या व शेषिता

05 ते तु ब्रह्मण्य देवस्य वात्सल्यम् वीक्ष्य सम्स्तुतम्

प्रीता: क्लिन्न धियस् तस्मै प्रत्यर्प् येदम् बभाषिरे

06 अप्रत्तम् नस्त्वया किम् नु भगवन् भुवनेश्वर

यन्नोऽन्तर् हृदयम् विश्य तमो हम्सि स्वरोचिषा

07 नमो ब्रह्मण्य देवाय रामाया कुण्ठ मेधसे

उत्तम श्लोक धुर्याय न्यस्त दण्डार्पि ताङ्घ्रये

08 कदाचिल् लोक जिज्ञासु: गूढो रात्र्याम् अलक्षित:

चरन् वाचो ऽशृणोद् रामो भार्याम् उद्दिश्य कस्यचित्

09 नाहम् बिभर्मि त्वाम् दुष्टाम् असतीम् परवेश् मगाम्

स्त्री लोभी बिभृयात् सीताम् रामो नाहम् भजे पुन:

10 इति लोकाद् बहु मुखाद् दुरार् आध्याद् असम्विद:

पत्या भीतेन सा त्यक्ता प्राप्ता प्राचेत साश्रमम्

11 अन्तर् वत्न्या गते काले यमौ सा सुषुवे सुतौ

कुशो लव इति ख्यातौ तयोश् चक्रे क्रिया मुनि:

12 अङ्गदश् चित्र केतुश् च लक्ष्मणस् यात्मजौ स्मृतौ

तक्ष: पुष्कल इत् यास्ताम् भरतस्य मही पते

13 सुबाहु: श्रुत सेनश् च शत्रुघ् नस्य बभू वतु:

गन्धर्वान् कोटिशो जघ्ने भरतो विजये दिशाम्

14 तदीयम् धनम् आनीय सर्वम् राज्ञे न्यवेद यत्

शत्रुघ्नश् च मधो: पुत्रम् लवणम् नाम राक्षसम्

हत्वा मधु वने चक्रे मथुराम् नाम वै पुरीम्

15 मुनौ निक्षिप्य तनयौ सीता भर्त्रा विवासिता

ध्यायन्ती राम चरणौ विवरम् प्रविवेश ह

16 तच् छ्रुत्वा भगवान् रामो रुन्धन् नपि धिया शुच:

स्मरम्स् तस्या गुणाम्स् तान् स्तान् नाशक्नोद् रोद्धुम् ईश्वर:

17 स्त्री पुम् प्रसङ्ग एता दृक् सर्वत्र त्रास मावह:

अपीश्व राणाम् किमुत ग्राम् यस्य गृह चेतस:

18 तत ऊर्ध्वम् ब्रह्म चर्यम् धार्यन् अजुहोत् प्रभु:

त्रयो दशाब्द साहस्रम् अग्नि होत्रम् अखण्डितम्

19 स्मरताम् हृदि विन्यस्य विद्धम् दण्डक कण्टकै:

स्व पाद पल्लवम् राम आत्म ज्योतिर् अगात् तत:

20 नेदम् यशो रघु पतेः सुरयाच्ञ यात्त

लीला तनोर् अधिक साम्य विमुक्त धाम्नः

रक्षोवधो जलधि बन्धनम् अस्त्र पूगैः

किम् तस्य शत्रु हनने कपयः सहायाः

21 यस्यामलम् नृप सदःसु यशो ऽधुनापि

गायन्ति अघघ्न मृषयो दिगिभेन्द्र पट्टम्

तम् नाक पाल वसुपाल किरीट जुष्ट

पादाम्बुजम् रघु पतिम् शरणम् प्रपद्ये

22 स यैः स्पृष्टो ऽभिदृष्टो वा सम्विष्टो ऽनुगतो ऽपि वा

कोसलास्ते ययुः स्थानम् यत्र गच्छन्ति योगिनः

23 पुरुषो राम चरितम् श्रवणैर् उपधारयन्

आनृशम्स् य परो राजन् कर्म बन्धैर् विमुच्यते

24 श्री राजो वाच

कथम् स भगवान् रामो भ्रातृन् वा स्वयम् आत्मनः

तस्मिन् वा ते ऽन्व वर्तन्त प्रजाः पौराश् च ईश्वरे

25 श्री शुक उवाच

अथादिशद् दिग्विजये भ्रातृन्स् त्रि भुवनेश्वरः

आत्मानम् दर्श यन्स्वानाम् पुरीमै क्षत सानुगः

26 आसिक्त मार्गाम् गन्धोदैः करिणाम् मद शीकरैः

स्वामिनम् प्राप्तम् आलोक्य मत्ताम् वा सुतराम् इव

27 प्रासाद गोपुर सभा चैत्य देव गृहादिषु

विन्यस्त हेम कलशैः पता काभिश् च मण्डिताम्

28 पूगैः सवृन्तै रम्भाभिः पट्टिकाभिः सुवाससाम्

आदर्शैर् अम्शुकैः स्रग्भिः कृत कौतुक तोरणाम्

29 तम् उपेयुस् तत्र तत्र पौरा अर्हण पाणयः

आशिषो युयुजुर् देव पाहीमाम् प्राक्त् वयोद् धृताम्

30 ततः प्रजा वीक्ष्य पतिम् चिरागतम् दिदृक्ष योत् सृष्ट गृहाः स्त्रियो नराः

आरुह्य हर्म्याणि अरविन्द लोचनम् अतृप्त नेत्राः कुसुमैर् अवाकिरन्

31 अथ प्रविष्टः स्व गृहम् जुष्टम् स्वैः पूर्व राजभिः

अनन्त् आखिल कोषाढ्यम् अनर्घ्योर् उप रिच्छदम्

32 विद्रु मोदुम् बरद् वारैर् वैदूर्य स्तम्भ पङ्क्तिभिः

स्थलैर् मारकतैः स्वच्छैः भातस् फटिक भित्तिभिः

33 चित्र स्रग्भिः पट्टिकाभिर् वासो मणि गणाम् शुकैः

मुक्ताफलैश् चिद् उल्लासैः कान्त कामोप पत्तिभिः

34 धूप दीपैः सुरभिभिः मण्डितम् पुष्प मण्डनैः

स्त्री पुम्भिः सुर सङ्काशैः जुष्टम् भूषण भूषणैः

35 तस्मिन् स भगवान् रामः स्निग्धया प्रिय येष्टया

रेमे स्वा राम धीराणाम् ऋषभः सीतया किल

36 बुभुजे च यथा कालम् कामान् धर्मम् अपीडयन्

वर्ष पूगान् बहून् न्ऋणाम् अभिध्या ताङ्घ्रि पल्लवः

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

नवम स्कन्दे एका दशो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः जानकि कान्त स्मरणम् -

जय् जय् राम राम ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

अथ नवम स्कन्दः द्वा दशो ऽध्याय :

स्कन्द- 09: अध्याय- 12

01 श्री शुक उवाच

कुशस्य चातिथिस् तस्मात् निषधस् तत् सुतो नभः

पुण्डरीको ऽथ तत् पुत्रः क्षेम धन्वा भवत् ततः

02 देवा नीकस् ततो ऽनीहः पारियात्रो ऽथ तत् सुतः

ततो बलस् थलस् तस्माद् वज्र नाभो ऽर्क सम्भवः

03 खगणस् तत् सुतस् तस्माद् विधृतिश् चाभ वत् सुतः

ततो हिरण्य नाभो ऽभूद् योगाचार्यस् तु जैमिनेः

04 शिष्यः कौशल्य आध्यात्मम् याज्ञ वल्क्योऽध् य गाद् यतः

योगम् महोदयम् ऋषिर् हृदय ग्रन्थि भेदकम्

05 पुष्यो हिरण्य नाभस् य ध्रुव सन्धिस्त तो ऽभवत्

सुदर्शनो ऽथाग्नि वर्णः शीघ्रस् तस् य मरुः सुतः

06 यो ऽसावास् ते योग सिद्धः कलाप ग्राम माश्रितः

कलेरन् ते सूर्य वम्शम् नष्टम् भावयि ता पुनः

07 तस्मात् प्रसुश्रुतस् तस्य सन्धिस् तस् याप्य मर्षणः

महस्वाम्स् तत् सुतस् तस्माद् विश्व साहवू ऽन्वजा यत

08 ततः प्रसेन जित् तस् मात् तक्षको भविता पुनः

ततो बृहद् बलो यस्तु पित्रा ते समरे हतः

09 एते हीक्ष्वाकु भूपाला अतीताः शृण्वन् आगतान्

बृहद् बलस्य भविता पुत्रो नाम बृहद्रणः

10 उरुक्रियः ततस् तस्य वत्स वृद्धो भविष्यति

प्रति व्योमस् ततो भानुर् दिवा को वाहिनी पतिः

11 सहदेवस् ततो वीरो बृहदश्वो ऽथ भानुमान्

प्रतीकाश्वो भानु मतः सुप्रतीको ऽथ तत् सुतः

12 भविता मरु देवो ऽथ सुनक्षत्रो ऽथ पुष्करः

तस्यान् तरिक्षस् तत् पुत्रः सुतपास् तद् अमित्रजित्

13 बृहद् राजस्तु तस् यापि बर्हिस् तस् मात् कृतञ्जयः

रणञ्जयस् तस्य सुतः सञ्जयो भविता ततः

14 तस्माच् छाक्यो ऽथ शुद्धोदो लाङ्गलस् तत् सुतः स्मृतः

ततः प्रसेनजित् तस्मात् क्षुद्रको भविता ततः

15 रणको भविता तस्मात् सुरथस् तनयस् ततः

सुमित्रो नाम निष्ठान्त एते बार्हद् बलान्वयाः

16 इक्ष्वाकूणा मयम् वम्शः सुमित्रान् तो भविष्यति

यतस्तम् प्राप्य राजानम् सम्स्थाम् प्राप्स्यति वै कलौ

✐✐✐❁✡☩ ✤ ✣ ✦ ✧ ☆ ✫ ✬✭ ✯ ☆ ✱ ✲ ✳ ❃ ✪ ❁❀ ✿ ✶ ✷ ❄ ❅ ❆ ❖☆❁✐✐✐

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

नवम स्कन्दे द्वा दशो ऽध्याय ॥

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

✐✐✐❁✡☩ ✤ ✣ ✦ ✧ ☆ ✫ ✬✭ ✯ ☆ ✱ ✲ ✳ ❃ ✪ ❁❀ ✿ ✶ ✷ ❄ ❅ ❆ ❖☆❁✐✐✐

अथ नवम स्कन्दः त्रयो दशो ऽध्याय :

स्कन्द- 09: अध्याय- 13

01 श्री शुक उवाच

निमिः इक्ष्वाकु तनयो वसिष्ठम् अवृतर्त् विजम्

आरभ्य सत्रम् सोऽप्याह शक्रेण प्राग् व्रुतोऽस्मि भोः

02 तम् निर्वर्त् यागमिष् यामि तावन् माम् प्रति पालय

तूष्णीम् आसीद् गृह पतिः सो ऽपीन्द्रस् याकरोन् मखम्

03 निमिश्चलम् इदम् विद्वान् सत्रम् आरभ तात्मवान्

ऋत्विग्भिः अपरैस् तावत् नाग मद्याव ता गुरुः

04 शिष्य व्यतिक्रमम् वीक्ष्य निर्वर्त्य गुरु रागतोः

अशपत् पतता द्देहो निमेः पण्डित मानिनः

05 निमिः प्रति ददौ शापम् गुरवे ऽधर्म वर्तिने

तवापि पत ताद् देहो लोभाद् धर्मम् अजानतः

06 इत् युत् स सर्ज स्वम् देहम् निमिर् अध्यात्म कोविदः

मित्रा वरुणयोर् जज्ञे उर्वश्याम् प्रपिता महः

07 गन्ध वस्तु षु तद् देहम् निधाय मुनि सत्तमाः

समाप्ते सत्र यागे त देवान् ऊचुः समागतान्

08 राज्ञो जीवतु देहोऽयम् प्रसन्नाः प्रभवो यदि

तथेत् युक्ते निमिः प्राह मा भून्मे देह बन्धनम्

09 यस्य योगम् न वाञ्छन्ति वियोग भय कातराः

भजन्ति चरण् आम्भोजम् मुनयो हरि मेधसः

10 देहम् नावरु रुत्सेऽहम् दुःख शोक भया वहम्

सर्वत् रास्य यतो मृत्युः मत्स्याना मुद के यथा

11 देवा ऊचुः

विदेह उष्यताम् कामम् लोचनेषु शरीरिणाम्

उन्मेषण निमेषाभ्याम् लक्षितो ऽध्यात्म सम्स्थितः

12 अराजक भयम् नॄणाम् मन्य माना महर्षयः

देहम् ममन्थुः स्म निमेः कुमारः सम जायत

13 जन्मना जनकः सोऽभूद् वैदेहस्तु विदेहजः

मिथिलो मथनाज् जातो मिथिला येन निर्मिता

14 तस्माद् उदावसुस् तस्य पुत्रो ऽभून् नन्दि वर्धनः

ततः सुके तुस् तस्यापि देवरातो मही पते

15 तस्माद् बृहद्र थस् तस्य महा वीर्यः सुधृत् पिता

सुधृतेर् धृष्ट केतुर्वै हर्यश् वोऽथ मरुस् ततः

16 मरोः प्रतीप कस् तस्मात् जातः कृतिर् अथो यतः

देव मीढस् तस्य सुतो विश्रुतो ऽथ महा धृतिः

17 कृतिरातस् ततस् तस्मात् महा रोमा त तत् सुतः

स्वर्ण रोमा सुतस् तस्य ह्रस्व रोमा व्यजा यत

18 ततः शीर ध्वजो जज्ञे यज्ञार्थम् कर्षतो महीम्

सीता शीरा ग्रतो जाता तस्मात् शीर ध्वजः स्मृतः

19 कुशध्वजस् तस्य पुत्रः ततो धर्मध्वजो नृपः

धर्म ध्वजस् य द्वौ पुत्रौ कृतध्वज मित ध्वजौ

20 कृत ध्वजात् केशिध्वजः खाण्डि क्यस्तु मित ध्वजात्

कृतध्वज सुतो राजन् आत्म विद्या विशारदः

21 खाण्डिक्यः कर्म तत् त्वज्ञो भीतः केशि ध्वजाद् द्रुतः

भानुमाम्स् तस्य पुत्रो ऽभूच् छत द्युम् नस्तु तत् सुतः

22 शुचिस् तत् तनयस् तस्मात् सनद्वाजः ततो ऽभवत्

ऊर्ध्वकेतुः सनद्वाजाद् अजोऽथ पुरुजित् सुतः

23 अरिष्टनेमिः तस्यापि श्रुतायुस् तत् सु पार्श्वकः

ततश् चित्र रथो यस्य क्षेमाधिर् मिथिला धिपः

24 तस्मात् समरथस् तस्य सुतः सत्य रथस् ततः

आसीद् उपगुरुस् तस्माद् उपगुप्तो ऽग्नि सम्भवः

25 वस्वनन्तो ऽथ तत् पुत्रो युयुधो यत् सुभाषणः

श्रुतस् ततो जयस् तस्माद् विजयो ऽस्माद्दतः सुतः

26 शुनकस् तत् सुतो जज्ञे वीत हव्यो धृतिस् ततः

बहुलाश्वो धृतेस् तस्य कृतिरस्य महा वशी

27 एते वै मैथिला राजन् आत्म विद्या विशारदाः

योगेश्वर प्रसादेन द्वन्द्वैर् मुक्ता गृहेष्वपि

✎✐✑☸✡☩ ✤ ✣ ✦ ✧ ✩ ✫ ✬✭ ✮ ☆ ✱ ✲ ✳ ✻ ✪ ❁❀ ✿ ✶ ✴ ❆ ❇ ❈ ❖☆☸✑✐✎

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

नवम स्कन्दे त्रयो दशो ऽध्याय ःǁ

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

अथ नवम स्कन्द: चतुर् दशो ऽध्याय :

स्कन्द- *09:* अध्याय- *14*

*01* श्री शुक उवाच

अथात: श्रूयताम् राजन् वम्श: सोमस्य पावन:

यस्मिन् नैलादयो भूपा: कीर्त्यन् ते पुण्य कीर्तय:

*02* सहस्र शिरस: पुम्सो नाभि ह्रद सरोरुहात्

जातस् यासीत् सुतो धातु: अत्रि: पितृ समो गुणै:

*03* तस्य दृग्भ्यो ऽभवत् पुत्र: सोमो ऽमृत मय: किल

विप्रौषध् युडुगणानाम् ब्रह्मणा कल्पित: पति:

*04* सो ऽयजद् राजसूयेन विजित्य भुवन त्रयम्

पत्नीम् बृहस् पतेर् दर्पात् ताराम् नामा हरद् बलात्

*05* यदा स देव गुरुणा याचितो ऽभीक्ष्ण शो मदात्

नात् यजत् तत् कृते जज्ञे सुर दानव विग्रह:

*06* शुक्रो बृहस्पतेर् द्वेषाद् अग्रहीत् सासुरो डुपम्

हरो गुरु सुतम् स्नेहात् सर्व भूत गणा वृत:

*07* सर्व देव गणो पेतो महेन्द्रो गुरु मन्वयात्

सुरा सुर विनाशो ऽभूत् समरस् तार कामय:

*08* निवेदितो ऽथाङ्गिरसा सोमम् निर्भर्त्स्र्य विश्व कृत्

ताराम् स्व भर्त्रे प्रायच् छद् अन्तर् वत्नीम् अवैत् पति:

*09* त्यज त्यजाशु दुष्प्रज्ञे मत् क्षेत्राद् आहितम् परै:

नाहम् त्वाम् भस्मसात् कुर्याम् स्त्रियम् सान्तानि क: सति

*10* तत् याज व्रीडिता तारा कुमारम् कनक प्रभम्

स्पृहाम् आङ्गिरसश् चक्रे कुमारे सोम एव च

*11* ममायम् न त वेत् युच्चैस् तस्मिन् विवद मानयो:

पप्रच्छु: ऋषयो देवा नैवोचे व्रीडिता तु सा

12 कुमारो मातरम् प्राह कुपितो ऽलीकलज् जया

किम् न वचस् यसद् वृत्ते आत्मा वद्यम् वदाशु मे

13 ब्रह्मा ताम् रह आहूय सम प्राक्षीच् च सान्त् वयन्

सोमस् येत्याह शनकैः सोमस्तम् तावद ग्रहीत्

14 तस् यात्म योनिर् अकृत बुध इत् यभिधाम् नृप

बुद्ध्या गम्भीरया येन पुत्रेणा पोडु राण् मुदम्

15 ततः पुरूरवा जज्ञे इलायाम् य उदा हृतः

तस्य रूप गुणौ दार्य शील द्रविण विक्रमान्

16 श्रुत् वोर्वशीन्द्र भवने गीय मानान् सुरर्षिणा

तद् अन्तिकम् उपेयाय देवी स्मरशर् आर्दिता

17 मित्रा वरुण योः शापाद् आपन्ना नर लोक ताम्

निशम्य पुरुष श्रेष्ठम् कन्दर्पम् इव रूपिणम्

धृतिम् विष्टभ्य ललना उपतस्थे तद् अन्तिके

18 स ताम् विलोक्य नृपतिः हर्षेणोत् फुल्ल लोचनः

उवाच श्लक्ष्णया वाचा देवीम् हृष्ट तनूरुहः

19 श्री राजो वाच

स्वागतम् ते वरा रोहे आस्यताम् करवाम किम्

सम् रमस्व मया साकम् रतिर्नौ शाश्वतीः समाः

20 उर्वश् युवाच

कस्यास् त्वयि न सज्जेत मनो दृष्टिश् च सुन्दर

यदङ्गान् तरम् आसाद्य च्यवते ह रिरम्सया

21 एता वुरणकौ राजन् न्यासौ रक्षस्व मानद

सम्रम्स्ये भवता साकम् श्लाघ्यः स्त्रीणाम् वरः स्मृतः

22 घृतम् मे वीर भक्ष्यम् स्यात् नेक्षे त्वान् यत्र मैथुनात्

विवाससम् तत् तथेति प्रति पेदे महामनाः

23 अहो रूपम् अहो भावो नर लोक विमोहनम्

को न सेवेत मनुजो देवीम् त्वाम् स्वयम् आगताम्

24 तया स पुरुष श्रेष्ठो रमयन्त्या यथार् हतः

रेमे सुरविहा रेषु कामम् चैत्र रथादिषु

25 रम माणस् तया देव्या पद्म किञ्जल्क गन्धया

तन् मुखा मोद मुषितो मुमुदे ऽहर्गणान् बहून्

26 अपश्यन् उर्वशीम् इन्द्रो गन्धर्वान् सम चोदयत्

उर्वशीर हितम् मह्यम् आस्थानम् नाति शोभते

27 ते उपेत्य महा रात्रे तमसि प्रत् युपस्थिते

उर्वश्या उरणौ जह्रुर् न्यस्तौ राजनि जायया

28 निशम्या क्रन्दितम् देवी पुत्रयोर् नीय मानयोः

हतास्म्यहम् कुना थेन न पुम्सा वीर मानिना

29 यद् विश्रम्भा दहम् नष्टा हृता पत्या च दस्युभिः

यः शेते निशि सन्त्रस्तो यथा नारी दिवा पुमान्

30 इति वाक् सायकैर् बिद्धः प्रतोत् त्रै रिव कुञ्जरः

निशि निस्त्रिम्शम् आदाय विवस्त्रो ऽभ्यद्र वद् रुषा

31 ते विसृज्योरणौ तत्र व्यद्यो तन्त स्म विद्युतः

आदाय मेषा वायान्तम् नग्नम् ऐक्षत सा पतिम्

32 ऐलोऽपि शयने जायाम् अपश्यन् विमना इव

तच् चित्तो विह्वलः शोचन् बभ्रामोन् मत्त वन्महीम्

33 स ताम् वीक्ष्य कुरुक्षेत्रे सरस्वत्याम् च तत् सखीः

पञ्च प्रहृष्ट वदनः प्राह सूक्तम् पुरूरवाः

34 अहो जाये तिष्ठ तिष्ठ घोरे न त्यक्तु मर्हसि

माम् त्वम् अद्याप्य निर्वृत्य वचाम्सि कृणवा वहै

35 सुदे होऽयम् पतत् यत्र देवि दूरम् हृतस् त्वया

खादन्त् येनम् वृका गृध्राः त्वत् प्रसादस्य नास् पदम्

36 उर्वश् युवाच

मा मृथाः पुरुषोऽसि त्वम् मा स्म त्वाद्युर् वृका इमे

क्वापि सख्यम् न वै स्त्रीणाम् वृकाणाम् हृदयम् यथा

37 स्त्रियो ह्य करुणाः क्रूरा दुर्मर्षाः प्रिय साहसाः

घ्नन्त् यल्पार्थे ऽपि विश्रब्धम् पतिम् भ्रातरम् अप्युत

38 विधाया लीक विश्रम्भम् अज्ञेषु त्यक्त सौहृदाः

नवम् नवम् अभीप् सन्त्यः पुम्श्चल्यः स्वैर वृत् तयः

39 सम्वत्सरान् ते हि भवान् एक रात्रम् मयेश्वरः

वत्स्यति अपत्यानि च ते भविष् यन्त्य पराणि भोः

40 अन्तर् वत्नीम् उपालक्ष्य देवीम् स प्रययौ पुरम्

पुनस् तत्र गतो ऽब्दान् ते उर्वशीम् वीर मातरम्

41 उपलभ्य मुदा युक्तः समुवास तया निशाम्

अथैनम् उर्वशी प्राह कृपणम् विरहा तुरम्

42 गन्धर्वान् उपधा वेमाम्स् तुभ्यम् दास्यन्ति मामिति

तस्य सम्स्तु वतस् तुष्टा अग्निस्थालीम् द दुर्नृप

उर्वशीम् मन्य मानस्ताम् सो ऽबुध् यत चरन् वने

43 स्थालीम् न्यस्य वने गत्वा गृहान् आध्याय तो निशि

त्रेतायाम् सम्प्र वृत्तायाम् मनसि त्रय्य वर्तत

44 स्थाली स्थानम् गतो ऽश्वत्थम् शमी गर्भम् विलक्ष्य सः

तेन द्वे अरणी कृत्वा उर्वशी लोक काम् यया

45 उर्वशीम् मन्त्रतो ध्यायन् अधरारणि मुत्तराम्

आत्मानम् उभयोर् मध्ये यत् तत् प्रजननम् प्रभुः

46 तस्य निर्मन्थनाज् जातो जात वेदा विभावसुः

त्रय्या स विद्यया राज्ञा पुत्रत्वे कल्पितस् त्रि वृत्

47 तेना यजत यज्ञेशम् भगवन्तम् अधोक्षजम्

उर्वशी लोकम् अन्विच्छन् सर्व देव मयम् हरिम्

48 एक एव पुरा वेदः प्रणवः सर्व वाङ्मयः

देवो नारायणो नान्य एको ऽग्निर् वर्ण एव च

*49* पुरूरवस एवा सीत् त्रयी त्रेता मुखे नृप

अग्निना प्रजया राजा लोकम् गान्धर्व मेयिवान्

✐✐✐❁✡✢ ✤ ✣ ✦ ✧ ✫ ✬ ✯✯ ✭ ☆ ✱ ✳ ✳ ❃ ✪ ❁❀ ✿ ✶ ✷ ❈ ❊ ❋ ❖☆❁✐✐✐

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

नवम स्कन्दे चतुर् दशो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

✐✐✐❁✡✢ ✤ ✣ ✦ ✧ ✫ ✬ ✯✯ ✭ ☆ ✱ ✳ ✳ ❃ ✪ ❁❀ ✿ ✶ ✷ ❈ ❊ ❋ ❖☆❁✐✐✐

अथ नवम स्कन्द: पञ्च दशो ऽध्याय :

स्कन्द- *09:* अध्याय- *15*

*01* श्री शुक उवाच

ऐलस्य चोर्वशी गर्भात् षडासन् आत्मजा नृप

आयु: श्रुतायु: सत्यायू रयो ऽथ विजयो जय:

*02* श्रुतायोर् वसुमान् पुत्र: सत्यायोश् च श्रुतञ्जय:

रयस्य सुत एकश् च जयस्य तनयो ऽमित:

*03* भीमस्तु विजयस् याथ काञ्चनो होत्र कस् तत:

तस्य जह्नु: सुतो गङ्गाम् गण्डूषी कृत्य योऽपिबत्

जह्नोस्तु पूरुस् तस् पुत्रो बलाकश् चात्मजो ऽजक:

*04* तत: कुश: कुशस् यापि कुशाम्बुस् तनयो वसु:

कुश नाभश् च चत् वारो गाधि रासीत् कुशाम्बुज:

*05* तस्य सत्य वतीम् कन्याम् ऋचीको ऽयाच त द्विज:

वरम् विसदृशम् मत्वा गाधिर् भार्गवम् अब्रवीत्

*06* एकत: श्याम कर्णानाम् हयानाम् चन्द्र वर्चसाम्

सहस्रम् दीयताम् शुल्कम् कन्यायाः कुशिका वयम्

07 इत् युक्तस् तन्मतम् ज्ञात्वा गतः स वरुणान्तिकम्

आनीय दत्त्वा तान् अश्वान् उपयेमे वराननाम्

08 स ऋषिः प्रार्थितः पत्न्या श्वश्र्वा चा पत्य काम् यया

श्रपयित्वो भयैर् मन्त्रैः चरुम् स्नातुम् गतो मुनिः

09 तावत् सत्यवती मात्रा स्व चरुम् याचि ता सती

श्रेष्ठम् मत्वा तया यच्छन् मात्रे मातुर् अदत् स्वयम्

10 तद् विज्ञाय मुनिः प्राह पत्नीम् कष्टम् अकारषीः

घोरो दण्ड धरः पुत्रो भ्राता ते ब्रह्म वित्तमः

11 प्रसादितः सत्य वत्या मैवम् भूदिति भार्गवः

अथ तर्हि भवेत् पौत्रो जमदग्निस् ततो ऽभवत्

12 सा चाभूत् सु महा पुण्या कौशिकी लोक पावनी

रेणोः सुताम् रेणुकाम् वै जमदग्निर् उवाह याम्

13 तस्याम् वै भार्गव ऋषेः सुता वसुमदा दयः

यवीयाम् जज्ञ एतेषाम् राम इत् यभि विश्रुतः

14 यमाहुर् वासुदेव् आम्शम् हैह यानाम् कुलान्तकम्

त्रिः सप्त कृत्वो य इमाम् चक्रे निः क्षत्रियाम् महीम्

15 दुष्टम् क्षत्रम् भुवो भारम् अब्रह्मण्यम् अनीनशत्

रजस् तमो वृतम् अहन् फल्गुन् यपि कृते ऽम्हसि

16 श्री राजो वाच

किम् तदम् हो भगवतो राजन् यैर् अजित् आत्मभिः

कृतम् येन कुलम् नष्टम् क्षत्रियाणाम् अभीक्ष्णशः

17 श्री शुक उवाच

है हयानाम् अधिपतिः अर्जुनः क्षत्रियर् षभः

दत्तम् नारायणस् याम्शम् आराध्य परिकर् मभिः

18 बाहून् दश शतम् लेभे दुर् धर् षत्वम् अरातिषु

अव्या हतेन्द्रिय उजः श्री तेजो वीर्य यशो बलम्

19 योगेश् वरत्वम् ऐश्वर्यम् गुणा यत्राणि मादयः

चचारा व्या हत गतिः लोकेषु पवनो यथा

20 स्त्री रत्नैर् आवृतः क्रीडन् रेवाम्भसि मदोत् कटः

वैजयन्तीम् स्रजम् बिभ्रद् रुरोध सरितम् भुजैः

21 विप्ला वितम् स्व शिबिरम् प्रति स्रोतः सरिज् जलैः

नामृष्यत् तस्य तद् वीर्यम् वीरमानी दशाननः

22 गृहीतो लीलया स्त्रीणाम् समक्षम् कृत किल्बिषः

माहिष् मत्याम् सन्नि रुद्धो मुक्तो येन कपिर् यथा

23 स एकदा तु मृगयाम् विचरन् विपिने वने

यदृच् छया श्रम पदम् जमदग्नेर् उपाविशत्

24 तस्मै स नर देवाय मुनिर् अर्हणम् आहरत्

स सैन्यामात्य वाहाय हविष् मत्या तपो धनः

25 स वीरस् तत्र तद् दृष्ट्वा आत्म् ऐश्वर्या तिशायनम्

तन् नाद्रि यत् आग्नि होत्र्याम् साभिलाषः स हैहयः

26 हविर्धानीम् ऋषेर् दर्पान् नरान् हर्तुम् अचोदयत्

ते च माहिष् मतीम् निन्युः सवत्साम् क्रन्दतीम् बलात्

27 अथ राज नि निर्याते राम आश्रम आगतः

श्रुत्वा तत् तस्य दौर् आत्म्यम् चुक्रो धाहिरिवा हतः

28 घोर मादा य परशुम् सतूणम् चर्म कार्मुकम्

अन्वधा वत दुर्धर्षो मृगेन्द्र इव यूथपम्

29 तम् आपतन्तम् भृगु वर्य मोजसा धनुर् धरम् बाण परश् वध् आयुधम्

ऐणेय चर् माम्बरम् अर्कधामभिः युतम् जटाभिः ददृशे पुरीम् विशन्

30 अचोदयद् हस्ति रथाश्व पत्तिभिः गदासि बाणर्ष्टि शत् अघ्नि शक्तिभिः

अक्षौहिणीः सप्त दशाति भीषणाः ता राम एको भगवान् असूदयत्

31 यतो यतो ऽसौ प्रहरत् परश् वधो मनो ऽनिलौजाः पर चक्र सूदनः

ततश् ततस् छिन्न भुजोरु कन्धरा निपेतुरुर् व्याम् हत सूत वाहनाः

32 दृष्ट्वा स्व सैन्यम् रुधिरौ घ कर्दमे रणाजिरे राम कुठार सायकैः

विवृक्ण चर्म ध्वज चाप विग्रहम् निपातितम् है हय आप तद् रुषा

33 अथार्जुनः पञ्च शतेषु बाहुभिः धनुःषु बाणान् युग पत्स सन्दधे

रामाय रामो ऽस्त्र भृताम् स मग्रणीः तान् येक धन्वे षुभिर् आच्छिनत् समम्

34 पुनः स्व हस्तैः अचलान् मृधेऽङ्घ्रि पान् उत्क्षिप्य वेगाद् अभि धावतो युधि

भुजान् कुठारेण कठोर नेमिना चिच्छेद रामः प्रसभम् त्वहेर् इव

35 कृत्त बाहोः शिरस् तस्य गिरेः शृङ्गम् इवाहरत्

हते पितरि तत् पुत्रा अयुतम् दुद्रुवुर् भयात्

36 अग्नि होत्रीम् उपावर्त्य सवत्साम् पर वीरहा

समुपेत्या श्रमम् पित्रे परि क्लिष्टाम् समर्प यत्

37 स्व कर्म तत् कृतम् रामः पित्रे भ्रात् ऋभ्य एव च

वर्णया मास तच् छ्रुत्वा जमदग्निर् अभाषत

38 राम राम महा बाहो भवान् पापम् अकारषीत्

अवधीन् नर देवम् यत् सर्व देवमयम् वृथा

39 वयम् हि ब्राह्मणास् तात क्षमयार्हण ताम् गताः

यया लोक गुरुर् देवः पारमेष्ठ्यम् अगात् पदम्

40 क्षमया रोच ते लक्ष्मीः ब्राह्मी सौरी यथा प्रभा

क्षमिणाम् आशु भगवाम्स् तुष्यते हरिर् ईश्वरः

41 राज्ञो मूर्धाभि षिक् तस्य वधो ब्रह्म वधाद् गुरुः

तीर्थ सम्सेवया चाम्हो जह् यङ्गाच् युत चेतनः

✐✐✐✐✐✐ ✤ ✣ ✦ ✧ ☆ ☆ ✭✭ ✯ ☆ ✱ ✲ ✳ ❃ ❂ ❁❀ ✿ ✶ ✴ ❄ ❅ ❋ ❖☆✐✐✐✐

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

नवम स्कन्दे पञ्च दशो ऽध्याय ः||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

अथ नवम स्कन्दः षोडशो ऽध्याय :

स्कन्द- 09: अध्याय- 16

01 श्री शुक उवाच

पित्रोप शिक्षितो रामः तथेति कुरु नन्दन

सम्वत्सरम् तीर्थ यात्राम् चरित् वाश्रमम् आव्रजत्

02 कदाचिद् रेणुका याता गङ्गायाम् पद्म मालिनम्

गन्धर्व राजम् क्रीडन्तम् अप्सरोभिर् अपश् यत

03 विलोकयन्ती क्रीडन्तम् उदकार्थम् नदीम् गता

होमवेलाम् न सस्मार किञ्चिच् चित्र रथस् पृहा

04 कालात्ययम् तम् विलोक्य मुनेः शाप विशङ्किता

आगत्य कलशम् तस्थौ पुरोधाय कृताञ्जलिः

05 व्यभिचारम् मुनिर् ज्ञात्वा पत्न्याः प्रकुपितो ऽब्रवीत्

घ्नतैनाम् पुत्रकाः पापाम् इत् युक्तास् ते न चक्रिरे

06 रामः सञ्चोदितः पित्रा भ्रात्रून् मात्रा सहावधीत्

प्रभा वज्ञो मुनेः सम्यक् समाधेस् तप सश् च सः

07 वरेणच् छन्दया मास प्रीतः सत्य वती सुतः

वव्रे हतानाम् रामो ऽपि जीवितम् चास्मृतिम् वधे

08 उत्तस् थुस्ते कुशलिनो निद्रा पाय इवाञ्जसा

पितुर् विद्वाम्स् तपो वीर्यम् रामश् चक्रे सुहृद् वधम्

09 ये ऽर्जुनस्य सुता राजन् स्मरन्तः स्व पितुर् वधम्

राम वीर्य परा भूता लेभिरे शर्म न क्वचित्

10 एक दाश्रम तो रामे स भ्रातरि वनम् गते

वैरम् सिषाध यिषवो लब्ध च्छिद्रा उपागमन्

11 दृष्ट् वाग्न्या गार आसीनम् आवेशित धियम् मुनिम्

भगवत् युत्तम श्लोके जघ्नुस्ते पाप निश्चयाः

12 याच्य मानाः कृपणया राम मात्राति दारुणाः

प्रसह्य शिर उत्कृत्य निन्युस्ते क्षत्र बन्धवः

13 रेणुका दुःख शोकार्ता निघ्नन्त् यात्मान मात्मना

राम रामेहि तातेति विचु क्रोशोच् च कैः सती

14 तद् उपश्रुत्य दूरस्थू हा रामेत् यार्त वत् स्वनम्

त्वर याश्रम मासाद्य दद् ऋशेः पितरम् हतम्

15 ते दुःख रोषा मर्षार्ति शोक वेग विमोहिताः

हा तात साधो धर्मिष्ठ त्यक्त्वा स्मान् स्वर्गतो भवान्

16 विलप्यैवम् पितुर् देहम् निधाय भ्रातृ षु स्वयम्

प्रगृह्य परशुम् रामः क्षत्रान् ताय मनो दधे

17 गत्वा माहिष् मतीम् रामो ब्रह्मघ्न विहत श्रियम्

तेषाम् स शीर्षभी राजन् मध्ये चक्रे महागिरिम्

18 तद् रक्तेन नदीम् घोराम् अब्रह्मण्य भया वहाम्

हेतुम् कृत्वा पितृ वधम् क्षत्रे ऽमङ्गळ कारिणि

19 त्रिः सप्त कृत्वः पृथिवीम् कृत्वा निः क्षत्रियाम् प्रभुः

समन्त पञ्चके चक्रे शोणितोदान् ह्रदान् नृप

20 पितुः कायेन सन्धाय शिर आदाय बर्हिषि

सर्व देव मयम् देवम् आत्मानम् अय जन्मखैः

21 ददौ प्राचीम् दिशम् होत्रे ब्रह्मणे दक्षिणाम् दिशम्

अध्वर्यवे प्रतीचीम् वै उद् गात्रे उत्तराम् दिशम्

22 अन्येभ्यो ऽवान्तर दिशः कश्यपा य च मध् यतः

आर्या वर्तम् उप द्रष्ट्रे सदस् येभ्यः ततः परम्

23 ततश् चाव भृथ स्नान विधूता शेष किल्बिषः

सरस् वत्याम् ब्रह्म नद्याम् रेजे व्यब्भ्र इवाम् शुमान्

24 स्व देहम् जमदग्निस् तु लब्ध्वा सम्ज्ञान लक्षणम्

ऋषीणाम् मण्डले सोऽभूत् सप्तमो राम पूजित:

25 जामदग्न्यो ऽपि भगवान् राम: कमल लोचन:

आगामिन् यन्तरे राजन् वर्तयिष् यति वै बृहत्

26 आस्ते ऽद्यापि महेन्द्रा द्रौ न्यस्त दण्ड: प्रशान्तधी:

उपगीय मान चरित: सिद्ध गन्धर्व चारणै:

27 एवम् भृगुषु विश्वात्मा भगवान् हरिर् ईश्वर:

अवतीर्य परम् भारम् भुवो ऽहन् बहुशो नृपान्

28 गाधेरभून् महा तेजा: समिद्ध इव पावक:

तपसा क्षात्रम् उत्सृज्य यो लेभे ब्रह्म वर्चसम्

29 विश्वा मित्रस् य चै वासन् पुत्रा एक शतम् नृप

मध्य मस्तु मधुच् छन्दा मधुच् छन्दस एव ते

30 पुत्रम् कृत्वा शुन: शेफम् देवरातम् च भार्गवम्

आजी गर्तम् सुतानाह ज्येष्ठ एष प्रकल्प्यताम्

31 यो वै हरिश् चन्द्र मखे विक्रीत: पुरुष: पशु:

स्तुत्वा देवान् प्रजेशादीन् मुमुचे पाश बन्धनात्

32 यो रातो देव यजने देवैर् गाधिषु तापस:

देवरात इति ख्यात: शुन:शेफस् स भार्गव:

33 ये मधुच् छन्द सो ज्येष्ठा: कुशलम् मेनिरे न तत्

अश पत्तान् मुनि: क्रुद्धो म्लेच्छा भवत दुर् जना:

34 स होवा च मधुच् छन्दा: सार्धम् पञ्चा शता तत:

यन्नो भवान् सञ्जानी ते तस्मिम्स् तिष्ठाम हे वयम्

35 ज्येष्ठम् मन्त्र दृशम् चक्रु: त्वाम् अन्वञ्चो वयम् स्म हि

विश्वामित्र: सुतान् आह वीर वन्तो भविष्यथ

ये मानम् मे ऽनुगृह्णन्तो वीर वन्तम् अकर्त माम्

36 एष व: कुशिका वीरो देव रातस् तम् अन्वित

अन्ये चाष्टक हारीत जय क्रतु मद् आदय:

37 एवम् कौशिक गोत्रम् तु विश्वा मित्रै: पृथग् विधम्

प्रवरान् तरम् आपन्नम् तद्धि चैवम् प्रकल्पितम्

✐✐✐❁✡+ ✤ ✣ ✦ ✧ ☆ ✰ ✯✯ ✯ ☆ ✱ ✳ ✳ ❃ ✪ ❁❀ ✿ ✶ ✴ ❄ ❊ ❋ ❖☆❁✐✐✐

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

नवम स्कन्दे षोडशो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

प्रति क्षणम् नव्यवद् अच्युतस्य यत् स्त्रिया विटानाम् इव साधु वार्ता

03 शृणुष्वा वहितो राजन् अपि गुह्यम् वदामि ते

ब्रूयु: स्निग्धस्य शिष्यस्य गुरवो गुह्य मप्युत

04 तथाघ वदनान् मृत्यो रक्षित्वा वत्स पालकान्

सरित् पुळिन मानीय भगवान् इदम् अब्रवीत्

05 अहो ऽतिरम् यम् पुळिनम् वयस्या: स्वकेलि सम्पन् मृदु लाच्छ बालुकम्

स्फुटत् सरोगन्ध हृतालि पत्रिक ध्वनि प्रति ध्वानल सद्द्रु माकुलम्

06 अत्र भोक्तव्यम् अस्माभि: दिवारूढम् क्षु धार्दिता:

वत्सा: समीपे ऽप: पीत्वा चरन्तु शनकै स्तृणम्

07 तथेति पाय यित् वार्भा वत्सान् आरुध्य शाद्वले

मुक्त्वा शिक्यानि बुभुजु: समम् भगवता मुदा

08 कृष्णस्य विष्वक् पुरुराजि मण्डलै:

अभ्यानना: फुल्ल दृशो व्रजार् भका:

सहोप विष्टा विपिने विरेजु:

छदा यथाम् भोरुह कर्णिकाया:

09 केचित् पुष्पैर् दलै: केचित् पल्लवैर् अङ्कुरै: फलै:

शिग्भिस् त्वग्भिर् दृषद् भिश् च बुभुजु: कृत भाजना:

10 सर्वे मिथो दर्श यन्त: स्वस्व भोज्य रुचिम् पृथक्

हसन्तो हास यन्तश्चा भ्य वजह्रु: सहेश् वरा:

11 बिभ्रद् वेणुम् जठर पटयो: शृङ्ग वेत्रे च कक्षे

वामे पाणौ मसृण कवलम् तत् फलान् यङ्गुलीषु

तिष्ठन् मध्ये स्वपरि सुहृदो हासयन् नर्म भि: स्वै:

स्वर्गे लोके मिषति बुभुजे यज्ञभुग् बाल केळिः

12 भार तैवम् वत्स पेषु भुञ्जानेष् वच्यु तात्मसु

वत्सास्त् वन्तर् वने दूरम् विविशुः तृण लोभिताः

13 तान् दृष्ट्वा भय सन्त्रस्तान् ऊचे कृष्णो ऽस्य भीभयम्

मित्राण् याशान् मा विरमते हानेष्ये वत्स कानहम्

14 इत्युक् त्वाद्रि दरी कुञ्ज गह्वरेष् वात्म वत्सकान्

विचिन्वन् भगवान् कृष्णः सपाणि कवलो ययौ

15 अम्भो जन्म जनिस्त दन्त रगतो मायार् भकस् येशितुः

द्रष्टुम् मञ्जु महित्व मन्यदपि तद् वत्सानितो वत्स पान्

नीत्वान् यत्र कुरूद्व हान्तर् अदधात् खे ऽवस्थितो यः पुरा

दृष्ट्वा घासुर मोक्षणम् प्रभवतः प्राप्तः परम् विस्मयम्

16 ततो वत्सान् अदृष्ट् वैत्य पुळिने ऽपि च वत्स पान्

उभावपि वने कृष्णो विचिकाय समन् ततः

17 क्वाप् यदृष्ट्वान् तर् विपिने वत्सान् पालाम्श् च विश्व वित्

सर्वम् विधि कृतम् कृष्णः सहसाव जगा म ह

18 ततः कृष्णो मुदम् कर्तुम् तन् मातॄणाम् च कस्य च

उभया यित मात्मानम् चक्रे विश्व कृदीश् वरः

19 यावद् वत्सप वत्स काल्प कवपुर् यावत् कराङ्घ्र् यादिकम्

यावद् यष्टि विषाण वेणु दल शिग् यावद् विभूषाम् बरम्

यावच् छील गुणाभिधा कृति वयो यावद् विहा रादिकम्

सर्वम् विष्णु मयम् गिरो ऽङ्ग वद् अजः सर्व स्वरूपो बभौ

20 स्वयम् आत्मात्म गो वत्सान् प्रतिवार् यात्म वत्सपैः

क्रीडन् आत्मविहारैश् च सर्वात्मा प्राविशद् व्रजम्

21 तत् तद् वत्सान् पृथङ् नीत्वा तत् तद् गोष्ठे निवेश्य सः

तत् तद् आत्मा भवद् राजन् तत् तत् सद्म प्रविष्ट वान्

22 तन् मातरो वेणुरवत् वरोत् थिता उत्थाप्य दोर्भिः परिरभ्य निर्भरम्

स्नेहस् नुतस् तन्य पयः सुधा सवम् मत्वा परम् ब्रह्म सुतान् अपाययन्

23 ततो नृपोन् मर्दन मज्जले पना लङ्कार रक्षा तिलकाश नादिभिः

सम् लालितः स्वा चरितैः प्रहर्षयन् सायम् गतो यामय मेन माधवः

24 गावस्ततो गोष्ठ मुपेत्य सत्वरम् हुङ्कार घोषैः परिहूत सङ्गतान्

स्वकान् स्वकान् वत्स तरान पाययन् मुहुर्लि हन्त्यः स्रवद् औध सम्पयः

25 गो गोपीनाम् मातृ तास्मिन् सर्वा स्नेहर्धि काम् विना

पुरो वदास्व् अपि हरेः तोकता मायया विना

26 व्रजौ कसाम् स्व तोकेषु स्नेह वल्ल्याब्द मन्वहम्

शनैः निः सीम ववृधे यथा कृष्णे त्व पूर्व वत्

27 इत्थम् आत्मात्म नात्मानम् वत्स पाल मिषेण सः

पालयन् वत्सपो वर्षम् चिक्रीडे वन गोष्ठयोः

28 एकदा चारयन् वत्सान् सरामो वनम् आविशत्

पञ्च षासु त्रिया मासु हायना पूरणीष् वजः

29 ततो विदूर् आच्च रतो गावो वत्सान् उप व्रजम्

गोवर्ध नाद्रि शिरसि चरन्त्यो दद्द शुस्त् ऋणम्

30 दृष्ट्वा थतत् स्नेह वशो ऽस्मृ तात्मा स गोव्रजो ऽत् यात्मप दुर्ग मार्गः

द्विपात् ककुद् ग्रीव उदास्य पुच्छो ऽगाद् धुङ् कृतैर् आस्रुप या ज वेन

31 समेत्य गावो ऽधो वत्सान् वत्स वत्यो ऽप्य पाययन्

गिलन्त्य इव चाङ्गानि लिहन्त्यः स्वौध सम् पयः

32 गोपाः तद् रोधना यास मौघ्य लज्जोरु मन्युना

दुर्गाध्व कृच्छ्रतो ऽभ्येत्य गोवत्सैः दद्द शुः सुतान्

33 त दीक्षणोत् प्रेम रसाप्लु ताशया जातानु रागा गतमन्य वो ऽर्भकान्

उदुह्य दोर्भिः परिरभ्य मूर्धनि घ्राणैर् अवापुः परमाम् मुदम् ते

34 ततः प्रवयसो गोपाः तोका श्लेषसु निर् वृताः

कृच्छ्राच् छनैर् अपगताः तद् अनुस्मृत्यु दश्रवः

35 व्रजस्य रामः प्रेमर्धेः वीक्ष् यौत्कण्ठ्य मनुक् षणम्

मुक्तस् तनेषु अपत्येषु अप्य हेतु विद चिन्तयत्

36 किमेत दद्भुत मिव वासुदेवे ऽखिल आत्मनि

व्रजस्य सात्मनस् तोकेषु अपूर्वम् प्रेम वर्धते

37 केयम् वा कुत आयाता दैवी वा नार्युता सुरी

प्रायो मायास्तु मे भर्तुः नान्या मे ऽपि विमोहिनी

38 इति सञ्चिन्त्य दाशार्हो वत्सान् सवय सानपि

सर्वान् आचष्ट वैकुण्ठम् चक्षुषा वयुनेन सः

39 नैते सुरेशा ऋषयो न चैते त्वमेव भासीश भिदाश्र ये ऽपि

सर्वम् पृथक्त्वम् निगमात् कथम् वदेति उक्तेन वृत्तम् प्रभुणा बलो ऽवैत्

40 ताव देत् यात्म भूर् आत्म मानेन त्रुट्य नेहसा

पुरोव दाब्दम् क्रीडन्तम् ददृशे सकलम् हरिम्

41 यावन्तो गोकुले बालाः सवत्साः सर्व एव हि

माया शये शयाना मे नाद् यापि पुनर् उत्थिताः

42 इत एते ऽत्र कुत्रत्या मन् माया मोहिते तरे

तावन्त एव तत् राब्दम् क्रीडन्तो विष्णु ना समम्

43 एव मेतेषु भेदेषु चिरम् ध्यात्वा स आत्मभूः

सत्याः के कतरे नेति ज्ञातुम् नेष्टे कथञ्चन

44 एवम् सम् मोहयन् विष्णुम् विमोहम् विश्व मोहनम्

स्वयैव मायया जोऽपि स्वय मेव विमोहितः

45 तम्याम् तमोवन् नै हारम् खद् योतार्चि रिवाहनि

महती तर मायैश्यम् निहन्त् यात्मनि युञ्जतः

46 तावत् सर्वे वत्स पालाः पश्यतो ऽजस्य तत् क्षणात्

व्यदृश् यन्त घन श्यामाः पीत कौशेय वाससः

47 चतुर् भुजाः शङ्ख चक्र गदा राजीव पाणयः

किरीटिनः कुण्डलिनो हारिणो वन मालिनः

48 श्री वत्साङ् गददो रत्न कम्बु कङ्कण पाणयः

नूपुरैः कटकैर् भाताः कटि सूत्र् आङ्गुळीयकैः

49 आङ्घ्रि मस्तक मापूर्णाः तुळसी नव दामभिः

कोमलैः सर्व गात्रेषु भूरि पुण्यव दर्पितैः

50 चन्द्रिका विशदस् मेरैः सारुणा पाङ्ग वीक्षितैः

स्वकार् थानाम् इव रजः सत् त्वाभ्याम् स्रष्टृ पालकाः

51 आत्मादिस् तम्ब पर्यन्तैः मूर्ति मद्भिश् चराचरैः

नृत्य गीता द्यने कार्हैः पृथक् पृथग् उपासिताः

52 अणिमाद्यैः महिमभिः अजाद् याभिर् विभूतिभिः

चतुर् विम्शति भिस्तत् त्वैः परीता महदा दिभिः

53 काल स्वभाव सम्स्कार काम कर्म गुणादिभिः

स्व महिध् वस्त महिभिः मूर्ति मद्भिर् उपासिताः

54 सत्य ज्ञाना अनन्ता अनन्द मात्रै कर समूर्तयः

अस्पृष्ट भूरि माहात्म्या अपि ह्युपनिषद् दृशाम्

55 एवम् सकृद्द दर्शाजः पर ब्रह्मात्म नो ऽखिलान्

यस्य भासा सर्वम् इदम् विभाति स चराचरम्

56 ततो ऽति कुतुकोद् वृत्य स्तिमितै काद शेन्द्रियः

तद् धाम्ना भूद् अजस् तूष्णीम् पूर्देव् यन्तीव पुत्रिका

57 इतीरे शे ऽतर्क्ये निज महि मनि स्व प्रमितिके

परत् राजा तो ऽतन् निरसन मुख ब्रह्मक मितौ

अनीशे ऽपि द्रष्टुम् किमिद मिति वा मुह्यति सति

चच्छादाजो ज्ञात्वा सपदि परमो ऽजाज वनिकाम्

58 ततो ऽर्वाक् प्रति लब्धाक्षः कः परेत वदुत् थितः

कृच् छ्राद् उन्मील्य वै दृष्टीः आचष्टेदम् सहात् मना

59 सपद्ये वाभितः पश्यन् दिशो ऽपश्यत् पुरः स्थितम्

वृन्दा वनम् जना जीव्य द्रुमा कीर्णम् समा प्रियम्

60 यत्र नै सर्ग दुर् वैराः सहा सन्नृ मृगा दयः

मित्राणी वाजिता वास द्रुत रुट्तर्ष कादिकम्

61 तत् रोद् वहत् पशुप वम्श शिशुत्व नाट्यम्

ब्रह्माद् वयम् परम् अनन्तम् अगाध बोधम्

वत्सान् सखीनिव पुरा परितो विचिन्वद्

एकम् सपाणि कवलम् परमेष्ठ्य चष्ट

62 दृष्ट्वा त्वरेण निज धोरण तो ऽवतीर्य

पृथ्व्याम् वपुः कनक दण्ड मिवाभि पात्य

स्पृष्ट्वा चतुर् मुकुट कोटि भिरङ्घ्रि युग्मम्

नत्वा मुदश्रु सुजलैः अकृताभि षेकम्

63 उत्थायो उत्थाय कृष्णस्य चिरस्य पादयोः पतन्

आस्ते महित्वम् प्राग् दृष्टम् स्मृत्वा स्मृत्वा पुनः पुनः

64 शनैर् अथोत्थाय विमृज्य लोचने मुकुन्द मुद् वीक्ष्य विनम्र कन्धरः

कृताञ्जलिः प्रश्रयवान् समाहितः सवेपथुः गद्गद यैल तेलया

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे पूर्वार्दे त्रयो दशो ऽध्याय ः॥

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्दः चतुर् दशो ऽध्याय ः

स्कन्द- 10: अध्याय- 14

01 श्री ब्रह्मो उवाच

नौमीड्य ते ऽभ्रव पुषे तडिदम् बराय

गुञ्जावतम् सपरि पिच्छल सन् मुखाय

वन्यस् रजे कवळ वेत्र विषाण वेणु

लक्ष्म श्रिये मृदु पदे पशु पाङ्गजाय

02 अस्यापि देव वपुषो मद् अनुग्रहस्य स्वेच् छामयस्य न तु भूत मयस्य कोऽपि

नेशे महि त्व वसितुम् मनसान् तरेण साक्षात् तवैव किमुतात्म सुखानु भूतेः

03 ज्ञाने प्रयास मुद पास्य नमन्त एव

जीवन्ति सन्मु खरिताम् भवदीय वार्ताम्

स्थाने स्थिताः श्रुति गताम् तनुवाङ् मनोभिः

ये प्रायशो ऽजित जितो ऽप्यसि तैस् त्रि लोक्याम्

04 श्रेयः सृतिम् भक्ति मुदस्य ते विभो

क्लिश् यन्ति ये केवल बोध लब्धये

तेषाम सौ क्लेशल एव शिष्यते

नान् यद् यथा स्थूल तुषाव घातिनाम्

05 पुरेह भूमन् बहवो ऽपि योगिनः त्वद् अर्पितेहा निज कर्म लब्धया

विबुध्य भक्त्यैव कथोप नीतया प्रपेदिरे ऽञ्जो ऽच्युत ते गतिम् पराम्

06 तथापि भूमन् महिमा गुणस्य ते विबोद् धुमर्हत् यमलान्त रात्मभिः

अविक्रियात् स्वानुभवा दरूपतो ह्यनन्य बोध् यात्म तया न चान् यथा

07 गुणात् मनस्ते ऽपि गुणान् विमातुम् हिताव तीर्नस्य क ईशि रेऽस्य

कालेन यैर्वा विमिताः सुकल्पैः भूपाम् शवः खे मिहिकाद् युभासः

08 तत् ते ऽनु कम्पाम् सुसमीक्ष माणो भुञ्जान एवात्म कृतम् विपाकम्

हृद्वाग् वपुर्भिः विदधन् नमस्ते जीवेत यो मुक्ति पदे स दाय भाक्

09 पश्येश मे ऽनार्यम् अनन्त आद्ये परात्मनि त्वय् यपि मायि मायिनि

मायाम् वितत् येक्षितुम् आत्म वैभवम् ह्यहम् किया नैच्छ मिवार्चि रग्नौ

10 अतः क्षमस् वाच्युत मे रजोभुवो ह्यजानतः त्वत् पृथ गीश मानिनः

अजावले पान्ध तमो ऽन्ध चक्षुष एषो ऽनु कम्प्यो मयि नाथ वानिति

11 क्वाहम् तमो महद् अहम् खचराग्नि वार्भू

सम् वेष्टि ताण्ड घट सप्त वितस्ति कायः

क्वेद् ऋग् विधाविगणि ताण्ड पराणु चर्या

वाताध् वरो मवि वरस्य च ते महित्वम्

12 उत् क्षेपणम् गर्भ गतस्य पादयोः किम् कल्पते मातुर् अधोक्ष जागसे

किमस्तिनास् तिव्य पदेश भूषितम् तवास्ति कुक्षेः कियदप्य नन्तः

13 जगत् त्रयान् तोदधि सम्प्ल वोदे नारायणस्यो दर नाभि नालात्

विनिर्गतो ऽजस्त्विति वाङ् न वै मृषा किम् त्वीश्वर त्वन्न विनिर् गतोऽस्मि

14 नारायणस्त्वम् न हि सर्व देहिनाम् आत्मास्य धीशा अखिल लोक साक्षी

नारायणो ऽङ्गम् नरभूज लायनात् तच् चापि सत्यम् न तवैव माया

15 तच्चेज् जलस्थम् तव सज् जगद् वपुः

किम् मे न दृष्टम् भगवम्स् तदैव

किम् वा सुदृष्टम् हृदि मे तदैव

किम् नो सपद् येव पुनर्व्य दर्शि

16 अत्रैव माया धमना वतारे ह्यस्य प्रपञ्चस्य बहिः स्फुटस्य

कृत्स्नस्य चान्तर् जठरे जनन्या मायात्व मेव प्रकटी कृतम् ते

17 यस्य कुक्षा विदम् सर्वम् सात्मम् भाति यथा तथा

तत् त्वय्य पीह तत् सर्वम् किमिदम् मायया विना

18 अद्यैव त्वद् ऋते ऽस्य किम् मम न ते मायात्व मादर्शितम्

एको ऽसि प्रथमम् ततो व्रज सुहृद् वत्साः समस्ता अपि

तावन्तो ऽसि चतुर् भुजाः तद् अखिलैः साकम् मयो पासि ताः

तावन् त्येव जगन्त्य भूस्त दमितम् ब्रह्माद् वयम् शिष् यते

19 अजान ताम् त्वत् पदवीम् अनात्मनि आत्मात्मना भासि वितत्य मायाम्

सृष्टा विवाहम् जगतो विधान इव त्वमे षो ऽन्त इव त्रि नेत्रः

20 सुरेषु ऋषिष् वीश तथैव नृष् वपि तिर्यक्षु यादः स्वपि ते ऽजनस्य

जन्मा सताम् दुर्मद निग्रहाय प्रभो विधातः सद् अनुग्र हाय च

21 को वेत्ति भूमन् भगवन् परात्मन् योगेश्वरो तीः भवतस् त्रि लोक्याम्

क्व वा कथम् वा कति वा कदेति विस्तारयन् क्रीडसि योग मायाम्

22 तस्माद् इदम् जगद शेष मसत् स्वरूपम्

स्वप्ना भमस् तधि षणम् पुरु दुः ख दुः खम्

त्वय् येव नित्य सुख बोध तना वनन्ते

मायात उद्यदपि यत् सदिवाव भाति

23 एकस्त्व मात्मा पुरुषः पुराणः सत्यः स्वयम् ज्योतिर् अनन्त आद्यः

नित्यो ऽक्षरो ऽजस्र सुखो निरञ्जनः पूर्ण अद्वयो मुक्त उपाधितो ऽमृतः

24 एवम् विधम् त्वाम् सकलात्म नामपि स्वात्मानम् आत्मात्म तया विचक्षते

गुर्वर् कलब् धोप निषत्सु चक्षुषा ये ते तरन् तीव भवान् ऋताम् बुधिम्

25 आत्मानम् एवात्म तया विजान ताम् तेनैव जातम् निखिलम् प्रपञ्चि तम्

ज्ञानेन भूयोऽपि च तत् प्रली यते रज्ज्वा महेर् भोग भवा भवौ यथा

26 अज्ञान सम्ज्ञौ भव बन्ध मोक्षौ द्वौ नाम नान्यौ स्त रुतज्ञ भावात्

अजस्र चित् यात्मनि केवले परे विचार्य माणे तरणा विवाहनी

27 त्वाम् आत्मानम् परम् मत्वा परमात्मान मेव च

आत्मा पुनर् बहिर् मृग्य अहो ऽज्ञ जनताज्ञ ता

28 अन्तर् भवे ऽनन्त भवन्त मेव ह्यतत् त्यजन्तो मृग यन्ति सन्तः

असन्तम् अप्यन्त् यहि मन्तरेण सन्तम् गुणम् तम् किमु यन्ति सन्तः

29 अथापि ते देव पदाम्बुज द्वय प्रसाद लेशानु गृहीत एव हि

जानाति तत्त्वम् भगवन् महिम्नो न चान्य एको ऽपि चिरम् विचिन्वन्

30 तदस्तु मे नाथ स भूरि भागो भवे ऽत्र वान् यत्र तु वा तिरश् चाम्

येनाहम् एको ऽपि भवज् जनानाम् भूत्वा निषेवे तव पाद पल्लवम्

31 अहो ऽति धन्या व्रज गोर मण्यः स्तन्याम् ऋतम् पीत मतीव ते मुदा

यासाम् विभो वत्स तरात्म जात्मना यत् तृप्तये ऽद्यापि न चाल मध् वराः

32 अहो भाग्यम् अहो भाग्यम् नन्द गोप व्रजौ कसाम्

यन् मित्रम् परम् आनन्दम् पूर्णम् ब्रह्म सनातनम्

33 एषाम् तु भाग्यम् अहिमाच्युत ताव दास्ताम्

एकाद शैव हि वयम् बत भूरि भागाः

एतद् धृषीक चषकैः अस कृत् पिबामः
शर्वा दयो ऽङ्घ्र् युदज मध्व मृतास वम् ते

34 तद् भूरि भाग्यम् इह जन्म किमप्य टव्याम्
यद् गोकुले ऽपि कतमाङ्घ्रि रजोऽभि षेकम्
यज् जीवितम् तु निखिलम् भगवान् मुकुन्दः
त्वद् यापि यत् पद रजः श्रुति मृग्य मेव

35 एषाम् घोष निवासिनाम् उत भवान् किम् देव रातेति नः
चेतो विश्व फलात् फलम् त्व दपरम् कुत्राप् ययन् मुह्यति
सद् वेषादिव पूत नापि सकुला त्वा मेव देवा पिता
यद् धामार्थ सुहृत् प्रियात्म तनय प्राणाश यास्त् वत् कृते

36 तावद् रागा दयः स्तेनाः तावत् कारा गृहम् गृहम्
तावन् मोहोऽङ्घ्रि निगडो यावत् कृष्ण न ते जनाः

37 प्रपञ्चम् निष् प्रपञ्चो ऽपि विडम्ब यसि भूतले
प्रपन्न जनता नन्द सन्दोहम् प्रथितुम् प्रभो

38 जानन्त एव जानन्तु किम् बहूक् त्या न मे प्रभो
मनसो वपुषो वाचो वैभवम् तव गोचरः

39 अनुजा नीहि माम् कृष्ण सर्वम् त्वम् वेत्सि सर्व दृक्
त्वमेव जगताम् नाथो जग देतत् तवार्पितम्

40 श्री कृष्ण वृष्णि कुल पुष्कर जोष दायिन्
क्ष्मा निर्जर द्विज पशू दधि वृद्धि कारिन्
उद्धर्म शार्व रहर क्षिति राक्ष सध्रुग्
आकल्प मार्क मर्हन् भगवन् नमस्ते

41 श्री शुक उवाच
इत् यभिष् टूय भूमानम् त्रिः परिक्रम्य पादयोः
नत्वा भीष्टम् जगद् धाता स्वधाम प्रत्य पद् यत

42 ततो ऽनु ज्ञाप्य भगवान् स्वभुवम् प्राग वस्थि तान्

वत्सान् पुळिन मानिन्ये यथा पूर्व सखम् स्वकम्

43 एकस्मिन् नपि याते ऽब्दे प्राणेशम् चान्तर् आत्मनः

कृष्ण माया हता राजन् क्षणार्धम् मेनिरे ऽर्भकाः

44 किम् किम् न विस्मरन् तीह माया मोहित चेतसः

यन् मोहितम् जगत् सर्वम् अभीक्ष्णम् विस्मृतात् मकम्

45 ऊचुश् च सुहृदः कृष्णम् स्वागतम् ते ऽतिरम् हसा

नैको ऽप्य भोजि कवल एहीतः साधु भुज् यताम्

46 ततो हसन् हृषी केशो ऽभ्य वहृत्य सहार् भकैः

दर्शयन्श् चर्माजगरम् न्यवर्त तवनाद् व्रजम्

47 बर्ह प्रसून नव धातु विचित्रि ताङ्गः

प्रोद् दाम वेणु दल शृङ्ग रवोत्स वाढ्यः

वत्सान् गृणन् अनुग गीत पवित्र कीर्तिः

गोपी दृग् उत्सव दृशिः प्रविवेश गोष्ठम्

48 अद्यानेन महा व्यालो यशोदा नन्द सूनुना

हतो ऽविता वयम् चास्माद् इति बाला व्रजे जगुः

49 श्री राजो उवाच

ब्रह्मन् परोद् भवे कृष्णे इयान् प्रेमा कथम् भवेत्

यो ऽभूत पूर्वस्तो केषु स्वोद् भवेष् वपि कथ्य ताम्

50 श्री शुक उवाच

सर्वेषाम् अपि भूतानाम् नृप स्वात् मैव वल्लभः

इतरे ऽपत्य वित्ताद् याः तद् वल्लभ तयैव हि

51 तद् राजेन्द्र यथा स्नेहः स्वस्व कात्मनि देहिनाम्

न तथा ममता अलम्बि पुत्र वित्त गृहादिषु

52 देहात्म वादिनाम् पुम्साम् अपि राजन्य सत्तम

यथा देहः प्रियतमः तथा न ह्यनु ये च तम्

53 देहो ऽपि ममता भाक्चेत् तर्ह्यसौ नात्म वत् प्रियः

यज् जीर्यत् यपि देहे ऽस्मिन् जीवि ताशा बली यसी

54 तस्मात् प्रिय तमः स्वात्मा सर्वेषाम् अपि देहिनाम्

तद् अर्थ मेव सकलम् जगदे तच् चरा चरम्

55 कृष्णम् एनम् अवेहि त्वम् आत्मानम् अखिलात् मनाम्

जगद् हिताय सो ऽप्यत्र देही वाभाति मायया

56 वस्तुतो जानताम् अत्र कृष्णम् स्थास्नु चरिष्णु च

भगवद् रूपम् अखिलम् नान्यद् वस्त् विह किञ्चन

57 सर्वेषाम् अपि वस्तूनाम् भावार्थो भवति स्थितः

तस्यापि भगवान् कृष्णः किमतद् वस्तु रूप्य ताम्

58 समाश्रि ता ये पद पल्लव प्लवम् महत् पदम् पुण्य यशो मुरारेः

भवाम् बुधिः वत्स पदम् परम् पदम् पदम् पदम् यद् विपदाम् न तेषाम्

59 एतत् ते सर्व माख्यातम् यत् पृष्टो ऽहम् इह त्वया

यत् कौमारे हरि कृतम् पौगण्डे परि कीर्तितम्

60 एतत् सुहृद् भिश् चरितम् मुरारेः अघार् दनम् शाद्वल जेमनम् च

व्यक्तेत रद् रूपम् अजोर्व भिष्टवम् शृण्वन् गृणन् एति नरो ऽखिल् आर्थान्

61 एवम् विहारैः कौमारैः कौमारम् जहतुर् व्रजे

निलायनैः सेतु बन्धैः मर्कटोत् प्लव नादिभिः

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे पूर्वार्दे चतुर् दशो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्दः पञ्च दशो ऽध्याय :

*01* श्री शुक उवाच

ततश् च पौगण्ड वयः श्रीतौ व्रजे

बभूव तुस्तौ पशु पाल सम्मतौ

गाश् चार यन्तौ सखिभिः समम् पदैः

वृन्दा वनम् पुण्य मतीव चक्रतुः

*02* तन् माधवो वेणु मुदीर यन् वृतो गोपैर् गृणद्भिः स्वयशो बलान् वितः

पशून् पुरस् कृत्य पशव्य माविशद् विहर्तु कामः कुसुमा करम् वनम्

*03* तन् मञ्जु घोषालि मृगद् विजाकुलम् महन् मनः प्रख्य पयः सरस् वता

वातेन जुष्टम् शत पत्र गन्धिना निरीक्ष्य रन्तुम् भगवान् मनो दधे

*04* स तत्र तत्रारुण पल्लव श्रिया फल प्रसूनोरु भरेण पादयोः

स्पृशच् छिखान् वीक्ष्य वनस् पतीन् मुदा स्मयन् निवाहा ग्रज मादि पूरुषः

*05* श्री भगवान् उवाच

अहो अमी देव वराम रार्चितम् पादाम् बुजम् ते सु मनः फलार् हणम्

नमन्त् युपादाय शिखाभिर् आत्मनः तमो ऽपहत्यै तरु जन्म यत् कृतम्

*06* एते ऽलिन स्तव यशो ऽखिल लोक तीर्थम्

गायन्त आदि पुरुषानु पथम् भजन्ते

प्रायो अमी मुनि गणा भवदीय मुख्या

गूढम् वने ऽपि न जहत् यन घात्म दैवम्

*07* नृत्यन् त्यमी शिखिन ईड्य मुदा हरिण्यः

कुर्वन्ति गोप्य इव ते प्रिय मीक्षणेन

सूक्तैश् च कोकिल गणा गृह माग ताय

धन्या वनौ कस इयान्हि सताम् निसर्गः

*08* धन्येय मद्य धरणी तृण वीरु धस्त् वत्

पादस् पृशो द्रुमलताः करजाभि मृष्टाः

नद्यो ऽद्रयः खग मृगाः सदयाव लोकैः

गोप्यो ऽन्तरेण भुज योरपि यत् स्पृहा श्रीः

09 श्री शुक उवाच

एवम् वृन्दा वनम् श्रीमत् कृष्णः प्रीत मनाः पशून्

रेमे सञ्चार यन्नद्रेः सरिद् रोधः सु सानुगः

10 क्वचिद् गायति गायत्सु मदान् धालिष् वनु व्रतैः

उपगीय मान चरितः स्रग्वी सङ्कर्षणान् वितः

11 क्वचिच् च कल हम्सानाम् अनुकूजति कूजितम्

अभि नृत्यति नृत् यन्तम् बर्हिणम् हासयन् क्वचित्

12 मेघ गम्भीर या वाचा नामभिर् दूर गान् पशून्

क्वचिद् आह्वयति प्रीत्या गो गोपाल मनोज्ञया

13 चकोर क्रौञ्च चक्राह्व भारद् वाजाम्श् च बर्हिणः

अनु रौति स्म सत्त्वानाम् भीत वद्व्या घ्रसिम् हयोः

14 क्वचित् क्रीडा परिश् रान्तम् गोपोत् सङ्गोप बर्हणम्

स्वयम् विश्रमय त्यार्यम् पाद सम्वाह नादिभिः

15 नृत्यतो गाय तः क्वापि वल्गतो युध्यतो मिथः

गृहीत हस्तौ गोपालान् हसन्तौ प्रश शम् सतुः

16 क्वचित् पल्लव तल्पेषु नियुद्ध श्रम कर्शितः

वृक्ष मूला श्रयः शेते गोपोत् सङ्गोप बर्हणः

17 पाद सम्वा हनम् चक्रुः केचित् तस्य महात् मनः

अपरे हत पाप् मानो व्यजनैः सम वीजयन्

18 अन्ये तद् अनु रूपाणि मनो ज्ञानि महात् मनः

गायन्ति स्म महा राज स्नेह क्लिन्न धियः शनैः

19 एवम् निगूढात्म गतिः स्व मायया गोपात् मजत्वम् चरितैर् विडम् बयन्

रेमे रमा लालित पाद पल्लवो ग्राम्यैः समम् ग्राम्य वदीश चेष्टितः

20 श्रीदामा नाम गोपालो राम केशव योः सखा

सुबलस् तोक कृष्णाद्या गोपाः प्रेम्णेद मब्रुवन्

21 राम राम महा बाहो कृष्ण दुष्ट निबर्हण

इतो ऽविदूरे सुमहद् वनम् तालालि सङ्कुलम्

22 फलानि तत्र भूरीणि पतन्ति पति तानि च

सन्ति किन्त्ववव रुद्धानि धेनु केन दुरात् मना

23 सोऽति वीर्यो ऽसुरो राम हे कृष्ण खर रूप धृक्

आत्म तुल्य बलैर् अन्यैः ज्ञातिभिर् बहुभिर् वृतः

24 तस्मात् कृत नरा हाराद् भीतैर् नृभिर् अमित्रहन्

न सेव्यते पशु गणैः पक्षि सङ्घैर् विवर् जितम्

25 विद्यन्ते ऽभुक्त पूर्वाणि फलानि सुरभीणि च

एष वै सुरभिर् गन्धो विषू चीनोऽव गृह् यते

26 प्रयच् छ तानि नः कृष्ण गन्ध लोभित चेतसाम्

वाञ्छास्ति महती राम गम्यताम् यदि रोचते

27 एवम् सुहृद् वचः श्रुत्वा सुहृत् प्रियचि कीर्षया

प्रहस्य जग्म तुर् गोपैः वृतौ ताल वनम् प्रभू

28 बलः प्रविश्य बाहुभ् याम् तालान्सम् परिकम् पयन्

फलानि पातया मास मतङ्गज इवौजसा

29 फलानाम् पत ताम् शब्दम् निशम्या असुर रासभः

अभ्यधावत् क्षिति तलम् सनगम् परिकम् पयन्

30 समेत्य तरसा प्रत्यग् द्वाभ् याम् पद्भ्याम् बलम् बली

निहत्यो रसि काशब्दम् मुञ्चन् पर्य सरत् खलः

31 पुनर् आसाद्य समंरब्ध उपक्रोष्टा परा क्स्थितः

चरणाव परौ राजन् बलाय प्राक्षि पद् रुषा

32 स तम् गृहीत्वा प्रपदोः भ्रामयित् वैक पाणिना

चिक्षेप तृण राजाग्रे भ्रामण त्यक्त जीवितम्

33 तेना हतो महा तालो वेपमानो बृहच् छिराः

पार्श् वस्थम् कम्पयन् भग्नः स चान्यम् सोऽपि चापरम्

34 बलस्य लीलयोत् सृष्ट खर देह हता हताः

तालाश् च कम्पिरे सर्वे महा वातेर् इता इव

35 नैतच् चित्रम् भगवति ह्यनन्ते जगद् ईश्वरे

ओत प्रोतम् इदम् यस्मिन्ः तन्तुष् वङ्ग यथा पटः

36 ततः कृष्णम् च रामम् च ज्ञातयो धेनु कस्य ये

क्रोष्टारो ऽभ्यद्रवन् सर्वे सम्रब्धा हत बान्धवाः

37 ताम् स्ताना पततः कृष्णो रामश् च नृप लीलया

गृहीत पश्चाच् चरणान् प्राहिणोत् तृण राजसु

38 फल प्रकर सङ्कीर्णम् दैत्य देहैः गता सुभिः

रराज भूः सता लाग्रैः घनैर् इव नभस् तलम्

39 तयोस् तत् सुमहत् कर्म निशम्य विबुधा दयः

मुमुचुः पुष्प वर्षाणि चक्रुर् वाद्यानि तुष्टुवुः

40 अथ ताल फलान् यादन् मनुष्या गत साध् वसाः

तृणम् च पशवश् चेरुः हत धेनुक कानने

41 कृष्णः कमल पत्राक्षः पुण्य श्रवण कीर्तनः

स्तूय मानो ऽनुगैर् गोपैः साग्रजो व्रज माव्रजत्

42 तम् गोरजश् छुरित कुन्तल बद्ध बर्ह

वन्य प्रसून रुचि रेक्षण चारु हासम्

वेणुम् क्वणन्तम् अनुगैः अनुगीत कीर्तिम्

गोप्यो दिदृक् षित दृशो ऽभ्यग मन्स मेताः

43 पीत्वा मुकुन्द मुख सारघ मक्षि भृङ्गैः

तापम् जहुर् विरहजम् व्रज योषि तो ऽह्नि

तत् सत् कृतिम् समधिगम् य विवेश गोष्ठम्

स व्रीडहा स विनयम् यद पाङ्ग मोक्षम्

44 तयोर् यशोदा रोहिण्यौ पुत्रयोः पुत्र वत्सले

यथा कामम् यथा कालम् व्यधत् ताम् परमा शिषः

45 गताध् वान श्रमौ तत्र मज्जनोन् मर्द नादिभिः

नीवीम् वसित्वा रुचिराम् दिव्य स्रग् गन्ध मण्डितौ

46 जनन् युप हृतम् प्राश्य स्वाद् वन्नम् उपलालि तौ

सम्विश्य वर शय् यायाम् सुखम् सुषु पतुर् व्रजे

47 एवम् स भगवान् कृष्णो वृन्दा वन चरः क्वचित्

ययौ राम मृते राजन् काळिन्दीम् सखिभिर् वृतः

48 अथ गावश् च गोपाश् च निदा घातप पीडिताः

दुष्टम् जलम् पपुस् तस्याः त्रुषार्ता विष दूषितम्

49 विषाम् भस्त दुपस् पृश्य दैवो पहत चेतसः

निपेतुर् व्यसवः सर्वे सलिलान् ते कुरूद् वह

50 वीक्ष्य तान् वै तथा भूतान् कृष्णो योगेश् वरेश् वरः

ईक्षया अमृत वर्षिण्या स्वनाथान् सम जीवयत्

51 ते सम् प्रतीत स्मृतयः समुत् थाय जलान्ति कात्

आसन् सु विस्मिताः सर्वे वीक्ष माणाः परस् परम्

52 अन्वमम् सत तद् राजन् गोविन्दानु ग्रहेक्षि तम्

पीत्वा विषम् परे तस्य पुनर् उत्थानम् आत्मनः

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे पूर्वार्दे पञ्च दशो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्दः षोडशो ऽध्याय :

स्कन्द- 10: अध्याय- 16

01 श्री शुक उवाच

विलोक्य दूषि ताम् कृष्णाम् कृष्णः कृष्णा हिना विभुः

तस्या विशुद्धि मन्विच् छन् सर्पम् तम् उदवा सयत्

02 श्री राजो उवाच

कथम् अन्तर् जले ऽगाधे न्यगृह्णाद् भगवान् अहिम्

स वै बहुयुगा वासम् यथासीद् विप्र कथ् यताम्

03 ब्रह्मन् भगवतस् तस्य भूम्नः स्वच् छन्द वर्तिनः

गोपालो दार चरितम् कस्तृप् येताम् ऋतम् जुषन्

04 श्री शुक उवाच

कालिन्द् याम् कालियस् यासीद् ह्रदः कश्चिद् विषाग्निना

श्रप्य माण पया यस्मिन् पतन्ति उपरिगाः खगाः

05 विप्रुष् मता विषदोर्मि मारुते नाभि मर्शिताः

म्रियन्ते तीर गा यस्य प्राणिनः स्थिर जङ्गमाः

06 तम् चण्ड वेग विष वीर्यम् अवेक्ष्य तेन

दुष्टाम् नदीम् च खल सम्य मनाव तारः

कृष्णः कदम्बम् अधिरुह्य ततो ऽति तुङ्गम्

आस्फोट्य गाढ रशनो न्यपतद् विषोदे

07 सर्प ह्रदः पुरुष सार निपात वेग

सङ्क्षोभि तोरग विषोच् छ्वसि ताम्बु राशिः

पर्यक् प्लुतो विष कषाय बिभीषणोर् मिर्

धावन् धनुः शतम् अनन्त बलस्य किम् तत्

08 तस्य ह्रदे विहरतो भुज दण्ड घूर्ण

वार्घोष मङ्ग वर वारण विक्र मस्य

आश्रुत्य तत् स्वसदना भिभवम् निरीक्ष्य

चक्षुः श्रवाः समसरत् तद् अमृष्य माणः

09 तम् प्रेक्षणीय सुकुमार घनाव दातम्

श्रीवत्स पीत वसनम् स्मित सुन्दरास् यम्

क्रीडन्तम् अप्रति भयम् कमलोद राङ्घ्रिम्

सन्दश्य मर्म सुरुषा भुज या च छाद

10 तम् नाग भोग परिवीतम् अदृष्ट चेष्टम्

आलोक्य तत् प्रिय सखाः पशुपा भृशार् ताः

कृष्णे ऽर्पि तात्म सुहृदर्थ कलत्र कामा

दुः खानु शोक भय मूढ धियो निपेतुः

11 गावो वृषा वत्स तर्यः क्रन्द मानाः सु दुः खिताः

कृष्णे न्यस् तेक्षणा भीता रुदत् य इव तस् थिरे

12 अथ व्रजे महोत् पाताः त्रिविधा ह्यति दारुणाः

उत्पेतुः भुवि दिव् यात्मनि आसन्न भय शम्सिनः

13 ताना लक्ष्य भयोद् विग्ना गोपा नन्द पुरोगमाः

विना रामेण गाः कृष्णम् ज्ञात्वा चार यितुम् गतम्

14 तैर् दुर् निमित्तैः निधनम् मत्वा प्राप्तम् अत द्विदः

तत् प्राणाः तन् मनस्कास्ते दुः ख शोक भया तुराः

15 आबाल वृद्ध वनिताः सर्वे ऽङ्ग पशु वृत्तयः

निर्जग्मुः गोकुलाद् दीनाः कृष्ण दर्शन लालसाः

16 ताम् स्तथा कातरान् वीक्ष्य भगवान् माधवो बलः

प्रहस्य किञ्चिन् नोवाच प्रभाव ज्ञोऽनु जस्य सः

17 तेऽन् वेष माणा दयितम् कृष्णम् सूचि तया पदैः

भगवल् लक्षणैर् जग्मुः पदव्या यमुना तटम्

18 ते तत्र तत्राब्ज यवाङ्कु शाशनि ध्वजोप पन्नानि पदानि विश् पतेः

मार्गे गवाम् अन्य पदान् तरान् तरे निरीक्ष माणा ययुर् अङ्ग सत् वराः

19 अन्तर् ह्रदे भुजग भोग परीत मारात्

कृष्णम् निरीहम् उपलभ्य जलाश यान्ते

गोपाम्श् च मूढ धिषणान् परितः पशूम्श् च

सङ्क्रन् दतः परम कश्मल मापुर् आर्ताः
20 गोप्यो ऽनु रक्त मनसो भगवत् यनन्ते
तत् सौहृद स्मित विलोक गिरः स्मरन्त्यः
ग्रस्ते ऽहिना प्रिय तमे भृश दुः ख तप्ताः
शून्यम् प्रिय व्यति हृतम् ददृशुस् त्रिलोकम्
21 ताः कृष्ण मातरम् अपत्य मनुप्र विष्टाम्
तुल्यव् यथाः समनु गृह्य शुचः स्रवन्त्यः
तास्ता व्रज प्रिय कथाः कथयन् त्य आसन्
कृष्णानने ऽर्पित दृशो मृतक प्रतीकाः
22 कृष्ण प्राणान् निर्विशतो नन्दादीन् वीक्ष्य तम् ह्रदम्
प्रत्य षेधत् स भगवान् रामः कृष्णानु भाव वित्
23 इत्थम् स्व गोकुलम् अनन्य गतिम् निरीक्ष्य
सस्त्री कुमारम् अति दुः खितम् आत्म हेतोः
आज्ञाय मर्त्य पदवीम् अनु वर्त मानः
स्थित्वा मुहूर्त मुद तिष्ठ दुरङ्ग बन्धात्
24 तत् प्रथ्य मान वपुषा व्यथि तात्म भोगः
त्यक् त्वोन्न मय्य कुपितः स्वफणान् भुजङ्गः
तस्थौ श्वसन् छ्वसन रन्ध्र विषाम्ब रीष
स्तब् धेक्षणोल् मुक मुखो हरि मीक्ष माणः
25 तम् जिह्वया द्विशि खया परि लेलि हानम्
द्वे सृक्किणी ह्यति कराल विषाग्नि दृष्टिम्
क्रीडन् नमुम् परिस सार यथा खगेन्द्रो
बभ्राम सो ऽप्य वसरम् प्रस मीक्ष माणः
26 एवम् परिभ्रम हतौ जस मुन्न ताम्सम्
आनम्य तत् पृथु शिरः स्वधि रूढ आद्यः
तन् मूर्ध रत्न निकर स्पर्शाति ताम्र

पादाम् बुजो ऽखिल कलादि गुरुर् ननर्त

27 तम् नर्तु मुद्य तम वेक्ष्य तदा तदीय

गन्धर्व सिद्ध सुर चारण देव वध्वः

प्रीत्या मृदङ्ग पण वानक वाद्य गीत

पुष्पोप हार नुतिभिः सह सोप सेदुः

28 यद् यच् छिरो न नमते ऽङ्ग शतैक शीर्ष्णः

तत् तन् ममर्द खर दण्ड धरो ऽङ्घ्रि पातैः

क्षीणा युषो भ्रमत उल्बणम् आस्य तो ऽसृङ्

नस्तो वमन् परम कश्मलम् आप नागः

29 तस् याक्षिभिर् गरल मुद्वम तः शिरः सु

यद् यत् समुन् नमति निः श्वसतो रुषोच् चैः

नृत्यन् पदानु नमयन् दमयाम् बभूव

पुष्पैः प्रपूजित इवेह पुमान् पुराणः

30 तच् चित्र ताण्डव विरुग्न फणात पत्रो

रक्तम् मुखैर् उरु वमन् नृप भग्न गात्रः

स्मृत्वा चरा चर गुरुम् पुरुषम् पुराणम्

नारायणम् तमरणम् मनसा जगाम

31 कृष्णस्य गर्भ जगतो ऽति भराव सन्नम्

पार्ष्णि प्रहार परिरुग्न फणात पत्रम्

दृष्ट् वाहिम् आद्य मुपसेदु रमुष्य पत्न्य

आर्ताः श्लथद् वसन भूषण केश बन्धाः

32 तास्तम् सुविग्न मनसो ऽथ पुरस् कृतार् भाः

कायम् निधाय भुवि भूत पतिम् प्रणेमुः

साध्व्यः कृताञ्जलि पुटाः शमलस्य भर्तुः

मोक्षेप्सवः शरणदम् शरणम् प्रपन्नाः

33 नाग पत्न्य ऊचुः

न्याय्यो हि दण्डः कृत किल्बि षे ऽस्मिन्स्

तव् आवतारः खल निग्रहाय

रिपोः सुतानाम् अपि तुल्य दृष्टिः

धत्से दमम् फलमे वानुशम् सन्

34 अनुग्रहोऽयम् भवतः कृतो हि नो दण्डो ऽसताम् ते खलु कल्मषा पहः

यद् दन्द शूकत्वम् अमुष्य देहिनः क्रोधोऽपि ते ऽनुग्रह एव सम्मतः

35 तपः सु तप्तम् किमनेन पूर्वम् निरस्त मानेन च मान देन

धर्मोऽथ वा सर्व जनानु कम्पया यतो भवाम्स् तुष्यति सर्व जीवः

36 कस्यानु भावोऽस्य न देव विद्महे तवाङ्घ्रि रेणु स्परशाधि कारः

यद् वाञ्छया श्रीर् ललनाच रत् तपो विहाय कामान् सुचिरम् धृत व्रता

37 न नाक पृष्ठम् न च सार्व भौमम्

न पार मेष्ठ्यम् न रसाधि पत्यम्

न योग सिद्धीः अपुनर् भवम् वा

वाञ्छन्ति यत् पाद रजः प्रपन्नाः

38 तदेष नाथाप दुराप मन्यैः तमो जनिः क्रोध वशोऽप्य हीशः

सम्सार चक्रे भ्रमतः शरीरिणो यदिच्छ तः स्याद् विभवः समक्षः

39 नमस्तुभ्यम् भगवते पुरुषाय महात्मने

भूता वासाय भूताय पराय परमात्मने

40 ज्ञान विज्ञान निधये ब्रह्मणे ऽनन्त शक्तये

अगुणाया विकाराय नमस्ते अप्राकृ ताय च

41 कालाय काल नाभाय काला वयव साक्षिणे

विश्वाय तदु पद् रष्ट्रे तत् कर्त्रे विश्व हेतवे

42 भूत मात् रेन्द्रिय प्राण मनो बुद्ध्याश यात्मने

त्रिगुणे नाभि मानेन गूढ स्वात्मानु भूतये

43 नमो ऽनन्ताय सूक्ष्माय कूटस् थाय विपश् चिते

नाना वादानु रोधाय वाच्य वाचक शक्तये

44 नमः प्रमाण मूलाय कवये शास्त्र योनये

प्रवृत् ताय निवृत् ताय निगमाय नमो नमः

45 नमः कृष्णाय रामाय वसुदेव सुताय च

प्रद्युम्नाय अनिरुद्धाय सात्वताम् पतये नमः

46 नमो गुण प्रदीपाय गुणात्मच् छादनाय च

गुण वृत् त्युप लक्ष्याय गुण द्रष्ट्रे स्व सम्विदे

47 अव्याकृत विहाराय सर्व व्याकृत सिद्धये

हृषीकेश नमस्तेऽस्तु मुनये मौन शीलिने

48 परावर गतिज्ञाय सर्वाध् यक्षाय ते नमः

अविश्वाय च विश्वाय तद् द्रष्ट्रे ऽस्य च हेतवे

49 त्वम् ह्यस्य जन्मस् थिति सम्यमान् प्रभो

गुणैर नीहो ऽकृत काल शक्ति धृक्

तत् तत् स्वभावान् प्रति बोध यन्सतः

समीक्षया मोघ विहार ईहसे

50 तस्यैव ते ऽमूस् तन वस्त्रि लोक्याम्

शान्ता अशान्ता उत मूढ योनयः

शान्ताः प्रियास्ते ह्यधु नावितुम् सताम्

स्थातुश् च ते धर्म परीप्स येहतः

51 अपराधः सकृद् भर्त्रा सोढव्यः स्वप्र जाकृतः

क्षन्तु मर्हसि शान्तात्मन् मूढस्य त्वाम् अजानतः

52 अनुगृह्णीष्व भगवन् प्राणाम् स्त्यजति पन्नगः

स्त्रीणाम् नः साधु शोच् यानाम् पतिः प्राणः प्रदीय ताम्

53 विधेहि ते किङ्करीणाम् अनुष्ठेयम् तवाज्ञया

यच् छ्रद्ध यानु तिष्ठन् वै मुच्यते सर्वतो भयात्

54 श्री शुक उवाच

इत्थम् स नाग पत्नीभिः भगवान् सम भिष्टुतः

मूर्च्छितम् भग्न शिरसम् विस सर्जाङ्घ्रि कुट्टनैः

55 प्रति लब्धेन्द्रिय प्राणः काळियः शनकैर् हरिम्

कृच् छ्रात् समुच् छ्वसन् दीनः कृष्णम् प्राह कृताञ्जलिः

56 काळिय उवाच

वयम् खलाः सहोत् पत्त्या तामसा दीर्घ मन्यवः

स्वभावो दुस्त् यजो नाथ लोकानाम् यद् असद् ग्रहः

57 त्वया सृष्टम् इदम् विश्वम् धातर् गुण विसर्जनम्

नाना स्वभाव वीर्यौ जो योनि बीजाश या कृति

58 वयम् च तत्र भगवन् सर्पा जात्युरु मन्यवः

कथम् त्यजामः त्वन् मायाम् दुस्त् यजाम् मोहिताः स्वयम्

59 भवान् हि कारणम् तत्र सर्वज्ञो जगद् ईश्वरः

अनुग्रहम् निग्रहम् वा मन्यसे तद् विधेहि नः

60 श्री शुक उवाच

इत्या कर्ण्य वचः प्राह भगवान् कार्‌य मानुषः

नात्र स्थेयम् त्वया सर्प समुद्रम् याहि मा चिरम्

स्वज्ञात्य पत्य दाराढ्यो गोनृभिर् भुज्यताम् नदी

61 य एतत् सम् स्मरेन् मर्त्यः तुभ्यम् मद् अनुशासनम्

कीर्तयन् उभयोः सन्ध्योः न युष्मद् भयम् आप्नुयात्

62 यो ऽस्मिन् स्नात्वा मदा क्रीडे देवादीन्स् तर्प येज्जलैः

उपोष्य माम् स्मरन् अर्चेत् सर्व पापैः प्रमुच् यते

63 द्वीपम् रमणकम् हित्वा ह्रद मेत मुपाश्रितः

यद् भयात् स सुपर्णस् त्वाम् नाद्यान् मत् पाद लाञ्छितम्

64 श्री शुक उवाच

एव मुक्तो भगवता कृष्णेन आद्भुत कर्मणा

तम् पूजया मास मुदा नाग पत्न्यश् च सादरम्

65 दिव्याम्बर स्रङ्मणिभिः परार् ध्यैर् अपि भूषणैः

दिव्य गन्धानु लेपैश् च महत् योत् पल मालया

66 पूज यित्वा जगन्नाथम् प्रसाद्य गरुड ध्वजम्

ततः प्रीतो ऽभ् यनुज्ञातः परिक्रम् याभि वन्द्य तम्

67 सकलत्र सुहृत् पुत्रो द्वीपम् अब्धेर्ज गाम ह

तदैव सामृत जला यमुना निर्विषा भवत्

अनुग्रहाद् भगवतः क्रीडा मानुष रूपिणः

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे पूर्वार्दे षोडशो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्दः सप्त दशो ऽध्याय :

स्कन्द- 10: अध्याय- 17

01 श्री राजोवाच

नागालयम् रमणकम् कस्मात् तत् याज काळियः

कृतम् किम् वा सुपर्णस्य तेनैके नास मञ्जसम्

02 श्री शुक उवाच

उपहार्यैः सर्प जनैः मासि मासीह यो बलिः

वानस् पत्यो महा बाहो नागानाम् प्राङ् निरूपितः

03 स्वम् स्वम् भागम् प्रयच् छन्ति नागाः पर्वणि पर्वणि

गोपीथा यात्मनः सर्वे सुपर्णाय महात् मने

04 विष वीर्य मदा विष्टः काद्र वेयस्तु काळियः

कदर् थी कृत्य गरुडम् स्वयम् तम् बुभुजे बलिम्

05 तच् छ्रुत्वा कुपितो राजन् भगवान् भगवत् प्रियः

विजि घाम्सुर् महा वेगः काळियम् सम् उपाद्र वत्

06 तमाप तन्तम् तरसा विषा युधः प्रत्यभ्य याद् उच्छ्रित नैक मस्तकः

दद्भिः सुपर्णम् व्यद शद् ददायुधः कराल जिह्वोच् छ्वसि तोग्र लोचनः

07 तम् तार्क्ष्य पुत्रः स निरस्य मन्युमान्

प्रचण्ड वेगो मधु सूदना सनः

पक्षेण सव्येन हिरण्य रोचिषा

जघान कद्रु सुतम् उग्र विक्रमः

08 सुपर्ण पक्षा भिहतः काळियो ऽतीव विह्वलः

ह्रदम् विवेश काळिन्द्याः तद् अगम्यम् दुरा सदम्

09 तत्रैक दा जलचरम् गरुडो भक्ष्य मीप्सितम्

निवारितः सौभरिणा प्रसह्य क्षुधितो ऽहरत्

10 मीनान्सु दुः खितान् दृष्ट्वा दीनान् मीन पतौ हते

कृपया सौभरिः प्राह तत्रत् य क्षेम माचरन्

11 अत्र प्रविश्य गरुडो यदि मत्स्यान्स खादति

सद्यः प्राणैर् वियुज् येत सत्यमे तद् ब्रवीम् यहम्

12 तम् काळियः परम् वेद नान्यः कश्चन लेलिहः

अवात्सीद् गरुडाद् भीतः कृष्णेन च विवासितः

13 कृष्णम् ह्रदाद् विनिष् क्रान्तम् दिव्य स्रग् गन्ध वाससम्

महामणि गणा कीर्णम् जाम्बू नद परिष् कृतम्

14 उपलभ्योत् थिताः सर्वे लब्ध प्राणा इवासवः

प्रमोद निभृत् आत्मानो गोपाः प्रीत् याभि रेभिरे

15 यशोदा रोहिणी नन्दो गोप्यो गोपाश् च कौरव

कृष्णम् समेत्य लब्धेहा आसन् लब्ध मनो रथाः

16 रामश्च् आच्युत मालिङ्ग्य जहा सास्यानु भाववित्

नगा गावो वृषा वत्स लेभिरे परमाम् मुदम्

17 नन्दम् विप्राः समा गत्य गुरवः सकलत्र काः

ऊचुस्ते काळिय ग्रस्तो दिष्ट्या मुक्तस् तवात् मजः

18 देहि दानम् द्विजा तीनाम् कृष्ण निर्मुक्ति हेतवे

नन्दः प्रीतमना राजन् गाः सुवर्णम् तद् आदिशत्

19 यशोदापि महा भागा नष्ट लब्ध प्रजा सती

परिष् वज्याङ्क मारोप्य मुमोचा श्रु कलाम् मुहुः

20 ताम् रात्रिम् तत्र राजेन्द्र क्षुत् तृड् भ्याम् श्रम कर्षिताः

ऊषुः व्रजौ कसो गावः काळिन्द्या उप कूलतः

21 तदा शुचिव नोद् भूतो दावाग्निः सर्वतो व्रजम्

सुप्तम् निशीथ आवृत्य प्रदग्धु मुप चक्रमे

22 तत उत्थाय सम् भ्रान्ता दह्य माना व्रजौ कसः

कृष्णम् ययुस्ते शरणम् माया मनुजम् ईश्वरम्

23 कृष्ण कृष्ण महा भग हे रामा मित विक्रम

एष घोर तमो वह्निः तावकान् ग्रस ते हि नः

24 सु दुस्तरान् नः स्वान् पाहि कालाग्नेः सुहृदः प्रभो

न शक्नुमस् त्वच् चरणम् सन्त् यक्तुम् अकुतो भयम्

25 इत्थम् स्वजन वैक्लव्यम् निरीक्ष्य जगद् ईश्वरः

तम् अग्निम् अपिबत् तीव्रम् अनन्तो ऽनन्त शक्ति धृक्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे पूर्वार्दे सप्त दशो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्दः अष्टा दशो ऽध्याय :

स्कन्द- 10: अध्याय- 18

01 श्री शुक उवाच

अथ कृष्णः परि वृतो ज्ञातिभिः मुदि तात् मभिः

अनुगीय मानोन् य विशद् व्रजम् गोकुल मण्डितम्

02 व्रजे विक्रीडतो रेवम् गोपालच् छद्म मायया

ग्रीष्मो नामर् तुर भवत् नाति प्रेयात्र् छरीरिणाम्

03 स च वृन्दावन गुणैः वसन्त इव लक्षितः

यत् रास्ते भगवान् साक्षाद् रामेण सह केशवः

04 यत्र निर्झर निर्ह्राद निवृत्त स्वन झिल्लिकम्

शश्वत् तच् छीकरर् जीष द्रुम मण्डल मण्डितम्

05 सरित् सरः प्रस्रवणोर् मिवायुना कल्हार कञ्जोत्पल रेणु हारिणा

न विद्यते यत्र वनौ कसाम् दवो निदाघ वह्न्यर्क भवोऽति शाद् वले

06 अगाध तो यह् रदि नीत टोर्मिभिः द्रवत् पुरीष्याः पुळिनैः समन्ततः

न यत्र चण्डाम्शु करावि षोल्बणा भुवो रसम् शाद् वलितम् च गृह्णते

07 वनम् कुसुमितम् श्रीमन् नदच् चित्र मृगद् विजम्

गायन् मयूर भ्रमरम् कूजत् कोकिल सारसम्

08 क्रीडिष्य माणस् तत् कृष्णो भगवान् बल सम्युतः

वेणुम् विरणयन् गोपैः गोधनैः सम् वृतो ऽविशत्

09 प्रवाल बर्हस् तबक स्रग्धातु कृत भूषणाः

राम कृष्णा दयो गोपा ननृतुर् युयुधुर् जगुः

10 कृष्णस्य नृत्य तः केचित् जगुः केचिद् अवादयन्

वेणु पाणि तलैः शृङ्गैः प्रशशम् सुर थापरे

11 गोपजाति प्रतिच् छन्नौ देवा गोपाल रूपिणः

ईडिरे कृष्ण रामौ च नटा इव नटम् नृप

12 भ्रमणैर् लङ्घनैः क्षेपैः आस्फोटन विकर् षणैः

चिक्रीडतुर् नियुद् धेन काक पक्ष धरौ क्वचित्

13 क्वचिन् नृत्यत् सु चान् येषु गायकौ वाद कौ स्वयम्

शशम् सतुर् महा राज साधु साध्विति वादिनौ

14 क्वचिद् बिल्वैः क्वचित् कुम्भैः क्वचामल कमुष्टिभिः

अस्पृश्य नेत्र बन्धाद् यैः क्वचिन् मृग खगेहया

15 क्वचिच् च दर्दुर प्लावैः विविधैः उपहास कैः

कदाचित् स्पन्दो लिकया कर्हिचिन् नृप चेष्टया

16 एवम् तौ लोक सिद्धाभिः क्रीडाभिश् चेर तुर्वने

नद् यद्रि द्रोणि कुञ्जेषु काननेषु सरः सु च

17 पशूम्श् चारयतोर् गोपैः तद् वने राम कृष्णयोः

गोप रूपी प्रलम्बो ऽगाद् असुरस् तज् जिहीर्षया

18 तम् विद्वान् अपि दाशार्हो भगवान् सर्व दर्शनः

अन्व मोद त तत् सख्यम् वधम् तस्य विचिन् तयन्

19 तत् रोपा हूय गोपालान् कृष्णः प्राह विहार वित्

हे गोपा विहरिष् यामो द्वन्द्वी भूय यथा यथम्

20 तत्र चक्रुः परि वृढौ गोपा राम जनार्दनौ

कृष्ण सङ्घट् टिनः केचिद् आसन् रामस्य चापरे

21 आचेरुर् विविधाः क्रीडा वाह्य वाह क लक्षणाः

यत् रारोहन्ति जेतारो वहन्ति च पराजिताः

22 वहन्तो वाह्य मानाश् च चारयन् तश् च गोधनम्

भाण्डीरकम् नाम वटम् जग्मुः कृष्ण पुरोगमाः

23 राम सङ्घट्टिनो यर्हि श्रीदाम वृषभा दयः

क्रीडायाम् जयिनस् ताम्स्तान् ऊहुः कृष्णा दयो नृप

24 उवाह कृष्णो भगवान् श्रीदामानम् पराजितः

वृषभम् भद्र सेनस्तु प्रलम्बो रोहिणी सुतम्

25 अविषह्यम् मन्य मानः कृष्णम् दानव पुङ्गवः

वहन् द्रुत तरम् प्रागाद् अवरोहण तः परम्

26 तम् उद्वहन् धरणि धरेन्द्र गौरवम्

महासुरो विग तरयो निजम् वपुः

स आस्थितः पुरट परिच्छ दो बभौ

तडिद् द्युमान् उडु पतिवा डिवाम् बुदः

27 निरीक्ष्य तद्व पुरलम् अम्बरे चरत्

प्रदीप्त दृग् भ्रुकुटि तटो ग्रदम् ष्ट्रकम्

ज्वलच् छिखम् कटक किरीट कुण्डल

त्विषाद् भुतम् हलधर ईषद् अत्र सत्

28 अथागत स्मृतिर् अभयो रिपुम् बलो विहाय सार्थ मिव हरन्त मात्मनः

रुषा हनत् छिरसि दृढेन मुष्टिना सुराधिपो गिरि मिव वज्र रम्हसा

29 स आहतः सपदि विशीर्ण मस्तको मुखाद् वमन् रुधिरम् अपस्मृ तो ऽसुरः

महारवम् व्यसुर् अपतत् समीरयन् गिरिर् यथा मघ वत आयुधा हतः

30 दृष्ट्वा प्रलम्बम् निहतम् बलेन बल शालिना

गोपाः सुविस्मिता आसन् साधु साध् विति वादिनः

31 आशिषो ऽभि गृणन् तस्तम् प्रशशम् सुस् त दर्हणम्

प्रेत्या गतम् इवा लिङ्ग्य प्रेम विह्वल चेतसः

32 पापे प्रलम्बे निहते देवाः परम निर्वृताः

अभ्य वर्षन् बलम् माल्यैः शशम्सुः साधु साध् विति

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे पूर्वार्दे अष्टा दशो ऽध्याय ः||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्द: एकोन विम्शो ऽध्याय :

स्कन्द- *10:* अध्याय- *19*

*01* श्री शुक उवाच

क्रीडा सक्तेषु गोपेषु तद् गावो दूर चारिणी:

स्वैरम् चरन्त्यो विविशु: तृण लोभेन गह्वरम्

*02* अजा गावो महिष् यश् च निर् विशन्त्यो वनाद् वनम्

इषी काटवीम् निर्वि विशु: क्रन्दन्त्यो दाव तर्षि ता:

*03* ते ऽपश्यन्त: पशून् गोपा: कृष्ण रामा दयस् तदा

जातानु तापा न विदु: विचिन् वन्तो गवाम् गतिम्

*04* तृणै: तत् खुरदच् छिन्नै: गोष्प दैर् अङ्कि तैर् गवाम्

मार्गम् अन्वगम् अन्सर्वे नष्टा जीव्या विचेतस:

*05* मुञ्जा टव्याम् भ्रष्ट मार्गम् क्रन्द मानम् स्व गोधनम्

सम्प्राप्य तृषिता: श्रान्ता: ततस्ते सन् न्यवर्त यन्

*06* ता आहूता भगवता मेघ गम्भीर या गिरा

स्व नाम्नाम् निनदम् श्रुत्वा प्रति नेदु: प्रहर् षिता:

*07* तत: समन्ताद् वनधूम केतु: यद्दच् छया भूत् क्षयकृद् वनौ कसाम्

समीरित: सारथि नोल्ब णोल्मुकै: विलेलि हान: स्थिर जङ्ग मान् महान्

*08* तम् आपतन्तम् परितो दवाग्निम् गोपाश् च गाव: प्रस मीक्ष्य भीता:

ऊचुश् च कृष्णम् सबलम् प्रपन्ना यथा हरिम् मृत्यु भयार्दि ता जना:

*09* कृष्ण कृष्ण महा वीर हे रामा मिद विक्रम

दाव् आग्निना दह्य मानान् प्रपन्नाम् स्त्रातु मर्हथ:

*10* नूनम् त्वद् बान्धवा: कृष्ण न चार्हन्त् यवसी दितुम्

वयम् हि सर्व धर्मज्ञ त्वन् नाथा स्त्वत् परायणा:

*11* श्री शुक उवाच

वचो निशम्य कृपणम् बन्धूनाम् भगवान् हरि:

निमील यत मा भैष्ट लोचना नीत्य भाषत

12 तथेति मीलिता क्षेषु भगवान् अग्नि मुल्बणम्

पीत्वा मुखेन तान् कृच्छ्राद् योगा धीशो व्यमोच यत्

13 ततश् च ते ऽक्षीण् युन्मील्य पुनर् भाण्डीर मापिता:

निशम्य विस्मिता आसन् आत्मानम् गाश् च मोचिता:

14 कृष्णस्य योग वीर्यम् तद् योग मायानु भावितम्

दावाग्नेर् आत्मन: क्षेमम् वीक्ष्य ते मे निरे ऽमरम्

15 गा: सन्नि वर्त्य सायाह्ने सह रामो जनार्दन:

वेणुम् विरणयन् गोष्ठम् अगाद् गोपैर् अभिष्टुत:

16 गोपीनाम् परम् आनन्द आसीद् गोविन्द दर्शने

क्षणम् युग शतम् इव यासाम् येन विना भवत्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे पूर्वार्दे एकोन विम्शो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्द: विम्शो ऽध्याय :

स्कन्द- 10: अध्याय- 20

01 श्री शुक उवाच

तयोस् तद् अद्भुतम् कर्म दावाग्ने: मोक्ष मात्मन:

गोपा: स्त्रीभ्य: समा चख्यु: प्रलम्ब वध मेव च

02 गोप वृद्धाश् च गोप्यश् च तदुपा कर्ण्य विस्मिता:

मेनिरे देव प्रवरौ कृष्ण रामौ व्रजम् गतौ

03 ततः प्रावर्त त प्रावृट् सर्व सत्त्व समुद् भवा

विद्योत मान परिधिः विस्फूर्जित नभस् तला

04 सान्द्र नीलाम् बुदैर् व्योम सविद् युत् स्तन यित्नुभिः

अस्पष्ट ज्योतिर् आच्छन्नम् ब्रह्मेव सगुणम् बभौ

05 अष्टौ मासान् इपीतम् यद् भूम्याश् चोद मयम् वसु

स्वगोभिर् मोक्तु मारेभे पर्जन्यः काल आगते

06 तडिद् वन्तो महा मेघाः चण्ड श्वसन वेपिताः

प्रीणनम् जीवनम् ह्यस्य मुमुचुः करुणा इव

07 तपः कृशा देव मीढा आसीद् वर्षी यसी मही

यथैव काम्य तपसः तनुः सम्प्राप्य तत् फलम्

08 निशा मुखेषु खद्यो ताः तमसा भान्ति न ग्रहाः

यथा पापे न पाखण्डा न हि वेदाः कलौ युगे

09 श्रुत्वा पर्जन्य निनदम् मण्डुकाः व्यसृजन् गिरः

तूष्णीम् शयानाः प्राग् यद् वद् ब्राह्मणा निय मात्यये

10 आसन् नुत्पथ वाहिन्यः क्षुद्र नद् योऽनु शुष् यतीः

पुम्सो यथा स्वतन्त् रस्य देह द्रविण सम्पदः

11 हरिता हरिभिः शष्पैः इन्द्र गोपैश् च लोहिता

उच्छि लीन्ध्र कृतच् छाया नृणाम् श्रीरिव भूर् अभूत्

12 क्षेत्राणि सस्य सम्पद्भिः कर्ष काणाम् मुदम् ददुः

धनिनाम् उपतापम् च दैवा धीनम् अजानताम्

13 जलस् थलौकसः सर्वे नव वारि निषेवया

अबिभ्रद् रुचिरम् रूपम् यथा हरि निषेवया

14 सरिद्भिः सङ्गतः सिन्धुः चुक्षोभे श्वस नोर्मिमान्

अपक्व योगिनश् चित्तम् कामाक्तम् गुण युग् यथा

15 गिरयो वर्ष धाराभिः हन्य माना न विव्यथुः

अभि भूय माना व्यसनैः यथा धोक्षज चेतसः

16 मार्गा बभूवुः सन्दिग्धाः तृणैश् छन्ना ह्यसम्स् कृताः

नाभ् यस्य मानाः श्रुतयो द्विजैः काल हता इव ः

17 लोकबन्धु षु मे घेषु विद्युतश् चलसौ हृदाः

स्थैर्यम् न चक्रुः कामिन्यः पुरु षेषु गुणिष् विव

18 धनुर् वियति माहेन्द्रम् निर्गुणम् च गुणिन्य भात्

व्यक्ते गुणव् यतिकरे ऽगुणवान् पुरुषो यथा

19 न र राजोडु पश् छन्नः स्वज् योत् स्नाराजि तैर् घनैः

अहम् मत्या भासितया स्वभासा पुरुषो यथा

20 मेघा ग मोत्सवा हृष्टाः प्रत्य नन्दञ् छिखण्डिनः

गृहेषु तप्त निर्विण्णा यथा अच्युत जनागमे

21 पीत्वा पः पाद पाः पद्भिः आसन् नानात्म मूर्तयः

प्राक्क्षा माः तपसा श्रान्ता यथा कामानु सेवया

22 सरः स्वशान्त रोधः सु न्यूषुर् अङ्गापि सारसाः

गृहेषु अशान्त कृत्येषु ग्राम्या इव दुरा शयाः

23 जलौघैः निरभिद् यन्त सेतवो वर्ष तीश् वरे

पाखण्डिनाम् असद् वादैः वेद मार्गाः कलौ यथा

24 व्यमुञ्चन् वायुभिर् नुन्ना भूतेभ्यो ऽथामृतम् घनाः

यथा शिषो विश्प तयः काले काले द्विजे रिताः

25 एवम् वनम् तद् वर्षिष्ठम् पक्व खर्जूर जम्बुमत्

गो गोपालैर् वृतो रन्तुम् सबलः प्राविशद् हरिः

26 धेनवो मन्द गामिन्य ऊधो भारेण भूयसा

ययुर् भगवता हूता द्रुतम् प्रीत्या स्नुतस् तनीः

27 वनौ कसः प्रमुदिता वन राजीर् मधुच् युतः

जलधारा गिरेर् नादान् आसन्ना ददृशे गुहाः

28 क्वचिद् वनस्पति क्रोडे गुहायाम् चाभि वर्षति

निर्विश्य भगवान् रेमे कन्द मूल फला शनः

29 दध् योदनम् समा नीतम् शिलायाम् सलिलान् तिके

सम्भोज नीय इर्बुभुजे गोपैः सङ्कर्षणान् वितः

30 शाद्व लोपरि सम्विश्य चर्वतो मीलि तेक्षणान्

तृप्तान् वृषान् वत्स तरान् गाश् च स्वोधो भर श्रमाः

31 प्रावृट् श्रियम् च ताम् वीक्ष्य सर्व बूद मुदा वहाम्

भगवान् पूजयाञ् चक्रे आत्म शक्त् युप बृम्हिताम्

32 एवम् निवसतोस् तस्मिन् राम केशव योर्व्रजे

शरत् समभवद् व्यभ्रा स्वच्छाम्बु अपरुषा निला

33 शरदा नीर जोत् पत्त्या नीराणि प्रकृतिम् ययुः

भ्रष्टाना मिव चेताम्सि पुनर् योग निषेवया

34 व्योम् नोऽब्दम् भूत शाबल्यम् भुवः पङ्कम् अपाम् मलम्

शरज् जहार् आश्रमिणाम् कृष्णे भक्तिर् यथा शुभम्

35 सर्वस्वम् जलदा हित्वा विरेजुः शुभ्र वर्चसः

यथा त्यक्तै षणाः शान्ता मुनयो मुक्त किल्बिषाः

36 गिरयो मुमुचु स्तोयम् क्वचिन् न मुमुचुः शिवम्

यथा ज्ञाना मृतम् काले ज्ञानिनो ददते न वा

37 नैवा विदन् क्षीय माणम् जलम् गाध जले चराः

यथायुः अन्वहम् क्षय्यम् नरा मूढाः कुटुम्बिनः

38 गाधवारि चरास् तापम् अविन्दञ् छरद् अर्कजम्

यथा दरिद्रः कृपणः कुटुम्बि अवि जितेन्द्रियः

39 शनैः शनैर् जहुः पङ्कम् स्थलान् यामम् च वीरुधः

यथा हम्म मताम् धीराः शरी रादिष् वनात् मसु

40 निश्चलाम्बुर् अभूत् तूष्णीम् समुद्रः शर दागमे

आत्मन् युपरते सम्यङ् मुनिर् व्युपर तागमः

41 केदारेभ् यस्त् वपो ऽगृह्णन् कर्षका दृढ सेतुभिः

यथा प्राणैः स्रवज् ज्ञानम् तन् निरोधे न योगिनः

42 शरद् अर्काम्शुजाम्स् तापान् भूतानाम् उडुपो ऽहरत्

देहाभि मानजम् बोधो मुकुन्दो व्रज योषिताम्

43 खम् अशोभत निर्मेघम् शरद् विमल तारकम्

सत्त्व युक्तम् यथा चित्तम् शब्द ब्रह्मार्थ दर्शनम्

44 अखण्ड मण्डलो व्योम्नि रराजोडु गणैः शशी

यथा यदु पतिः कृष्णो वृष्णि चक्रा वृतो भुवि

45 आश्लिष्य समशी तोष्णम् प्रसून वन मारुतम्

जनास् तापम् जहुर् गोप्यो न कृष्ण हृत चेतसः

46 गावो मृगाः खगा नार्यः पुष्पिण्यः शरदा भवन्

अन्वीय मानाः स्व वृषैः फलैरी शक्रिया इव

47 उद हृष्यन् वारिजानि सूर्योत् थाने कुमुद् विना

राज्ञा तु निर्भया लोका यथा दस्यून् विना नृप

48 पुरग्रामे ष्वा ग्रयणैः इन्द्रि यैश् च महोत्सवैः

बभौ भूः पक्व शष् याढ्या कलाभ्याम् नितराम् हरेः

49 वणिङ् मुनि नृपस् नाता निर्गम् यार्थान् प्रपेदिरे

वर्ष रुद्धा यथा सिद्धाः स्वपिण्डान् काल आगते

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे पूर्वार्दे विम्शो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्दः एक विम्शो ऽध्याय :

स्कन्द- 10: अध्याय- 21

01 श्री शुक उवाच

इत्थम् शरत् स्वच्छ जलम् पद्मा कर सुगन्धिना

न्यविशद् वायुना वातम् स गो गोपाल को ऽच्युत:

02 कुसुमित वन राजि शुष्मि भृङ्ग द्विज कुल घुष्ट सर: सरिन् महीध्रम्

मधु पति रव गाह्य चार यन्गा: सह पशु पाल बलश्चु कूज वेणुम्

03 तद् व्रज स्त्रिय आश्रुत्य वेणुगीतम् स्मरोदयम्

काश्चित् परोक्षम् कृष्णस्य स्वस खीभ्यो ऽन्व वर्णयन्

04 तद् वर्णयितु मारब्धा: स्मरन्त्य: कृष्ण चेष्टितम्

नाशकन् स्मर वेगेन विक्षिप्त मनसो नृप

05 बर्हा पीडम् नटवर वपु: कर्णयो: कर्णि कारम्

बिभ्रद् वास: कनक कपिशम् वैजयन्तीम् च मालाम्

रन्ध्रान् वेणोर् अधर सुधया पूरयन् गोप वृन्दै:

वृन्दा रण्यम् स्वपद रमणम् प्राविशद् गीत कीर्ति:

06 इति वेणुरवम् राजन् सर्व भूत मनोहरम्

श्रुत्वा व्रज स्त्रिय: सर्वा वर्ण यन्त्यो ऽभि रेभिरे

07 श्री गोप्य ऊचु:

अक्षण् वताम् फल मिदम् न परम् विदाम:

सख्य: पशूननु विवेश यतोर् वयस्यै:

वक्त्रम् व्रजेश सुतयोर् अनुवेणु जुष्टम्

यैर्वा निपीत मनु रक्त कटाक्ष मोक्षम्

08 चूत प्रवाल बर्हस् तब कोत्प लाब्ज मालानु पृक्त परिधान विचित्र वेशौ

मध्ये विरेज तुरलम् पशु पाल गोष्ठ्याम् रङ्गे यथा नटवरौ क्वच गाय मानौ

09 गोप्य: किमाच रदयम् कुशलम् स्म वेणु:

दामोदरा धर सुधाम् अपि गोपि कानाम्

भुङ्क्ते स्वयम् यद् अवशिष्ट रसम् ह्रदिन्यो

हृष्यत् त्वचो ऽश्रु मुमुचु: तरवो यथार्य:

10 वृन्दा वनम् सखि भुवो वितनोति कीर्तिम्
यद् देवकी सुत पदाम्बुज लब्ध लक्ष्मि
गोविन्द वेणुम् अनु मत्त मयूर नृत्यम्
प्रेक्ष्याद्रि सान्व परतान्य समस्त सत्त्वम्

11 धन्याः स्म मूढ मतयो ऽपि हरिण्य एता
या नन्द नन्द न मुपात्त विचित्र वेशम्
आकर्ण्य वेणुर् अणितम् सह कृष्ण साराः
पूजाम् दधुर् विरचिताम् प्रणयाव लोकैः

12 कृष्णम् निरीक्ष्य वनि तोत्सव रूप शीलम्
श्रुत्वा च तत् क्वणित वेणु विचित्र गीतम्
देव्यो विमान गतयः स्मर नुन्न सारा
भ्रश्यत् प्रसून कबरा मुमुहुर् विनीव्यः

13 गावश् च कृष्ण मुख निर्गत वेणु गीत
पीयूष मुत्त भित कर्ण पुटैः पिबन्त्यः
शावाः स्नुतस् तन पयः कवलाः स्म तस्थुः
गोविन्द मात्मनि दृशाश्रु कलाः स्पृशन्त्यः

14 प्रायो बताम्ब विहगा मुनयो वने ऽस्मिन्
कृष्णेक्षि तम् तदु दितम् कल वेणु गीतम्
आरुह्य ये द्रुम भुजान् रुचिर प्रवालान्
शृण्वन्त्य मीलि त दृशो विगतान्य वाचः

15 नद्यस् तदा तद् उपधार्य मुकुन्द गीतम्
आवर्त लक्षित मनो भव भग्न वेगाः
आलिङ्गनस् थगित मूर्मि भुजैर् मुरारेः
गृह्णन्ति पाद युगलम् कमलोप हाराः

16 दृष्ट्वा तपे व्रज पशून् सह राम गोपैः
सञ्चार यन्तम् अनु वेणु मुदीर यन्तम्

प्रेम प्रवृद्ध उदित: कुसुमा वलीभि:

सख्युर् व्यधात् स्व वपुषाम् बुद आत पत्रम्

17 पूर्णा: पुलिन्द्य उरुगाय पदाब्ज राग

श्री कुङ्कुमेन दयिता स्तन मण्डि तेन

तद् दर्शन स्मर रुजस् तृण रूषि तेन

लिम्पन्त्य आनन कुचेषु जहुस् तदाधिम्

18 हन्ताय मद्रि रबला हरि दास वर्यो

यद् राम कृष्ण चरण स्पर्श प्रमोद:

मानम् तनोति सह गोगणयोस् तयोर् यत्

पानीय सूय वस कन्दर कन्द मूलै:

19 गा गोपकैर् अनुवनम् नय तोरु दार

वेणुस् वनै: कलपदैस् तनु भृत्सु सख्य:

अस्पन्दनम् गति मताम् पुलकस् तरुणाम्

निर्योग पाश कृत लक्षण योर् विचित्रम्

20 एवम् विधा भगवतो या वृन्दा वन चारिण:

वर्ण यन्त्यो मिथो गोप्य: क्रीडास् तन्मय ताम् ययु:

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे पूर्वार्दे एक विम्शो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्द: द्वा विम्शो ऽध्याय :

स्कन्द- 10: अध्याय- 22

01 श्री शुक उवाच

हेमन्ते प्रथमे मासि नन्द व्रज कुमारिका:

चेरुर् हविष्यम् भुञ्जाना: कात्यायन् यर्चन व्रतम्

02 आप्लुत्याम् भसि काळिन्द्या जलान्ते चोदिते ऽरुणे

कृत्वा प्रति कृतिम् देवीम् आनर्चुर् नृप सैकतीम्

03 गन्धैर् माल्यै: सुरभिभि: बलिभिर् धूप दीपकै:

उच्चाव चैश् चोप हारै: प्रवाल फल तण्डुलै:

04 कात्यायनि महा माये महा योगिन्य धीश्वरि

नन्दगोप सुतम् देवि पतिम् मे कुरु ते नम:

इति मन्त्रम् जपन्त्यस् ता: पूजाम् चक्रु: कुमारिका:

05 एवम् मासम् व्रतम् चेरु: कुमार्य: कृष्ण चेतस:

भद्र काळीम् समानर्चु: भूयान् नन्द सुत: पति:

06 उषस् युत्थाय गोत्रै: स्वै: अन्योन्या बद्ध बाहव:

कृष्णम् उच्चैर् जगुर् यान्त्य: काळिन्द् याम् स्नातु मन्वहम्

07 नद्याम् कदाचिद् आगत्य तीरे निक्षिप्य पूर्ववत्

वासाम्सि कृष्णम् गायन्त्यो विजह्रु: सलिले मुदा

08 भगवाम्स् तद् अभिप्रेत्य कृष्णो योगेश् वरेश् वर:

वयस्यै रावृतस् तत्र गत: तत् कर्म सिद्धये

09 तासाम् वासाम् स्युपा दाय नीप मारुह्य सत् वर:

हसद्भि: प्रहसन् बालै: परिहासम् उवाच ह

10 अत्रा गत्या बला: कामम् स्वम् स्वम् वास: प्रगृह् यताम्

सत्यम् ब्रवाणि नो नर्म यद् यूयम् व्रत कर्शिता:

11 न मयो दित पूर्वम् वा अनृतम् त दिमे विदु:

एकैकश: प्रतीच् छध्वम् सहै वोत सुमध्यमा:

12 तस्य तत् क्ष्वेलि तम् दृष्ट्वा गोप्य: प्रेम परिप् लुता:

व्रीडिता: प्रेक्ष्य चान् योन्यम् जातहा सा न निर्ययु:

13 एवम् ब्रुवति गोविन्दे नर्मणा क्षिप्त चेतसः

आकण्ठ मग्नाः शीतोदे वेप मानास् तम् अब्रुवन्

14 मानयम् भोः कृथास् त्वाम् तु नन्द गोप सुतम् प्रियम्

जानी मोऽङ्ग व्रज श्लाघ्यम् देहि वासाम्सि वेपिताः

15 श्याम सुन्दर ते दास्यः कर वाम तवो दितम्

देहि वासाम्सि धर्मज्ञ नो चेद् राज्ञे ब्रुवाम हे

16 श्री भगवान् उवाच

भवत्यो यदि मे दास्यो मयोक्तम् वा करिष् यथ

अत्रा गत्य स्ववा साम्सि प्रतीच् छन्तु शुचिस् मिताः

17 ततो जला शयात् सर्वा दारिकाः शीत वेपिताः

पाणिभ् याम् योनिमाच् छाद्य प्रोत् तेरुः शीत कर्शिताः

18 भगवान् आहता वीक्ष्य शुद्ध भाव प्रसादितः

स्कन्धे निधाय वासाम्सि प्रीतः प्रोवाच सस्मितम्

19 यूयम् विवस्त्रा यद् अपो धृत व्रता व्यगाह तैतत् तदु देव हेलनम्

बद् ध्वाञ्जलिम् मूर्ध् न्यप नुत्त येऽम्हसः कृत्वा नमोऽधो वसनम् प्रगृह् यताम्

20 इत् यच्युते नाभि हिता व्रजा बला मत्वा विवस्त्रा प्लवनम् व्रत् अच्युतिम्

तत् पूर्ति कामाः तद् अशेष कर्मणाम् साक्षात् कृतम् नेमुर् अवद्य मृग्यतः

21 तास् तथा वन ता दृष्ट्वा भगवान् देवकी सुतः

वासाम्सि ताभ्यः प्रायच् छत् करुणस् तेन तोषितः

22 दृढम् प्रलब्धास् त्रपया च हापिताः

प्रस्तोभि ताः क्रीडन वच्च कारिताः

वस्त्राणि चैवाप हृतान् यथाप् यमुम्

ता नाभ्य सूयन् प्रिय सङ्ग निर्वृताः

23 परिधाय स्व वासाम्सि प्रेष्ठ सङ्गम सज्जिताः

गृहीत चित्ता नो चेलुः तस्मिन् लज्जायि तेक्षणाः

24 तासाम् विज्ञाय भगवान् स्व पाद स्पर्श काम्यया

धृत व्रतानाम् सङ्कल्पम् आह दामोदरो ऽबला:

25 सङ्कल्पो विदित: साध्व्यो भव तीनाम् मद् अर्चनम्

मयानु मोदित: सोऽसौ सत्यो भवितु मर्हति

26 न मय्या वेशि तधियाम् काम: कामाय कल्पते

32 शङ्ख चूडम् निहत् यैवम् मणि मादाय भास् वरम्

अग्र जायाद दात् प्रीत्या पश्यन्ती नाम् च योषिताम्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे पूर्वार्दे चतुस् त्रिम्शो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्दः पञ्च त्रिम्शो ऽध्याय :

स्कन्द- 10: अध्याय- 35

01 श्री शुक उवाच

गोप्यः कृष्णे वनम् याते तम् अनुद्रुत चेतसः

कृष्ण लीलाः प्रगा यन्त्यो निन्युर् दुः खेन वासरान्

02 श्री गोप्य ऊचुः

वाम बाहु कृत वाम कपोलो वल्गि तभ्रु रध रार्पित वेणुम्

कोमळाङ्गु लिभि राश्रित मार्गम् गोप्य ईरयति यत्र मुकुन्दः

03 व्योम यान वनिताः सह सिद्धैर् विस्मितास् तदुप धार्य सलज्जाः

काम मार्गण समर्पित चित्ताः कश्मलम् ययुर् अपस्मृत नीव्यः

04 हन्त चित्रम् अबलाः शृणु तेदम् हार हास उरसि स्थिर विद्युत्

नन्द सूनु रय मार्तज नानाम् नर्मदो यर्हि कूजित वेणुः

05 वृन्दशो व्रज वृषा मृग गावो वेणु वाद्य हृत चेतस आरात्

दन्त दष्ट कवला धृत कर्णा निद्रि ता लिखित चित्र मिवासन्

06 बर्हिणस् तब कधातुप लाशैः बद्ध मल्ल परि बर्ह विडम्बः

कर्हिचित् सबल आलि स गोपैर् गाः समाह् व यति यत्र मुकुन्दः

07 तर्हि भग्न गत यः सरितो वै तत् पदाम् बुजर जो ऽनिल नीतम्

स्पृह यतीर् वयमि वा बहु पुण्याः प्रेम वेपि तभु जाः स्तिमि तापः

08 अनुचरैः समनु वर्णित वीर्य आदि पूरुष इवाचल भूतिः

वनचरो गिरित टेषु चरन्तीर् वेणु नाह् वयति गाः स य दा हि

09 वनल तास् तरव आत्मनि विष्णुम् व्यञ्ज यन्त्य इव पुष्प फलाढ्याः

प्रणत भार विट पा मधु धाराः प्रेम हृष्ट तन व स सृजुः स्म

10 दर्शनी यतिल को वन माला दिव्य गन्ध तुळसी मधु मत्तैः

अलिकुलैर् अलघु गीतम् अभीष्टम् आद्रि यन् यर्हि सन्धित वेणुः

11 सरसि सारस हम्स विहङ्गाश् चारु गीत हृत चेतस एत्य

हरि मुपासत ते यत चित्ता हन्त मीलित दृशो धृत मौनाः

12 सह बलः स्रगव तम् सवि लासः सानुषु क्षितिभृ तो व्रज देव्यः

हर्षयन् यर्हि वेणुर वेण जात हर्ष उप रम्भति विश्वम्

13 महद तिक्रमण शङ्कित चेता मन्द मन्द मनु गर्जति मेघः

सुहृद मभ्य वर्षत् सुमनोभिः छायया च विद धत् प्रत पत्रम्

14 विविध गोप चरणेषु विदग् धो वेणु वाद्य उरुधा निज शिक्षाः

तव सुतः सति यदा धर बिम्बे दत्त वेणु रन यत् स्वर जातीः

15 सवन शस्त दुप धार्य सुरेशाः शक्र शर्व परमेष्ठि पुरोगाः

कवय आनत कन्धर चित्ताः कश्मलम् ययुर् अनिश्चित तत्त्वाः

16 निज पदाब्ज दलैर् ध्वज वज्र नीर जाङ्कुशवि चित्र ललामैः

व्रज भुवः शमयन् खुर तोदम् वर्ष्म धुर्य गति रीडित वेणुः

17 व्रजति तेन वयम् सवि लास वीक्षण् आर्पित मनो भव वेगाः

कुज गतिम् गमिता न विदामः कश्मलेन कवरम् वसनम् वा

18 मणिधरः क्वचिद् आगण यन्गा मालया दयित गन्ध तुळस्याः

प्रणयिनो ऽनुचरस् य कदाम्से प्रक्षि पन्भुज म गायत यत्र

19 क्वणित वेणु रव वञ्चित चित्ताः कृष्ण मन् वसत कृष्ण गृहिण्यः

गुण गणार्ण मनु गत्य हरिण्यो गोपिका इव विमुक्त गृहाशाः

20 कुन्द दाम कृत कौतुक वेषो गोप गो धन वृतो यमुना याम्

नन्द सूनुर् अन घे तव वत्सो नर्मदः प्रणयि णाम् विज हार

21 मन्द वायुर् उप वात् यनुकूलम् मानयन् मलय जस् पर्शेन

वन्दि नस्तम् उपदेव गणा ये वाद्य गीत बलि भिः परि वव्रुः

22 वत्सलो व्रज गवाम् यद् अगध्रो वन्द्य मान चरणः पथि वृद्धैः

कृत्स्न गो धनमु पोह्य दिनान्ते गीत वेणुर् अनु गेडित कीर्तिः

23 उत्सवम् श्रमरु चापि दृशीनाम् उन्नयन् खुरर जश् छुरि तस्रक्

दित् सयैति सुहृद् आसिष एष देवकी जठर भूरुड् राजः

24 मदवि घूर्णित लोचन ईषन् मानद: स्व सुहृदाम् वन माली

बदर पाण्डु वदनो मृदु गण्डम् मण्डयन् कनक कुण्डल लक्ष्म्या

25 यदु पतिर् द्विरद राज विहारो यामिनी पतिरि वैष दि नान्ते

मुदि तवक्त्र उपयाति दुरन्तम् मोचयन् व्रजग वाम् दिन तापम्

26 श्री शुक उवाच

एवम् व्रज स्त्रियो राजन् कृष्ण लीलानु गायती:

रेमिरे ऽह: सु तच् चित्ता: तन् मनस्का महोदया:

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे पूर्वार्दे पञ्च त्रिम्शो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्द: षड् त्रिम्शो ऽध्याय :

स्कन्द- 10: अध्याय- 36

01 श्री शुक उवाच

अथ तर्ह्याग तो गोष्ठम् अरिष्टो वृषभा सुर:

महीम् महा ककुत् काय: कम्पयन् खुर विक्षताम्

02 रम्भ माण: खरतरम् पदा च विलिखन् महीम्

उद्यम्य पुच्छम् वप्राणि विषाणा ग्रेण चोद् धरन्

किञ्चित् किञ्चिच् छकृन् मुञ्चन् मूत्रयन् स्तब्ध लोचन:

03 यस्य निर्ह्रादि तेनाङ्ग निष्ठुरेण गवाम् नृणाम्

पतन्त्य कालतो गर्भा: स्रवन्ति स्म भयेन वै

04 निर् विशन्ति घना यस्य ककुद्य चल शङ्कया

तम् तीक्ष्ण शृङ्ग मुद् वीक्ष्य गोप्यो गोपाश् च तत् रसु:

05 पशवो दुद्रुवुर् भीता राजन् सन्त् यज्य गोकुलम्

कृष्ण कृष्णेति ते सर्वे गोविन्दम् शरणम् ययु:

06 भगवान् अपि तद् वीक्ष्य गोकुलम् भय विद्रुतम्

मा भैष्टेति गिराश् वास्य वृषा सुर मुपाह् वयत्

07 गोपालै: पशुभिर् मन्द त्रासितै: किम् असत्तमा

बल दर्पहाहम् दुष्टानाम् त्वद् विधानाम् दुरात्मनाम्

08 इत् यास्फोट् याच्युतो ऽरिष्टम् तल शब्देन कोपयन्

सख्युरम्से भुजा भोगम् प्रसार्या वस्थितो हरि:

09 सो ऽप्येवम् कोपितो ऽरिष्ट: खुरेणा वनि मुल्लिखन्

उद् यत् पुच्छ भ्रमन् मेघ: क्रुद्ध: कृष्णम् उपाद्र वत्

10 अग्रन् यस्त विषाणाग्र: स्तब्धास् ऋग् लोचनो ऽच्युतम्

कटाक् षिप्या द्रवत् तूर्णम् इन्द्र मुक्तो ऽशनिर् यथा

11 गृहीत्वा शृङ्गयोस् तम् वा अष्टा दश पदानि स:

प्रत्य पोवाह भगवान् गज: प्रतिगजम् यथा

12 सो ऽपविद्धो भगवता पुनर् उत्थाय सत्वर:

आपतत् स्विन्न सर्वाङ्गो नि: श्वसन् क्रोध मूर्च्छित:

13 तमा पतन्तम् स निगृह्य शृङ्गयो: पदा समाक्रम्य निपात्य भूतले

निष्पीडया मास यथार् द्रमम् बरम् कृत्वा विषाणेन जघान सो ऽपतत्

14 असृग् वमन् मूत्र शकृत् समुत् सृजन् क्षिपम्श् च पादानन वस्थि तेक्षण:

जगाम कृच्छ्रम् निरृतेर थ क्षयम् पुष्पै: किरन्तो हरि मीडिरे सुरा:

15 एवम् ककुद् मिनम् हत्वा स्तूय मान: स्व जातिभि:

विवेश गोष्ठम् सबलो गोपीनाम् नयनोत्सव:

16 अरिष्टे निहते दैत्ये कृष्णेन् आद्भुत कर्मणा

कम्सा याथाह भगवान् नारदो देव दर्शन:

17 यशोदाया: सुताम् कन्याम् देवक्या: कृष्णम् एव च

रामम् च रोहिणी पुत्रम् वसुदेवेन बिभ् यता
न्यस्तौ स्वमित्रे नन्दे वै याभ्याम् ते पुरुषा हता꞉

18 निशम्य तद् भोज पति꞉ कोपात् प्रचलि तेन्द्रिय꞉
निशातम् असि मादत्त वसुदेव जिघाम् सयाम्

19 निवारितो नारदेन तत् सुतौ मृत्यु मात्मन꞉
ज्ञात्वा लोह मयै꞉ पाशै꞉ बबन्ध सह भार्यया

20 प्रति याते तु देवर्षौ कम्स आभाष्य केशिनम्
प्रेषया मास हन् येताम् भवता राम केशवौ

21 ततो मुष्टिक चाणूर शलतो शल कादिकान्
अमात्यान् हस्ति पाम्श् चैव समा हूयाह भोजराट्

22 भो भो निशम्य ताम् एतद् वीर चाणूर मुष्टिकौ
नन्द व्रजे किला साते सुतौ आनक दुन्दुभे꞉

23 राम कृष्णौ ततो मह्यम् मृत्यु꞉ किल निदर्शित꞉
भवद् भ्यामिह सम्प्राप्तौ हन्ये ताम् मल्ल लीलया

24 मञ्चा꞉ क्रियन्ताम् विविधा मल्लर् अङ्ग परिश् रिता꞉
पौरा जान पदा꞉ सर्वे पश्यन्तु स्वैरसम् युगम्

25 महा मात्र त्वया भद्र रङ्ग द्वार् युप नीयताम्
द्विप꞉ कुवलया पीडो जहि तेन ममाहितौ

26 आरभ्य ताम् धनुर् याग꞉ चतुर् दश्याम् यथा विधि
विश सन्तु पशून् मेध्यान् भूत राजाय मीढुषे

27 इत्या ज्ञाप् यार्थ तन्त्रज्ञ आहूय यदु पुङ्गवम्
गृहीत्वा पाणिना पाणिम् ततो ऽक्रूरम् उवाच ह

28 भो भो दान पते मह्यम् क्रियताम् मैत्र माद्दत꞉
नान्यस् त्वत्तो हित तमो विद्यते भोज वृष्णिषु

29 अतस् त्वाम् आश्रि त꞉ सौम्य कार्य गौरव साधनम्
यथेन्द्रो विष्णुम् आश्रित्य स्वार्थम् अध्यग मद् विभु꞉

30 गच्छ नन्द व्रजम् तत्र सुतौ आनक दुन्दुभेः

आसाते ता विहानेन रथे नानय मा चिरम्

31 निसृष्टः किल मे मृत्युः देवैर् वैकुण्ठ सम्श्रयैः

तावा नय समम् गोपैः नन्दाद् यैः साभ् युपा यनैः

32 घात यिष्य इहा नीतौ काल कल्पेन हस्तिना

यदि मुक्तौ ततो मल्लैः घातये वैद्यु तोपमैः

33 तयोर् निह तयोस् तप्तान् वसुदेव पुरोगमान्

तद् बन्धून् निह निष्यामि वृष्णि भोज दशार् हकान्

34 उग्रसेनम् च पितरम् स्थविरम् राज्य कामुकम्

तद् भ्रातरम् देव कम् च ये चान्ये विद् विषो मम

35 ततश् चैषा मही मित्र

भवित्री नष्ट कण्टका

36 जरासन्धो मम गुरुः द्विविदो दयितः सखा

शम्बरो नरको बाणो मय् येव कृतसौ हृदाः

तैरहम् सुर पक्षीयान् हत्वा भोक्ष्ये महीम् नृपान्

37 एतज् ज्ञात्वान य क्षिप्रम् राम कृष्णा विहार् भकौ

धनुर् मख निरी क्षार्थम् द्रष्टुम् यदु पुर श्रियम्

38 श्री अक्रूर उवाच

राजन् मनीषितम् सध्र्यक् तव स्वा वद्य मार्जनम्

सिद्ध्य सिद्ध्योः समम् कुर्याद् दैवम् हि फल साधनम्

39 मनोरथान् करोत् युच्चैः जनो दैव हतान् अपि

युज्यते हर्ष शोकाभ्याम् तथाप् याज्ञाम् करोमि ते

40 श्री शुक उवाच

एवम् आदिश्य चाक्रूरम् मन्त्रिणश् च विषृज्य सः

प्रविवेश गृहम् कम्सः तथा अक्रूरः स्वमालयम्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे पूर्वार्दे षड् त्रिम्शो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्द: सप्त त्रिम्शो ऽध्याय :

स्कन्द- 10: अध्याय- 37

01 श्री शुक उवाच

केशी तु कम्स प्रहित: खुरैर् महीम्

महा हयो निर्जरयन् मनो जव:

सटाव धूता भ्र विमान सङ्कुलम्

कुर्वन् नभो हेषित भीषित् आखिल:

विशाल नेत्रो विकटास्य कोटरो बृहद् गलो नील महाम्बु दोपम

दुराशय: कम्स हितम् चिकीर्षू: व्रजम् स नन्दस्य जगाम कम्पयन्

02 तम् त्रासयन्तम् भगवान् स्व गोकुलम्

तद् हेषितैर् वाल विघूर्णि ताम् बुदम्

आत्मान माजौ मृग यन्तम् अग्रणी:

उपाह् वयत् सव्य नदन् मृगेन्द्र वत्

03 स तम् निशाम् याभि मुखो मुखेन खम्

पिबन्निवाभ् यद्रव दत्य मर्षण:

जघान पद्भ्याम् अरविन्द लोचनम्

दुरासदश् चण्ड जवो दुरत् यय:

04 तद् वञ्च यित्वा तम् अधोक्ष जो रुषा प्रगृह्य दोर्भ्याम् परि विध्य पादयो:

सावज्ञ मुत्सृज्य धनु: शतान् तरे यथो रगम् ताक्ष्र्य सुतो व्यवस् थित:

05 स: लब्ध सम्ज्ञ: पुनर् उत्थि तो रुषा

व्यादाय केशी तर साप तद् हरिम्

सो ऽप्यस्य वक्त्रे भुजम् उत्तरम् स्मयन्

प्रवेश यामास यथो रगम् बिले

06 दन्ता नि पेतु: भगवद् भुजस् पृशस्

ते केशिनस् तप्त मयस् पृशो यथा

बाहुश् च तद् देह गतो महात् मनो

यथा मय: सम् ववृधे उपेक्षित:

07 समेध मानेन स कृष्ण बाहुना निरुद्ध वायु: चरणाम्श् च विक्षिपन्

प्रस् विन्न गात्र: परिवृत्त लोचन: पपात लेण्डम् विसृजन् क्षितौ व्यसु:

08 तद् देहत: कर् कटिकाफ लोपमाद् व्यसोर् अपा कृष्य भुजम् महा भुज:

अविस् मितो ऽयत्न हतारि रुत्स्मयै: प्रसून वर्षै: दिविषद् भिरीडित:

09 देवर्षि: उप सङ्गम्य भागवत प्रवरो नृप

कृष्णम् अक्लिष्ट कर्माणम् रहस् ये तद् अभाषत

10 कृष्ण कृष्ण् आप्रमे यात्मन् योगेश जगद् ईश्वर

वासुदेव् आखिला वास सात्वताम् प्रवर प्रभो

11 त्वम् आत्मा सर्व भूतानाम् एको ज्योति रिवै धसाम्

गूढो गुहाश य: साक्षी महा पुरुष ईश्वर:

12 आत्मन् आत्माश्रय: पूर्वम् मायया ससृजे गुणान्

तैरिदम् सत्य सङ्कल्प: सृजस् यत् स्यवस् ईश्वर:

13 स त्वम् भूधर भूतानाम् दैत्य प्रमथ रक्षसाम्

अवतीर्णो विनाशाय सेतूनाम् रक्षणाय च

14 दिष्ट्या ते निहतो दैत्यो लील यायम् हया कृति:

यस्य हेषित सन्त्रस् ता: त्यजन्ति अनिमिषा दिवम्

15 चाणूरम् मुष्टिकम् चैव मल्लान् अन्याम्श् च हस्तिनम्

कम्सम् च निहतम् द्रक्ष्ये परश् वो ऽहनि ते विभो

16 तस्यानु शङ्ख यवन मुराणाम् नरकस् य च

पारि जाताप हरणम् इन्द्रस्य च पराजयम्

17 उद्वाहम् वीर कन्यानाम् वीर्य शुल्कादि लक्षणम्

नृगस्य मोक्षणम् शापाद् द्वार कायाम् जगत् पते

18 स्यमन्त कस्य च मणेः आदानम् सह भार्यया

मृत पुत्र प्रदानम् च ब्राह्मणस्य स्वधा मतः

19 पौण्ड्र कस्य वधम् पश्चात् काशि पुर् याश् च दीपनम्

दन्त वक्रस्य निधनम् चैद् यस्य च महा क्रतौ

20 यानि चान्यानि वीर्याणि द्वारकाम् आवसन् भवान्

कर्ता द्रक्ष्याम्य हम् तानि गेयानि कविभिर् भुवि

21 अथ ते काल रूपस्य क्षप यिष्णोर् अमुष्य वै

अक्षौहिणी नाम् निधनम् द्रक्ष्याम् यर्जुन सारथेः

22 विशुद्ध विज्ञान घनम् स्वसम्स् थया

समाप्त सर्वार्थम् अमोघ वाञ्छितम्

स्वतेज सा नित्य निवृत्त माया

गुण प्रवाहम् भगवन्तम् ईमहि

23 त्वाम् ईश्वरम् स्वाश्रयम् आत्म मायया विनिर् मिताशेष विशेष कल्पनम्

क्रीडार्थम् अद्यात्तम् अनुष्य विग्रहम् नतोऽस्मि धुर्यम् य दुवृष्णि सात् वताम्

24 श्री शुक उवाच

एवम् यदु पतिम् कृष्णम् भागवत प्रवरो मुनिः

प्रणि पत्याभ् यनु ज्ञातो ययौ तद् दर्श नोत्सवः

25 भगवान् अपि गोविन्दो हत्वा केशिन माहवे

पशून् अपालयत् पालैः प्रीतैर् व्रज सुखा वहः

26 एकदा ते पशून् पालाः चार यन्तो ऽद्रिसानुषु

चक्रुर् निलाय नक्रीडाः चोर पाला पदेशतः

27 तत्रा सन्कति चिच् चोराः पालाश् च कति चिन्नृप

मेषा यिताश् च तत्रैके विजह्रु: अकु तोभया:

28 मय पुत्रो महा मायो व्योमो गोपाल वेष धृक्

मेषा यितान् अपोवाह प्रायश्चोर् आयितो बहून्

29 गिरिदर्याम् विनिक्षिप्य नीतम् नीतम् महासुर:

शिलया पिदधे द्वारम् चतु: पञ्चाव शेषिता:

30 तस्य तत् कर्म विज्ञाय कृष्ण: शरण द: सताम्

गोपान् नयन्तम् जग्राह वृकम् हरि रिवौजसा

31 स निजम् रूपम् आस्थाय गिरीन्द्र सदृशम् बली

इच्छन् विमोक्तुम् आत्मानम् नाशक्नोद् ग्रहणा तुर:

32 तम् निगृह् याच्युतो दोर्भ्याम् पात यित्वा मही तले

पश्यताम् दिवि देवानाम् पशुमारम् अमारयत्

33 गुहापि धानम् निर्भिद्य गोपान् नि: सार्य कृच् छ्रत:

स्तूय मान: सुरैर् गोपै: प्रविवेश स्व गोकुलम्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे पूर्वार्दे सप्त त्रिम्शो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्द: अष्टा त्रिम्शो ऽध्याय :

स्कन्द- 10: अध्याय- 38

01 श्री शुक उवाच

अक्रूरो ऽपि च ताम् रात्रिम् मधु पुर्याम् महा मति:

उषित्वा रथ मास्थाय प्रययौ नन्द गोकुलम्

02 गच्छन् पथि महा भागो भगवत् यम्बु जेक्षणे

भक्तिम् पराम् उपगत एव मेतद चिन्त यत्

03 किम् मया आचरितम् भद्रम् किम् तप्तम् परमम् तपः

किम् वाथाप् यर्हते दत्तम् यद् द्रक्ष्याम् यद्य केशवम्

04 ममै तद् दुर्लभम् मन्य उत्तमः श्लोक दर्शनम्

विषयात् मनो यथा ब्रह्म कीर्तनम् शूद्र जन्मनः

05 मैवम् ममा धमस् यापि स्या देव् आच्युत दर्शनम्

ह्रियमाणः काल नद्या क्वचित् तरति कश्चन

06 ममाद्या मङ्गळम् नष्टम् फलवाम्श् चैव मे भवः

यन् नमस्ये भगवतो योगिध्ये यान्घ्रि पङ्कजम्

07 कम्सो बताद्या कृत मेऽत् यनुग्रहम् द्रक्ष्ये ऽङ्घ्रि पद्मम् प्रहितो ऽमुना हरेः

कृत् आवतारस् य दुरत्य यम् तमः पूर्वे ऽतरन् यन् नख मण्डलत् विषा

08 यद् अर्चितम् ब्रह्म भवादिभिः सुरैः

श्रिया च देव्या मुनिभिः स सात् वतैः

गो चारणा यानु चरैश् चरद्वने

यद् गोपिकानाम् कुच कुङ्कु माङ्कितम्

09 द्रक्ष्यामि नूनम् सु कपोल नासिकम् स्मिताव लोकारुण कञ्ज लोचनम्

मुखम् मुकुन्दस्य गुडाल कावृतम् प्रदक्षिणम् मे प्रच रन्ति वै मृगाः

10 अप्यद्य विष्णोर् मनुजत्व मीयुषो भारा वतारा य भुवो निजेच्छया

लावण्य धाम्नो भवितोप लम्भनम् मह्यम् न न स्यात् फलमञ्ज सा दृशः

11 य ईक्षि ताहम् रहितो ऽप्य सत् सतोः स्व तेजसा पास्त तमो भिदा भ्रमः

स्वमाय यात्मन् रचितैस् त दीक्षया प्राणाक्ष धीभिः सदनेष्व भीयते

12 यस्या खिलामीव हभिः सुमङ्गळैः वाचो विमिश्रा गुण कर्म जन्मभिः

प्राणन्ति शुम्भन्ति पुनन्ति वै जगत् यास् तद् विरक्ताः शव शोभना मताः

13 स चाव तीर्णः किल सात्व तान् वये स्व सेतु पालामर वर्य शर्म कृत्

यशो वितन्वन् व्रज आस्त ईश्वरो गायन्ति देवा यद् अशेष मङ्गळम्

14 तम् त्वद्य नूनम् महताम् गतिम् गुरुम्

त्रै लोक्य कान्तम् दृशिमन् महोत्सवम्

रूपम् दधानम् श्रिय ईप्सि तास् पदम्

द्रक्ष्ये ममासन् नुषसः सु दर्शनाः

15 अथा आवरूढः सपदी शयो रथात् प्रधान पुम्सोश् चरणम् स्व लब्धये

धिया धृतम् योगिभिर् अप्यहम् ध्रुवम् नमस्य आभ्याम् च सखीन् वनौ कसः

16 अप्यङ्घ्रि मूले पति तस्य मे विभुः

शिरस्य धास्यन् निज हस्त पङ्कजम्

दत्ता भयम् काल भुजङ्ग रम् हसा

प्रोद् वेजितानाम् शरणै षिणाम् णृनाम्

17 समर्हणम् यत्र निधाय कौशिकः तथा बलिश् चाप जगत्त्र येन्द् रताम्

यद्वा विहारे व्रज योषि ताम् श्रमम् स्पर्शेन सौगन्धिक गन्ध्य पानु दत्

18 न मय् युपैष् यत् यरि बुद्धिम् अच्युतः

कम्सस्य दूतः प्रहि तोऽपि विश्व दृक्

यो ऽन्तर् बहिश् चेतस एत दीहितम्

क्षेत्रज्ञ ईक्षत् यमलेन चक् षुषा

19 अप्यङ्घ्रि मूले ऽवहितम् कृताञ्जलिम्

मा मीक्षिता सस्मित मार्द्रया दृशा

सपद्य पध्वस्त समस्त किल्बिषो

वोढा मुदम् वीत विशङ्क ऊर्जिताम्

20 सुहृत् तमम् ज्ञातिम् अनन्य दैवतम् दोर्भ्याम् बृहद्भ्याम् परिरप्स्यते ऽथ माम्

आत्मा हि तीर्थी क्रियते तदैव मे बन्धश् च कर्मात् मक उच्छव सित् यतः

21 लब्धाङ्ग सङ्गम् प्रणतम् कृताञ्जलिम्

माम् वक्ष्यते ऽक्रूर ततेत् युरुश्रवाः

तदा वयम् जन्म भृतो महीयसा

नैवाद् ऋतो यो धिगमुष्य जन्म तत्

22 न तस्य कश्चिद् दयितः सुहृत् तमो न चाप्रियो द्वेष्य उपेक्ष्य एव वा

तथापि भक्तान् भजते यथा तथा सुरद्रुमो यद् वद् उपाश्रि तो ऽर्थदः

23 किम् चाग् रजो मा वनतम् यदूत् तमः स्मयन् परिष् वज्य गृहीत मञ्जलौ

गृहम् प्रवेष् याप्त समस्त सत् कृतम् सम्प्रक्ष् यते कम् सकृतम् स्व बन्धुषु

24 श्री शुक उवाच

इति सञ्चिन् तयन् कृष्णम् श्वफल्क तनयो ऽध्वनि

रथेन गोकुलम् प्राप्तः सूर्यश् चास्त गिरिम् नृप

25 पदानि तस् याखिल लोक पाल किरीट जुष्टामल पाद रेणोः

द दर्श गोष्ठे क्षिति कौतु कानि विलक्षितान् यब्ज यवाङ् कुशाद् यैः

26 तद् दर्शन् आह्लाद विवृद्ध सम्भ्रमः

प्रेम्णोर्ध् वरोमा श्रुकला कुलेक्षणः

रथाद् अवस्कन्द्य स तेष्व चेष्टत

प्रभोः अमूनि अङ्घ्रि रजाम्स् यहो इति

27 देहम् भृताम् इयानर्थो हित्वा दम्भम् भियम् शुचम्

सन्देशाद् यो हरेर् लिङ्ग दर्शन श्रवणा दिभिः

28 द दर्श कृष्णम् रामम् च व्रजे गो दोहनम् गतौ

पीत नीलाम् बरधरौ शरद् अम्बु रुहेक्षणौ

29 किशोरौ श्यामळ श्वेतौ श्रीनि केतौ बृहद् भुजौ

सुमुखौ सुन्दर वरौ बलद् विरद विक्रमौ

30 ध्वज वज्राङ् कुशाम् भोजैः चिह्नितैः अङ्घ्रि भिर् व्रजम्

शोभ यन्तौ महात् मानौ अनुक्रोश स्मितेक्षणौ

31 उदार रुचिर क्रीडौ स्रग्विणौ वन मालिनौ

पुण्य गन्धानु लिप्ताङ्गौ स्नातौ विरज वाससौ

32 प्रधान पुरुषा वाद्यौ जगद् हेतू जगत् पती

अवतीर्णौ जगत् यर्थे स्वाम्शेन बल केशवौ

33 दिशो वितिमिरा राजन् कुर्वाणौ प्रभया स्वया

यथा मार कतः शैलो रौप् यश् च कनका चितौ

34 रथा अत्तूर्णम् अवप्लुत्य सो ऽक्रूरः स्नेह विह्वलः

पपात चरणो पान्ते दण्ड वद् राम कृष्णयोः

35 भगवद् दर्शन् आह्लाद बाष्प पर्या कुलेक्षणः

पुल काचिताङ्ग औत्कण्ठ्यात् स्वाख्याने नाशकन् नृप

36 भगवाम्स् तम् अभिप्रेत्य रथाङ् गाङ्कित पाणिना

परि रेभे ऽभ्युपा कृष्य प्रीतः प्रणत वत्सलः

37 सङ्कर्षणश् च प्रणतम् उपगुह्य महामनाः

गृहीत्वा पाणिना पाणी अनयत् सानु जो गृहम्

38 पृष्ट्वा थ स्वागतम् तस्मै निवेद्य च वरा सनम्

प्रक्षाल्य विधिवत् पादौ मधुपर्कार् हण माहरत्

39 निवेद्य गाम् चा तिथये सम्वाह्य श्रान्त माद्रुतः

अन्नम् बहुगुणम् मेध्यम् श्रद्धयो पाहरद् विभुः

40 तस्मै भुक्त वते प्रीत्या रामः परम धर्म वित्

मुख वासैर् गन्ध माल्यैः पराम् प्रीतिम् व्यधात् पुनः

41 पप्रच्छ सत्कृतम् नन्दः कथम् स्थ निर् अनुग्रहे

कम्से जीवति दाशार्ह सौन पाला इवा वयः

42 यो ऽवधीत् स्वस् वसुस् तोकान् क्रोशन्त्या असु तृप् खलः

किम् नु स्वित् तत् प्रजानाम् वः कुशलम् विमृशा महे

43 इत्थम् सूनृ तया वाचा नन्देन सु सभाजितः

अक्रूरः परि पृष्टेन जहा वध्व परिश्रमम्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे पूर्वार्दे अष्टा त्रिम्शो ऽध्याय ः||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्द: एकोन चत्वारिम्शो ऽध्याय :

स्कन्द- *10:* अध्याय- *39*

*01* श्री शुक उवाच

सुखोप विष्ट: पर्यङ्के राम कृष्णोरु मानित:

लेभे मनो रथान् सर्वान् पथि यान्स चकार ह

*02* किम् अलभ्यम् भगवति प्रसन्ने श्रीनि केतने

तथापि तत् परा राजन् न हि वान्छन्ति किन्चन

*03* सायन्तन् आशनम् कृत्वा भगवान् देवकी सुत:

सुहृत्सु वृत्तम् कम्सस्य पप्रच्छान् यच् चिकीर्षि तम्

*04* श्री भगवान् उवाच

तात सौम्या गत: कच्चित् स्वागतम् भद्र मस्तु व:

अपि स्वज्ञाति बन्धूनाम् अनमीवम् अनामयम्

*05* किम् नु न: कुशलम् पृच्छे एध माने कुला मये

कम्से मातुल नाम् न्यङ्ग स्वानाम् नस् तत् प्रजासु च

*06* अहो अस्मद् अभूद् भूरि पित्रो: वृजिन मार्ययो:

यद् धेतो: पुत्र मरणम् यद् हेतोर् बन्धनम् तयो:

*07* दिष्ट्याद् य दर्शनम् स्वानाम् मह्यम् व: सौम्य काङ्क्षितम्

सन्जातम् वर्ण्यताम् तात तव आगमन कारणम्

*08* श्री शुक उवाच

पृष्टो भगवता सर्वम् वर्णया मास माधव:

वैरानु बन्धम् यदुषु वसुदेव वधोद् यमम्

*09* यत् सन्देशो यदर् थम् वा दूत: सम्प्रेषित: स्वयम्

यदुक्तम् नारदे नास्य स्वजन् मानक दुन्दुभे:

10 श्रुत्वा अक्रूर वचः कृष्णो बलश् च पर वीरहा

प्रहस्य नन्दम् पितरम् राज्ञा दिष्टम् विजज्ञतुः

11 गोपान् समादि शत् सोऽपि गृह्यताम् सर्व गोरसः

उपायनानि गृह्णीध्वम् युज् यन्ताम् शकटानि च

12 यास्यामः श्वो मधु पुरीम् दास्यामो नृपते रसान्

द्रक्ष्या मः सु महत् पर्व यान्ति जान पदाः किल

एवम् आघोष यत् क्षत्रा नन्द गोपः स्व गोकुले

13 गोप्यस् तास् तद् उपश्रुत्य बभूवुः व्यथिता भृशम्

राम कृष्णौ पुरीम् नेतुम् अक्रूरम् व्रज मागतम्

14 काश्चित् तत् कृत हृत् ताप श्वासम् लान मुखश्रियः

स्रम् सद्दु कूल वलय केश ग्रन्थ् यश् च काश्चन

15 अन्याश् च तद् अनुध्यान निवृत्ता शेष वृत्तयः

नाभ्य जानन् निमम् लोकम् आत्म लोकम् गता इव

16 स्मरन्त् यश् चापराः शौरेः अनुराग स्मितेरि ताः

हृदिस् पृशश् चित्र पदा गिरः सम्मु मुहुः स्त्रियः

17 गतिम् सु ललिताम् चेष्टाम् स्निग्धहा साव लोकनम्

शोकाप हानि नर्माणि प्रोद्दाम चरितानि च

18 चिन्त यन्त्यो मुकुन्दस्य भीता विरह कातराः

समेताः सङ्घशः प्रोचुः अश्रु मुख्यो ऽच्युता शयाः

19 श्री गोप्य ऊचुः

अहो विधातस् तव न क्वचिद् दया सम्योज्य मैत्र्या प्रणयेन देहिनः

ताम्श् चाकृ तार्थान् वियुनङ्क्ष्य पार्थकम् विक्रीडितम् ते ऽर्भक चेष्टितम् यथा

20 यस्त्वम् प्रदर्श् यासित कुन्तला वृतम्

मुकुन्द वक्त्रम् सु कपोल मुन्नसम्

शोकाप नोद स्मित लेश सुन्दरम्

करोषि पारोक्ष्यम् असाधु ते कृतम्

21 क्रूरस्त्वम् अक्रूर समाख्य या स्म नः

चक्षुर्हि दत्तम् हरसे बताज्ञ वत्

येनैक देशे ऽखिल सर्ग सौष्ठवम्

त्वदीय मद्राक्ष्म वयम् मधु द्विषः

22 न नन्द सूनुः क्षण भङ्ग सौहृदः

समीक्षते नः स्वकृता तुरा बत

विहाय गेहान् स्वजनान् सुतान् पतीम्स्

तद् दास्यम् अद्धोप गता नव प्रियः

23 सुखम् प्रभाता रजनीय माशिषः सत्या बभूवुः पुरयोषि ताम् ध्रुवम्

याः सम्प्र विष्टस्य मुखम् व्रजस् पतेः पास् यन्ति अपाङ्गोत् कलित स्मितासवम्

24 तासाम् मुकुन्दो मधु मञ्जु भाषितैः

गृहीत चित्तः परवान् मनस् व्यपि

कथम् पुनर्नः प्रतियास्य ते ऽबला

ग्राम्याः सलज्जस् मित विभ्रमैर् भ्रमन्

25 अद्य ध्रुवम् तत्र दृशो भविष् यते दाशार्ह भोजान् धक वृष्णि सात् वताम्

महोत्सवः श्री रमणम् गुणास् पदम् द्रक्ष्यन्ति ये चाध् वनि देवकी सुतम्

26 मैतद् विधस्या करुणस्य नाम भूद् अक्रूर इत् येतद् अतीव दारुणः

योऽसौ अनाश् वास्य सु दुः खितम् जनम् प्रियात् प्रियम् नेष्यति पार मध्वन

27 अनार्द्र धीरेष समास्थि तो रथम् तम् अन्वमी च त्वर यन्ति दुर् मदाः

गोपा अनोभिः स्थविरैर् उपेक्षितम् दैवम् च नो ऽद्य प्रतिकूल मी हते

28 निवार यामः समुपेत्य माधवम् किम् नो ऽकरिष्यन् कुल वृद्ध बान्धवाः

मुकुन्द सङ्गान् निमिषार्ध दुस्त् यजाद् दैवेन विध्वम् सित दीन चेतसाम्

29 यस्यानु राग ललित स्मित वल्गु मन्त्र

लीलाव लोक परिरम्भण रास गोष्ठ्याम्

नीताः स्म नः क्षण मिव क्षणदा विना तम्

गोप्यः कथम् न्वतित रेम तमो दुरन्तम्

30 यो ऽह्नः क्षये व्रजम् अनन्त सखः परीतो
गोपैर् विशन् खुर रजश् छुरिताल कस्रक्
वेणुम् क्वणन् स्मित कटाक्ष निरीक्षणेन
चित्तम् क्षिणोत्य मुमृते नु कथम् भवेम
31 श्री शुक उवाच
एवम् ब्रुवाणा विरहा तुरा भृशम् व्रज स्त्रियः कृष्ण विषक्त मानसाः
विसृज्य लज्जाम् रुरुदुः स्म सुस्वरम् गोविन्द दामोदर माधवेति
32 स्त्रीणा मेवम् रुदन् तीनाम् उदिते सवितर् यथ
अक्रूरश् चोदया मास कृत मैत्रादि को रथम्
33 गोपास्तम् अन्व सज्जन्त नन्दाद्याः शकटैस् ततः
आदायो पायनम् भूरि कुम्भान् गोर ससम् भृतान्
34 गोप्यश् च दयितम् कृष्णम् अनुव्रज् यानु रञ्जिताः
प्रत्या देशम् भगवतः काङ्क्षन्त् यश् चाव तस्थिरे
35 तास् तथा तप्य तीर् वीक्ष्य स्व प्रस्थाणे यदूत् तमः
सान्त्वया मास सप्रेमैः आयास्य इति दौत्य कैः
36 याव दालक्ष्य ते केतुः यावद् रेणू रथस्य च
अनु प्रस्थापि तात् मानो लेख् यानी वोप लक्षिताः
37 ता निराशा निव वृतुर् गोविन्द विनि वर्तने
विशोका अहनी निन्युः गायन्त्यः प्रिय चेष्टितम्
38 भगवान् अपि सम्प्राप्तो रामाक्रूर युतो नृप
रथेन वायु वेगेन कालिन्दी मघनाशि नीम्
39 तत् रोप स्पृश्य पानीयम् पीत्वा मृष्टम् मणि प्रभम्
वृक्ष षण्डम् उप व्रज्य सरामो रथम् आविशत्
40 अक्रूर स्तावुपा मन्त्र्य निवेश्य च रथो परि
कालिन्द्याह् रद मागत्य स्नानम् विधिवद् आचरत्
41 निमज्ज्य तस्मिन् सलिले जपन् ब्रह्म सनातनम्

तावेव ददृशे ऽक्रूरो राम कृष्णौ समन् वितौ

42 तौ रथस्थौ कथमिह सुतौ आनक दुन्दुभेः

तर्हि स्वित् स्यन्दने नस्त इत्युन् मज्ज्य व्यचष्ट सः

43 तत्रापि च यथा पूर्वम् आसीनौ पुनरेव सः

न्यमज् जद् दर्शनम् यन्मे मृषा किम् सलिले तयोः

44 भूयस् तत् रापि सो ऽद्राक्षीत् स्तूय मान महीश् वरम्

सिद्ध चारण गन्धर्वैः असुरैः नत कन्धरैः

45 सहस्र शिरसम् देवम् सहस्र फण मौलिनम्

नीलाम्बरम् विस श्वेतम् शृङ्गैः श्वेत मिव स्थितम्

46 तस्योत् सङ्गे घन स्यामम् पीत कौशेय वाससम्

पुरुषम् चतुर् भुजम् शान्तम् पद्म पत्रा रुणेक्षणम्

47 चारु प्रसन्न वदनम् चारु हास निरीक्षणम्

सु भ्रून्नसम् चरु कर्णम् सु कपोल् आरुणा धरम्

48 प्रलम्ब पीवर् अभुजम् तुङ्गाम् सोरः स्थल श्रियम्

कम्बु कण्ठम् निम्न नाभिम् वलिमत् पल्लवो दरम्

49 बृहत् कटि तट श्रोणि करभोरु द्वयान् वितम्

चारु जानु युगम् चारु जङ्घायु गलसम् युतम्

50 तुङ्ग गुल्फारु णनख व्रात दीधि तिभिर् वृतम्

नव् आङ्गुल् यङ्गुष्ठ दलैः विलसत् पाद पङ्कजम्

51 सुम हार्ह मणि व्रात किरीट कटकाङ्ग दैः

कटि सूत्र ब्रह्म सूत्र हार नूपुर कुण्डलैः

52 भ्राज मानम् पद्म करम् शङ्ख चक्र गदा धरम्

श्रीवत्स वक्षसम् भ्राजत् कौस्तुभम् वन मालिनम्

53 सुनन्द नन्द प्रमुखैः पर्षदैः सनकादिभिः

सुरेशैर् ब्रह्म रुद्राद्यैः नव भिश्च द्विजोत् तमैः

54 प्रह्लाद नारद वसु प्रमुखैः भागव तोत्तमैः

स्तूय मानम् पृथग् भावै: वचोभि: अमलात् मभि:

55 श्रिया पुष्ट्या गिरा कान्त्या कीर्त्या तुष्ट् येल योर्जया

विद्यया विद्यया शक्त्या मायया च निषेवितम्

56 विलोक्य सुभृशम् प्रीतो भक्त्या परमया युत:

हृष्यत् तनूरुहो भाव परिक्लिन् आत्म लोचन:

57 गिरा गद्गदयास् तौषीत् सत्त्व मालम्ब्य सात् वत:

प्रणम्य मूर्ध्ना वहित: कृताञ्जलि पुट: शनै:

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे पूर्वार्दे एकोन चत्वारिम्शो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्द: चत्वारिम्शो ऽध्याय :

स्कन्द- 10: अध्याय- 40

01 श्री अक्रूर उवाच

नतो ऽस्म्यहम् त्वाखिल हेतु हेतुम् नारायणम् पूरुष माद्य मव्ययम्

यन् नाभि जाताद् अरविन्द कोषाद् ब्रह्मा विरासीद् यत एष लोक:

02 भूस् तोय मग्नि: पवन: खमादिर् महान जादिर् मन इन्द्रियाणि

सर्वेन्द्रि यार्था विबुधाश् च सर्वे ये हेत वस्ते जगतो ऽङ्ग भूता:

03 नैते स्व रूपम् विदुर् आत्म नस्ते ह्यजादयो ऽनात्म तया गृहीत:

अजो ऽनुबद्ध: स गुणैर् अजाया गुणात् परम् वेद न ते स्वरूपम्

04 त्वाम् योगिनो यजन्त् यद्धा महा पुरुषम् ईश्वरम्

साध् यात्मम् साधि भूतम् च साधि दैवम् च साधव:

05 त्रय्या च विद्यया केचित् त्वाम् वै वैतानिका द्विजा:

यजन्ते वित तैर् यज्ञैर् नाना रूपाम राख्यया

06 एके त्वा खिल कर्माणि सन्न्यस् योप शमम् गता:

ज्ञानिनो ज्ञान यज्ञेन यजन्ति ज्ञान विग्रहम्

07 अन्ये च सम्स्कृत् आत्मानो विधि नाभि हितेन ते

यजन्ति त्वन् मयास् त्वाम् वै बहु मूर्त् येक मूर्तिकम्

08 त्वामेवान् ये शिवोक् तेन मार्गेण शिव रूपिणम्

बह्वा चार्य विभे देन भगवन् सम् उपासते

09 सर्व एव यजन्ति त्वाम् सर्व देव मयेश् वरम्

ये ऽप्यन्य देवता भक्ता यद्यप् यन्यधि य: प्रभो

10 यथाद्रि प्रभवा नद्य: पर्जन्या पूरिता: प्रभो

विशन्ति सर्वत: सिन्धुम् तद्वत् त्वाम् गतयो ऽन्तत:

11 सत्त्वम् रजस् तम इति भवत: प्रकृतेर् गुणा:

तेषु हि प्राकृता: प्रोता आब्रह्म स्थावरा दय:

12 तुभ्यम् नमस्तेस् तु अविषक्त दृष्टये

सर्वात्मने सर्व धियाम् च साक्षिणे

गुण प्रवाहो ऽयम् अविद्य या कृत:

प्रवर्तते देव नृतिर् य गात्मसु

13 अग्निर् मुखम् ते ऽवनिर् अङ्घ्रि रीक्षणम्

सूर्यो नभो नाभिर् अथो दिश: श्रुति:

द्यौ: कम् सुरेन्द्रास् तव बाहवो ऽर्णवा:

कुक्षिर् मरुत् प्राण बलम् प्रकल्पितम्

14 रोमाणि वृक्षौ षधय: शिरोरुहा

मेघा: परस् यास्थि नखानि ते ऽद्रय:

निमेषणम् रात्र् यहनी प्रजापति:

मेढ्रस्तु वृष्टि: तव वीर्य मिष्यते

15 त्वय् यव्य यात्मन् पुरुषे प्रकल्पिता लोकाः सपाला बहुजीव सङ्कुलाः

यथा जले सञ्जिह ते जलौ कसो ऽपि उदुम्बरे वा मशका मनोमये

16 यानि यानीह रूपाणि क्रीडनार्थम् बिभर्षि हि

तैरा मृष्ट शुचो लोका मुदा गायन्ति ते यशः

17 नमः कारण मत्स्याय प्रलयाब्धि चराय च

हय शीर्ष्णे नमस् तुभ्यम् मधु कैटभ मृत्यवे

18 अकू पाराय बृहते नमो मन्दर धारिणे

क्षित् युद् धार विहाराय नमः शूकर मूर्तये

19 नमस्ते ऽद्भुत सिम्हाय साधु लोक भया पह

वामनाय नमस् तुभ्यम् क्रान्त त्रि भुवना य च

20 नमो भृगुणाम् पतये दृप्त क्षत्र वनच् छिदे

नमस्ते रघु वर्याय रावणान्त कराय च

21 नमस्ते वासु देवाय नमः सङ्कर्षणाय च

प्रद्युम्नाय अनिरुद्धाय सात्वताम् पतये नमः

22 नमो बुद्धाय शुद्धाय दैत्य दानव मोहिने

म्लेच्छ प्राय क्षत्र हन्त्रे नमस्ते कल्कि रूपिणे

23 भगवन् जीव लोकोऽयम् मोहितस् तव मायया

अहम् ममेत्य सद् ग्राहो भ्राम्यते कर्म वर्त् मसु

24 अहम् चात् मात्मजा गार दारार्थ स्वजना दिषु

भ्रमामि स्वप्न कल्पेषु मूढः सत्य धिया विभो

25 अनित्यान् आत्म दुः खेषु विपर्यय मतिर् ह्यहम्

द्वन्द्वा रामस् तमो विष्टो न जाने त्वात् मनः प्रियम्

26 यथा बुधो जलम् हित्वा प्रतिच् छन्नम् तद् उद्भवैः

अभ्येति मृग तृष्णाम् वै तद्वत् त्वाहम् पराङ् मुखः

27 नोत् सहेऽहम् कृपणधीः काम कर्म हतम् मनः

रोद्धुम् प्रमाथि भिश् चाक्षैः ह्रियमाणम् इतस् ततः

28 सोऽहम् तवाङ्घ्र् युपगतो ऽस्म्यसताम् दुरापम्

तच् चाप्यहम् भवद् अनुग्रह ईश मन्ये

पुम्सो भवेद् यर्हि सम् सरणाप वर्ग:

त्वय् यब्ज नाभ सदु पासन या मति: स्यात्

29 नमो विज्ञान मात्राय सर्व प्रत्यय हेतवे

पुरुषेश प्रधानाय ब्रह्मणे ऽनन्त शक्तये

30 नमस्ते वासु देवाय सर्व भूत क्षयाय च

हृषीकेश नमस् तुभ्यम् प्रपन्नम् पाहि माम् प्रभो

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे पूर्वार्दे चत्वारिम्शो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्द: एक चत्वारिम्शो ऽध्याय :

स्कन्द- 10: अध्याय- 41

01 श्री शुक उवाच

स्तुव तस् तस्य भगवान् दर्श यित्वा जले वपु:

भूय: समा हरत् कृष्णो नटो नाट्यम् इवात्मन:

02 सो ऽपि चान्तर् हितम् वीक्ष्य जला दुन् मज्य सत्वर:

कृत्वा चावश् यकम् सर्वम् विस्मितो रथम् आगमत्

03 तम पृच्छद् ऋषी केश: किम् ते दृष्टम् इहाद् भुतम्

भूमौ वियतितो ये वा तथा त्वाम् लक्षया महे

04 श्री अक्रूर उवाच

अद्भुता नीह यावन्ति भूमौ वियति वा जले

त्वयि विश्वात्म के तानि किम् मे ऽदृष्टम् विपश् यतः

05 यत् राद् भुतानि सर्वाणि भूमौ वियति वा जले

तम् त्वानु पश्य तो ब्रह्मन् किम् मे दृष्टम् इहाद् भुतम्

06 इत् युक्त्वा चो दया मास स्यन्दनम् गान्दिनी सुतः

मथुराम् अनयद् रामम् कृष्णम् चैव दिनात् यये

07 मार्गे ग्राम जना राजन्ः तत्र तत्रोप सङ्गताः

वसुदेव सुतौ वीक्ष्य प्रीता दृष्टिम् न चाददुः

08 तावद् व्रजौ कसस् तत्र नन्द गोपा दयो ऽग्रतः

पुरोप वन मासाद्य प्रतीक् षन्तो ऽवतस् थिरे

09 तान् समेत् याह भगवान् अक्रूरम् जगद् ईश्वरः

गृहीत्वा पाणिना पाणिम् प्रश् रितम् प्रह सन्निव

10 भवान् प्रविशताम् अग्रे सह यानः पुरीम् गृहम्

वयम् त्विहाव मुच् याथ ततो द्रक्ष्या महे पुरीम्

11 श्री अक्रूर उवाच

नाहम् भवद् भ्याम् रहितः प्रवेक्ष्ये मथुराम् प्रभो

त्यक्तुम् नार्हसि माम् नाथ भक्तम् ते भक्त वत्सल

12 आगच्छ याम गेहान्नः सनाथान् कुर्व धोक्षज

सहा ग्रजः सगो पालैः सुहृद् भिश् च सुहृत् तम

13 पुनीहि पाद रजसा गृहान्नो गृहमे धिनाम्

यच् छौचे नानु तृप् यन्ति पितरः साग्नयः सुराः

14 अवनिज् याङ्घ्रि युगलम् आसीत् श्लोक्यो बलिर् महान्

ऐश्वर्यम् अतुलम् लेभे गतिम् चैकान्ति नाम् तु या

15 आपस्ते ऽङ्घ्र्य वने जन्य स्त्रीम् लोकान् शुचयो ऽपुनन्

शिरसा धत्त याः शर्वः स्वर्याताः सगर् आत्मजाः

16 देव देव जगन्नाथ पुण्य श्रवण कीर्तन

यदूत् तमोत् तमः श्लोक नारायण नमोऽस्तु ते

17 श्री भगवन् उवाच

आयास्ये भवतो गेहम् अहम् आर्य समन् वितः

यदु चक्र द्रुहम् हत्वा वितरिष् ये सुहृत् प्रियम्

18 श्री शुक उवाच

एव मुक्तो भगवता सो ऽक्रूरो विमना इव

पुरीम् प्रविष्टः कम्साय कर्मा वेद्य गृहम् ययौ

19 अथा पराह्ने भगवान् कृष्णः सङ्कर्षणान् वितः

मथुराम् प्राविशद् गोपैः दिदृक्षुः परिवार् इतः

20 द दर्श ताम् स्फाटिक तुङ्ग गोपुर द्वाराम् बृहद् हेम कपाट तोरणाम्

ताम् रार कोष्ठाम् परिखा दुरा सदाम् उद्यान रम्योप वनोप शोभिताम्

21 सौ वर्ण शृङ्गाटक हर्म्य निष्कुटैः श्रेणी सभाभिर् भवनैर् उप स्कृताम्

वैदूर्य वज्रामल नील विद्रुमैः मुक्ता हरिद्भिः वल भीषु वेदिषु

22 जुष्टेषु जाला मुख रन्ध्र कुट्टि मेषु आविष्ट पारावत बर्हि नादि ताम्

सम् सिक्त रथ्यापण मार्ग चत् वराम् प्रकीर्ण माल्याङ्कुर लाज तण्डुलाम्

23 आपूर्ण कुम्भैः दधि चन्द नोक्षितैः प्रसून दीपावलि भिः स पल्लवैः

सवृन्द रम्भा क्रमुकैः सकेतुभिः स्वलङ्कृत द्वार गृहाम् स पट्टिकैः

24 ताम् सम्प्र विष्टौ वसुदेव नन्दनौ वृतौ वयस्यैः नर देव वर्त्मना

द्रष्टुम् समीयुस् त्वरिताः पुरस् त्रियो हर्म्याणि चैवा रुरुहुर् नृपोत् सुकाः

25 काश्चिद् विपर्यग् धृत वस्त्र भूषणा

विस्मृत्य चैकम् युगलेष् वथा पराः

कृतैक पत्र श्रवनैक नूपुरा

नाङ्क्त्वा द्वितीयम् त्व पराश् च लोचनम्

26 अश्नन्त्य एकास् तद् अपास्य सोत्सवा अभ्यज्य माना अकृतोप मज्जनाः

स्वपन्त्य उत्थाय निशम्य निः स्वनम् प्रपाय यन्त्यो ऽर्भम् अपोहय मातरः

27 मनाम्सि तासाम् अरविन्द लोचनः प्रगल्भ लीला हसिताव लोकनैः

जहार मत् तद् विरदेन्द्र विक्रमो दृशाम् ददच् छ्री रमणात्म नोत्सवम्

28 दृष्ट्वा मुहुः श्रुत मनु द्रुत चेत सस्तम्

तत् प्रेक्षणोत् स्मित सुधोक्षण लब्ध मानाः

आनन्द मूर्तिम् उपगुह्य दृशात् मलब्धम्

हृष्यत् त्वचो जहुर् अनन्तम् अरिन्द माधिम्

29 प्रासाद शिखरा रूढाः प्रीत् युत्फुल्ल मुखाम् बुजाः

अभ्य वर्षन् सौमनस्यैः प्रमदा बल केशवौ

30 दध् यक्षतैः सोद पात्रैः स्रग् गन्धैर् अभ्यु पायनैः

तावा नर्चुः प्रमुदिताः तत्र तत्र द्विजा तयः

31 ऊचुः पौरा अहो गोप्यः तपः किम् अचरन् महत्

या ह्येता वनु पश्यन्ति नर लोक महोत्सवौ

32 रजकम् कञ्चिदा यान्तम् रङ्ग कारम् गदा ग्रजः

दृष्ट्वा याचत वासाम्सि धौतान् यत् युत्त मानि च

33 देह् यावयोः समुचि तानि अङ्ग वासाम्सि चार्हतोः

भविष् यति परम् श्रेयो दा तुस्ते नात्र सम्शयः

34 स याचितो भगवता परि पूर्णेन सर्वतः

साक्षेपम् रुषितः प्राह भृत्यो राज्ञः सु दुर् मदः

35 ईदृशान् येव वासाम्सी नित्यम् गिरि वने चरः

परि धत्त किमुद् वृत्ता राज द्रव्याण् यभीप् सथ

36 याताशु बालिशा मैवम् प्रार्थ्यम् यदि जिजीवीषा

बध्नन्ति घ्नन्ति लुम्पन्ति दृप्तम् राज कुलानि वै

37 एवम् विकत्थ मानस्य कुपितो देवकी सुतः

रज कस्य कराग्रेण शिरः कायाद् अपात यत्

38 तस्यानु जीविनः सर्वे वासः कोशान् विसृज्य वै

दुद्रुवुः सर्वतो मार्गम् वासाम्सि जगृहे ऽच्युतः

39 वसित् वात्म प्रिये वस्त्रे कृष्णः सङ्कर्षणस् तथा

शेषाण् या दत्त गोपेभ्यो विसृज्य भुवि कानिचित्

40 ततस्तु वायकः प्रीतः तयोर् वेषम् अकल्पयत्

विचित्र वर्णैश् चैलेयैः आकल्पैर् अनु रूपतः

41 नाना लक्षण वेषाभ् याम् कृष्ण रामौ विरेजतुः

स्वलङ्कृतौ बाल गजौ पर्वणी वसिते तरौ

42 तस्य प्रसन्नो भगवान् प्रादात् सारूप्य मात्मनः

श्रियम् च परमाम् लोके बलैश् वर्य स्मृत् ईन्द्रियम्

43 ततः सुदाम्नो भवनम् माला कारस्य जग्मतुः

तौ दृष्ट्वा स समुत् थाय ननाम शिरसा भुवि

44 तयोर् आसन मानीय पाद्यम् चार्घ्यार् हणादिभिः

पूजाम् सानुग योश् चक्रे स्रक् ताम्बूलान् उलेपनैः

45 प्राह नः सार्थकम् जन्म पावितम् च कुलम् प्रभो

पितृ देवर्षयो मह्यम् तुष्टा ह्याग मनेन वाम्

46 भवन्तौ किल विश् वस्य जगतः कारणम् परम्

अवतीर्णाविह हाम्शेन क्षेमाय च भवाय च

47 न हि वाम् विषमा दृष्टिः सुहृदोर् जगद् आत्मनोः

समयोः सर्व भूतेषु भजन्तम् भजतोर् अपि

48 तावाज्ञाप यतम् भृत्यम् किमहम् करवाणि वाम्

पुम्सो ऽत् यनुग्रहो ह्येष भवद्भिः यन् नियुज् यते

49 इत् यभि प्रेत्य राजेन्द्र सुदामा प्रीत मानसः

शस्तैः सुगन्धैः कुसुमैः माला विरचिता ददौ

50 ताभिः स्वलङ् कृतौ प्रीतौ कृष्ण रामौ सहानुगौ

प्रणताय प्रपन्नाय ददतुर् वरदौ वरान्

51 सो ऽपिवव्रे ऽचलाम् भक्तिम् तस्मिन् नेव् आखिलात् मनि

तद् भक्ते षु च सौहार्दम् भूतेषु च दयाम् पराम्

52 इति तस्मै वरम् दत्त्वा श्रियम् चान्वय वर्धिनीम्

बलमायुर् यशः कान्तिम् निर्जगाम सहा ग्रजः

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे पूर्वार्दे एक चत्वारिम्शो ऽध्याय ः||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्दः द्वि चत्वारिम्शो ऽध्याय :

स्कन्द- 10: अध्याय- 42

01 श्री शुक उवाच

अथ व्रजन् राज पथेन माधवः स्त्रियम् गृही ताङ्ग विले पभाजनाम्

विलोक्य कुब्जाम् युवतीम् वरान नाम् पप्रच्छ यान्तीम् प्रहसन् रसप्रदः

02 का त्वम् वरोर् वेतदु हानु लेपनम् कस्याङ्ग ने वा कथय स्व साधु नः

देह् यावयोर् अङ्ग विलेपम् उत्तमम् श्रेयस् ततस्ते न चिराद् भविष् यति

03 सैरन्ध्रि उवाच

दास्यस् म्यहम् सुन्दर कम्स सम्मता

त्रि वक्र नामा ह्यनुलेप कर्मणि

मद् भावितम् भोज पतेर् अतिप्रियम्

विना युवाम् को ऽन्य तमस्त दर्हति

04 रूप पेशल माधुर्य हसिता लाप वीक्षितैः

धर्षि तात्मा ददौ सान्द्रम् उभयोर् अनु लेपनम्

05 ततस् तौ अङ्ग रागेण स्ववर्णे तर शोभिना

सम्प्राप्त परभा गेन शुशुभा ते ऽनु रञ्जितौ

06 प्रसन्नो भगवान् कुब्जाम् त्रिवक्राम् रुचिर् आननाम्

ऋज्वीम् कर्तुम् मनश् चक्रे दर्शयन् दर्शने फलम्

07 पद्भ्या माक्रम् य प्रपदे द्र्यङ्गुल् युत्तान पाणिना

प्रगृह्य चुबुके ऽध्यात्मम् उदनीन मद् अच्युतः

08 सा तदर्जु समानाङ्गी बृहच् छ्रोणि पयो धरा

मुकुन्द स्पर्शनात् सद्यो बभूव प्रम दोत्तमा

09 ततो रूप गुणौ दार्य सम्पन्ना प्राह केशवम्

उत्तरी यान्त मा कृष्य स्मयन्ती जात हृच् छया

10 एहि वीर गृहम् यामो न त्वाम् त्यक्तुम् इहोत्सहे

त्वयोन् मथित चित्तायाः प्रसीद पुरुषर् षभ

11 एवम् स्त्रिया याच्य मानः कृष्णो रामस्य पश् यतः

मुखम् वीक्ष्यानु गानाम् च प्रह सम्स्ताम् उवाच ह

12 एष्यामि ते गृहम् सुभ्रु पुम्साम् आधि विकर्शनम्

साधि तार्थो ऽगृहाणाम् नः पान्थानाम् त्वम् परायणम्

13 विसृज्य माध्व्या वाण्या ताम् व्रजन् मार्गे वणिक् पथैः

नानो पायन ताम्बूल स्रग् गन्धैः साग्रजो ऽर्चितः

14 तद् दर्शन स्मर क्षोभाद् आत्मानम् ना विदन् स्त्रियः

विस्रस् तवा सः कवर वलया लेख्य मूर्तयः

15 ततः पौरान् पृच्छ मानो धनुषः स्थानम् अच्युतः

तस्मिन् प्रविष्टो ददृशे धनुर् ऐन्द्र मिव् आद्भुतम्

16 पुरुषैर् बहुभिर् गुप्तम् अर्चितम् परम् अर्द्धि मत्

वार्यमाणो नृभिः कृष्णः प्रसह्य धनुरा ददे

17 करेण वामेन सलील मुद् धृतम् सज्यम् च कृत्वा निमिषेण पश् यताम्

नृणाम् विकृष्य प्रब भञ्ज मध् यतो यथेक्षु दण्डम् मदकर् युरुक्रमः

18 धनुषो भज्य मानस्य शब्दः खम् रोदसी दिशः

पूरया मास यम् श्रुत्वा कम्सस् त्रास मुपागमत्

19 तद् रक्षिणः सानुचराः कुपिता आततायिनः

गृहीतु कामा आवव्रु: गृह्यताम् बध्यताम् इति

20 अथ तान् दुर् अभिप्रायान् विलोक्य बल केशवौ

क्रुद्धौ धन्वन आदाय शकले ताम्श् च जघ् नतु:

21 बलम् च कम्स प्रहितम् हत्वा शाला मुखात् तत:

निष् क्रम्य चेरतुर् हृष्टौ निरीक्ष्य पुर सम्पद:

22 तयोस् तद् अद्भुतम् वीर्यम् निशाम्य पुर वासिन:

तेज: प्रागल्भ्यम् रूपम् च मेनिरे विबु धोत् तमौ

23 तयोर् विचरतो: स्वैरम् आदित् यो ऽस्तम् उपेयिवान्

कृष्ण रामौ वृतौ गोपै: पुराच्छक टमी यतु:

24 गोप्यो मुकुन्द विगमे विरहातु राया आशा सता शिष ऋता मधुपुर्य भूवन्

सम्पश्यताम् पुरुष भूषण गात्र लक्ष्मीम् हित्वेतरान् नु भजतश् चकमे ऽयनम् श्री:

25 अवनिक् ताङ्घ्रि युगलौ भुक्त्वा क्षीरोप सेचनम्

ऊष तुस्ताम् सुखम् रात्रिम् ज्ञात्वा कम्स चिकीर् षितम्

26 कम्सस्तु धनुषो भङ्गम् रक्षिणाम् स्वबलस्य च

वधम् निशम्य गोविन्द राम विक्रीडितम् परम्

27 दीर्घ प्रजागरो भीतो दुर् निमित्तानि दुर् मति:

बहून् यचष्टो भयथा मृत्योर् दौत्य कराणि च

28 अदर्शनम् स्व शिरस: प्रतिरूपे च सत् यपि

असत्यपि द्वितीये च द्वै रूप्यम् ज्योति षाम् तथा

29 छिद्र प्रतीतिश् छायायाम् प्राण घोषान् उप श्रुति:

स्वर्ण प्रतीतिर् वृक्षेषु स्व पदाना मदर्शनम्

30 स्वप्ने प्रेत परिष् वङ्ग: खर यानम् विषादनम्

यायान् नलद माल् येकस् तैलाभ् यक्तो दिगम्बर:

31 अन्यानि चेत्थम् भूतानि स्वप्न जाग रितानि च

पश्यन् मरण सन्त्रस्तो निद्राम् लेभे न चिन्तया

32 व्युष् टायाम् निशि कौरव्य सूर्ये चाद्भ्य: समुत् थिते

कारया मास वै कम्सो मल्ल क्रीडा महोत्सवम्

33 आनर्चुः पुरुषा रङ्गम् तूर्य भेर् यश् च जघ्निरे

मञ्चाश् चालङ् कृताः स्रग्भिः पता काचै लतोरणैः

34 तेषु पौरा जान पदा ब्रह्म क्षत्र पुरोगमाः

यथोप जोषम् विविशू राजा अनश् च कृता सनाः

35 कम्सः परिवृतो ऽमात्यै राज मञ्च उपा विशत्

मण्डलेश् वर मध् यस्थो हृदयेन विदू यता

36 वाद्य माने सु तूर्येषु मल्ल तालोत्त रेषु च

मल्लाः स्वलङ् कृताः दृप्ताः सोपाध् यायाः समाविशन्

37 चाणूरो मुष्टिकः कूटः शलस् तोशल एव च

त आसेदुर् उपस्थानम् वल्गु वाद्य प्रहर् षिताः

38 नन्द गोपादयो गोपा भोज राज समा हुताः

निवेदि तोपायन् आस्ते एकस्मिन् मञ्च आविशन्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे पूर्वार्दे द्वि चत्वारिम्शो ऽध्याय ः॥

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्दः त्रि चत्वारिम्शो ऽध्याय ः

स्कन्द- 10: अध्याय- 43

01 श्री शुक उवाच

अथ कृष्णश् च रामश् च कृत शौचौ परन् तप

मल्ल दुन्दुभि निर् घोषम् श्रुत्वा द्रष्टुम् उपेयतुः

02 रङ्ग द्वारम् समा साद्य तस्मिन् नागम् अवस्थितम्

अपश्यत् कुवलया पीडम् कृष्णो ऽम्बष्ठ प्रचोदितम्

03 बद्ध्वा परिकरम् शौरिः स मुहृय कुटिलाल कान्

उवाच हस्तिपम् वाचा मेघनाद गभीरया

04 अम्बष्ठा अम्बष्ठ मार्गम् नौ देहृय पक्रम मा चिरम्

नो चेत्स कुञ्जरम् त्वाद्य नयामि यम सादनम्

05 एवम् निर्भर्त्सि तो ऽम्बष्ठः कुपितः कोपितम् गजम्

चोदया मास कृष्णाय कालान्त कयमो पमम्

06 करीन् द्रस्तम् अभिद् रुत्य करेण तरसा ग्रहीत्

कराद् विगलितः सो ऽमुम् निहत् याङ्घ्रिष् वलीयत

07 सङ्क्रुद् धस्तम् अचक्षाणो घ्राण दृष्टिः स केशवम्

पराम् ऋशत् पुष्करेण स प्रसहृय विनिर्गतः

08 पुच्छे प्रगृह् याति बलम् धनुषः पञ्च विम्शतिम्

विच कर्ष यथा नागम् सुपर्ण इव लीलया

09 स पर्या वर्त मानेन सव्य दक्षिण तो ऽच्युतः

बभ्राम भ्राम्य माणेन गोवत् सेनेव बालकः

10 ततो ऽभिमुख मभ् येत्य पाणिना हत्य वारणम्

प्राद्रवन् पातया मास स्पृश्य मानः पदे पदे

11 स धावन् क्रुईडया भूमौ पतित्वा सह सोत्थितः

तम् मत्वा पतितम् क्रुद्धो दन्ताभ् याम् सो ऽहनत् क्षितिम्

12 स्व विक्रमे प्रति हते कुञ्जरेन्द्रो ऽत्य मर्षितः

चोद्यमानो महा मात्रैः कृष्णम् अभ्यद्र वद् रुषा

13 तमा पतन्तम् आसाद्य भगवान् मधु सूदनः

निगृहृय पाणिना हस्तम् पातया मास भूतले

14 पति तस्य पदा क्रम्य मृगेन्द्र इव लीलया

दन्तम् उत्पाट्य तेनेभम् हस्ति पाम्श्चा हनद् हरिः

15 मृतकम् द्विप मुत् सृज्य दन्तपाणिः समा विशत्

अम्सन् यस्त विषाणो ऽसृङ् मद बिन्दु भिरङ्कितः

विरूढ स्वेद कणिका वदनाम् बुरुहो बभौ

16 वृतौ गोपैः कति पयैः बल देव जनार्दनौ

रङ्गम् विविशतू राजन् गज दन्त वरायुधौ

17 मल्लानाम् अशनिः नृणाम् नरवरः स्त्रीणाम् स्मरो मूर्ति मान्

गोपानाम् स्वजनो ऽसताम् क्षिति भुजाम् शास्ता स्व पित्रोः शिशुः

मृत्युः भोज पतेर् विराड् अविदुषाम् तत्त्वम् परम् योगिनाम्

वृष्णीनाम् पर देव तेति विदितो रङ्गम् गतः साग्रजः

18 हतम् कुवलया पीडम् दृष्ट्वा तावपि दुर्जयौ

कम्सो मनस्यपि तदा भृशम् उद्वि विजे नृप

19 तौ रेजतू रङ्ग गतौ महा भुजौ विचित्र वेषा भरणस्र गम्बरौ

यथा नटौ उत्तम वेष धारिणौ मनः क्षिपन्तौ प्रभया निरीक्ष ताम्

20 निरीक्ष्य तौ उत्तम पूरुषौ जना मञ्चस्थिता नागर राष्ट्र का नृप

प्रहर्ष वेगोत् कलिते क्षणाननाः पपुर्न तृप्ता नयनैस् तद् आननम्

21 पिबन्त इव चक्षुर्भ्याम् लिहन्त इव जिह्वया

जिघ्रन्त इव नासाभ्याम् श्लिष्यन्त इव बाहुभिः

22 ऊचुः परस्परम् ते वै यथा दृष्टम् यथा श्रुतम्

तद् रूप गुण माधुर्य प्रागल्भ्य स्मारिता इव

23 एतौ भगवतः साक्षाद् हरेर् नारायणस्य हि

अवतीर्णौ इहाम् शेन वसुदेवस्य वेश्मनि

24 एष वै किल देवक्याम् जातो नीतश् च गोकुलम्

काल मेतम् वसन् गूढो ववृधे नन्द वेश्मनि

25 पूतना नेन नीतान् तम् चक्र वातश् च दानवः

अर्जुनौ गुह्यकः केशी धेनुको ऽन्ये च तद् विधाः

26 गावः सपाला एतेन दावाग्नेः परि मोचिताः

काळियो द मितः सर्प इन्द्रश् च विमदः कृतः

27 सप्ताहम् एक हस्तेन धृतो ऽद्रि प्रवरो ऽमुना

वर्ष वाता शनिभ् यश् च परित्रा तम् च गोकुलम्

28 गोप्यो ऽस्य नित्य मुदित हसित प्रेक्षणम् मुखम्

पश् यन्त्यो विविधाम् स्तापाम् स्तरन्ति स्माश्रमम् मुदा

29 वदन्त्य नेन वम्शो ऽयम् यदोः सु बहु विश्रुतः

श्रियम् यशो महत्वम् च लप्स् यते परि रक्षितः

30 अयम् चास्या ग्रजः श्रीमान् रामः कमल लोचनः

प्रलम्बो निहतो येन वत्स को ये बका दयः

31 जनेष् वेवम् ब्रुवाणेषु तूर् येषु निनदत् सु च

कृष्ण रामौ समा भाष्य चाणूरो वाक्यम् अब्रवीत्

32 हे नन्द सूनो हे राम भवन्तौ वीर सम्मतौ

नियुद्ध कुशलौ श्रुत्वा राज्ञा हूतौ दिदृक्षुणा

33 प्रियम् राज्ञः प्रकुर् वन्त्यः श्रेयो विन्दन्ति वै प्रजाः

मनसा कर्मणा वाचा विपरीतम् अतो ऽन्यथा

34 नित्यम् प्रमुदिता गोपा वत्स पाला यथा स्फुटम्

वनेषु मल्ल युद्धेन क्रीडन् तश् चार यन्ति गाः

35 तस्माद् राज्ञः प्रियम् यूयम् वयम् च करवाम हे

भूतानि नः प्रसी दन्ति सर्व भूत मयो नृपः

36 तन्निशम् या ब्रवीत् कृष्णो देश कालो चितम् वचः

नियुद्धम् आत्मनो ऽभीष्टम् मन्य मानो ऽभिनन्द्य च

37 प्रजा भोज पतेर् अस्य वयम् चापि वनेचराः

करवाम प्रियम् नित्यम् तन्नः परम् अनुग्रहः

38 बाला वयम् तुल्य बलैः क्रीडिष् यामो यथो चितम्

भवेन् नियुद्धम् मा धर्मः स्पृशेन् मल्ल सभा सदः

39 चाणूर उवाच

न बालो न किशोरस् त्वम् बलश् च बलिनाम् वरः

लील येभो हतो येन सहस्र द्विप सत्त्व भृत्

40 तस्माद् भवद् भ्याम् बलिभिः योद् धव्यम् नानयो ऽत्र वै

मयि विक्र मवार्ष्णेय बलेन सह मुष्टिकः

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे पूर्वार्दे त्रि चत्वारिम्शो ऽध्याय ः॥

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्दः चतुश् चत्वारिम्शो ऽध्याय ः

स्कन्द- 10: अध्याय- 44

01 श्री शुक उवाच

एवम् चर्चित सङ्कल्पो भगवान् मधु सूदनः

आस सादाथ चणूरम् मुष्टिकम् रोहिणी सुतः

02 हस्ताभ्याम् हस्त योर् बद् ध्वा पद्भ्या मेव च पादयोः

विच कर्षतुर् अन्योन्यम् प्रसह्य विजि गीषया

03 अरत्नी द्वे अरत् निभ्याम् जानुभ् याम् चैव जानुनी

शिरः शीर्ष्णोर् असोर् अस्तौ अन्योन्यम् अभि जघ् नतुः

04 परि भ्रामण विक्षेप परि रम्भाव पातनैः

उत् सर्पणाप सर्पणैश् च अन्योन्यम् प्रत्यरुन् धताम्

05 उत्थापनैः उन्नयनैः चालनैः स्थापनैर् अपि

परस्परम् जिगी षन्तौ अपचक्र तुर् आत्मनः

06 तद् बला बल वद् युद्धम् समेताः सर्व योषितः

ऊचुः परस्परम् राजन् सानुकम् पा वरूथशः

07 महानयम् बता धर्म एषाम् राज सभा सदाम्

ये बला बल वद् युद्धम् राज्ञो ऽन्विच्छन्ति पश्यतः

08 क्व वज्र सार सर्वाङ्गौ मल्लौ शैलेन्द्र सन्निभौ

क्व चाति सुकुमार् आङ्गौ किशोरौ नाप्त यौवनौ

09 धर्म व्यतिक्रमो ह्यस्य समाजस्य ध्रुवम् भवेत्

यत्रा धर्मः समुत् तिष्ठेत् न स्थेयम् तत्र कर्हि चित्

10 न सभाम् प्रविशेत् प्राज्ञः सभ्य दोषान् अनुस्मरन्

अब्रुवन् विब्रुवन् नज्ञो नरः किल्बिष मश्नुते

11 वल्ग तः शत्रु मभितः कृष्णस्य वदनाम् बुजम्

वीक्ष्य ताम् श्रम वार् युप्तम् पद्म कोशम् इवाम्बुभिः

12 किम् न पश् यत रामस्य मुखम् आताम्र लोचनम्

मुष्टिकम् प्रति सामर्षम् हास सम्रम्भ शोभितम्

13 पुण्या बत व्रज भुवो यदयम् नृलिङ्ग

गूढः पुराण पुरुषो वन चित्र माल्यः

गाः पालयन् सह बलः क्वण यम्श् च वेणुम्

विक्रीडयात्र् चति गिरित्र रमार्चि ताङ्घ्रिः

14 गोप् यस्त पः किम चरन् यद् अमुष्य रूपम्

लावण्य सारम् असमोर्ध्वम् अनन्य सिद्धम्

दृग्भिः पिबन्ति अनु सवाभि नवम् दुरापम्

एकान्त धाम यशसः श्रीय ऐश्वरस्य

15 या दोहने ऽवहनने मथनोप लेप प्रेङ्खेङ्ख नार्भ रुदि तोक्षण मार्जना दौ

गायन्ति चैनम् अनु रक्त धियो ऽश्रु कण्ठ्यो धन्या व्रज स्त्रिय उरुक्रम चित्तयानाः

16 प्रातर् व्रज आद् व्रजत आविश तश् च सायम्

गोभिः समम् क्वणय तो ऽस्य निशम्य वेणुम्

निर्गम्य तूर्ण मबलाः पथि भूरि पुण्याः

पश्यन्ति सस्मित मुखम् सदयाव लोकम्

17 एवम् प्रभाष माणासु स्त्रीषु योगेश्वरो हरिः

शत्रुम् हन्तुम् मनश् चक्रे भगवान् भरतर् षभ

18 सभयाः स्त्री गिरः श्रुत्वा पुत्र स्नेह शुचा तुरौ

पितरौ अन्वत प्येताम् पुत्रयोर् अबुधौ बलम्

19 तैस्तैर् नियुद्ध विधिभिः विविधैर् अच्युते तरौ

युयुधा ते यथान् योन्यम् तथैव बल मुष्टिकौ

20 भगवद् गात्र निष् पातैः वज्र निष्पेष निष्ठुरैः

चाणूरो भज्य मानाङ्गो मुहुर् ग्लानिम् अवाप ह

21 स श्येन वेग उत्पत्य मुष्टी कृत्य करा वुभौ

भगवन्तम् वासुदेवम् क्रुद्धो वक्षस्य बाधत

22 नाचलत् तत् प्रहारेण माला हत इव द्विपः

बाह्वोर् निगृह्य चाणूरम् बहुशो भ्रामयन् हरिः

23 भू पृष्ठे पोथया मास तरसा क्षीण जीवितम्

विस्रस्ता कल्प केश स्रग् इन्द्र ध्वज इवा पतत्

24 तथैव मुष्टिकः पूर्वम् स्व मुष्ट्याभि हतेन वै

बल भद्रेण बलिना तले नाभि हतो भृशम्

25 प्रवेपितः स रुधिरम् उद्वमन् मुख तो ऽर्दितः

व्यसुः पपातोः व्युपस्थे वाता हतै वाङ्घ्रिपः

26 ततः कूटम् अनु प्राप्तम् रामः प्रहर ताम् वरः

अवधील् लीलया राजन् सावज्ञम् वाम मुष्टिना

27 तर्ह्येव हि शलः कृष्ण पदाप हत शीर्षकः

द्विधा विदीर्णस् तोशलक उभौ अपि निपेततुः

28 चाणूरे मुष्टिके कूटे शले तोशल के हते

शेषाः प्रदुद्रु वुर् मल्लाः सर्वे प्राण परीप्सवः

29 गोपान् वयस्यान् आकृष्य तैः सम् सृज्य विजह्रतुः

वाद्य मानेषु तूर्येषु वल्गन्तौ रुत नूपुरौ

30 जनाः प्रज हृषुः सर्वे कर्मणा राम कृष्णयोः

ऋते कम्सम् विप्र मुख्याः साधवः साधु साध् विति

31 हतेषु मल्ल वर्येषु विद्रु तेषु च भोज राट्

न्यवार यत् स्वतूर् याणि वाक्यम् चेदम् उवाच ह

32 निः सार यत दुर् वृत्तौ वसुदेवात्म जौ पुरात्

धनम् हरत गोपानाम् नन्दम् बध्नीत दुर्मतिम्

33 वसुदेवस्तु दुर्मेधा हन्यताम् आश्‍व सत्तमः

उग्रसेनः पिता चापि सानुगः पर पक्षगः

34 एवम् विकत्थ माने वै कम्से प्रकुपितो ऽव्ययः

लघिम् नोत् पत्य तरसा मञ्च मुत्तुङ्ग मारुहत्

35 तमा विशन्तम् आलोक्य मृत्युम् आत्मन आसनात्

मनस्वी सह सोत्थाय जगृहे सोऽसि चर्मणी

36 तम् खड्ग पाणिम् विचरन्त माशु श्‍येनम् यथा दक्षिण सव्य मम्बरे

समग्रहीद् दुर्विष होग्र तेजा यथो रगम् ताक्ष्र्य सुतः प्रसह्य

37 प्रगृह्य केशेषु चलत् किरीटम् निपात्य रङ्गो परि तुङ्ग मञ्चात्

तस्योप रिष्टात् स्वयम् अब्ज नाभः पपात विश्‍वा श्रय आत्म तन्त्रः

38 तम् सम्प रेतम् विच कर्ष भूमौ हरिर् यथेभम् जगतो विपश्यतः

हा हेति शब्दः सुमहाम्स् तद् आभूद् उदीरितः सर्व जनैर् नरेन्द्र

39 स नित्य दोद् विग्न धिया तमीश् वरम् पिबन् वदन्वा विचरन् स्वपन् श्‍वसन्

ददर्श चक्रायुधम् अग्रतो यः तदेव रूपम् दुर वाप माप

40 तस्यानुजा भ्रातरो ऽष्टौ कङ्कन् यग्रोध कादयः

अभ्यधा वन्न भिक् रुद्धा भ्रातुर् निर्वेश कारिणः

41 तथा तिरभ सात्म्स् ताम्स्तु सम्यत्तान् रोहिणी सुतः

अहन् परिघ मुद्यम्य पशून् इव मृगा धिपः

42 नेदुः दुन्दुभयो व्योम्नि ब्रह्मे शाद्या विभूतयः

पुष्पैः किरन् तस्तम् प्रीताः शशम्सुः ननृतुः स्त्रियः

43 तेषाम् स्त्रियो महा राज सुहृन् मरण दुः खिताः

तत्रा भीयुर् विनिघ् नन्त्यः शीर्षाणि अश्रु विलोचनाः

44 शयानान् वीर शय्यायाम् पतीना लिङ्ग्य शोचतीः

विलेपुः सुस्वरम् नार्यो विसृ जन्त्यो मुहुः शुचः

45 हा नाथ प्रिय धर्मज्ञ करुणा नाथ वत्सल

त्वया हतेन निहता वयम् ते स गृह प्रजाः

46 त्वया विरहिता पत्या पुरीयम् पुरुषर् षभ

न शोभते वयम् इव निवृत् तोत्सव मङ्गळा

47 अनागसाम् त्वम् भूतानाम् कृतवान् द्रोहम् उल्बणम्

तेने माम् भो दशाम् नीतो भूत ध्रुक् को लभेत शम्

48 सर्वेषाम् इह भूतानाम् एष हि प्रभ वाप्ययः

गोप्ता च तद् अवध्यायी न क्वचित् सुखमे धते

49 श्री शुक उवाच

राज योषित आश्वास्य भगवान् लोक भावनः

याम् आहुर् लौकिकीम् सम्स्थाम् हतानाम् स मकारयत्

50 मातरम् पितरम् चैव मोच यित्वाथ बन्धनात्

कृष्ण रामौ ववन् दाते शिरसा स्पृश्य पादयोः

51 देवकी वसुदेवश् च विज्ञाय जगद् ईश्वरौ

कृत सम्वन्दनौ पुत्रौ सस् वजाते न शङ्कितौ

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे पूर्वार्दे चतुश् चत्वारिम्शो ऽध्याय ः॥

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्द: पञ्च चत्वारिम्शो ऽध्याय :

स्कन्द- 10: अध्याय- 45

01 श्री शुक उवाच

पितरौ उप लब्धार्थौ विदित्वा पुरुषोत्तम:

मा भूदिति निजाम् मायाम् ततान जन मोहिनीम्

02 उवाच पितरा वेत्य साग्रज: सात्व तर्षभ:

प्रश्रया वनत: प्रीणन् अम्ब तातेति सादरम्

03 नास्मत्तो युवयोस् तात नित्योत् कण्ठित योरपि

बाल्य पौगण्ड कैशोरा: पुत्राभ्याम् अभवन् क्वचित्

04 न लब्धो दैव हतयो: वासो नौ भव दन्तिके

याम् बाला: पितृगे हस्था विन्दन्ते लालिता मुदम्

05 सर्वार्थ सम्भवो देहो जनित: पोषितो यत:

न तयोर् याति निर्वेशम् पित्रोर् मर्त्य: शता युषा

06 यस् तयोर् आत्म ज: कल्प आत्मना च धनेन च

वृत्तिम् न दद् यात्तम् प्रेत्य स्वमाम् सम् खाद यन्ति हि

07 मातरम् पितरम् वृद्धम् भार्याम् साध्वीम् सुतम् शिशुम्

गुरुम् विप्रम् प्रपन्नम् च कल्पो ऽबिभ्रच् छ्वसन् मृत:

08 तन्नाव कल्पयो: कम्सात् नित्य मुद् विग्न चेतसो:

मोघमे ते व्यति क्रान्ता दिवसा वामन् अर्चतो:

09 तत् क्षन्तुम् अर्हथस् तात मातर् नौ पर तन्त्रयो:

अकुर्वतोर् वाम् शुश् रूषाम् क्लिष्टयोर् दुर् हृदा भृशम्

10 श्री शुक उवाच

इति माया मनुष् यस्य हरेर् विश्वात्म नो गिरा

मोहिता वङ्क मारोप्य परिष् वज्याप तुर् मुदम्

11 सिञ्चन्तौ अश्रु धाराभिः स्नेह पाशेन चा वृतौ

न किञ्चिद् ऊचतू राजन् बाष्प कण्ठौ विमोहितौ

12 एवम् आश्वास्य पितरौ भगवान् देवकी सुतः

माता महम् तूग्र सेनम् यदूनाम् अकरोन् णृपम्

13 आह चास्मान् महाराज प्रजाश् चाज्ञप्तु मर्हसि

ययाति शापाद् यदुभिः नासि तव्यम् नृपासने

14 मयि भृत्य उपासीने भवतो विबुधा दयः

बलिम् हरन्त्य वनताः किमुतान्ये नराधिपाः

15 सर्वान् स्वाञ् ज्ञाति सम्बन्धान् दिग्भ्यः कम्स भया कुलान्

यदु वृष्नि अन्धक मधु दाशार्ह कुकुरादिकान्

16 सभाजितान् समाश् वास्य विदेशा वास कर्शितान्

न्यवास यत्स्व गेहेषु वित्तैः सन्तर्प्य विश्व कृत्

17 कृष्ण सङ्कर्षण भुजैः गुप्ता लब्ध मनो रथाः

गृहेषु रेमिरे सिद्धाः कृष्ण राम गतज्वराः

18 वीक्षन्तो ऽहरहः प्रीता मुकुन्द वदनाम् बुजम्

नित्यम् प्रमुदि तम् श्रीमत् सदय स्मित वीक्षणम्

19 तत्र प्रवयसो ऽप्यासन् युवानो ऽति बलौ जसः

पिबन्तो ऽक्षैर् मुकुन्दस्य मुखाम्बुज सुधाम् मुहुः

20 अथ नन्दम् समा साद्य भगवान् देवकी सुतः

सङ्कर्षणश् च राजेन्द्र परिष् वज्येद मूचतुः

21 पितर् युवाभ् याम् स्निग्धाभ् याम् पोषितौ लालितौ भृशम्

पित्रोरभ् यधिका प्रीतिः आत्मजेष् वात्म नोऽपि हि

22 स पिता सा च जननी यौ पुष्णीताम् स्व पुत्रवत्

शिशून् बन्धुभिर् उत्सृष्टा नकल्पैः पोष रक्षणे

23 यात यूयम् व्रजम् तात वयम् च स्नेह दुः खितान्

ज्ञातीन्वो द्रष्टु मे ष्यामो विधाय सुहृदाम् सुखम्

24 एवम् सान्त् वय्य भगवान् नन्दम् सव्रजम् अच्युत:

वासो ऽलङ्कार कुप्याद्यै: अर्हया मास सादरम्

25 इत् युक्तस् तौ परिष् वज्य नन्द: प्रणय विह्वल:

पूरयन् नश्रुभिर् नेत्रे सह गोपैर् व्रजम् ययौ

26 अथ शूर सुतो राजन् पुत्रयो: सम कारयत्

पुरोधसा ब्राह्मणैश् च यथावद् द्विज सम्स्कृतिम्

27 तेभ्यो ऽदाद् दक्षिणा गावो रुक्म माला: स्वलङ्कृता:

स्वलङ्कृतेभ्य: सम्पूज्य सवत्सा: क्षौम मालिनी:

28 या: कृष्ण राम जन्मर्क्षे मनो दत्ता महा मति:

ताश् चाद दाद् अनु स्मृत्य कम्सेन अधर्मतो हृता:

29 ततश् च लब्ध सम्स्कारौ द्विजत्वम् प्राप्य सुव्रतौ

गर्गाद् यदु कुला चार्याद् गायत्रम् व्रत मास्थितौ

30 प्रभवौ सर्व विद्यानाम् सर्वज्ञौ जगद् ईश्वरौ

नान्य सिद्धामल ज्ञानम् गूह मानौ नरे हितै:

31 अथो गुरुकुले वासम् इच्छन्तौ उप जग्मतु:

काश्यम् सान्दीपनिम् नाम ह्यवन्ति पुर वासिनम्

32 यथोप साद्य तौ दान्तौ गुरौ वृत्तिम् अनिन्दि ताम्

ग्राहयन्ता वुपेतौ स्म भक्त्या देवम् इवा दृतौ

33 तयो: द्विज वरस् तुष्ट: शुद्ध भावानु वृत्तिभि:

प्रोवाच वेदान् अखिलान् साङ्गोप निषदो गुरु:

34 स रहस्यम् धनुर् वेदम् धर्मान् न्याय पथाम्स् तथा

तथा चान् वीक्षिकीम् विद्याम् राज नीतिम् च षड् विधाम्

35 सर्वम् नर वर श्रेष्ठौ सर्व विद्या प्रवर्तकौ

सकृन् निगद मात्रेण तौ सन्ज गृहतुर् नृप

36 अहो रात्रै: चतु: षष्ट्या सम्यत्तौ तावती: कला:

गुरु दक्षिण याचार्यम् छन्दया मास तुर् नृप

37 द्विजस् तयोस्तम् महिमानम् अद्भुतम्

सम्लक्ष्य राजन् नति मानुषीम् मतिम्

सम् मन्त्र्य पत्न्या स महार्णवे मृतम्

बालम् प्रभासे वरयाम् बभूव ह

38 तथेत्य थारुह्य महा रथौ रथम्

प्रभास मासाद्य दुरन्त विक्रमौ

वेलाम् उपव्रज्य निषीद तु: क्षनम्

सिन्धुर् विदित् वार्हनम् आह रत्तयो:

39 तमाह भगवान् आशु गुरु पुत्र: प्रदी यताम्

यो ऽसाविह त्वया ग्रस्तो बालको महतोर् मिणा

40 श्री समुद्र उवाच

नैवा हार्ष महम् देव दैत्य: पञ्च जनो महान्

अन्तर् जलचर: कृष्ण शङ्ख रूप धरो ऽसुर:

41 आस्ते तेना हृतो नूनम् तच् छ्रुत्वा सत् वरम् प्रभु:

जल माविश्य तम् हत्वा नापश्य दुदरे ऽर्भकम्

42 तद् अङ्ग प्रभवम् शङ्खम् आदाय रथम् आगमत्

तत: सम्यमनीम् नाम यमस्य दयिताम् पुरीम्

43 गत्वा जनार्दन: शङ्खम् प्रदध्मौ स हला युध:

शङ्ख निर्ह्राद माकर्ण्य प्रजा सम्य मनो यम:

44 तयो: सपर्याम् महतीम् चक्रे भक्त् युप बृम्हिताम्

उवाचा वनत: कृष्णम् सर्व भूताश यालयम्

लीला मनुष्य हे विष्णो युवयो: करवाम किम्

45 श्री भगवान् उवाच

गुरु पुत्र मिहा नीतम् निज कर्म निबन्धनम्

आनयस्व महा राज मच्छासन पुरस्कृत:

46 तथेति तेनोपा नीतम् गुरु पुत्रम् यदूत् तमौ

दत्त्वा स्व गुरवे भूयो वृणीष् वेति तमू चतु:

47 श्री गुरुर् उवाच

सम्यक् सम्पा दितो वत्स भवद्भ्याम् गुरु निष्क्रय:

को नु युष्मद् विध गुरो: कामाना मव शिष्यते

48 गच्छतम् स्वगृहम् वीरौ कीर्तिर् वामस्तु पावनी

छन्दाम्सि अयातया मानि भवन्त् विह परत्र च

49 गुरुणैवम् अनुज्ञातौ रथे नानिल रम्हसा

आयातौ स्वपुरम् तात पर्जन्य निनदे न वै

50 सम नन्दन् प्रजा: सर्वा दृष्ट्वा राम जनार्दनौ

अपश् यन्त्यो बह्व हानि नष्ट लब्ध धना इव

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे पूर्वार्दे पञ्च चत्वारिम्शो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्द: षड् चत्वारिम्शो ऽध्याय :

स्कन्द- 10: अध्याय- 46

01 श्री शुक उवाच

वृष्णीनाम् प्रवरो मन्त्री कृष्णस्य दयित: सखा

शिष्यो बृहस्पते: साक्षाद् उद्धवो बुद्धि सत्तम:

02 तमाह भगवान् प्रेष्ठम् भक्तम् एकान्तिनम् क्वचित्

गृहीत्वा पाणिना पाणिम् प्रपन् नार्ति हरो हरि:

03 गच् छोद्धव व्रजम् सौम्य पित्रोर्नौ प्रीति मावह

गोपीनाम् मद् वियोगाधिम् मत् सन्देशैः विमोचय

04 ता मन् मनस्का मत् प्राणा मदर्थे त्यक्त दैहिकाः

माम् एव दयितम् प्रेष्ठम् आत्मानम् मनसा गताः

ये त्यक्त लोक धर्माश् च मदर्थे तान् बिभर् म्यहम्

05 मयि ताः प्रेयसाम् प्रेष्ठे दूरस्थे गोकुल स्त्रियः

स्मरन्त् यो ऽङ्ग विमुह् यन्ति विरह उत्कण्ठ्य विह्वलाः

06 धार यन्ति अति कृच् छ्रेण प्रायः प्राणान् कथञ्चन

प्रत् यागमन सन्देशैः वल्लव्यो मे मद् आत्मिकाः

07 श्री शुक उवाच

इत् युक्त उद्धवो राजन् सन्देशम् भर्तुर् आदृतः

आदाय रथम् आरुह्य प्रययौ नन्द गोकुलम्

08 प्राप्तो नन्द व्रजम् श्रीमान् निम्लोचति विभावसौ

छन्न यानः प्रविशताम् पशूनाम् खुर रेणुभिः

09 वासितार्थे ऽभि युध् यद्भिः नादितम् शुश्मिभिर् वृषैः

धावन्ती भिश् च वास्राभि रूधोभारैः स्व वत्सकान्

10 इतस् ततो विलङ्घद् भिः गोवत्सैर् मण्डितम् सितैः

गो दोह शब्दा भिरवम् वेणूनाम् निः स्वनेन च

11 गायन्ती भिश् च कर्माणि शुभानि बल कृष्णयोः

स्वलङ् कृताभिः गोपीभिः गोपैश् च सुवि राजितम्

12 अग्न्यर् कातिथि गो विप्र पितृ देवार् चनान् वितैः

धूप दीपैश् च माल् यैश् च गोपा वासैः मनोरमम्

13 सर्वतः पुष्पित वनम् द्विजालि कुल नादितम्

हम्स कारण्ड वाकीर्णैः पद्म षण्डैश् च मण्डितम्

14 तम् आगतम् समा गम्य कृष्णस्यानु चरम् प्रियम्

नन्दः प्रीतः परिष्वज्य वासुदेव धियार् चयत्

15 भोजितम् परमान् नेन सम्विष्टम् कशिपौ सुखम्

गत श्रमम् पर्य पृच्छत् पाद सम्वाहना दिभिः

16 कच्चिद् अङ्ग महा भाग सखा नः शूर नन्दनः

आस्ते कुशल् यपत् याद् यैः युक्तो मुक्तः सुहृद् व्रतः

17 दिष्ट्या कम्सो हतः पापः सानुगः स्वेन पाप्मना

साधूनाम् धर्म शीलानाम् यदूनाम् द्वेष्टि यः सदा

18 अपि स्मरति नः कृष्णो मातरम् सुहृदः सखीन्

गोपान् व्रजम् चात्म नाथम् गावो वृन्दा वनम् गिरिम्

19 अप्यायास् यति गोविन्दः स्वजनान् सकृ दीक्षितुम्

तर्हि द्रक्ष्याम तद् वक्त्रम् सुनसम् सुस्मि तेक्षणम्

20 दावाग्नेः वात वर्षाच् च वृष सर्पाच् च रक्षिताः

दुरत्य येभ्यो मृत् युभ्यः कृष्णेन सु महात्मना

21 स्मरताम् कृष्ण वीर्याणि लीला पाङ्ग निरीक्षि तम्

हसितम् भाषितम् चाङ्ग सर्वा नः शिथिलाः क्रियाः

22 सरिच्छैल वनोद् देशान् मुकुन्द पद भूषितान्

आक्रीडान् ईक्ष्य माणानाम् मनो याति तद् आत्मताम्

23 मन्ये कृष्णम् च रामम् च प्राप्ता विह सुरोत् तमौ

सुराणाम् मह दर्थाय गर्गस्य वचनम् यथा

24 कम्सम् नागा युत प्राणम् मल्लौ गज पतिम् तथा

अवधिष्टाम् लील यैव पशून् इव मृगाधि पः

25 ताल त्रयम् महा सारम् धनुर् यष्टिम् इवे भराट्

बभञ्जै केन हस्तेन सप्ताहम् अदधाद् गिरिम्

26 प्रलम्बो धेनुको ऽरिष्टः तृणा वर्तो बकादयः

दैत्याः सुरा सुर जितो हता येनेह लीलया

27 श्री शुक उवाच

इति सम्स् मृत्य सम्स् मृत्य नन्दः कृष्णानु रक्तधीः

अत्युत् कण्ठो ऽभवत् तूष्णीम् प्रेम प्रसर विह्वलः

28 यशोदा वर्ण्य मानानि पुत्रस्य चरितानि च

शृण्वन्त् यश्रूनि अवास् राक्षीत् स्नेहस् नुत पयोधरा

29 तयोर् इत्थम् भगवति कृष्णे नन्द यशोदयोः

वीक्ष्यानु रागम् परमम् नन्दम् आहोद्ध वो मुदा

30 श्री उद्धव उवाच

युवाम् श्लाघ् यत मौ नूनम् देहिना मिह मानद

नारायणे ऽखिल गुरौ यत् कृता मति रीद् ऋशी

31 एतौ हि विश्वस्य च बीज योनी रामो मुकुन्दः पुरुषः प्रधानम्

अन्वीय भूतेषु विलक्षणस्य ज्ञानस्य चेशात इमौ पुराणौ

32 यस्मिन् जनः प्राण वियोग काले क्षनम् समा वेश्य मनो ऽविशुद्धम्

निर्हृत्य कर्माशय माशु याति पराम् गतिम् ब्रह्म मयो ऽर्कवर्णः

33 तस्मिन् भवन्तौ अखिलात्म हेतौ नारायणे कारण मर्त्य मूर्तौ

भावम् विधत्ताम् नितराम् महात्मन् किम् वा वशिष्टम् युवयोः सुकृत्यम्

34 आगमिष् यत् यदीर् घेण कालेन व्रजम् अच्युतः

प्रियम् विधास् यते पित्रोः भगवान् सात्वताम् पतिः

35 हत्वा कम्सम् रङ्ग मध्ये प्रतीपम् सर्व सात्वताम्

यदा ह वः समा गत्य कृष्णः सत्यम् करोति तत्

36 मा खिद्यतम् महा भागौ द्रक्ष् यथः कृष्ण मन्तिके

अन्तर् हृदि स भूतानाम् आस्ते ज्योतिर् इवैधसि

37 न ह्यस् यास्ति प्रियः कश्चित् ना प्रियो वास्त्य मानिनः

नोत्तमो नाधमो नापि समा नस्यास मोऽपि वा

38 न माता न पिता तस्य न भार्या न सुता दयः

नात्मीयो न परश्चापि न देहो जन्म एव च

39 न चास्य कर्म वा लोके सदसन् मिश्र योनिषु

क्रीडार्थः सोऽपि साधूनाम् परित् राणाय कल्पते

40 सत्त्वम् रजस् तम इति भजते निर्गुणो गुणान्

क्रीडन् नतीतो ऽत्र गुणैः सृजत् यवति हन्त्यजः

41 यथा भ्रमरिका दृष्ट्या भ्राम्य तीव मही यते

चित्ते कर्तरि तत् रात्मा कर्तेवाहम् धिया स्मृतः

42 युव योरेव नैवायम् आत्मजो भगवान् हरिः

सर्वेषाम् आत्मजो ह्यात्मा पिता माता स ईश्वरः

43 दृष्टम् श्रुतम् भूत भवद् भविष् यत्

स्थास्नुः चरिष्णुर् महद् अल्प कम् च

विनाच् युताद् वस्तु तराम् न वाच्यम्

स एव सर्वम् परमात्र्म भूतः

44 एवम् निशा सा ब्रुवतोर् व्यतीता नन्दस्य कृष्णानु चरस्य राजन्

गोप्यः समुत् थाय निरूप्य दीपान् वास्तून् समभ् यर्च्य दधीन्य मन्थन्

45 ता दीप दीप्तैः मणिभिर् विरेजू रज्जूर्वि कर्षद् भुज कङ्कण स्रजः

चलन् नितम्बस् तन हार कुण्डल त्विषत् कपोला रुण कुङ्कु माननाः

46 उद्गाय तीनाम् अरविन्द लोचनम् व्रजाङ्ग नानाम् दिवमस् पृशद् ध्वनिः

दध् नश् च निर्मन्थन शब्द मिश्रितो निरस्यते येन दिशाम् अमङ्गळम्

47 भगवत् युदिते सूर्ये नन्द द्वारि व्रजौ कसः

दृष्ट्वा रथम् शात कौम्भम् कस्यायम् इति चाब्रुवन्

48 अक्रूर आगतः किम् वा यः कम्सस् यार्थ साधकः

येन नीतो मधु पुरीम् कृष्णः कमल लोचनः

49 किम् साधयिष् यत्य स्माभिः भर्तुः प्रीतस्य निष्कृतिम्

इति स्त्रीणाम् वदन् तीनाम् उद्धवो ऽगात् कृताह् निकः

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे पूर्वार्दे षड् चत्वारिम्शो ऽध्याय ः||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्द: सप्त चत्वारिम्शो ऽध्याय :

स्कन्द- *10:* अध्याय- *47*

*01* श्री शुक उवाच

तम् वीक्ष्य कृष्णानु चरम् व्रज स्त्रिय:

प्रलम्ब बाहुम् नव कञ्ज लोचनम्

पीताम्बरम् पुष्कर मालिनम्

लसन् मुखार विन्दम् मनिम्रुष्ट कुण्डलम्

*02* सुचिस्मता: को ऽय मपीच्य दर्शन:

कुतश् च कस् याच्युत वेष भूषण:

इति स्म सर्वा: परि वव्रु रुत् सुका:

तम् उत्तम: श्लोक पदाम्बु जाश्रयम्

*03* तम् प्रश्र येणा वन ता: सुसत् कृतम् सव्रीड हासेक्षण सूनृ तादिभि:

रहस्य पृच्छन् नुप विष्ट मासने विज्ञाय सन्देश हरम् रमा पते:

*04* जानी मस् त्वाम् यदु पते: पार्षदम् समु पागतम्

भर्त्रेह प्रेषित: पित्रो: भवान् प्रिय चिकीर्षया

*05* अन्यथा गो व्रजे तस्य स्मरणीयम् न चक्ष्महे

स्नेहानु बन्धो बन्धूनाम् मुनेर् अपि सुदुस् त्यज:

*06* अन्येषु अर्थ कृता मैत्री यावद् अर्थ विडम्बनम्

पुम्भि: स्त्रीषु कृता यद् वत् सुमन: स्विव षट् पदै:

*07* नि: स्वम् त्यजन्ति गणिका अकल्पम् नृपतिम् प्रजा:

अधीत विद्या आचार्यम् ऋत् विजो दत्त दक्षिणम्

*08* खगा वीत फलम् वृक्षम् भुक्त्वा चा तिथयो गृहम्

दग्धम् मृगास् तथ् आरण्यम् जारो भुक्त्वा रताम् स्त्रियम्

09 इति गोप्यो हि गोविन्दे गत वाक् काय मानसा:

कृष्ण दूते व्रजम् याते उद्धवे त्यक्त लौकिका:

10 गायन्त्य: प्रीय कर्माणि रुदत् यश् च गत ह्रिय:

तस्य सम्स्मृत्य सम्स्मृत्य यानि कैशोर बाल्ययो:

11 काचिन् मधु करम् दृष्ट्वा ध्यायन्ती कृष्ण सङ्गमम्

प्रिय प्रस्थापि तम् दूतम् कल्पयित् वेद मब्रवीत्

12 गोप्य उवाच

मधु प कितव बन्धो मा स्पृशङ्घ्रिम् स पत्न्या:

कुचवि लुलित माला कुङ्कुमश् मश्रु भिर्न:

वहतु मधुप तिस्तन् मानि नीनाम् प्रसादम्

यदु सदसि विडम्ब्यम् यस्य दूतस्त्व मी दृक्

13 सकृद धर सुधाम् स्वाम् मोहिनीम् पाय यित्वा

सुमनस इव सद्य: तत्यजे ऽस्मान् भवा दृक्

परि चरति कथम् तत् पाद पद्मम् तु पद्मा

ह्यपि बत हृत चेता उत्तम: श्लोक जल्पै:

14 किमिह बहु षडङ्घ्रे गायसि त्वम् यदू नाम्

अधि पति मगृ हाणाम् अग्रतो न: पुराणम्

विजय सख सखीनाम् गीयताम् तत् प्रसङ्ग:

क्षपित कुचरु जस्ते कल्पयन् तीष्ट मिष्टा:

15 दिवि भुवि च रसायाम् का: स्त्रियस् तद् दुरापा:

कपट रुचिर हास भ्रूवि जृम्भस्य या: स्यु:

चरण रज उपास्ते यस्य भूतिर् वयम् का

अपि च कृपण पक्षे ह्युत्तम: श्लोक शब्द:

16 विसृज शिरसि पादम् वेद्म्यहम् चाटु कारै:

अनुनय विदु षस्ते ऽभ्येत्य दौ त्यैर् मुकुन्दात्

स्वकृत इह विषृष्टा पत्य पत्यन् यलोका

व्यसृज दकृत चेताः किम् नु सन्धेय मस्मिन्

17 मृग युरिव क पीन्द्रम् विव्यधे लुब्ध धर्मा

स्त्रिय मकृत विरूपाम् स्त्री जितः काम यानाम्

बलिम् अपि बलि मत्त्वा वेष्ट यद् ध्वाङ्क्ष वद्यः

तदल मसित सख्यैः दुस्त्य जस् तत् कथार्थः

18 यदनु चरित लीला कर्ण पीयूष विप्रुट्

सकृद दन विधूत द्वन् द्व धर्मा विनष्टाः

सपदि गृह कुटुम्बम् दीन मुत् सृज्य दीना

बहव इह विहङ्गा भिक्षु चर्याम् चरन्ति

19 वय मृत मिव जिह्मव् याहृतम् श्रद्द धानाः

कुलि करुत मिवाज्ञाः कृष्ण वध्वो हरिण्यः

ददृशुर् असकृ देतत् तन्न खस् पर्श तीव्र

स्मर रुज उप मन्त्रिन् भण्य ताम् अन्य वार्ता

20 प्रिय सख पुन रागाः प्रेयसा प्रेषितः किम्

वरय कि मनु रुन्धे मान नीयोऽसि मेऽङ्ग

नयसि कथम् इहास्मान् दुस्त्यज द्वन्द्व पार्श्वम्

सतत मुरसि सौम्य श्रीर् वधूः साक मास्ते

21 अपि बत मधु पुर्याम् आर्य पुत्रो ऽधुनास्ते

स्मरति स पितृ गेहान् सौम्य बन्धूम्श् च गोपान्

क्वचिद् अपि स कथा नः किङ्करीणाम् गृणी ते

भुजम् अगुरु सुगन्धम् मूर्ध् न्यधास् यत् कदा नु

22 श्री शुक उवाच

अथो द्धवो निशम् यैवम् कृष्ण दर्शन लालसाः

सान्त्वयन् प्रिय सन्देशैः गोपीर् इदम् अभाषत

23 श्री उद्धव उवाच

अहो यूयम् स्म पूर्णार्था भवत्यो लोक पूजिताः

वासुदेवे भगवति यासाम् इत् यर्पितम् मनः

24 दान व्रत तपो होम जप स्वाध् याय सम्यमैः

श्रेयोभिर् विविधैश् चान्यैः कृष्णे भक्तिर् हि साध्यते

25 भगवत् युत्तमः श्लोके भवती भिर् अनुत्तमा

भक्तिः प्रवर्ति ता दिष्ट्या मुनीनाम् अपि दुर्लभा

26 दिष्ट्या पुत्रान् पतीन् देहान् स्वजनान् भवनानि च

हित्वा वृनीत यूयम् यत् कृष्णाख्यम् पुरुषम् परम्

27 सर्वात्म भावो ऽधिकृतो भव तीनाम् अधोक्षजे

विरहेण महा भागा महान् मे ऽनुग्रहः कृतः

28 श्रूय ताम् प्रिय सन्देशो भवतीनाम् सुखा वहः

यम् आदा यागतो भद्रा अहम् भर्तॄ रहस् करः

29 श्री भगवान् उवाच

भव तीनाम् वियोगो मे न हि सर्वात्मना क्वचित्

यथा भूतानि भूतेषु खम् वाय् वग्निर् जलम् मही

तथाहम् च मनः प्राण भूतेन्द्रिय गुणाश्रयः

30 आत्मन् येवात्मन् आत्मानम् सृजे हन्म् यनु पालये

आत्म मायानु भावेन भूतेन्द्रिय गुणात् मना

31 आत्मा ज्ञान मयः शुद्धो व्यति रिक्तो ऽगुणान् वयः

सुषुप्ति स्वप्न जाग्रद् भिः माया वृत्तिभिरी यते

32 येनेन्द्रि यार्थान् ध्या येत मृषा स्वप्नवद् उत्थितः

तन् निरुन्ध् याद् इन्द्रियाणि विनिद्रः प्रत्य पद्यत

33 एत दन्तः समाम् नायो योगः साङ्ख्यम् मनीषिणाम्

त्यागस् तपो दमः सत्यम् समुद्रान् ता इवा पगाः

34 यत् त्वहम् भवती नाम् वै दूरे वर्ते प्रियो दृशाम्

मनसः सन्नि कर्षार्थम् मद् अनुध्यान काम्यया

35 यथा दूर चरे प्रेष्ठे मन आविश्य वर्तते

स्त्रीणाम् च न तथा चेतः सन्नि कृष्टे ऽक्षि गोचरे

36 मय्या वेश्य मनः कृत्स्नम् विमुक्ता शेष वृत्ति यत्

अनुस् मरन्त्यो माम् नित्यम् अचिरान् माम् उपैष् यथ

37 या मया क्रीडता रात्र्याम् वने ऽस्मिन् व्रज आस्थिताः

अलब्ध रासाः कल्याण्यो मापुर् मद् वीर् य चिन्तया

38 श्री शुक उवाच

एवम् प्रियतमा दिष्टम् आकर्ण्य व्रज योषितः

ता ऊचुर् उद्धवम् प्रीताः तत् सन्देशा गत स्मृतीः

39 गोप्य ऊचुः

दिष्ट्या हितो हतः कम्सो यदूनाम् सानुगो ऽघ कृत्

दिष्ट् याप्तैः लब्ध सर्वार्थैः कुशल् यास्ते ऽच्युतो ऽधुना

40 कच्चिद् गदा ग्रजः सौम्य करोति पुर योषिताम्

प्रीतिम् नः स्निग्ध सव्रीड हासोदारे क्षणार् चितः

41 कथम् रति विशेषज्ञः प्रियश् च वर योषिताम्

नानु बध् येत तद् वाक्यैः विभ्रमैश् चानु भाजितः

42 अपि स्मरति नः साधो गोविन्दः प्रस्तुते क्वचित्

गोष्ठि मध्ये पुर स्त्रीणाम् ग्राम्याः स्वैर कथान् तरे

43 ताः किम् निशाः स्मरति यासु तदा प्रियाभिः

वृन्दा वने कुमुद कुन्द शशाङ्क रम्ये

रेमे क्वणच् चरण नूपुर रास गोष्ठ्याम्

अस्माभि रीडित मनोज्ञ कथः कदा चित्

44 अप्येष्य तीह दाशार्हः तप्ताः स्व कृतया शुचा

सञ्जीवयन् नु नो गात्रैः यथेन्द्रो वनम् अम्बुदैः

45 कस्मात् कृष्ण इहा याति प्राप्त राज्यो हता हितः

नरेन्द्र कन्या उद्वाह्य प्रीतः सर्व सुहृद् वृतः

46 किम् अस्माभिः वनौ कोभिः अन्या भिर्वा महात्मनः

श्रीपतेर् आप्त कामस्य क्रिये तार्थः कृत् आत्मनः

47 परम् सौख्यम् हि नैराश्यम् स्वैरिण् यप्याह पिङ्गळा

तज् जानती नाम् नः कृष्णे तथाप् याशा दुरत् यया

48 क उत्स हेत सन्त् यक्तुम् उत्तमः श्लोक सम्विदम्

अनिच् छतो ऽपि यस्य श्रीः अङ्गान् न च्यवते क्वचित्

49 सरिच् छैल वनोद् देशा गावो वेणुरवा इमे

सङ्कर्षण सहा येन कृष्णेना चरिताः प्रभो

50 पुनः पुनः स्मार यन्ति नन्द गोप सुतम् बत

श्रीनि केतैः तत् पदकैः विस्मर्तुम् नैव शक्नुमः

51 गत्या ललितयो दार हास लीलाव लोकनैः

माध्व्या गिरा हृत धियः कथम् तम् विस्म राम हे

52 हे नाथ हे रमा नाथ व्रज नाथार्ति नाशन

मग्न मुद्धर गोविन्द गोकुलम् वृजि नार्णवात्

53 श्री शुक उवाच

ततस् ताः कृष्ण सन्देशैः व्यपेत विरह ज्वराः

उद्धवम् पूजयाम् चक्रुः ज्ञात् वात्मानम् अधोक्षजम्

54 उवास कतिचिन् मासान् गोपीनाम् विनुदन् शुचः

कृष्ण लीला कथाम् गायन् रमया मास गोकुलम्

55 यावन् त्यहानि नन्दस्य व्रजे ऽवात् सीत् स उद्धवः

व्रजौ कसाम् क्षण प्रायाणि आसन् कृष्णस्य वार्तया

56 सरिद् वन गिरि द्रोणीः वीक्षन् कुसुमितान् द्रुमान्

कृष्णम् सम्स्मार यन् रेमे हरि दासो व्रजौ कसाम्

57 दृष्ट्वै वमादि गोपीनाम् कृष्णा वेशात्म विक्लवम्

उद्धवः परम प्रीतः ता नमस्यन् निदम् जगौ

58 एताः परम् तनु भृतो भुवि गोप वध्वो

गोविन्द एव निखिलात्मनि रूढ भावाः

वाञ्छन्ति यद् भव भियो मुनयो वयम् च
किम् ब्रह्म जन्मभिः अनन्त कथा रसस्य

59 क्वेमाः स्त्रियो वन चरीर् व्यभि चार दुष्टाः
कृष्णे क्व चैष परमात्मनि रूढ भावः
नन्वीश् वरो ऽनु भजतो ऽविदुषो ऽपि साक्षाच्
छ्रेयस् तनो त्यगद राज इवोप युक्तः

60 नायम् श्रियो ऽङ्ग उ नितान् तर तेः प्रसादः
स्वर्योषि ताम् नळिन गन्धरु चाम् कुतो ऽन्याः
रासोत् सवे ऽस्य भुज दण्ड गृहीत कण्ठ
लब्धा शिषाम् य उदगाद् व्रज वल्लभी नाम्

61 आसामहो चरण रेणु जुषामहम् स्याम्
वृन्दा वने किमपि गुल्म लतौ षधीनाम्
या दुस्त् यजम् स्वजन मार्य पथम् च हित्वा
भेजुर् मुकुन्द पदवीम् श्रुतिभिर् विमृग्याम्

62 या वै श्रियार् चितम् अजादिभिर् आप्त कामैः
योगेश् वरैर् अपि यदात् मनि रास गोष्ठ्याम्
कृष्णस्य तद् भगवतः चरणार विन्दम्
न्यस्तम् स्तनेषु विजहुः परि रभ्य तापम्

63 वन्दे नन्द व्रज स्त्रीणाम् पाद रेणुम् अभीक्ष्णशः
यासाम् हरि कथोद् गीतम् पुनाति भुवन त्रयम्

64 श्री शुक उवाच
अथ गोपीर् अनुज्ञाप्य यशोदाम् नन्द मेव च
गोपाना मन्त्र् य दाशार्हो यास्यन् आरुरु हे रथम्

65 तम् निर्गतम् समा साद्य नानो पायन पाणयः
नन्दा दयो ऽनुरा गेण प्रावोचन् नश्रु लोचनाः

66 मनसो वृत्तयो नः स्युः कृष्ण पादाम्बु जाश्रयाः

वाचो ऽभि धायिनीर् नाम्नाम् कायस् तत् प्रह्वणा दिषु

67 कर्मभिर् भ्राम्य माणानाम् यत्र क्वापी श्वरेच् छया

मङ्गळा चरितैर् दानै रतिर् नः कृष्ण ईश्वरे

68 एवम् सभा जितो गोपैः कृष्ण भक्त्या नराधिप

उद्धवः पुनर् आगच्छन् मथुराम् कृष्ण पालिताम्

69 कृष्णाय प्रणि पत्याह भक्त् युद् रेकम् व्रजौ कसाम्

वसुदेवाय रामाय राज्ञे चोपाय नान् यदात्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे पूर्वार्दे सप्त चत्वारिम्शो ऽध्याय ः||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्दः अष्ट चत्वारिम्शो ऽध्याय ः

स्कन्द- 10ः अध्याय- 48

01 श्री शुक उवाच

अथ विज्ञाय भगवान् सर्वात्मा सर्व दर्शनः

सैरन्ध्र्याः काम तप् तायाः प्रिय मिच्छन् गृहम् ययौ

02 महार् होपस् करै राढ्यम् कामो पायोप बृम्हितम्

मुक्ता दाम पता काभिः वितान शयना सनैः

धूपैः सुरभिभिर् दीपैः स्रग् गन्धैर् अपि मण्डितम्

03 गृहम् तमा यान्तम् अवेक्ष्य सासनात् सद्यः समुत् थाय हि जात सम्भ्रमा

यथोप सङ्गम् य सखीभिर् अच्युतम् स भाजया मास सदा सनादिभिः

04 त थोद्धवः साधु तयाभि पूजितो न्यषीद दुर्व्याम् अभि मृश्य चासनम्

कृष्णो ऽपि तूर्णम् शयनम् महा धनम् विवेश लोका चरितान् यनु व्रतः

05 सा मज्जना लेप दुकूल भूषण स्रग् गन्ध ताम्बूल सुधास वादिभिः

प्रसाधि तात् मोप स सार माधवम् सव्रीड लीलोत् स्मित विभ्र मेक्षितैः

06 आहूय कान्ताम् नव सङ्गम ह्रिया विशङ्किताम् कङ्कण भूषिते करे

प्रगृह्य शय्याम् अधिवेश्य रामया रेमे ऽनुलेप् आर्पण पुण्य लेशया

07 सा नङ्ग तप्त कुचयोर् उर सस्त थाक्ष्णोः

जिघ्रन्ति अनन्त चरणेन रुजो मृजन्ती

दोर्भ्याम् स्तनान् तर गतम् परि रभ्य कान्तम्

आनन्द मूर्ति मजहाद् अति दीर्घ तापम्

08 सैवम् कैवल्य नाथम् तम् प्राप्य दुष् प्रापम् ईश्वरम्

अङ्ग राग् आर्पणे नाहो दुर्भगे दमया चत

09 आहोष्य तामिह प्रेष्ठ दिनानि कति चिन्मया

रमस्व नोत्सहे त्यक् तुम् सङ्गम् ते ऽम्बुरु हेक्षण

10 तस्यै काम वरम् दत् त्वा मान यित्वा च मानदः

सह उद्धवेन सर्वेशः स्वधामा गमद् अर्चितम्

11 दुरा राध्यम् समा राध्य विष्णुम् सर्वेश् वरेश् वरम्

यो वृणीते मनो ग्राह्यम् असत्त् वात् कुमनीष् यसौ

12 अक्रूर भवनम् कृष्णः सह रामोद्धवः प्रभुः

किञ्चिच् चिकीर्षयन् प्रागाद् अक्रूर प्रिय काम्यया

13 स तान् नरवर श्रेष्ठान् आराद् वीक्ष्य स्व बान्धवान्

प्रत् युत्थाय प्रमुदितः परिष्वज् याभ्य नन्दत

14 ननाम कृष्णम् रामम् च स तैः अप्य भिवादितः

पूजया मास विधि वत् कृतासन परि ग्रहान्

15 पादा वने जनीर् आपो धारयन् शिरसा नृप

अर्हणे नाम्बरैर् दिव्यैः गन्धस्रग् भूषणोत् तमैः

16 अर्चित्वा शिरसा नम्य पादौ अङ्क गतौ मृजन्

प्रश्रया वन तो ऽक्रूरः कृष्ण रामौ अभाषत

17 दिष्ट्या पापो हतः कम्सः सानुगो वामिदम् कुलम्

भवद् भ्याम् उद्धृतम् कृच् छ्राद् दुरन् ताच् च समेधि तम्

18 युवाम् प्रधान पुरुषौ जगद् हेतू जगन् मयौ

भवद् भ्याम् न विना किञ्चित् परमस्ति न चापरम्

19 आत्म सृष्टम् इदम् विश्वम् अन्वा विश्य स्वशक्तिभिः

ईयते बहुधा ब्रह्मन् श्रुत प्रत्यक्ष गोचरम्

20 यथा हि भूतेषु चरा चरेषु मह्यादयो योनिषु भान्ति नाना

एवम् भवान् केवल आत्म योनिषु आत्मात्म तन्त्रो बहुधा विभाति

21 सृजस् यथो लुम्पसि पासि विश्वम् रजस् तमः सत्त्व गुणैः स्व शक्तिभिः

न बध्यसे तद् गुण कर्म भिर्वा ज्ञानात् मनस्ते क्वच बन्ध हेतुः

22 देहाद् युपाधेः अनिरूपि तत् वाद् भवो न साक्षान् न भिदात्मनः स्यात्

अतो न बन्धस् तव नैव मोक्षः स्याताम् निका मस्त्वयि नोऽवि वेकः

23 त्वयोदि तो ऽयम् जगतो हिताय यदा यदा वेद पथः पुराणः

बाध् येत पाखण्ड पथैर् असद्भिः तदा भवान् सत्त्व गुणम् बिभर्ति

24 स त्वम् प्रभो ऽद्य वसुदेव ग्रुहेऽव तीर्णः

स्वाम् शेन भारम् अपनेतु मिहासि भूमेः

अक्षौहिणी शत वधेन सुरेत राम्श

राज्ञाम् अमुष्य च कुलस्य यशो वितन् वन्

25 अद्येश नो वस तयः खलु भूरि भागा

यः सर्व देव पितृ भूत नृदेव मूर्तिः

यत् पाद शौच सलिलम् त्रि जगत् पुनाति

स त्वम् जगद् गुरु रधोक्ष जयाः प्रविष्टः

26 कः पण्डितस् त्वद् अपरम् शरणम् समीयाद्

भक्त प्रियाद् ऋत गिरः सुहृदः क्रुतज्ञात्

सर्वान्द दाति सुहृदो भजतोऽभि कामान्

आत्मानम् अपि उपचयाप चयौ न यस्य

27 दिष्ट्या जनार्दन भवान् इह नः प्रतीतो

योगेश्वरैर् अपि दुराप गतिः सुरेशैः

छिन्ध् याशु नः सुत कलत्र धनाप्त गेह

देहादि मोह रशनाम् भव दीय मायाम्

28 श्री शुक उवाच

इत् यर्चितः सम्स्तु तश् च भक्तेन भगवान् हरिः

अक्रूरम् सस्मितम् प्राह गीर्भिः सम् मोहयन् इव

29 श्री भगवान् उवाच

त्वम् नो गुरुः पितृव् यश् च श्लाघ्यो बन्धुश् च नित् यदा

वयम् तु रक्ष्याः पोष्याश् च अनुकम्प्याः प्रजा हि वः

30 भवद् विधा महा भागा निषेव्या अर्ह सत्तमाः

श्रेयस् कामैः नृभिर् नित्यम् देवाः स्वार्था न साधवः

31 न ह्यम् मयानि तीर्थानि न देवा मृच् छिला मयाः

ते पुनन्ति उरुकालेन दर्शना देव साधवः

32 स भवान् सुहृदाम् वै नः श्रेयान् श्रेयश् चिकीर् षया

जिज्ञा सार्थम् पाण्डवानाम् गच् छस्व त्वम् गजाह् वयम्

33 पितर्यु परते बालाः सह मात्रा सु दुः खिताः

आनीताः स्व पुरम् राज्ञा वसन्त इति शुश्रुम

34 तेषु राजा अम्बिका पुत्रो भ्रातृ पुत्रेषु दीनधीः

समो न वर्तते नूनम् दुष् पुत्र वशगो ऽन्धदृक्

35 गच्छ जानी हि तद् वृत्तम् अधुना साध्व साधु वा

विज्ञाय तद् विधास् यामो यथा शम् सुहृदाम् भवेत्

36 इत् यक्रूरम् समा दिश्य भगवान् हरि रीश्वरः

सङ्कर्षण् उद्धवाभ् याम् वै ततः स्व भवनम् ययौ

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे पूर्वार्दे अष्ट चत्वारिम्शो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्द: एकोन पञ्चा शत्तमो ऽध्याय :

स्कन्द- *10:* अध्याय- *49*

*01* श्री शुक उवाच

स गत्वा हास्तिन पुरम् पौर वेन्द्र यशो ऽङ्कि तम्

ददर्श तत् राम्बिके यम् सभीष्मम् विदुरम् पृथाम्

*02* सह पुत्रम् च बाह्लीकम् भारद् वाजम् स गौतमम्

कर्नम् सुयोधनम् द्रौणिम् पाण्डवान् सुहृदो ऽपरान्

*03* यथावद् उपसङ्गम्य बन्धुभिर् गान्दि नी सुत:

सम् पृष्टस् तै: सुहृद् वार्ताम् स्वयम् चा पृच्छ दव्ययम्

*04* उवास कतिचिन् मासान् राज्ञो वृत्त विवित्सया

दुष् प्रजस् याल्प सारस्य खलच् छन्दानु वर्तिन:

*05* तेज ओजो बलम् वीर्यम् प्रश्रया दीम्श् च सद् गुणान्

प्रजानु रागम् पार्थेषु न सहद् भिश्चि कीर्षितम्

*06* कृतम् च धार्त राष्ट्रैर् यद् गरदा नाद्य पेशलम्

आचख्यौ सर्व मेवास्मै पृथा विदुर एव च

*07* पृथा तु भ्रातरम् प्राप्तम् अक्रूरम् उप सृत् य तम्

उवाच जन्म निलयम् स्मरन् त्यश्रु कलेक्षणा

*08* अपि स्मरन्ति न: सौम्य पितरौ भ्रातरश् च मे

भगिन्यौ भ्रातृ पुत्राश् च जामय: सख्य एव च

09 भ्रात्रेयो भगवान् कृष्णः शरण्यो भक्त वत्सलः

पैतृष् वसेयान् स्मरति रामश्चाम् बुरु हेक्षणः

10 सापत्न मध्ये शोचन् तीम् वृकानाम् हरिणीमिव

सान्त् वयिष् यति माम् वाक्यैः पितृ हीनाम्श् च बालकान्

11 कृष्ण कृष्ण महा योगिन् विश्वात्मन् विश्व भावन

प्रपन्नाम् पाहि गोविन्द शिशुभिश् चाव सीदतीम्

12 नान्यत् तव पदाम् भोजात् पश्यामि शरणम् नृणाम्

बिभ्यताम् मृत्यु सम्साराद् ईस्वरस् याप वर्गिकात्

13 नमः कृष्णाय शुद्धाय ब्रह्मणे परमात्मने

योगेश् वराय योगाय त्वाम् अहम् शरणम् गता

14 श्री शुक उवाच

इत् यनु स्मृत्य स्वजनम् कृष्णम् च जगद् ईश्वरम्

प्रारुदद् दुः खिता राजन् भवताम् प्रपिता मही

15 सम दुः ख सुखो ऽक्रूरो विदुरश् च महा यशाः

सान्त् वया मासतुः कुन्तीम् तत् पुत्रोत् पत्ति हेतुभिः

16 यास्यन् राजा नमभ् येत्य विषमम् पुत्र लालसम्

अवदत् सुहृदाम् मध्ये बन्धुभिः सौहृदो दितम्

17 अक्रूर उवाच

भो भो वैचित्र वीर्य त्वम् कुरूणाम् कीर्ति वर्धन

भ्रातर् युपरते पाण्डौ अधुना आसन मास्थितः

18 धर्मेण पालयन् उर्वीम् प्रजाः शीलेन रञ्जयन्

वर्तमानः समः स्वेषु श्रेयः कीर्तिम् अवाप्स्यसि

19 अन्यथा त्वा चरन् लोके गर्हितो यास्य से तमः

तस्मात् समत्वे वर्तस्व पाण्डवेष् वात्म जेषु च

20 नेह चात् यन्त सम्वासः कर्हिचित् केनचित् सह

राजन् स्वेनापि देहेन किमु जा यात्म जादिभिः

21 एकः प्रसूयते जन्तुः एक एव प्रलीय ते

एको ऽनु भुङ्क्ते सुकृतम् एक एव च दुष् कृतम्

22 अधर्मोप चितम् वित्तम् हरन्त् यन्ये ऽल्प मेधसः

सम्भोज नीयाप देशैः जला नीव जलौ कसः

23 पुष्णाति यान् अधर्मेण स्व बुद्ध्या तम पण्डितम्

ते ऽकृतार्थम् प्रहिण् वन्ति प्राणारायः सुता दयः

24 स्वयम् किल्बिष मादाय तैस्त् यक्तो नार्थ कोविदः

असिद् धार्थो विशत् यन्धम् स्वधर्म विमुखस् तमः

25 तस्माल् लोकम् इमम् राजन् स्वप्न माया मनोरथम्

वीक्ष्यायम् यात्म नात्मानम् समः शान्तो भव प्रभो

26 धृतराष्ट्र उवाच

यथा वदति कल्याणीम् वाचम् दान पते भवान्

तथान या न तृप्यामि मर्त्यः प्राप्य यथाम् ऋतम्

27 तथापि सूनृता सौम्य हृदि न स्थीयते चले

पुत्रानु राग विषमे विद्युत् सौदामनी यथा

28 ईश्वरस्य विधिम् को नु विधुनोत् यन्य था पुमान्

भूमेर् भाराव ताराय यो ऽवतीर्णो यदोः कुले

29 यो दुर्वि मर्श पथया निज माय येदम्

सृष्ट्वा गुणान् विभजते तद् अनु प्रविष्टः

तस्मै नमो दुरव बोध विहार तन्त्र

सम्सार चक्र गतये परमेश् वराय

30 श्री शुक उवाच

इत् यभि प्रेत्य नृपतेः अभिप्रायम् स यादवः

सुहृद्भिः समनु ज्ञातः पुनर् यदु पुरी मगात्

31 शशम्स राम कृष्णाभ्याम् धृत राष्ट्र विचेष्टितम्

पाण्डवान् प्रति कौरव्य यदर्थम् प्रेषितः स्वयम्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे पूर्वार्दे एकोन पञ्चा शत्तमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्द: उत्तरार्द: पञ्चा शत्तमो ऽध्याय :

स्कन्द- *10:* अध्याय- *50*

*01* श्री शुक उवाच

अस्ति: प्राप्तिश् च कम्सस्य महिष्यौ भरतर् षभ

मृते भर्तरि दु: खार्ते ईयतु: स्म पितुर् गृहान्

*02* पित्रे मगध राजाय जरा सन्धाय दु: खिते

वेदयाम् चक्रतु: सर्वम् आत्मवै धव्य कारणम्

*03* स तद् अप्रिय माकर्ण्य शोका मर्ष युतो नृप

अयाद वीम् महीम् कर्तुम् चक्रे परमम् उद्यमम्

*04* अक्षौहिणी भिर् विम्शत्या तिसृभिश् चापि सम्वृत:

यदुराज धानीम् मथुराम् न्यरुणत् सर्वतो दिशम्

*05* निरीक्ष्य तद् बलम् कृष्ण उद्वेलम् इव सागरम्

स्वपुरम् तेन सम् रुद्धम् स्वजनम् च भया कुलम्

*06* चिन्तया मास भगवान् हरि: कारण मानुष:

तद् देश कालानु गुणम् स्वाव तार प्रयोजनम्

*07* हनिष् यामि बलम् ह्येतद् भुवि भारम् समा हितम्

माग धेन समानी तम् वश्यानाम् सर्व भू भुजाम्

*08* अक्षौहिणी भि: सङ्ख्यातम् भटा आश्वरथ कुञ्जरै:

मागधस्तु न हन् तव्यो भूयः कर्ता बलोद् यमम्
09 एत दर्थो ऽवतारो ऽयम् भूभार हरणाय मे
सम् रक्षणाय साधूनाम् कृतो ऽन्येषाम् वधाय च
10 अन्यो ऽपि धर्म रक्षा यै देहः सम् भ्रियते मया
विरा मायाप्य धर्मस्य काले प्रभवतः क्वचित्
11 एवम् ध्यायति गोविन्द आकाशात् सूर्य वर्चसौ
रथौ उपस्थितौ सद्यः स सूतौ स परिच् छदौ
12 आयुधानि च दिव्यानि पुराणानि यदृच् छया
दृष्ट्वा तानि हृषी केशः सङ्कर्षणम् अथाब्र वीत्
13 पश्यार्य व्यसनम् प्राप्तम् यदूनाम् त्वा वताम् प्रभो
एष ते रथ आयातो दयितान् यायुधा नि च
14 यान मास्थाय जह् येतद् व्यसनात् स्वान् समुद्धर
एत दर्थम् हि नौ जन्म साधूनाम् ईश शर्म कृत्
त्रयो विम्श त्यनी काख्यम् भूमेर् भारम् अपाकुरु
15 एवम् सम्मन्त्र्य दाशार् हौ दम्शितौ रथि नौ पुरात्
निर्जग्म तुः स्वायु धाढ्यौ बलेन् आल्पी यसा वृतौ
16 शङ्खम् दध्मौ विनिर् गत्य हरिर् दारुक सारथिः
ततो ऽभूत् पर सैन्यानाम् हृदि वित्रास वेपथुः
17 तावाह मागधो वीक्ष्य हे कृष्ण पुरुषा धम
न त्वया योद्धु मिच्छामि बाले नैकेन लज्जया
गुप्तेन हि त्वया मन्द न योत्स्ये याहि बन्धुहन्
18 तव राम यदि श्रद्धा युध् यस्व धैर्य मुद् वह
हित्वा वा मच् छरैश् छिन्नम् देहम् स्वर्याहि माम् जहि
19 श्री भगवान् उवाच
न वै शूरा विकत् थन्ते दर्शयन् त्येव पौरुषम्
न गृह्णीमो वचो राजन् आतुरस्य मुमूर् षतः

20 श्री शुक उवाच

जरासुतस् तावभि सृत्य माधवौ महा बलौ घेन बलीय सावृनोत्

स सैन्य यान ध्वजवाजि सारथी सूर्यान लौ वायुर् इवाभ्र रेणुभिः

21 सुपर्ण ताल ध्वज चिह्नितौ रथौ

अलक्ष यन्त्यो हरि राम योर्मृधे

स्त्रियः पुराट् टालक हर्म्य गोपुरम्

समाश् रिताः सम् मुमुहुः शुचार् दितः

22 हरिः परान् ईक पयोमु चाम् मुहुः शिली मुखात् युल्बण वर्ष पीडितम्

स्व सैन्य मालोक्य सुरा सुरार्चितम् व्यस्फूर् जयच् छार्ङ्ग शरास नोत्तमम्

23 गृह्णन्नि शङ्गा दथ सन्द धच् छरान्

विकृष्य मुञ्चन् शित बाण पूगान्

निघ्नन् रथान् कुञ्जर वाजि पत्तीन्

निरन् तरम् यद् वद् अलात चक्रम्

24 निर्भिन्न कुम्भाः करिणो निपेतुः अनेक शो ऽश्वाः शर वृक्ण कन्धराः

रथा हताश् व ध्वज सूत नायकाः पदायतश् छिन्न भुजोरु कन्धराः

25 सञ्छिद् यमान द्विपदे भवाजिनाम् अङ्ग प्रसूताः शतशो ऽसृगा पगाः

भुजा हयः पूरुष शीर्ष कच्छपा हत द्विप द्वीप हय ग्रहा कुलाः

26 करोरु मीना नर केश शैवला धनुस् तरङ्गा युध गुल्म सङ्कुलाः

अच्छूरिका वर्त भयान का महा मणिप्रवेका भरणाश्म शर्कराः

27 प्रवर्तिता भीरु भयाव हा मृधे मनस् विनाम् हर्ष करीः परस् परम्

विनिघ्न तारीन् मुसलेन दुर् मदान् सङ्कर्षणे ना परीमेयते जसा

28 बलम् तदङ् गार्णव दुर्ग भैरवम् दुरन्त पारम् मग धेन्द्र पालितम्

क्षयम् प्रणीतम् वसुदेव पुत्र योर् विक्रीडितम् तज् जगदीश योः परम्

29 स्थित् युद् भवान् तम् भुवन त्रयस्य यः

समीहते ऽनन्त गुणः स्व लीलया

न तस्य चित्रम् पर पक्ष निग्रहः

तथापि मर्त्यानु विधस्य वर्ण्यते

30 जग्राह विरथम् रामो जरासन्धम् महा बलम्

हता नीकाव शिष्टासुम् सिम्हः सिम्ह मिवौजसा

31 बध्य मानम् हता रातिम् पाशैर् वारुण मानुषैः

वारया मास गोविन्दः तेन कार्य चिकीर् षया

32 स मुक्तो लोक नाथाभ्याम् व्रीडितो वीर सम्मतः

तपसे कृत सङ्कल्पो वारितः पथि राजभिः

33 वाक्यैः पवित्रा अर्थ पदैः नयनैः प्राकृतैर् अपि

स्वकर्म बन्ध प्राप्तो ऽयम् यदु भिस्ते परा भवः

34 हतेषु सर्वानी केषु नृपो बार्हद् रथस् तदा

उपेक्षितो भगवता मगधान् दुर्म ना ययौ

35 मुकुन्दो ऽप्यक्षत बलो निस्तीर्णारि बलार्णवः

विकीर्य माणः कुसुमैः त्रिदशैर् अनु मोदितः

36 माथुरैर् उप सङ्गम्य विज्वरैर् मुदि तात् मभिः

उपगीय मान विजयः सूत मागध वन्दिभिः

37 शङ्ख दुन्दुभ यो नेदुः भेरी तूर्याणि अनेकशः

वीणा वेणु मृदङ्गानि पुरम् प्रविशति प्रभौ

38 सिक्त मार्गाम् हृष्ट जनाम् पता काभिर् अलङ्कृताम्

निर् घुष्टाम् ब्रह्म घोषेण कौतुका बद्ध तोरणाम्

39 निचीय मानो नारीभिः माल्य दध् यक्षताङ् कुरैः

निरीक्ष्य माणः स स्नेहम् प्रीत्युत् कलित लोचनैः

40 आयोधन गतम् वित्तम् अनन्तम् वीर भूषणम्

यदु राजाय तत् सर्वम् आहृतम् प्रादि शत् प्रभुः

41 एवम् सप्त दश कृत्वः तावत् यक्षौहिणी बलः

युयुधे मागधो राजा यदुभिः कृष्ण पालितैः

42 अक्षिण् वम्स्तद् बलम् सर्वम् वृष्णयः कृष्ण तेजसा

हतेषु स्वेष्व नीकेषु त्यक्तो ऽयाद् हरिभिर् नृपः

43 अष्टा दशम सङ्ग्रामे आगा मिनि तदन् तरा

नारद प्रेषितो वीरो यवनः प्रत्य दृश्यत

44 रुरोध मथुरा मेत्य तिसृभिर् म्लेच्छ कोटिभिः

नृलोके चाप्र तिद् वन्द्वो वृष्णीन् श्रुत् वात्म सम्मितान्

45 तम् दृष्ट्वा चिन्त यत् कृष्णः सङ्कर्षण सहाय वान्

अहो यदूनाम् वृजिनम् प्राप्तम् ह्युभयतो महत्

46 यवनो ऽयम् निरुन् धे ऽस्मान् अद्य तावन् महाबलः

मागधो ऽप्यद्य वाश् वोवा परश्वो वागमिष् यति

47 आवयोः युध्यतोर् अस्य यद्या गन्ता जरासुतः

बन्धून् वदिष्यत् यथ वा नेष्यते स्वपुरम् बली

48 तस्मा दद्य विधा स्यामो दुर्गम् द्विपद दुर्गमम्

तत्र ज्ञातीन् समाधाय यवनम् घातया महे

49 इति सम्मन्त्र्य भगवान् दुर्गम् द्वा दश योजनम्

अन्तः समुद्रे नगरम् कृत्स्नाद् भुतम् अचीकरत्

50 दृश्यते यत्र हि त्वाष्ट्रम् विज्ञानम् शिल्पनै पुणम्

रथ्या चत्वर वीथीभिः यथा वास्तु विनिर् मितम्

51 सुरद्रु मलतो द्यान विचित्रो पव नान्वितम्

हेम शृङ्गैर् दिविस् पृग्भिः स्फाटि काट्टाल गोपुरैः

52 राज तार कुटैः कोष्ठैः हेम कुम्भैर् अलङ्कृतैः

रत्न कूटैर् गृहैर् हैमैः महा मरकतस् थलैः

53 वास्तोष् पतीनाम् च गृहैः वलभी भिश् च निर्मितम्

चातुर् वर्ण्य जना कीर्णम् यदु देव गृहोल् लसत्

54 सुधर्माम् पारि जातम् च महेन्द्रः प्राहिणोद् हरेः

यत्र चावस् थितो मर्त्यो मर्त्य धर्मैर्न युज् यते

55 श्यामैक कर्णान् वरुणो हयान् शुक्लान् मनो जवान्

अष्टौ निधिपतिः कोशान् लोकपालो निजो दयान्

56 यद् यद् भगवता दत्तम् आधि पत्यम् स्व सिद्धये

सर्वम् प्रत् यर्पया मासुः हरौ भूमि गते नृप

57 तत्र योग प्रभा वेन नीत्वा सर्व जनम् हरिः

प्रजा पालेन रामेण कृष्णः स मनु मन्त्रितः

निर्ज गाम पुर द्वारात् पद्म माली निरायुधः

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे पन्चा शत्तमो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्दः एक पन्चा शत्तमो ऽध्याय :

स्कन्द- 10: अध्याय- 51

01 श्री शुक उवाच

तम् विलोक्य विनिष् क्रान्तम् उज्जिहानम् इवोडुपम्

दर्श नीय तमम् श्यामम् पीत कौशेय वाससम्

02 श्रीवत्स वक्षसम् भ्राजत् कौस्तुभा मुक्त कन्धरम्

पृथु दीर्घ चतुर् बाहुम् नव कन्जारु णेक्षणम्

03 नित्य प्रमुदितम् श्रीमत् सुकपोलम् शुचि स्मितम्

मुखार विन्दम् बिभ्राणम् स्फुरन् मकर कुण्डलम्

04 वासुदेवो ह्ययम् इति पुमान् श्रीवत्स लान्छनः

चतुर् भुजो ऽरविन्दाक्षो वनमालि अति सुन्दरः

05 लक्षणैर् नारद प्रोक्तैः नान्यो भवितु मर्हति

निरायुधश् चलन् पद्भ्याम् योत्स्ये ऽनेन निरायुधः

06 इति निश्चित्य यवनः प्राद्र वन्तम् पराङ् मुखम्

अन्वधावज् जिघृ क्षुस्तम् दुराप मपि योगिनाम्

07 हस्त प्राप्त मिवात् मानम् हरीणा स पदे पदे

नीतो दर्श यता दूरम् यवनेशो ऽद्रि कन्दरम्

08 पलायनम् यदु कुले जातस्य तव नोचितम्

इति क्षिपन् अनुगतो नैनम् प्रापा हता शुभः

09 एवम् क्षिप्तो ऽपि भगवान् प्राविशद् गिरि कन्दरम्

सोऽपि प्रविष्टः तत् रान्यम् शयानम् ददृशे नरम्

10 नन्वसौ दूर मानीय शेते मामिह साधु वत्

इति मत् वाच्युतम् मूढः तम् पदा समताड यत्

11 स उत्थाय चिरम् सुप्तः शनैर् उन्मील्य लोचने

दिशो विलोकयन् पार्श्वे तमद् राक्षीद वस्थितम्

12 स ता वत् तस्य रुष्टस्य दृष्टि पातेन भारत

देहजे नाग्नि ना दग्धो भस्मसाद् अभवत् क्षणात्

13 श्री राजो उवाच

को नाम स पुमान् ब्रह्मन् कस्य किम्वीर्य एव च

कस्माद् गुहाम् गतः शिष्ये किम् तेजो यवनार् दनः

14 श्री शुक उवाच

स इक्ष्वाकु कुले जातो मान्धातृ तनयो महान्

मुचुकुन्द इति ख्यातो ब्रह्मण्यः सत्य सङ्गरः

15 स याचितः सुरगणैः इन्द्राद् यैः आत्म रक्षणे

असुरेभ्यः परित्रस् तैः तद् रक्षाम् सो ऽक रोच्चिरम्

16 लब्ध्वा गुहम् ते स्वः पालम् मुचुकुन्दम् अथाब्रुवन्

राजन् विरम ताम् कृच्छ्राद् भवान् नः परिपाल नात्

17 नरलोके परित् यज्य राज्यम् निहत कण्टकम्

अस्मान् पाल यतो वीर कामास्ते सर्व उज्झिताः

18 सुता महिष्यो भवतो ज्ञातयो ऽमात्य मन्त्रिनः

प्रजाश् च तुल्य कालीया नाधुना सन्ति कालिताः

19 कालो बलीयान् बलिनाम् भगवान् ईश्वरो ऽव्ययः

प्रजाः काल यते क्रीडन् पशु पालो यथा पशून्

20 वरम् वृणीष्व भद्रम् ते ऋते कैवल्य मद्य नः

एक एवेश् वरस् तस्य भगवान् विष्णु रव्ययः

21 एव मुक्तः स वै देवान् अभि वन्द्य महा यशाः

अश यिष्ट गुहा विष्टो निद्रया देव दत् तया

स्वापम् यातम् यस्तु मध्ये बोध येत् त्वाम चेतन

स त्वया दृश्ट मा त्रस्तु बस्मी बवदु द क्शनात्

22 यवने भस्म सान्नीते भगवान् सात्व तर्षभः

आत्मानम् दर्शया मास मुचुकुन्दाय धीमते

23 तमा लोक्य घन श्यामम् पीत कौशेय वाससम्

श्रीवत्स वक्षसम् भ्राजत् कौस्तु भेन विराजितम्

24 चतुर् भुजम् रोच मानम् वैजयन्त् या च मालया

चारु प्रसन्न वदनम् स्फुरन् मकर कुण्डलम्

25 प्रेक्षणीयम् नृलो कस्य सानु राग स्मिते क्षणम्

अपीच्य वयसम् मत्त मृगेन्द्रो दार विक्रमम्

26 पर्य पृच्छन् महा बुद्धिः तेजसा तस्य धर्षितः

शङ्कितः शनकै राजा दुर् धर्षम् इव तेजसा

27 श्री मुचुकुन्द उवाच

को भवान् इह सम्प्राप्तो विपिने गिरि गहवरे

पद्भ्याम् पद्म पला शाभ्याम् विचरस् युरु कण्टके

28 किम् स्वित् तेजस् विनाम् तेजो भगवान् वा विभा वसुः

सूर्यः सोमो महेन्द्रो वा लोक पालो परो ऽपि वा

29 मन्ये त्वाम् देव देवानाम् त्रयाणाम् पुरुषर् षभम्

यद् बाधसे गुहाध् वान्तम् प्रदीपः प्रभया यथा

30 शुश्रूष ताम् अव्य लीकम् अस्माकम् नर पुङ्गव

स्वजन् म कर्म गोत्रम् वा कथ् यताम् यदि रोचते

31 वयम् तु पुरुष व्याघ्र ऐक्ष्वाकाः क्षत्र बन्धवः

मुचुकुन्द इति प्रोक्तो यौवना श्वात्म जः प्रभो

32 चिर प्रजा गर श्रान्तो निद्रयोप हतेन्द्रियः

शये ऽस्मिन् विजने कामम् केनाप् युत् थापितो ऽधुना

33 सो ऽपि भस्मी कृतो नूनम् आत्मी येनैव पाप्मना

अनन्तरम् भवान् श्रीमान् लक्षितो ऽमित्र शातनः

34 तेजसा ते ऽविषह्येण भूरि द्रष्टुम् न शक्नुमः

हतौ जसो महा भाग मान नीयो ऽसिदेहिनाम्

35 एवम् सम्भाषितो राज्ञा भगवान् भूत भावनः

प्रत् याह प्रहसन् वाण्या मेघ नाद गभीरया

36 श्री भगवान् उवाच

जन्म कर्माभि धानानि सन्ति मे ऽङ्ग सहस्र शः

न शक् यन्ते ऽनु सङ्ख्यातुम् अनन्तत्वान् मयापि हि

37 क्वचिद् रजाम्सि विममे पार्थिवान् युरु जन्मभिः

गुण कर्मा भिधा नानि न मे जन्मानि कर्हिचित्

38 काल त्रयोप पन्नानि जन्म कर्माणि मे नृप

अनुक्र मन्तो नैवान् तम् गच्छन्ति परमर् षयः

39 तथाप् यद् यत नान् यङ्ग शृनुष्व गदतो मम

विज्ञापितो विरिञ्चेन पुराहम् धर्म गुप्तये

40 भूमेर् भाराय माणानाम् असुराणाम् क्षयाय च

अवतीर्णो यदु कुले गृह आनक दुन्दुभेः

वदन्ति वासुदे वेति वसुदेव सुतम् हि माम्

41 कालनेमिर् हतः कम्सः प्रलम्बाद् याश् च सद् द्विषः

अयम् च यवनो दग्धो राजम्स्ते तिग्म चक्षुषा

42 सो ऽहम् तवानु ग्रहार्थम् गुहा मेताम् उपागतः

प्रार्थितः प्रचुरम् पूर्वम् त्वयाहम् भक्त वत्सलः

43 वरान् वृणीष्व राजर्षे सर्वान् कामान् ददामि ते

माम् प्रबन्नो जनः कश्चिन् न भूयो ऽर्हति शोचितुम्

44 श्री शुक उवाच

इत् युक् तस्तम् प्रणम् याह मुचुकुन्दो मुदान् वितः

ज्ञात्वा नारायणम् देवम् गर्ग वाक्यम् अनुस्मरन्

45 श्री मुचुकुन्द उवाच

विमोहि तो ऽयम् जन ईश मायया त्वदीयया त्वाम् न भजत् यनर्थ दृक्

सुखाय दुः ख प्रभवेषु सज्जते गृहेषु योषित् पुरुषश् च वञ्चितः

46 लब्ध्वा जनो दुर्लभ मत्र मानुषम्

कथञ्चि दव् यङ्गम् अयत्न तो ऽनघ

पादार विन्दम् न भजत्य सन्मतिः

गृहान्ध कूपे पतितो यथा पशुः

47 ममैष कालो ऽजित निष्फलो गतो राज्य श्रियोन् नद् धमदस्य भू पतेः

मर्त् यात्म बुद्धेः सुत दार कोश भूषु आसज्ज मानस्य दुरन्त चिन्तया

48 कलेवरे ऽस्मिन् घट कुड्य सन्निभे

निरूढ मानो नरदेव इत्यहम्

वृतो रथे भाश्व पदात्य नीक पैः

गाम् पर्यटम् स्त्वा गणयन् सुदुर् मदः

49 प्रमत्त मुच्चैर् इति कृत्य चिन्तया प्रवृद्ध लोभम् विषयेषु लालसम्

त्वम् अप्र मत्तः सह साभि पद्यसे क्षुल् लेलिहानो ऽहिरिवा खुमन्तकः

50 पुरा रथैर् हेम परिष् कृतैश् चरन्

मतन्ग जैर्वा नरदेव सम्ज्ञितः

स एव कालेन दुरत्य येन ते

कलेवरो विट् कृमि भस्म सम्ज्ञित:

51 निर्जित्य दिक् चक्रम भूत विग्रहो वरासनस् थ: सम राज वन्दित:

गृहेषु मैथुन्य सुखेषु योषि ताम् क्रीडा मृग: पूरुष ईश नीयते

52 करोति कर्माणि तप: सुनिष्ठितो निवृत्त भोगस् तद् अपेक्ष याद दत्

पुनश् च भूयेय महम् स्वराडिति प्रवृद्ध तर्षो न सुखाय कल्पते

53 भवाप वर्गो भ्रमतो यदा भवेत् जनस्य तर् ह्यच्युत सत् समागम:

सत् सङ्ग मो यर्हि तदैव सद् गतौ परावरे शे त्वयि जायते मति:

54 मन्ये म मानुग्रह ईश ते कृतो राज्यानु बन्धाप गमो यदृच् छया

य: प्रार्थ्यते साधु भिरेक चर्यया वनम् विविक्षद् भिर् अखण्ड भूमिपै:

55 न काम ये ऽन्यम् तव पाद सेवनाद् अकिन्चन प्रार्थ् यत माद् वरम् विभो

आराध्य कस्त्वाम् ह्यपवर् गदम् हरे वृणीत आर्यो वरम् आत्म बन्धनम्

56 तस्माद् विसृज्या शिष ईश सर्वतो रजस् तम: सत्त्व गुणानु बन्धना:

निरन्जनम् निर्गुण मद् वयम् परम् त्वाम् ज्ञप्ति मात्रम् पुरुषम् व्रजाम् यहम्

57 चिर मिह वृजिनार् तस् तप्य मानो ऽनु तापैर्

अवि तृष षड मित्रो ऽलब्ध शान्ति: कथञ्चित्

शरणद समुपेतस् त्वत् पदाब्जम् परात्मन्

अभय मृतम शोकम् पाहि मा पन्न मीश

58 श्री भगवान् उवाच

सार्व भौम महा राज मतिस्ते विम लोर्जिता

वरै: प्रलोभि तस्यापि न कामैर् विहता यत:

59 प्रलोभितो वरैर् यत्त्वम् अप्र मादाय विद्धि तत्

न धीर् मय्येक भक्तानाम् आशीर्भिर् भिद्यते क्वचित्

60 युन्जा नानाम् अभक्तानाम् प्राणायाम् आदि भिर्मन:

अक्षीण वासनम् राजन् दृश्यते पुनर् उत्थितम्

61 विचरस्व महीम् कामम् मय्या वेशित मानस:

अस्त्वेव नित्यदा तुभ्यम् भक्तिर् मय् यन पायिनी

62 क्षात्र धर्मस् थितो जन्तून् न्यवधीर् मृग यादिभि:

समाहितस् तत् तपसा जह्यघम् मदु पाश्रित:

63 जन्मन् यनन्तरे राजन् सर्व भूत सुहृत्तम:

भूत्वा द्विज वरस्त्वम् वै माम् उपैष् यसि केवलम्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे एक पञ्चा शत्तमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्द: द्वि पञ्चा शत्तमो ऽध्याय :

स्कन्द- 10: अध्याय- 52

01 श्री शुक उवाच

इत्थम् सो ऽनुग्रहीतो ऽन्ग कृष्णे नेक्ष्वा कु नन्दन:

तम् परिक्रम्य सन्नम्य निश् चक्राम गुहा मुखात्

02 स वीक्ष्य क्षुल्लकान् मर्त्यान् पशून् वीरुद् वनस् पतीन्

मत्वा कलियुगम् प्राप्तम् जगाम दिशम् उत्तराम्

03 तप: श्रद्धा युतो धीरो नि: सङ्गो मुक्त सम्शय:

समा धाय मन: कृष्णे प्राविशद् गन्ध मादनम्

04 बदर् याश्रम मासाद्य नर नारायणा लयम्

सर्व द्वन्द्व सह: शान्त: तपसा आराधयद् हरिम्

05 भगवान् पुनरा व्रज्य पुरीम् यवन वेष्टिताम्

हत्वा म्लेच्छ बलम् निन्ये तदीयम् द्वारकाम् धनम्

06 नीय माने धने गोभिः नृभिश् चाच्युत चोदितैः

आज गाम जरा सन्धः त्रयो विम्शत् यनी कपः

07 विलोक्य वेग रभसम् रिपु सैन्यस्य माधवौ

मनुष्य चेष्टाम् आपन्नौ राजन् दुद्रुव तुर् द्रुतम्

08 विहाय वित्तम् प्रचुरम् अभीतौ भीरु भीत वत्

पद्भ्याम् पद्म पला शाभ्याम् चेरतुर् बहु योजनम्

09 पलाय मानौ तौ दृष्ट्वा मागधः प्रहसन् बली

अन्वधा वद् रथा नीकैः ईशयोर् अप्रमाण वित्

10 प्रद्रुत्य दूरम् सम् श्रान्तौ तुङ्गम् आरुहताम् गिरिम्

प्रवर् षणाख्यम् भगवान् नित्यदा यत्र वर्षति

11 गिरौ निलीनौ आज्ञाय नाधि गम्य पदम् नृप

ददाह गिरि मेधोभिः समन्ताद् अग्नि मुत् सृजन्

12 तत उत्पत्य तरसा दह्य मान तटाद् उभौ

दशैक योजनात् तुङ्गात् निपेततुर् अधो भुवि

13 अलक्ष्य माणौ रिपुणा सानुगेन यदूत् तमौ

स्वपुरम् पुनर् आयातौ समुद्र परिखाम् नृप

14 सोऽपि दग्धा विति मृषा मन्वानो बल केशवौ

बलम् आकृष्य सुमहन् मगधान् मागधो ययौ

15 आनर्ताधि पतिः श्रीमान् रैवतो रेवतीम् सुताम्

ब्रह्मणा चोदितः प्रादाद् बला येति पुरो दितम्

16 भगवान् अपि गोविन्द उपयेमे कुरूद् वह

वैदर्भीम् भीष्मक सुताम् श्रियो मात्राम् स्वयम् वरे

17 प्रमथ्य तरसा राज्ञः शाल्वा दीम्श् चैद्य पक्षगान्

पश् यताम् सर्व लोकानाम् ताक्ष्र्य पुत्रः सुधाम् इव

18 श्री राजो उवाच

भगवान् भीष्मक सुताम् रुक्मिणीम् रुचि राननाम्

राक्ष सेन विधा नेन उपयेम इति श्रुतम्

19 भगवन् श्रोतु मिच्छामि कृष्ण स्यामि तते जसः

यथा मागध शाल्वादीन् जित्वा कन्याम् उपाहरत्

20 ब्रह्मन् कृष्ण कथाः पुण्या माध्वीर् लोक मला पहाः

को नु तृप् येत शृण्वानः श्रुतज्ञो नित्य नूतनाः

21 श्री शुक उवाच

राजा सीद् भीष्मको नाम विदर्भाधि पतिर् महान्

तस्य पञ्चा भवन् पुत्राः कन्यैका च वरा नना

22 रुक्म्यग् रजो रुक्म रथो रुक्मबाहुर् अनन्तरः

रुक्म केशो रुक्म माली रुक्मिण् येषाम् स्वसा सती

23 सोपश् रुत्य मुकुन्दस्य रूप वीर्य गुण श्रियः

गृहा गतैः गीय मानाः तम् मेने सदृशम् पतिम्

24 ताम् बुद्धि लक्षण उदार्य रूप शील गुणा श्रयाम्

कृष्णश् च सदृ शीम् भार्याम् समुद् वोढुम् मनो दधे

25 बन्धूना मिच्छ ताम् दातुम् कृष्णाय भगिनीम् नृप

ततो निवार्य कृष्ण द्विड् रुक्मी चैद्यम् अमन्यत

26 तद् अवेत् यासिता पाङ्गी वैदर्भी दुर्मना भृशम्

विचिन्त् याप्तम् द्विजम् कञ्चित् कृष्णाय प्राहिणोद् द्रुतम्

27 द्वारकाम् स समभ् येत्य प्रती हारैः प्रवेशितः

अपश्यद् आद्यम् पुरुषम् आसीनम् काञ्च नासने

28 दृष्ट्वा ब्रह्मण्य देवस्तम् अवरुह्य निजा सनात्

उपवेश्यार् हयात्र् चक्रे यथ् आत्मानम् दिवौ कसः

29 तम् भुक्त वन्तम् विश्रान्तम् उपगम्य सताम् गतिः

पाणिनाभि मृशन् पादौ अव्यग् रस्तम् अपृच् छत

30 कच्चिद् द्विजवर श्रेष्ठ धर्मस्ते वृद्ध सम्मतः

वर्तते नाति कृच्छ्रेण सन्तुष्ट मनसः सदा

31 सन्तुष्टो यर्हि वर्तेत ब्राह्मणो येन केनचित्

अहीय मानः स्वाद् धर्मात् स ह्यस् याखिल कामधुक्

32 असन् तुष्टो ऽस कृल्लो कान् आप्नोत् यपि सुरेश्वरः

अकिञ्च नोऽपि सन्तुष्टः शेते सर्वाङ्ग विज्वरः

33 विप्रान् स्वलाभ सन्तुष्टान् साधून् भूत सुहृत् तमान्

निर हङ्कारिणः शान्तान् नमस्ये शिरसा सकृत्

34 कच्चिद् वः कुशलम् ब्रह्मन् राजतो यस्य हि प्रजाः

सुखम् वसन्ति विषये पाल्य मानाः स मे प्रियः

35 यतस् त्वम् आगतो दुर्गम् निस्तीर् येह यदिच् छया

सर्वम् नो ब्रूहि अगुह्यम् चेत् किम् कार्यम् करवाम ते

36 एवम् सम्पृष्ट सम्प्रश्नो ब्राह्मणः परमेष्ठिना

लीला गृहीत देहेन तस्मै सर्वम् अवर्णयत्

37 श्री रुक्मिण् युवाच

श्रुत्वा गुणान् भुवन सुन्दर शृण्वताम् ते

निर्विश्य कर्ण विवरैः हर तोऽङ्ग तापम्

रूपम् दृशाम् दृशि मताम् अखिलार्थ लाभम्

त्वय् यच्युता विशति चित्तम् अपत्र पम् मे

38 का त्वा मुकुन्द महती कुल शील रूप

विद्या वयो द्रविण धामभिर् आत्म तुल्यम्

धीरा पतिम् कुल वती न वृणीत कन्या

काले नृसिम्ह नर लोक मनो ऽभि रामम्

39 तन्मे भवान् खलु वृतः पति रङ्ग जायाम्

आत्मार्पि तश् च भव तो ऽत्र विभो विधेहि

मा वीर भागम् अभि मर्शतु चैद्य आराद्

गोमायुवन् मृग पतेर् बलिम् अम्बुजाक्ष

40 पूर्तेष्ट दत्त नियम व्रत देव विप्र

गुर् वर्चनादि भिरलम् भगवान् परेश:

आराधितो यदि गदा ग्रज एत्य पाणिम्

गृह्णातु मे न दम घोष सुता दयो ऽन्ये

41 श्वो भाविनि त्वम् अजितोद् वहने विदर् भान्

गुप्त: समेत्य पृतना पतिभि: परीत:

निर्मथ्य चैद्य मग धेन्द्र बलम् प्रसह्य

माम् राक्ष सेन विधि नोद्वह वीर्य शुल्काम्

42 अन्त: पुरान् तर चरीम् अनिहत्य बन्धून्

त्वाम् उद्वहे कथम् इति प्रवदाम् युपायम्

पूर्वेद्यु रस्ति महती कुल देवि यात्रा

यस्याम् बहिर् नव वधूर् गिरिजा मुपेयात्

43 यस्याङ्घ्रि पङ्कज रज: स्न पनम् महान्तो

वाञ्छन्त् युमा पतिर् इवात्म तमो ऽपहत्यै

यर् ह्यम्बु जाक्ष न लभेय भवत् प्रसादम्

जह्याम सून् व्रत कृशाञ् छत जन्म भि: स्यात्

44 ब्राह्मण उवाच

इत्येते गुह्य सन्देशा यदु देव मया हृता:

विमृश्य कर्तुम् यच् चात्र क्रियताम् तद् अनन्तरम्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे द्वि पञ्चा शत्तमो ऽध्याय :॥

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्दः त्रि पञ्चा शत्तमो ऽध्याय :

स्कन्द- *10:* अध्याय- *53*

*01* श्री शुक उवाच

वैदर्भ्याः स तु सन्देशम् निशम्य यदु नन्दनः

प्रगृह्य पाणिना पाणिम् प्रहसन् निद मब्रवीत्

*02* श्री भगवान् उवाच

तथा हमपि तच् चित्तो निद्राम् च न लभे निशि

वेदाहम् रुक्मिणा द्वेषान् ममोद् वाहो निवारितः

*03* तामान यिष्य उन्मथ्य राजन् याप सदान् मृधे

मत् पराम् अनवद् याङ्गीम् एध सो ऽग्नि शिखामिव

*04* श्री शुक उवाच

उद्वा हर्क्षम् च विज्ञाय रुक्मिण्या मधु सूदनः

रथः सम्युज्य तामाशु दारुके त्याह सारथिम्

*05* स चाश् वैः शैब्य सुग्रीव मेघ पुष्प बला हकैः

युक्तम् रथम् उपानीय तस्थौ प्राञ्जलिर् अग्रतः

*06* आरुह्य स्यन्दनम् शौरिः द्विजम् आरोप्य तूर्णगैः

आनर्ताद् एक रात्रेण विदर्भा नग मद् हयैः

*07* राजा स कुण्डिन पतिः पुत्र स्नेह वशम् गतः

शिशुपालाय स्वाम् कन्याम् दास्यन् कर्माण्य कारयत्

*08* पुरम् सम्मृष्ट सम्सिक्त मार्ग रथ्या चतुष् पथम्

चित्र ध्वज पता काभिः तोरणैः सम लङ्कृतम्

*09* स्रग् गन्ध माल्या भरणैः विरजो ऽम्बर भूषितैः

जुष्टम् स्त्री पुरुषैः श्रीमद् गृहैर् अगुर् उधूपितैः

*10* पित्ऋन् देवान् समभ् यर्च्य विप्राम्श् च विधिवन् नृप

भोज यित्वा यथा न्यायम् वाचया मास मङ्गळम्

*11* सुस् नाताम् सुदतीम् कन्याम् कृत कौतुक मङ्गळाम्

अहताम् शुक युग्मेन भूषिताम् भूषणोत् तमैः

12 चक्रुः सामर्ग् यजुर् मन्त्रैः वध्वा रक्षाम् द्विजोत् तमाः

पुरोहितो ऽथर्व विद्वै जुहाव ग्रह शान्तये

13 हिरण्य रूप्य वासाम्सि तिलाम्श् च गुड मिश्रितान्

प्रादाद् धेनूश् च विप्रेभ्यो राजा विधि विदाम् वरः

14 एवम् चेदि पती राजा दम घोषः सुताय वै

कारया मास मन्त्रज्ञैः सर्वम् अभ्युद योचितम्

15 मदच् युद्भिर् गजा नीकैः स्यन्दनैर् हेम मालिभिः

पत् त्यश्व सङ्कुलैः सैन्यैः परीतः कुण्डिनम् ययौ

16 तम् वै विदर्भाधि पतिः समभ् येत्या भि पूज्य च

निवेशया मास मुदा कल्पि तान्य निवेशने

17 तत्र शाल्वो जरासन्धो दन्तवक्त्रो विदूरथः

आजग्मुः चैद्य पक्षीयाः पौण्ड्र काद्याः सहस्रशः

18 कृष्ण राम द्विषो यत्ताः कन्याम् चैद् याय साधितुम्

यद् यागत्य हरेत् कृष्नो रामाद्यैर् यदुभिर् वृतः

19 योत्स्यामः सम् हता स्तेन इति निश्चित मानसाः

आजग्मुः भूभुजः सर्वे समग्र बल वाहनाः

20 श्रुत्वै तद् भगवान् रामो विपक्षीय नृपोद् यमम्

कृष्णम् चैकम् गतम् हर्तुम् कन्याम् कलह शङ्कितः

21 बलेन महता सार्धम् भ्रातृ स्नेह परिप् लुतः

त्वरितः कुण्डिनम् प्रागाद् गजाश्वर थपत् तिभिः

22 भीष्म कन्या वरा रोहा काङ्क्षन् त्याग मनम् हरेः

प्रत्या पत्तिम् अपश् यन्ती द्विजस्या चिन्त यत् तदा

23 अहो त्रियामान् तरित उद्वाहो मे ऽल्प राधसः

नागच् छत् यरविन् दाक्षो नाहम् वेद् मयत्र कारणम्

सो ऽपि नावर्त ते ऽद्यापि मत् सन्देश हरो द्विजः

24 अपि मय् यनवद् यात्मा दृष्ट्वा किञ्चिज् जुगुप्सितम्

मत् पाणि ग्रहणे नूनम् नायातिहि कृतोद् यमः

25 दुर्भगाया न मे धाता नानुकूलो महेश् वरः

देवी वा विमुखा गौरी रुद्राणी गिरिजा सती

26 एवम् चिन्त यती बाला गोविन्द हृत मानसा

न्यमील यत कालज्ञा नेत्रे चाश्रु कला कुले

27 एवम् वध्वाः प्रती क्षन्त्या गोविन्द् आगमनम् नृप

वाम ऊरुर् भुजो नेत्रम् अस्फुरन् प्रिय भाषिणः

28 अथ कृष्ण विनिर् दिष्टः स एव द्विज सत्तमः

अन्तः पुरचरीम् देवीम् राज पुत्रीम् ददर्श ह

29 सा तम् प्रहृष्ट वदनम् अव्य ग्रात्म गतिम् सती

आलक्ष्य लक्षणा भिज्ञा सम पृच्छच् छुचिस् मिता

30 तस्या आवेद यत् प्राप्तम् शशम्स यदु नन्दनम्

उक्तम् च सत्य वचनम् आत्मोप नयनम् प्रति

31 तम् आगतम् समाज्ञाय वैदर्भी हृष्ट मानसा

न पश्यन्ती ब्राह्मणा य प्रियम् अन्यन्न नाम सा

32 प्राप्तौ श्रुत्वा स्व दुहितुः उद्वाह प्रेक्षणोत् सुकौ

अभ्ययात् तूर्य घोषेण राम कृष्णौ समर् हणैः

33 मधुपर्कम् उपानीय वासाम्सि विरजाम्सि सः

उपाय नान्य भीष्टानि विधि वत् सम पूज यत्

34 तयोर् निवेशनम् श्रीमद् उपकल्प्य महा मतिः

स सैन्ययोः सानु गयोः आतिथ्यम् विदधे यथा

35 एवम् राज्ञाम् समे तानाम् यथा वीर्यम् यथा वयः

यथा बलम् यथा वित्तम् सर्वैः कामैः समर्ह यत्

36 कृष्णम् आगत माकर्ण्य विदर्भ पुर वासिनः

आगत्य नेत्रात्र् जलिभिः पपुस्तन् मुख पङ्कजम्

37 अस्यैव भार्या भवितुम् रुक्मिण् यर्हति नापरा

असावप् यन वद् यात्मा भैष्म्याः समुचितः पतिः

38 किञ्चित् सु चरितम् यन्नस् तेन तुष्टस् त्रिलोक कृत्

अनु गृह्णातु गृह्णातु वैदर्भ्याः पाणिम् अच्युतः

39 एवम् प्रेम कला बद्धा वदन्ति स्म पुरौकसः

कन्या चान्तः पुरात् प्रागाद् भटैर् गुप्ताम्बि कालयम्

40 पद्भ्याम् विनिर् ययौ द्रष्टुम् भवान्याः पाद पल्लवम्

सा चानु ध्यायती सम्यङ् मुकुन्द चरणाम् बुजम्

41 यतवाङ् मातृ भिः सार्धम् सखीभिः परि वारिता

गुप्ता राज भटैः शूरैः सन्नद्धैर् उद्यता युधैः

मृडङ्ग शङ्ख पण वाः तूर्य भेर्यश् च जघ्निरे

42 नानोपहार बलिभिः वार मुख्याः सहस्रशः

स्रग् गन्ध वस्त्रा भरणैः द्विज पत्न्यः स्वलङ् कृताः

43 गायन्तश् च स्तुवन् तश् च गायका वाद्य वादकाः

परिवार्य वधूम् जग्मुः सूत मागध वन्दिनः

44 आसाद्य देवी सदनम् धौत पाद कराम्बुजा

उपस् पृश्य शुचिः शान्ता प्रवि वेश् आम्बिकान् तिकम्

45 ताम् वै प्रवयसो बालाम् विधिज्ञा विप्र योषितः

भवानीम् वन्दयाञ् चक्रुः भव पत्नीम् भवान् विताम्

46 नमस्ये त्वाम्बिके ऽभीक्ष्णम् स्व सन्तान युताम् शिवाम्

भूयात् पतिर्मे भगवान् कृष्णः तद् अनुमोद ताम्

47 अद्भिर् गन् धाक्षतैर् धूपैः वासः स्रङ् माल्य भूषणैः

नानोप हार बलिभिः प्रदीपावलि भिः पृथक्

48 विप्र स्त्रियः पति मतीः तथा तैः सम पूजयत्

लवणा पूप ताम्बूल कण्ठ सूत्र फलेक्षु भिः

49 तस्यै स्त्रि यस्ताः प्रददुः शेषाम् युयुजुर् आशिषः

ताभ्यो देव्यै नमश् चक्रे शेषाम् च जगृहे वधू:

50 मुनि व्रतम् अथ त्यक्त्वा निश् चक्रा माम्बिका गृहात्

प्रगृह्य पाणिना भृत्याम् रत्न मुद्रोप शोभिना

51 ताम् देव मायाम् इव वीर मोहिनीम् सुमध् यमाम् कुण्डल मण्डि ताननाम्

श्यामाम् नितम् बार्पित रत्न मेखलाम् व्यञ्जत् स्तनीम् कुन्तल शङ्कि तेक्षणाम्

52 शुचिस् मिताम् बिम्ब फलाध रद् युति शोणाय मान द्विज कुन्द कुड्मलाम्

पदा चलन्तीम् कलहम् सगामिनीम् सिञ्जत् कला नूपुर धाम शोभिना

53 विलोक्य वीरा मुमुहु: समागता यशस् विन: तत् कृत हृच्छयार् दिता:

याम् वीक्ष्य ते नृप तयस्त दुदार हास व्रीदाव लोक हृत चेतस उज्झि तास्त्रा:

54 पेतु: क्षितौ गज रथाश् व गता विमूढा यात्राच् छलेन हरये ऽर्पयतीम् स्व शोभाम्

सैवम् शनैश् चलयती चल पद्म कोशौ प्राप्तिम् तदा भगवत: प्रसमीक्ष माणा

55 उत्सार्य वाम करजै: अलकान पाङ्गै: प्राप्तान् ह्रियै क्षत नृपान् ददृशे ऽच्युतम् च

ताम् राज कन्याम् रथमारु रुक्षतीम् जहार कृष्णो द्विषताम् सम् ईक्षताम्

56 रथम् समारोप्य सुपर्ण लक्षणम् राजन्य चक्रम् परिभूय माधव:

ततो ययौ राम पुरोगमै: शनै: शृगाल मध्या दिव भाग हृद् हरि:

57 तम् मानि न: स्वा भिभवम् यश: क्षयम्

परे जरासन्ध वशा न सेहिरे

अहो धिगस्मान् यश आत्त धन्वनाम्

गोपैर् हृतम् केसरिणाम् मृगैर् इव

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे त्रि पञ्चा शत्तमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्दः चतु पञ्चा शत्तमो ऽध्याय :

स्कन्द- *10:* अध्याय- *54*

*01* श्री शुक उवाच

इति सर्वे सु सम् रब्धा वाहा नारुह्य दम् शिताः

स्वैः स्वैर् बलैः परि क्रान्ता अन्वीयुर् धृत कार्मुकाः

*02* ताना पतत आलोक्य यादवा नीक यूथपाः

तस्थुः तत् सम् मुखा राजन् विस्फूर्ज्य स्व धनूम्षि ते

*03* अश्व पृष्ठे गजस् कन्धे रथो पस्थे च कोविदाः

मुमुचुः शर वर्षाणि मेघा अद्रिष्व पो यथा

*04* पत्युर् बलम् शरा सारैश् छन्नम् वीक्ष्य सुमध् यमा

स व्रीड्मैक्ष तत् द्वक्त्रम् भय विह्वल लोचना

*05* प्रहस्य भगवान् आह मा स्म भैर् वाम लोचने

विनङ्क्ष् यत्य धुनै वैतत् तावकैः शात्र वम् बलम्

*06* तेषाम् तद् विक्रमम् वीरा गद सङ्कर्षना दयः

अमृष्य माणा नाराचैः जघ्नुर् हय गजान् रथान्

*07* पेतुः शिराम्सि रथिनाम् अश्विनाम् गजिनाम् भुवि

स कुण्डल किरीटानि सोष्णी षाणि च कोटिशः

*08* हस्ताः सासि गदेष् वासाः करभा ऊरवो ऽङ्घ्रयः

अश्वाश्व तर नागोष्ट्र खर मर्त्य शिराम्सि च

*09* हन्य मान बला नीका वृष्णिभिः जय काङ्क्षिभिः

राजानो विमुखा जग्मुः जरासन्ध पुरः सराः

*10* शिशुपालम् समभ् येत्य हृत दारम् इवातुरम्

नष्टत् विषम् गतोत् साहम् शुष्यद् वदन मब्रुवन्

*11* भो भोः पुरुष शार् दूल दौर् मनस्य मिदम् त्यज

न प्रिया प्रिययो राजन् निष्ठा देहिषु दृश्यते

12 यथा दारु मयी योषिन् नृत्यते कुह केच्छया

एवम् ईश्वर तन्त्रो ऽयम् ईहते सुख दुः खयोः

13 शौरेः सप्त दशाहम् वै सम् युगानि पराजितः

त्रयो विम्शति भिः सैन्यैः जिग्य एक महम् परम्

14 तथाप्यहम् न शोचामि न प्रहृष्यामि कर्हिचित्

कालेन दैव युक्तेन जानन् विद्रा वितम् जगत्

15 अधुनापि वयम् सर्वे वीर यूथप यूथपाः

पराजिताः फल्गु तन्त्रैः यदुभिः कृष्ण पालितैः

16 रिपवो जिग्युर् अधुना काल आत्मानु सारिणि

तदा वयम् विजेष् यामो यदा कालः प्रदक्षिणः

17 श्री शुक उवाच

एवम् प्रबोधितो मित्रैः चैद्यो ऽगात् सानुगः पुरम्

हत शेषाः पुनस् ते ऽपि ययुः स्वम् स्वम् पुरम् नृपाः

18 रुक्मी तु राक्षसोद् वाहम् कृष्ण द्विड् अस हन्स्वसुः

पृष्ठ तो ऽन्वग मत् कृष्णम् अक्षौ हिण्या वृतो बली

19 रुक्म्य मर्षी सु सम्रब्धः शृण्वताम् सर्व भू भुजाम्

प्रतिजज्ञे महा बाहुः दम्शितः स शरासनः

20 अहत्वा समरे कृष्णम् अप्रत् यूहय च रुक्मिणीम्

कुण्डिनम् न प्रवेक्ष् यामि सत्य मे तद् ब्रवीमि वः

21 इत् युक्त्वा रथ मारुह्य सारथिम् प्राह सत् वरः

चोदयाश् वान् यतः कृष्णः तस्य मे सम्युगम् भवेत्

22 अद्याहम् निशितैर् बाणैः गोपालस्य सुदुर् मतेः

नेष्ये वीर्य मदम् येन स्वसा मे प्रसभम् हृता

23 विकत्थ मानः कुमतिः ईश्वरस् याप्र माणवित्

रथे नैकेन गोविन्दम् तिष्ठ तिष्ठेत्य थाह् वयत्

24 धनुर् विकृष्य सुदृढम् जघ्ने कृष्णम् त्रिभिः शरैः

आह चात्र क्षणम् तिष्ठ यदूनाम् कुल पाम्सन

25 कुत्र यासि स्वसारम् मे मुषित्वा ध्वाङ् क्षवद् धविः

हरिष् ये ऽद्य मदम् मन्द मायिनः कूट योधिनः

26 यावन् न मे हतो बाणैः शयीथा मुञ्च दारीकाम्

स्मयन् कृष्णो धनुश् छित्त्वा षड्भिर् विव्याध रुक्मिणम्

27 अष्टभिश् चतुरो वाहान् द्वाभ्याम् सूतम् ध्वजम् त्रिभिः

स चान्यद् धनुर् आधाय कृष्णम् विव्याध पञ्चभिः

28 तैस् ताडितः शरौ घैस्तु चिच्छेद धनुर् अच्युतः

पुनरन्य दुपा दत्त तदप् यच् छिनद् अव्ययः

29 परिघम् पट्टिशम् शूलम् चर्मासी शक्ति तोमरौ

यद्य दायुध मा दत्त तत् सर्वम् सो ऽच्छिनद् हरिः

30 ततो रथाद् अवप्लुत्य खड्ग पाणिर् जिघाम्सया

कृष्णम् अभ्यद् रवत् क्रुद्धः पतङ्ग इव पावकम्

31 तस्य चापत तः खड्गम् तिल शश् चर्म चेषुभिः

छित्त्वा सिमाद दे तिग्मम् रुक्मिणम् हन्तु मुद्यतः

32 दृष्ट्वा भ्रातृ वधोद् योगम् रुक्मिणी भय विह्वला

पतित्वा पादयोर् भर्तुः उवाच करुणम् सती

33 श्री रुक्मिण् युवाच

योगेश्वरा अप्रमे यात्मन् देवदेव जगत् पते

हन्तुम् नार्हसि कल्याण भ्रातरम् मे महा भुज

34 श्री शुक उवाच

तया परित्रास विकम्पि ताङ्गया शुचाव शुष्यन् मुख रुद्ध कण्ठया

कातर्य विस्रम् सित हेम मालया गृहीत पादः करुणोन्य वर्तत

35 चैलेन बद्ध्वा तम् असाधु कारिणम् सश् मश्रु केशम् प्रव पन्व्य रूपयत्

तावन् ममर्दुः पर सैन्यम् अद्भुतम् यदु प्रवीरा नळिनीम् यथा गजाः

36 कृष्णान् तिक मुप व्रज्य ददृशुस् तत्र रुक्मिणम्

तथा भूतम् हत प्रायम् दृष्ट्वा सङ्कर्षणो विभुः

विमुच्य बद्धम् करुणो भगवान् कृष्ण मब्रवीत्

37 असाध्विदम् त्वया कृष्ण कृतम् अस्मज् जुगुप्सितम्

वपनम् श्मश्रु केशानाम् वैरूप्यम् सुहृदो वधः

38 मैवास्मान् साध्व्य सूयेथा भ्रातुर् वैरूप्य चिन्तया

सुख दुः ख दो न चान्यो ऽस्ति यतः स्वकृत भुक् पुमान्

39 बन्धुः वधार्ह दोषो ऽपि न बन्धोर् वध मर्हति

त्याज्यः स्वे नैव दोषेण हतः किम् हन्यते पुनः

40 क्षत्रि याणा मयम् धर्मः प्रजापति विनिर् मितः

भ्रातापि भ्रातरम् हन्याद् येन घोर तरस् ततः

41 राज्यस्य भूमेर् वित् तस्य स्त्रियो मानस्य तेजसः

मानि नो ऽन्यस्य वा हेतोः श्रीम दान्धाः क्षिपन्ति हि

42 तवेयम् विषमा बुद्धिः सर्व भूतेषु दुर् हृदाम्

यन्मन्यसे सदा भद्रम् सुहृदाम् भद्र मज्ञवत्

43 आत्म मोहो न्ऋृणामेष कल्प्यते देव मायया

सुहृद् दुर्हृद् उदासीन इति देहात्म मानिनाम्

44 एक एव परो ह्यात्मा सर्वेषाम् अपि देहिनाम्

नानेव गृह्यते मूढैः यथा ज्योतिर् यथा नभः

45 देह आद् यन्त वानेष द्रव्य प्राण गुणात् मकः

आत्मनि अविद्यया क्लृप्तः सम्सार यति देहिनम्

46 नात्मनो ऽन्येन सम्योगो वियोगश्चा सतः सति

तद् धेतुत् वात् तत् प्रसिद्धेः दृग् रूपाभ्याम् यथा रवेः

47 जन्माद यस्तु देहस्य विक्रिया नात्मनः क्वचित्

कलानाम् इव नैवेन्दोः मृतिर् ह्यस्य कुहूरिव

48 यथा शयान आत्मानम् विषयान् फलमेव च

अनुभुङ्क् ते ऽप्य सत् यर्थे तथाप्नोत् यबुधो भवम्

49 तस्माद् अज्ञान जम् शोकम् आत्म शोष विमोहनम्

तत्त्व ज्ञानेन निर्हृत्य स्वस्था भव शुचिस् मिते

50 श्री शुक उवाच

एवम् भगवता तन्वी रामेण प्रति बोधिता

वै मनस्यम् परित् यज्य मनो बुद्ध्या समा दधे

51 प्राणाव शेष उत्सृष्टो द्विड्भिः हत बल प्रभः

स्मरन्वि रूप करणम् वित थात्म मनोरथः

चक्रे भोज कटम् नाम निवासाय महत् पुरम्

52 अहत्वा दुर्मतिम् कृष्णम् अप्रत् यूहय यवी यसीम्

कुण्डिनम् न प्रवेक्ष् यामी त्युक्त्वा तत्राव सद् रुषा

53 भगवान् भीष्मक सुताम् एवम् निर्जित्य भूमि पान्

पुरम् आनीय विधि वद् उपयेमे कुरूद् वह

54 तदा महोत्सवो न्ॠणाम् यदु पुर्याम् गृहे गृहे

अभूद् अनन्य भावानाम् कृष्णे यदु पतौ नृप

55 नरा नार् यश् च मुदिताः प्रमृष्ट मणि कुण्डलाः

पारि बर्हम् उपा जह्रुः वरयोश् चित्र वाससोः

56 सा वृष्णि पुर्युत्त भितेन्द्र केतुभिः

विचित्र माल्याम् बर रत्न तोरणैः

बभौ प्रतिद्वार् युप क्लृप्त मङ्गळैः

आपूर्ण कुम्भा गुरु धूप दीपकैः

57 सिक्त मार्गा मद् अच्युद्भिः आहूत प्रेष्ठ भूभुजाम्

गजैर् द्वास्सु परा मृष्ट रम्भा पूगोप शोभिता

58 कुरु सृन्जय कैकेय विदर्भ यदु कुन्तयः

मिथो मुमुदिरे तस्मिन् सम्भ्रमात् परि धावताम्

59 रुक्मिण्या हरणम् श्रुत्वा गीय मानम् ततस् ततः

राजानो राज कन्याश् च बभूवुर् भृश विस्मिताः

60 द्वारकायाम् अभूद् राजन् महामोद: पुरौ कसाम्

रुक्मिण्या रमयो पेतम् दृष्ट्वा कृष्णम् श्रिय: पतिम्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे चतु पञ्चा शत्तमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्द: पञ्च पञ्चा शत्तमो ऽध्याय :

स्कन्द- 10: अध्याय- 55

01 श्री शुक उवाच

कामस्तु वासुदेव् आम्शो दग्ध: प्राग् रुद्र मन्युना

देहोप पत्तये भूय: तमेव प्रत्य पद्यत

02 स एव जातो वैदर्भ्याम् कृष्ण वीर्य समुद् भव:

प्रद्युम्न इति विख्यात: सर्वतो ऽनव म: पितु:

03 तम् शम्बर: काम रूपी हृत्वा तो कम निर्दशम्

स विदित् वात्मन: शत्रुम् प्रास्योद् अन्वत्य गाद् गृहम्

04 तम् निर्जगार बलवान् मीन: सो ऽप्यपरै: सह

वृतो जालेन महता गृहीतो मत्स्य जीविभि:

05 तम् शम्बराय कैवर्ता उपा जह्रुर् उपायनम्

सूदा महानसम् नीत्वा वद्यन् स्वधितिन् आद्भुतम्

06 दृष्ट्वा तद् उदरे बालम् मायावत्यै न्यवेदयन्

नारदो ऽकथयत् सर्वम् तस्या: शङ्कित चेतस:

बालस्य तत्त्वम् उत्पत्तिम् मत्स्यो दर निवेशनम्

07 सा च कामस्य वै पत्नी रतिर् नाम यशस्विनी

पत्यु: निर्दग्ध देहस्य देहोत् पत्तिम् प्रतीक्षती

08 निरूपिता शम्बरेण सा सूबौ दन साधने

काम देवम् शिशुम् बुद्ध्वा चक्रे स्नेहम् तद् आर्भके

09 नाति दीर्घेण कालेन स कार्ष्णि रूढ यौवन:

जनया मास नारीणाम् वीक्षन् तीनाम् च विभ्रमम्

10 सा तम् पतिम् पद्म दळाय तेक्षणम् प्रलम्ब बाहुम् नर लोक सुन्दरम्

सव्रीडहा सोत् तभि तभ्रु वेक्षती प्रीत्यो पतस्थे रतिर् अङ्ग सौरतै:

11 ताम् आह भगवान् कार्ष्णि: मातस्ते मतिर् अन्यथा

मातृ भावम् अतिक्रम्य वर्तसे कामिनी यथा

12 रतिर् उवाच

भवान् नारायण सुत: शम्बरेण हृतो गृहात्

अहम् ते ऽधिकृता पत्नी रति: कामो भवान् प्रभो

13 एष त्वा निर्दशम् सिन्धौ अक्षिपच् छम्बरो ऽसुर:

मत्स्यो ऽग्रसीत् तद् उदराद् इह: प्राप्तो भवान् प्रभो

14 तम् इमम् जहि दुर् धर्षम् दुर्जयम् शत्रुम् आत्मन:

मायाशत विदम् त्वम् च मायाभिर् मोहनादिभि:

15 परीशो चति ते माता कुररीव गत प्रजा

पुत्र स्नेहा कुला दीना विवत्सा गौरि वातुरा

16 प्रभाष् यैवम् ददौ विद्याम् प्रद्युम्ना य महात्मने

माया वती महा मायाम् सर्व माया विनाशिनीम्

17 स च शम्बरम् अभ्येत्य सम्युगाय समाह् वयत्

अविष ह्यैस्तम् आक्षेपै: क्षिपन् सञ्जन यन्कलिम्

18 सो ऽधिक्षिप्तो दुर्व चोभि: पादा हत इवोरग:

निश् चक्राम गदा पाणि: अमर्षात् ताम्र लोचन:

19 गदाम् आविध्य तरसा प्रद्युम्नाय महात्मने

प्रक्षिप्य व्यनदन् नादम् वज्र निष्पेष निष्ठुरम्

20 ताम् आपतन् तीम् भगवान् प्रद्युम्नो गदया गदाम्

अपास्य शत्रवे क्रुद्धः प्राहिणोत् स्व गदाम् नृप

21 स च मायाम् समाश् रित्य दैतेयीम् मय दर्शितम्

मुमुचे ऽस्त्र मयम् वर्षम् कार्ष्णौ वैहायसो ऽसुरः

22 बाध्यमानो ऽस्त्र वर्षेण रौक्मिणेयो महा रथः

सत्त्व् आत्मिकाम् महा विद्याम् सर्व मायोप मर्दिनीम्

23 ततो गौह्य क गान्धर्व पैशाचो रग राक्षसीः

प्रायुङ्क्त शतशो दैत्यः कार्ष्णिः व्यध मयत् स ताः

24 निशातम् असि मुद्यम्य स किरीटम् स कुण्डलम्

शम्बरस्य शिरः कायात् ताम्रश् मश्र्वोज साहरत्

25 आकीर्य माणो दिविजैः स्तुवद्भिः कुसुमोत् करैः

भार्य याम्बर चारिण्या पुरम् नीतो विहायसा

26 अन्तः पुर वरम् राजन् लल नाशत सङ्कुलम्

विवेश पत्न्या गगनाद् विद्यु तेव बला हकः

27 तम् दृष्ट्वा जल दश्यामम् पीत कौशेय वाससम्

प्रलम्ब बाहुम् ताम् राक्षम् सुस्मितम् रुचिराननम्

28 स्वलङ्कृत मुखाम् भोजम् नील वक्राल कालिभिः

कृष्णम् मत्वा स्त्रियो ह्रीता निलिल्युः तत्र तत्र ह

29 अवधार्य शनैर् ईषद् वै लक्षण्ये न योषितः

उपजग्मुः प्रमुदिताः स स्त्री रत्नम् सुविस् मिताः

30 अथ तत् रासिता पाङ्गी वैदर्भी वल्गु भाषिणी

अस्मरत् स्व सुतम् नष्टम् स्नेह स्नुत पयोधरा

31 को न्वयम् नर वैदूर्यः कस्य वा कमलेक्षणः

धृतः कया वा जठरे केयम् लब्धा त्वनेन वा

32 मम चाप् यात्मजो नष्टो नीतो यः सूतिका गृहात्

एतत् तुल्य वयो रूपो यदि जीवति कुत्रचित्

33 कथम् त्वनेन सम्प्राप्तम् सारूप्यम् शार्ङ्ग धन्वन:

आकृत्या वयवैर् गत्या स्वर हासाव लोकनै:

34 स एव वा भवेन् नूनम् यो मे गर्भे धृतो ऽर्भक:

अमुष्मिन् प्रीति रधिका वाम: स्फुरति मे भुज:

35 एवम् मीमाम्स माणायाम् वैदर्भ्याम् देवकी सुत:

देवक् यानक दुन्दुभ्याम् उत्तम: श्लोक आगमत्

36 विज्ञातार् थो ऽपि भगवाम् स्तूष्णीम् आस जनार्दन:

नारदो ऽकथयत् सर्वम् शम्बरा हरणादिकम्

37 तच् छ्रुत्वा महद् आश्चर्यम् कृष्ण् आन्त:पुर योषित:

अभ्य नन्दन् बहून् अब्दान् नष्टम् मृतम् इवागतम्

38 देवकी वसुदेवश् च कृष्ण रामौ तथा स्त्रिय:

दम्पती तौ परिष् वज्य रुक्मिणी च य युर्मुदम्

39 नष्टम् प्रद्युम्न मायातम् आकर्ण्य द्वारकौ कस:

अहो मृत इवा यातो बालो दिष्ट्येति हाब्रुवन्

40 यम् वै मुहु: पितृ सरूप निजेश भावा:

तन् मातरो यद भजन् रह रूढ भावा:

चित्रम् न तत् खलु रमास् पद बिम्ब बिम्बे

कामे स्मरे ऽक्षि विषये किमुतान्य नार्य:

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे पञ्च पञ्चा शत्तमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्दः षड् पञ्चा शत्तमो ऽध्याय :

स्कन्द- *10:* अध्याय- *56*

*01* श्री शुक उवाच

सत्राजितः स्व तनयाम् कृष्णाय कृत किल्बिषः

स्यमन्त केन मणिना स्वयम् उद्यम् य दत् तवान्

*02* श्री राजो उवाच

सत्राजितः किम करोद् ब्रह्मन् कृष्णस्य किल्बिषम्ः

स्यमन्तकः कुतस् तस्य कस्माद् दत्ता सुता हरेः

*03* श्री शुक उवाच

आसीत् सत्राजितः सूर्यो भक्तस् य परमः सखा

प्रीतस् तस्मै मणिम् प्रादात् सूर्य स्तुष्टः स्यमन्तकम्

*04* स तम् बिभ्रन् मणिम् कण्ठे भ्राज मानो यथा रविः

प्रविष्टो द्वारकाम् राजन् तेजसा नोप लक्षितः

*05* तम् विलोक्य जना दूरात् तेजसा मुष्ट दृष्टयः

दीव्य ते ऽक्षैर् भगवते शशम्सुः सूर्य शङ्किताः

*06* नारायण नमस्तेऽस्तु शङ्ख चक्र गदाधर

दामोदरा अरविन्दाक्षा गोविन्दा यदु नन्दना

*07* एष आयाति सविता त्वाम् दिदृक्षुः जगत् पते

मुष्णन् गभस्ति चक्रेण नृणाम् चक्षूम्षि तिग् मगुः

*08* नन्वन् विच्छन्ति ते मार्गम् त्री लोक्याम् विबु धर्षभाः

ज्ञात्वाद् य गूढम् यदुषु द्रष्टुम् त्वाम् यात् यजः प्रभो

*09* श्री शुक उवाच

निशम्य बाल वचनम् प्रहस् याम्बुज लोचनः

प्राह नासौ रविर् देवः सत्राजिन् मणिना ज्वलन्

*10* सत्राजित् स्व गृहम् श्रीमत् कृत कौतुक मङ्गळम्

प्रविश्य देव सदने मणिम् विप्रैः न्यवेश यत्

11 दिने दिने स्वर्ण भारान् अष्टौ स सृज ति प्रभो

दुर्भिक्ष मार्य रिष्टानि सर्पा धिव्या धयो ऽशुभाः

न सन्ति मायिनस् तत्र यत्रास्ते ऽभ् यर्चितो मणिः

12 स याचितो मणिम् क्वापि यदु राजाय शौरिणा

नैवार्थ कामुकः प्रादाद् याच्ञा भङ्गम् अतर्कयन्

13 तम् एकदा मणिम् कण्ठे प्रति मुच्य महा प्रभम्

प्रसेनो हयम् आरुह्य मृगायाम् व्यचरद् वने

14 प्रसेनम् सहयम् हत्वा मणिम् आच्छिद्य केसरी

गिरिम् विशन् जाम्बवता निहतो मणि मिच्छता

15 सो ऽपिचक्रे कुमारस्य मणिम् क्रीडन कम् बिले

अपश्यन् भ्रातरम् भ्राता सत्राजित् पर्यतप् यत

16 प्रायः कृष्णेन निहतो मणि ग्रीवो वनम् गतः

भ्राता ममेति तच् छ्रुत्वा कर्णे कर्णे ऽजपन्जनाः

17 भगवाम्स् तद् उपश्रुत्य दुर्य शो लिप्त मात्मनि

मार्ष्टुम् प्रसेन पदवीम् अन्व पद्यत नागरैः

18 हतम् प्रसेनम् अश्वम् च वीक्ष्य केसरिणा वने

तम् चाद्रि पृष्ठे निहतम् ऋक्षेण ददृशुर् जनाः

19 ऋक्ष राज बिलम् भीमम् अन्धेन तमसा वृतम्

एको विवेश भगवान् अवस् थाप्य बहिः प्रजाः

20 तत्र दृष्ट्वा मणि स्रेष्ठम् बाल क्रीड नकम् कृतम्

हर्तुम् कृतमतिस् तस्मिन् अवतस्थे ऽर्भ कान्तिके

21 तम् अपूर्वम् नरम् दृष्ट्वा धात्री चुक्रोश भीत वत्

तच् छ्रुत्वाभ् यद्रवत् क्रुद्धो जाम्बवान् बलिनाम् वरः

22 स वै भगवता तेन युयुधे स्वामीन् आत्मनः

पुरुषम् प्राकृतम् मत्वा कुपितो नानु भाव वित्

23 द्वन्द्व युद्धम् सु तुमुलम् उभयोर् विजि गीषतोः

आयुधाश् मद्रुमैर् दोर्भिः क्रव्यार्थे श्येन योरिव

24 आसीत् तद् अष्टा विम्शाहम् इतरे तर मुष्टिभिः

वज्र निष्पेष परुषैः अविश्रमम् अहर्निशम्

25 कृष्ण मुष्टि विनिष्पात निष्पिष्टाङ् गोरु बन्धनः

क्षीण सत्त्वः स्विन्न गात्रः तमाहा तीव विस्मितः

26 जाने त्वाम् सर्व भूतानाम् प्राण ओजः सहो बलम्

विष्णुम् पुराण पुरुषम् प्रभ विष्णुम् अधीश्वरम्

27 त्वम् हि विश्व सृजाम् स्रष्टा सृज्जा नामपि यच्च सत्

कालः कलयताम् ईशः पर आत्मा तथ् आत्मनाम्

28 यस् येष दुत् कलित रोष कटाक्ष मोक्षैः

वर्त्मादि शत् क्षुभित नक्र तिमिङ्गलो ऽब्धिः

सेतुः कृतः स्वयश उज्ज्वलिता च लङ्का

रक्षः शिराम्सि भुवि पेतुः इषुक्ष तानि

29 इति विज्ञात विज्ञानम् ऋक्ष राजान् अमच्युतः

व्याज हार महा राज भगवान् देवकी सुतः

30 अभि मृश्या अरविन्दाक्षः पाणिना शङ्करेण तम्

कृपया परया भक्तम् प्रेम गम्भीरया गिरा

31 मणि हेतो रिह प्राप्ता वयम् ऋक्ष पते बिलम्

मिथ्याभि शापम् प्रमृजन् आत्मनो मणिना मुना

32 इत् युक्तः स्वाम् दुहितरम् कन्याम् जाम्बवतीम् मुदा

अर्हणार्थम् स मणिना कृष्णा योप जहार ह

33 अदृष्ट्वा निर्गमम् शौरेः प्रविष्टस्य बिलम् जनाः

प्रतीक्ष्य द्वादशा हानि दुः खि ताः स्वपुरम् ययुः

34 निशम्य देवकी देवी रुक्मिण् यानक दुन्दुभिः

सुहृदो ज्ञातयो ऽशोचन् बिलात् कृष्णम् अनिर्गतम्

35 सत्राजितम् शपन् तस्ते दुः खिता द्वारकौ कसः

उपतस्थुः महा मायाम् दुर्गाम् कृष्णोप लब्धये

36 तेषाम् तु देव् युपस्थानात् प्रत्या दिष्टा शिषा स च

प्रादुर् बभूव सिद्धार्थः सदारो हर्षयन् हरिः

37 उपलभ्य हृषी केशम् मृतम् पुनर् इवागतम्

सह पत्न्या मणिग्रीवम् सर्वे जात महोत्सवाः

38 सत्राजितम् समाहूय सभायाम् राज सन्निधौ

प्राप्तिम् चाख्या य भगवान् मणिम् तस्मै न्यवेद यत्

39 स चाति व्रीडितो रत्नम् गृहीत्वा ऽवाङ्मुखस् ततः

अनु तप्य मानो भवनम् अगमत् स्वेन पाप्मना

40 सो ऽनुध्यायम् स्तदे वाघम् बलवद् विग्रहा कुलः

कथम् मृजाम् यात्म रजः प्रसीदेद् वाच्युतः कथम्

41 किम्कृत्वा साधु मह्यम् स्यान् न शपेद्वा जनो यथा

अदीर्घ दर्शनम् क्षुद्रम् मूढम् द्रविण लोलुपम्

42 दास्ये दुहितरम् तस्मै स्त्री रत्नम् रत्नम् एव च

उपायो ऽयम् समी चीनः तस्य शान्तिर् न चान् यथा

43 एवम् व्यवसितो बुद्ध्या सत्राजित् स्व सुताम् शुभाम्

मणिम् च स्वय मुद् यम्य कृष्णा योप जहार ह

44 ताम् सत्य भामाम् भगवान् उपयेमे यथा विधि

बहुभिर् याचिताम् शील रूपौ दार्य गुणान् विताम्

45 भगवान् आह न मणिम् प्रतीच् छामो वयम् नृप

तवास् ताम् देव भक्तस्य वयम् च फल भागिनः

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे षड् पञ्चा शत्तमो ऽध्याय ː||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्दः सप्त पञ्चा शत्तमो ऽध्याय :

स्कन्द- 10: अध्याय- 57

01 श्री शुक उवाच

विज्ञा तार्थो ऽपि गोविन्दो दग् धाना कर्ण्य पाण्डवान्

कुन्तीम् च कुल्य करणे सहरामो ययौ कुरून्

02 भीष्मम् कृपम् स विदुरम् गान्धारीम् द्रोणम् एव च

तुल्य दुः खौ च सङ्गम्य हा कष्टम् इति होचतुः

03 लब्ध्वै तद् अन्तरम् राजन् शतधन्वा न मूचतुः

अक्रूर कृत वर्माणौ मनिः कस्मान् न गृह्यते

04 यो ऽस्मभ्यम् सम्प्रति श्रुत्य कन्या रत्नम् विगर्ह्य नः

कृष्णा यादान् न सत्राजित् कस्माद् भ्रातर मन्वियात्

05 एवम् भिन्न मतिस् ताभ्याम् सत्राजितम् असत् तमः

शयानम् अवधील् लोभात् स पापः क्षीण जीवितः

06 स्त्रीणाम् विक्रोश मानानाम् क्रन्दन् तीनाम् अनाथवत्

हत्वा पशून् सौनिक वत् मणिम् आदाय जग्मिवान्

07 सत्यभामा च पितरम् हतम् वीक्ष्य शुचार् पिता

व्यल पत् तातता तेति हा हतास् मीति मुह्यती

08 तैल द्रोण्याम् मृतम् प्रास्य जगाम गज साह्वयम्

कृष्णाय विदि तार्थाय तप्ता चख्यौ पितुर् वधम्

09 तदा कर्ण्येश् वरौ राजन् अनुसृत्य नृलोकताम्

अहो नः परमम् कष्टम् इत्यस् राक्षौ विलेपतुः

10 आगत्य भगवाम्स् तस्मात् सभार्यः साग्रजः पुरम्

शतधन्वानम् आरेभे हन्तुम् हर्तुम् मणिम् ततः

11 सो ऽपि कृष्णोद्यमम् ज्ञात्वा भीतः प्राण परीप्सया

साहाय्ये कृत वर्माणम् अयाचत स चाब्रवीत्

12 नाहम् ईस्वर योः कुर्याम् हेलनम् राम कृष्णयोः

को नु क्षेमाय कल्पेत तयोर् वृजिन माचरन्

13 कम्सः सहानु गो ऽपीतो यद् द्वेषात् त्याजितः श्रिया

जरासन्धः सप्त दश सम्युगान् विरथो गतः

14 प्रत्याख् यातः स चाक्रूरम् पार्ष्णि ग्राहम् अयाचत

सोऽप्याह को विरुध् येत विद्वान् ईश्वर योर् बलम्

15 य इदम् लीलया विश्वम् सृजत्य वति हन्ति च

चेष्टाम् विश्वसृजो यस्य न विदुर् मोहिता जया

16 यः सप्त हायनः शैलम् उत्पाट् यैकेन पाणिना

दधार लीलया बाल उच्छि लीन्ध्र मिवार् भकः

17 नमस्तस्मै भगवते कृष्णाया अद्भुत कर्मणे

अनन्ता यादि भूताय कूटस्था यात्मने नमः

18 प्रत्याख् यातः स ते नापि शतधन्वा महा मणिम्

तस्मिन् न्यस् याश्व मारुह्य शत योजन गम् ययौ

19 गरुड ध्वज मारुह्य रथम् राम जनार्दनौ

अन्वयाताम् महा वेगैः अश्वै राजन् गुरु द्रुहम्

20 मिथिलायाम् उपवने विसृज्य पतितम् हयम्

पद्भ्याम् अधावत् सन्त्रस्तः कृष्णो ऽप्यन्वद्र वद्रुषा

21 पदातेर् भगवाम्स् तस्य पदातिस् तिग्म नेमिना

चक्रेण शिर उत्कृत्य वाससोर् व्यचिनोन् मणिम्

22 अलब्ध मणिर् आगत्य कृष्ण आहाग्र जान्तिकम्

वृथा हतः शतधनुः मणिस् तत्र न विद्यते

23 तत आह बलो नूनम् स मणिः शतधन्वना

कस्मिम्श् चित् पुरुषे न्यस्तः तम् अन्वेष पुरम् व्रज

24 अहम् विदेह मिच्छामि द्रष्टुम् प्रियतमम् मम

इत् युक्त्वा मिथिलाम् राजन् विवेश यदु नन्दनः

25 तम् दृष्ट्वा सह सोत्थाय मैथिलः प्रीत मानसः

अर्हयाम् आस विधिवद् अर्हणीयम् समर्हणैः

26 उवास तस्याम् कतिचिन् मिथिलायाम् समा विभुः

मानितः प्रीति युक्तेन जनकेन महात् मना

ततो ऽशिक्षद् गदाम् काले धार्त राष्ट्रः सुयोधनः

27 केशवो द्वारका मेत्य निधनम् शतधन् वनः

अप्राप्तिम् च मणेः प्राह प्रियायाः प्रिय कृद् विभुः

28 ततः स कारया मास क्रिया बन्धोर् हतस्य वै

साकम् सुहृद्भिः भगवान् या याः स्युः साम्परायिकाः

29 अक्रूरः कृत वर्मा च श्रुत्वा शतधनोर् वधम्

व्यूषतुर् भय वित् रस्तौ द्वारकायाः प्रयोजकौ

30 अक्रूरे प्रोषिते ऽरिष्टानि आसन्वै द्वारकौ कसाम्

शारीरा मानसा स्तापा मुहुर् दैविक भौतिकाः

31 इत् यङ्गोपदि शन्त्येके विस्मृत्य प्रागुद् आहृतम्

मुनि वास निवासे किम् घटे तारिष्ट दर्शनम्

32 देवे ऽवर्षति काशीशः श्वफल् काया गताय वै

स्व सुताम् गाण्दिनीम् प्रादात् ततो ऽवर्षत् स्म काशिषु

33 तत् सुतस् तत् प्रभावो ऽसौ अक्रूरो यत्र यत्र ह

देवो ऽभि वर्षते तत्र नोप तापा न मारीकाः

34 इति वृद्ध वचः श्रुत्वा नैता वदिह कारणम्

इति मत्वा समानाय्य प्राह् आक्रूरम् जनार्दनः

35 पूज यित्वाभि भाष् यैनम् कथ यित्वा प्रियाः कथाः

विज्ञात् आखिल चित्तज्ञः स्मयमान उवाच ह

36 ननु दान पते न्यस्त: त्वय् यास्ते शतधन् वना

स्यमन्तको मनि: श्रीमान् विदित: पूर्व मेव न:

37 सत्राजितो ऽन पत् यत् वाद् गृहृणीयुर् दुहितु: सुता:

दायम् निनीयाप: पिण्डान् विमुच् यर्णम् च शेषितम्

38 तथापि दुर्धरस् त्वन्यै: त्वय् यास्ताम् सुव्रते मणि:

किन्तु मा मग्रज: सम्यङ् न प्रत्येति मणिम् प्रति

39 दर्शय स्व महाभाग बन्धूनाम् शान्ति मावह

अव्युच् छिन्ना मखास् ते ऽद्य वर्तन्ते रुक्म वेदय:

40 एवम् सामभिर् आलब्ध: श्वफल्क तनयो मणिम्

आदाय वाससाच् छन्नम्: ददौ सूर्य समप्रभम्

41 स्यमन्तकम् दर्श यित्वा ज्ञातिभ्यो रज आत्मन:

विमृज्य मणिना भूय: तस्मै प्रत् यर्प यत् प्रभु:

42 यस्त् वेतद् भगवत ईश्वरस्य विष्णोर्

वीर्याढ्यम् वृजिन हरम् सुमङ्गलम् च

आख्यानम् पठति शृणोत् यनुस्मरेद् वा

दुष् कीर्तिम् दुरितम् अपोह्य याति शान्तिम्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे सप्त पञ्चा शत्तमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्द: अष्ट पञ्चा शत्तमो ऽध्याय :

स्कन्द- 10: अध्याय- 58

01 श्री शुक उवाच

एकदा पाण्डवान् द्रष्टुम् प्रतीतान् पुरुषोत्तमः

इन्द्र प्रस्थम् गतः श्रीमान् युयुधानादि भिर् वृतः

02 दृष्ट्वा तमागतम् पार्था मुकुन्द मखिलेश्वरम्

उत्तस्थुः युगपद् वीराः प्राणा मुख्यम् इवागतम्

03 परिष्वज् याच्युतम् वीरा अङ्ग सङ्ग हतै नसः

सानु राग स्मितम् वक्त्रम् वीक्ष्य तस्य मुदम् ययुः

04 युधिष्ठिरस्य भीमस्य कृत्वा पादाभि वन्दनम्

फाल्गुनम् परिरभ् याथ यमाभ्याम् चाभि वन्दितः

05 परमासन आसीनम् कृष्णा कृष्णम् अनिन्दिता

नवोढा व्रीडिता किञ्चिच् छनै रेत् याभ्य वन्दत

06 तथैव सात्यकिः पार्थैः पूजितश् चाभि वन्दितः

निष सादास ने ऽन्येच पूजिताः पर्यु पासत

07 पृथाम् समागत्य कृताभ् इवादनः तयाति हार्दार्द्र दृशाभि रम्भितः

आपृष्ट वाम्स्ताम् कुशलम् सह स्नुषाम् पितृष्व सारम् परि पृष्ट बान्धवः

08 तमाह प्रेम वैक्लव्य रुद्ध कण्ठाश्रु लोचना

स्मरन्ती तान् बहून् क्लेशान् क्लेशा पायात्म दर्शनम्

09 तदैव कुशलम् नो ऽभूत् सना थास्ते कृता वयम्

ज्ञतीन् नः स्मरता कृष्ण भ्राता मे प्रेषि तस् त्वया

10 न ते ऽस्ति स्वपर भ्रान्तिः विश्वस्य सुहृद् आत्मनः

तथापि स्मरताम् शश्वत् क्लेशान् हम्सि हृदि स्थितः

11 युधिष्ठिर उवाच

किम् न आचरितम् श्रेयो न वेदाहम् अधीश्वर

योगेश् वराणाम् दुर् दर्शो यन्नो दृष्टः कुमेधसाम्

12 इति वै वार्षिकान् मासान् राज्ञा सो ऽभ्यर्थितः सुखम्

जनयन् नयन् आनन्दम् इन्द्र प्रस्थौ कसाम् विभुः

13 एकदा रथम् आरुह्य विजयो वानर ध्वजम्
गाण्डीवम् धनुर् आदाय तूणौ चाक्षय सायकौ
14 साकम् कृष्णेन सन्नद्धो विहर्तुम् विपिनम् वनम्
बहु व्याल मृगा कीर्णम् प्राविशत् पर वीरहा
15 तत्रा विध्यच् छरैर् व्याघ्रान् शूकरान् महिषान् रुरून्
शरभान् गवयान् खड्गान् हरिणान् शश शल्लकान्
16 तान् निन्युः किङ्करा राज्ञे मेध्यान् पर्वण्यु पागते
तृट् परीतः परिश् रान्तो बीभत्सुः यमुना मगात्
17 तत् रोप स्पृश्य विशदम् पीत्वा वारि महा रथौ
कृष्णौ दद्द शतुः कन्याम् चरन्तीम् चारु दर्शनाम्
18 तामा साद्य वरारोहाम् सुद्विजाम् रुचिर् आननाम्
पप्रच्छ प्रेषितः सख्या फाल्गुनः प्रम दोत्तमाम्
19 का त्वम् कस्यासि सुश्रोणि कुतोसि किम् चिकीर्षसि
मन्ये त्वाम् पति मिच्छन्तीम् सर्वम् कथय शोभने
20 श्री काळिन्दि उवाच
अहम् देवस्य सवितुः दुहिता पति मिच्छती
विष्णुम् वरेण्यम् वरदम् तपः परम मास्थिताः
21 नान्यम् पतिम् वृणे वीर तमृते श्रीनि केतनम्
तुष् यताम् मे स भगवान् मुकुन्दो ऽनाथ सम्श्रयः
22 काळिन्दी ति समाख् याता वसामि यमुना जले
निर्मिते भवने पित्रा यावद् अच्युत दर्शनम्
23 तथा वदद् गुडा केशो वासु देवाय सो ऽपि ताम्
रथम् आरोप्य तद् विद्वान् धर्म राजम् उपागमत्
24 यदैव कृष्णः सन्दिष्टः पार्थानाम् परम् आद्बुतम्
कारया मास नगरम् विचित्रम् विश्व कर्मणा
25 भगवाम्स् तत्र निवसन् स्वानाम् प्रिय चिकीर्षया

अग्नये खाण्डवम् दातुम् अर्जुनस् यास सारथिः

26 सो ऽग्निस् तुष्टो धनु रदाद् हयान् श्वेतान् रथम् नृप

अर्जुनाय अक्षयौ तूणौ वर्म चाभेद्य मस्त्रिभिः

27 मयश् च मोचितो वह्नेः सभाम् सख्य उपाहरत्

यस्मिन् दुर्योधन स्यासीत् जलस् थल दृशिभ्रमः

28 स तेन समनु ज्ञातः सुहृद् भिश्चानु मोदितः

आययौ द्वारकाम् भूयः सात्यकि प्रमखैर् वृतः

29 अथोपये मे काळिन्दीम् सुपुण्यर्त् वृक्ष ऊर्जिते

वितन्वन् परम् आनन्दम् स्वानाम् परम मङ्गळम्ः

30 विन्दानु विन्दौ आवन्त्यौ दुर्योधन वशानुगौ

स्वयम् वरे स्व भगिनीम् कृष्णे सक्ताम् न्यषे धताम्

31 राजाधि देव्यास् तनयाम् मित्र विन्दाम् पितृष् वसुः

प्रसह्य हृतवान् कृष्णो राजन् राज्ञाम् प्रपश् यताम्

32 नग्नजिन् नाम कौसल्य आसीद् राजाति धार्मिकः

तस्य सत्या भवत् कन्या देवी नाग्नजिती नृप

33 न ताम् शेकुर् नृपा वोढुम् अजित्वा सप्त गो वृषान्

तीक्ष्ण शृङ्गान् सु दुर्धर्षान् वीर गन्धा सहान् खलान्

34 ताम् श्रुत्वा वृष जिल्लभ्याम् भगवान् सात्वताम् पतिः

जगाम कौसल्य पुरम् सैन्येन महता वृतः

35 स कोसल पतिः प्रीतः प्रत् युत्थाना सनादिभिः

अर्हणे नापि गुरुणा पूजयन् प्रति नन्दितः

36 वरम् विलोक्याभि मतम् समागतम् नरेन्द्र कन्या चकमे रमा पतिम्

भूया दयम् मे पतिराशिषो ऽमलः करोतु सत्या यदि मे धृतो व्रतैः

37 यत् पाद पङ्कज रजः शिरसा बिभर्ति

श्री रब्जजः स गिरिशः सह लोक पालैः

लीला तनुः स्वकृत सेतु परीप्स येशः

काले ऽदधत् स भगवान् मम केन तुष्येत्

38 अर्चितम् पुनर् इत्याह नारायण जगत् पते

आत्मानन् देन पूर्णस्य करवाणि किमल्पक:

39 श्री शुक उवाच

तमाह भगवान् हृष्ट: कृतासन परिग्रह:

मेघ गम्भीरया वाचा सस्मितम् कुरु नन्दन

40 श्री भगवान् उवाच

नरेन्द्र याच्ञा कविभिर् विगर्हिता राजन्य बन्धो: निज धर्म वर्तिन:

तथापि याचे तव सौहृ देच्छया कन्याम् त्वदीयाम् न हि शुल्क दा वयम्

41 श्री राजो उवाच

को ऽन्यस्ते ऽभ्यधि को नाथ कन्या वर इहेप्सित:

गुणै कधाम् नो यस् याङ्गे श्रीर् वसत् यन पायिनी

42 किन्त्वस् माभि: कृत: पूर्वम् समय: सात्व तर्षभ

पुम्साम् वीर्य परीक् षार्थम् कन्या वर परीप्सया

43 सप्तैते गो वृषा वीर दुर् दान्ता दुर वग्रहा:

एतैर् भग्ना: सु बहवो भिन्न गात्रा नृप् आत्मजा:

44 यदिमे निगृही ता: स्युस् त्वयैव यदु नन्दन

वरो भवान् अभिमतो दुहि तुर्मे श्रिय: पते

45 एवम् समयम् आकर्ण्य बद्ध्वा परिकरम् प्रभु:

आत्मानम् सप्तधा कृत्वा न्यगृह्णाल् लीलयैव तान्

46 बद्ध्वा तान् दामभि: शौरि: भग्न दर्पान् हतौ जस:

व्यकर्सल् लीलया बद्धान् बालो दारु मयान् यथा

47 तत: प्रीत: सुताम् राजा ददौ कृष्णाय विस्मित:

ताम् प्रत्य गृह्णाद् भगवान् विधिवत् सदृशीम् प्रभु:

48 राज पत्न्यश् च दुहितु: कृष्णम् लब्ध्वा प्रियम् पतिम्

लेभिरे परम् आनन्दम् जातश् च परमोत्सव:

49 शङ्ख भेर्यान का नेदु: गीत वाद्य द्विजा शिष:

नरा नार्य: प्रमुदिता: सुवास: स्रग लङ्कृता:

50 दश धेनु सहस्राणि पारि बर्हम् अदाद् विभु:

युवतीनाम् त्रिसा हस्रम् निष्क ग्रीव सुवाससम्

51 नव नाग सहस्राणि नागाच् छत गुणान् रथान्

रथाच् छत गुणान् अश्वान् अश्वात् छत गुणान् नरान्

52 दम्पती रथम् आरोप्य महत्या सेनया वृतौ

स्नेह प्रक्लिन्न हृदयो यापया मास कोसल:

53 श्रुत्वै तद् रुरुधुर् भूपा नयन्तम् पथि कन्यकाम्

भग्न वीर्या: सुदुर् मर्षा यदुभिर् गो वृषै: पुरा

54 ता नस्यत: शर व्रातान् बन्धु प्रिय कृद् अर्जुन:

गाण्डीवी कालया मास सिम्ह: क्षुद्र मृगानिव

55 पारि बर्हम् उपागृह्य द्वारका मेत्य सत्यया

रेमे यदूनाम् ऋषभो भगवान् देवकी सुत:

56 श्रुत कीर्ते: सुताम् भद्राम् उपयेमे पितृष् वसु:

कैकेयीम् भ्रातृ भिर् दत्ताम् कृष्ण: सन्तर्दन् आदिभि:

57 सुताम् च मद्राधि पते: लक्ष्मणाम् लक्षणैर् युताम्

स्वयम्वरे जहारैक: स सुपर्ण: सुधामिव

58 अन्याश् चैवम् विधा भार्या: कृष्णस् यासन् सहस्रश:

भौमम् हत्वा तन् निरोधाद् आहृताश् चारु दर्शना:

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे अष्ट पन्चा शत्तमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्दः एकोन षष्टि तमो ऽध्याय :

स्कन्द- 10: अध्याय- 59

01 श्री राजो उवाच

यथा हतो भगवता भौमो येने च ताः स्त्रियः

निरुद्धा एतदा चक्ष्व विक्रमम् शार्ङ्ग धन्वनः

02 श्री शुक उवाच

इन्द्रेण हृत छत्रेण हृत कुण्डल बन्धुना

हृताम राद्रिस् थानेन ज्ञापितो भौम चेष्टितम्

03 सभार्यो गरुडा रूढः प्राग् ज्योतिष पुरम् ययौ

गिरि दुर्गैः शस्त्र दुर्गैः जलाग्न् यनिल दुर्गमम्

मुर पाशा युतैर् घोरैः दृढैः सर्वत आवृतम्

04 गदया निर्बिभे दाद्रीन् शस्त्र दुर्गाणि सायकैः

चक्रेण् आग्निम् जलम् वायुम् मुर पाशाम्स् तथा सिना

05 शङ्ख नादेन यन्त्राणि हृदयानि मनस्विनाम्

प्राकारम् गदया गुर्व्या निर्बिभेद गदा धरः

06 पाञ्च जन्य ध्वनिम् श्रुत्वा युगान्ताश निभीषणम्

मुरः शयान उत्तस्थौ दैत्यः पञ्च शिरा जलात्

07 त्रिशूल मुद्यम्य सुदुर् निरीक्षणो युगान्त सूर्या नल रोचि रुल्बणः

ग्रसम्स् त्रिलोकी मिव पञ्च भिर् मुखैः अभ्यद् रवत् ताक्ष्र्य सुतम् यथोरगः

08 आविध्य शूलम् तरसा गरुत् मते निरस्य वक्त्रैः व्यन दत्स पञ्चभिः

स रोदसी सर्व दिशो ऽन्तरम् महान् आपूरयन् अण्ड कटाहम् आवृणोत्

09 तदाप तद्वै त्रिशिखम् गरुत् मते हरिः शराभ्याम् अभिनत् त्रिधौ जसा

मुखेषु तम् चापि शरैर् अताडयत् तस्मै गदाम् सो ऽपि रुषा व्य मुञ्चत

10 ताम् आपतन्तीम् गदया गदाम् मृधे गदाग्रजो निर्बिभिदे सहस्रधा

उद्यम्य बाहून् अभिधाव तो ऽजितः शिराम्सि चक्रेण जहार लीलया

11 व्यसुः पपाताम् भसि कृत्त शीर्षो निकृत्त शृङ्गो ऽद्रि रिवेन्द्र तेजसा

तस् यात्मजाः सप्त पितुर् वधा तुराः प्रतिक्रिया मर्ष जुषः समुद् यताः

12 ताम्रो ऽन्तरिक्षः श्रवणो विभावसुः

वसुर् नभस्वान् अरुणश् च सप्तमः

पीठम् पुरस् कृत्य चमू पतिम् मृधे

भौम प्रयुक्ता निरगन् धृता युधाः

13 प्रायुञ्ज तासाद्य शरान् असीन् गदाः शक्त्यृष्टि शूलान् यजिते रुषोल्बणाः

तच् छस्त्र कूटम् भगवान् स्व मार्गणैः अमोघ वीर्यस् तिल शश् च कर्त ह

14 तान् पीठ मुख्यान् अनयद्य मक्षयम्

निकृत्त शीर्षोरु भुजाङ्घ्रि वर्मणः

स्वानीक पान् अच्युत चक्र सायकैः

तथा निरस्तान् नरको धरा सुतः

निरीक्ष्य दुर् मर्षण आस्रवन् मदैः

गजैः पयोधि प्रभवैर् निराक्रमात्

15 दृष्ट्वा सभार्यम् गरुडो परि स्थितम्

सूर्यो परिष्टात् सतडिद् घनम् यथा

कृष्णम् स तस्मै व्यसृजच् छ तघ्नीम्

योधाश् च सर्वे युग पत् स्म विव्यधुः

16 तद् भौम सैन्यम् भगवान् गदा ग्रजो

विचित्र वाजैः निशितैः शिली मुखैः

निकृत्त बाहूरु शिरोध्र विग्रहम्

चकार तर्ह्येव हताश्व कुञ्जरम्

17 यानि योधैः प्रयुक्तानि शस्त्रास् त्राणि कुरूद् वह

हरिस्तान् यच् छिनत् तीक्ष्णैः शरैर् एकै कशस् त्रिभिः

18 उह्यमानः सुपर्णेन पक्षाभ्याम् निघ्नता गजान्

गरुत् मता हन्य माना: तुण्ड पक्ष नखैर् गजा:

19 पुरमेवा विशन् नार्ता नरको युध्य युध्यत

20 दृष्ट्वा विद्रावितम् सैन्यम् गरुडे नार्दितम् स्वकम्

तम् भौम: प्राहरच् छक्त्या वज्र: प्रति हतो यत:

नाकम् पत तया विद्धो माला हत इव द्विप:

21 शूलम् भौमो ऽच्युतम् हन्तुम् आददे वितथोद् यम:

तद् विसर्गात् पूर्व मेव नरकस्य शिरो हरि:

अपा हरद् गजस् थस्य चक्रेण क्षुर नेमिना

22 सकुण्डलम् चारु किरीट भूषणम् बभौ पृथिव्याम् पतितम् समुज्ज्वलत्

हा हेति साध् विति ऋषय: सुरेश्वरा माल्यैर् मुकुन्दम् विकिरन्त ईडिरे

23 ततश् च भू: कृष्ण मुपेत्य कुण्डले

प्रतप्त जाम्बू नद रत्न भास्वरे

सवै जयन्त्या वनमाल यार्प यत्

प्राचे तसम् छत्र मथो महा मणिम्

24 अस्तौ षीद् अथ विश्वेशम् देवी देव वरार्चितम्

प्राञ्जलि: प्रणता राजन् भक्ति प्रवणया धिया

25 भूमिर् उवाच

नमस्ते देव देवेश शङ्ख चक्र गदा धर

भक्तेच् छोपात्त रूपाय परमात्मन् नमो ऽस्तु ते

26 नम: पङ्कज नाभाय नम: पङ्कज मालिने

नम: पङ्कज नेत्राय नमस्ते पङ्कजाङ् घ्रये

27 नमो भगवते तुभ्यम् वासु देवाय विष्णवे

पुरुषा यादि बीजाय पूर्ण बोधाय ते नम:

28 अजाय जनयित्रे ऽस्य ब्रह्मणे ऽनन्त शक्तये

परावर् आत्मन् भूतात्मन् परमात्मन् नमो ऽस्तु ते

29 त्वम् वै सिसृक्षु रज उत्कटम् प्रभो

तमो निरोधाय बिभर्ष्य सम्वृत:

स्थानाय सत्त्वम् जगतो जगत् पते

काल: प्रधानम् पुरुषो भवान् पर:

30 अहम् पयो ज्योतिर् अथानि लोनभो मात्राणि देवा मन इन्द्रियाणि

कर्ता महानित् यखिलम् चरा चरम् त्वय् यद्वि तीये भगवन् अयम् भ्रम:

31 तस्यात्मजो ऽयम् तव पाद पङ्कजम् भीत: प्रपन्नार्ति हरोप सादित:

तत् पालयैनम् कुरु हस्त पङ्कजम् शिरस्य मुष्या अखिल कल्मषा पहम्

32 श्री शुक उवाच

इति भूम् यार्थितो वाग्भि: भगवान् भक्ति नम्रया

दत्त्वा भयम् भौम गृहम् प्राविशत् सकलर्द्धि मत्

33 तत्र राजन्य कन्यानाम् षट् सहस्राधि कायुतम्

भौमा हृतानाम् विक्रम्य राजभ्यो ददृशे हरि:

34 तम् प्रविष्टम् स्त्रियो वीक्ष्य नरवीरम् विमोहिता:

मनसा वव्रिरे ऽभीष्टम् पतिम् दैवोप सादितम्

35 भूयात् पतिरयम् मह्यम् धाता त दनु मोदताम्

इति सर्वा: पृथक् कृष्णे भावेन हृदयम् दधु:

36 ता: प्राहिणोद् द्वार वतीम् सुमृष्ट विरजो ऽम्बरा:

नरयानैर् महा कोशान् रथाश्वान् द्रविणम् महत्

37 ऐरावत कुले भाम्श् च चतुर् दन्ताम् स्तरस्विन:

पाण्डु राम्श् च चतु: षष्टिम् प्रेषया मास केशव:

38 गत्वा सुरेन्द्र भवनम् दत्त्वा ऽदित्यै च कुण्डले

पूजितस् त्रिद शेन्द्रेण सहेन्द्राण्या च सप्रिय:

39 चोदितो भार्य योत् पाट्य पारि जातम् गरुत् मति

आरोप्य सेन्द्रान् विबुधान् निर्जित् योपान यत् पुरम्

40 स्थापित: सत्य भामाया गृहो द्यानोप शोभन:

अन्वगु: भ्रमरा: स्वर्गात् तद् गन्धास वलम् पटा:

41 ययाच आनम्य किरीट कोटिभिः पादौ स्पृशन् अच्युतम् अर्थ साधनम्

सिद्धार्थ एतेन विगृह्य ते महान् अहो सुराणाम् च तमो धिगाढ् यताम्

42 अथो मुहूर्त एकस्मिन् नाना गारेषु ताः स्त्रियः

यथो पयेमे भगवाम्स् तावद् रूप धरो ऽव्ययः

43 गृहेषु तासाम् अन पाय्य तर्क्य कृन् निरस्त साम्याति शयेष्व वस्थितः

रेमे रमाभिः निज काम सम्प्लुतो यथे तरो गार्हक मेधिकाम्श् चरन्

44 इत्थम् रमा पतिम् अवाप्य पतिम् स्त्रियस् ता

ब्रह्मा दयो ऽपि न विदुः पदवीम् यदीयाम्

भेजुर् मुदावि रतमे धित यानु राग

हासाव लोक नव सङ्गम जल्प लज्जाः

45 प्रत् युद् गमासन वरार्हण पाद शौच

ताम्बूल विश्रमण वीजन गन्ध माल्यैः

केश प्रसार शयन स्नपनोप हार्यैः

दासी शता अपि विभोः विद धुःस्म दास्यम्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे एकोन षष्टि तमो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्दः षष्टि तमो ऽध्याय :

स्कन्द- 10: अध्याय- 60

01 श्री शुक उवाच

कर्हिचित् सुख मासीनम् स्वतल् पस्थम् जगद् गुरुम्

पतिम् पर्य चरद् भैष्मी व्यजनेन सखी जनैः

02 यस्त्वे तल् लीलया विश्वम् सृजत् यत्त्यव तीश्वरः

स हि जातः स्व सेतूनाम् गोपी थाय यदुष् वजः

03 तस्मिन् अन्तर् गृहे भ्राजन् मुक्ता दाम विलम्बिना

विराजिते वितानेन दीपैः मणिमयैर् अपि

04 मल्लिका दामभिः पुष्पैः द्विरेफ कुल नादितै

जाल रन्ध्र प्रविष्टैश् च गोभिश् चन्द्रम सो ऽमलैः

05 पारिजात वना मोद वायुनो द्यान शालिना

धूपैर् अगुरुजै राजन् जाल रन्ध्र विनिर् गतैः

06 पयः फेन निभे शुभ्रे पर्यङ्के कशि पूत्तमे

उप तस्थे सुखा सीनम् जगताम् ईश्वरम् पतिम्

07 वाल व्यजन मादाय रत्न दण्डम् सखी करात्

तेन वीजयती देवी उपासाञ् चक्र ईश्वरम्

08 सोपाच्युतम् क्वणयती मणि नूपुराभ् याम्

रेजे ऽङ्गुलीय वलय व्यजना ग्रहस्ता

वस्त्रान् त गूढ कुच कुङ्कुम शोण हार

भासा नितम्ब धृतया च पराध्र्य काञ्च्या

09 ताम् रूपिणीम् श्रीयम् अनन्य गतिम् निरीक्ष्य

या लीलया धृत तनोर् अनुरूप रूपा

प्रीतः स्मयन् अलक कुण्डल निष्क कण्ठ

वक्त्रोल् लसत् स्मित सुधाम् हरि राब भाषे

10 श्री भगवान् उवाच

राज पुत्री प्सिता भूपैः लोक पाल विभूतिभिः

महानु भावैः श्रीमद्भी रूप उदार्य बलोर् जितैः

11 तान् प्राप्तान् अर्थिनो हित्वा चैद् यादीन् स्मर दुर् मदान्

दत्ता भ्रात्रा स्व पित्रा च कस्मान् नो ववृषे ऽसमान्

12 राजभ्यो बिभ्यत: सुभ्रु समुद्रम् शरणम् गतान्

बलवद्धि: कृत द्वेषान् प्रायस् त्यक्त नृपा सनान्

13 अस्पष्ट वर्त्मनाम् पुम्साम् अलोक पथ मीयुषाम्

आस्थिता: पदवीम् सुभ्रु: प्राय: सीदन्ति योषित:

14 निष् किञ्चना वयम् शश्वन् निष् किञ्चन जन प्रिया:

तस्मात् प्रायेण न ह्याढ्या माम् भजन्ति सुमध्यमे

15 ययोर् आत्म समम् वित्तम् जन्मैश्वर्या कृतिर् भव:

तयोर् विवाहो मैत्री च नोत्त माध मयो: क्वचित्

16 वैदर्भ् येत दविज्ञाय त्वया दीर्घ समीक्षया

वृता वयम् गुणैर् हीना भिक्षुभि: श्लाघिता मुधा

17 अथ् आत्मनो ऽनु रूपम् वै भजस्व क्षत्रि यर्षभम्

येन त्वम् आशिष: सत्या इहा मुत्र च लप्स्यसे

18 चैद्य शाल्व जरासन्ध दन्त वक्रादयो नृपा:

मम द्विषन्ति वामोरु रुक्मी चापि तवा ग्रज:

19 तेषाम् वीर्य मदान् धानाम् दृप्तानाम् स्मय नुत्तये

आनितासि मया भद्रे तेजो पहर ता सताम्

20 उदासीना वयम् नूनम् न स्त्र्य पत् यार्थ कामुका:

आत्म लब्ध्यास्महे पूर्णा गेहयोर् ज्योतिर क्रिया:

21 श्री शुक उवाच

एताव दुक्त्वा भगवान् आत्मानम् वल्लभा मिव

मन्य मानाम् अविश्लेषात् तद् दर्पघ्न उपार मत्

22 इति त्रि लोकेश पतेस् तद् आत्मन: प्रियस्य देवि अश्रुत पूर्वम् अप्रियम्

आश्रुत्य भीता हृदि जात वे पथु: चिन्ताम् दुरन्ताम् रुदती जगाम ह

23 पदा सुजातेन नखारुण श्रीया भुवम् लिखन्ति अश्रुभिर् अञ्जना सितै:

आसिञ्चती कुङ्कुम रूषितौ स्तनौ तस्थौ अधो मुख्यति दु: ख रुद्ध वाक्

24 तस्या: सु दु: ख भय शोक विनष्ट बुद्धे:

हस्तात् छलथद् वलयतो व्यजनम् पपात

देहश् च विक्लवधियः सह सैव मुह्यन्

रम्भेव वायु विहता प्रवि कीर्य केशान्

25 तद् दृष्ट्वा भगवान् कृष्णः प्रियायाः प्रेम बन्धनम्

हास्य प्रौढिम् अजानन्त्याः करुणः सो ऽन्वकम् पत

26 पर्यङ्काद् अवरुह् याशु ताम् उत्थाप्य चतुर् भुजः

केशान् समुह्य तद् वक्त्रम् प्रामृजत् पद्म पाणिना

27 प्रमृज् याश्रु कले नेत्रे स्तनौ चोप हतौ शुचा

आश्लिष्य बाहुना राजन् अनन्य विषयाम् सतीम्

28 सान्त्वया मास सान्त् वज्ञः कृपया कृपणाम् प्रभुः

हास्य प्रौढि भ्रमच् चित्ताम् अत दर्हाम् सताम् गतिः

29 श्री भगवान् उवाच

मा मा वैदर्भ्य सूयेथा जाने त्वाम् मत् परायणाम्

त्वद् वचः श्रोतु कामेन क्ष्वेल्या आचरित मङ्गने

30 मुखम् च प्रेम सम्रम्भ स्फुरिता धर मीक्षितुम्

कटा क्षेपा रुणा पाङ्गम् सुन्दर भ्रुकुटी तटम्

31 अयम् हि परमो लाभो गृहेषु गृह मेधिनाम्

यन् नर्मैः नीयते यामः प्रियया भीरु भामिनि

32 श्री शुक उवाच

सैवम् भगवता राजन् वैदर्भी परिसान्त् विता

ज्ञात्वा तत् परिहा सोक्तिम् प्रिय त्याग भयम् जहौ

33 बभाष ऋषभम् पुम्साम् वीक्षन्ती भगवन् मुखम्

सव्रीड हास रुचिर स्निग्धा पाङ्गेन भारत

34 श्री रुक्मिण् युवाच

नन् वेव मेतद् अरविन्द विलोचनाह यद्वै भवान् भगवतो ऽसदृशी विभूम्नः

क्व स्वे महिम्न् यभिरतो भगवाम् स्त्र्यधीशः क्वाहम् गुण प्रकृति रज्ञ गृहीत पादा

35 सत्यम् भया दिव गुणेभ्य उरुक्र मान्तः
शेते समुद्र उप लम्भन मात्र आत्मा
नित्यम् कदिन्द्रिय गणैः कृत विग्र हस्त्वम्
त्वत् सेवकैर् नृप पदम् विधुतम् तमो ऽन्धम्
36 त्वत् पाद पद्म मकरन्द जुषाम् मुनीनाम्
वर्त्मास् फुटम् नृप शुभिर् ननु दुर् विभाव्यम्
यस्माद् अलौकिक मिवेहित मीश्व रस्य
भूमम्स् तवेहित मथो अनु ये भवन्तम्
37 निष्किञ्चनो ननु भवान् नयतो ऽस्ति किञ्चिद्
यस्मै बलिम् बलि भुजो ऽपि हरन्त्य जाद्याः
न त्वा विदन्त्य सुतृपो ऽन्तक माढ्य तान्धाः
प्रेष्ठो भवान् बलि भुजा मपि ते ऽपि तुभ्यम्
38 त्वम् वै समस्त पुरुषार्थ मयः फलात्मा
यद् वाञ्छया सुमतयो विसृजन्ति कृत्स्नम्
तेषाम् विभो समुचितो भवतः समाजः
पुम्सः स्त्रियाश् च रतयोः सुख दुः खि नोर्न
39 त्वम् न्यस्त दण्ड मुनिभिः गदि तानु भाव
आत् मात्म दश् च जगता मिति मे वृतो ऽसि
हित्वा भवद् भ्रुव उदीरित काल वेग
ध्वस्ता शिषो ऽब्ज भव नाक पतीन् कुतो ऽन्ये
40 जाड्यम् वचस् तव गदा ग्रज यस्तु भूपान्
विद्राव्य शार्ङ्ग निनदेन जहर्थ माम् त्वम्
सिम्हो यथा स्व बलि मीश पशून् स्व भागम्
तेभ्यो भयाद् यदु दधिम् शरणम् प्रपन्नः
41 यद् वाञ्छया नृप शिखा मण यो ऽन्ग वैन्य
जायन्त नाहुष गयादय ऐक पत्यम्

राज्यम् विसृज्य विविशु: वनम् अम्बुजाक्ष

सीदन्ति ते ऽनु पदवीम् त इहास्थि ता: किम्

42 कान्यम् श्रयेत तव पाद सरोज गन्धम्

आघ्राय सन् मुखरितम् जनताप वर्गम्

लक्ष्म् यालयम् त्ववि गणय्य गुणाल यस्य

मर्त्या सदोरु भयम् अर्थ विविक्त दृष्टि:

43 तम् त्वानु रूपम् अभजम् जगताम धीशम्

आत्मान मत्र च परत्र च काम पूरम्

स्यान्मे तवाङ्घ्रि ररणम् सृतिभिर् भ्रमन्त्या

यो वै भजन्तम् उपयात् यनृताप वर्ग:

44 तस्या: स्युर् अच्युत नृपा भव तोप दिष्टा:

स्त्रीणाम् गृहेषु खर गोश्व विडाल भृत्या:

यत् कर्ण मूल मरि कर्षण नोप यायाद्

युष्मत् कथा मृड विरिञ्च सभासु गीता

45 त्वक्ष् मश्रु रोम नख केशपि नद्धम् अन्तर्

माम्सास्थि रक्त कृमि विट् कफ पित्त वातम्

जीवच् छवम् भजति कान्त मतिर् विमूढा

या ते पदाब्ज मकरन्दम् अजि घ्रती स्त्री

46 अस्त् वम्बुजाक्ष मम ते चरणानु राग

आत्मन् रतस्य मयि चानति रिक्त दृष्टे:

यर्ह्यस्य वृद्धय उपात्त रजो ऽति मात्रो

मामीक्षसे तदु ह न: परमानु कम्पा

47 नैवाली क महम् मन्ये वचस्ते मधु सूदन

अम्बाया इव हि प्राय: कन्याया: स्याद् रति: क्वचित्

48 व्यूढा याश्चापि पुम्श्चल्या मनो ऽभ्येति नवम् नवम्

बुधो ऽसतीम् न बिभृ यात् ताम् बिभ्रद् उभय् अच्युत:

49 श्री भगवान् उवाच

साध् व्येतच् छ्रोतुका मैस्त्वम् राज पुत्री प्रलम्भिता

मयोदितम् यदन् वात्थ सर्वम् तत् सत्य मेव हि

50 यान् यान् कामयसे कामान् मय्य कामाय भामिनि

सन्ति ह्येकान्त भक्तायाः तव कल्याणि नित्यद

51 उपलब्धम् पति प्रेम पाति व्रत्यम् च ते ऽनघे

यद् वाक्यैः चाल्य मानाया न धीर्मय् यप कर्षिता

52 ये माम् भजन्ति दाम्पत्ये तपसा व्रत चर्यया

कामात् मानो ऽपवर्गेशम् मोहिता मम मायया

53 माम् प्राप्य मानिन् यप वर्ग सम्पदम्

वाञ्छन्ति ये सम्पद एव तत् पतिम्

ते मन्द भाग्या निरये ऽपि ये नृणाम्

मात् रात्म कत् वात् निरयः सु सङ्गमः

54 दिष्ट्या गृहेश्वर् यसकृन् मयि त्वया कृतानु वृत्तिः भव मोचनी खलैः

सु दुष्करासौ सुतराम् दुराशिषो ह्यसुम्भ राया निकृतिम् जुषः स्त्रियाः

55 न त्वाद् ऋशीम् प्रणयिनीम् गृहिणीम् गृहेषु

पश्यामि मानिनि यया स्व विवाह काले

प्राप्तान् नृपान् अवगणय्य रहोहरो मे

प्रस्थापितो द्विज उपश्रुत सत् कथस्य

56 भ्रातुर् विरूप करणम् युधि निर्जि तस्य

प्रोद्वाह पर्वणि च तद् वधम् अक्ष गोष्ठ्याम्

दुः खम् समुत्थ मसहो ऽस्म दयोग भीत्या

नैवा ब्रवीः किमपि तेन वयम् जितास्ते

57 दूतस् त्वय् आत्म लभने सुवि विक्त मन्त्रः

प्रस्थापितो मयि चिरा यति शून्य मेतत्

मत्वा जिहास इदम् अङ्गम् अनन्य योग्यम्

तिष्ठेत तत् त्वयि वयम् प्रति नन्द याम:

58 श्री शुक उवाच

एवम् सौरत सम्लापै: भगवान् जगद् ईश्वर:

स्वरतो रमया रेमे नर लोकम् विडम्बयन्

59 तथान् यासाम् अपि विभु: गृहेशु गृहवान् इव

आस्थितो गृहमे धीयान् धर्मान् लोक गुरुर् हरि:

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे षष्टि तमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्द: एक षष्टि तमो ऽध्याय :

स्कन्द- 10: अध्याय- 61

01 श्री शुक उवाच

एकैक शस्ता: कृष्णस्य पुत्रान् दश दशा बला:

अजीजनन् अनवमान् पितु: सर्वात्म सम्पदा

02 गृहाद् अनपगम् वीक्ष्य राज पुत्र्यो ऽच्युतम् स्थितम्

प्रेष्ठम् न्यमम् सत स्वम् स्वम् न तत् तत्त्व विद: स्त्रिय:

03 चार्वब्ज कोश वद नायत बाहु नेत्र

स प्रेमहा स रस वीक्षित वल्गु जल्पै:

सम् मोहिता भगवतो न मनो विजेतुम्

स्वैर् विभ्रमै: समशकन् वनिता विभूम्न:

04 स्मायाव लोक लव दर्शित भाव हारि

भ्रू मण्डल प्रहित सौरत मन्त्र शौण्डैः

पत्न्यस्तु शोडश सहस्रम् अनङ्ग बाणैः

यस् येन्द्रियम् विमथितुम् करणैर्न शेकुः

05 इत्थम् रमा पतिम् अवाप्य पतिम् स्त्रि यस्ता

ब्रह्मा दयो ऽपि न विदुः पदवीम् यदीयाम्

भेजुर् मुदावि रत मेधि तयानु राग

हासाव लोक नव सङ्गम लाल साद्यम्

06 प्रत्युद् गमासन वरार्हण पाद शौच

ताम्बूल विश्रमण वीजन गन्ध माल्यैः

केश प्रसार शयन स्नपनोप हार्यैः

दासी शता अपि विभोर् विदधुः स्म दास्यम्

07 तासाम् या दश पुत्राणाम् कृष्ण स्त्रीणाम् पुरोदिताः

अष्टौ महिष्यस् तत् पुत्रान् प्रद्युम् नादीन् गृणामि ते

08 चारु देष्णः सुदेष्णश् च चारु देहश् च वीर्यवान्

सुचारुः चारु गुप्तश् च भद्र चारुस् तथा परः

09 चारु चन्द्रो विचारुश् च चारुश् च दशमो हरेः

प्रद्युम्न प्रमुखा जाता रुक्मिण्याम् नावमाः पितुः

10 भानुः सुभानुः स्वर्भानुः प्रभानुर् भानु माम्स् तथा

चन्द्र भानुर् बृहद् भानुः अति भानुस् तथाष्टमः

11 श्री भानुः प्रति भानुश् च सत्य भामात्म जा दश

साम्बः सुमित्रः पुरुजित् छतजित् च सहस्रजित्

12 वियय‍श् चित्र केतुश् च वसुमान् द्रविडः क्रतुः

जाम्बवत्याः सुता ह्येते साम्बाद्याः पितृ सम्मताः

13 वीरश् चन्द्रो ऽश्व सेनश् च चित्रगुर् वेग वान् वृषः

आमः शङ्कुर् वसुः श्रीमान् कुन्तिर् नाग्न जितेः सुताः

14 श्रुतः कविर् वृषो वीरः सुबाहुर् भद्र एकलः

शान्तिर् दर्शः पूर्ण मासः कालिन्द्याः सोम को ऽवरः

15 प्रघोषो गात्रवान् सिम्हो बलः प्रबल ऊर्ध्वगः

माद्र्याः पुत्रा महा शक्तिः सह ओजो ऽपराजितः

16 वृको हर्षो ऽनिलो गृध्रो वर्धनोन् नाद एव च

महाशः पावनो वह्निः मित्र विन्दात्म जाः क्षुधिः

17 सङ्ग्राम जिद् बृहत् सेनः शूरः प्रहरणो ऽरिजित्

जयः सुभद्रो भद्राया वाम आयुश् च सत्यकः

18 दीप्तिमाम्स् ताम्र तप् ताद्या रोहिण्यास् तनया हरेः

प्रद्यम्नाच् चानिरुद्धो ऽभूद् रुक्म वत्याम् महा बलः

पुत्र्याम् तु रुक्मिणो राजन् नाम्ना भोजकटे पुरे

19 एतेषाम् पुत्र पौत्राश् च बभूवुः कोटि शो नृप

मातरः कृष्ण जातानाम् सहस्राणि च षोडश

20 श्री राजो वाच

कथम् रुक्म् यरी पुत्राय प्रादाद् दुहितरम् युधि

कृष्णेन परि भूतस्तम् हन्तुम् रन्ध्रम् प्रतीक्षते

एत दाख्याहि मे विद्वन् द्विषोर् वै वाहिकम् मिथः

21 अनागतम् अतीतम् च वर्तमानम् अतीन्द्रियम्

विप्र कृष्टम् व्यव हितम् सम्यक् पश्यन्ति योगिनः

22 श्री शुक उवाच

वृतः स्वयम् वरे साक्षाद् अनङ्गो ऽङ्ग युतस् तया

राज्ञः समेतान् निर्जित्य जहार इकरथो युधि

23 यद् यप् यनुस्मरन् वैरम् रुक्मी कृष्णाव मानितः

व्यतरद् भागिने याय सुताम् कुर्वन् स्वसुः प्रियम्

24 रुक्मिण्यास् तनयाम् राजन् कृत वर्म सुतो बली

उपयेमे विशालाक्षीम् कन्याम् चारुमतीम् किल

25 दौहित्राया अनिरुद्धाय पौत्रीम् रुक्म्या ददाद् हरेः

रोचनाम् बद्ध वैरो ऽपि स्वसुः प्रियचि कीर्षया

जानन् अधर्मम् तद् यौनम् स्नेह पाशानु बन्धनः

26 तस्मिन् अभ्युदये राजन् रुक्मिणी राम केशवौ

पुरम् भोजकटम् जग्मुः साम्ब प्रद्युम्न कादयः

27 तस्मिन् निवृत्त उद्वाहे कालिङ्ग प्रमुखा नृपाः

दृप्तास्ते रुक्मिणम् प्रोचुः बलम् अक्षैर् विनिर् जय

28 अनक्षज्ञो ह्ययम् राजन् अपि तद् व्यसनम् महत्

इत् युक्तो बलम् आहूय तेनाक्षैर् रुक्म्य दीव् यत

29 शतम् सहस्रम् अयुतम् रामस् तत् राददे पणम्

तम् तु रुक्मि अजयत् तत्र कालिङ्गः प्राह सद् बलम्

दन्तान् सन्दर्शयन् उच्चैः नामृष्यत् तद् हला युधः

30 ततो लक्षम् रुक्म्य गृह्णाद् ग्लहम् तत् राज यद् बलः

जितवान् अहम् इत्याह रुक्मी कैतव माश्रितः

31 मन्युना क्षुभितः श्रीमान् समुद्र इव पर्वणि

जात् यारुणाक्षो ऽतिरुषा न्यर्बुदम् ग्लह माददे

32 तम् चापि जितवान् रामो धर्मेण छलम् आश्रितः

रुक्मी जितम् मयात् रेमे वदन्तु प्राश्निका इति

33 तदा ब्रवीन् नभो वाणी बलेनैव जितो ग्लहः

धर्मतो वचने नैव रुक्मी वदति वै मृषा

34 ताम् अनादृत्य वैदर्भो दुष्ट राजन्य चोदितः

सङ्कर्षणम् परिहसन् बभाषे काल चोदितः

35 नैवाक्ष कोविदा यूयम् गोपाला वन गोचराः

अक्षैः दीव्यन्ति राजानो बाणैश् च न भवा दृशाः

36 रुक्मिणैवम् अधिक् षिप्तो राज भिश्चोप हासितः

क्रुद्धः परिघ मुद्यम्य जघ्ने तम् नृम्ण सम्सदि

37 कलिङ्ग राजम् तरसा गृहीत्वा दशमे पदे

दन्तान् अपात यत् क्रुद्धो यो ऽहसद्वि वृतैर् द्विजैः

38 अन्ये निर्भिन्न बाहूरु शिरसो रुधि रोक्षिताः

राजानो दुद्रुवुर् भीता बलेन परिघार् दिताः

39 निहते रुक्मिणि श्याले नाब्रवीत् साध्व साधु वा

रुक्मिणी बलयो राजन् स्नेह भङ्ग भयाद् हरिः

40 ततो ऽनिरुद्धम् सह सूर्य या वरम् रथम् समारोप्य ययुः कुशस् थलीम्

रामा दयो भोजकटाद् दशार्हाः सिद्धा अखिलार्था मधुसूदन् आश्रयाः

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे एक षष्टि तमो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्दः द्वि षष्टि तमो ऽध्याय :

स्कन्द- 10: अध्याय- 62

01 श्री राजो उवाच

बाणस्य तनयाम् ऊषाम् उपयेमे यदूत्तमः

तत्र युद्धम् अभूद् घोरम् हरि शङ्कर योर् महत्

एतत् सर्वम् महा योगिन् समाख् यातुम् त्व मर्हसि

02 श्री शुक उवाच

बाणः पुत्र शत ज्येष्ठो बले रासीन् महात्मनः

येन वामन रूपाय हरये ऽदायि मेदिनी

तस्यौरसः सुतो बाणः शिव भक्ति रतः सदा

मान्यो वदान्यो धीमान्श् च सत्य सन्धो दृढ व्रतः

शोनिताख्ये पुरे रम्ये स राज्य मकरोत् पुरा

तस्य शम्भोः प्रसादेन किङ्करा इव ते ऽमराः

सहस्र बाहुः वाद्येन तान्डवे ऽतोषयन् मृडम्

03 भगवान् सर्व भूतेशः शरण्यो भक्त वत्सलः

वरेण छन्दया मास स तम् वव्रे पुराधिपम्

04 स एक दाह गिरिशम् पार्श् वस्थम् वीर्य दुर् मदः

किरीटे नार्क वर्णेन सम्स्पृशन्स् तत् पदाम्बुजम्

05 नमस्ये त्वाम् महादेव लोकानाम् गुरुम् ईश्वरम्

पुम्साम् अपूर्ण कामानाम् काम पूराम राङ्घ्रिपम्

06 दोः सहस्रम् त्वया दत्तम् परम् भाराय मे ऽभवत्

त्रि लोक्याम् प्रति योद् धारम् न लभे त्वद् ऋते समम्

07 कण्डूत्या निभृतैर् दोर्भिः युयुत्सुर् दिग् गजानहम्

आद्यायाम् चूर्ण यन् नद्रीन् भीतास् ते ऽपि प्रदु द्रुवुः

08 तच् छ्रुत्वा भगवान् क्रुद्धः केतुस्ते भज्यते यदा

त्वद् दर्पघ्नम् भवेन् मूढ सम्युगम् मत्स मेन ते

09 इत् युक्तः कुमतिर् हृष्टः स्वगृहम् प्राविशन् नृप

प्रतीक्षन् गिरि शादेशम् स्व वीर्यन शनम् कुधीः

10 तस्योषा नाम दुहिता स्वप्ने प्राद् युम्निना रतिम्

कन्याल भत कान् तेन प्राग् अदृष्ट श्रुतेन सा

11 सा तत्र तम् अपश् यन्ती क्वासि कान् तेति वादिनी

सखीनाम् मध्य उत्तस्थौ विह्वला व्रीडिता भृशम्

12 बाणस्य मन्त्री कुम्भाण्डः चित्र लेखा च तत् सुता

सख्य पृच्छत् सखी मूषाम् कौतूहल समन् विता

13 कम् त्वम् मृगयसे सुभ्रु कीदृ शस्ते मनोरथः

हस्त ग्राहम् न ते ऽद्यापि राज पुत्रि उपलक्षये

14 ऊशो उवच

दृष्टः कश्चिन् नरः स्वप्ने श्यामः कमल लोचनः

पीत वासा बृहद् बाहुः योषिताम् हृद यङ्गमः

15 तमहम् मृगये कान्तम् पाय यित् वाधरम् मधु

क्वापि यातः स्पृह यतीम् क्षिप्त्वा माम् वृजि नार्णवे

16 चित्र लेखो उवाच

व्यसनम् ते ऽपकर्षामि त्रिलोक्याम् यदि भाव्यते

तमानेष्ये नरम् यस्ते मनो हर्ता तमादिश

17 इत् युक्त्वा देव गन्धर्व सिद्ध चारण पन्नगान्

दैत्य विद्याधरान् यक्षान् मनुजाम्श् च यथा लिखत्

18 मनुजेषु च सा वृष्नीन् शूरम् आनक दुन्दुभिम्

व्यलिखद् राम कृष्णौ च प्रद्युम्नम् वीक्ष्य लज्जिता

19 अनिरुद्धम् विलिखितम् वीक्ष् योषौ आङ्मुखी ह्रिया

सो ऽसौ असौ इति प्राह स्मय माना मही पते

20 चित्र लेखा त माज्ञाय पौत्रम् कृष्णस्य योगिनी

ययौ विहायसा राजन् द्वारकाम् कृष्ण पालिताम्

21 तत्र सुप्तम् सुपर् यङ्के प्राद्युम्निम् योग मास्थिता

गृहीत्वा शोणित पुरम् सख्यै प्रियम् अदर्श यत्

22 सा च तम् सुन्दर वरम् विलोक्य मुदिता नना

दुष् प्रेक्ष्ये स्व गृहे पुम्भी रेमे प्राद्युम्निना समम्

23 परार्घ्य वासः स्रग् गन्ध धूप दीपास नादिभिः

पान भोजन भक्ष्यैश् च वाक्यैः शुश्रूष यार्चितः

24 गूढः कन्या पुरे शश्वत् प्रवृद्ध स्नेहया तया

नाहर् गणान्स बुबुधे ऊषया अपहृतेन् द्रियः

25 ताम् तथा यदु वीरेण भुज्य मानाम् हत व्रताम्

हेतुभिः लक्षयात्र् चक्रूः आप्रीताम् दुर वच्छदैः

26 भटा आवेदयात्र् चक्रू राजम्स्ते दुहितुर् वयम्

विचेष्टितम् लक्षयामः कन्यायाः कुल दूषणम्

27 अनपायि भिरस् माभिः गुप्ता याश् च गृहे प्रभो

कन्याया दूषणम् पुम्भिः दुष् प्रेक्षाया न विद्महे

28 ततः प्रव् यथितो बाणो दुहितुः श्रुत दूषणः

त्वरितः कन्य कागारम् प्राप्तो ऽद्राक्षीद् यदूद् वहम्

29 कामात्मजम् तम् भुवनैक सुन्दरम् श्यामम् पिशङ् गाम्बरम् अम्बु जेक्षणम्

बृहद् भुजम् कुण्डल कुन्तलत् विषा स्मिता वलोकेन च मण्डिताननम्

30 दीव्यन्त मक्षैः प्रिययाभि नृम्णया तद् अङ्ग सङ्गस् तन कुङ्कुम स्रजम्

बाह्वोर् दधानम् मधु मल्लिका श्रिताम् तस् याग्र आसीनम् अवेक्ष्य विस्मितः

31 स तम् प्रविष्टम् वृत मात तायिभिः भटैर् अनीकैः अवलोक्य माधवः

उद्यम्य मौर्वम् परिघम् व्यवस्थितो यथान्तको दण्ड धरो जिघाम्सया

32 जिघृक्षया तान् परितः प्रसर्पतः शुनो यथा शूकर यूथपो ऽहनत्

ते हन्य माना भवनाद् विनिर्गता निर्भिन्न मूर्धोरु भुजाः प्रदु द्रुवुः

33 तम् नाग पाशैः बलि नन्दनो बली घ्नन्तम् स्वसैन्यम् कुपितो बबन्ध ह

ऊषा भृशम् शोक विषाद विह्वला बद्धम् निशम् याश्रु कलाक्ष्य रौदिषीत्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे द्वि षष्टि तमो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्दः त्रि षष्टि तमो ऽध्याय :

स्कन्द- 10: अध्याय- 63

01 श्री शुक उवाच

अपश्यताम् चानि रुद्धम् तद् बन्धूनाम् च भारत

चत्वारो वार्षिका मासा व्यतीयुः अनुशो चताम्

02 नारदात् तद् उपाकर्ण्य वार्ताम् बद्धस्य कर्म च

प्रययुः शोणित पुरम् वृष्णयः कृष्ण देवताः

03 प्रद्युम्नो युयुधानश् च गदः साम्बो ऽथ सारणः

नन्दोप नन्द भद् राद्या राम कृष्णानु वर्तिनः

04 अक्षौहिणी भिः द्वादशभिः समेताः सर्वतो दिशम्

रुरुधुर् बाण नगरम् समन्तात् सात्व तर्षभाः

05 भज्य मान पुरो द्यान प्राका राट्टाल गोपुरम्

प्रेक्षमाणो रुषा विष्टः तुल्य सैन्यो ऽभिनिर् ययौ

06 बाणार्थे भगवान् रुद्रः ससुतैः प्रमथैर् वृतः

आरुह्य नन्दि वृषभम् युयुधे राम कृष्णयोः

07 आसीत् सुतुमुलम् युद्धम् अद्भुतम् रोम हर्षणम्

कृष्ण शङ्करयो राजन् प्रद्युम्न गुहयोर् अपि

08 कुम्भाण्ड कूप कर्णाभ्याम् बलेन सह सम्युगः

साम्बस्य बाण पुत्रेण बाणेन सह सात्यकेः

09 ब्रह्मादयः सुरा धीशा मुनयः सिद्ध चारणाः

गन्धर्व् आप्सरसो यक्षा विमानैः द्रष्टु मागमन्

10 शङ्करानु चरान् शौरिः भूत प्रमथ गुह्यकान्

डाकिनीर् यातु धानाम्श् च वेताळान् स विनायकान्

11 प्रेत मातृ पिशा चाम्श् च कूष्माण्डान् ब्रह्म राक्षसान्

द्रावया मास तीक्ष्णाग्रैः शरैः शार्ङ्ग धनुश् च्युतैः

12 पृथग् विधानि प्रायुङ्क्त पिणाक्यस् त्राणि शार्ङ्गिणे

प्रत्यस् त्रैः शमया मास शार्ङ्ग पाणिर् अविस्मितः

13 ब्रह्मास्त्रस् य च ब्रह्मास्त्रम् वायव् यस्य च पार्वतम्

आग्नेयस् य च पार्जन्यम् नैजम् पाशुपतस् य च

14 मोह यित्वा तु गिरिशम् जृम्भणा स्त्रेण जृम्भितम्

बाणस्य पृतनाम् शौरिः जघानासि गदेषुभिः

15 स्कन्दः प्रद्युम्न बाणौघैः अर्द्यमानः समन्ततः

असृग् विमुञ्चन् गात्रेभ्यः शिखिना पाक्र मद् रणात्

16 कुम्भाण्ड कूप कर्णश् च पेततुर् मुसलार् दितौ

दुद्रुवुस् तदनी कानि हत नाथानि सर्वतः

17 विशीर्य माणम् स्वबलम् दृष्ट्वा बाणो ऽत्य मर्षणः

कृष्णम् अभ्यद्र वत् सङ्ख्ये रथी हित् वै व सात्यकिम्

18 धनूम्ष्या कृष्य युगपद् बाणः पञ्च शतानि वै

एकै कस्मिन् छरौ द्वौ द्वौ सन्दधे रण दुर् मदः

19 तानि चिच् छेद भगवान् धनूम्सि युगपद् हरिः

सारथिम् रथम् अश्वाम्श् च हत्वा शङ्खम् अपूरयत्

20 तन् माता कोटरा नाम नग्ना मुक्त शिरोरुहा

पुरो ऽवतस्थे कृष्णस्य पुत्र प्राण रिरक्षया

21 ततस् तिर्यङ् मुखो नग्नाम् अनिरीक्षन् गदा ग्रजः

बाणश् च तावद् विरथः छिन्न धन्वा विशत् पुरम्

22 विद्राविते भूत गणे ज्वरस्तु त्रिशिर् आस्त्री पात्

अभ्यधा वत दाशार्हम् दहन् निव दिशो दश

23 अथ नारायणोः देवः तम् दृष्ट्वा व्यसृजज् ज्वरम्

माहेश्वरो वैष्णवश् च युयुधाते ज्वरा वुभौ

24 माहेश्वरः समा क्रन्दन् वैष्णवेन बलार् दितः

अलब्ध्वा भयम् अन्यत्र भीतो माहेश्वरो ज्वरः

शरणार्थी हृषी केशम् तुष्टाव प्रय ताञ्जलिः

25 ज्वर उवाच

नमामि त्वा अनन्त शक्तिम् परेशम् सर्वात् मानम् केवलम् ज्ञप्ति मात्रम्

विश्वोत् पत्ति स्थान सम्रोध हेतुम् यत् तद् ब्रह्म ब्रह्म लिङ्गम् प्रशान्तम्

26 कालो दैवम् कर्म जीवः स्वभावो द्रव्यम् क्षेत्रम् प्राण आत्मा विकारः

तत् सङ्घातो बीज रोह प्रवाहः त्वन् मायैषा तन् निषेधम् प्रपद्ये

27 नाना भावैः लीलयै वोप पन्नैः देवान् साधून् लोक सेतून् बिभर्षि

हम्स्युन् मार्गान् हिम्सया वर्त मानान् जन्मै तत् ते भारहा राय भूमेः

28 तप्तो ऽहम्ते तेजसा दुः सहेन शान्तो ग्रेणा त्युल्बणेन ज्वरेण

तावत् तापो देहिनाम् ते ऽन्घ्रि मूलम् नो सेवेरन् यावद् आशानु बद्धाः

29 श्री भगवान् उवाच

त्रिशि रस्ते प्रसन् नो ऽस्मि व्येतु ते मज् ज्वराद् भयम्

यो नौ स्मरति सम्वादम् तस्य त्वन् न भवेद् भयम्

30 इत् युक्तो ऽच्युत मानम्य गतो माहेश्वरो ज्वरः

बाणस्तु रथम् आरूढः प्रागाद् योत् स्यन् जनार्दनम्

31 ततो बाहु सहस्रेण नानायुध धरो ऽसुरः

मुमोच परम क्रुद्धो बाणाम्श् चक्रा युधे नृप

32 तस्यास्य तो ऽस्त्राण् यस कृच् चक्रेण क्षुर नेमिना

चिच्छेद भगवान् बाहून् शाखा इव वनस्पतेः

33 बाहुषु छिद्य मानेषु बाणस्य भगवान् भवः

भक्तानु कम्पि उपव्रज्य चक्रायुधम् अभाषत

34 श्री रुद्र उवाच

त्वम् हि ब्रह्म परम् ज्योतिः गूढम् ब्रह्मणि वाङ्मये

यम् पश्यन्ति अमल् आत्मान आकाश मिव केवलम्

35 नाभिर् नभो ऽग्निर् मुखम् अम्बु रेतो

द्यौः शीर्ष माशाः श्रुतिर् अङ्घ्रि रुर्वी

चन्द्रो मनो यस्य दृगर्क आत्मा

अहम् समुद्रो जठरम् भुजेन्द्रः

36 रोमाणि यस्य उषध् अयो ऽम्बु वाहाः

केशा विरिञ्चो धिषणा विसर्गः

प्रजापतिः हृदयम् यस्य धर्मः

स वै भवान् पुरुषो लोक कल्पः

37 तवाव तारो ऽयम कुण्ठ धामन् धर्मस्य गुप्त्यै जगतो भवाय

वयम् च सर्वे भवतानु भाविता विभाव यामो भुवनानि सप्त

38 त्वमेक आद्यः पुरुषो ऽद्वितीयः तुर्यः स्व दृग् हेतुर् अहेतु रीशः

प्रतीयसे ऽथापि यथा विकारम् स्व मायया सर्व गुण प्रसिद् ध्यै

39 यथैव सूर्यः पिहितश् छायया स्वया

छायाम् च रूपाणि च सञ्च कास्ति

एवम् गुणेना पिहितो गुणाम्स् त्वम्

आत्म प्रदीपो गुणिनश् च भूमन्

40 यन् माया मोहितधियः पुत्र दार गृहा दिषु

उन्मज्जन्ति निमज्जन्ति प्रसक्ता वृजि नार्णवे

41 देव दत्तम् इमम् लब्ध्वा नृलोकम् अजितेन्द्रियः

यो नाद्रि येत त्वत् पादौ स शोच्यो ह्यात्म वञ्चकः

42 यस्त्वाम् विसृजते मर्त्य आत्मानम् प्रियम् ईश्वरम्

विपर्य येन्द्रियार् थार्थम् विष मत्ति अमृतम् त्यजन्

43 अहम् ब्रह्माथ विबुधा मुनयश् चाम लाशयाः

सर्वात्मना प्रपन् नास्त्वाम् आत्मानम् प्रेष्ठम् ईश्वरम्

44 तम् त्वा जगत् स्थित् युद यान्त हेतुम्

समम् प्रसान्तम् सुहृद् आत्म दैवम्

अनन्य मेकम् जगद् आत्म केतम्

भवाप वर्गाय भजाम देवम्

45 अयम् ममेष्टो दयितो ऽनु वर्ती मयाभयम् दत्तम् अमुष्य देव

सम् पाद् यताम् तद् भवतः प्रसादो यथा हि ते दैत्य पतौ प्रसादः

46 श्री भगवान् उवाच

यदात्थ भगवम्स् त्वम् नः करवाम प्रियम् तव

भवतो यद् व्यवसितम् तन्मे साध् वनु मोदितम्

47 अवध्यो ऽयम् ममाप् येष वैरोचनि सुतो ऽसुर:

प्रह्लादाय वरो दत्तो न वध्यो मे तवान् वय:

48 दर्पोप शमना यास्य प्रवृक्णा बाहवो मया

सूदितम् च बलम् भूरि यच्च भारा यितम् भुव:

49 चत्वारो ऽस्य भुजा: शिष्टा भविष् यन्त् यज रामरा:

पार्षद मुख्यो भवतो न कुतश् चिद् भयो ऽसुर:

50 इति लब्ध्वा भयम् कृष्णम् प्रणम्य शिरसा सुर:

प्राद्युम्निम् रथम् आरोप्य सवध्वा समु पानयत्

51 अक्षौहिण्या परिवृतम् सुवास: सम लङ्कृतम्

सपत् नीकम् पुरस् कृत्य ययौ रुद्रानु मोदित:

52 स्व राज धानीम् सम लङ्कृताम् ध्वजै:

स तोरणै: उक्षित मार्ग चत्वराम्

विवेश शङ्खानक दुन्दुभि स्वनै:

अभ्युद् यत: पौरसु हृद् द्विजातिभि:

53 य एवम् कृष्ण विजयम् शङ्करेण च सम्युगम्

सम्स्मरेत् प्रातर् उत्थाय न तस्य स्यात् पराजय:

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे त्रि षष्टि तमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्द: चतुश् षष्टि तमो ऽध्याय :

स्कन्द- *10:* अध्याय- *64*

*01* श्री शुक उवाच

एकदोप वनम् राजन् जग्मु: यदु कुमारका:

विहर्तुम् साम्ब प्रद्युम्न चारु भानु गदादय:

*02* क्रीडित्वा सुचिरम् तत्र विचिन् वन्त: पिपासिता:

जलम् निरुदके कूपे ददृशु: सत्त्वम् अद्भुतम्

*03* कृकलासम् गिरि निभम् वीक्ष्य विस्मित मानसा:

तस्य चोद् धरणे यत्नम् चक्रुस्ते कृपयान् विता:

*04* चर्मजैस् तान् तवै: पाशै: बद्ध्वा पतितम् अर्भका:

नाशक्नुवन् समुद् धर्तुम् कृष्णाया चख्युर् उत्सुका:

*05* तत् रागत् यारविन् दाक्षो भगवान् विश्व भावन:

वीक्ष्योज् जहार वामेन तम् करेण स लीलया

*06* स उत्तम: श्लोक कराभि मृष्टो विहाय सद्य: कृक लास रूपम्

सन्तप्त चामीकर चारु वर्ण: स्वर्ग् यद्भुतालङ् करणाम् बरस्रक्

*07* पप्रच्छ विद्वान् अपि तन्नि दानम् जनेषु विख्या पयितुम् मुकुन्द:

कस्त्वम् महा भाग वरेण्य रूपो देवोत्तमम् त्वाम् गणयामि नूनम्

*08* दशामि माम् वा कतमेन कर्मणा सम्प्रापितो ऽसि अतदर्ह: सुभद्र

आत्मानम् आख्याहि विवित् सताम् नो यन्मन्यसे न: क्षम मत्र वक्तुम्

*09* श्री शुक उवाच

इति स्म राजा सम्पृष्ट: कृष्णे नानन्त मूर्तिना

माधवम् प्रणि पत्याह किरीटे नार्क वर्चसा

*10* नृग उवाच

नृगो नाम नरेन्द्रो ऽहम् इक्ष्वाकु तनय: प्रभो

दानिष् वाख्याय मानेषु यदि ते कर्णम् अस्पृशम्

*11* किम् नु ते ऽविदितम् नाथा सर्व भूतात्म साक्षिण:

कालेना व्या हत दृशो वक्ष्ये ऽथापि त वाज्ञया

12 यावत्य: सिकता भूमे: यावत्यो दिवि तारका:

यावत्यो वर्ष धाराश् च ताव तीर ददम् स्म गा:

13 पयस्विनी: तरुणी: शील रूप गुणोप पन्ना: कपिला हेम सृङ्गी:

न्यायार् जिता रूप्य खुरा: स वत्सा दुकूल माला भरणा ददा वहम्

14 स्वलङ्कृ तेभ्यो गुणशील वद्भ्य: सीदत् कुटुम्बेभ्य ऋत व्रतेभ्य:

तप: श्रुत ब्रह्म वदान्य सद्भ्य: प्रादाम् युवभ्यो द्विज पुङ्ग वेभ्य:

15 गोभू हिरण्या यत नाश्व हस्तिन: कन्या: सदासीस् तिल रूप्य शय्या:

वासाम्सि रत्नानि परिच्छ दान् रथान् इष्टम् च यज्ञै: चरितम् च पूर्तम्

16 कस्यचिद् द्विज मुख्यस्य भ्रष्टा गौर् मम गो धने

सम्पृक्ता विदुषा सा च मया दत्ता द्विजा तये

17 ताम् नीयमानाम् तत् स्वामी दृष्ट्वो वाच ममेति तम्

ममेति प्रति ग्राह्याह नृगो मे दत्त वानिति

18 विप्रौ विवद मानौ माम् ऊचतु: स्वार्थ साधकौ

भवान् दाताप हर्तेति तच् छ्रुत्वा मे ऽभवद् भ्रम:

19 अनुनीता वुभौ विप्रौ धर्म कृच्छ्र गतेन वै

गवाम् लक्षम् प्रकृष् टानाम् दास्याम् येषा प्रदी यताम्

20 भवन्तौ अनुगृह्णी ताम् किङ्करस्या विजानत:

समुद्ध रतम् माम् कृच्छ्रात् पतन्तम् निरये ऽशुचौ

21 नाहम् प्रतीच्छे वै राजन् नित् युक्त्वा स्वाम्य पाक्रमत्

नान्यद् गवामप् ययुतम् इच्छा मीत्य परो ययौ

22 एतस्मिन् अन्तरे यामयि: दूतैर् नीतो यम क्षयम्

यमेन पृष्ट: तत् राहम् देव देव जगत् पते

23 पूर्वम् त्वम् अशुभम् भुङ्क्षे उताहो नृपते शुभम्

नान्तम् दानस्य धर्मस्य पश्ये लोकस्य भास् वत:

24 पूर्वम् देवा शुभम् भुञ्ज इति प्राह पतेति स:

तावद् अद्राक्ष मात्मानम् कृकलासम् पतन् प्रभो

25 ब्रह्मण् यस्य वदान् यस्य तव दासस्य केशव

स्मृतिः नाद्यापि विध् वस्ता भवत् सन्दर्श नार्थिनः

26 स त्वम् कथम् मम विभो ऽक्षि पथः परात्मा

योगेश्वरैः श्रुति दृशामल हृद् विभाव्यः

साक्षाद् अधोक्षज उरु व्यसनान्ध बुद्धेः

स्यान् मे ऽनु दृश्य इह यस्य भवाप वर्गः

27 देवदेव जगन्नाथा गोविन्दा पुरुषोत्तम

नारायणा हृषीकेशा पुण्यश्लोका अच्युता व्यय

28 अनुजानी हि माम् कृष्ण यान्तम् देव गतिम् प्रभो

यत्र क्वापि सतश् चेतो भूयान् मे त्वत् पदास् पदम्

29 नमस्ते सर्व भावाय ब्रह्मणे ऽनन्त शक्तये

कृष्णाय वासुदेवाय योगानाम् पतये नमः

30 इत् युक्त्वा तम् परिक्रम्य पादौ स्प्रुष्ट्वास्व मौलिना

अनुज्ञातो विमा नाग्र्यम् मारुहत् पश्यताम् नृणाम्

31 कृष्णः परिजनम् प्राह भगवान् देवकी सुतः

ब्रह्मण्य देवो धर्मात्मा राजन् यान् अनुशिक्षयन्

32 दुर्जरम् बत ब्रह्मस्वम् भुक्त मग्नेः मनागपि

तेजी यसो ऽपि कि मुत राज्ञाम् ईश्वर मानिनाम्

33 नाहम् हाला हलम् मन्ये विषम् यस्य प्रति क्रिया

ब्रह्मस्वम् हि विषम् प्रोक्तम् नास्य प्रति विधिर् भुवि

34 हिनस्ति विषमत् तारम् वह्नि रद्भिः प्रशाम् यति

कुलम् समूलम् दहति ब्रह्म स्वारणि पावकः

35 ब्रह्मस्वम् दुर् अनुज्ञातम् भुक्तम् हन्ति त्रि पूरुषम्

प्रसह्य तु बलाद् भुक्तम् दश पूर्वान् दशा परान्

36 राजानो राज लक्ष्म् यान्धा नात्म पातम् विचक्षते

निरयम् येऽभि मन्यन्ते ब्रह्मस्वम् साधु बालिशाः

37 गृहणन्ति यावत: पाम्सून् क्रन्द ताम् अश्रु बिन्दव:

विप्राणाम् हृत वृत्तीनाम् वदान् यानाम् कुटुम्बिनाम्

38 राजानो राज कुल्याश् च तावतो ऽब्दान् निरङ् कुशा:

कुम्भीपा केषु पच् यन्ते ब्रह्म दाया पहारिण:

39 स्व दत्ताम् पर दत्ताम् वा ब्रह्म वृत्तिम् हरेच्च य:

षष्टि वर्ष सहस्राणि विष्ठायाम् जायते कृमि:

40 न मे ब्रह्म धनम् भूयाद् यद् गृध् वाल्पा युषो नरा:

पराजिताश् च्युता राज्याद् भवन्त् युद्वे जिनो ऽहय:

41 विप्रम् कृतागसम् अपि नैव द्रुह् यत मामका:

घ्नन्तम् बहु श पन्तम् वा नमस् कुरुत नित्यश:

42 यथाहम् प्रणमे विप्रान् अनुकालम् समाहित:

तथा नमत यूयम् च यो ऽन्यथा मे स दण्ड भाक्

43 ब्राह्मणार्थो ह्यप हृतो हर्तारम् पात यत् यध:

अजानन्तम् अपि ह्येनम् नृगम् ब्राह्मण गौरिव

44 एवम् विश्राव्य भगवान् मुकुन्दो द्वारकौ कस:

पावन: सर्व लोकानाम् विवेश निज मन्दिरम्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे चतुश् षष्टि तमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्द: पञ्च षष्टि तमो ऽध्याय :

स्कन्द- 10: अध्याय- 65

01 श्री शुक उवाच

बल भद्रः कुरु श्रेष्ठ भगवान् रथम् आस्थितः

सुहृद्दि दृक् षुरुत् कण्ठः प्रययौ नन्द गोकुलम्

02 परिष् वक्तश् चिरोत् कण्ठैः गोपैर् गोपी भिरेव च

रामो ऽभि वाद्य पितरौ आशीर् भिर् अभि नन्दितः

03 चिरम् नः पाहि दाशार्ह सानुजो जगद् ईश्वरः

इत् यारोप् याङ्क मालिङ्ग्य नेत्रैः सिषि चतुर् जलैः

04 गोप वृद्धाम्श् च विधिवद् यविष्ठैर् अभि वन्दितः

यथा वयो यथा सख्यम् यथा सम्बन्ध मात्मनः

05 समुपेत् याथ गोपालान् हास्य हस्त ग्रहादिभिः

विश्रान्तम् सुख मासीनम् पप्रच्छुः पर्यु पागताः

06 पृष्टाश् चाना मयम् स्वेषु प्रेम गद् गदया गिरा

कृष्णे कमल पत्राक्षे सन्न्यस् ताखिल राधसः

07 कच्चिन् नो बान्धवा राम सर्वे कुशल मासते

कच्चित् स्मरथ नो राम यूयम् दार सुतान् विताः

08 दिष्ट्या कम्सो हतः पापो दिष्ट्या मुक्ताः सुहृज् जनाः

निहत्य निर्जित्य रिपून् दिष्ट्या दुर्गम् समाश्रिताः

09 गोप्यो हसन्त्यः पप्रच्छू राम सन्दर्शना दृताः

कच्चिद् आस्ते सुखम् कृष्णः पुर स्त्री जन वल्लभः

10 कच्चित् स्मरति वा बन्धून् पितरम् मातरम् च सः

अप्यसौ मातरम् द्रष्टुम् सकृदप् याग मिष्यति

अपि वा स्मरते ऽस्माकम् अनुसेवाम् महा भुजः

11 मातरम् पितरम् भ्रातॄन् पतीन् पुत्रान् स्वसॄन् अपि

यदर्थे जहिम दाशार्ह दुस्त्यजान् स्वजनान् प्रभो

12 ता नः सद्यः परित् यज्य गतः सञ्छिन्न सौहृदः

कथम् नु तादृशम् स्त्रीभिः न श्रद्धी येत भाषितम्

13 कथम् नु गृह्णन्त् यनवस्थि तात् मनो
वचः कृतघ् नस्य बुधाः पुर स्त्रियः
गृह्णन्ति वै चित्र कथस्य सुन्दर
स्मिता वलोकोच् छ्वसित स्मरातुराः
14 किम् नस् तत् कथया गोप्यः कथाः कथय तापराः
यात् यस्माभिर् विना कालो यदि तस्य तथैव नः
15 इति प्रहसितम् शौरेः जल्पितम् चारु वीक्षितम्
गतिम् प्रेम परिष् वङ्गम् स्मरन्त्यो रुरुदुः स्त्रियः
16 सङ्कर्षणस् ताः कृष्णस्य सन्देशैर् हृदयम् गमैः
सान्त्वया मास भगवान् नाना नुनय कोविदः
17 द्वौ मासौ तत्र चावात्सीन् मधुम् माधवम् एव च
रामः क्षपासु भगवान् गोपीनाम् रति मावहन्
18 पूर्ण चन्द्र कला मृष्टे कौमुदी गन्ध वायुना
यमुनो पवने रेमे सेविते स्त्री गणैर् वृतः
19 वरुण प्रेषिता देवी वारुणी वृक्ष कोटरात्
पतन्ती तद् वनम् सर्वम् स्वगन्धे नाध्य वासयत्
20 तम् गन्धम् मधु धाराया वायु नोप हृतम् बलः
आघ् रायोप गतस् तत्र ललनाभिः समम् पपौ
21 उपगीय मान चरितो वनिताभिर् हलायुधः
23 वनेषु व्यचरत् क्षीवो मद विह्वल लोचनः
24 स्रग् व्येक कुण्डलो मत्तो वैजयन्त्या च मालया
बिभ्रत् स्मित मुखाम् भोजम् स्वेद प्रालेय भूषितम्
25 स आजुहाव यमुनाम् जल क्रीडार्थ मीश्वरः
निजम् वाक्यम् अनादृत्य मत्त इत्याप गाम् बलः
अनागताम् हलाग्रेन कुपितो विचकर्ष ह
26 पापे त्वम् माम् अवज्ञाय यन् नायासि मया हुता

नेष्ये त्वाम् लाङ्ग लाग्रेण शतधा काम चारिणीम्

27 एवम् निर्भर्त् सिता भीता यमुना यदु नन्दनम्

उवाच चकिता वाचम् पतिता पादयोर् नृप

28 राम राम महा बाहो न जाने तव विक्रमम्

यस्यै काम्शेन विधृता जगती जगतः पते

29 परम् भावम् भगवतो भगवन् माम जानतीम्

मोक्तु मर्हसि विश्वात्मन् प्रपन्नाम् भक्त वत्सल

30 ततो व्यमुञ्चद् यमुनाम् याचितो भगवान् बलः

विजगाह जलम् स्त्रीभिः करेणुभिर् इवे भराट्

31 कामम् विहृत्य सलिलाद् उत्तीर्णा यासि ताम्बरे

भूषणानि महार् हाणि ददौ कान्तिः शुभाम् स्रजम्

32 वसित्वा वाससी नीले मालाम् आमुच्य काञ्चनीम्

रेजे स्वलङ्कृतो लिप्तो माहेन्द्र इव वारणः

33 अद्यापि दृश्यते राजन् यमुना आकृष्ट वर्त्मना

बलस्या नन्त वीर्यस्य वीर्यम् सूचय तीव हि

34 एवम् सर्वा निशा याता एकेव रमतो व्रजे

रामस् याक्षिप्त चित्तस्य माधुर्यैः व्रज योषिताम्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे पञ्च षष्टि तमो ऽध्याय ः||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्दः षड् षष्टि तमो ऽध्याय ः

*01* श्री शुक उवाच

नन्द व्रजम् गते रामे करूषाधि पतिर् नृप

वासुदेवो ऽहमित् यज्ञो दूतम् कृष्णाय प्राहिणोत्

*02* त्वम् वासुदेवो भगवान् अवतीर्णो जगत् पतिः

इति प्रस्तोभितो बालैः मेन आत्मानम् अच्युतम्

*03* दूतम् च प्राहिणोन् मन्दः कृष्णा यौ यक्त वर्त्मने

द्वारकायाम् यथा बालो नृपो बाल कृतो ऽबुधः

*04* दूतस्तु द्वारका मेत्य सभायाम् आस्थितम् प्रभुम्

कृष्णम् कमल पत्राक्षम् राज सन्देशम् अब्रवीत्

*05* वासुदेवो ऽवतीर् नोऽहम् एक एव न चापरः

भूतानाम् अनुकम् पार्थम् त्वम् तु मिथ्याभि धाम् त्यज

*06* यानि त्वम् अस्मच् चिह्नानि मौढ्याद् बिभर्षि सात्वत

त्यक्त् वै हि माम् त्वम् शरणम् नो चेद् देहि ममा हवम्

*07* श्री शुक उवाच

कत्थनम् तद् उपाकर्ण्य पौण्ड्रकस् याल्प मेधसः

उग्र सेनाद यः सभ्या उच्चकैर् जहसुस् तदा

*08* उवाच दूतम् भगवान् परिहास कथा मनु

उत्स्रक्ष्ये मूढ चिह्नानि यैस्त्वम् एवम् विकत्थसे

*09* मुखम् तद् अपिधा याज्ञ कङ्क गृध्र वटैर् वृतः

शयिष्यसे हतस् तत्र भविता शरणम् शुनाम्

*10* इति दूतस् तद् आक्षेपम् स्वामिने सर्वम् आहरत्

कृष्णोऽपि रथम् आस्थाय काशीम् उप जगाम ह

*11* पौण्ड्रकोऽपि तद् उद्योगम् उपलभ्य महा रथः

अक्षौहिणीभ् याम् सम्युक्तो निश् च क्राम पुराद् द्रुतम्

*12* तस्य काशीपतिर् मित्रम् पार्ष्णि ग्राहोऽन् वयान् नृप

अक्षौहिणीभिः तिसृभिः अपश्यत् पौण्ड्रकम् हरिः
13 शङ्खार्यसि गदा शार्ङ्ग श्री वत्साद् युप लक्षितम्
बिभ्राणम् कौस्तुभ मणिम् वनमाला विभूषितम्
14 कौशेय वाससी पीते वसानम् गरुड ध्वजम्
अमूल्य मौल्या भरणम् स्फुरन् मकर कुण्डलम्
15 दृष्ट्वा तम् आत्मनस् तुल्य वेषम् कृत्रिम मास्थितम्
यथा नटम् रङ्ग गतम् विजहास भृशम् हरिः
16 शुलैर् गदाभिः परिघैः शक् त्यृष्टि प्रास तोमरैः
असिभिः पट्टिशैर् बाणैः प्राहरन् नरयो हरिम्
17 कृष्णस्तु तत् पौण्ड्रक काशि राजयोर्
बलम् गजस् यन्दन वाजि पत्ति मत्
गदासि चक्रेषुभिर् आर्द यद् भृशम्
यथा युगान्ते हुत भुक् पृथक् प्रजाः
18 आयोधनम् तद् रथवाजि कुञ्जर द्विपत् खरोष्ट्रैः अरिणाव खण्डितैः
बभौ चितम् मोद वहम् मनस्विनाम् आक्रीडनम् भूत पतेरि वोल्बणम्
19 अथाह पौण्ड्रकम् शौरिः भो भो पौण्ड्रक यद् भवान्
दूत वाक्येन मामा ह तान् यस्त्रणि उत्सृजामि ते
20 त्याज यिष्ये ऽभिधानम् मे यत् त्वयाज्ञ मृषा धृतम्
व्रजामि शरनम् ते ऽद्य यदि नेच्छामि सम्युगम्
21 इति क्षिप्त्वा शितैर् बाणैः विरथी कृत्य पौण्ड्रकम्
शिरो ऽवृश्चद् रथाङ्गेन वज्रेणेन्द्रो यथा गिरेः
22 तथा काशी पतेः कायाच् छिर उत् कृत्य पत्रिभिः
न्यपात यत् काशी पुर्याम् पद्म कोश मिवानिलः
23 एवम् मत् सरिणम् हत्वा पौण्ड्रकम् स सखम् हरिः
द्वारकाम् आविशत् सिद्धैर् गीय मान कथामृतः
24 स नित्यम् भगवद् ध्यान प्रध्वस्त् आखिल बन्धनः

बिभ्राणश् च हरे राजन् स्वरूपम् तन्मयो ऽभवत्

25 शिरः पतितम् आलोक्य राज द्वारे स कुण्डलम्

किमिदम् कस्य वा वक्त्रम् इति सम्शिशियिरे जनाः

26 राज्ञः काशि पतेर् ज्ञात्वा महिष्यः पुत्र बान्धवाः

पौराश् च हा हता राजन् नाथ नाथेति प्रारुदन्

27 सुदक्षिणस् तस्य सुतः कृत्वा सम्स्था विधिम् पितुः

निहत्य पितृ हन्तारम् यास्यामि अपचितिम् पितुः

28 इत् यात्मनाभि सन्धाय सोपा ध्यायो महेश् वरम्

सु दक्षिणोऽर् चया मास परमेण समाधिना

29 प्रीतो ऽविमुक्ते भगवाम्स् तस्मै वरम् अदाद् भवः

पितृ हन्तृ वधो पायम् स वव्रे वरम् ईप्सितम्

30 दक्षिण् आग्निम् परिचर ब्राह्मणैः सम मृत् विजम्

अभिचार विधानेन स चाग्निः प्रमथैर् वृतः

31 साधयिष् यति सङ्कल्पम् अब्रह्मण्ये प्रयोजितः

इत् यादिष्टस् तथा चक्रे कृष्णा याभि चरन् व्रती

32 ततो ऽग्निर् उत्थितः कुण्डात् मूर्तिमान् अति भीषणः

तप्त ताम् रशिखाश् मश्रुर् अङ्गा रोद् गारि लोचनः

33 दम्ष्ट्रोग्र भ्रुकुटी दण्ड कठो रास्यः स्व जिह्वया

आलिहन् सृक्किणी नग्नो विधुन्वम् स्त्रि शिखम् ज्वलन्

34 पद्भ्याम् ताल प्रमाणाभ् याम् कम्पयन् अवनी तलम्

सोऽभ्य धावद् वृतो भूतैः द्वारकाम् प्रदहन् दिशः

35 तम् आभिचार दहनम् आयान्तम् द्वारकौ कसः

विलोक्य तत्र सुः सर्वे वनदाहे मृगा यथा

36 अक्षैः सभायाम् क्रीडन्तम् भगवन्तम् भया तुराः

त्राहि त्राहि त्रि लोकेश वह्नेः प्रदहतः पुरम्

37 श्रुत्वा तज् जन वैक्लव्यम् दृष्ट्वा स्वानाम् च साध्वसम्

शरण्यः सम्प्रहस् याह मा भैष्टेत् यवितास् म्यहम्

38 सर्वस् यान्तर् बहिः साक्षी कृत्याम् माहेश् वरीम् विभुः

विज्ञाय तद् विघा तार्थम् पार्श् वस्थम् चक्रम् आदिशत्

39 तत् सूर्य कोटि प्रतिमम् सुदर्शनम् जा ज्वल्य मानम् प्रलयान लप्रभम्

स्व तेजसा खम् ककुभोऽथ रोदसी चक्रम् मुकुन्द् आस्त्रम् अथाग्नि मार्द यत्

40 कृत्या नलः प्रतिहतः स रथान्ग पाणेः

अस्त्रौ जसा स नृप भग्न मुखो निवृत्तः

वाराणसीम् परि समेत्य सुदक्षिणम् तम्

सर्त्विग् जनम् सम दहत् स्वकृतो ऽभिचारः

41 चक्रम् च विष्णोस् तद् अनुप्रविष्टम् वारानसीम् साट्ट सभाल यापणाम्

स गोपुराट्टा लक कोष्ठ सङ्कुलाम् सकोश हस्त्यश् वर थान्न शालाम्

42 दग्ध्वा वाराणसीम् सर्वाम् विष्णोश् चक्रम् सुदर्शनम्

भूयः पार्श्व मुपा तिष्ठत् कृष्णस्या क्लिष्ट कर्मणः

43 य एतच् छ्रावयेन् मर्त्य उत्तमः श्लोक विक्रमम्

समाहितो वा शृणुयात् सर्व पापैः प्रमुच्यते

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे षड् षष्टि तमो ऽध्याय ः||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्दः सप्त षष्टि तमो ऽध्याय :

स्कन्द- 10: अध्याय- 67

01 श्री राजो उवाच

भुयोऽहम् श्रोतुम् इच्छामि रामस् याद्भुत कर्मण:

अनन्तस् याप्र मेयस्य यदन्यत् कृतवान् प्रभु:

02 श्री शुक उवाच

नरकस्य सखा कश्चिद् द्विविदो नाम वानर:

सुग्रीव सचिव: सोऽथ भ्राता मैन्दस्य वीर्यवान्

03 सख्यु: सोऽप चितिम् कुर्वन् वानरो राष्ट्र विप्लवम्

पुर ग्रामा करान् घोषान् अदहद् वह्नि मुत् सृजन्

04 क्वचित्स शैलान् उत्पाट्य तैर् देशान् सम चूर्ण यत्

आनर्तान् सुतराम् एव यत् रास्ते मित्र हा हरि:

05 क्वचित् समुद्र मध् यस्थो दोर्भ्याम् उत्क्षिप्य तज् जलम्

देशान् नागायुत प्राणो वेला कूलन मज् जयत्

06 आश्रमान् ऋषि मुख्यानाम् कृत्वा भग्न वनस्पतीन्

अदूषयच् छकृन् मूत्रै: अग्नीन् वैतानि कान् खल:

07 पुरुषान् योषितो दृप्त: क्ष्मा भृद् द्रोनी गुहा सु स:

निक्षिप्य चाप् यधाच् छैलै: पेशष् कारीव कीटकम्

08 एवम् देशान् विप्र कुर्वन् दूषयम्श् च कुल स्त्रिय:

श्रुत्वा सु ललितम् गीतम् गिरिम् रैवत कम् ययौ

09 तत्रा पश्यद् यदु पतिम् रामम् पुष्कर मालिनम्

सुदर्शनीय सर्वाङ्गम् ललना यूथ मध्यगम्

10 गायन्तम् वारुणीम् पीत्वा मद विह्वल लोचनम्

विभ्राज मानम् वपुषा प्रभिन्न मिव वारणम्

11 दुष्ट: शाखा मृग: शाखाम् आरूढ: कम्पयन् द्रुमान्

चक्रे किल किला शब्दम् आत्मानम् सम् प्रदर्शयन्

12 तस्य धार्ष्ट्यम् कपेर् वीक्ष्य तरुण्यो जाति चापला:

हास्य प्रिया विजहसु: बलदेव परिग्रहा:

13 ता हेल या मास कपिर् भ्रूक्षेपैर् सम् मुखादिभि:

दर्शयन् स्वगुदम् तासाम् रामस्य च निरीक्षत:

14 तम् ग्राव्णा प्राहरत् क्रुद्धो बल: प्रहरताम् वर:

स वञ्च यित्वा ग्रावाणम् मदिरा कलशम् कपि:

15 गृहीत्वा हेलया मास धूर् तस्तम् कोपयन् हसन्

निर्भिद्य कलशम् दुष्टो वासाम् स्यास् फालयद् बलम्

कदर्थी कृत्य बलवान् विप्र चक्रे मदोद् धत:

16 तम् तस्या विनयम् दृष्ट्वा देशाम्श् च तद् उपद् रुतान्

क्रुद्धो मुषल मा दत्त हलम् चारि जिघाम् सया

17 द्विविदोऽपि महा वीर्य: शाल मुद्यम्य पाणिना

अभ्येत्य तरसा तेन बलम् मूर्धन् यताड यत्

18 तम् तु सङ्कर्षणो मूर्ध्नि पतन्तम् अचलो यथा

प्रति जग्राह बलवान् सुनन्देना हनच् च तम्

19 मूषला हत मस्तिष्को विरेजे रक् तधारया

गिरिर्यथा गैरिकया प्रहारम् नानु चिन्तयन्

20 पुनरन्यम् समुत् क्षिप्य कृत्वा निष्पत्र मोजसा

तेना हनत्सु सङ्क्रुद्ध: तम् बल: शत धाच् छिनत्

21 ततोऽन् येन रुषा जघ्ने तम् चापि शत धाच् छिनत्

22 एवम् युध्यन् भगवता भग्ने भग्ने पुन: पुन:

आकृष्य सर्वतो वृक्षान् निर्वृक्षम् अकरोद् वनम्

23 ततो ऽमुञ्चच् छिला वर्षम् बलस्यो पर्य मर्षित:

तत् सर्वम् चूर्णया मास लीलया मुषला युध:

24 स बाहू ताल सङ्काशौ मुष्टी कृत्य कपीश्वर:

आसाद्य रोहिणी पुत्रम् ताभ्याम् वक्षस्य रूरु जत्

25 याद वेन्द्रो ऽपि तम् दोर्भ्याम् त्यक्त्वा मुसल लाङ्गले

जत्रौ अभ्यर्द यत् क्रुद्ध: सोऽपतद् रुधिरम् वमन्

26 चकम्पे तेन पतता सटङ्क: सवनस् पति:

पर्वत: कुरुशार् दूल वायुना नौरिवाम् भसि

27 जय शब्दो नम:शब्द: साधु साध्विति चाम्बरे

सुरसिद्ध मुनीन् द्राणाम् आसीत् कुसुम वर्षिणाम्

28 एवम् निहत्य द्विविदम् जगद् व्यति करावहम्

सम्स्तूय मानो भगवान् जनै: स्वपुरम् आविशत्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे सप्त षष्टि तमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्द: अष्ट षष्टि तमो ऽध्याय :

स्कन्द- 10: अध्याय- 68

01 श्री शुक उवाच

दुर्योधन सुताम् राजन् लक्ष्मणाम् समितिम् जय:

स्वयम्वरस् थाम हरत् साम्बो जाम्बवती सुत:

02 कौरवा: कुपिता ऊचुर् दुर् विनीतोऽय मर्भक:

कदर्थी कृत्य न: कन्याम् अकामाम् अहरद् बलात्

03 बध्नी तेमम् दुर् विनीतम् किम् करिष्यन्ति वृष्णय:

येऽस्मत् प्रसादो पचिताम् दत्ताम् नो भुञ्जते महीम्

04 निगृहीतम् सुतम् श्रुत्वा यद् ये ष्यन्ती ह वृष्णय:

भग्न दर्पा: शमम् यान्ति प्राणा इव सुसम् यता:

05 इति कर्ण: शलो भूरि: यज्ञ केतु: सुयोधन:

साम्बम् आरेभिरे बद्धुम् कुरु वृद्धानु मोदिता:

06 दृष्ट्वानु धावतः साम्बो धार्त राष्ट्रान् महा रथः

प्रगृह्य रुचिरम् चापम् तस्थौ सिम्ह इवैकलः

07 तम् ते जिघृक्षवः क्रुद्धाः तिष्ठ तिष्ठेति भाषिणः

आसाद्य धन्विनो बाणैः कर्णा ग्रण्यः समाकिरन्

08 सोऽप विद्धः कुरु श्रेष्ठ कुरुभिर् यदु नन्दनः

नाम् ऋष्यत् तद् अचिन्त् यार्भः सिम्ह क्षुद्र मृगैर् इव

09 विस्फूर्ज्य रुचिरम् चापम् सर्वान् विव्याध सायकैः

कर्णादीन् षड् रथान् वीरन् तावद् भिः युग पत् पृथक्

10 चतुर् भिश् चतुरो वाहान् एकैकेन च सारथीन्

रथि नश् च महेष् वासाम्स् तस्य तत्ते ऽभ्य पूजयन्

11 तम् तु ते विरथम् चक्रुः चत्वारश् चतुरो हयान्

एकस्तु सारथिम् जघ्ने चिच्छे दण्यः शरासनम्

12 तम् बद्ध्वा विरथी कृत्य कृच् छ्रेण कुरवो युधि

कुमारम् स्वस्य कन्याम् च स्वपुरम् जयिनो ऽविशन्

13 तच् छ्रुत्वा नारदोक् तेन राजन् सञ्जात मन्यवः

कुरून् प्रत्युद् यमम् चक्रुर् उग्रसेन प्रचोदिताः

14 सान्त्व यित्वा तु तान् रामः सन्नद्धान् वृष्णि पुङ्गवान्

नैच्छत् कुरूणाम् वृष्णीनाम् कलिम् कलिमला पहः

15 जगाम हास्तिनपुरम् रथेन् आदित्य वर्चसा

ब्राह्मणैः कुल वृद्धैश् च वृतश् चन्द्र इव ग्रहैः

16 गत्वा गजाह् वयम् रामो बाह्यो पवन मास्थितः

उद्धवम् प्रेषया मास धृत राष्ट्रम् बुभुत् सया

17 सोऽभि वन्द् याम्बिका पुत्रम् भीष्मम् द्रोणम् च बाह्लिकम्

दुर्योधनम् च विधिवद् रामम् आगतम् अब्रवीत्

18 तेऽति प्रीतास्त माकर्ण्य प्राप्तम् रामम् सुहृत् तमम्

तम् अर्चयित्वा भिययुः सर्वे मङ्गळ पाणयः

19 तम् सङ्गम्य यथा अन्यायम् गाम् अर्घ्यम् च न्यवेदयन्

तेषाम् ये तत् प्रभा वज्ञा: प्रणेमु: शिरसा बलम्

20 बन्धून् कुशलिन: श्रुत्वा पृष्ट्वा शिव मना मयम्

परस् परम् अथो रामो बभाषे ऽविक्लवम् वच:

21 उग्रसेन: क्षिती शेशो यद्व आज्ञाप यत् प्रभु:

तद् अव्य ग्रधिय: श्रुत्वा कुरुध्वम् आविलम् बितम्

22 यद् यूयम् बहवस्त् वेकम् जित्वा अधर्मेण धार्मिकम्

अबध् नीताथ तन् मृष्ये बन्धूनाम् ऐक्य काम् यया

23 वीर्य शौर्य बलोन् नद्धम् आत्म शक्ति समम् वच:

कुरवो बल देवस्य निशम् योचु: प्रकोपिता:

24 अहो महच् चित्रम् इदम् काल गत्या दुरत् यया

आरुरु क्षत् युपा नद्वै शिरो मुकुट सेवितम्

25 एते यौनेन सम्बद्धा: सह शय्या सनाशना:

वृष्णय: तुल्यताम् नीता अस्मद् दत्त नृपासना:

26 चामर व्यजने शङ्खम् आतपत्रम् च पाण्डुरम्

किरीटम् आसनम् शय्याम् भुञ्जती ऽस्मद् उपेक्षया

27 अलम् यदूनाम् नर देव लाञ्छनैर् दातु: प्रतीपै: फणिनाम् इवामृतम्

येऽस् मत् प्रसादोप चिता हि यादवा आज्ञापयन् त्यद् य गतत्र पा बत

28 कथम् इन्द्रोऽपि कुरुभि: भीष्म द्रोण् आर्जुनादिभि:

अदत्तम् अवरुन् धीत सिम्ह ग्रस्तम् इवोरण:

29 श्री शुक उवाच

जन्म बन्धु श्री योन् नद्ध मदास्ते भरतर् षभ

आश्राव्य रामम् दुर् वाच्यम् असभ्या: पुरम् आविशन्

30 दृष्ट्वा कुरूनाम् दौ:शील्यम् श्रुत्वा अवाच्यानि चाच् युत:

अवोचत् कोपसम् रब्धो दुष् प्रेक्ष्य: प्रहसन् मुहु:

31 नूनम् नाना मदोन् नद्धा: शान्तिम् नेच् छन्त् यसा धव:

तेषाम् हि प्रशमो दण्डः पशूनाम् लगुडो यथा अहो

32 यदून् सु सम्रब्धान् कृष्णम् च कुपितम् शनैः

सान्त्व यित्वाह मे तेषाम् शम मिच्छन् निहागतः

33 त इमे मन्द मतयः कलहाभिर् अताः खलाः

तम् माम् अवज्ञाय मुहुर् दुर् भाषान् मानिनो ऽब्रुवन्

34 नोग्रसेनः किल विभुर् भोज वृष्ण्यन् ध केश्वरः

शक्रादयो लोक पाला यस्या देशानु वर्तिनः

35 सुधर्मा आक्रम्य ते येन पारिजातो ऽमराङ्घ्रिपः

आनीय भुज्यते सोऽसौ न किला ध्यासनार् हणः

36 यस्य पाद युगम् साक्षाच् छ्रीर् उपास्ते ऽखिलेश्वरी

स नार्हति किल श्री शो नर देव परिच् छदान्

37 यस् याङ्घ्रि पङ्कज रजो ऽखिल लोक पालैर्

मौल् युत्तमैर् धृत मुपासित तीर्थ तीर्थम्

ब्रह्मा भवो ऽहमपि यस्य कलाः कलायाः

श्री श् चोद् वहेम चिरमस्य नृपासनम् क्व

38 भुञ्जते कुरुभिर् दत्तम् भूखण्डम् वृष्णयः किल

उपानहः किल वयम् स्वयम् तु कुरवः शिरः

39 अहो ऐश्वर्यम् अत्तानाम् मत्ताना मिव मानिनाम्

असम्बद्धा गिरो रूक्षाः कः सहे तानु शासीता

40 अद्य निष् कौरवम् पृथ्वीम् करिष्या मीत्य मर्षितः

गृहीत्वा हल मुत् तस्थौ दहन् निव जगत् त्रयम्

41 लाङ्ग लाग्रेण नगरम् उद्विदार्य गजाह्वयम्

विचकर्ष स गङ्गायाम् प्रहरिष्यन् अमर्षितः

42 जलयानम् इवा घूर्णम् गङ्गायाम् नगरम् पतत्

आकृष्य माणम् आलोक्य कौरवाः जात सम्भ्रमाः

43 तमेव शरणम् जग्मुः स कुटुम्बा जिजीविषवः

स लक्ष्मणम् पुरस् कृत्य साम्बम् प्राञ्जलयः प्रभुम्

44 राम रामा अखिलाधार प्रभावम् न विदाम ते

मूढानाम् नः कुबुद् धीनाम् क्षन्तुम् अर्हस्य तिक्रमम्

45 स्थित् युत् पत् त्यप् ययानाम् त्वम् एको हेतुर् निराश्रयः

लोकान् क्रीडन कानीश क्रीड तस्ते वदन्ति हि

46 त्वमेव मूर्ध्नी दम् अनन्त लीलया भू मण्डलम् बिभर्षि सहस्र मूर्धन्

अन्ते च यः स्वात्मनि रुद्ध विश्वः शेषे ऽद्वितीयः परिशिष्य माणः

47 कोपस्ते ऽखिल शिक्षार्थम् न द्वेषात् न च मत् सरात्

बिभ्रतो भगवन् सत्त्वम् स्थिति पालन तत् परः

48 नमस्ते सर्व भूतात्मन् सर्व शक्ति धराव्यय

विश्व कर्मन् नमस्तेऽस्तु त्वाम् वयम् शरणम् गताः

49 श्री शुक उवाच

एवम् प्रपन्नैः सम्विग्नैर् वेप मानाय नैर् बलः

प्रसादितः सुप्रसन्नो मा भैष्टेत्य भयम् ददौ

50 दुर्योधनः पारिबर्हम् कुञ्जरान् षष्टि हायनान्

ददौ च द्वादश शतानि अयुतानि तुरङ्ग मान्

51 रथानाम् षट् सहस्राणि रौक्माणाम् सूर्य वर्चसाम्

दासीनाम् निष्क कण्ठीनाम् सहस्रम् दुहितृ वत्सलः

52 प्रति गृह्य तु तत् सर्वम् भगवान् सात्व तर्षभः

ससुतः सस्नुषः प्रागात् सुहृद्भिर् अभि नन्दितः

53 ततः प्रविष्टः स्वपुरम् हलायुधः

समेत्य बन्धून् अनुरक्त चेतसः

शशम्स सर्वम् यदु पुङ्ग वानाम्

मध्ये सभायाम् कुरुषु स्व चेष्टितम्

54 अद्यापि च पुरम् ह्येतत् सूचयद् राम विक्रमम्

समुन्नतम् दक्षिणतो गङ्गायाम् अनुदृश् यते

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे अष्ट षष्टि तमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्द: एकोन सप्ततितमो ऽध्याय :

स्कन्द- *10:* अध्याय- *69*

*01* श्री शुक उवाच

नरकम् निहतम् श्रुत्वा तथोद् वाहम् च योषिताम्

कृष्णे नैकेन बह्वीनाम् तद् दिदृक्षु: स्म नारद:

*02* चित्रम् बतैत देकेन वपुषा युग पत् पृथक्

गृहेषु द्व्यष्ट साहस्रम् स्त्रिय एक उदावहत्

*03* इत् युत्सुको द्वारवतीम् देवर्षि: द्रष्टु मागमत्

पुष्पितोप वना राम द्विजालि कुल नादिताम्

*04* उत्फुल्लेन् दीव राम्भोज कह्लार कुमुदोत् पलै:

छुरितेषु सर: सूच्चै: कूजिताम् हम्स सारसै:

*05* प्रासाद लक्षै: नवभि: जुष्टाम् स्फाटिक राजतै:

महा मरकत प्रख्यै: स्वर्ण रत्न परिच्छदै:

*06* विभक्त रथ्या पथचत् वरापणै: शाला सभाभी रुचिराम् सुरालयै:

सम् सिक्त मार्गाङ्गन वीथि देहलीम् पतत् पताक ध्वज वारि ता तपाम्

*07* तस्याम् अन्त:पुरम् श्री मद् अर्चितम् सर्व धिष्ण्यपै:

हरे: स्व कौशलम् यत्र त्वष्ट्रा कात्स्न्र्येन दर्शितम्

*08* तत्र षोडशभि: सद्म सहस्रै: सम लङ्कृतम्

विवेशैक तोमम् शौरेः पत्नीनाम् भवनम् महत्

09 विष्टब्धम् विद्रु मस् तम्भैः वैदूर्य फल कोत्तमैः

इन्द्र नील मयैः कुड्यैः जगत्या चा ह तत् विषा

10 वितानैः निर्मितैः त्वष्ट्रा मुक्ता दाम विलम्बिभिः

दान्तैर् आसन पर्यङ्कैः मण्युत् तम परिष्कृतैः

11 दासीभिः निष्क कण्ठीभिः सुवासो भिर् अलङ्कृतम्

पुम्भिः स कञ्चुको ष्णीष सुवस्त्र मणि कुण्डलैः

12 रत्न प्रदीप निकरद् युति भिर् निरस्त ध्वान्तम् विचित्र वलभीषु शिखण्डि नोऽङ्ग

नृत्यन्ति यत्र विहिता गुरु धूप मक्षैः निर्यान्त मीक्ष्य घन बुद्धय उन्न दन्तः

13 तस्मिन् समान गुण रूप वयः सुवेष

दासी सहस्र युतयानु सवम् गृहिण्या

विप्रो ददर्श चमर व्यजनेन रुक्म

दण्डेन सात्वत पतिम् परिवीज यन्त्या

14 तम् सन्नि रीक्ष्य भगवान् सह सोत्थित श्री

पर्यङ्कतः सकल धर्म भृताम् वरिष्ठः

आनम्य पाद युगलम् शिरसा किरीट

जुष्टेन साञ्जलिर् अवी विश दासने स्वे

15 तस्याव निज्य चरणौ तदपः स्व मूर्ध्ना

बिभ्रज् जगद् गुरु तरोऽपि सताम् पतिर्हि

ब्रह्मण्य देव इति यद् गुण नाम युक्तम्

तस्यैव यच् चरण शौचम् अशेष तीर्थम्

16 सम् पूज्य देव ऋषि वर्यम् ऋषिः पुराणो

नारायणो नरसखो विधि नोदि तेन

वाण्याभि भाष्य मितया मृत मिष्टया तम्

प्राह प्रभो भगवते करवाम हे किम्

17 श्री नारद उवाच

नै वाद्भुतम् त्वयि विभो ऽखिल लोक नाथे

मैत्री जनेषु सकलेषु दमः खलानाम्

निःश्रेय साय हि जगत्स् थिति रक्ष णाभ्याम्

स्वैराव तार उरुगाय विदाम सुष्ठु

18 दृष्टम् तवाङ्घ्रि युगलम् जन ताप वर्गम्

ब्रह्मादिभिः हृदि विचिन्त्य मगाध बोधैः

सम्सार कूप पति तोत्तर णावलम्बम्

ध्यायम्श् चरामि अनुगृहाण यथा स्मृतिः स्यात्

19 ततो ऽन्यद् आविशद् गेहम् कृष्ण पत्न्याः स नारदः

योगेश् वरेश् वरस् याङ्ग योग माया विवित्सया

20 दीव्यन्तम् अक्षैः तत् रापि प्रियया चोद्ध वेन च

पूजितः परया भक्त्या प्रत् युत् थानास नादिभिः

21 पृष्टश् चाविदु षेवासौ कदा यातो भवानिति

क्रियते किम् नु पूर्णानाम् अपूर्णैः अस्मद् आदिभिः

22 अथापि ब्रूहि नो ब्रह्मन् जन्मै तच् छोभनम् कुरु

स तु विस्मित उत्थाय तूष्णीम् अन्यद गाद् गृहम्

23 तत् राप्य चष्ट गोविन्दम् लालयन्तम् सुतान् शिशून्

ततो ऽन्यस्मिन् गृहे ऽपश्यन् मज्जनाय कृतोद् यमम्

24 जुह्वन्तम् च वितान् आग्नीन् यजन्तम् पञ्चभिर् मखैः

भोजयन्तम् द्विजान् क्वापि भुञ्जानम् अवशेषितम्

25 क्वापि सन्ध्याम् उपासीनम् जपन्तम् ब्रह्म वाग्यतम्

एकत्र चासि चर्माभ्याम् चरन्तम् असिवर्त्मसु

26 अश्वैर् गजै रथैः क्वापि विचरन्तम् गदा ग्रजम्

क्वचिच् छयानम् पर्यङ्के स्तूय मानम् च वन्दिभिः

27 मन्त्र यन्तम् च कस्मिम्श् चित् मन्त्रिभिश् चोद्ध वादिभिः

जल क्रीडा रतम् क्वापि वार मुख्या बला वृतम्

28 कुत्रचिद् द्विज मुख्येभ्यो ददतम् गा: स्वलङ्कृता:

इतिहास पुराणानि शृण्वन्तम् मङ्गळानि च

29 हसन्तम् हास कथया कदाचित् प्रिय या गृहे

क्वापि धर्मम् सेवमानम् अर्थ कामौ च कुत्रचित्

30 ध्यायन्तम् एक मासीनम् पुरुषम् प्रकृते: परम्

शुश्रू षन्तम् गुरून् क्वापि कामैर् भोगै: सपर्यया

31 कुर्वन्तम् विग्रहम् कैश्चित् सन्धिम् चान् यत्र केशवम्

कुत्रापि सह रामेण चिन्त यन्तम् सताम् शिवम्

32 पुत्राणाम् दुहितॄणाम् च काले विध् युपया पनम्

दारैर् वरैस् तत् सदृशै: कल्पयन्तम् विभूतिभि:

33 प्रस्थाप नोप नयनै: अपत्यानाम् महोत्सवान्

वीक्ष्य योगेश्वरे शस्य येषाम् लोका विसिस्मिरे

34 यजन्तम् सकलान् देवान् क्वापि क्रतुभिर् ऊर्जितै:

पूर्त यन्तम् क्वचिद् धर्मम् कूर्पाराम मठादिभि:

35 चरन्तम् मृगयाम् क्वापि हयम् आरुह्य सैन्धवम्

घ्नन्तम् तत्र पशून् मेध्यान् परीतम् यदु पुङ्गवै:

36 अव्यक्त लिन्गम् प्रकृतिषु अन्त:पुर गृहादिषु

क्वचिच् चरन्तम् योगेशम् तत् तद् भाव बुभुत् सया

37 अथोवाच हृषीकेशम् नारद: प्रह सन्निव

योग मायोदयम् वीक्ष्य मानुषीम् ईयुषो गतिम्

38 विदाम योग मायास्ते दुर् दर्शा अपि मायिनाम्

योगेश्वर् आत्मन् निर्भाता भवत् पाद निषेवया

39 अनुजानी हि माम् देव लोकाम्स् ते यशस् आप्लुतान्

पर्यटामि तवोद् गायन् लीलाम् भुवन पावनी:

40 श्री भगवान् उवाच

ब्रह्मन् धर्मस्य वक्ताहम् कर्ता तद् अनुमोदिता

तच् छिक्षयन् लोकम् इमम् आस्थितः पुत्र मा खिदः

41 श्री शुक उवाच

इत् या चरन्तम् सद् धर्मान् पावनान् गृह मेधिनाम्

तमेव सर्व गेहेषु सन्त मेकम् ददर्श ह

42 कृष्णस् यानन्त वीर्यस्य योग माया महोदयम्

मुहुर् दृष्ट्वा ऋषिर् अभूद् विस्मितो जातकौ तुकः

43 इत् यर्थ काम धर्मेषु कृष्णेन श्रद्धि तात् मना

सम्यक् सभाजितः प्रीतः तमेवानु स्मरन् ययौ

44 एवम् मनुष्य पदवीम् अनुवर्त मानो नारायणो ऽखिल भवाय गृहीत शक्तिः

रेमे ऽण्ग षोडश सहस्र वराङ्ग नानाम् सव्रीड सौहृद निरीक्षण हास जुष्टः

45 यानीह विश्व विलयोद् भव वृत्ति हेतुः

कर्माण् यनन्य विषयाणि हरीश् च कार

यस्त् वङ्ग गायति शृणोति अनुमोद ते वा

भक्तिर् भवेद् भगवति हयप वर्ग मार्गे

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे एकोन सप्ततितमो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्दः सप्ततितमो ऽध्याय :

स्कन्द- 10: अध्याय- 70

01 श्री शुक उवाच

अथो षस् युप वृत्तायाम् कुक्कुटान् कूज तोऽशपन्

गृहीत कण्ठ्यः पतिभिः माधव्यो विरहा तुराः

02 वयाम्स्य रोरुवन् कृष्णम् बोधयन् तीव वन्दिनः

गायत् स्वलिष्व निद्राणि मन्दार वन वायुभिः

03 मुहूर्तम् तम् तु वैदर्भी नामृष्य दति शोभनम्

परिरम्भण विश्लेषात् प्रिय बाह् वन्तरम् गता

04 ब्राह्मे मुहूर्त उत्थाय वार्युपस् पृश्य माधवः

दध्यौ प्रसन्न करण आत्मानम् तमसः परम्

05 एकम् स्वयम् ज्योतिर् अनन्य मव्ययम् स्व सम्स्थया नित्य निरस्त कल्मषम्

ब्रह्माख्यम् अस्योद्भव नाश हेतुभिः स्व शक्तिभिः लक्षित भाव निर्वृतिम्

06 अथाप्लुतो ऽम्भस् यमले यथाविधि

क्रिया कलापम् परिधाय वाससी

चकार सन्ध्योपग मादि सत्तमो

हुतानलो ब्रह्म जजाप वाग्यतः

07 उपस्था यार्क मुद् यन्तम् तर्पयित् वात्म नः कलाः

देवान् ऋषीन् पितॄन् वृद्धान् विप्रान् अभ्यर्च्य चात्मवान्

08 धेनूनाम् रुक्म शृङ्गीनाम् साध्वीनाम् मौक्तिक स्रजाम्

पयस्विनीनाम् गृष्टीनाम् सवत्सानाम् सुवाससाम्

09 ददौ रूप्य खुरा ग्राणाम् क्षौमाजि नतिलैः सह

अलङ्कृतेभ्यो विप्रेभ्यो बद्वम् बद्वम् दिने दिने

10 गो विप्र देवता वृद्ध गुरून् भूतानि सर्वशः

नमस्कृत् यात्म सम्भूतीः मङ्गलानि समस्पृशत्

11 आत्मानम् भूषया मास नर लोक विभूषणम्

वासोभिर् भूषणैः स्वीयैः दिव्य स्रगनु लेपनैः

12 अवेक्ष्याज्यम् तथा दर्शम् गोवृष द्विज देवताः

कामाम्श् च सर्व वर्णानाम् पौरान्तः पुर चारिणाम्

प्रदाप्य प्रकृतीः कामैः प्रतोष्य प्रत्य नन्दत

13 सम् विभज्या ग्रतो विप्रान् स्रक् ताम्बूलानु लेपनैः

सुहृदः प्रकृतीर् दारान् उपायुङ्क्त ततः स्वयम्

14 तावत् सूत उपानीय स्यन्दनम् परम् आद्भुतम्

सुग्रीवाद्यैर् हयैर् युक्तम् प्रणम् यावस्थितो ऽग्रतः

15 गृहीत्वा पाणिना पाणी सारथेस्तम् अथारुहत्

सात्यकि उद्धव सम्युक्तः पूर्वाद्रि मिव भास्करः

16 ईक्षितो ऽन्तः पुर स्त्रीणाम् सव्रीड प्रेम वीक्षितैः

कृच्छ्राद् विसृष्टो निरगा/ज/द् जातहा सो हरन् मनः

17 सुधर् माख्याम् सभाम् सर्वैः वृष्णिभिः परिवारितः

प्राविशद् यन् निविष्टानाम् न सन्त् यङ्ग षड्डूर्मयः

18 तत्रोप विष्टः परमासने विभुर् बभौ स्व भासा ककुभो ऽवभासयन्

वृतो नृसिम्हैः यदुभिर् यदूत्तमो यथोडु राजो दिवि तार कागणैः

19 तत् रोप मन्त्रिणो राजन् नाना हास्य रसैर् विभुम्

उपतस्थुर् नटाचार्या नर्तक्यस् ताण्ड वैः पृथक्

20 मृदङ्ग वीणा मुरज वेणु ताल दरस् वनैः

ननृतुर् जगुस्तुष्टु वुश् च सूत मागध वन्दिनः

21 तत् राहुर् ब्राह्मणाः केचिद् आसीना ब्रह्म वादिनः

पूर्वेषाम् पुण्य यशसाम् राज्ञाम् चाकथ यन्कथाः

22 तत् रैकः पुरुषो राजन् आगतो ऽपूर्व दर्शनः

विज्ञापितो भगवते प्रतीहारैः प्रवेशितः

23 स नमस् कृत्य कृष्णाय परेशाय कृताञ्जलिः

राज्ञाम् आवेद यद् दुःखम् जरासन्ध निरोधजम्

24 ये च दिग्विजये तस्य सन्नतिम् न य युर्नृपाः

प्रसह्य रुद्धास् तेनासन् अयुते द्वे गिरिव्रजे

25 राजान ऊचुः

कृष्ण कृष्ण् आप्रमे यात्मन् प्रपन्न भय भञ्जन

वयम् त्वाम् शरणम् यामो भव भीताः पृथग् धियः

26 लोको विकर्म निरतः कुशले प्रमत्तः

कर्मण्ययम् त्वद् उदिते भवद् अर्चने स्वे

यस् ताव दस्य बलवान् इह जीविताशाम्

सद् यश्छिनत् त्य निमिषाय नमोऽस्तु तस्मै

27 लोके भवाञ्ज गदिनः कलयाव तीर्णः

सद् रक्षणाय खलनि ग्रहणाय चान्यः

कश्चित् त्वदीय मतियाति निदेश मीश

किम् वा जनः स्व कृत मृच्छति तन्न विद्मः

28 स्वप्नायितम् नृपसुखम् पर तन्त्र मीश

शश्वद् भयेन मृतकेन धुरम् वहामः

हित्वा तद् आत्मनि सुखम् त्वद् अनीह लभ्यम्

क्लिश्यामहे ऽति कृपणाः तव माययेह

29 तन्नो भवान् प्रणत शोक हराङ्घ्रि युग्मो

बद्धान् वियुङ्क्ष्व मगधाह् वय कर्म पाशात्

यो भूभुजो ऽयुत मतङ्गज वीर्य मेको

बिभ्रद् रुरोध भवने मृगराडि वावीः

30 यो वै त्वया द्वि नव कृत्व उदात्त चक्र

भग्नो मृधे खलु भवन्तम् अनन्त वीर्यम्

जित्वा नृलोक निरतम् सकृदूढ दर्पो

युष्मत् प्रजा रुजति नोऽजित तद् विधेहि

31 दूत उवाच

इति मागध सम्रुद्धा भवद् दर्शन कङ्क्षिणः

प्रपन्नाः पाद मूलम् ते दीनानाम् शम् विधीयताम्

32 श्री शुक उवाच

राज दूते ब्रुवत् येवम् देवर्षिः परमद्युतिः

बिभ्रत् पिङ्ग जटा भारम् प्रादुर् आसीद् यथा रविः

33 तम् दृष्ट्वा भगवान् कृष्णः सर्व लोकेश् वरेश्वरः

ववन्द उत्थितः शीर्ष्णा स सभ्यः सानु गो मुदा

34 सभाज यित्वा विधिवत् कृतासन परिग्रहम्

बभाषे सूनृतैर् वाक्यैः श्रद्धया तर्प यन्मुनिम्

35 अपि स्विद् अद्य लोकानाम् त्रयाणाम् अकुतो भयम्

ननु भूयान् भगवतो लोकान् पर्यटतो गुणः

36 न हि ते ऽविदितम् किञ्चित् लोकेषु ईश्वर कर्तृषु

अथ पृच्छाम हे युष्मान् पाण्डवानाम् चिकीर्षितम्

37 श्री नारद उवाच

दृष्टा माया ते बहुशो दुरत्यया माया विभो विश्व सृजश् च मायिनः

भूतेषु भूमम्श् चरतः स्व शक्तिभिः वह्नेर् इव च्छन्न रुचो न मे ऽद्भुतम्

38 तवेहितम् कोऽर्हति साधु वेदितुम् स्व माययेदम् सृजतो नि यच्छतः

यद् विद्य मानात्म तयाव भासते तस्मै नमस्ते स्व विलक्षणात्मने

39 जीवस्य यः सम्सर तो विमोक्षणम् न जानतो ऽनर्थवहा च्छरीरतः

लीलावतारैः स्वयशः प्रदीपकम् प्राज्वाल यत्त्वा तमहम् प्रपद्ये

40 अथाप् याश्रावये ब्रह्म नरलोक विडम्बनम्

राज्ञः पैतृष्व सेयस्य भक्तस्य च चिकीर्षितम्

41 यक्ष्यति त्वाम् मखेन्द्रेण राज सूयेन पाण्डवः

पारमेष्ठ्य कामो नृपतिः तद् भवान् अनुमोदताम्

42 तस्मिन् देव क्रतुवरे भवन्तम् वै सुरादयः

दिदृक्षवः समेष् यन्ति राजानश् च यशस्विनः

43 श्रवणात् कीर्तनाद् ध्यानात् पूयन्ते ऽन्तेव सायिनः

तव ब्रह्म मयस् येश किमुते क्षाभि मर्शिनः

44 यस्यामलम् दिवि यशः प्रथितम् रसायाम्

भूमौ च ते भुवन मङ्गळ दिग् वितानम्

मन्दाकिनीति दिवि भोग वतीति चाधो

गङ्गेति चेह चरणाम्बु पुनाति विश्वम्

45 श्री शुक उवाच

तत्र तेष् वात्म पक्षेषु अग्गुणत्सु विजि गीषया

वाच: पेशै: स्मयन् भृत्यम् उद्धवम् प्राह केशव:

46 श्री भगवान् उवाच

त्वम् हि न: परमम् चक्षु: सुहृन् मन्त्रार्थ तत्त्व वित्

तथात्र ब्रूह् यनुष्ठेयम् श्रद्दध् म: करवाम तत्

47 इत् युपा मन्त्रितो भर्त्रा सर्वज्ञेन् आपि मुग्ध वत्

निदेशम् शिरसाधाय उद्धव: प्रत्य भाषत

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे सप्ततितमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्द: एक सप्त तितमो ऽध्याय :

स्कन्द- 10: अध्याय- 71

01 श्री शुक उवाच

इत् युदीरित माकर्ण्य देवऋषेर् उद्धवो ऽब्रवीत्

सभ्यानाम् अतमाज्ञाय कृष्णस्य च महामति:

02 श्री उद्धव उवाच

यदुक्तम् ऋषिना देव साचिव्यम् यक्ष्य तस् त्वया

कार्यम् पै तृष्व स्रेयस्य रक्षा च शरणैषिणाम्

03 यष्टव्यम् राजसूयेन दिक् चक्र जयिना विभो

अतो जरा सुत जय उभयार्थो मतो मम

04 अस्माकम् च महा नर्थो ह्येते नैव भविष् यति

यशश् च तव गोविन्द राज्ञो बद्धान् विमुञ्चतः

05 स वै दुर्विषहो राजा नागायुत समो बले

बलिनाम् अपि चान् येषाम् भीमम् सम बलम् विना

06 द्वैरथे स तु जेतव्यो मा शत् आक्षौहिणी युतः

ब्राह्मण्यो ऽभ्यर्थितो विप्रैर् न प्रत् याख्याति कर्हिचित्

07 ब्रह्म वेष धरो गत्वा तम् भिक्षेत वृकोदरः

हनिष्यति न सन्देहो द्वैरथे तव सन्निधौ

08 निमित्तम् परमीशस्य विश्व सर्ग निरोधयोः

हिरण्य गर्भः शर्वश् च कालस्या रूपिणस् तव

09 गायन्ति ते विशद कर्म गृहेषु देव्यो

राज्ञाम् स्व शत्रु वधम् आत्म विमोक्षणम् च

गोप्यश् च कुञ्जर पतेः जनक् आत्मजायाः

पित्रोश् च लब्ध शरणा मुनयो वयम् च

10 जरासन्ध वधः कृष्ण भूर् यर्थायोप कल्पते

प्रायः पाक विपाकेन तव चाभि मतः क्रतुः

11 श्री शुक उवाच

इत् युद्धव वचो राजन् सर्वतो भद्रम् अच्युतम्

देवर्षिर् यदु वृद्धाश् च कृष्णश् च प्रत्य पूजयन्

12 अथादि शत् प्रयाणाय भगवान् देवकी सुतः

भृत्यान् दारुक जैत्रादीन् अनुज्ञाप्य गुरून् विभुः

13 निर्गमय् यावरो धान्स्वान् ससुतान् स परिच्छदान्

सङ्कर्षणम् अनुज्ञाप्य यदुराजम् च शत्रुहन्

सूतोप नीतम् स्वरथम् आरुहद् गरुड ध्वजम्

14 ततो रथ द्विप भट सादि नायकैः

करालया परिवृत आत्म सेनया

मृदङ्ग भेर् यानक शङ्ख गोमुखैः

प्रघोष घोषित ककुभो निरक्रमत्

15 नृवाजि काञ्चन शिबिकाभिर् अच्युतम् सहात्मजाः पतिमनु सुव्रता ययुः

वराम् बराभरण विलेपन स्रजः सु सम्वृता नृभिर् असिचर्म पाणिभिः

16 नरोष्ट्र गो महिष खराश्व तर्यनः

करेणुभिः परिजन वार योषितः

स्वलङ्कृताः कट कुटि कम्बल् आम्बराद्

युपस्करा ययुर् अधि युज्य सर्वतः

17 बलम् बृहद् ध्वज पट छत्र चामरैर्

वरायुधा भरण किरीट वर्मभिः

दिवाम्शु भिस्तुमुल रवम् बभौ रवेः

यथार्णवः क्षुभित तिमिङ्गिलोर् मिभिः

18 अथो मुनिर् यदु पतिना सभाजितः प्रणम्य तम् हृदि विदधद् विहायसा

निशम्य तद् व्यव सितम् आहृतार् हणो मुकुन्द सन्दरशन निर्वृ तेन्द्रियः

19 राज दूतम् उवाचेदम् भगवान् प्रीणयन् गिरा

मा भैष्ट दूत भद्रम् वो घात यिष्यामि मागधम्

20 इत् युक्तः प्रस्थितो दूतो यथावद् अवदन् नृपान्

ते ऽपि सन्दर्शनम् शौरेः प्रत् यैक्षन्यन् मुमुक्षवः

21 आनर्त सौवीर मरूम् स्तीर्त्वा विनशनम् हरिः

गिरीन् नदी रती याय पुर ग्राम व्रजा करान्

22 ततो दृषद् वतीम् तीर्त्वा मुकुन्दो ऽथ सरस्वतीम्

पञ्चाल् आनथ मत्स्याम्श् च शक्र प्रस्थम् अथागमत्

23 तम् उपागत माकर्ण्य प्रीतो दुर् दर्शनम् नृनाम्

अजात शत्रुः निरगात् सोपध्या यः सुहृद् वृतः

24 गीत वादित्र घोषेण ब्रह्म घोषेण भूयसा

अभ्ययात् स हृषीकेशम् प्राणाः प्राण मिवा दृतः

25 दृष्ट्वा विक्लिन्न हृदयः कृष्णम् स्नेहेन पाण्डवः

चिराद् दृष्टम् प्रियतमम् सस्वजे ऽथ पुनः पुनः

26 दोर्भ्याम् परिष्वज्य रमाम लालयम् मुकुन्द गात्रम् नृपतिर् हता शुभः

लेभे पराम् निर्वृतिम् अश्रु लोचनो हृष्यत् तनुः विस्मृत लोक विभ्रमः

27 तम् मातुलेयम् परिरभ्य निर्वृतो भीमः स्मयन् प्रेम जवा कुलेन्द्रियः

यमौ किरीटी च सुहृत्तमम् मुदा प्रवृद्ध बाष्पाः परिरेभि रे ऽच्युतम्

28 अर्जुनेन परिष् वक्तो यमाभ्याम् अभि वादितः

ब्राह्मणेभ्यो नमस् कृत्य वृद्धेभ् यश् च यथार् हतः

मानितो मानया मास कुरु सृञ्जय कैकयान्

29 सूत मागध गन्धर्वा वन्दिनश् चोप मन्त्रिणः

मृदङ्ग शङ्ख पटह वीणा पणव गोमुखैः

ब्राह्मणाश् चारविन्दाक्षम् तुष्टुवुः ननृतुर् जगुः

30 एवम् सुहृद्भिः पर्यस्तः पुण्य श्लोक शिखामणिः

सम्स्तूय मानो भगवान् विवेश् आलङ्कृतम् पुरम्

31 सम् सिक्त वर्त्म करिणाम् मदगन्ध तोयैश्

चित्र ध्वजैः कनक तोरण पूर्ण कुम्भैः

मृष्ट् आत्मभिर् नवदु कूल विभूषण स्रग्

गन्धैः नृभिः युवति भिश् च विराज मानम्

32 उद्दीप्त दीप बलिभिः प्रतिसद्म जाल

निर्यात धूप रुचिरम् विलसत् पताकम्

मूर्धन्य हेम कलशै रज तोरु शृङ्गैः

जुष्टम् ददर्श भवनैः कुरु राज धाम

33 प्राप्तम् निशम्य नर लोचन पान पात्रम्

औत्सुक्य विश्ल थित केश दुकूल बन्धाः

सद्यो विसृज्य गृह कर्म पतीम्श् च तल्पे
द्रष्टुम् ययुर् युवतयः स्म नरेन्द्र मार्गे

34 तस्मिन् सु सङ्कुल इभाश्व रथ द्विपद्भिः
कृष्णम्स भार्य मुपलभ्य गृहाधि रूढाः
नार्यो विकीर्य कुसुमैः मनसोप गुह्य
सुस्वागतम् विदधुः उत्स्मय वीक्षितेन

35 ऊचुः स्त्रियः पथि निरीक्ष्य मुकुन्द पत्नीः
तारा यथोडु पसहाः किम कार्य मूभिः
यच् चक्षुषाम् पुरुष मौलिर् उदार हास
लीलाव लोक कलयोत्सव मात नोति

36 तत्र तत्रोप सङ्गम्य पौरा मङ्गल पाणयः
चक्रुः सपर्याम् कृष्णाय श्रेणी मुख्या हतैनसः

37 अन्तः पुरजनैः प्रीत्या मुकुन्दः फुल्ल लोचनैः
ससम्भ्रमैर् अभ्युपेतः प्राविशद् राज मन्दिरम्

38 पृथा विलोक्य भ्रात्रेयम् कृष्णम् त्रिभुवन् ईश्वरम्
प्रीतात्मोत् थाय पर्यङ्कात् सस्नुषा परिषस्वजे

39 गोविन्दम् गृह मानीय देव देवेश मादृतः
पूजायाम् ना विदत् कृत्यम् प्रमोदोप हतो नृपः

40 पितृस् वसुः गुरु स्त्रीणाम् कृष्णश् चक्रे ऽभिवादनम्
स्वयम् च कृष्णया राजन् भगिन्या चाभि वन्दितः

41 श्वशृवा सञ्चो दिता कृष्णा कृष्ण पत्नीश् च सर्वशः
आनर्च रुक्मिणीम् सत्याम् भद्राम् जाम्बवतीम् तथा

42 कालिन्दीम् मित्रविन्दाम् च शैब्याम् नाग्नजितीम् सतीम्
अन्याश् चाभ्या गता यास्तु वासः स्रङ् मण्डनादिभिः

43 सुखम् निवासया मास धर्म राजो जनार्दनम्
ससैन्यम् सानुगा मत्यम् सभार्यम् च नवम् नवम्

44 तर्प यित्वा खाण्डवेन वह्निम् फाल्गुन सम्युत:

मोचयित्वा मयम् येन राज्ञे दिव्या सभा कृता

45 उवास कतिचिन् मासान् राज्ञ: प्रिय चिकीर्षया

विहरन् रथ मारुह्य फाल्गुनेन भटैर् वृत:

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे एक सप्त तितमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्द: द्वि सप्त तितमो ऽध्याय :

स्कन्द- 10: अध्याय- 72

01 श्री शुक उवाच

एकदा तु सभा मध्ये आस्थितो मुनिभिर् वृत:

ब्राह्मणै: क्षत्रियैर् वैश्यै: भ्रातृ भिश् च युधिष्ठिर:

02 आचार्यै: कुल वृद्धैश् च ज्ञाति सम्बन्धि बान्धवै:

शृण्वता मेव चैतेषाम् आभाष् येद म् उवाच ह

03 श्री युधिष्ठिर उवाच

क्रतु राजेन गोविन्द राज सूयेन पावनी:

यक्ष्ये विभूतीर् भवत: तत् सम्पादय न: प्रभो

04 त्वत् पादुके अविरतम् परि ये चरन्ति

ध्यायन्ति अभद्र नशने शुचयो गृणन्ति

विन्दन्ति ते कमल नाभ भवाप वर्गम्

आशासते यदि त आशिष ईश नान्ये

05 तद् देव देव भवतश् चरणार विन्द
सेवानु भावम् इह पश्यतु लोक एष:
ये त्वाम् भजन्ति न भजन्त् युत वोभ येषाम्
निष्ठाम् प्रदर्शय विभो कुरु सृञ्ज यानाम्
06 न ब्रह्मण: स्व पर भेद मतिस् तव स्यात्
सर्वात्मन: समदृश: स्व सुखानु भूते:
सम् सेवताम् सुरतरो रिव ते प्रसाद:
सेवानु रूपम् उदयो न विपर्ययो ऽत्र
07 श्री भगवान् उवाच
सम्यग् व्यवसितम् राजन् भवता शत्रु कर्शन
कल्याणी येन ते कीर्ति: लोकान् अनुभविष् यति
08 ऋषीणाम् पितृ देवानाम् सुहृदाम् अपि न: प्रभो
सर्वेषाम् अपि भूतानाम् ईप्सित: क्रतु राडयम्
09 विजित्य नृपतीन् सर्वान् कृत्वा च जगतीम् वशे
सम्भृत्य सर्व सम्भारान् आहरस्व महा क्रतुम्
10 एते ते भ्रातरो राजन्: लोक पालाम्श सम्भवा:
जितो ऽस्म्यात्म वता तेऽहम् दुर्जयो यो ऽकृतात्मभि:
11 न कश्चिन् मत् परम् लोके तेजसा यशसा श्रिया
विभूतिभि: वाभि भवेद् देवोऽपि किमु पार्थिव:
12 श्री शुक उवाच
निशम्य भगवद् गीतम् प्रीत: फुल्ल मुखाम्बुज:
भ्रातॄन् दिग् विजये ऽयुङ्क्त विष्णु तेजोप बृम्हितान्
13 सहदेवम् दक्षिणस्याम् आदिशत् सह सृञ्जयै:
दिशि प्रतीच्याम् नकुलम् उदीच्याम् सव्य साचिनम्
प्राच्याम् वृकोदरम् मत्स्यै: केकयै: सह मद्रकै:
14 ते विजित्य नृपान् वीरा आजहु: दिग्भ्य ओजसा

अजात शत्रवे भूरि द्रविणम् नृप यक्ष्यते

15 श्रुत्वा जितम् जरासन्धम् नृपतेर् ध्यायतो हरिः

आहोपायम् तमे वाद्य उद्धवो यम् उवाच ह

16 भीमसेनो ऽर्जुनः कृष्णो ब्रह्म लिन्ग धरास् त्रयः

जग्मुर् गिरिव्रजम् तात बृहद् रथ सुतो यतः

17 ते गत् वातिथ्य वेलायाम् गृहेषु गृह मेधिनम्

ब्रह्मण्यम् समया चेरन् राजन्या ब्रह्म लिङ्गिनः

18 राजन् विद् ध्यतिथीन् प्राप्तान् अर्थिनो दूर मागतान्

तन्नः प्रयच्छ भद्रम् ते यद्वयम् कामया महे

19 किम् दुर्मर्षम् तिति क्षूणाम् किम् अकार्यम् असाधुभिः

किम् न देयम् वदान् यानाम् कः परः सम दर्शिनाम्

20 यो ऽनित्येन शरीरेण सताम् गेयम् यशो ध्रुवम्

नाचिनोति स्वयम् कल्पः स वाच्यः शोच्य एव सः

21 हरिश् चन्द्रो रन्ति देव उञ्छ वृत्तिः शिबिर् बलिः

व्याधः कपोतो बहवो ह्य ध्रुवेण ध्रुवम् गताः

22 श्री शुक उवाच

स्वरैर् आकृति भिस् ताम्स्तु प्रकोष्ठैर् ज्याहतैर् अपि

राजन् य बन्धून् विज्ञाय दृष्ट पूर्वान् अचिन्तयत्

23 राजन् य बन्धवो ह्येते ब्रह्म लिङ्गानि बिभ्रति

ददानि भिक्षितम् तेभ्य आत्मानम् अपि दुस्त् यजम्

24 बलेर्नु श्रूयते कीर्तिः वितता दिक्ष्व कल्मषा

ऐश्वर्याद् भ्रम्शि तस्यापि विप्रव्या जेन विष्णुना

25 श्रियम् जिहीर्ष तेन् द्रस्य विष्णवे द्विज रूपिणे

जानन्न् अपि महीम् प्रादाद् वार्यमाणो ऽपि दैत्य राट्

26 जीवता ब्राह्मणार् थाय को न्वर्थः क्षत्र बन्धुना

देहेन पत मानेन नेहता विपुलम् यशः

27 इत् युदार मतिः प्राह कृष्ण् आर्जुन वृकोदरान्

हे विप्रा व्रियताम् कामो ददामि आत्मशिरो ऽपि वः

28 श्री भगवान् उवाच

युद्धम् नो देहि राजेन्द्र द्वन्द् वशो यदि मन्यसे

युद्धार्थिनो वयम् प्राप्ता राजन् या नान्न काङ्क्षिणः

29 असौ वृकोदरः पार्थः तस्य भ्रात् आर्जुनो हृययम्

अनयोः मातुले यम् माम् कृष्णम् जानी हि ते रिपुम्

30 एवमा वेदितो राजा जहासोच्चैः स्म मागधः

आह चा मर्षितो मन्दा युद्धम् तर्हि ददामि वः

31 न त्वया भीरुणा योत्स्ये युधि विक्लव चेतसा

मथुराम् स्व पुरीम् त्यक्त्वा समुद्रम् शरणम् गतः

32 अयम् तु वयसा ऽतुल्यो नाति सत्त्वो न मे समः

अर्जुनो न भवेद् योद्धा भीमः तुल्य बलो मम

33 इत् युक्त्वा भीम सेनाय प्रादाय महतीम् गदाम्

द्वितीयाम् स्वयम् आदाय निर्जगाम पुराद् बहिः

34 ततः समे खले वीरौ सम्युक्तौ इतरे तरौ

जघ्नतुः वज्र कल्पाभ्याम् गदाभ्याम् रण दुर् मदौ

35 मण्डलानि विचित्राणि सव्यम् दक्षिण मेव च

चरतोः शुशुभे युद्धम् नट योरिव रङ्गिणोः

36 ततश् चट चटा शब्दो वज्र निष्पेस सन्निभः

गदयोः क्षिप्तयो राजन्ः दन्त योरिव दन्तिनोः

37 ते वै गदे भुज जवेन नि पात्य माने

अन्योन्य तो ऽम्स कटि पाद करोरु जत्रुन्ः

चूर्णी बभूवतुः उपेत्य यथार्क शाखे

सम् युध्यतोर् द्विरदयोर् इव दीप्त मन्व्योः

38 इत्थम् तयोः प्रहतयोर् गद योर् नृवीरौ

क्रुद्धौ स्व मुष्टिभिर् अयःस्परशैर् अपिष्टाम्

शब्दस् तयोः प्रहरतोर् इभयोर् इवासीत्

निर्घात वज्र परुषस् तल ताड नोत्थः

39 तयोर् एवम् प्रहरतोः सम शिक्षा बलौ जसोः

निर्विशेषम् अभूद् युद्धम् अक्षीण जवयोर् नृप

एवम् तयोर् महाराज युध्यतोः सप्त विम्शतिः

दिनानि निरगम्स् तत्र सुहृद् वन्निशि तिष्ठतोः

एकदा मतुलेयम् वै प्राह राजन् वृकोदरः

न शक्तो ऽहम् जरासन्धम् निर्जेतुम् युधि माधव

40 शत्रोर् जन्म मृती विद्वाञ् जीवितम् च जरा कृतम्

पार्थम् आप्याययन् स्वेन तेजसा अचिन्तयद् हरिः

41 सञ्चिन्त् यारी वधोपायम् भीमस् यामोघ दर्शनः

दर्शया मास विटपम् पाटयन् इव सम्ज्ञया

42 तद् विज्ञाय महा सत्त्वो भीमः प्रहरताम् वरः

गृहीत्वा पादयोः शत्रुम् पातया मास भूतले

43 एकम् पादम् पदा क्रम्य दोर्भ्याम् अन्यम् प्रगृह्य सः

गुदतः पाटया मास शाखम् इव महा गजः

44 एक पादोरु वृषण कटिपृष्ठ स्तनाम् सके

एक बाह् वक्षि भ्रू कर्ण शकले ददृशुः प्रजाः

45 हाहा कारो महा नासीत्ः निहते मगधेश्वरे

पूजया मास तुर्भीमम् परिरभ्य जयाच्यतौ

46 सहदेवम् तत् तनयम् भगवान् भूत भावनः

अभ्य षिञ्चद् अमेयात्मा मगधानाम् पतिम् प्रभुः

मोचया मास राजन्यान् सम्रुद्धा मागधेन ये

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे द्वि सप्त तितमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्द: त्रि सप्त तितमो ऽध्याय :

स्कन्द- 10: अध्याय- 73

01 श्री शुक उवाच

अयुते द्वे शतान् यष्टौ लीलया युधि निर्जिता:

ते निर्गता गिरि द्रोण्याम् मलिना मल वासस:

02 क्षुत् क्षामा: शुष्क वदना: सम्रोध परिकर्शिता:

दद्द शुस्ते घन श्यामम् पीत कौशेय वाससम्

03 श्री वत् साङ्कम् चतुर् बाहुम् पद्म गर्भारुणे क्षणम्

चारु प्रसन्न वदनम् स्फुरन् मकर कुण्डलम्

04 पद्म हस्तम् गदा शङ्ख रथाङ्गैर् उप लक्षितम्

किरीट हार कटक कटि सूत्राङ्ग दाञ्चितम्

05 भ्राजद् वर मणिग्रीवम् निवीतम् वन मालया

पिबन्त इव चक्षुर् भ्याम् लिहन्त इव जिह्वया

06 जिघ्रन्त इव नासाभ्याम् रम्भन्त इव बाहुभि:

प्रणेमु: हत पाप्मानो मूर्धभि: पादयोर् हरे:

07 कृष्ण सन्दर्शन् आह्लाद ध्वस्त सम्रोध न क्लमा:

प्रश शम्सु: हृषीकेशम् गीर्भि: प्राञ्जलयो नृपा:

08 राजान ऊचु:

नमस्ते देव देवेश प्रपन्नार्ति हरौ यय

प्रपन्नान् पाहि न: कृष्ण निर्विण्णान् घोर सम्सृते:

09 नैनम् नाथान्व सूयामो मागधम् मधुसूदन

अनुग्रहो यद् भवतो राज्ञाम् राज् यच्युतिर् विभो

10 राज् यैश्वर्य मदोन् नद्धो न श्रेयो विन्दते नृपः

त्वन् माया मोहितो ऽनित्या मन्यते सम्पदो ऽचलाः

11 मृग तृष्णाम् यथा बाला मन्यन्त उदकाशयम्

एवम् वैकारिकीम् मायाम् अयुक्ता वस्तु चक्षते

12 वयम् पुरा श्री मद् अनष्ट दृष्टयो जिगीषया स्या इत रेत रस्पृधः

घ्नन्तः प्रजाः स्वा अति निर्घृणाः प्रभो मृत्युम् पुरस्त्वा विगणय्य दुर् मदाः

13 त एव कृष्णाद्य गभीर रम्हसा दुरन्त वीर्येण विचालिताः श्रियः

कालेन तन्वा भवतो ऽनुकम्पया विनष्ट दर्पाः चरणौ स्मराम ते

14 अथो न राज्यम् मृग तृष्णि रूपितम् देहेन शश्वत् पतता रुजाम् भुवा

उपासि तव्यम् स्पृहयामहे विभो क्रियाफलम् प्रेत्य च कर्ण रोचनम्

15 तम् नः समा दिशोपायम् येन ते चरणाब्जयोः

स्मृतिर् यथा न विरमेद् अपि सम्सर तामिह

16 कृष्णाय वासुदेवाय हरये परमात्मने

प्रणत क्लेश नाशाय गोविन्दाय नमो नमः

17 श्री शुक उवाच

सम्स्तूय मानो भगवान् राजभिर् मुक्त बन्धनैः

तानाह करुणस् तात शरण्यः श्लक्ष्ण या गिरा

18 श्री भगवान् उवाच

अद्य प्रभृति वो भूपा मय् यात्मन् यखिलेश्वरे

सुदृढा जायते भक्तिः बाढम् आशम् सितम् तथा

19 दिष्ट्या व्यवसितम् भूपा भवन्त ऋत भाषिणः

श्री यैश्वर्य मदोन् नाहम् पश्य उन्मादकम् नृणाम्

20 है हयो नहुषो वेणो रावणो नरको ऽपरे

श्री मदाद् भ्रम्शिताः हास्थानाद् देव दैत्य नरेश्वराः

21 भवन्त एतद् विज्ञाय देहाद् युत्पाद्य मन्तवत्

माम् यजन्तो ऽध्वरैर् युक्ताः प्रजा धर्मेण रक्ष्यथ

22 सन्तन् वन्तः प्रजा तन्तून् सुखम् दुःखम् भवा भवौ

प्राप्तम् प्राप्तम् च सेवन्तो मच् चित्ता विच रिष्यथ

23 उदा सीनाश् च देहादौ आत्मा रामा धृत व्रताः

मय्या वेश्य मनः सम्यङ् मामन्ते ब्रह्म यास्यथ

24 श्री शुक उवाच

इत् यादिश्य नृपान् कृष्णो भगवान् भुवनेश्वरः

तेषाम् न्ययुङ्क्त पुरुषान् स्त्रियो मज् जन कर्मणि

25 सपर्याम् कारया मास सहदेवेन भारत

नर देवो चितैर् वस्त्रैर् भूषणैः स्रग् विलेपनैः

26 भोज यित्वा वरान् नेन सुस्नातान् सम् अलङ्कृतान्

भोगैश् च विविधैर् युक्ताम् स्ताम्बूलाद् यैर् नृपो चितैः

27 ते पूजिता मुकुन्देन राजानो मृष्ट कुण्डलाः

विरेजुर् मोचिताः क्लेशात् प्रा वृडन्ते यथा ग्रहाः

28 रथान् सदश्वान् आरोप्य मणि काञ्चन भूषितान्

प्रीणय्य सुनृतैर् वाक्यैः स्व देशान् प्रत्यया पयत्

29 त एवम् मोचिताः कृच्छ्रात् कृष्णेन सुम हात्मना

ययुस् तमेव ध्यायन्तः कृतानि च जगत् पतेः

30 जगदुः प्रकृतिभ् यस्ते महा पुरुष चेष्टितम्

यथान् वशासद् भगवान्ः तथा चक्रुर् अतन्द्रिताः

31 जरासन्धम् घात यित्वा भीम सेनेन केशवः

पार्थाभ्याम् सम्युतः प्रायात् सहदेवेन पूजितः

32 गत्वा ते खाण्डव प्रस्थम् शङ्खान् दध्मुर् जितारयः

हर्षयन्तः स्व सुहृदो दुर् हृदाम् चासुखा वहाः

33 तच् छ्रुत्वा प्रीत मनस इन्द्र प्रस्थ निवासिनः

मेनिरे मागधम् शान्तम् राजा चाप्त मनोरथः

34 अभि वन्द्याथ राजानम् भीम् आर्जुन जनार्दनाः

सर्वम् आश्रावयाम् चक्रुः आत्मना यद् अनुष्ठितम्

35 निशम्य धर्म राजस् तत् केशवेनानु कम्पितम्

आनन्द् आश्रु कलाम् मुञ्चन् प्रेम्णा नो वाच किञ्चन

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे त्रि सप्त तितमो ऽध्याय ः॥

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्दः चतुः सप्त तितमो ऽध्याय ः

स्कन्द- 10: अध्याय- 74

01 श्री शुक उवाच

एवम् युधिष्ठिरो राजा जरासन्ध वधम् विभोः

कृष्णस्य चानु भावम् तम् श्रुत्वा प्रीतस्तम् अब्रवीत्

02 श्री युधिष्ठिर उवाच

ये स्युस् त्रै लोक्य गुरवः सर्वे लोका महेश्वराः

वहन्ति दुर्लभम् लब्द्वा शिरसै वानु शासनम्

03 स भवान् अरविन्दाक्षो दीनानाम् ईश मानिनाम्

धत्ते ऽनुशासनम् भूमन्ः तद् अत्यन्त विडम्बनम्

04 न हये कस्या द्विती यस्य ब्रह्मणः परमात्मनः

कर्मभिर् वर्धते तेजो ह्रसते च यथा रवेः

05 न वै ते ऽजित भक्तानाम् ममाहम् इति माधव

त्वम् तवेति च नानाधीः पशूनाम् इव वैकृता

06 श्री शुक उवाच

इत् युक्त्वा यज्ञिये काले वव्रे युक्तान् स ऋत्विजः

कृष्णानु मोदितः पार्थो ब्राह्मणान् ब्रह्म वादिनः

07 द्वैपायनो भरद्वाजः सुमन्तुर् गोतमो ऽसितः

वसिष्ठश् च्यवनः कण्वो मैत्रेयः कव षस्त्रितः

08 विश्वामित्रो वामदेवः सुमतिर् जैमिनिः क्रतुः

पैलः पराशरो गर्गो वैशम्पायन एव च

09 अथर्वा कश्यपो धौम्यो रामो भार्गव आसुरिः

वीतिहोत्रो मधुच् छन्दा वीरसेनो ऽकृत व्रणः

10 उपहूतास् तथा चान्ये द्रोण भीष्म कृपादयः

धृतराष्ट्रः सह सुतो विदुरश् च महा मतिः

11 ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा यज्ञदि दृक्षवः

तत्रेयुः सर्व राजानो राज्ञाम् प्रकृतयो नृप

12 ततस् ते देव यजनम् ब्राह्मणाः स्वर्ण लाङ्गलैः

कृष्ट्वा तत्र यथाम् नायम् दीक्षयाम् चक्रिरे नृपम्

13 हैमाः किलोप करणा वरुणस्य यथा पुरा

इन्द्रादयो लोक पाला विरिञ्च भव सम्युताः

14 सगणाः सिद्ध गन्धर्वा विद्याधर महोरगाः

मुनयो यक्ष रक्षाम्सि खग किन्नर चारणाः

15 राजानश् च समा हूता राज पत्न्यश् च सर्वशः

राजसूयम् समीयुः स्म राज्ञः पाण्डु सुतस्य वै

मेनिरे कृष्ण भक्तस्य सूप पन्नम् अविस्मिताः

16 अयाजयन् महा राजम् याजका देव वर्चसः

राजसूयेन विधिवत् प्रचेतसम् इवामराः

17 सोउत्ये ऽहन्य वनी पालो याजकान् सद सस्पतीन्

अपूजयन् महा भागान् यथा वत्सु समाहित:

18 सदस् याग्र्यार् हणार्हम् वै विमृशन् त: सभासद:

नाध्य गच्छन् ननै कान्त्यात् सहदेवस् तद् आब्रवीत्

19 अर्हति ह्यच्युत: श्रैष्ठ्यम् भगवान् सात्वताम् पति:

एष वै देवता: सर्वा देश काल धनादय:

20 यद् आत्मकम् इदम् विश्वम् क्रतवश् च यद् आत्मका:

अग्निर् आहुतयो मन्त्रा साङ्ख्यम् योगश् च यत् पर:

21 एक एवा द्वितीयो ऽसौ ऐतद् आत्म्यम् इदम् जगत्

आत्मन् आत्माश्रय: सभ्या: सृजत्य वति हन्त् यज:

22 विविधानी ह कर्माणि जनयन् यद् अवेक्षया

ईहते यदयम् सर्व: श्रेयो धर्मादि लक्षणम्

23 तस्मात् कृष्णाय महते दीयताम् परम् आर्हणम्

एवम् चेत् सर्व भूतानाम् आत्मनश् चार्हणम् भवेत्

24 सर्व भूतात्म भूताय कृष्णाय अनन्य दर्शिने

देयम् शान्ताय पूर्णाय दत्तस् यानन्त्य मिच्छता

25 इत् युक्त्वा सहदेवो ऽभूत् तूष्णीम् कृष्णानु भाव वित्

तच् छ्रुत्वा तुष्टुवु: सर्वे साधु साध् विति सत्तमा:

26 श्रुत्वा द्विजेरितम् राजा ज्ञात्वा हार्दम् सभा सदाम्

समर्हयद् हृषीकेशम् प्रीत: प्रणय विह्वल:

27 तत् पादा वव निज्याप: शिरसा लोक पावनी:

स भार्य: सानु जामात्य: स कुटुम्बो वहन् मुदा

28 वासोभि: पीत कौषेयै: भूषणैश् च महा धनै:

अर्ह यित्वाश्रु पूर्णाक्षो नाशकत् सम वेक्षितुम्

29 इत्थम् सभाजितम् वीक्ष्य सर्वे प्राञ्जलयो जना:

नमो जयेति नेमुस्तम् निपेतु: पुष्प वृष्टय:

30 इत्थम् निशम्य दम घोष सुत: स्व पीठाद्

उत्थाय कृष्ण गुण वर्णन जात मन्युः

उत्क्षिप्य बाहुम् इदम् आह सदस्य मर्षी

सम्श्रावयन् भगवते परुषाण्य भीतः

31 ईशो दुरत्ययः काल इति सत्यवती स्रुतिः

वृद्धानाम् अपि यद् बुद्धिः बाल वाक्यैर् विभिद्यते

32 यूयम् पात्र विदाम् श्रेष्ठा मा मन्ध्वम् बाल भाषितम्

सदसस् पत यः सर्वे कृष्णो यत् सम्मतो ऽर्हणे

33 तपो विद्या व्रतधरान् ज्ञान विध्वस्त कल्मषान्

परमऋषीन् ब्रह्म निष्ठाम् लोक पालैश् च पूजितान्

34 सदस् पतीन् अतिक्रम्य गोपालः कुल पाम्सनः

यथा काकः पुरोडाशम् सपर्याम् कथ मर्हति

35 वर्णाश्रम कुला पेतः सर्व धर्म बहिष् कृतः

स्वैर वर्ती गुणैर् हीनः सपर्याम् कथ मर्हति

36 ययाति नैषाम् हि कुलम् शप्तम् सद्भिर् बहिष् कृतम्

वृथापान रतम् शश्वत् सपर्याम् कथ मर्हति

37 ब्रह्मर्षि सेवितान् देशान् हित्वैते ऽब्रह्म वर्चसम्

समुद्रम् दुर्गमाश् रित्य बाधन्ते दस्यवः प्रजाः

38 एवम् आदीनि अभद्राणि बभाषे नष्ट मङ्गलः

नोवाच किञ्चिद् भगवान् यथा सिम्हः शिवारुतम्

39 भगवन् निन्दनम् श्रुत्वा दुःसहम् तत् सभा सदः

कर्णौ पिधाय निर्जग्मुः शपन्तश् चेदिपम् रुषा

40 निन्दाम् भगवतः शृण्वन्ः तत् परस्य जनस्य वा

ततो नापैति यः सोऽपि यात् यधः सुकृत् आच्च्युतः

41 ततः पाण्डु सुताः क्रुद्धा मत्स्य कैकय सृञ्जयाः

उदायुधाः समुत् तस्थुः शिशुपाल जिघाम् सवः

42 ततश् चैद् यस्त्वसम् भ्रान्तो जगृहे खड्ग चर्मणी

भर्त्सयन् कृष्ण पक्षीयान् राज्ञः सदसि भारत

43 तावद् उत्थाय भगवान् स्वान् निवार्य स्वयम् रुषा

शिरः क्षुरान्त चक्रेण जहार पततो रिपोः

44 शब्दः कोलाहलो ऽथासीच् छिशुपाले हते महान्

तस्यानु यायिनो भूपा दुद्रुवुर् जीवितैषिणः

45 चैद्य देहोत् थितम् ज्योतिर् वासुदेवम् उपाविशत्

पश्यताम् सर्व भूतानाम् उल्केव भुवि खाच् च्युता

46 जन्म त्रयानु गुणित वैर सम्रब्ध या धिया

ध्यायम्स् तन् मयताम् यातो भावो हि भव कारणम्

47 ऋत् विग्भ्यः ससदस् येभ्यो दक्षिनाम् विपुलाम् अदात्

सर्वान् सम्पूज्य विधिवत्ः चक्रे ऽवभृथमे कराट्

48 साधयित्वा क्रतुम् राज्ञः कृष्णो योगेश् वरेश्वरः

उवास कतिचिन् मासान् सुहृद्भिर् अभि याचितः

49 ततो ऽनुज्ञाप्य राजानम् अनिच्छन्तम् अपीश्वरः

ययौ सभार्यः सामात्यः स्वपुरम् देवकी सुतः

50 वर्णितम् तद् उपाख्यानम् मया ते बहु विस्तरम्

वैकुण्ठ वासिनोर् जन्म विप्र शापात् पुनः पुनः

51 राजसूयाव भृथ् येन स्नातो राजा युधिष्ठिरः

ब्रह्म क्षत्र सभा मध्ये शुशुभे सुर राडिव

52 राज्ञा सभाजिताः सर्वे सुर मानव खेचराः

कृष्णम् क्रतुम् च शम्सन्तः स्वधामानि ययुर् मुदा

53 दुर्योधन मृते पापम् कलिम् कुरुकुला मयम्

यो न सेहे श्री यम् स्फीताम् दृष्ट्वा पाण्डु सुतस् य ताम्

54 य इदम् कीर्तयेद् विष्णोः कर्म चैद्यव धादिकम्

राज मोक्षम् वितानम् च सर्व पापैः प्रमुच् यते

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे चतु: सप्त तितमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्द: पञ्च सप्त तितमो ऽध्याय :

स्कन्द- 10: अध्याय- 75

01 श्री राजो उवाच

अजात शत्रोस्तम् दृष्ट्वा राजसूय महोदयम्

सर्वे मुमुदिरे ब्रह्मन् नृदेवा ये समागता:

02 दुर्योधनम् वर्ज यित्वा राजान: सर्षय: सुरा:

इति श्रुतम् नो भगवन्: तत्र कारणम् उच्यताम्

03 श्री ऋषिर् उवाच

पितामहस्य ते यज्ञे राजसूये महात्मन:

बान्धवा: परिचर् यायाम् तस्यासन् प्रेम बन्धना:

04 भीमो महान साध् यक्षो धनाध् यक्ष: सुयोधन:

सहदेवस्तु पूजायाम् नकुलो द्रव्य साधने

05 गुरु शुश्रूषणे जिष्णु: कृष्ण: पादावने जने

परिवेषणे द्रुपद् अजा कर्णो दाने महा मना:

06 युयुधानो विकर्णश् च हार्दिक्यो विदुरा दय:

बाह्लीक पुत्रा भूर्याद्या ये च सन्तर् दनादय:

07 निरूपिता महा यज्ञे नाना कर्मसु ते तदा

प्रवर्तन् ते स्म राजेन्द्र राज्ञ: प्रिय चिकीर्षव:

08 ऋत्विक् सदस्य बहु वित्सु सुहृत्त मेषु

स्विष्टेषु सूनृत समर्हण दक्षिणाभिः

चैद्ये च सात्वत पतेश् चरणम् प्रविष्टे

चक्रुस् ततस् त्वव भृथस् नपनम् द्युनद्याम्

09 मृदङ्ग शङ्ख पणव धुन्धुर् यानक गो मुखाः

वादित्राणि विचित्राणि नेदुर् आव भृथोत्सवे

10 नार्तक्यो ननृतुर् हृष्टा गायका यूथशो जगुः

वीणा वेणु तलोन् नादः तेषाम् स दिवम् अस्पृशत्

11 चित्र ध्वज पता काग्रैः इभेन्द्र स्यन्दनार् वभिः

स्वलङ्कृतैर् भटैर् भूपा निर्ययू रुक्म मालिनः

12 यदु सृञ्जय काम्बोज कुरु केकय कोशलाः

कम्पयन्तो भुवम् सैन्यैः यजमान पुरःसराः

13 सदस् यर्त्विग् द्विज श्रेष्ठा ब्रह्म घोषेण भूयसा

देवर्षि पितृ गन्धर्वाः तुष्टुवुः पुष्प वर्षिणः

14 स्वलण्कृता नरा नार्यो गन्धस्रग् भूषणाम् बरैः

विलिम्पन्त्यो ऽभि सिञ्चन्त्यो विजह्रुः विविधै रसैः

15 तैल गोरस गन्धोद हरिद्रा सान्द्र कुङ्कुमैः

पुम्भिर् लिप्ताः प्रलिम्पन्त्यो विजह्रुः वार योषितः

16 गुप्ता नृभिः निरगमन् नुपलब्धु मेतद्

देव्यो यथा दिवि विमान वरैर् नृदेव्य

ता मातुलेय सखिभिः परिषिच्य मानाः

स व्रीडहा स विक सद् वदना विरेजुः

17 ता देवरान् उत सखीन् सिषिचुर् दृतीभिः

क्लिन् नाम्बरा विवृत गात्र कुचोरु मध्याः

औत्सुक्य मुक्त कवराच् च्यवमान माल्याः

क्षोभम् दधुर् मलधियाम् रुचिरैर् विहारैः

18 स सम्राड् रथ मारुढः सदश्वम् रुक्म मालिनम्

व्यरोच त स्व पत्नीभि: क्रियाभि: क्रतुराडिव

19 पत्नी सम्या जाव भृथ्यै: चरित्वा ते तमृत् विज:

आचान्तम् स्नापयाम् चक्रुर् गङ्गायाम् सह कृष्णया

20 देव दुन्दुभयो नेदु: नर दुन्दुभि भि: समम्

मुमुचु: पुष्प वर्षाणि देवर्षि पितृ मानवा:

21 सस्नुस् तत्र तत: सर्वे वर्णाश्रम युता नरा:

महा पातक् यपि यत: सद्यो मुच्येत किल्बिषात्

22 अथ राजा हते क्षौमे परिधाय स्वलङ्कृत:

ऋत्विक् सदस्य विप्रादीन् नानर्चा भरणाम् बरै:

23 बन्धूञ् ज्ञातीन् नृपान् मित्र सुहृदो ऽन्याम्श् च सर्वश:

अभीक्ष्नम् पूजया मास नारायण परो नृप:

24 सर्वे जना: सुर रुचो मणि कुण्डल स्रग्

उष्णीष कन्चुक दुकूल महार्घ्य हारा:

नार्यश् च कुण्डल युगालक वृन्द जुष्ट

वक्त्रश्रिय: कनक मेखलया विरेजु:

25 अथर्त्विजो महा शीला: सदस्या ब्रह्म वादिन:

ब्रह्म क्षत्रिय विट्शुद्रा राजानो ये समा गता:

26 देवर्षि पितृ भूतानि लोकपाला: सहानुगा:

पूजितास् तम् अनुज्ञाप्य स्वधामानि ययुर् नृप

27 हरि दासस् य राजर्षे राज सूय महोदयम्

नैवा तृप्यन् प्रशम् सन्त: पिबन् मर्त्यो ऽमृतम् यथा

28 ततो युधिष्ठिरो राजा सुहृत् सम्बन्धि बान्धवान्

प्रेम्णा निवासया मास कृष्णम् च त्याग कातर:

29 भगवान् अपि तत् राङ्ग न्यावात् सीत् तत् प्रियम्कर:

प्रस्थाप्य यदु वीराम्श् च साम्बादीम्श् च कुशस् थलीम्

30 इत्थम् राजा धर्म सुतो मनोरथ महार्णवम्

सुदुस् तरम् समुत् तीर्य कृष्णे नासीद् गत ज्वरः

31 एक दान्तः पुरे तस्य वीक्ष्य दुर्योधनः श्रियम्

अतप्यद् राज सूयस्य महित्वम् चाच्युत् आत्मनः

32 यस्मिम्स् नरेन्द्र दितिजेन्द्र सुरेन्द्र लक्ष्मीः

नाना विभान्ति किल विश्व सृजोप क्लृताः

ताभिः पतीन् द्रुप द राज सुतोप तस्थे

यस्याम् विषक्त हृदयः कुरुराड् अतप्यत्

33 यस्मिन् तदा मधुपतेः महिषी सहस्रम्

श्रोणी भरेण शनकैः क्वण दङ्घ्रि शोभम्

मध्ये सुचारु कुच कुङ्कुम शोण हारम्

श्री मन् मुखम् प्रचल कुण्डल कुन्तलाढ्यम्

34 सभायाम् मय क्लृतायाम् क्वापि धर्म सुतो ऽधिराट्

व्रुतोऽनुजैर् बन्धु भिश् च कृष्णेन् आपि स्व चक्षुषा

35 आसीनः काञ्चने साक्षाद् आसने मघवान् इव

पारमेष्ठ्य श्री या जुष्टः स्तूय मानश् च वन्दिभिः

36 तत्र दुर्योधनो मानी परीतो भ्रातृ भिर् नृप

किरीट माली न्यविशद् असि हस्तः क्षिपन् रुषा

37 स्थले ऽभ्य गृह्णाद् वस्त्रान्तम् जलम् मत्वा स्थले ऽपतत्

जले च स्थलवद् भ्रान्त्या मय माया विमोहितः

38 जहास भीमस्तम् दृष्ट्वा स्त्रियो नृपतयो परे

निवार्य माणा अप्यङ्ग राज्ञा कृष्णानु मोदिताः

39 स व्रीडितो ऽवग् वदनो रुषा ज्वलन् निष्क्रम्य तूष्णीम् प्रययौ गजाह् वयम्

हाहेति शब्दः सुमहान भूत् सताम् अजात शत्रुः विमना इवाभवत्

बभूव तूष्णीम् भगवान् भुवो भरम् समुज्जि हीर्षुः भ्रमति स्म यद् दृशा

40 एतत् ते ऽभिहितम् राजन् यत् प्रुष्टोऽहम् इह त्वया

सुयोधनस् य दौरात्म्यम् राजसूये महा क्रतौ

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे पञ्च सप्त तितमो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्दः षड् सप् तितमो ऽध्याय :

स्कन्द- *10:* अध्याय- *76*

*01* श्री शुक उवाच

अथान् यद् अपि कृष्णस्य शृणु कर्म् आद्भुतम् नृप

क्रीडा नर शरीरस्य यथा सौभ पतिर् हतः

*02* शिशुपाल सखः शाल्वो रुक्मिण् युद्वाह आगतः

यदुभिः निर्जितः सङ्ख्ये जरासन्धा दयस् तथा

*03* शाल्वः प्रतिज्ञाम करोच् छृण्वताम् सर्व भू भुजाम्

अयादवीम् क्ष्माम् करिष्ये पौरुषम् मम पश्यत

*04* इति मूढः प्रतिज्ञाय देवम् पशुपतिम् प्रभुम्

आराधया मास नृपः पाम्शु मुष्टिम् सकृद् ग्रसन्

*05* सम्वत्सरान् ते भगवान् आशुतोष उमापतिः

वरेण च्छन्दया मास शाल्वम् शरण मागतम्

*06* देवा सुर मनुष् याणाम् गन्धर्वो रग रक्षसाम्

अभेद्यम् कामगम् वव्रे स यानम् वृष्णि भीषणम्

*07* तथेति गिरिशा दिष्टो मयः पर पुरन्जयः

पुरम् निर्माय शाल्वाय प्रादात् सौभम् अयस्मयम्

*08* स लब्ध्वा कामगम् यानम् तमो धाम दुरासदम्

ययव् द्वारवतीम् शाल्वो वैरम् वृष्णि कृतम् स्मरन्

09 निरुध्य सेनया शाल्वो महत्या भर तर्षभ

पुरीम् बभञ्जोप वनानि उद्यानानि च सर्वशः

10 स गोपुराणि द्वाराणि प्रासाद् आट्टाल तोलिकाः

विहारान् स विमाना ग्र्यात् निपेतुः शस्त्र वृष्टयः

11 शिला द्रुमाश् चा शनयः सर्पा आसार शर्कराः

प्रचण्डश् चक्रवा तोऽभूद् रज साच्छाद् इता दिशः

12 इत् यर्द्य माना सौभेन कृष्णस्य नगरी भृशम्

नाभ्य पद् यत शम् राजन्ः त्रिपुरेण यथा मही

13 प्रद्युम्नो भगवान् वीक्ष्य बाध्य माना निजाः प्रजाः

मा भैष्टेत् यभ्यधाद् वीरो रथारूढो महा यशाः

14 सात्यकिश् चारुदेष्णश् च साम्बो ऽक्रूरः सहानुजः

हार्दिक्यो भानु विन्दश् च गदश् च शुक सारणौ

15 अपरे च महेष् वासा रथ यूथप यूथपाः

निर्ययुः दम्शिता गुप्ता रथे भाश्व पदातिभिः

16 ततः प्रव वृते युद्धम् शाल्वानाम् यदुभिः सह

यथा सुराणाम् विबुधैः तुमुलम् लोम हर्षणम्

17 ताश् च सौभ पतेर् माया दिव् यास्त्रै रुक्मिणी सुतः

क्षणेन नाशया मास नैशम् तम इवोष्णगुः

18 विव्याध पञ्च विम्शत्या स्वर्ण पुङ्खैर् अयोमुखैः

शाल्वस्य ध्वजिनी पालम् शरैः सन्नत पर्वभिः

19 शतेना ताडयच् छाल्वम् एकै केनास्य सैनिकान्

दशभिः दशभिर् नेत्ऱ्न् वाहनानि त्रि भिस्त्रिभिः

20 तद् अद्भुतम् महत् कर्म प्रद्युम्नस्य महात्मनः

दृष्ट्वा तम् पूजया मासुः सर्वे स्व पर सैनिकाः

21 बहु रूप इकरूपम् तद् दृश्यते न च दृश्यते

माया मयम् मय कृतम् दुर् विभाव्यम् परैर् अभूत्

22 क्वचिद् भूमौ क्वचिद् व्योम्नि गिरिमूर्ध्नि जले क्वचित्

अलात चक्रवद् भ्राम्यत् सौभम् तद् दुर वस्थितम्

23 यत्र यत्रोप लक्ष्येत स सौभः सह सैनिकः

शाल्वस् ततस् ततो ऽमुञ्चञ् छरान् सात्वत यूथपाः

24 शरैः अग्न्यर्क सम् स्पर्शैः आशी विष दुरासदैः

पीड्य मान पुरानीकः शाल्वो ऽमुह्यत् परेरितैः

25 शाल्वा नीक पशस् त्रौघैः वृष्णि वीरा भृशार् दिताः

न तत् यजू रणम् स्वम् स्वम् लोक द्वय जिगीषवः

26 शाल्वा मात्यो द्युमान् नाम प्रद्युम्नम् प्राक् प्रपीडितः

आसाद्य गदया मौर्व्या व्याहत्य व्यनदद् बली

27 प्रद्युम्नम् गदया शीर्ण वक्षः स्थलम् अरिम्दमम्

अपोवाह रणात् सूतो धर्मविद् दारु कात्मजः

28 लब्ध सम्ज्ञो मुहूर्तेन कार्ष्णिः सारथि मब्रवीत्

अहो असाध्विदम् सूत यद्रणान् मे ऽप सर्पणम्

29 न यदूनाम् कुले जातः श्रूयते रण विच्युतः

विना मत् क्लीब चित्तेन सूतेन प्राप्त किल्बिषात्

30 किम् नु वक्ष्ये ऽभि सङ्गम् य पितरौ राम केशवौ

युद्धात् सम्यग् अपक्रान्तः पृष्टस् तत् रात्मनः क्षमम्

31 व्यक्तम् मे कथ यिष्यन्ति हसन्त्यो भ्रातृजा मयः

क्लैब्यम् कथम् कथम् वीर तवान्यैः कथ्यताम् मृधे

32 सारथिर् उवाच

धर्मम् विजानता आयुष्मन् कृतम् एतन्मया विभो

सूतः कृच्छ्र गतम् रक्षेद् रथिनम् सारथिम् रथी

33 एतद् विदित्वा तु भवान् मया पोवाहितो रणात्

उपसृष्टः परेणेति मूर्च्छितो गदया हतः

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे षड् सप् तितमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्द: सप्त सप्ततितमो ऽध्याय :

स्कन्द- 10: अध्याय- 77

01 श्री शुक उवाच

स तूपस् पृश्य सलिलम् दम्शितो धृत कार्मुक:

नय माम् द्युमत: पार्श्वम् वीरस् येत्याह सारथिम्

02 विधमन्तम् स्व सैन्यानि द्युमन्तम् रुक्मिणी सुत:

प्रति हत्य प्रत्य विध्यान् नाराचै: अष्टभि: स्मयन्

03 चतुर्भिश् चतुरो वाहान् सूत मेकेन चाहनत्

द्वाभ्यम् धनुश् च केतुम् च शरेणान्ये न वै शिर:

04 गद सात्यकि साम्बाद्या जघ्नु: सौभ पतेर् बलम्

पेतु: समुद्रे सौभेया: सर्वे सञ्छिन्न कन्धरा:

05 एवम् यदूनाम् शाल्वानाम् निघ्नताम् इतरे तरम्

युद्धम् त्रिनव रात्रम् तद् अभूत् तुमुल मुल्बणम्

06 इन्द्र प्रस्थम् गत: कृष्ण आहूतो धर्म सूनुना

राजसूये ऽथ निवृत्ते शिशुपाले च सम्स्थिते

07 कुरु वृद्धान् अनुज्ञाप्य मुनीम्श् च ससुताम् पृथाम्

निमित्तानि अति घोराणि पश्यन् द्वार वतीम् ययौ

08 आह चाह मिहायात आर्य मिश्राभि सङ्गत:

राजन्याश्चै द्य पक्षीया नूनम् हन्युः पुरीम् मम

09 वीक्ष्य तत् कदनम् स्वानाम् निरूप्य पुर रक्षणम्

सौभम् च शाल्व राजम् च दारुकम् प्राह केशवः

10 रथम् प्रापय मे सूत शाल्व स्यान्तिक माशु वै

सम्भ्र मस्ते न कर्तव्यो मायावी सौभराडयम्

11 इत् युक्तश्चो दया मास रथम् आस्थाय दारुकः

विशन्तम् ददृशुः सर्वे स्वे परे चारुणा नुजम्

12 शाल्वश् च कृष्णम् आलोक्य हत प्राय बलेश्वरः

प्राहरत् कृष्ण सूतय शक्तिम् भीम रवाम् मृधे

13 ताम् आपतन्तीम् नभसि महोल् कामिव रम्हसा

भासयन्तीम् दिशः शौरिः सायकैः शतधाच् छिनत्

14 तम् च षोडश भिर् विद्ध्वा बानैः सौभम् च खे भ्रमत्

अविध्यच् छर सन्दोहैः खम् सूर्य इव रश्मिभिः

15 शाल्वः शौरेस्तु दोः सव्यम् स शार्ङ्गम् शार्ङ्ग धन्वनः

बिभेद न्यपतद् हस्ताच् छार्ङ्ग मासीत् तद् अद्भुतम्

16 हाहा कारो महा नासीद् भूतानाम् तत्र पश् यताम्

विनद्य सौभराड् उच्चैर् इदम् आह जनार्दनम्

17 यत् त्वया मूढ नः सख्युः भ्रातुर् भार्या हृते क्षताम्

प्रमत्तः स सभा मध्ये त्वया व्यापादि तः सखा

18 तम् त्वाद्य निशितैर् बाणैः अपराजित मानिनम्

नयामि अपुनरा वृत्तिम् यदि तिष्ठेर् ममा ग्रतः

19 श्री भगवान् उवाच

वृथा त्वम् कत्थसे मन्द न पश्यस् यन्ति केऽन्तकम्

पौरुसम् दर्शयन्ति स्म शूरा न बहु भाषिणः

20 इत् युक्त्वा भगवाञ् छाल्वम् गदया भीम वेगया

तताड जत्रौ सम्रब्धः स चकम् पे वमन् नसृक्

21 गदायाम् सन्नि वृत्तायाम् शाल्वस् त्वन्तर् अधीयत

ततो मुहूर्त आगत्य पुरुषः शिरस् आच्युतम्

देवक्या प्रहितो ऽस्मीति नत्वा प्राह वचो रुदन्

22 कृष्ण कृष्ण महा बाहो पिता ते पितृ वत्सल

बद्ध्वाप नीतः शाल्वेन सौनिकेन यथा पशुः

23 निशम्य विप्रियम् कृष्णो मानुषीम् प्रकृतिम् गतः

विमनस्को घृणी स्नेहाद् बभाषे प्राकृतो यथा

24 कथम् रामम् असम् भ्रान्तम् जित्वा जेयम् सुरा सुरैः

शाल्वेन अल्पी यसा नीतः पिता मे बलवान् विधिः

25 इति ब्रुवाणे गोविन्दे सौभराट् प्रत् युपस्थितः

वसुदेवम् इवानीय कृष्णम् चेदम् उवाच सः

26 एष ते जनिता तातो यद् अर्थ मिह जीवसि

वधिष्ये वीक्षतस् ते ऽमुम् ईशश् चेत् पाहि बालिश

27 एवम् निर् भर्त्स्य मायावी खड्गेन आनक दुन्दुभेः

उत्कृत्य शिर आदाय खस्थम् सौभम् समाविशत्

28 ततो मुहूर्तम् प्रकृता वुप प्लुतः स्वबोध आस्ते स्वजनानु षङ्गतः

महानु भावस् तद् अबुध्य दासुरीम् मायाम् स शाल्व प्रसृताम् मयो दिताम्

29 न तत्र दूतम् न पितुः कलेवरम् प्रबुद्ध आजौ सम् अपश्य दच्युतः

स्वाप्नम् यथा चाम्बर चारिणम् रिपुम् सौभस्थ मालोक्य निहन्तु मुद् यतः

30 एवम् वदन्ति राजर्षे ऋषयः के च नान्विताः

यत् स्व वाचो विरुध्येत नूनम् ते न स्मरन्त् युत

31 क्व शोक मोहौ स्नेहो वा भयम् वा ये ऽज्ञ सम्भवाः

क्व चा खण्डित विज्ञान ज्ञान् ऐश्वर्यस् त्व खण्डितः

32 यत् पाद सेवोर् जित यात्म विद्यया हिन्वन्त्य नाद्यात् मविपर्य यग्रहम्

लभन्त आत्मीयम् अनन्तम् ऐश्वरम् कुतो नु मोहः परमस्य सद् गतेः

33 तम् शस्त्र पूगैः प्रहरन्त मोजसा

शाल्वम् शरैः शौरिर् अमोघ विक्रमः

विद्ध्वाच् छिनद् वर्म धनुः शिरोमणिम्

सौभम् च शत्रोर् गदया रुरोज ह

34 तत् कृष्ण हस्तेर् इतया विचूर्णितम् पपात तोये गदया सहस्र धा

विसृज्य तद् भूतल मास्थितो गदाम् उद्यम्य शाल्वो ऽच्युतम् अभ्यगाद् द्रुतम्

35 आधावतः सगदम् तस्य बाहुम् भल्लेन छित्त्वाथ रथाङ्गम् अद्भुतम्

वधाय शाल्वस्य लयार्क सन्निभम् बिभ्रद् बभौ सार्क इवोदया चलः

36 जहार तेनैव शिरः स कुण्डलम् किरीट युक्तम् पुरुमायिनो हरिः

वज्रेण वृत्रस्य यथा पुरन्दरो बभूव हा हेति वचस् तदा नृणाम्

37 तस्मिन् निपतिते पापे सौभे च गदया हते

नेदुर् दुन्दुभयो राजन् दिवि देव गणेरिताः

सखीनाम् अपचितिम् कुर्वन् दन्तवक्रो रुषाभ् य गात्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे सप्त सप्ततितमो ऽध्याय ः||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्दः अष्ट सप्ततितमो ऽध्याय ः

स्कन्द- 10: अध्याय- 78

01 श्री शुक उवाच

शिशुपालस्य शाल्वस्य पौण्ड्रकस् यापि दुर्मतिः

परलोक गतानाम् च कुर्वन् पारोक्ष्य सौहृदम्

02 एकः पदातिः सङ्क्रुद्धो गदापाणिः प्रकम्पयन्

पद्भ्याम् इमाम् महाराज महा सत्त्वो व्य दृश्यत

03 तम् तथा यान्त मालोक्य गदाम् आदाय सत्वरः

अवप्लुत्य रथात् कृष्णः सिन्धुम् वेलेव प्रत्यधात्

04 गदाम् उद्यम्य कारूषो मुकुन्दम् प्राह दुर्मदः

दिष्ट्या दिष्ट्या भवान् अद्य मम दृष्टि पथम् गतः

05 त्वम् मातुलेयो नः कृष्ण मित्र ध्रुङ्माम् जिघाम् ससि

अतस्त्वाम् गदया मन्द हनिष्ये वज्र कल्पया

06 तर्ह्यान् ऋण्यम् उपैम् यज्ञ मित्राणाम् मित्र वत्सलः

बन्धु रूपम् अरिम् हत्वा व्याधिम् देह चरम् यथा

07 एवम् रूक्षैस् तु दन्वाक्यैः कृष्णम् तोत्रैर् इव द्विपम्

गदया ताडयन् मूर्ध्नि सिम्ह वद्व्यन दच्च सः

08 गदयाभ् इहतो ऽप्याजौ न चचाल यदूद् वहः

कृष्णो ऽपि तमहन् गुर्व्या कौमोदक्यास् त नान्तरे

09 गदा निर्भिन्न हृदय उद्वमन् रुधिरम् मुखात्

प्रसार्य केशबाहू वङ्घ्रीन् धरण्याम् न्यप तद् व्यसुः

10 ततः सूक्ष्म तरम् ज्योतिः कृष्णम् आविशद् अद्भुतम्

पश्यताम् सर्व भूतानाम् यथा चैद्य वधे नृप

11 विदूर थस्तु तद् भ्राता भ्रातृ शोक परिप्लुतः

आगच्छद् असिचर् माभ्याम् उच्छ्वसम्स् तज् जिघाम्सया

12 तस्य चा पत तः कृष्णश् चक्रेण क्षुर नेमिना

शिरो जहार राजेन्द्र स किरीटम् स कुण्डलम्

13 एवम् सौभम् च शाल्वम् च दन्तवक्रम् सहानुजम्

हत्वा दुर् विषहा नन्यैर् ईडितः सुर मानवैः

14 मुनिभिः सिद्ध गन्धर्वैः विद्याधर महोरगैः

अप्सरोभिः पितृ गणैः यक्षैः किन्नर चारणैः

15 उपगीय मान विजयः कुसुमैर् अभि वर्षितः

वृतश् च वृष्णि प्रवरैः विवेश् आलङ्कृताम् पुरीम्

16 एवम् योगेश्वरः कृष्णो भगवान् जगद् ईश्वरः

ईयते पशु दृष्टीनाम् निर्जितो जय तीति सः

17 श्रुत्वा युद्धो द्यमम् रामः कुरूणाम् सह पाण्डवैः

तीर्थ् आभिषेक व्याजेन मध्यस्थः प्रययौ किल

18 स्नात्वा प्रभासे सन्तर्प्य देवर्षि पितृ मानवान्

सरस्वतीम् प्रति स्रोतम् ययौ ब्राह्मण सम्वृतः

19 पृथूदकम् बिन्दु सरस् त्रित कूपम् सुदर्शनम्

विशालम् ब्रह्म तीर्थम् च चक्रम् प्राचीम् सरस्वतीम्

20 यमुना मनु यान् येव गङ्गाम् अनु च भारत

जगाम नैमिषम् यत्र ऋषयः सत्र मासते

21 तमागतम् अभिप्रेत्य मुनयो दीर्घ सत्रिणः

अभिनन्द्य यथ् आन्यायम् प्रणम् योत्थाय चार्चयन्

22 सोऽर्चितः सपरी वारः कृतासन परिग्रहः

रोमहर्षण मासीनम् महर्षेः शिष्य मैक्षत

23 अप्रत् युत्था यिनम् सूतम् अकृत प्रह्वण् आञ्जलिम्

अध्यासीनम् च तान् विप्रान्ः चुकोपोद् वीक्ष्य माधवः

24 कस्माद् असाविमान् विप्रान् अध्यास्ते प्रति लोमजः

धर्म पालाम्स् तथै वास्मान् वध मर्हति दुर् मतिः

25 ऋषेर् भगवतो भूत्वा शिष्यो ऽधीत्य बहूनि च

सेतिहास पुराणानि धर्म शास्त्राणि सर्वशः

26 अदान् तस्या विनीतस्य वृथा पण्डित मानिनः

न गुणाय भवन्ति स्म नटस् येवाजि तात् मनः

27 एत दर्थो हि लोकेऽस्मिन्ः अवतारो मया कृतः

वध्या मे धर्म ध्वजिनः ते हि पात किनोऽधिकाः

28 एतावद् उक्त्वा भगवान् निवृत्तो ऽसद्वध् आदपि

भावित्वात् तम् कुशा ग्रेण करस् थेनाह नत् प्रभु:

29 हाहेति वादिन: सर्वे मुनय: खिन्न मानसा:

ऊचु: सङ्कर्षणम् देवम् अधर्मस्ते कृत: प्रभो

30 अस्य ब्रह्मा सनम् दत्तम् अस्माभि: यदु नन्दन

आयुश् चात्मा क्लमम् तावद् यावत् सत्रम् समाप्यते

31 अजानतै वा चरित: त्वया ब्रह्म वधो यथा

योगेश्वरस्य भवतो नाम्नायो ऽपि नियामक:

32 यद् येतद् ब्रह्म हत्याया: पावनम् लोक पावन

चरिष्यति भवान् लोक सङ्ग्रहो ऽनन्य चोदित:

33 श्री भगवान् उवाच

करिष्ये वधनिर् वेशम् लोक् आनुग्रह काम्यया

नियम: प्रथमे कल्पे यावान् स तु विधीयताम्

34 दीर्घ मायुर् बतै तस्य सत्त्वम् इन्द्रिय मेव च

आशासितम् यत् तद् ब्रूत साधये योग मायया

35 ऋषय ऊचु:

अस्त्रस्य तव वीर्यस्य मृत्योर् अस्माकम् एव च

यथा भवेद् वच: सत्यम् तथा राम विधीयताम्

36 श्री भगवान् उवाच

आत्मा वै पुत्र उत्पन्न इति वेदानु शासनम्

तस्माद् अस्य भवेद् वक्ता आयुर् इन्द्रिय सत् त्ववान्

37 किम् व: कामो मुनि श्रेष्ठा ब्रूताहम् करवाण् यथ

अजानतस् त्वप चितिम् यथा मे चिन्त्य ताम् बुधा:

38 ऋषय ऊचु:

इल्वलस्य सुतो घोरो बल्वलो नाम दानव:

स दूषयति न: सत्रम् एत्य पर्वणि पर्वणि

39 तम् पापम् जहि दाशार्ह तन्न: शुश्रूषणम् परम्

पूय शोणित विन् मूत्र सुरामाम् साभि वर्षिणम्

40 ततश् च भारतम् वर्षम् परीत्य सुस माहित:

चरित्वा द्वादश मासान्: तीर्थ स्नायी विशुध्यसे

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे अष्ट सप्ततितमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्द: एकोन अशीतितमो ऽध्याय :

स्कन्द- 10: अध्याय- 79

01 श्री शुक उवाच

तत: पर्वण् युपा वृत्ते प्रचण्ड: पाम्शु वर्षण:

भीमो वायुर् अभूद् राजन् पूय गन्धस्तु सर्वश:

02 ततो ऽमेध्य मयम् वर्षम् बल्वलेन विनिर्मितम्

अभवद् यज्ञ शालायाम् सो ऽन्वद्दश् यत शूल धृक्

03 तम् विलोक्य बृहत् कायम् भिन्नाञ्जन चयोपमम्

तप्त ताम्र शिखाश् मश्रुम् दम् ष्ट्रोग्र भ्रुकुटी मुखम्

04 सस्मार मुसलम् राम: पर सैन्य विदारणम्

हलम् च दैत्य दमनम् ते तूर्णम् उपतस् थतु:

05 तमा कृष्य हलाग्रेण बल्वलम् गगने चरम्

मुसले नाह नत् क्रुद्धो मूर्ध्नि ब्रह्म द्रुहम् बल:

06 सोऽप तद् भुवि निर्भिन्न ललाटो ऽसृक् समुत् सृजन्

मुञ्चन् आर्त स्वरम् शैलो यथा वज्र हतो ऽरुण:

07 सम्स्तुत्य मुनयो रामम् प्रयुज् यावि तथा शिषः

अभ्य षिञ्चन् महा भागा वृत्रघ्नम् विबुधा यथा

08 वैजयन्तीम् ददुर् मालाम् श्री धामाम् लान पङ्कजाम्

रामाय वाससी दिव्ये दिव्यानि आभरणानि च

09 अथ तैर् अभ्यनु ज्ञातः कौशिकी मेत्य ब्राह्मणैः

स्नात्वा सरोवर मगाद् यतः सरयूर् आस्रवत्

10 अनुस्रोतेन सरयूम् प्रयागम् उपगम् य सः

स्नात्वा सन्तर्प्य देवादीन् जगाम पुलह् आश्रमम्

11 गोमतीम् गण्डकीम् स्नात्वा विपाशाम् शोण आप्लुतः

गयाम् गत्वा पित्ॠन् इष्ट्वा गङ्गा सागर सङ्गमे

12 उपस् पृश्य महेन् द्राद्रौ रामम् दृष्ट्वाभि वाद्य च

सप्त गोदावरीम् वेणाम् पम्पाम् भीम रथीम् ततः

13 स्कन्दम् दृष्ट्वा ययौ रामः श्री शैलम् गिरिशालयम्

द्रविडेषु महा पुण्यम् दृष्ट् वाद्रिम् वेङ्कटम् प्रभुः

14 काम कोष्णीम् पुरीम् काञ्चीम् कावेरीम् च सरिद्वराम्

श्री रङ्गाख्यम् महा पुण्यम् यत्र सन्निहितो हरिः

15 ऋषभाद्रिम् हरेः क्षेत्रम् दक्षिणाम् मथुराम् तथा

सामुद्रम् सेतु मगमन् महा पातक नाशनम्

16 तत् रायुतम् अदाद् धेनूर् ब्राह्मणेभ्यो हलायुधः

कृत मालाम् ताम्र पर्णीम् मलयम् च कुलाचलम्

17 तत् रागस्त्यम् समा सीनम् नमस् कृत्याभि वाद्य च

योजि तस्तेन चाशीर्भिः अनुज्ञातो गतोऽर्णवम्

दक्षिणम् तत्र कन्याख्याम् दुर्गाम् देवीम् द दर्श सः

18 ततः फाल्गुन मासाद्य पञ्चाप् सरसम् उत्तमम्

विष्णुः सन्निहितो यत्र स्नात्वा स्पर्शद् गवा युतम्

19 ततो ऽभिव्रज्य भगवान् केरलाम्स् तु त्रि गर्तकान्

गोकर्णाख्यम् शिव क्षेत्रम् सान्निध्यम् यत्र धूर्जटेः

20 आर्याम् द्वैपायनीम् दृष्ट्वा शूर् पारकम् अगाद् बलः

तापीम् पयोष्णीम् निर्विन्ध्याम् उप स्पृश्याथ दण्डकम्

21 प्रविश्य रेवाम् अगमद् यत्र माहिष् मती पुरी

मनु तीर्थम् उपस्पृश्य प्रभासम् पुनर् आगमत्

22 श्रुत्वा द्विजैः कथ्य मानम् कुरु पाण्डव सम्युगे

सर्व राजन्य निधनम् भारम् मेने हृतम् भुवः

23 स भीम दुर्योधन योर् गदाभ्याम् युध् यतोर् मृधे

वारयिष्यन् विनशनम् जगाम यदु नन्दनः

24 युधिष्ठि रस्तु तम् दृष्ट्वा यमौ कृष्ण् आर्जुना वपि

अभिवाद्या भवम्स् तूष्णीम् किम् विवक्षु रिहागतः

25 गदा पाणी उभौ दृष्ट्वा सम्रब्धौ विजयै षिणौ

मण्डलानि विचित्राणि चरन्ता विद् अमब्रवीत्

26 युवाम् तुल्य बलौ वीरौ हे राजनः हे वृकोदर

एकम् प्राणाधिकम् मन्ये उतैकम् शिक्ष याधिकम्

27 तस्माद् एक तरस् येह युवयोः सम वीर्ययोः

न लक्ष्यते जयो ऽन्यो वा विरमतु अफलो रणः

28 न तद् वाक्यम् जगृहतुः बद्ध वैरौ नृपार्थ वत्

अनुस्मरन्तौ अन्योन्यम् दुरुक्तम् दुष्कृ तानि च

29 दिष्टम् तद् अनुमन् वानो रामो द्वारवतीम् ययौ

उग्र सेनादिभिः प्रीतैः ज्ञातिभिः समु पागतः

30 तम् पुनर् नैमिषम् प्राप्तम् ऋषयो ऽयाजयन् मुदा

क्रत्वङ्गम् क्रतुभिः सर्वैः निवृत् ताखिल विग्रहम्

31 तेभ्यो विशुद्धम् विज्ञानम् भगवान् व्यतरद् विभुः

येनै वात्मन् यदो विश्वम् आत्मानम् विश्वगम् विदुः

32 स्व पत्याव भृथस् नातो ज्ञाति बन्धु सुहृद् वृतः

रेजे स्वज् योत्स्न येवेन्दु: सुवासा: सुष्ठ्व् अलङ्कृत:

33 ईदृग् विधानि असङ्ख्यानि बलस्य बल शालिन:

अनन्तस् याप्र मेयस्य माया मर्त्यस्य सन्ति हि

34 यो ऽनुस्मरेत रामस्य कर्माणि अद्भुत कर्मण:

सायम् प्रातर् अनन्तस्य विष्णो: स दयितो भवेत्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे एकोन अशीतितमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्द: अशीतितमो ऽध्याय :

स्कन्द- 10: अध्याय- 80

01 श्री राजो उवाच

भगवन् यानि चान् यानि मुकुन्दस्य महात्मन:

वीर्याणि अनन्त वीर्यस्य श्रोतु मिच्छाम हे प्रभो

02 को नु श्रुत्वा स कृद् ब्रह्मन् उत्तम: श्लोक सत् कथा:

विरमेत विशे षज्ञो विषण्ण: काम मार्गणै:

03 सा वाग्यया तस्य गुणान् गृणीते करौ च तत् कर्म करौ मनश् च

स्मरेद् वसन्तम् स्थिर जङ्ग मेषु शृणोति तत् पुण्य कथा: स कर्ण:

04 शिरस्तु तस्यो भय लिङ्गम् आनमेत् तद् एव यत् पश्यति तद्धि चक्षु:

अङ्गानि विष्णो रथ तज्ज नानाम् पादोदकम् यानि भजन्ति नित्यम्

05 सूत उवाच

विष्णु रातेन सम्पृष्टो भगवान् बादरायणि:

वासुदेवे भगवति निमग्न हृदयो ऽब्रवीत्

06 श्री शुक उवाच

कृष्णस् यासीत् सखा कश्चिद् ब्राह्मणो ब्रह्म वित्तमः

विरक्त इन्द्रि यार्थेषु प्रशान्त् आत्मा जितेन्द्रियः

07 यदृच्छ योप पन्नेन वर्तमानो गृह् आश्रमी

तस्य भार्या कुचैलस्य क्षुत्क्षामा च तथा विधा

08 पति व्रता पतिम् प्राह म्लायता वदने न सा

दरिद्रम् सीद माना सा वेप माना भिगम् य च

09 ननु ब्रह्मन् भगवतः सखा साक्षाच् छ्रियः पतिः

ब्रह्मण् यश् च शरण् यश् च भगवान् सात्व तर्षभः

10 तम् उपैहि महा भाग साधूनाम् च परायणम्

दास्यति द्रविणम् भूरि सीदते ते कुटुम्बिने

11 आस्ते ऽधुना द्वार वत्याम् भोज वृष्ण् यन्ध केश्वरः

स्मरतः पाद कमलम् आत्मानम् अपि यच्छति

किम् न्वर्थ कामान् भजतो नात् यभीष्टान् जगद् गुरुः

12 स एवम् भार्यया विप्रो बहुशः प्रार्थितो मृदुः

अयम् हि परमो लाभ उत्तमः श्लोक दर्शनम्

13 इति सञ्चिन्त्य मनसा गमनाय मतिम् दधे

अप्यस्त् युपायनम् किञ्चिद् गृहे कल्याणि दीयताम्

14 याचित्वा चतुरो मुष्टीन् विप्रान् पृथुक तण्डुलान्

चैल खण्डेन तान् बद्ध्वा भर्त्रे प्रादाद् उपायनम्

15 स तान् आदाय विप्राग्र्यः प्रययौ द्वारकाम् किल

कृष्ण सन्दर्शनम् मह्यम् कथम् स्यादिति चिन्तयन्

16 त्रीणि गुल्मानि अतीयाय तिस्रः कक्षाश् च सद्विजः

विप्रो ऽगम् यान्धक वृष्णीनाम् गृहेषु अच्युत धर्मिणाम्

17 गृहम् द्व्यष्ट सहस्राणाम् महिषीणाम् हरेर् द्विजः

विवेशै कतमम् श्री मद् ब्रह्म् आनन्दम् गतो यथा

18 तम् विलोक् याच्युतो दूरात् प्रिया पर्यङ्क मास्थित:

सह सोत्थाय चाभ् येत्य दोर्भ्याम् पर्य ग्रहीन् मुदा

19 सख्यु: प्रियस्य विप्रर्षे: अङ्ग सङ्गाति निर्वृत:

प्रीतो व्यमुञ्चद् अब्बिन्दून् नेत्राभ्याम् पुष्क रेक्षण:

20 अथो पवेश्य पर्यङ्के स्वयम् सख्यु: समर्हणम्

उप हृत्याव निज्यास्य पादौ पादावने जनी:

21 अग्रहीच् छिरसा राजन् भगवान् लोकपावन:

व्यलिम्पद् दिव्य गन्धेन चन्दना गुरु कुङ्कुमै:

22 धूपै: सुरभिभिर् मित्रम् प्रदीपावलि भिर् मुदा

अर्चित्वा आवेद्य ताम्बूलम् गाम् च स्वागतम् अब्रवीत्

23 कुचैलम् मलिनम् क्षामम् द्विजम् धमनि सन्ततम्

देवी पर्यचरत् साक्षाच् चामर व्यजनेन वै

24 अन्त: पुर जनो दृष्ट्वा कृष्णे नामल कीर्तिना

विस्मितो ऽभूद् अति प्रीत्या अवधूतम् सभाजितम्

25 किम् अनेन कृतम् पुण्यम् अवधूतेन भिक्षुणा

श्रिया हीनेन लोके ऽस्मिन् गर्हिते नाध मेन च

26 योऽसौ त्रि लोक गुरुणा श्री निवासेन सम्भृत:

पर्यङ् कस्थाम् श्रियम् हित्वा परिष् वक्तो ऽग्रजो यथा

27 कथयाम् चक्रतुर् गाथा: पूर्वा गुरुकुले सतो:

आत्मनोर् ललिता राजन् करौ गृहय परस्परम्

28 श्री भगवान् उवाच

अपि ब्रह्मन् गुरु कुलाद् भवता लब्ध दक्षिणात्

समा वृत्तेन धर्मज्ञ भार्योढा सदृशी न वा

29 प्रायो गृहेषु ते चित्तम् अकाम विहितम् तथा

नैवाति प्रीयसे विद्वन् धनेषु विदितम् हि मे

30 केचित् कुर्वन्ति कर्माणि कामैर् अहत चेतसः

त्यजन्तः प्रकृतीर् दैवीः यथाहम् लोक सङ्ग्रहम्

31 कच्चिद् गुरुकुले वासम् ब्रह्मन् स्मरसि नौ यतः

द्विजो विज्ञाय विज्ञेयम् तमसः पारमश् नुते

32 स वै सत् कर्मणाम् साक्षाद् द्विजातेर् इह सम्भवः

आद्योऽङ्ग यत् राश्रमिणाम् यथाहम् ज्ञानदो गुरुः

33 नन्वर्थ कोविदा ब्रह्मन् वर्णाश्रम वता मिह

ये मया गुरुणा वाचा तरन्त् यञ्जो भवार्णवम्

34 नाहम् इज्या प्रजा तिभ्याम् तप सोप शमे न वा

तुष्येयम् सर्व भूतात्मा गुरु शुश्रूष या यथा

35 अपि नः स्मर्यते ब्रह्मन् वृत्तम् निवसताम् गुरौ

गुरु दारैः चोदितानाम् इन्धना नयने क्वचित्

36 प्रविष्टानाम् महारण्यम् अपर्तौ सु महद् द्विज

वात वर्षम् अभूत् तीव्रम् निष्ठुराः स्तन यित्नवः

37 सूर्यश् चास्तम् गतस् तावत् तमसा चा वृता दिशः

निम्नम् कूलम् जलमयम् न प्राज्ञा यत किञ्चन

38 वयम् भृशम् तत्र महा निलाम्बुभिः निहन्य माना मुहुरम्बु सम्प्लवे

दिशो ऽविदन्तो ऽथ परस्परम् वने गृहीत हस्ताः परिबभ्रि मातुराः

39 एतद् विदित्वा उदिते रवौ सान्दीपनिर् गुरुः

अन्वेषमाणो नः शिष्यान् आचार्यो ऽपश्यद् आतुरान्

40 अहो हे पुत्रका यूयम् अस्मदर्थे ऽति दुःखिताः

आत्मा वै प्राणिनाम् प्रेष्ठः तम् अनादृत्य मत् पराः

41 एत देव हि सच् छिष्यैः कर्तव्यम् गुरु निष्कृतम्

यद्वै विशुद्ध भावेन सर्वार्थ् आत्मार्पणम् गुरौ

42 तुष्टोऽहम् भो द्विज श्रेष्ठाः सत्याः सन्तु मनो रथाः

छन्दाम्सि अयातया मानि भवन्त् विह परत्र च

43 इत्थम् विधान् यनेकानि वसताम् गुरुवेश् मसु

गुरोर् अनुग्रहेणैव पुमान् पूर्णः प्रशान्तये

44 श्री ब्राह्मण उवाच

किम् अस्माभिर् अनिर्वृत्तम् देव देव जगद् गुरो

भवता सत्य कामेन येषाम् वासो गुरावभूत्

45 यस्य च्छन्दो मयम् ब्रह्म देह आवपनम् विभो

श्रेयसाम् तस्य गुरुषु वासो ऽत्यन्त विडम्बनम्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे अशीतितमो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्दः एका शीतितमो ऽध्याय :

स्कन्द- 10: अध्याय- 81

01 श्री शुक उवाच

स इत्थम् द्विज मुख्येन सह सङ्कथ यन् हरिः

सर्व भूत मनो ऽभिज्ञः स्मयमान उवाच तम्

02 ब्रह्मण्यो ब्राह्मणम् कृष्णो भगवान् प्रहसन् प्रियम्

प्रेम्णा निरीक्षणे नैव प्रेक्षन् खलु सताम् गतिः

03 श्री भगवान् उवाच

किम् उपायन मानीतम् ब्रह्मन् मे भवता गृहात्

आण्वप् युपा हृतम् भक्तैः प्रेम्णा भूर्येव मे भवेत्

भूर्यपि अभक्तोप हृतम् न मे तो षाय कल्पते

04 पत्रम् पुष्पम् फलम् तोयम् यो मे भक्त्या प्रयच्छति

तदहम् भक्त् युपहृतम् अश्नामि प्रयत् आत्मनः

05 इत् युक्तो ऽपि द्वियस् तस्मै व्रीडितः पतये श्रियः

पृथुक प्रसृतिम् राजन् न प्रायच् छद वाङ्मुखः

06 सर्व भूतात्म दृक् साक्षात् तस् यागमन कारणम्

विज्ञाया चिन्तयन् नायम् श्री कामो मा भजत् पुरा

07 पत्न् याः पति व्रता यास्तु सखा प्रिय चिकीर्षया

प्राप्तो मा मस्य दास्यामि सम्पदो ऽमर्त्य दुर्लभाः

08 इत्थम् विचिन्त्य वसनाच् चीर बद्धान् द्विजन् मनः

स्वयम् जहार किम् इदम् इति पृथुक तण्डुलान्

09 नन्वे तद् उपनीतम् मे परम प्रीणनम् सखे

तर्प यन्त् यङ्ग माम् विश्वम् एते पृथुक तण्डुलाः

10 इति मुष्टिम् सकृज् जग्ध्वा द्वितीयाम् जग्धु माददे

तावच् छ्रीर् जगृहे हस्तम् तत् परा परमेष्ठिनः

11 एत् आवतालम् विश्वात्मन् सर्व सम्पत् समृद्धये

अस्मिन् लोके ऽथ वा मुष्मिन् पुम्सः त्वत् तोष कारणम्

12 ब्राह्मणस् ताम् तु रजनीम् उषित् वाच्युत मन्दिरे

भुक्त्वा पीत्वा सुखम् मेने आत्मानम् स्वर्गतम् यथा

13 श्वो भूते विश्व भावेन स्व सुखे नाभि वन्दितः

जगाम स्वालयम् तात पथ् यनुव्रज्य नन्दितः

14 स चालब्ध् वा धनम् कृष्णात् न तु या चित वान् स्वयम्

स्व गृहान् व्रीडितो ऽगच्छन् महद् दर्शन निर्वृतः

15 अहो ब्रह्मण्य देवस्य दृष्टा ब्रह्मण्य ता मया

यद् दरिद्र तमो लक्ष्मीम् आश्लिष्टो बिभ्रतो रसि

16 क्वाहम् दरिद्रः पापी यान् क्व कृष्णः श्री निकेतनः

ब्रह्म बन्धुर् इति स्माहम् बाहुभ्याम् परि रम्भितः

17 निवासितः प्रिया जुष्टे पर्यङ्के भ्रातरो यथा

महिष्या वीजितः श्रान्तो बाल व्यजन हस्तया

18 शुश्रूषया परमया पाद सम्वाहना दिभिः

पूजितो देव देवेन विप्र देवेन देव वत्

19 स्वर्गाप वर्गयोः पुम्साम् रसायाम् भुवि सम्पदाम्

सर्वा सामपि सिद्धीनाम् मूलम् तच् चरण् आर्चनम्

20 अधनोऽयम् धनम् प्राप्य माद्यन् उच्चैर् न माम् स्मरेत्

इति कारुणिको नूनम् धनम् मे ऽभूरि ना ददात्

21 इति तच् चिन्तयन् अन्तः प्राप्तो निज गृहान्तिकम्

सूर्यान लेन्दु सङ्काशैः विमानैः सर्वतो वृतम्

22 विचित्रोप वनो द्यानैः कूजद् द्विज कुलाकुलैः

प्रोत् फुल्ल कमुद् आम्भोज कह्ल् आरोत्पल वारिभिः

23 जुष्टम् स्वलङ्कृतैः पुम्भिः स्त्री भिश् च हरिणाक्षिभिः

किमिदम् कस्य वा स्थानम् कथम् तद् इदम् इत् यभूत्

24 एवम् मीमाम्स मानम् तम् नरा नार्यो ऽमर प्रभाः

प्रत्य गृह्णन् महा भागम् गीत वाद्येन भूयसा

25 पतिम् आगतम् आकर्ण्य पत्न् युद् धर्षाति सम्भ्रमा

निश् चक्राम गृहात् तूर्णम् रूपिणी श्री रिवालयात्

26 पति व्रता पतिम् दृष्ट्वा प्रेमोत् कण्ठाश्रु लोचना

मीलिता क्ष्यन मद् बुद्ध्या मनसा परिषस्वजे

27 पत्नीम् वीक्ष्य विस्फुरन्तीम् देवीम् वैमानि कीमिव

दासीनाम् निष्क कण्ठीनाम् मध्ये भान्तीम् स विस्मितः

28 प्रीतः स्वयम् तया युक्तः प्रविष्टो निज मन्दिरम्

मणि स्तम्भ शतो पेतम् महेन्द्र भवनम् यथा

29 पयः फेन निभाः शय्या दान्ता रुक्म परिच् छदाः

पर्यङ्का हेम दण्डानि चामर व्यजनानि च

30 आसनानि च हैमानि मृदूप स्तरणानि च

मुक्ता दाम विलम्बीनि वितानानि द्युमन्ति च

31 स्वच्छस् फटिक कुड्येषु महा मारक तेषु च

32 रत्न दीपान् भ्राज मानान् ललना रत्न सम्युता:

विलोक्य ब्राह्मणस् तत्र समृद्धी: सर्व सम्पदाम्

तर्कया मास निर्व्यग्र: स्व समृद्धिम् अहैतुकीम्

33 नूनम् बतैतन् मम दुर् भगस्य शश्वद् दरिद्रस् य समृद्धि हेतु:

महा विभूते: अवलोक तोऽन्यो नैवोप पद् येत यदूत्त मस्य

34 नन्व ब्रुवाणो दिशते समक्षम् याचिष्णवे भूर्यपि भूरि भोज:

पर्जन्य वत् तत् स्वयम् ईक्षमाणो दाशार्ह काणाम् ऋषभ: सखा मे

35 किञ्चित् करोति उर्वपि यत् स्व दत्तम्

सुहृत् कृतम् फल्ग्वपि भूरि कारी

मयोपणीतम् पृथुकैक मुष्टिम्

प्रत् य ग्रहीत् प्रीति युतो महात्मा

36 तस्यैव मे सौहृद सख्य मैत्री दास्यम् पुनर् जन्मनि जन्म नि स्यात्

महानु भावेन गुणालयेन विषज्जत: तत् पुरुष प्रसङ्ग:

37 भक्ताय चित्रा भगवान् हि सम्पदो राज्यम् विभूतीर्न समर्थ यत् यज:

अदीर्घ बोधाय विचक्षण: स्वयम् पश्यन् निपातम् धनिनाम् मदोद् भवम्

38 इत्थम् व्यवसितो बुद्ध्या भक्तो ऽतीव जनार्दने

विषयान् जायया त्यक्ष्यन् बुभुजे नाति लम्पट:

39 तस्य वै देव देवस्य हरेर् यज्ञ पते: प्रभो:

ब्राह्मणा: प्रभवो दैवम् न तेभ्यो विद्यते परम्

40 एवम् स विप्रो भगवत् सुहृत् तदा दृष्ट्वा स्व भृत्यै: अजितम् पराजितम्

तद् ध्यान वेगोद् ग्रथित् आत्म बन्धन: तद् धाम लेभे ऽचिरत: सताम् गतिम्

41 एतद् ब्रह्मण्य देवस्य श्रुत्वा ब्रह्मण्य ताम् नर:

लब्ध भावो भगवति कर्म बन्धाद्वि मुच्यते

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे एका शीतितमो ऽध्याय ://

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्द: द्वय शीतितमो ऽध्याय :

स्कन्द- *10:* अध्याय- *82*

*01* श्री शुक उवाच

अथैकदा द्वार वत्याम् वसतो राम कृष्णयो:

सूर्योप राग: सुमहान् आसीत् कल्प क्षये यथा

*02* तम् ज्ञात्वा मनुजा राजन् पुरस्ता देव सर्वत:

समन्त पञ्चकम् क्षेत्रम् ययु: श्रेयो विधित् सया

*03* नि: क्षत्रियाम् महीम् कुर्वन् राम: शस्त्र भृताम् वर:

नृपाणाम् रुधिरौ घेण यत्र चक्रे महा ह्रदान्

*04* ईजे च भगवान् रामो यत् रास् प्रुष्टोऽपि कर्मणा

लोकस्य ग्राहयन् नीशो यथान् योऽघाप नुत्तये

*05* महत्याम् तीर्थ यात्रायाम् तत् रागन् भारती: प्रजा:

वृष्ण यश् च तथ् आक्रूर वसुदेवा हु कादय:

*06* ययुर् भारत तत् क्षेत्रम् स्व मघम् क्षप यिष्णव:

गद प्रद्युम्न साम्बाद्या: सु चन्द्र शुक सारणै:

आस्ते ऽनिरुद्धो रक्षायाम् कृत वर्मा च यूथप:

*07* ते रथैर् देव धिष्ण्याभै: हयैश् च तरल प्लवै:

गजै: नदद्भिर् अभ्राभै: नृभि: विद्याधर द्युभि:

08 व्यरोचन्त महा तेजाः पथि काञ्चन मालिनः

दिव्य स्रग् वस्त्र सन्नाहाः कलत्रैः खेचरा इव

09 तत्र स्नात्वा महा भागा उपोष्य सु समाहिताः

ब्राह्मणेभ्यो ददुर् धेनूः वासः स्रग् रुक्म मालिनीः

10 राम ह्रदेषु विधिवत् पुनर् आप्लुत्य वृष्णयः

ददः स्वन्नम् द्विजा ग्र्येभ्यः कृष्णे नो भक्ति रस् त्विति

11 स्वयम् च तद् अनुज्ञाता वृष्णयः कृष्ण देवताः

भुक्त्वोप विविशुः कामम् स्निग्धच् छायाङ्घ्रि पाङ्घ्रिषु

12 तत् राग ताम् स्ते ददृशुः सुहृत् सम्बन्धि नो नृपान्

मत्स्यो शी नर कौशल्य विदर्भ कुरु सृञ्जयान्

13 काम्बोज कैकयान् मद्रान् कुन्तीन् आनर्त केरलान्

अन्याम्श् चै वात्म पक्षीयान् पराम्श् च शतशो नृप

नन्दादीन् सुहृदो गोपान् गोपीश् चोत् कण्ठि ताश् चिरम्

14 अन्योन्य सन्दर्शन हर्षरम् हसा प्रोत् फुल्ल हृद् वक्त्र सरोरु हश्रियः

आश्लिष्य गाढम् नयनैः स्रवज्जला हृष्यत् त्वचो रुद्ध गिरो ययुर् मुदम्

15 स्त्रियश् च सम्वीक्ष्य मिथोऽति सौहृद

स्मिताम लापाङ्ग दृशो ऽभि रेभिरे

स्तनैः स्तनान् कुङ्कुम पङ्क रूषितान्

निहत्य दोर्भिः प्रणयाश्रु लोचनाः

16 ततो ऽभि वाद्य ते वृद्धान् यविष्ठैर् अभिवादिताः

स्वागतम् कुशलम् पृष्ट्वा चक्रुः कृष्ण कथा मिथः

17 पृथा भ्रातॄन् स्वसॄर् वीक्ष्य तत् पुत्रान् पितरा वपि

भ्रातृ पत्नीर् मुकुन्दम् च जहौ सङ्कथया शुचः

18 कुन्त् य् उवाच

आर्य भ्रातरहम् मन्ये आत्मानम् अकृता शिषम्

यद्वा आपत्सु मद् वार्ताम् नानु स्मरथ सत् तमाः

19 सुहृदो ज्ञातयः पुत्रा भ्रातरः पितरा वपि

नानु स्मरन्ति स्वजनम् यस्य दैवम् अदक्षिणम्

20 श्री वसुदेव उवाच

अम्ब मास्मान सूयेथा दैव क्रीडन कान् नरान्

ईशस्य हि वशे लोकः कुरुते कार्य ते ऽथ वा

21 कम्स प्रता पिताः सर्वे वयम् याता दिशम् दिशम्

एतर् ह्येव पुनः स्थानम् दैवे नासादि ताः स्वसः

22 श्री शुक उवाच

वसुदेवोग्र सेनाद्यैः यदु भिस्ते ऽर्चिता नृपाः

आसन् अच्युत सन्दर्श परमानन्द निर्वृताः

23 भीष्मो द्रोणो ऽम्बिका पुत्रो गान्धारी ससुता तथा

सदाराः पाण्डवाः कुन्ती सञ्जयो विदुरः कृपः

24 कुन्ती भोजो विराटश् च भीष्मको नग्नजिन् महान्

पुरुजिद् द्रुपदः शल्यो धृष्ट केतुः स काशिराट्

25 दमघोषो विशा लाक्षो मैथिलो मद्र केकयौ

युधामन्युः सु शर्मा च ससुता बाह्लि कादयः

26 राजानो ये च राजेन्द्र युधिष्ठिरम् अनुव्रताः

श्री निकेतम् वपुः शौरेः सस्त्रीकम् वीक्ष्य विस्मिताः

27 अथ ते राम कृष्णाभ्याम् सम्यक् प्राप्त समर्हणाः

प्रशशम् सुर् मुदा युक्ता वृष्णीन् कृष्ण परिग्रहान्

28 अहो भोज पते यूयम् जन्म भाजो नृणामिह

यत् पश्यथास कृत् कृष्णम् दुर् दर्शम् अपि योगिनाम्

29 यद् विश्रुतिः श्रुति नुतेद् अमलम् पुनाति

पादा वनेजन पयश् च वचश् च शास्त्रम्

भूः काल भर्जित भगापि यद् अङ्घ्रि पद्म

स्पर्शोत्थ शक्तिर् अभि वर्षति नो ऽखिलार्थान्

30 तद् दर्शन स्पर्शनानु पथ प्रजल्प

शय्यासन् आशन सयौन स पिण्ड बन्धः

येषाम् गृहे निरय वर्त्मनि वर्तताम् वः

स्वर्गाप वर्ग विरमः स्वयमा स विष्णुः

31 श्री शुक उवाच

नन्दस् तत्र यदून् प्राप्तान् ज्ञात्वा कृष्ण पुरोगमान्

तत् रागमद् वृतो गोपैः अनःस्थार्थैर् दिदृक्षया

32 तम् दृष्ट्वा वृष्णयो हृष्टाः तन्वः प्राण मिवोत्थिताः

परिषस् वजिरे गाढम् चिर दर्शन कातराः

33 वसुदेवः परिष्वज्य सम्प्रीतः प्रेम विह्वलः

स्मरन् कम्स कृतान् क्लेशान् पुत्रन् यासम् च गोकुले

34 कृष्ण रामौ परिष्वज्य पितरा वभि वाद्य च

न किञ्चनो चतुः प्रेम्णा साश्रु कण्ठौ कुरूद् वह

35 तौ आत्मासनम् आरोप्य बाहुभ्याम् परिरभ्य च

यशोदा च महा भागा सुतौ विजहतुः शुचः

36 रोहिणी देवकी चाथ परिष्वज्य व्रजेश् वरीम्

स्मरन्त्यौ तत् कृताम् मैत्रीम् बाष्प कण्ठ्यौ समूचतुः

37 का विस्मरेत वाम् मैत्रीम् अनिवृत्ताम् व्रजेश्वरि

अवाप्याप् यैन्द्रम् ऐश्वर्यम् यस्या नेह प्रति क्रिया

38 एतौ अदृष्ट पितरौ युवयोः स्म पित्रोः

सम्प्रीणनाभ् युदय पोषण पालनानि

प्राप्योषतुर् भवति पक्ष्म ह यद्व दक्ष्णोर्

न्यस्ताव कुत्र च भयौ न सताम् परः स्वः

39 श्री शुक उवाच

गोप्यश् च कृष्ण मुपलभ्य चिराद भीष्टम्

यत् प्रेक्षणे दृशिषु पक्ष्म कृतम् शपन्ति

दृग्भि: हृदी कृतमलम् परिरभ्य सर्वा:

तद् भाव मापुरपि नित्य युजाम् दुरापम्

40 भगवाम्स् तास् तथा भूता विविक्त उप सङ्गत:

आश्लिष्या नामयम् पृष्ट्वा प्रहसन् निदम् अब्रवीत्

41 अपि स्मरथ न: सख्य: स्वानाम् अर्थचि कीर्षया

गताम् चिरायिताञ् छत्रु पक्ष क्षपण चेतस:

42 अप्य वध्याय थास्मान् स्विद् अकृत ज्ञावि शङ्कया

नूनम् भूतानि भगवान् युनक्ति वियुनक्ति च

43 वायुर् यथा घना नीकम् तृणम् तूलम् रजाम्सि च

सम्योज्या क्षिपते भूय: तथा भूतानि भूत कृत्

44 मयि भक्तिर् हि भूतानाम् अमृत त्वाय कल्पते

दिष्ट्या यदासीन् मत् स्नेहो भवतीनाम् मद् आपन:

45 अहम् हि सर्व भूतानाम् आदि रन्तो ऽन्तरम् बहि:

भौतिकानाम् यथा खम् वार् भूर् वायुर् ज्योतिर् अङ्गना:

46 एवम् ह्येतानि भूतानि भूतेष् वात्मात्म ना तत:

उभयम् मय्यथ परे पश्यता भात मक्षरे

47 श्री शुक उवाच

अध्यात्म शिक्षया गोप्य एवम् कृष्णेन शिक्षिता:

तद् अनुस्मरण ध्वस्त जीव कोशा: त मध्यगन्

48 आहुश् च ते नलिन नाभ पदार विन्दम्

योगेश्वरै: हृदि विचिन्त्यम् अगाध बोधै:

सम्सार कूप पतितोत् तरणाव लम्बम्

गेहम् जुषाम् अपि मनसि उदियात् सदा न:

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे द्वय शीतितमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्द: त्रय शीतितमो ऽध्याय :

स्कन्द- 10: अध्याय- 83

01 श्री शुक उवाच

तथा नुगृह्य भगवान् गोपीनाम् स गुरुर् गति:

युधिष्ठिरम् अथा पृच्छत् सर्वाम्श् च सुहृदो ऽव्ययम्

02 त एवम् लोक नाथेन परि पृष्टा: सुसत् कृता:

प्रत्यूचुर् हृष्ट मनसस् तत् पादेक्षाह ताम् हस:

03 कुतो ऽशिवम् त्वच् चरण् आम्बुजा सवम् महन् मनस्तो मुखनि: सृतम् क्वचित्

पिबन्ति ये कर्ण पुटैर् अलम् प्रभो देहम् भृताम् देह कृद् अस्मृ तिच्छिदम्

04 हि त्वात्म धाम विधु तात्म कृत त्र्यवस्थाम्

आनन्द सम्प्लवम् अखण्डम् अकुण्ठ बोधम्

कालोप सृष्ट निगमावन आत्त योग

माया कृतिम् परम हम्स गतिम् नता: स्म

05 श्री ऋषिर् उवाच

इत् युत्तम: श्लोक शिखामणिम् जनेषु

अभिष्टु वत्स्व् अन्धक कौरव स्त्रिय:

समेत्य गोविन्द कथा मिथो ऽगृनम्स्

त्रि लोक गीता: शृणु वर्णयामि ते

06 श्री द्रौपद् य् उवाच

हे वैदर्भ् यच्युतो भद्रे हे जाम्बवति कौशले

हे सत्यभामे कालिन्दि शैब्ये रोहिणि लक्ष्मणे

07 हे कृष्ण पत्न्य एतन्नो ब्रूत वो भगवान् स्वयम्

उपयेमे यथा लोकम् अनुकुर्वन् स्व मायया

08 श्री रुक्मिण् य् उवाच

चैद्याय मार्प यितु मुद्यत कार्मु केषु

राज स्वजेय भट शेखरि ताङ्घ्रि रेणुः

निन्ये मृगेन्द्र इव भागम् अजावि यूथात्

तच् छ्रीनि केत चरणो ऽस्तु मम् आर्चनाय

09 श्री सत्यभामो वाच

यो मे सनाभिव ध तप्त हृदा ततेन

लिप्ता भिशाप मपमार्ष्टु मुपाज हार

जित्वर्क्ष राजम् अथ रत्नम् अदात् स तेन

भीतः पितादि शत माम् प्रभवे ऽपि दत्ताम्

10 श्री जाम्बवत् य् उवाच

प्राज्ञाय देह कृदमुम् निजनाथ देवम्

सीता पतिम् त्रिनवहान् यमुनाभ्य युध्यत्

ज्ञात्वा परीक्षित उपाहर दर्हणम् माम्

पादौ प्रगृह्य मणि नाहम् अमुष्य दासी

11 श्री कालिन्द् य् उवाच

तपश् चरन्तीम् आज्ञाय स्व पाद स्पर्शन् आशया

सख्यो पेत्या ग्रहीत् पाणिम् योऽहम् तद् गृह मार्जनी

12 श्री मित्रविन्दो वाच

यो माम् स्वयम्वर उपेत्य विजित्य भूपान्

निन्ये श्व यूथगम् इवात्म बलिम् द्विपारिः

भ्रात्नृम्श् च मेऽप कुरुतः स्वपुरम् श्रियौकस्

तस्यास्तु मे ऽनुभवम् अङ्घ्य वनेज नत्वम्

13 श्री सत्यो वाच

सप्तोक्षणोऽति बल वीर्य सुतीक्ष्ण शृङ्गान्

पित्रा कृतान् क्षितिप वीर्य परीक्षणाय

तान् वीर दुर् मद हनस् तरसा निगृह्य

क्रीडन् बबन्ध ह यथा शिशवो ऽजतोकान्

14 य इत्थम् वीर्य शुल्काम् माम्

दासीभिश् चतुर् अन्गिणीम्

पथि निर्जित्य राजन्यान्

निन्ये तद् दास्य मस्तु मे

15 श्री भद्रो वाच

पिता मे मातु लेयाय स्वयम् आहूय दत्तवान्

कृष्णे कृष्णाय तच् चित्ताम् अक्षौहिण्या सखीजनैः

16 अस्य मे पाद सम्स्पर्शो भवेज् जन्मनि जन्मनि

कर्मभिर् भ्राम्य माणाया येन तच् छ्रेय आत्मनः

17 श्री लक्ष्मणो वाच

ममापि राज्ञ् यच्युत जन्म कर्म श्रुत्वा मुहुर् नारद गीत मास ह

चित्तम् मुकुन्दे किल पद्म हस्तया वृतः सु सम्मृश्य विहाय लोकपान्

18 ज्ञात्वा मम मतम् साध्वि पिता दुहितृ वत्सलः

बृहत्सेन इति ख्यातः तत् रोपायम् अचीकरत्

19 यथा स्वयम्वरे राज्ञि मत्स्यः पार्थेप्स या कृतः

अयम् तु बहिराच् छन्नो दृश्यते स जले परम्

20 श्रुत्वै तत् सर्वतो भूपा आययुर् मत् पितुः पुरम्

सर्वास्त्र शस्त्र तत्त्वज्ञाः सोपाध्यायाः सहस्रशः

21 पित्रा सम्पूजिताः सर्वे यथा वीर्यम् यथा वयः

आददुः स शरम् चापम् वेद्धुम् पर्षदि मद्धियः

22 आदाय व्यसृजन् केचित् सज्यम् कर्तुम् अनीश्वराः

आकोटि ज्याम् समुत् कृष्य पेतुरे के ऽमुना हताः

23 सज्यम् कृत्वा परे वीरा मागधाम् बष्ठ चेदिपाः

भीमो दुर्योधनः कर्णो नाविदम्स् तद् अवस्थितिम्

24 मत्स्या भासम् जले वीक्ष्य ज्ञात्वा च तद् अवस्थितिम्

पार्थो यत्तो ऽसृजद् बाणम् नाच्छिनत् पस् पृशे परम्

25 राजन् येषु निवृत् तेषु भग्नमा नेषु मानिषु

भगवान् धनुर् आदाय सज्यम् कृत्वा थ लीलया

26 तस्मिन् सन्धाय विशिखम् मत्स्यम् वीक्ष्य सकृज्जले

छित् त्वेषुणा पात यत्तम् सूर्ये चाभि जिति स्थिते

27 दिवि दुन्दुभयो नेदुः जय शब्द युता भुवि

देवाश् च कुसुमा सारान् मुमुचुः हर्ष विह्वलाः

28 तद् रङ्ग मावि शमहम् कल नूपुराभ्याम्

पद्भ्याम् प्रगृह्य कनकोज्वल रत्न मालाम्

नूत्ने निवीय परिधाय च कौशि काग्र्ये

स व्रीडहा स वदना कवरी धृत स्रक्

29 उन्नीय वक्त्र मुरु कुन्तल कुण्डल त्विड्

गण्डस्थलम् शिशिर हा स कटाक्ष मोक्षैः

राज्ञो निरीक्ष्य परितः शनकैर् मुरारेर्

अम्से ऽनुरक्त हृदया निदधे स्व मालाम्

30 तावन् मृदङ्ग पटहाः शङ्ख भेर्यान कादयः

निनेदुः नट नर्तक्यो ननृतुर् गाय का जगुः

31 एवम् वृते भगवति मयेशे नृपयू थपाः

न सेहिरे याज्ञसेनि स्पर्धन्तो हृच्छया तुराः

32 माम् तावद् रथम् आरोप्य हय रत्न चतुष्टयम्

शार्ङ्ग मुद्यम्य सन्नद्धः तस् था वाजौ चतुर् भुजः

33 दारुकश् चोदया मास काञ्चनो पस्करम् रथम्

मिषताम् भू भुजाम् राज्ञि मृगाणाम् मृग राडिव

34 ते ऽन्व सज्जन्त राजन्या निषेद्धुम् पथि केचन

सम्यत्ता उद्धृते ष्वासा ग्राम सिम्हा यथा हरिम्

35 ते शार्ङ्ग् अच्युत बाणौघैः कृत्त बाह् वङ्घ्रि कन्धराः

निपेतुः प्रधने केचिद् एके सन्त् यज्य दुद् रुवुः

36 ततः पुरीम् यदु पतिर् इत्य लङ्कृताम्

रविच् छद ध्वज पट चित्र तोरणाम्

कुशस्थलीम् दिवि भुवि चाभि सम्स्तुताम्

समाविशत् तरणि रिव स्व केतनम्

37 पिता मे पूजया मास सुहृत् सम्बन्धि बान्धवान्

महार्ह वासो ऽलङ्कारैः शय्यासन परिच्छदैः

38 दासीभिः सर्व सम्पद्भिः भटे भरथ वाजिभिः

आयुधानि महार्हाणि ददौ पूर्णस्य भक्तितः

39 आत्मा रामस्य तस् येमा वयम् वै गृह दासिकाः

सर्व सङ्ग निवृत् त्याद्धा तपसा च बभूविम

40 महिष्य ऊचुः

भौमम् निहत्य सगणम् युधि तेन रुद्धा

ज्ञात्वा थ नः क्षितिजये जित राज कन्याः

निर्मुच्य सम्सृति विमोक्षम् अनुस्मरन्तीः

पादाम्बुजम् परिणि नाय य आप्त कामः

41 न वयम् साध्वि साम्राज्यम् स्वाराज्यम् भौज्य मप्युत

वैराज्यम् पारमेष्ठ्यम् च आनन्त्यम् वा हरेः पदम्

42 कामया मह एतस्य श्री मत् पाद रजः श्रियः

कुच कुङ्कुम गन्धाढ्यम् मूर्ध्ना वोढुम् गदा भृतः

43 व्रज स्त्रियो यद् वाञ्छन्ति पुळिन्द्यस् तृण वीरुधः

गावश् चार यतो गोपाः पद स्पर्शम् महात्मनः

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे त्रय शीतितमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्द: चतुर शीतितमो ऽध्याय :

स्कन्द- 10: अध्याय- 84

01 श्री शुक उवाच

श्रुत्वा पृथा सुबल पुत्र्य थ याज्ञ सेनी

माधव् यथ क्षितिप पत्न्य उत स्व गोप्य:

कृष्णे ऽखिल् आत्मनि हरौ प्रणयानु बन्धम्

सर्वा विसिस्म्युर् अलम् अश्रु कला कुलाक्ष्य:

02 इति सम्भाष माणासु स्त्रीभि: स्त्रीषु नृभिर् नृषु

आययुर् मुनयस् तत्र कृष्ण राम दिदृक्षया

03 द्वैपायनो नारदश् च च्यवनो देव लोऽसित:

विश्वामित्र: शता नन्दो भरद्वाजो ऽथ गौतम:

04 राम: स शिष्यो भगवान् वसिष्ठो गालवो भृगु:

पुलस्त्य: कश्यपो ऽत्रिश् च मार्कण्डेयो बृहस्पति:

05 द्वितस् त्रितश् चैक तश् च ब्रह्म पुत्रास् तथ् आङ्गिरा:

अगस्त्यो याज्ञ वल्क्यश् च वामदेवादयो ऽपरे

06 तान् दृष्ट्वा सह सोत्थाय प्रागा सीना नृपादय:

पाण्डवा: कृष्ण रामौ च प्रणेमु: विश्व वन्दितान्

07 तान् आनर्चु: यथा सर्वे सह रामो ऽच्युतो ऽर्चयत्

स्वागतासन पाद् यार्घ्य माल्य धूपानु लेपनै:

08 उवाच सुख मासीनान् भगवान् धर्म गुप्तनु:

स दसस् तस्य महतो यत वाचोऽनु शृण्वत:

09 श्री भगवान् उवाच

अहो वयम् जन्म भृतो लब्धम् कात्स्न्र्येन तत् फलम्

देवानाम् अपि दुष् प्रापम् यद् योगेश्वर दर्शनम्

10 किम् स्वल्प तपसाम् न्ऋृणाम् अर्चायाम् देव चक्षुषाम्

दर्शन स्पर्शन प्रश्न प्रह्व पाद् आर्चनादिकम्

11 न ह्यम् मयानि तीर्थानि न देवा मृच् छिलामया:

ते पुनन्त् युरु कालेन दर्शना देव साधव:

12 नाग् निर्न सूर्यो न च चन्द्र तारका

न भूर्जलम् खम् श्वसनो ऽथ वाङ्मन:

उपासिता भेद कृतो हरन्त् यघम्

विपश्चितो घ्नन्ति मुहूर्त सेवया

13 यस् यात्म बुद्धि: कुणपे त्रि धातुके

स्वधी: कलत्रा दिषु भौम इज्यधी:

यत् तीर्थ बुद्धि: सलिले न कर्हिचित्

जनेषु अभिज्ञेषु स एव गोखर:

14 श्री शुक उवाच

निशम् येत्थम् भगवत: कृष्णस्या कुण्ठ मेधस:

वचो दुर् अन्वयम् विप्रा: तूष्णीम् आसन् भ्रमद् धिय:

15 चिरम् विमृश्य मुनय ईश्वरस् येशि तव् यताम्

जन सङ्ग्रह इत्यूचु: स्मयन् तस्तम् जगद् गुरुम्

16 श्री मुनय ऊचु:

यन् मायया तत्त्व विदुत् तमा वयम् विमोहिता विश्व सृजामध् ईश्वरा:

यद् ईशि तव्यायति गूढ ईहया अहो विचित्रम् भगवद् विचेष्टितम्

17 अनीह एतद् बहुधैक आत्मना सृजत्य वत् यत्ति न बध् यते यथा

भौमैर्हि भूमिः बहु नाम रूपिणी अहो विभूम् नश् चरितम् विडम्बनम्

18 अथापि काले स्व जनाभि गुप्तये बिभर्षि सत्त्वम् खल निग्र हाय च

स्व लीलया वेद पथम् सनातनम् वर्णाश्रम् आत्मा पुरुषः परो भवान्

19 ब्रह्म ते हृदयम् शुक्लम् तपः स्वाध्याय सम्यमैः

यत् रोप लब्धम् सद् व्यक्तम् अव्यक्तम् च ततः परम्

20 तस्माद् ब्रह्म कुलम् ब्रह्मन्ः शास्त्र योनेस्त्वम् आत्मनः

सभाज यसि सद् धाम तद् ब्रह्मण्या ग्रणीर् भवान्

21 अद्य नो जन्म साफल्यम् विद्यायास् तपसो दृशः

त्वया सङ्गम्य सद् गत्या यदन्तः श्रेय साम् परः

22 नमस्तस्मै भगवते कृष्णाया कुण्ठ मेधसे

स्व योग माययाच् छन्न महिम्ने परमात्मने

23 न यम् विदन्त् यमी भूपा एका रामाश् च वृष्णयः

मा याज वनिकाच् छन्नम् आत्मानम् कालम् ईश्वरम्

24 यथा शयानः पुरुष आत्मानम् गुण तत्त्व दृक्

नाम मात् रेन्द्रिया भातम् न वेद रहितम् परम्

25 एवम् त्वा नाम मात्रेषु विषयेषु इन्द्रिये हया

मायया विभ्र मच् चित्तो न वेद स्मृत् युप प्लवात्

26 तस्याद् य ते ददृशि माङ्घ्रि मघौ घमर्ष

तीर्थास् पदम् हृदि कृतम् सुवि पक्व योगैः

उत्सिक्त भक्त् युपहता शय जीव कोशा

आपुर् भवद् गति मथानु गृहान भक्तान्

27 श्री शुक उवाच

इत् यनुज्ञाप्य दाशार्हम् धृतराष्ट्रम् युधिष्ठिरम्

राजर्षे स्वाश्रमान् गन्तुम् मुनयो दधिरे मनः

28 तद् वीक्ष्य तान् उपव्रज्य वसुदेवो महा यशाः

प्रणम्य चोप सङ्गृह्य बभाषेदम् सुयन् त्रितः

29 श्री वसुदेव उवाच

नमो वः सर्व देवेभ्य ऋषयः श्रोतु मर्हथ

कर्मणा कर्म निर्हारो यथा स्यान् नस् तद् उच्यताम्

30 श्री नारद उवाच

नाति चित्रम् इदम् विप्रा वसुदेवो बुभुत् सया

कृष्णम् मत्वार्भकम् यन्नः पृच्छति श्रेय आत्मनः

31 सन् निकर्षो हि मर्त्यानाम् अना दरण कारणम्

गाङ्गम् हित्वा यथान् याम्भः तत् रत्यो याति शुद्धये

32 यस्यानु भूतिः कालेन लयोत् पत् त्यादि नास्य वै

स्वतोऽन् यस्माच् च गुणतो न कुतश् चन रिष्यति

33 तम् क्लेश कर्म परिपाक गुण प्रवाहैर् अव्याह तानु भवम् ईश्वरम् अद् वितीयम्

प्राणादिभिः स्व विभवैर् उप गूढ मन्यो मन्येत सूर्यमिव मेघ हिमोप रागैः

34 अथोचुर् मुनयो राजन् आभाष् यानक दुन्दुभिम्

सर्वेषाम् शृण् वताम् राज्ञाम् तथै वाच्युत रामयोः

35 कर्मणा कर्म निर्हार एष साधु निरूपितः

यच् छ्रद्धया यजेद् विष्णुम् सर्व यज्ञेश्वरम् मखैः

36 चित्तस् योप शमोऽयम् वै कविभिः शास्त्र चक्षुसा

दर्शितः सुगमो योगो धर्मश् चात्म मुदा वहः

37 अयम् स्वस्त्ययनः पन्था द्विजातेर् गृह मेधिनः

यच् छ्रद्धयाप् तवित्तेन शुक्लेन् एज्येत पूरुषः

38 वित्तैषणाम् यज्ञ दानैः गृहैः दार सुतैषणाम्

आत्म लोकै षणाम् देव कालेन विसृजेद् बुधः

ग्रामे त्यक्तै षणाः सर्वे ययुर् धीर् आस्त पोवनम्

39 ऋणैस् त्रिभिर् द्विजो जातो देवर्षि पितॄणाम् प्रभो

यज्ञाध् ययन पुत्रैः तानि अनिस्तीर्य त्यजन् पतेत्

40 त्वम् त्वद्य मुक्तो द्वाभ्याम् वै ऋषि पित्रोर् महा मते

यज्ञैर् देवर्णम् उन्मुच्य निरृणो ऽशरणो भव

41 वसुदेव भवान् नूनम् भक्त्या परम या हरिम्

जगताम् ईश्वरम् प्रार्चः स यद्वाम् पुत्र ताम् गतः

42 श्री शुक उवाच

इति तद् वचनम् श्रुत्वा वसुदेवो महा मनाः

तान् ऋषीन् ऋत् विजो वव्रे मूर्ध्ना नम्य प्रसाद्य च

43 त एनम् ऋषयो राजन् वृता धर्मेण धार्मिकम्

तस्मिन् अयाजयन् क्षेत्रे मखैः उत्तम कल्पकैः

44 तद् दीक्षायाम् प्रवृत् तायाम् वृष्णयः पुष्करस् रजः

स्नाताः सु वाससो राजन् राजानः सुष्ठ्व् अलङ्कृताः

45 तन् महिष्यश् च मुदिता निष्क कण्ठ्यः सुवाससः

दीक्षा शालाम् उपा जग्मुर् आलिप्ता वस्तु पाणयः

46 नेदुर् मृदङ्ग पटह शङ्ख भेर्यान कादयः

ननृतुर् नटनर् तक्यः तुष्टुवुः सूत मागधाः

जगुः सुकण्ठ्यो गन्धर्व्यः सङ्गीतम् सह भर्तृकाः

47 तम् अभ्य षिञ्चन् विधिवद् अक्तम् अभ्यक्तम् ऋत्विजः

पत्नी भिरष्टा दशभिः सोम राजम् इवोडुभिः

48 ताभिर् दुकूल वलयैर् हार नूपुर कुण्डलैः

स्वलङ् कृताभिर् विबभौ दीक्षितो ऽजिन सम्वृतः

49 तस् यर्त्विजो महा राज रत्न कौशेय वाससः

ससदस्या विरेजुस् ते यथा वृत्र हणो ऽध्वरे

50 तदा रामश् च कृष्णश् च स्वैः स्वैर् बन्धुभिर् अन्वितौ

रेजतुः स्व सुतैर् दारैः जीवेशौ स्व विभूतिभिः

51 ईजेऽनु यज्ञम् विधिना अग्नि होत्रादि लक्षणैः

प्राकृतैर् वैकृतैर् यज्ञैः द्रव्य ज्ञान क्रियेश्वरम्

52 अथर् त्विग्भ्यो ऽददात् काले यथाम् नातम् स दक्षिणाः

स्वलङ्कृ तेभ्यो ऽलङ्कृत्य गोभू कन्या महा धनाः

53 पत्नी सम्या जाव भृथ्यैः चरित्वा ते महर्षयः

सस्नू राम ह्रदे विप्रा यजमान पुरः सराः

54 स्नातो ऽलङ्कार वासाम्सि वन्दिभ्यो ऽदात्त था स्त्रियः

ततः स्वलङ्कृतो वर्णान् आश्वभ् योऽन् नेन पूजयत्

55 बन्धून् स दारान् स सुतान् पारिबर्हेण भूयसा

विदर्भ कोशल कुरून् काशि केकय सृञ्जयान्

56 सदस् यर्त्विक् सुरगणान् नृभूत पितृ चारणान्

श्री नि केतम् अनुज्ञाप्य शम्सन्तः प्रययुः क्रतुम्

57 धृतराष्ट्रो ऽनुजः पार्था भीष्मो द्रोणः पृथा यमौ

नारदो भगवान् व्यासः सुहृत् सम्बन्धि बान्धवाः

58 बन्धून् परिष्वज्य यदून् सौहृदा क्लिन्न चेतसः

ययुर् विरह कृच्छ्रेण स्वदेशाम्श् चापरे जनाः

59 नन्दस्तु सह गोपालैः बृहत्या पूज यार्चितः

कृष्ण रामोग्र सेनाद्यैः न्यवात्सीद् बन्धु वत्सलः

60 वसुदेवो ऽञ्ज सोत् तीर्य मनोरथ महार्णवम्

सुहृद् वृतः प्रीतमना नन्द माह करे स्पृशन्

61 श्री वसुदेव उवाच

भ्रातरीश कृतः पाशो नृनाम् यः स्नेह सम्ज्ञितः

तम् दुस्त्यजम् अहम् मन्ये शूराणाम् अपि योगिनाम्

62 अस्मास्व् अप्रति कल्पेयम् यत् कृता ज्ञेषु सत्तमैः

मैत्र् यर्पिता फला वापि न निवर्तेत कर्हिचित्

63 प्राग कल्पाच् च कुशलम् भ्रातर्वो नाच राम हि

अधुना श्री मदान् धाक्षा न पश्यामः पुरः सतः

64 मा राज्य श्री रभूत् पुम्सः श्रेयस् कामस्य मानद

स्वजना नुत बन्धून्वा न पश्यति ययान् ध दृक्

65 श्री शुक उवाच

एवम् सौहृद शैथिल्य चित्त आनक दुन्दुभिः

रुरोद तत् कृताम् मैत्रीम् स्मरन् अश्रु विलोचनः

66 नन्दस्तु सख्युः प्रिय कृतः प्रेम्णा गोविन्द रामयोः

अद्य श्व इति मासाम् स्त्रीन् यदुभिः मानितो ऽवसत्

67 ततः कामैः पूर्य माणः सव्रजः सह बान्धवः

पराध्र्या भरण क्षौम नानान् अर्घ्य परिच्छदैः

68 वसुदे वोग्र सेनाभ्याम् कृष्णोद् धव बलादिभिः

दत्तम् आदाय पारिबर्हम् यापितो यदुभिर् ययौ

69 नन्दो गोपाश् च गोप्यश् च गोविन्द चरणाम्बुजे

मनः क्षिप्तम् पुनर् हर्तुम् अनीशा मथुराम् ययुः

70 बन्धुषु प्रति यातेषु वृष्णयः कृष्ण देवताः

वीक्ष्य प्रावृष मासन्नाम् ययुर् द्वार वतीम् पुनः

71 जनेभ्यः कथयाम् चक्रुः यदु देव महोत्सवम्

यदासीत् तीर्थ यात्रायाम् सुहृत् सन्दर्श नादिकम्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे चतुर शीतितमो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्दः पञ्चा शीतितमो ऽध्याय :

स्कन्द- 10: अध्याय- 85

01 श्री बादरायणिर् उवाच

अथैक दात्मजौ प्राप्तौ कृत पादाभि वन्दनौ

वसुदेवो ऽभि नन्द्याह प्रीत्या सङ्कर्षण् आच्युतौ

02 मुनीनाम् स वचः श्रुत्वा पुत्रयोः धाम सूचकम्

तद् वीर्यैः जात विश्रम्भः परि भाष्याभ्य भाषत

03 कृष्ण कृष्ण महा योगिन् सङ्कर्षण सनातन

जाने वामस्य यत् साक्षात् प्रधान पुरुषौ परौ

04 यत्र येन यतो यस्य यस्मै यद् यद् यथा यदा

स्यादिदम् भगवान् साक्षात् प्रधान पुरुषेश्वरः

05 एतन् नानाविधम् विश्वम् आत्म सृष्टम् अधोक्षज

आत्मनानु प्रविश् यात्मन् प्राणो जीवो बिभर्ष् यज

06 प्राणा दीनाम् विश्व सृजाम् शक्तयो याः परस्य ताः

पार तन्त्र्याद् वैसा दृष्याद् द्वयोश् चेष्टै व चेष्टताम्

07 कान्तिस् तेजः प्रभा सत्ता चन्द्राग् न्यर्कर्क्ष विद् युताम्

यत्स् थैर्यम् भू भृताम् भूमेः वृत्तिर् गन्धो ऽर्थतो भवान्

08 तर्पणम् प्राणनम् अपाम् देव त्वम् ताश् च तद् रसः

ओजः सहो बलम् चेष्टा गतिर् वायोस् तवेश्वर

09 दिशाम् त्वम् अवकाशोऽसि दिशः खम् स्फोट आश्रयः

नादो वर्णस्त्वम् ओम्कार आकृतीनाम् पृथक् कृतिः

10 इन्द्रियम् त्विन्द्रियाणाम् त्वम् देवाश् च तद् अनुग्रहः

अवबोधो भवान् बुद्धेः जीव स्यानु स्मृतिः सती

11 भूतानाम् असि भूतादिः इन्द्रियाणाम् च तैजसः

वैकारिको विकल्पानाम् प्रधानम् अनुशायिनम्

12 नश्वरेष् विह भावेषु तदसि त्वम् अनश्वरम्

यथा द्रव्य विकारेषु द्रव्य मात्रम् निरूपितम्

13 सत्त्वम् रजस् तम इति गुणास् तद् वृत्त यश् च याः

त्वय् यद्धा ब्रह्मणि परे कल्पिता योग मायया

14 तस्मान् न सन्त्यमी भावा यर्हि त्वयि विकल्पिता:

त्वम् चामीषु विकारेषु ह्यन् यदा व्याव हारिक:

15 गुण प्रवाह एतस्मिन् अबुधास् तु अखिल् आत्मन:

गतिम् सूक्ष्माम् अबोधेन सम्सरन्ती ह कर्मभि:

16 यदृच्छया नृताम् प्राप्य सुकल्पाम् इह दुर्लभाम्

स्वार्थे प्रमत् तस्य वयो गतम् त्वन् माय येश्वर

17 असावहम् ममै वैते देहे चास्यान् वयादिषु

स्नेह पाशैर् निबध्नाति भवान् सर्वमिदम् जगत्

18 युवाम् न न: सुतौ साक्षात् प्रधान पुरुषेश् वरौ

भूभार क्षत्र क्षपण अवतीर्णौ तथात् थ ह

19 तत्ते गतो ऽस्म्यरण मद्य पदार विन्दम्

आपन्न सम्सृति भया पहम् आर्त बन्धो

एताव तालम् अलम् इन्द्रिय लालसेन

मर्त्यात्म दृक् त्वयि परे यद् अपत्य बुद्धि:

20 सूती गृहे ननु जगाद भवान् अजो नौ

सञ्जज्ञ इत् यनु युगम् निज धर्म गुप्त्यै

नानातनूर् गगन वद् विद धज्ज हासि

को वेद भूम्न उरुगाय विभूति मायाम्

21 श्री शुक उवाच

आकर्ण् येत्थम् पितुर् वाक्यम् भगवान् सात्व तर्षभ:

प्रत्याह प्रश्रया नम्र: प्रहसन्: श्लक्ष्णया गिरा

22 श्री भगवान् उवाच

वचो व: सम वेतार्थम् तातै तद् उप मन्महे

यन्न: पुत्रान् समुद् दिश्य तत्त्व ग्राम उदा हृत:

23 अहम् यूयम् असावार्य इमे च द्वारकौ कस:

सर्वे ऽप्येवम् यदु श्रेष्ठ विमृश्या: स चराचरम्

24 आत्मा ह्येकः स्वयम् ज्योतिः नित्यो ऽन्यो निर्गुणो गुणैः

आत्म सृष्टैः तत् कृतेषु भूतेषु बहुधे यते

25 खम् वायुर् ज्योतिर् आपो भूः तत् कृतेषु यथा शयम्

आविस्तिरो ऽल्प भूर्येको नानात्वम् यात्य सावपि

26 श्री शुक उवाच

एवम् भगवता राजन् वसुदेव उदा हृतम्

श्रुत्वा विनष्ट नानाधीः तूष्णीम् प्रीत मना अभूत्

27 अथ तत्र कुरुश्रेष्ठ देवकी सर्व देवता

श्रुत्वा नीतम् गुरोः पुत्रम् आत्म जाभ्याम् सु विस्मिता

28 कृष्ण रामौ समाश् राव्य पुत्रान् कम्स विहिम्सितान्

स्मरन्ती कृपणम् प्राह वैक्लव्याद् अश्रु लोचना

29 श्री देवक् य् उवाच

राम राम् आप्रमे यात्मन् कृष्ण योगेश् वरेश्वर

वेदाहम् वाम् विश्व सृजाम् ईश्वरौ आदि पूरुषौ

30 कलविध्वस् त सत्त्वानाम् राज्ञाम् उच् छास्त्र वर्तिनाम्

भूमेः भाराय माणानाम् अवतीर्णौ किलाद्य मे

31 यस्याम् शाम्शाम् श भागेन विश्वोत् पत्ति लयोदयाः

भवन्ति किल विश्वात्मन्ः तम् त्वाद् याहम् गतिम् गता

32 चिरान् मृत सुता दाने गुरुणा काल चोदितौ

आनिन्यथुः पितृस् थानाद् गुरवे गुरु दक्षिणाम्

33 तथा मे कुरुतम् कामम् युवाम् योगेश् वरेश् वरौ

भोज राज हतान् पुत्रान् कामये द्रष्टुम् आहृतान्

34 ऋषिर् उवाच

एवम् सञ्चोदितौ मात्रा रामः कृष्णश् च भारत

सुतलम् सम् विविशतुः योग मायाम् उपाश्रितौ

35 तस्मिन् प्रविष्टा वुपलभ्य दैत्य राड्

विश्वात्म दैवम् सुतराम् तथ् आत्मन:

तद् दर्शन् आह्लाद परिप्लु ताशय:

सद्य: समुत्थाय ननाम सान्वय:

36 तयो: समानीय वरासनम् मुदा निविष्ट यो: तत्र महात्मनोस् तयो:

दधार पादा ववनिज्य तज् जलम् सवृन्द आब्रह्म पुनद् यदम्बु ह

37 समर्हया मास स तौ विभूतिभि: महार्ह वस्त् राभरणानु लेपनै:

ताम्बूल दीपामृत भक्षणादिभि: स्व गोत्र वित् तात्म समर्पणेन च

38 स इन्द्रसेनो भगवत् पदाम्बुजम् बिभ्रन् मुहु: प्रेम विभिन्न या धिया

उवाच हानन्द जला कुलेक्षण: प्रहृष्ट रोमा नृप गद्गद् आक्षरम्

39 बलिर् उवाच

नमो ऽनन्ताय बृहते नम: कृष्णाय वेधसे

साङ्ख्य योग वितानाय ब्रह्मणे परमात्मने

40 दर्शनम् वाम् हि भूतानाम् दुष्प्रापम् चाप्य दुर्लभम्

रजस् तम: स्वभा वानाम् यन्न: प्राप्तौ यदृच्छया

41 दैत्य दानव गन्धर्वा: सिद्ध विद्याध्र चारणा:

यक्ष रक्ष: पिशा चाश् च भूत प्रमथ नायका:

42 विशुद्ध सत्त्वधाम् न्यद्धा त्वयि शास्त्र शरीरिणि

नित्यम् निबद्ध वैरास् ते वयम् चान्ये च ताद् ऋशा:

43 केचनोद् बद्ध वैरेण भक्त्या केचन कामत:

न तथा सत्त्व सम्रब्धा: सन्नि कृष्टा: सुरादय:

44 इदम् इत्थम् इति प्राय: तव योगेश् वरेश्वर

न विदन्त् यपि योगेशा योग मायाम् कुतो वयम्

45 तन्न: प्रसीद निरपेक्ष विमृग्य युष्मत्

पादार विन्द धिषणान्य गृह् आन्ध कूपात्

निष्क्रम्य विश्व शरणाङ्घ्र् युप लब्ध वृत्ति:

शान्तो यथैक उत सर्व सखैश् चरामि

46 शाध्यस् मानी शितव् येश निष्पापान् कुरु नः प्रभो

पुमान् यच् छ्रद्धया तिष्ठन्ः चोदनाया विमुच्यते

47 श्री भगवान् उवाच

आसन् मरीचेः षट् पुत्रा ऊर्णायाम् प्रथमे ऽन्तरे

देवाः कम् जहसुर् वीक्ष्य सुतम् यभितु मुद्यतम्

48 तेनासुरीम् अगन्योनिम् अधुनौ अद्य कर्मणा

हिरण्य कशिपोर् जाता नीतास् ते योग मायया

49 देवक्या उदरे जाता राजन्ः कम्स विहिम्सिताः

सा तान् शोचत् यात्मजान् स्वाम्स् त इमे ऽध्यासते ऽन्तिके

50 इत एतान् प्रणेष्यामो मातृ शोकाप नुत्तये

ततः शापाद् विनिर् मुक्ता लोकम् यास् यन्ति विज्वराः

51 स्मरोद् गीथः परिष्वङ्गः पतङ्गः क्षुद्र भृद् घृणी

षडिमे मत् प्रसादेन पुनर् यास्यन्ति सद् गतिम्

52 इत् युक्त्वा तान् समादाय इन्द्रसेनेन पूजितौ

पुनर् द्वारवती मेत्य मातुः पुत्रान् अयच् छताम्

53 तान् दृष्ट्वा बालकान् देवी पुत्र स्नेह स्नुतस्तनी

परिष् वज्याङ्कम् आरोप्य मूर्ध्न्यं जिघ्रद् अभीक्ष्णशः

54 अपाय यत् स्तनम् प्रीता सुत स्पर्श परिप्लुता

मोहिता मायया विष्णोः यया सृष्टिः प्रवर्तते

55 पीत् वामृतम् पयस् तस्याः पीत शेषम् गदा भृतः

नारायण् आङ्ग सम्स्पर्श प्रति लब्ध् आत्म दर्शनाः

56 ते नमस्कृत्य गोविन्दम् देवकीम् पितरम् बलम्

मिषताम् सर्व भूतानाम् ययुर् धाम दिवौ कसाम्

57 तम् दृष्ट्वा देवकी देवी मृता गमन निर्गमम्

मेने सुविस्मिता मायाम् कृष्णस्य रचिताम् नृप

58 एवम् विधान् यद्भुतानि कृष्णस्य परमात्मनः

वीर्याणि अनन्त वीर्यस्य सन्त् यनन्तानि भारत

59 श्री सूत उवाच

य इदम् अनुशृणोति श्रावयेद् वा मुरारेः

चरितम् अमृत कीर्तेः वर्णितम् व्यास पुत्रैः

जगद् अघभिदलम् तद् भक्त सत् कर्ण पूरम्

भगवति कृत चित्तो याति तत् क्षेम धाम

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे पञ्चा शीतितमो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्दः षड शीतितमो ऽध्याय :

स्कन्द- 10: अध्याय- 86

01 श्री राजो उवाच

ब्रह्मन् वेदितु मिच् छामः स्वसाराम् राम कृष्णयोः

यथो प येमे विजयो या ममासीत् पितामही

02 श्री शुक उवाच

अर्जुनः तीर्थ यात्रायाम् पर्यटन् अवनीम् प्रभुः

गतः प्रभासम् अश्रुणोत्ः मातुलेयीम् स आत्मनः

03 दुर्योधना य रामस् ताम् दास्य तीति न चापरे

तल्लिप्सुः स यतिर् भूत्वा त्रिदण्डी द्वारका मगात्

04 तत्र वै वार्षितान् मासान् अवात्सीत् स्वार्थ साधकः

पौरैः सभाजितो ऽभीक्ष्णम् रामेणाजान ता च सः

05 एकदा गृह मानीय आतिथ्येन निमन्त्र्य तम्

श्रद्धयोप हृतम् भैक्ष्यम् बलेन बुभुजे किल

06 सो ऽपश्यत् तत्र महतीम् कन्याम् वीर मनोहराम्

प्रीत् युत्फुल् लेक्षणस् तस्याम् भाव क्षुब्धम् मनो दधे

07 सापि तम् चकमे वीक्ष्य नारीणाम् हृदयम् गमम्

हसन्ती व्रीडिता पङ्गी तन् न्यस्त हृदये क्षणा

08 ताम् परम् सम् अनुध्यायन् अन्तरम् प्रेप्सुर् अर्जुन:

न लेभे शम् भ्रमच् चित्त: कामेनाति बलीयसा

09 महत्याम् देव यात्रायाम् रथस्थाम् दुर्ग निर्गताम्

जहारानु मत: पित्रो: कृष्णस्य च महा रथ:

10 रथस्थो धनुर् आदाय शूराम्श् चारुन् धतो भटान्

विद्राव्य क्रो शताम् स्वानाम् स्वभागम् मृग राडिव

11 तच् छ्रुत्वा क्षुभितो राम: पर्वणीव महार्णव:

गृहीत पाद: कृष्णेन सुहृद् भिश् चान् वशाम् यत:

12 प्राहिणोत् पारि बर्हाणि वर वध्वोर् मुदा बल:

महा धनोपस् करेभ रथाश् व नर योषित:

13 श्री शुक उवाच

कृष्णस् यासीद् द्विज श्रेष्ठ: श्रुत देव इति श्रुत:

कृष्णैक भक्त्या पूर्णार्थ: शान्त: कविर् अलम्पट:

14 स उवास विदेहेषु मिथिलायाम् गृहाश्रमी

अनीहया गता हार्य निर्वर्ति त निजक्रिय:

15 यात्रा मात्रम् त्व हरहर् दैवाद् उपन मत्युत

नाधिकम् तावता तुष्ट: क्रिया चक्रे यथोचिता:

16 तथा तद् राष्ट्र पालोऽङ्ग बहुलाश्व इति श्रुत:

मैथिलो निरहम् मान उभौ अप्यच्युत प्रियौ

17 तयो: प्रसन्नो भगवान् दारुकेणा हृतम् रथम्

आरुह्य साकम् मुनिभिः विदेहान् प्रययौ प्रभुः

18 नारदो वाम देवोऽत्रिः कृष्णो रामो ऽसितो ऽरुणिः

अहम् बृहस्पतिः कण्वो मैत्रेयश् च्यवना दयः

19 तत्र तत्र तमा यान्तम् पौरा जान पदा नृप

उपतस्थुः सार्घ्य हस्ता ग्रहैः सूर्यम् इवोदितम्

20 आनर्त धन्व कुरु जाङ्गल कङ्क मत्स्य

पाञ्चाल कुन्ति मधुके कय कोशलार्णाः

अन्ये च तन् मुख सरोजम् उदार हास

स्निग् धेक्षणम् नृप पपुर् दृशिभिर् न्नृनार्यः

21 तेभ्यः स्व वीक्षण विनष्ट तमिस्र दृग् भ्यः

क्षेमम् त्रि लोक गुरु रर्थ दृशम् च यच्छन्

शृण्वन् दिगन्त धवलम् स्व यशोऽशु भघ्नम्

गीतम् सुरैर् नृभिर् अगाच्छन कैर् विदेहान्

22 ते ऽच्युतम् प्राप्त माकर्ण्य पौरा जान पदा नृप

अभीयुर् मुदितास् तस्मै गृहीतार् हण पाणयः

23 दृष्ट्वा त उत्तमः श्लोकम् प्रीत् युत्फुल् लान नाशयाः

कैर् धृताञ्जलि भिर् नेमुः श्रुत पूर्वाम्स् तथा मुनीन्

24 स्वानु ग्रहाय सम् प्राप्तम् मन्वानौ तम् जगद् गुरुम्

मैथिलः श्रुत देवश् च पादयोः पेततुः प्रभोः

25 न्यमन्त्र येताम् दाशार्हम् आतिथ्येन सह द्विजैः

मैथिलः श्रुत देवश् च युग पत्सम् हताञ्जली

26 भगवाम्स् तद् अभिप्रेत्य द्वयोः प्रिय चिकीर्षया

उभयोर् आविशद् गेहम् उभाभ्याम् तद् अलक्षितः

27 श्रोतु मप्य सताम् दूराज् जनकः स्व गृहा गतान्

आनीतेषु आसना ग्र्येषु सुखा सीनान् महा मनाः

28 प्रवृद्ध भक्त्या उद्धर्ष हृदया स्रावि लेक्षणः

नत्वा तद् अङ्घ्रीन् प्रक्षाल्य तद् अपो लोक पावनीः

29 सकुटुम्बो वहन् मूर्ध्ना पूजयाम् चक्र ईश्वरान्

गन्ध माल्याम् बरा कल्प धूप दीपार्घ्य गो वृषैः

30 वाचा मधुरया प्रीणन् इदम् आहान्न तर्पितान्

पादावङ् कगतौ विष्णोः सम्स्पृशञ् छनकैर् मुदा

31 श्री राजो उवाच

भवान् हि सर्व भूतानाम् आत्मा साक्षी स्व दृग्विभो

अथ नस्त्वत् पदाम्भोजम् स्मरताम् दर्शनम् गतः

32 स्व वचस्त दृतम् कर्तुम् अस्मद् दृग् गो चरो भवान्

यदात् थैकान्त भक्तान् मे नानन्तः श्री रजः प्रियः

33 को नु त्वच् चरणाम् भोजम् एवम् विद् विसृजेत् पुमान्

निष् किञ्चनानाम् शान्तानाम् मुनीनाम् यस्त्वम् आत्मदः

34 योऽव तीर्य यदोर् वम्शे नृणाम् सम्स रतामिह

यशो विते ने तच् छान्त्यै त्रै लोक्य वृजिना पहम्

35 नमस्तुभ्यम् भगवते कृष्णाया कुण्ठ मेधसे

नारायणाय ऋषये सुशान्तम् तप ईयुषे

36 दिनानि कतिचिद् भूमन् गृहान्नो निव स द्विजैः

समेतः पाद रजसा पुनीही दम् निमेः कुलम्

37 इत् युपा मन्त्रितो राज्ञा भगवान् लोक भावनः

उवास कुर्वन् कल्याणम् मिथिला नर योषिताम्

38 श्रुतदेवो ऽच्युतम् प्राप्तम् स्व गृहाञ् जनको यथा

नत्वा मुनीन्सु सम्हृष्टो धुन्वन्वा सो ननर्त ह

39 तृण पीथ बृषीष् वेतान् आनीते षूप वेश्य सः

स्वागतेना भिनन्द् याङ्घ्रीन् सभार्यो ऽवनिजे मुदा

40 तद् अम्भसा महा भाग आत्मानम् सगृ हान्वयम्

स्नापयाम् चक्र उद्धर्षो लब्ध सर्व मनोरथः

41 फलार्हणो शीर् अशिवामृ ताम्बुभिर् मृदा सुरभ्या तुळसी कुशाम्बुयैः

आराध यामास यथोप पन्नया सपर्यया सत्त्व विवर्धनान् धसा

42 स तर्कया मास कुतो ममान् वभूत् गृह् आन्धकुपे पतितस्य सङ्गमः

यः सर्व तीर्थास् पद पाद रेणुभिः कृष्णेन चास्यात् मनि केत भूसुरैः

43 सूप विष्टान् कृता तिथ्यान् श्रुत देव उपस्थितः

सभार्य स्वजना पत्य उवाचाङ्घ्र् यभि मर्शनः

44 श्रुत देव उवाच

नाद्य नो दर्शनम् प्राप्तः परम् परम पूरुषः

यर्हीदम् शक्तिभिः सृष्ट्वा प्रविष्टो ह्यात्म सत्तया

45 यथा शयानः पुरुषो मनसै वात्म मायया

सृष्ट्वा लोकम् परम् स्वाप्नम् अनुविश्याव भासते

46 शृण्वताम् गदताम् शश्वद् अर्चताम् त्वाभि वन्दताम्

णृणाम् सम् वदताम् अन्तर् हृदि भासि अमलात्मनाम्

47 हृदिस्थोऽपि अति दूरस्थः कर्मवि क्षिप्त चेतसाम्

आत्म शक्तिभिर् अग्राह्यो ऽपि अन्त् युपेत गुणात्मनाम्

48 नमोऽस्तु ते ऽध्यात्म विदाम् परात्मने

अनात्मने स्वात्म विभक्त मृत्यवे

स कारणा कारण लिङ्ग मीयुषे

स्व मायया सम्वृत रुद्ध दृष्टये

49 स त्वम् शाधि स्व भृत्यान् नः किम् देव करवाम हे

एतदन्तो नृणाम् क्लेशो यद् भवान् अक्षिगो चरः

50 श्री शुक उवाच

तद् उक्तम् इत् युपा कर्ण्य भगवान् प्रणत् आर्तिहा

गृहीत्वा पाणिना पाणिम् प्रह सम्स्तम् उवाच ह

51 श्री भगवान् उवाच

ब्रह्मम्स् ते ऽनुग्रहार्थाय सम्प्राप्तान् विद्ध्य मून् मुनीन्

सञ्चरन्ति मया लोकान् पुनन्तः पाद रेणुभिः

52 देवाः क्षेत्राणि तीर्थानि दर्शन स्पर्शन् आर्चनैः

शनैः पुनन्ति कालेन तद् अप्यर्हत्त मे क्षया

53 ब्राह्मणो जन्मना श्रेयान् सर्वेषाम् प्राणिना मिह

तपसा विद्यया तुष्ट्या किमु मत् कलया युतः

54 न ब्राह्मणान् मे दयितम् रूपमेतच् चतुर् भुजम्

सर्व वेद मयो विप्रः सर्व देवमयो ह्यहम्

55 दुष् प्रज्ञा अविदित् वैवम् अवजानन्त् य सूयवः

गुरुम् माम् विप्रम् आत्मानम् अर्चादौ इज्य दृष्टयः

56 चराचर मिदम् विश्वम् भावा ये चास्य हेतवः

मद् रूपाणीति चेतस् या धत्ते विप्रो मदीक्षया

57 तस्माद् ब्रह्म ऋषीन् एतान् ब्रह्मन् मच् छ्रद्ध यार्चय

एवम् चेद् अर्चितो ऽस्म्यद्धा नान्यथा भूरि भूतिभिः

58 श्री शुक उवाच

स इत्थम् प्रभुना दिष्टः सह कृष्णान् द्विजोत्तमान्

आराध् यै कात्म भावेन मैथिलश् चाप सद् गतिम्

59 एवम् स्व भक्तयो राजन् भगवान् भक्त भक्तिमान्

उषित्वा दिश्य सन् मार्गम् पुनर् द्वार् अवती मगात्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे षड शीतितमो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्दः सप्ता शीतितमो ऽध्याय :

स्कन्द- *10:* अध्याय- *87*

*01* श्री परीक्षिद् उवाच

ब्रह्मन् ब्रह्मण्य निर्देश्ये निर्गुणे गुण वृत्तयः

कथम् चरन्ति श्रुतयः साक्षात् सदसतः परे

*02* श्री शुक उवाच

बुद् धीन्द्रिय मनः प्राणान् जनानाम् असृजत् प्रभुः

मात्रार्थम् च भवार्थम् च आत्मने ऽकल्पनाय च

*03* सैषा ह्युपनिषद् ब्राह्मी पूर्वेशाम् पूर्वजैर् धृता

श्रद्धया धारयेद् यस्ताम् क्षेमम् गच्छेद् अकिञ्चनः

*04* अत्र ते वर्ण यिष्यामि गाथाम् नारायणान् विताम्

नारदस्य च सम्वादम् ऋषेर् नारायणस्य च

*05* एकदा नारदो लोकान् पर्यटन् भगवत् प्रियः

सनातनम् ऋषिम् द्रष्टुम् ययौ नारायण् आश्रमम्

*06* यो वै भारत वर्षे ऽस्मिन् क्षेमाय स्वस्तये नृणाम्

धर्म ज्ञान शमो पेतम् आकल्पाद् आस्थितस् तपः

*07* तत्रोप विष्टम् ऋषिभिः कलाप ग्राम वासिभिः

परीतम् प्रणतो ऽपृच्छद् इदम् एव कुरूद्वह

*08* तस्मै ह्यवो चद् भगवान् ऋषीणाम् शृण्वताम् इदम्

यो ब्रह्म वादः पूर्वेषाम् जन लोक निवासिनाम्

*09* श्री भगवान् उवाच

स्वायम्भुव ब्रह्म सत्रम् जनलोके ऽभवत् पुरा

तत्र स्थानाम् मानसानाम् मुनीनाम् ऊर्ध्व रेतसाम्

*10* श्वेत द्वीपम् गतवति त्वयि द्रष्टुम् तद् ईश्वरम्

ब्रह्म वादः सुसम् वृत्तः श्रुतयो यत्र शेरते

तत्र हायम् अभूत् प्रश्नः त्वम् माम् यम् अनु पृच्छसि

11 तुल्य श्रुत तपः शीलाः तुल्यस् वीयार् इमध्यमाः

अपि चक्रुः प्रवचनम् एकम् शुश्रूषवो ऽपरे

12 श्री सनन्दन उवाच

स्वसृष्टम् इदमा पीय शयानम् सह शक्तिभिः

तद् अन्ते बोधयाम् चक्रुः तल्लिङ्गैः श्रुतयः परम्

13 यथा शयानम् सम्राजम् वन्दिनस् तत् पराक्रमैः

प्रत्यूषे ऽभेत्य सुश्लोकैः बोधयन्त् यनु जीविनः

14 श्री श्रुतय ऊचुः

जय जय जह्यजाम् अजित दोष गृभीत गुणाम्

त्वमसि यद् आत्मना समव रुद्ध समस्त भगः

अग जग दोकसाम् अखिल शक्त् यव बोधक ते

क्वचिद् अजयात्मना च चरतो ऽनुचरेन् निगमः

15 बृहद् उप लब्ध मेतद् अवयन्त् यव शेषतया

यत उदय् आस्तम यौ विकृतेर् मृदि वावि कृतात्

अत ऋषयो दधुस् त्वयि मनो वचना चरितम्

कथ मयथा भवन्ति भुवि दत्त पदानि नृणाम्

16 इति तव सूरयस् त्र्य धिपते ऽखिल लोकमल

क्षपण कथाम् ऋताब्धिम् अवगाह्य तपाम्सि जहुः

किमुत पुनः स्वधाम विधु ताशय काल गुणाः

परम भजन्ति ये पदम् अजस्र सुखानु भवम्

17 दृतय इव श्वसन्त् यसु भृतो यदि ते ऽनुविधा

महद् अहमादयो ऽण्ड मसृजन् यद् अनुग्रहतः

पुरुषविधो ऽन्वयो ऽत्र चरमो ऽन्नम यादिषु यः

सदसतः परम् त्वमथ यद् एष्व वशेष मृतम्

18 उदर मुपासते य ऋषि वर्त्मसु कूर्प दृशः

परिसर पद्धतिम् हृदय मारुण यो दहरम्

तत उदगाद् अनन्त तव धाम शिरः परमम्
पुनरिह यत् समेत्य न पतन्ति कृतान् त मुखे
19 स्वकृत विचित्र योनिषु वि शन्निव हेतु तया
तर तमतश् चकास् स्यनल वत्स्व कृतानु कृतिः
अथ वितथास्व मूष्व वितथाम् तव धाम समम्
विरजधियो ऽनुयन्त् यभिवि पण्यव एकरसम्
20 स्व कृत पुरेष्वम् ईषु अबहिरन्तर सम्वरणम्
तव पुरुषम् वदन्त् यखिल शक्ति धृतो ऽम्श कृतम्
इति नृगतिम् विविच्य कवयो निगमाव पनम्
भवत उपासते ऽङ्घ्रि मभवम् भुवि विश्वसिताः
21 दुरवग मात्म तत्त्व निगमाय तवात्त तनोश्
चरित महा मृताब्धि परिवर्त परिश्र मणाः
न परिलषन्ति केचिद् अपवर्गम् अपीश्वर ते
चरण सरोजहम् सकुल सङ्ग विसृष्ट गृहाः
22 त्वद् अनुपथम् कुलायम् इदम् आत्म सुहृत् प्रियवच्
चरति तथोन् मुखे त्वयि हिते प्रिय आत्मनि च
न बत रमन्त् यहो असद् उपासन यात्महनो
यद् अनुशया भ्रमन्त् युरुभये कुश रीर भृतः
23 निभृत मरुन् मनोऽक्ष दृढ योग युजो हृदि यन्
मुनय उपासते तद् अरयोऽपि ययुः स्मरणात्
स्त्रिय उरगेन्द्र भोग भुज दण्ड वि षक्त धियो
वयमपि ते समाः सम द्रुशोऽङ्घ्रि सरोज सुधाः
24 क इह नु वेद बतावर जन्मल योऽग्र सरम्
यत उदगाद् ऋषिर् यमनु देवगणा उभये
तर्हि न सन् न चासद् उभयम् न च कालजवः
किमपि न तत्र शास्त्रम् अवकृष्य शयीत यदा

25 जनिमसतः सतो मृतिम् उतात्मनि ये च भिदाम्
विपण मृतम् स्मरन्त् युपदि शन्ति त आरुपितैः
त्रि गुणमयः पुमानिति भिदा यद बोध कृता
त्वयि न ततः परत्र स भवेद् अव बोधरसे
26 सदिव मनस् त्रि वृत् त्वयि विभात्य सद् आमनुजात्
सद् अभि मृशन्त्य शेष मिद मात्म त यात्म विदः
न हि विकृतिम् त्यजन्ति कनकस्य तद् आत्म तया
स्वकृत मनु प्रविष्टम् इदम् आत्म तया वसितम्
27 तव परि ये चरन्त् यखिल सत्त्व निकेत तया
त उत पदा क्रमन्त् यवि गणय्य शिरो निरृतेः
परिवयसे पशूनिव गिरा विबुधान् अपि तान्ः
त्वयि कृत सौहृदाः खलु पुनन्ति न ये विमुखाः
28 त्वम् अकरणः स्वराड् अखिल कारक शक्ति धरः
तव बलिम् उद्वहन्ति सम दन्त् यजयानि मिषाः
वर्ष भुजो ऽखिल क्षिति पतेर् इव विश्व सृजो
विदधति यत्र ये त्वधि कृता भवतश् च किताः
29 स्थिर चर जातयः स्युर् अजयोत्थ निमित्त युजो
विहर उदीक्षया यदि परस्य विमुक्त ततः
न हि परमस्य कश्चिद् अपरो न परश् च भवेद्
वियत इवा पदस्य तव शून्य तुलाम् दधतः
30 अपरि मिता ध्रुवास् तनु भृतो यदि सर्व गतास्
तर्हि न शास् यतेति नियमो ध्रुव नेतरथा
अजनि च यन्मयम् तद् अविमुच्य नियन्तृ भवेत्
सम मनु जानताम् यद् अमतम् मत दुष्ट तया
31 न घटत उद्भवः प्रकृति पूरुष योरजयोर्
उभय युजा भवन्त् यसुभृतो जलबुद् बुदवत्

त्वयि त इमे ततो विविध नाम गुणैः परमे
सरित इवार्णवे मधुनि लिल्युर शेष रसाः
32 नृषु तव मयया भ्रमम् अमीष्वव गत्य भृशम्
त्वयि सुधियो ऽभवे दधति भावम् अनु प्रभवम्
कथम् अनु वर्तताम् भव भयम् तव यद् भ्रुकुटिः
सृजति मुहुस् त्रि नेमिर् अभवच् छरणेषु भयम्
33 विजित हृषी क वायुभिर् अदान्त मनस् तुरगम्
य इह यतन्ति यन्तुम् अतिलोल मुपाय खिदः
व्यसनश तान् विताः सम वहाय गुरोश् चरणम्
वणिज इवाज सन्त् यकृत कर्ण धरा जलधौ
34 स्वजन सुतात्म दार धन धाम धरा सुरथैस्
त्वयि सति किम् नृणाम् श्रयत आत्मनि सर्वरसे
इति सद जानताम् मिथुनतो रतये चरताम्
सुखयति को न्विह स्व विहते स्व निरस्त भगे
35 भुवि पुरु पुण्य तीर्थ सदनानि ऋषयो विमदाः
त उत भवत् पदाम्बुज हृदो ऽघभि दङ्घ्रि जलाः
दधति सकृन् मनस् त्वयि य आत्मनि नित्य सुखे
न पुनर् उपासते पुरुष सारह रा वसथान्
36 सत इदम् उत्थितम् सदिति चेन् ननु तर् कहतम्
व्यभि चरति क्व च क्व च मृषा न तथो भययुक्
व्यव हृतये विकल्प इषितो ऽन्ध परम्परया
भ्रमयति भारती त उरु वृत्तिभिर् उक्थ जडान्
37 न यदिद मग्र आस न भविष्यद् अतो निधनाद्
अनु मितम् अन्तरा त्वयि विभाति मृषै करसे
अत उप मीयते द्रविण जाति विकल्प पथैः
वितथ मनोविलासम् ऋतम् इत् यवयन्त् यबुधाः

38 स यद जया त्वजा मनुश यीत गुणाम्श् च जुषन्

भजति सरूपताम् तद् अनु मृत्यु मपेत भगः

त्वमुत जहासि ताम् अहिरिव त्वचम् आत्त भगो

महसि महीयसे ऽष्ट गुणिते ऽपरिमेय भगः

39 यदि न समुद् धरन्ति यतयो हृदि काम जटा

दुरधि गमो ऽसताम् हृदि गतो ऽस्मृत कण्ठ मणिः

असु तृप योगिनाम् उभय तोऽप्य सुखम् भगवन्

अनप गतान् तकाद् अनधि रूढ पदाद् भवतः

40 त्वद् अवगमी न वेत्ति भवद् उत्थ शुभा शुभयोः

गुणवि गुणान् वयाम् स्तर्हि देह भृताम् च गिरः

अनुयुगम् अन्वहम् सगुण गीत परम्परया

श्रवण भृतो यत् अस्त्वम् अप वर्ग गतिर् मनुजैः

41 द्युपतय एव ते न ययुर् अन्तम् अनन्त तया

त्वम् अपि यद् अन्तराण्ड निचया ननु सा वरणाः

ख इव रजाम्सि वान्ति वयसा सह यच् छ्रुतयस्

त्वयि हि फलन्त् यतन् निरस नेन भवन् निधनाः

42 श्री भगवान् उवाच

इत् येतद् ब्रह्मणः पुत्रा आश्रुत् यात्मा नुशासनम्

सनन्दन मथान् अर्चुः सिद्धा ज्ञात् वात्मनो गतिम्

43 इत् यशेष समाम् नाय पुराणोपनिषद् रसः

समुद् धृतः पूर्व जातैर् व्योमयानैर् महात् मभिः

44 त्वम् चैतद् ब्रह्मदा याद श्रद्ध यात्मानु शासनम्

धारयम्श् चर गाम् कामम् कामानाम् भर्जनम् नृणाम्

45 श्री शुक उवाच

एवम् स ऋषिणा दिष्टम् गृहीत्वा श्रद्ध यात्मवान्

पूर्णः श्रुत धरो राजन् आह वीर व्रतो मुनिः

46 श्री नारद उवाच

नमस् तस्मै भगवते कृष्णा यामल कीर्तये

यो धत्ते सर्व भूतानाम् अभवा योशती: कला:

47 इत् याद्यम् ऋषि मानम्य तच् छिष्याम्श् च महात् मन:

ततो ऽगाद् आश्रमम् साक्षात् पितुर् द्वैपायनस् य मे

48 सभाजितो भगवता कृतासन परिग्रह:

तस्मै तद् वर्णया मास नारायण मुखाच् छ्रुतम्

49 इत् येतद् वर्णितम् राजन् यन्न: प्रश्न: कृतस् त्वया

यथा ब्रह्मण्य निर्देश्ये निरुगुणे ऽपि मनश् चरेत्

50 यो ऽस्योत् प्रेक्षक आदि मध्य निधने यो ऽव्यक्त जीवेश्वरो

य: सृष्ट्वेदम् अनुप्रविश्य ऋषिणा चक्रे पुर: शास्ति ता:

यम् सम्पद्य जहात् यजा मनुशयी सुप्त: कुलायम् यथा

तम् कैवल्य निरस्त योनिम् अभयम् ध्यायेद् अजस्रम् हरिम्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे सप्ता शीतितमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्द: अष्टा शीतितमो ऽध्याय :

स्कन्द- 10: अध्याय- 88

01 श्री राजो उवाच

देवासुर मनुष्येसु ये भजन्त् य शिवम् शिवम्

प्रायस्ते धनिनो भोजा न तु लक्ष्म्या: पतिम् हरिम्

02 एतद् वेदितु मिच्छाम: सन्देहो ऽत्र महान् हि न:

विरुद्ध शीलयो: प्रभ्वो: विरुद्धा भजताम् गति:

03 श्री शुक उवाच

शिव: शक्ति युत: शश्वत् त्रिलिङ्गो गुण सम्वृत:

वैकारिकस् तैजसश् च तामसश् चेत् यहम् त्रिधा

04 ततो विकारा अभवन् षोडशा मीषु कञ्चन

उपधावन् विभूतीनाम् सर्वासाम् अश्नुते गतिम्

05 हरिर्हि निर्गुण: साक्षात् पुरुष: प्रकृते: पर:

स सर्व दृग् उपद्रष्टा तम् भजन्निर् गुणो भवेत्

06 निवृत्तेषु अश्व मेधेषु राजा युष्मत् पितामह:

शृण्वन् भगवतो धर्मान् अपृच्छद् इदम् अच्युतम्

07 स आह भगवाम्स् तस्मै प्रीत: शुश् रूषवे प्रभु:

नृणाम् नि: श्रेय सार्थाय योऽव तीर्णो यदो: कुले

08 श्री भगवान् उवाच

यस्याहम् अनुगृह्णामि हरिष्ये तद् धनम् शनै:

ततो ऽधनम् त्यजन्त् यस्य स्वजना दु:ख दु:खितम्

09 स यदा वितथो द्योगो निर्विण्ण: स्याद् धने हया

मत् परै: कृतमै त्रस्य करिष्ये मद् अनुग्रहम्

10 तद् ब्रह्म परमम् सूक्ष्मम् चिन् मात्रम् सद् अनन्तकम्

11 अतो माम् सु दुरा राध्यम् हित्वान् यान् भजते जन:

ततस् त आशु तोषेभ्यो लब्ध राज्य श्रियोद् धता:

मत्ता: प्रमत्ता वरदान् विस्मयन्ति अवजानते

12 श्री शुक उवाच

शाप प्रसाद योरीशा ब्रह्म विष्णु शिवादय:

सद्य: शाप प्रसादोऽङ्ग शिवो ब्रह्मा न चाच् युत:

13 अत्र चोद् आहरन् तीमम् इतिहासम् पुरातनम्

वृकासुराय गिरिशो वरम् दत्त्वाप सङ्कटम्

14 वृको नामासुरः पुत्रः शकुनेः पथि नारदम्

दृष्ट्वाशु तोषम् पप्रच्छ देवेषु त्रिषु दुर्मतिः

15 स आह देवम् गिरिशम् उपाधा वाशु सिद्ध्यसि

यो ऽल्पाभ्याम् गुण दोषाभ्याम् आशु तुष्यति कुप्यति

16 दशास्य बाणयोस् तुष्टः स्तुवतोः वन्दिनोरिव

ऐश्वर्यम् अतुलम् दत्त्वा तत आप सुसङ्कटम्

17 इत् यादिष्टस् तम् असुर उपाधावत् स्व गात्रतः

केदार आत्म क्रव्येण जुह्वानो अग्निमुखम् हरम्

18 देवोप लब्धिम् अप्राप्य निर्वेदात् सप्तमे ऽहनि

शिरो ऽवृश् चत् स्व धितिना तत् तीर्थ क्लिन्न मूर्धजम्

19 तदा महा कारुणिक स धूर्जटिः यथा वयम् चाग्नि रिवोत्थि तोऽनलात्

निगृह्य दोर्भ्याम् भुज योर्न्य वारयत् तत् स्पर्शनाद् भूय उपस्कृता कृतिः

20 तमाह चाङ्गाल् अमलम् वृणीष्व मे यथाभि कामम् वितरामि ते वरम्

प्रीयेय तोयेन नृणाम् प्रपद् यताम् अहो त्व यात्मा भृशम् अर्द्यते वृथा

21 देवम् स वव्रे पापीयान् वरम् भूत भया वहम्

यस्य यस्य करम् शीर्ष्णि धास्ये स म्रियताम् इति

22 तच् छ्रुत्वा भगवान् रुद्रो दुर्मना इव भारत

ओम् इति प्रहसम्स् तस्मै ददे ऽहेर् अमृतम् यथा

23 इत् युक्तः सोऽसुरो नूनम् गौरी हरण लालसः

स तद् वर परीक्षार्थम् शम्भोर् मूर्ध्नि किलासुरः

स्व हस्तम् धातु मारेभे सो ऽबिभ्यत् स्व कृताच् छिवः

24 तेनोप सृष्टः सन्त्रस्तः पराधावन् स वेपथुः

यावद् अन्तम् दिवो भूमेः कष्ठानाम् उदगा दुदक्

25 अजानन्तः प्रति विधिम् तूष्णीम् आसन् सुरेश्वराः

ततो वैकुण्ठ मगमद् भास्वरम् तमसः परम्

26 यत्र नारायणः साक्षात्ः न्यासिनाम् परमो गतिः

शान्तानाम् न्यस्त दण्डानाम् यतो नावर्त ते गतः

27 तम् तथा व्यसनम् दृष्ट्वा भगवान् वृजिनार्दनः

दूरात् प्रत् युदियाद् भूत्वा बटुको योग मायया

28 मेखलाजिन दण्डाक्षैः तेजस् आग्निर् इव ज्वलन्

अभिवादया मास च तम् कुशपाणिर् विनीत वत्

29 श्री भगवान् उवाच

शाकुनेय भवान् व्यक्तम् श्रान्तः किम् दूर मागतः

क्षणम् विश्रम्य ताम् पुम्स आत्मायम् सर्व कामधुक्

30 यदि नः श्रवणा यालम् युष्मद् व्यवसितम् विभो

भण्यताम् प्रायशः पुम्भिः धृतैः स्वार्थान् समीहते

31 श्री शुक उवाच

एवम् भगवता पृष्टो वच सामृत वर्षिणा

गत क्लमो ऽब्रवीत् तस्मै यथा पूर्वम् अनुष्ठितम्

32 श्री भगवान् उवाच

एवम् चेत् तर्हि तद् वाक्यम् न वयम् श्रद्द धीमहि

यो दक्ष शापात् पैशाच्यम् प्राप्तः प्रेत पिशाच राट्

33 यदि वस्तत्र विश्रम्भो दान वेन्द्र जगद् गुरौ

तर् ह्यङ्गाशु स्व शिरसि हस्तम् न्यस्य प्रतीय ताम्

34 यदि असत्यम् वचः शम्भोः कथञ् चिद्दान वर्षभ

तदैनम् जह्य सद् वाचम् न यद् वक्ता नृतम् पुनः

35 इत्थम् भगवतश् चित्रैः वचोभिः स सुपेशलैः

भिन्नधीः विस्मृतः शीर्ष्णि स्व हस्तम् कुमतिर् न्यधात्

36 अथाप तद् भिन्न शिराः व्रजाहत इव क्षणात्

जय शब्दो नमः शब्दः साधु शब्दो ऽभवद् दिवि

37 मुमुचुः पुष्प वर्षाणि हते पापे वृकासुरे

देवर्षि पितृ गन्धर्वा मोचित: सङ्कटाच् छिव:

38 मुक्तम् गिरिशम् अभ्याह भगवान् पुरुषोत्तम:

अहो देव महादेव पापोऽयम् स्वेन पाप्मना

39 हत: को नु महत् स्वीश जन्तुर्वै कृत किल्बिष:

क्षेमी स्यात् किमु विश्वेशे कृता गस्को जगद् गुरौ

40 य एवम् अव्याकृत शक्त् युदन् वत: परस्य साक्षात् परमात्मनो हरे:

गिरित्र मोक्षम् कथयेच् छृणोति वा विमुच्यते सम्सृतिभि: तथारिभि:

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे अष्टा शीतितमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्द: एकोन नवतितमो ऽध्याय :

स्कन्द- 10: अध्याय- 89

01 श्री शुक उवाच

सरस्वत्यास् तटे राजन्: ऋषय: सत्रमासत

वितर्क: सम भूत् तेषाम् त्रिष् वधी शेषु को महान्

02 तस्य जिज्ञासया ते वै भृगुम् ब्रह्म सुतम् नृप

तज् ज्ञप्त्यै प्रेषया मासु: सोऽभ् यगाद् ब्रह्मण: सभाम्

03 न तस्मै प्रह्वणम् स्तोत्रम् चक्रे सत्त्व परीक्षया

तस्मै चुक्रोध भगवान् प्रज्वलन् स्वेन तेजसा

04 स आत्मन् युत्थितम् मन्युम् आत्मजा यात्म ना प्रभु:

अशीशमद् यथा वह्निम् स्व योन्या वारिणात् मभू:

05 ततः कैलासम् अगमत् स तम् देवो महेश्वरः

परिरब्धुम् समा रेभ उत्थाय भ्रातरम् मुदा

06 नैच्छत् त्वम् अस्युत् पथग इति देवश् चुकोप ह

शूल मुद्यम् य तम् हन्तुम् आरेभे तिग्म लोचनः

07 पतित्वा पादयोर् देवी सान्त्वया मास तम् गिरा

अथो जगाम वैकुण्ठम् यत्र देवो जनार्दनः

08 शयानम् श्रिय उत्सङ्गे पदा वक्षस्य ताडयत्

तत उत्थाय भगवान् सह लक्ष्म्या सताम् गतिः

09 स्व तल्पाद् अवरुह् याथ न नाम शिरसा मुनिम्

आह ते स्वागतम् ब्रह्मन्ः निषीद् आत्रा सने क्षणम्

अजानताम् आगतान् वः क्षन्तु मर्ह थ नः प्रभो

अतीव कोमळौ तात चरणौ ते महा मुने

इत् युक्त्वा विप्र चरणौ मर्दयन् स्वेन पाणिना

10 पुनीहि सहलोकम् माम् लोक पालाम्श् च मद् गतान्

पादोद केन भवतः तीर्थानाम् तीर्थ कारिणा

11 अद्याहम् भगवन् लक्ष्म्या आसम् एकान्त भाजनम्

वत्स्यत् युरसि मे भूतिः भवत् पाद हताम् हसः

12 श्री शुक उवाच

एवम् ब्रुवाणे वैकुण्ठे भृगुस् तन् मन्द्रया गिरा

निर्वृतस् तर्पितस् तूष्णीम् भक्त् युत् कण्ठो ऽश्रुलोचनः

13 पुनश् च सत्रमा व्रज्य मुनीनाम् ब्रह्म वादिनाम्

स्वानुभूत मशेषेण राजन् भृगुर वर्णयत्

14 तन् निशम्याथ मुनयो विस्मिता मुक्त सम्शयाः

भूयाम्सम् श्रद्दधुर् विष्णुम् यतः शान्तिर् यतो ऽभयम्

15 धर्मः साक्षाद् यतो ज्ञानम् वैराग्यम् च तदन् वितम्

ऐश्वर्यम् चाष्टधा यस्माद् यशश् चात्म मलापहम्

16 मुनीनाम् न्यस्त दण्डानाम् शान्तानाम् सम चेतसाम्

अकिञ्चनानाम् साधूनाम् यमाहुः परमाम् गतिम्

17 सत्त्वम् यस्य प्रिया मूर्तिः ब्राह्मणास् त्विष्ट देवताः

भजन्त्य नाशिषः शान्ता यम् वा निपुण बुद्धयः

18 त्रिविधा कृतयस् तस्य राक्षसा असुराः सुराः

गुणिन्या मायया सृष्टाः सत्त्वम् तत् तीर्थ साधनम्

19 श्री शुक उवाच

एवम् सारस्वता विप्रा नृणाम् सम्शय नुत्तये

पुरुषस्य पदाम्भोज सेवया तद् गतिम् गताः

20 श्री सूत उवाच

इत् येतन् मुनि तनयास्य पद्म गन्ध

पीयूषम् भव भयभित् परस्य पुम्सः

सुश्लोकम् श्रवण पुटैः पिबत्य भीक्ष्णम्

पान्थो ऽध्व भ्रमण परिश्रमम् जहाति

21 श्री शुक उवाच

एकदा द्वार वत्याम् तु विप्र पत्न्याः कुमारकः

जात मात्रो भुवम् स्पृष्ट्वा ममार किल भारत

22 विप्रो गृहीत्वा मृतकम् राज द्वारि उपधाय सः

इदम् प्रोवाच विलपन्ः आतुरो दीन मानसः

23 ब्रह्म द्विषः शठधियो लुब्धस्य विषयात्मनः

क्षत्र बन्धोः कर्म दोषात् पञ्चत्वम् मे गतो ऽर्भकः

24 हिम्सा विहारम् नृपतिम् दुःशीलम् अजितेन्द्रियम्

प्रजा भजन्त् यः सीदन्ति दरिद्रा नित्य दुःखिताः

25 एवम् द्वितीयम् विप्रर्षिः तृतीयम् त्वेवम् एव च

विसृज्य स नृप द्वारि ताम् गाथाम् सम गायत

26 ताम् अर्जुन उपश्रुत्य कर्हिचित् केशवान् तिके

परेते नवमे बाले ब्राह्मणम् सम भाषत

27 किम् स्विद् ब्रह्मन् त्वन् नि वासे इह नास्ति धनुर्धर:

राजन्य बन्धुर् एते वै ब्राह्मणा: सत्र आसते

28 धन दार् आत्मजा पृक्ता यत्र शोचन्ति ब्राह्मणा:

ते वै राजन् य वेषेण नटा जीवन्त् य सुम्भरा:

29 अहम् प्रजा: वाम् भगवन् रक्षिष्ये दीनयोरिह

अनिस्तीर्ण प्रतिज्ञो ऽग्निम् प्रवेक्ष्ये हत कल्मष:

30 श्री ब्राह्मण उवाच

सङ्कर्षणो वासुदेव: प्रद्युम्नो धन्विनाम् वर:

अनिरुद्धो ऽप्रतिरथो न त्रातुम् शक्नु वन्ति यत्

31 तत् कथम् नु भवान् कर्म दुष्करम् जगद् ईश्वरै:

चिकीर्षसि त्वम् बालिश्यात् तन् न श्रद्दध् महे वयम्

32 श्री अर्जुन उवाच

नाहम् सङ्कर्षणो ब्रह्मन् न कृष्ण: कार्ष्णिर् एव च

अहम् वा अर्जुनो नाम गाण्डीवम् यस्य वै धनु:

33 माव मम्स्था मम ब्रह्मन् वीर्यम् त्र्यम्बक तोषणम्

मृत्युम् विजित्य प्रधने आनेष्ये ते प्रजाम् प्रभो

34 एवम् विश्रम्भितो विप्र: फाल्गुनेन परन् तप

जगाम स्वगृहम् प्रीत: पार्थ वीर्यम् निशामयन्

35 प्रसूति काल आसन्ने भार्याया द्विज सत्तम:

पाहि पाहि प्रजाम् मृत्यो: इत् याह् आर्जुन मातुर:

36 स उपस्पृश्य शुच्यम्भो नमस् कृत्य महेश्वरम्

दिव्यानि अस्त्राणि सम्स्मृत्य सज्यम् गाण्डीवम् आददे

37 न्यरुणत् सूतिका गारम् शरै: नान् आस्त्र योजितै:

तिर्य गूर्ध्वम् अध: पार्थ: चकार शर पञ्जरम्

38 तत: कुमार: सञ्जाटो विप्र पत्न्या रुदन् मुहु:

सद्यो ऽदर्शन मापेदे स शरीरो विहायसा

39 तदाह विप्रो विजयम् विनिन्दन् कृष्ण सन्निधौ

मौढ्यम् पश्यत मे योऽहम् श्रद्दधे क्लीब कत्थनम्

40 न प्रद्युम्नो न अनिरुद्धो न रामो न च केशवः

यस्य शेकुः परित्रातुम् को ऽन्यस्तद् अवितेश्वरः

41 धिगर्जुनम् मृषा वादम् धिगात्म श्लाघिनो धनुः

दैवोप सृष्टम् यो मौढ्याद् आनिनी षति दुर्मतिः

42 एवम् शपति विप्रर्षौ विद्याम् आस्थाय फाल्गुनः

ययौ सम्य मनी माशु यत्रास् ते भगवान् यमः

43 विप्रा पत्यम् अचक्षाणस् तत ऐन्द्रीम् अगात्पुरीम्

आग्नेयीम् नैरृतीम् सौम्याम् वायव्याम् वारुणी मथ

44 रसातलम् नाक पृष्ठम् धिष्ण्यान् यन्यान् युदायुधः

ततो ऽलब्ध द्विज सुतो ह्यनिस् तीर्ण प्रति श्रुतः

अग्निम् विविक्षुः कृष्णेन प्रत् युक्तः प्रतिषे धता

45 दर्शये द्विज सूनूम्स् ते माव ज्ञात्मान मात्मना

ये ते नः कीर्तिम् विमलाम् मनुष्याः स्थापयिष् यन्ति

46 इति सम्भाष्य भगवान् अर्जुनेन सहेश्वरः

दिव्यम् स्व रथम् आस्थाय प्रतीचीम् दिशम् आविशत्

47 सप्त द्वीपान् सप्त सिन्धून् सप्त सप्त गिरीनथ

लोका लोकम् तथा तीत्य विवेश सु महत् तमः

48 तत् राश्वाः शैब्य सुग्रीव मेघ पुष्प बला हकाः

तमसि भ्रष्ट गतयो बभूवुः भरतर्षभ

49 तान् दृष्ट्वा भगवान् कृष्णो महा योगेश् वरेश्वरः

सहस्राद् इत्य सङ्काशम् स्व चक्रम् प्राहिणोत् पुरः

50 तमः सुघोरम् गहनम् कृतम् महद्

विदारयद् भूरि तरेण रोचिषा

मनोजवम् निर्वि विशे सुदर्शनम्

गुण् अच्युतो रामशरो यथा चमूः

51 द्वारेण चक्रानु पथेन तत् तमः परम् परम् ज्योतिर् अनन्त पारम्

समश्नु वानम् प्रस मीक्ष्य फाल्गुनः प्रताडि ताक्षो अपिदधे ऽक्षिणी उभे

52 ततः प्रविष्टः सलिलम् नभस्वता बलीयसै जद् बृहदूर्मि भूषणम्

तत् राद्भुतम् वै भवनम् द्युमत् तमम् भ्राजन् मणिस्तम्भ सहस्र शोभितम्

53 तस्मिन् महा भीमम् अनन्तम् अद्भुतम्

सहस्र मूर्धन्य फणा मणि द्युभिः

विभ्राज मानम् द्वि गुणोल्ब णेक्षणम्

सिताच लाभम् शिति कण्ठ जिह्वम्

54 ददर्श तद् भोग सुखासनम् विभुम्

महानु भावम् पुरुषोत्त मोत्तमम्

सान्द्राम्बु दाभम् सु पिशङ्ग वाससम्

प्रसन्न वक्त्रम् रुचिराय तेक्षणम्

55 महा मणि व्रात किरीट कुण्डल

प्रभा परिक्षिप्त सहस्र कुन्तलम्

प्रलम्ब चार्वष्ट भुजम् स कौस्तुभम्

श्री वत्स लक्ष्मम् वन मालया वृतम्

56 सुनन्द नन्द प्रमुखैः स्व पार्षदैः

चक्रादिभिर् मूर्ति धरैर् निजायुधैः

पुष्ट्या श्रिया कीर्त् यजया किलर्द्धि भिर्

निषेव्य माणम् परमेष्ठिनाम् पतिम्

57 ववन्द आत्मानम् अनन्तम् अच्युतो जिष्णुश् च तद् दर्शन जात साध् वसः

तावाह भूमा परमेष्ठिनाम् प्रभुः बद्धाञ्जली सस् मित मूर्जया गिरा

58 द्विजात्मजा मे युवयोर्दि दृक्षुणा मयोप नीता भुवि धर्म गुप्तये

कलाव तीर्णाव वनेर् भरा सुरान् हत्वेह भूयस् त्वर येत मन्ति मे

59 पूर्ण कामौ अपि युवाम् नर नारायणा वृषी

धर्म माचर ताम् स्थित्यै ऋषभौ लोक सङ्ग्रहम्

60 इत् यादिष्टौ भगवता तौ कृष्णौ परमेष्ठिना

ओम् इत् यानम्य भूमानम् आदाय द्विज दारकान्

61 न्यवर्तताम् स्वकम् धाम सम्प्र हृष्टौ यथा गतम्

विप्राय ददतुः पुत्रान् यथा रूपम् यथावयः

62 निशाम्य वैष्णवम् धाम पार्थः परम विस्मितः

यत् किञ्चित् पौरुषम् पुम्साम् मेने कृष्णानु कम्पितम्

63 इती दृशानि अनेकानि वीर्याणी ह प्रदर्शयन्

बुभुजे विषयान् ग्राम्यान् ईजे चात्युर् जितैर् मखैः

64 प्रव वर्ष् आखिलान् कामान् प्रजासु ब्राह्मणा दिषु

यथा कालम् यथै वेन्द्रो भगवान् श्रैष्ठ्य मास्थितः

65 हत्वा नृपान् अधर्मिष्ठान् घात यित् वार्जुना दिभिः

अञ्जसा वर्तया मास धर्मम् धर्म सुता दिभिः

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे एकोन नवतितमो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ दशम स्कन्दः नवतितमो ऽध्याय :

स्कन्द- 10: अध्याय- 90

01 श्री शुक उवाच

सुखम् स्व पुर्याम् निवसन् द्वारकायाम् श्रियः पतिः

सर्व सम्पत् समृद्धायाम् जुष्टायाम् वृष्णि पुङ्गवै:

02 स्त्रीभिश् चोत्तम वेषाभि: नव यौवन कान्तिभि:

कन्दु कादिभिर् हर्म्येषु क्रीडन्ती भिस् तडिद् द्युभि:

03 नित्यम् सङ्कुल मार्गायाम् मद् अच्युद्भिर् मतङ्गजै:

04 स्वलङ्कृतैर् भटैर् अश्वै रथैश् च कनकोज् ज्वलै:

उद्यानो उपवनाढ् यायाम् पुष्पित द्रुम राजिषु

05 निर्विशद् भृङ्ग विहगै: नादितायाम् समन्तत:

रेमे षोडश साहस्र पत्नीनाम् एक वल्लभ:

06 तावद् विचित्र रूपोऽसौ तद् गेहेषु महर्द्धिषु

प्रोत् फुल्लोत्पल कह्लार कुमुदाम् भोज रेणुभि:

07 वासिताम लतो येषु कूजद् द्विज कुलेषु च

विजहार विगाह् याम्भो ह्रदि नीषु महोदय:

कुच कुङ्कुम लिप्ताङ्ग: परिरब्धश् च योषिताम्

08 उपगीयमानो गन्धर्वै: मृदङ्ग पण वानकान्

वाद यद्भिर् मुदा वीणाम् सूत मागध वन्दिभि:

09 सिच्यमानो ऽच्युत स्ताभि: हसन्तीभि: स्म रेचकै:

प्रति षिञ्चन् विचिक्रीडे यक्षीभि: यक्ष राडिव

10 ता: क्लिन्न वस्त्र विवृतोरु कुच प्रदेशा:

सिञ्चन्त्य उद्धृत बृहत् कवर प्रसूना:

कान्तम् स्म रेचक जिहीरषय योप गुह्य

जात स्मरोत् सव लसद् वदना विरेजु:

11 कृष्णस्तु तत् स्तन विषज् जित कुङ्कुम स्रक्

क्रीडाभि षङ्ग धुत कुन्तल वृन्द बन्ध:

सिञ्चन् मुहुर् युवतिभि: प्रति षिच्य मानो

रेमे करेणुभिर् इवेभ पति: परीत:

12 नटानाम् नर्तकी नाम् च गीत वाद्योप जीविनाम्

क्रीड् आलङ्कार वासाम्सि कृष्णो ऽदात् तस्य च स्त्रियः

13 कृष्णस् यैवम् विहरतो गत्या लापे क्षित स्मितैः

नर्मक्ष्वेलि परिष्वङ्गैः स्त्रीणाम् किल हृता धियः

14 ऊचुर् मुकुन्दैक धियो गिर उन्मत्त वज् जडम्

चिन्तयन्त्यो ऽरविन्दाक्षम् तानि मे गदतः शृणु

15 महिष्य ऊचुः

कुररि विलपसि त्वम् वीत निद्रा न शेषे

स्वपिति जगति रात्र्याम् ईश्वरो गुप्त बोधः

वयम् इव सखि कच्चिद् गाढ निर्भिन्न चेता

नळिन नयन हासो दार लीलेक्षि तेन

16 नेत्रे निमीलयसि नक्तम् अदृष्ट बन्धुः

त्वम् रोरवीषि करुणम् बत चक्र वाकि

दास्यम् गत वयम् इवाच्युत पाद जुष्टाम्

किम् वा स्रजम् स्पृहयसे कवरेण वोढुम्

17 भो भोः सदा निष्टनसे उदन्वन् अलब्ध निद्रो ऽधिगत प्रजागरः

किम्वा मुकुन्दा प हृतात्म लाञ्छनः प्राप्ताम् दशाम् त्वम् च गतो दुरत्ययाम्

18 त्वम् यक्ष्मणा बल वतासि गृहीत इन्दो

क्षीणस् तमो न निज दीधितिभिः क्षिणोषि

कच्चिन् मुकुन्द गदितानि यथा वयम् त्वम्

विस्मृत्य भोः स्थगि तगीर् उपलक्ष्य से नः

19 किम् त्वा चरितम् अस्माभिः मलयानिल ते ऽप्रियम्

गोविन्दा पाङ्ग निर्भिन्ने हृदी रयसि नः स्मरम्

20 मेघ श्री मम् स्त्वमसि दयितो याद वेन्द्रस्य नूनम्

श्री वत् साङ्कम् वयमिव भवान् ध्यायति प्रेम बद्धः

अत्युत् कण्ठः शवल हृदयो ऽस्मद् विधो बाष्प धाराः

स्मृत्वा स्मृत्वा विसृजसि मुहुः दुःख दस् तत् प्रसङ्गः

21 प्रिय राव पदानि भाषसे मृत सञ्जीविक यानया गिरा

करवाणि किमद् य ते प्रियम् वद मे वल्गित कण्ठा कोकिल

22 न चलसि न वदस् युदार बुद्धे क्षिति धर चिन्तयसे महान्त मर्थम्

अपि बत वसुदेव नन्द नाङ्घ्रिम् वयमिव कामयसे स्तनैर् विधर्तुम्

23 शुष्यद् ह्रदाः करशिता बत सिन्धु पत्न्यः

सम्प्रत्य पास्त कमल श्रिय इष्ट भर्तुः

यद् वद्वयम् मधु पतेः प्रणयाव लोकम्

अप्राप्य मुष्ट ह्रदयाः पुरु कर्शिताः स्म

24 हम्स स्वागतम् आस्यताम् पिब पयो ब्रूह् यङ्ग शौरेः कथाम्

दूतम् त्वाम् नु विदाम कच्चिद् अजितः स्वस्त् यास्त उक्तम् पुरा

किम् वा नश्चल सौहृदः स्मरति तम् कस्माद् भजामो वयम्

क्षौद्रा लापय कामदम् श्रिय मृते सैवैक निष्ठा स्त्रियाम्

25 श्री शुक उवाच

इती दृशेन भावेन कृष्णे योगेश् वरेश्वरे

क्रियमाणेन माधव्यो लेभिरे परमाम् गतिम्

26 श्रुत मात्रोऽपि यः स्त्रीणाम् प्रसह्या कर्षते मनः

उरुगायोरु गीतो वा पश्यन् तीनाम् कुतः पुनः

27 याः सम्पर् यचरन् प्रेम्णा पाद सम्वाह नादिभिः

जगद् गुरुम् भर्तृ बुद्ध्या तासाम् किम् वर्ण्यते तपः

28 एवम् वेदोदितम् धर्मम् अनुतिष्ठन् सताम् गतिः

गृहम् धर्मार्थ कामानाम् मुहुश्चा दर्श यत् पदम्

29 आस्थितस्य परम् धर्मम् कृष्णस्य गृह मेधिनाम्

आसन् षोडश साहस्रम् महिष्यश् च शताधिकम्

30 तासाम् स्त्री रत्न भूतानाम् अष्टौ याः प्रागुदा हृताः

रुक्मिणी प्रमुखा राजन्ः तत् पुत्राश् चानु पूर्वशः

31 एकैकस्याम् दश दश कृष्णो ऽजीजन दात्मजान्

यावत्य आत्मनो भार्या अमोघ गतिर् ईश्वरः

32 तेषाम् उद्दाम वीर्याणाम् अष्टा दश महारथाः

आसन् उदार यशसस् तेषाम् नामानि मे शृणु

33 प्रद्युम्नश् चानिरुद् धश् च दीप्तिमान् भानुरेव च

साम्बो मधुर् बृहद् भानुश् चित्र भानुर् वृको ऽरुणः

34 पुष्करो वेद बाहुश् च श्रुत देवः सुनन्दनः

चित्र बाहुर् विरूपश् च कविर् न्यग्रोध एव च

35 एतेषाम् अपि राजेन्द्र तनु जानाम् मधु द्विषः

प्रद्युम्न आसीत् प्रथमः पितृ वद् रुक्मिणी सुतः

36 स रुक्मिणो दुहितरम् उपयेमे महा रथः

तस्मत् सुतो ऽनिरुद्धो ऽभूत् नागायुत बलान् वितः

37 स चापि रुक्मिणः पौत्रीम् दौहित्रो जगृहे ततः

वज्रस् तस्या भवद् यस्तु मौषलाद् अवशेषितः

38 प्रतिबाहुर् अभूत् तस्मात् सुबाहुस् तस्य चात्मजः

सुबाहोः शान्त सेनो ऽभूच् छत सेनस्तु तत् सुतः

39 न ह्ये तस्मिन् कुले जाता अधना अबहुप्रजाः

अल्पायुषो ऽल्प वीर्याश् च अब्रह्मण्याश् च जज्ञिरे

40 यदु वम्श प्रसूतानाम् पुम्साम् विख्यात कर्मणाम्

सङ्ख्या न शक्यते कर्तुम् अपि वर्षायुतैर् नृप

41 तिस्रः कोट्यः सहस्राणाम् अष्टाशीति शतानि च

आसन् यदु कुलाचार्याः कुमाराणाम् इति श्रुतम्

42 सङ्ख्यानम् यादवानाम् कः करिष्यति महात्मनाम्

यत्रायु तानाम् अयुत लक्षेणास् ते स आहुकः

43 देवा सुरा ह वहता दैतेया ये सुदारुणाः

ते चोत् पन्ना मनुष् येषु प्रजा दृप्ता बबाधिरे

44 तन्नि ग्रहाय हरिणा प्रोक्ता देवा यदोः कुले

अवतीर्णाः कुलशतम् तेषाम् एकाधिकम् नृप

45 तेषाम् प्रमाणम् भगवान् प्रभुत् वेनाभ वद् धरिः

ये चानु वर्तिनस् तस्य ववृधुः सर्व यादवाः

46 शय् यास नाटना लाप क्रीडा स्नानादि कर्मसु

न विदुः सन्तम् आत्मानम् वृष्णयः कृष्ण चेतसः

47 तीर्थम् चक्रे नृपोनम् यदजनि यदुषु स्वः सरित् पाद शौचम्

विद्विट् स्निग्धाः स्वरूपम् ययुर् अजित पर श्री र् यदर्थे ऽन्य यत्नः

यन् नामा मङ्गलघ्नम् श्रुतम् अथ गदितम् यत् कृतो गोत्र धर्मः

कृष्णस्यै तन्न चित्रम् क्षितिभर हरणम् काल चक्रायु धस्य

48 जयति जननि वासो देवकी जन्म वादो

यदु वर पर्षत्स्वैर् दोर्भिर् अस्यन् अधर्मम्

स्थिर चर वृजि नघ्नः सुस्मित श्री मुखेन

व्रज पुर वनितानाम् वर्धयन् काम देवम्

49 इत्थम् परस्य निज वर्त्म रिरक्ष यात्त

लीला तनोः तद् अनुरूप विडम्बनानि

कर्माणि कर्म कषणानि यदूत्त मस्य

श्रूयाद मुष्य पदयोः अनु वृत्ति मिच्छन्

50 मर्त्यः तयानु सवमेधि तया मुकुन्द

श्री मत् कथा श्रवण कीर्तन चिन्त यैति

तद् धाम दुस्तर कृतान् त जवाप वर्गम्

ग्रामाद् वनम् क्षिति भुजो ऽपि ययुर् यदर्थाः

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

दशम स्कन्दे उत्तरार्दे नवतितमो ऽध्याय ः॥

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

श्रीमद् भागवतम्

अथ एकादश स्कन्दः प्रथमो ऽध्याय :

स्कन्द- 11: अध्याय- 01

01 श्री बादरायणिर् उवाच

कृत्वा दैत्य वधम् कृष्णः सरामो यदुभिर् वृतः

भुवो ऽवतार यद् भारम् जविष्ठम् जनयन् कलिम्

02 ये कोपिताः सुबहु पाण्डु सुताः सपत्नैर्

दुर्द्यूत हेलन कच ग्रहणादि भिस्तान्

कृत्वा निमित्तम् इतरेत रतः समेतान्

हत्वा नृपान् निरहरत् क्षिति भार मीशः

03 भू भार राज पृतना यदुभिर् निरस्य

गुप्तैः स्व बाहुभिर् अचिन्त यद् अप्रमेयः

मन्ये ऽवनेर् ननु गतो ऽप्य गतम् हि भारम्

यद् यादवम् कुलमहो अविषह्य मास्ते

04 नैवान् यतः परिभवो ऽस्य भवेत् कथञ्चित्

मत् सम्श्रयस् य विभवोन् नहनस्य नित्यम्

अन्तः कलिम् यदु कुलस्य विधाय वेणु

स्तम्बस्य वह्निमिव शान्तिम् उपैमि धाम

05 एवम् व्यवसितो राजन् सत्य सङ्कल्प ईश्वरः

शाप व्याजेन विप्राणाम् सञ्जह्रे स्वकुलम् विभुः

06 स्व मूर्त्या लोक लावण्य निर् मुक्त्या लोचनम् नृणाम्

गीर्भिस्ताः स्मरताम् चित्तम् पदैस्तान् ईक्षताम् क्रियाः

07 आच्छिद्य कीर्तिम् सुश् लोकाम् वितत्य ह्यञ्जसा नु कौ

तमो ऽनया तरिष्यन् तीति अगात्स्वम् पदम् ईश्वरः

08 श्री राजो उवाच

ब्रह्मण् यानाम् वदान् यानाम् नित्यम् वृद्धोप सेविनाम्

विप्र शापः कथम् अभूद् वृष्णीनाम् कृष्ण चेतसाम्

09 यन् निमित्तः स वै शापो यादृशो द्विज सत्तम

कथम् एकात्मनाम् भेद एतत् सर्वम् वदस्व मे

10 श्री शुक उवाच

बिभ्रद् वपुः सकल सुन्दर सन्निवेशम्

कर्माचरन् भुवि सुमङ्गलम् आप्तकामः

आस्थाय धाम रममाण उदार कीऋतिः

सम् हर्तु मैच्छत कुलम् स्थित कृत्य शेषः

11 कर्मानि पुण्य निवहानि सुमङ्गलानि

गायज् जगत् कलिमला पह राणि कृत्वा

कालात्मना निवसता यदु देव गेहे

पिण्डारकम् समगमन् मुनयो निसृष्टाः

12 विश्वामित्रो ऽसितः कण्वो

दुर्वासा भृगुर् अङ्गिराः

कश्यपो वामदेवो ऽत्रिर्

वसिष्ठो नारदा दयः

13 क्रीडन् तस् तान् उपव्रज्य कुमारा यदु नन्दनाः

उप सङ्गृह्य पप्रच्छुर् अविनीता विनीत वत्

14 ते वेष यित्वा स्त्री वेषैः साम्बम् जाम्बवती सुतम्

एषा पृच्छति वो विप्रा अन्तर् वत्नि असि तेक्षणा

15 प्रष्टुम् विलज्जती साक्षात् प्रब्रूता मोघ दर्शनाः

प्रसोष् यन्ती पुत्र कामा किम् स्वित् सञ्जन यिष्यति

16 एवम् प्रलब्धा मुनयः तान् ऊचुः कुपिता नृप

जनयिष् यति वो मन्दा मुसलम् कुल नाशनम्

17 तच् छ्रुत्वा ते ऽति सन्त्रस्ता विमुच्य सह सोदरम्

साम्बस्य ददृशुस् तस्मिन् मुसलम् खल्व् अयस्मयम्

18 किम् कृतम् मन्द भाग्यैर् नः किम् वदिष् यन्ति नो जनाः

इति विह्वलिता गेहान् आदाय मुसलम् ययुः

19 तच् चोप नीय सदसि परिम्लान मुख श्रियः

राज्ञ आवेदयाम् चक्रुः सर्व यादव सन्निधौ

20 श्रुत्वा मोघम् विप्र शापम् दृष्ट्वा च मुसलम् नृप

विस्मिता भय सन्त्रस् ता बभूवुः द्वार कौकसः

21 तच् चूर्ण यित्वा मुसलम् यदु राजः स आहुकः

समुद्र सलिले प्रास्यल् लोहम् चास्याव शेषितम्

22 कश्चिन् मत्स्यो ऽग्रसील् लोहम् चूर्णानि तरलैस् ततः

उह्य मानानि वेलायाम् लग्ना न्यासन् किलैरकाः

23 मत्स्यो गृहीतो मत्स् यघ्नैर् जाले नान्यैः सहार्णवे

तस् योदर गतम् लोहम् स शल्ये लुब्ध को ऽकरोत्

24 भगवान् ज्ञात सर्वार्थ ईश्वरो ऽपि तद् अन्यथा

कर्तुम् नैच्छद् विप्र शापम् काल रूपि अन्व मोदत

✐✎✑☸✡☩ ✤ ✣ ✦ ✧ ✩ ✫ ✬✭ ✮ ✰ ✱ ✲ ✳ ❃ ❂ ❁❀ ✿ ✶ ✴ ❄ ❉ ❋ ❖☆☸✑✎✐

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

एकादश स्कन्दे प्रथमो ऽध्याय ः॥

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

✐✎✑☸✡☩ ✤ ✣ ✦ ✧ ✩ ✫ ✬✭ ✮ ✰ ✱ ✲ ✳ ❃ ❂ ❁❀ ✿ ✶ ✴ ❄ ❉ ❋ ❖☆☸✑✎✐

अथ एकादश स्कन्दः द्वितीयो ऽध्याय ः

स्कन्द- *11:* अध्याय- *02*

*01* श्री शुक उवाच

गोविन्द भुज गुप्तायाम् द्वार वत्याम् कुरूद् वह

अवात्सीन् नारदो ऽभीक्ष्णम् कृष्णो *[उ]*पासन लालस:

*02* को नु राजन् इन्द्रियवान् मुकुन्द चरण् आम्बुजम्

न भजेत् सर्वतो मृत्यु: उपास्यम् अमरोत्तमै:

*03* तम् एकदा तु देवर्षिम् वसुदेवो गृहा गतम्

अर्चितम् सुखम् आसीनम् अभिवाद् येद् अमब्रवीत्

*04* श्री वसुदेव उवाच

भगवन् भवतो यात्रा स्वस्तये सर्व देहिनाम्

कृपणानाम् यथा पित्रो: उत्तम श्लोक वर्त्मनाम्

*05* भूतानाम् देव चरितम् दु:खा य च सुखा य च

सुखा यैव हि साधूनाम् त्वा दृशाम् अच्युत् आत्मनाम्

*06* भजन्ति ये यथा देवान् देवा अपि तथैव तान्

छायेव कर्म सचिवा: साधवो दीन वत्सला:

*07* ब्रह्मम्स् त थापि पृच्छामो धर्मान् भागवताम्स् तव

यान् श्रुत्वा श्रद्धया मर्त्यो मुच्यते सर्वतो भयात्

*08* अहम् किल पुरानन्तम् प्रजार्थो भुवि मुक्तिदम्

अपूजयम् न मोक्षाय मोहितो देव मायया

*09* यथा विचित्र व्यसनाद् भवद्भि: विश्वतो भयात्

मुच् येम ह्यञ्जसै वाद्धा तथा न: शाधि सु व्रत

*10* श्री शुक उवाच

राजन् नेवम् कृत प्रश्नो वसुदेवेन धीमता

प्रीतस्तम् आह देवर्षि: हरे: सम्स्मारितो गुणै:

*11* श्री नारद उवाच

सम्य गे तद् व्यवसितम् भवता सात्व तर्षभ

यत् पृच्छसे भागवतान् धर्मान्स् त्वम् विश्व भावनान्

12 श्रुतो ऽनुपठितो ध्यात आदृतो वानु मोदितः

सद्यः पुनाति सद् धर्मो देव विश्व द्रुहो ऽपि हि

13 त्वया परम कल्याणः पुण्य श्रवण कीर्तनः

स्मारितो भगवान् अद्य देवो नारायणो मम

14 अत्राप् युदाहरन् तीमम् इतिहासम् पुरातनम्

आर्ष भाणाम् च सम्वादम् विदेहस्य महात् मनः

15 प्रिय व्रतो नाम सुतो मनोः स्वायम्भु वस्य यः

तस् याग्नी ध्रस् ततो नाभिः ऋषभस् तत् सुतः स्मृतः

16 तम् आहुर् वासुदेव् आम्शम् मोक्ष धर्म विवक्षया

अवतीर्णम् सुत शतम् तस्यासीद् ब्रह्म पारगम्

17 तेषाम् वै भरतो ज्येष्ठो नारायण परायणः

विख्यातम् वर्षमे तद् यन् नाम्ना भारतम् अद्भुतम्

18 स भुक्त भोगाम् त्यक् त्वेमाम् निर्गतस् तपसा हरिम्

उपासीनस् तत् पदवीम् लेभे वै जन्मभिस् त्रिभिः

19 तेषाम् नव नव द्वीप पतयो ऽस्य समन् ततः

कर्म तन्त्र प्रणेतार एकाशीतिर् द्विजा तयः

20 नवा भवन् महा भागा मुनयो ह्यर्थ शम्सिनः

श्रमणा वात रसना आत्म विद्या विशारदाः

21 कविर् हविर् अन्तरीक्षः प्रबुद्धः पिप्पलायनः

आविर्होत्रो ऽथ द्रुमिलः चमसः करभाजनः

22 त एते भगवद् रूपम् विश्वम् सद सद् आत्मकम्

आत्मनो ऽव्यति रेकेण पश्यन्तो व्यचरन् महीम्

23 अव्याह तेष्ट गतयः सुरसिद् धसाध्य

गन्धर्व यक्ष नर किन्नर नाग लोकान्

मुक्ताः चरन्ति मुनि चारण भूत नाथ

विद्या धरद् विजगवाम् भुवनानि कामम्

24 त एकदा निमेः सत्रम् उपजग्मुर् यदृच् छया

विताय मानम् ऋषिभिः अजनाभे महात्मनः

25 तान् दृष्ट्वा सूर्य सङ्काशान् महा भागवतान् नृप

यजमानो ऽग्नयो विप्राः सर्व एवो पतस् थिरे

26 विदेह स्तान भिप्रेत्य नारायण परायणान्

प्रीतः सम् पूजयान् चक्रे आसनस् थान् यथार् हतः

27 तान् रोचमानान् स्व रुचा ब्रह्म पुत्रो पमान् नव

पप्रच्छ परम प्रीतः प्रश्रया वन तो नृपः

28 श्री विदेह उवाच

मन्ये भगवतः साक्षात् पार्षदान् वो मधु द्विसः

विष्णोर् भूतानि लोकानाम् पावनाय चरन्ति हि

29 दुर्लभो मानुषो देहो देहिनाम् क्षण भङ्गुरः

तत् रापि दुर्लभम् मन्ये वैकुण्ठ प्रिय दर्शनम्

30 अत आत् यन्तिकम् क्षेमम् पृच्छामो भवतो ऽनघाः

सम्सारे ऽस्मिन् क्षणार् धोऽपि सत् सङ्गः शेव धिर् नृणाम्

31 धर्मान् भागवतान् ब्रूत यदि नः श्रुतये क्षमम्

यैः प्रसन्नः प्रपन्ना य दास्यत् यात्मानम् अप्यजः

32 श्री नारद उवाच

एवम् ते निमिना पृष्टा वसुदेव महत् तमाः

प्रति पूज्या ब्रुवन् प्रीत्या स सदस् यर्त् विजम् नृपम्

33 श्री कविर् उवाच

मन्ये ऽकुतश् चिद् भयम् अच्युतस्य पाद् आम्बुजो पासन मत्र नित्यम्

उद्विग्न बुद्धेः असद् आत्म भावाद् विश्वात्मना यत्र निवर्त ते भीः

34 ये वै भगवता प्रोक्ता उपाया ह्यात्म लब्धये

अञ्जः पुम्साम् अविदुषाम् विद्धि भागवतान् हि तान्

35 यान् आस्थाय नरो राजन् न प्रमाद् येत कर्हिचित्

धावन् निमील्य वा नेत्रे न स्खलेन् न पते दिह

36 कायेन वाचा मनसेन्द्रि यैर्वा बुद्ध् यात्म नावानु सृत स्व भावात्

करोति यद् यत् सकलम् परस्मै नारायणा येति समर्प येत् तत्

37 भयम् द्वितीयाभि निवेश तः स्याद् ईशाद् अपेतस्य विपर्य यो ऽस्मृतिः

तन् मायया तो बुध आभजेत् तम् भक्त्यैक येशम् गुरु देवत् आत्मा

38 अविद्य मानो ऽप्यव भाति हि द्वयो ध्यातुर् धिया स्वप्न मनोर् अथौ यथा

तत् कर्म सङ्कल्प विकल्पकम् मनो बुधो निरुन्ध्याद् अभयम् ततः स्यात्

39 शृण्वन् सुभद्राणि रथाङ्ग पाणेः जन्मानि कर्माणि च यानि लोके

गीतानि नामानि तद् अर्थकानि गायन् विलज्जो विचरेद् असङ्गः

40 एवम् व्रतः स्व प्रिय नाम कीर्त्या जातानु रागो द्रुत चित्त उच्चैः

हसत् यथो रोदिति रौति गायति उन्मादवन् नृत्य ति लोक बाह्यः

41 खम् वायुम् अग्निम् सलिलम् महीम् च ज्योतीम्षि सत् त्वानि दिशो द्रुमादीन्

सरित् समुद्राम्श् च हरेः शरीरम् यत्किम् च भूतम् प्रणमेद् अनन्यः

42 भक्तिः परेशानु भवो विरक्तिः अन्यत्र चैष त्रिक एक कालः

प्रपद्य मानस्य यथाश्न तः स्युस् तुष्टिः पुष्टिः क्षुद पायो ऽनुघासम्

43 इत् यच्युताङ्घ्रिम् भजतो ऽनु वृत्त्या भक्तिर् विरक्तिः भगवत् प्रबोधः

भवन्ति वै भागवतस् य राजन्ः ततः पराम् शान्तिम् उपैति साक्षात्

44 श्री राजो उवाच

अथ भागवतम् ब्रूत यद् धर्मो या दृशो नृणाम्

यथा चरति यद् ब्रूते यैर् लिङ्गैर् भगवत् प्रियः

45 श्री हविर् उवाच

सर्व भूतेषु यः पश्येद् भगवद् भावम् आत्मनः

भूतानि भगवत् यात्मनि एष भागव तोत्तमः

46 ईस्वरे तद् अधी नेषु बालिशेषु द्विषत् सु च

प्रेम मैत्री कृपो पेक्षा यः करोति स मध्यमः

47 अर्चायाम् एव हरये पूजाम् य: श्रद्ध ये हते

न तद् भक्तेषु चान्येषु स भक्त: प्राकृत: स्मृत:

48 गृहीत्वा पीन्द्रियैर् अर्थान् यो न द्वेष्टि न हृष्यति

विष्णोर् मायाम् इदम् पश्यन् स वै भागव तोत्तम:

49 देहेन्द्रिय प्राण मनो धियाम् यो जन्माप्य यक्षुद् भय तर्ष कृच्छ्रै:

सम्सार धर्मै: अवि मुह्य मान: स्मृत्या हरे: भागवत प्रधान:

50 न काम कर्म बीजानाम् यस्य चेतसि सम्भव:

वासुदेवै क निलय: स वै भागवतोत् तम:

51 न यस्य जन्म कर्मभ्याम् न वर्णाश्रम जातिभि:

सज्जते ऽस्मिन् अहम् भावो देहे वै स हरे: प्रिय:

52 न यस्य स्व: पर इति वित्तेषु आत्मनि वा भिदा

सर्व भूत सम: शान्त: स वै भागव तोत्तम:

53 त्रिभुवन विभव हेतवे ऽप्य कुण्ठ

स्मृतिर् अजितात्म सुरादिभिर् विमृग्यात्

न चलति भगवत् पदार विन्दात्

लव निमिषार्धम् अपि य: स वैष्णवा ग्र्य:

54 भगवत उरु विक्रमाङ्घ्रि शाखा नख मणि चन्द्रिक या निरस्त तापे

हृदि कथम् उपसीद ताम् पुन: स प्रभवति चन्द्र इवोदिते ऽर्कता प:

55 विसृजति हृदयम् न यस्य साक्षाद् हरि रवशाभि हितो ऽपि अघौ घनाश:

प्रणय रसनया धृताङ्घ्रि पद्म: स भवति भागवत प्रधान उक्त:

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

एकादश स्कन्दे द्वितीयो ऽध्याय :॥

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ एकादश स्कन्दः त्रुतीयो ऽध्याय :

स्कन्द- 11: अध्याय- 03

01 श्री राजो उवाच

परस्य विष्णोर् ईशस् य मायिनाम् अपि मोहिनीम्

मायाम् वेद् इतुमिच् छामो भगवन् तो ब्रुवन्तु नः

02 नानु तृप्ये जुषन् युष्मद् वचो हरि कथा मृतम्

सम्सार ताप निस्तप्तो मर्त्यस् तत् ताप भेषजम्

03 श्री अन्तरीक्ष उवाच

एभिर् भूतानि भूत् आत्मा महा भूतैर् महाभुज

स सर्जोच् चाव चान् याद्यः स्वमात् रात्म प्रसिद्धये

04 एवम् सृष्टानि भूतानि प्रविष्टः पञ्च धातुभिः

एकधा दश धात्मानम् विभजन् जुषते गुणान्

05 गुणैर् गुणान् स भुञ्जान आत्म प्रद्योति तैः प्रभुः

मन्य मान इदम् सृष्टम् आत्मानम् इह सज्जते

06 कर्माणि कर्मभिः कुर्वन् सनिमित् तानि देह भृत्

तत् तत् कर्म फलम् गृह्णन् भ्रमती ह सुखे तरम्

07 इत्थम् कर्म गतीर् गच्छन् बह्व भद्र वहाः पुमान्

आभूत सम्प्लवात् सर्ग प्रलया वश्नु ते ऽवशः

08 धातू पप्लव आसन्ने व्यक्तम् द्रव्य गुणात्मकम्

अनादि निधनः कालो ह्यव्यक्ता याप कर्षति

09 शत वर्षा ह्यनावृष्टिर् भविष्यत् युल्बणा भुवि

तत् कालोप चितो ष्णार्को लोकाम् स्त्रीन् प्रत पिष्यति

10 पाताल तलम् आरभ्य सङ्कर्षण मुखानलः

दहन् ऊर्ध्वशिखो विष्वग् वर्धते वायु नेरितः

11 सम् वर्तको मेघ गणो वर्षति स्म शतम् समाः
धाराभिर् हस्ति हस्ताभिः लीयते सलिले विराट्
12 ततो विराज मुत् सृज्य वैराजः पुरुषो नृप
अव्यक्तम् विशते सूक्ष्मम् निरिन्धन इवानलः
13 वायुना हृत गन्धा भूः सलिल त्वाय कल्पते
सलिलम् तद् हृत रसम् ज्योतिष्ट् वायोप कल्पते
14 हृत रूपम् तु तमसा वायौ ज्योतिः प्रलीयते
हृत स्पर्शो ऽव काशेन वायुर् नभ सि लीयते
कालात्मना हृत गुणम् नभ आत्मनि लीयते
15 इन्द्रियाणि मनो बुद्धिः सह वैकारि कैर् नृप
प्रविशन्ति ह्य हङ्कारम् स्व गुणैर् अहम् आत्मनि
16 एषा माया भगवतः सर्गस् थित् यन्त कारिणी
त्रिवर्णा वर्णित् आस्माभिः किम् भूयः श्रोतु मिच्छसि
17 श्री राजो उवाच
यथैताम् ऐश्वरीम् मायाम् दुस्तराम् अकृत् आत्मभिः
तरन्त् यञ्जः स्थूल धियो महर्ष इदम् उच्यताम्
18 श्री प्रबुद्ध उवाच
कर्माण् यारभ माणानाम् दुःख हत् यै सुखा य च
पश्येत् पाक विपर्यासम् मिथुनी चारिणाम् नृणाम्
19 नित्यार्ति देन वित्तेन दुर्लभेन् आत्म मृत्युना
गृहा पत् याप्त पशुभिः का प्रीतिः साधि तैश् चलैः
20 एवम् लोकम् परम् विद्यान् नश्वरम् कर्म निर्मितम्
स तुल्यात् इशय ध्वम्सम् यथा मण्डल वर्तिनाम्
21 तस्माद् गुरुम् प्रपद् येत जिज्ञासुः श्रेय उत्तमम्
शाब्दे परे च निष्णातम् ब्रह्मण् युपशम् आश्रयम्
22 तत्र भागवतान् धर्मान् शिक्षेद् गुर्वात्म दैवतः

अमाययानु वृत्त्या यैः तुष्येद् आत्मात्म दो हरिः

23 सर्वतो मनसो ऽसङ्गम् आदौ सङ्गम् च साधुषु

दयाम् मैत्रीम् प्रश्रयम् च भूतेष् वद्धा य थोचितम्

24 शौचम् तपस् ति तिक्षाम् च मौनम् स्वाध्यायम् आर्जवम्

ब्रह्मचर्यम् अहिम्साम् च समत्वम् द्वन्द्व सम्ज्ञयोः

25 सर्वत् रात्मेश् वरान् वीक्षाम् कैवल्यम् अनिकेत ताम्

विविक्त चीर वसनम् सन्तोषम् येन केनचित्

26 श्रद्धाम् भागवते शास्त्रे ऽनिन्दाम् अन्यत्र चापि हि

मनो वाक् कर्म दण्डम् च सत्यम् शमदम् आवपि

27 श्रवणम् कीर्तनम् ध्यानम् हरेर् अद्भुत कर्मणः

जन्म कर्म गुणानाम् च तद् अर्थे ऽखिल चेष्टितम्

28 इष्टम् दत्तम् तपो जप्तम् वृत्तम् यच् चात्मनः प्रियम्

दारान् सुतान् गृहान् प्राणान् यत् परस्मै निवेदनम्

29 एवम् कृष्ण् आत्मना थेषु मनुष्येषु च सौहृदम्

परिचर्याम् चोभ यत्र महत्सु नृषु साधुषु

30 परस्परानु कथनम् पावनम् भगवद् यशः

मिथो रतिर् मिथस् तुष्टिः निवृत्तिर् मिथ आत्मनः

31 स्मरन्तः स्मारयन् तश् च मिथो ऽघौघ हरम् हरिम्

भक्त्या सञ्जात या भक्त्या बिभ्रत् युत्पुल काम् तनुम्

32 क्वचिद् रुदन्ति अच्युत चिन्तया क्वचिद्

हसन्ति नन्दन्ति वदन्त् य लौकिकाः

नृत्यन्ति गायन्त् यनुशील यन्त् यजम्

भवन्ति तूष्णीम् परमेत्य निर् वृताः

33 इति भागवतान् धर्मान् शिक्षन् भक्त्या तद् उत्थया

नारायण परो मायाम् अञ्जस् तरति दुस्तराम्

34 श्री राजो उवाच

नारायणा भिधानस् य ब्रह्मण: परमात्मन:

निष्ठाम् अर्हथ नो वक्तुम् यूयम् हि ब्रह्म वित्तमा:

35 श्री पिप्पलायन उवाच

स्थित् युद् भव प्रलय हेतुर् अहे तुरस्य

यत् स्व प्नजागर सुषुप्तिषु सद् बहिश् च

देहेन्द्रि यासु हृदयानि चरन्ति येन

सञ्जीवितानि तदवेहि परम् नरेन्द्र

36 नैतन्मनो विशति वागुत चक्षुर् आत्मा

प्राणेन्द्रियाणि च यथा नल मर्चिष: स्वा:

शब्दो ऽपि बोधक निषेध त यात्म मूलम्

अर्थोक्त माह यद्दते न निषेध सिद्धि:

37 सत्त्वम् रजस् तम इति त्रि वृदे क मादौ

सूत्रम् महानहम् इति प्रवदन्ति जीवम्

ज्ञान क्रियार्थ फल रूप तयोरु शक्ति

ब्रह्मैव भाति सदसच् च तयो: परम् यत्

38 नात्मा जजान न मरिष्यति नैधते ऽसौ

न क्षीयते सवन विद् व्यभि चारिणाम् हि

सर्वत्र शश्वद् अनपाय् युपलब्धि मात्रम्

प्राणो यथेन्द्रिय बलेन विकल्पितम् सत्

39 अण्डेषु पेशिषु तरुषु अविनिश्चि तेषु प्राणो हि जीवम् उपधावति तत्र तत्र

सन्ने यद् इन्द्रिय गणे ऽहमि च प्रसुप्ते कूटस्थ आशय मृते तद् अनुस्मृतिर् न:

40 यर् ह्यब्ज नाभ चरणै षण योरु भक्त्या

चेतोमलानि विधमेद् गुण कर्मजानि

तस्मिन् विशुद्ध उपलभ्यत आत्म तत्त्वम्

शाक्षाद् यथा मल दृशो: सवितृ प्रकाश:

41 श्री राजो उवाच

कर्म योगम् वद त नः पुरुषो येन सम्स्कृतः
विधू येहाशु कर्माणि नैष्कर्म्यम् विन्द ते परम्

42 एवम् प्रश्नम् ऋषीन् पूर्वम् अपृच्छम् पितुर् अन्तिके
नाब्रुवन् ब्रह्मणः पुत्राः तत्र कारणम् उच्यताम्

43 श्री आविर्होत्र उवाच
कर्मा कर्म विकर्मेति वेद वादो न लौकिकः
वेदस्य चेश्वरात् मत् वात् तत्र मुह्यन्ति सूरयः

44 परोक्ष वादो वेदोऽयम् बालानाम् अनुशासनम्
कर्म मोक्षाय कर्माणि विधत्ते ह्यगदम् यथा

45 नाचरेद् यस्तु वेदोक्तम् स्वयम् अज्ञो ऽजितेन्द्रियः
विकर्मणा ह्यधर्मेण मृत्योर् मृत्यु मुपैति सः

46 वेदोक्तम् एव कुर्वाणो निःसङ्गो ऽर्पितम् ईश्वरे
नैष्कर्म्यम् लभते सिद्धिम् रोचन् आर्था फल श्रुतिः

47 य आशु हृदय ग्रन्थिम् निर् जिहीर्षुः परात्मनः
विधिनोप चरेद् देवम् तन् त्रोक्तेन च केशवम्

48 लब्ध् आनुग्रह आचार्यात् तेन सन्दर्शित् आगमः
महा पुरुषम् अभ्यर्चेन् मूर्त् याभि मत यात्मनः

49 शुचिः सम्मुखम् आसीनः प्राण सम्यम् अनादिभिः
पिण्डम् विशोध्य सन्न्यास कृत रक्षो ऽर्च येद् हरिम्

50 अर्चादौ हृदये चापि यथा लब्धोप चारकैः
द्रव्य क्षित् यात्म लिण्गानि निष् पाद्य प्रोक्ष्य चासनम्

51 पाद्यादीन् उप कल्प्याथ सन्निधाप्य समाहितः
हृदा दिभिः कृतन् यासो मूल मन्त्रेण चार्च येत्

52 साङ्गो पाङ्गाम् स पार्षदाम् ताम् ताम् मूर्तिम् स्व मन्त्रतः
पाद्यार् घ्याच मनी याद्यैः स्नान वासोवि भूषणैः

53 गन्ध माल्या क्षत स्रग्भिः धूप दीपोप हारकैः

साङ्गम् सम्पूज्य विधिवत् स्तवैः स्तुत्वा न मेद् हरिम्

54 आत्मानम् तन् मयम् ध्यायन् मूर्तिम् सम्पूज येद् हरेः

शेषाम् आधाय शिरसि स्वधाम् न्युद्वास्य सत् कृतम्

55 एवम् अग्न्यर्क तो यादौ अतिथौ हृदये च यः

यजत् ईश्वरम् आत्मानम् अचिरान् मुच्यते हि सः

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

एकादश स्कन्दे त्रुतीयो ऽध्याय ः||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ एकादश स्कन्दः चतुर्थ्थो ऽध्याय ः

स्कन्द- 11: अध्याय- 04

01 श्री राजो उवाच

यानि यानी ह कर्माणि यैर्यैः स्वच्छन्द जन्मभिः

चक्रे करोति कर्ता वा हरि स्तानि ब्रुवन्तु नः

02 श्री द्रुमिल उवाच

यो वा अनन्तस्य गुनान् अनन्तान् अनुक्रमिष्यन् स तु बाल बुद्धिः

रजाम्सि भूमेर् गणयेत् कथञ्चित् कालेन नै वाखिल शक्ति धाम्नः

03 भूतैर् यदा पञ्चभिर् आत्म सृष्टैः

पुरम् विराजम् विरचय्य तस्मिन्

स्वाम् शेन विष्टः पुरुषाभि धानम्

अवाप नारायण आदि देवः

04 यत् काय एष भुवन त्रय सन्नि वेशो

यस् येन्द्रियैः तनु भृताम् उभयेन्द्रि याणि
ज्ञानम् स्वतः श्वसनतो बलमोज ईहा
सत्त्वादिभिः स्थिति लयोद् भव आदि कर्ता

05 आदाव भूत् छत धृती रज सास्य सर्गे
विष्णुः स्थितौ क्रतु पतिर् द्विज धर्म सेतुः
रुद्रो ऽप्यया य तमसा पुरुषः स आद्य
इत् युद्भव स्थिति लयाः सततम् प्रजासु

06 धर्मस् य दक्ष दुहितर् यज निष्ट मूर्त्याम्
नारायणो नर ऋषि प्रवरः प्रशान्तः
नैष्कर्म्य लक्षणम् उवाच चचार कर्म
यो ऽद्यापि चास्त ऋषि वर्य निषेवि ताङ्घ्रिः

07 इन्द्रो विशङ्क्य मम धाम जिघृक्ष तीति
कामम् न्ययुङ्क्त सगणम् स बदर् युपाख्यम्
गत्वाप् सरोगण वसन्त सु मन्द वातैः
स्त्री प्रेक्षणेषु भिर् अविध्यद् अतन्म हिज्ञः

08 विज्ञाय शक्र कृतम् अक्रमम् आदिदेवः
प्राह प्रहस्य गत विस्मय एजमानान्
मा भैष्ट भो मदन मारुत देव वध्वो
गृह्णीत नो बलि मशून्य मिमम् कुरुध्वम्

09 इत्थम् ब्रुवत् य भयदे नर देव देवाः
सव्रीडनम् रशिरसः सघृणम् तमूचुः
नै तद् विभो त्वयि परे ऽविकृते विचित्रम्
स्वाराम धीर निकरानत पाद पद्मे

10 त्वाम् सेवताम् सुरकृता बहवो ऽन्तरायाः
स्वौको विलङ्घ्य परमम् व्रजताम् पदम् ते
नान्यस्य बर्हिषि बलीन् ददतः स्वभागान्

धत्ते पदम् त्वम् अविता यदि विघ्न मूर्ध्नि

11 क्षुत्तृट् त्रि काल गुण मारुत जैह्व शैष्णान्

अस्मान पार जलधीन् अतितीर्य केचित्

क्रोधस्य यान्ति विफलस्य वशम् पदे गोर्

मज्जन्ति दुश्चर तपश् च वृथोत् सृजन्ति

12 इति प्रगृणताम् तेषाम् स्त्रियो ऽत् यद्भुत दर्शनाः

दर्शया मास शुश्रूषाम् स्वर्चिताः कुर्वतीर् विभुः

13 ते देवानु चरा दृष्ट्वा स्त्रियः श्री रिव रूपिणीः

गन्धेन मुमुहुस् तासाम् रूप् औदार्य हत श्रियः

14 तानाह देव देवेशः प्रणतान् प्रहसन् निव

आसाम् एकतमाम् वृङ्ध्वम् सवर्णाम् स्वर्ग भूषणाम्

15 ओमित्या देशम् आदाय नत्वा तम् सुर वन्दिनः

उर्वशीम् अप्सरः श्रेष्ठाम् पुरस् कृत्य दिवम् ययुः

16 इन्द्रायानम् य सदसि शृण्वताम् त्रिदि वौ कसाम्

ऊचुर् नारायण बलम् शक्रस् तत् रास विस्मितः

17 हम्स स्वरूपि अवदद् अच्युत आत्म योगम्

दत्तः कुमार ऋषभो भगवान् पिता नः

विष्णुः शिवाय जगताम् कलयाव तीर्णः

तेना हृता मधु भिदा श्रुतयो हयास्ये

18 गुप्तो ऽप्यये मनुरिल् औषध यश् च मात्स्ये

क्रौडे हतो दितिज उद्धर ताम्भ सः क्ष्माम्

कौर्मे धृतो ऽद्रिर् अमृतोन् मथने स्व पृष्ठे

ग्राहात् प्रपन्नम् इभराजम् अमुञ्चद् आर्तम्

19 सम्स्तुन्वतो ऽब्धि पतिताञ् छ्रमणान् ऋषीम्श् च

शक्रम् च वृत्र वधतस् तमसि प्रविष्टम्

देव स्त्रियो ऽसुर गृहे पिहिता अनाथा

जघ्ने ऽसुरेन्द्र मभयाय सताम् नृसिम्हे

20 देव् आसुरे युधि च दैत्य पतीन् सुरार्थे

हत्वान् तरेषु भुवनान् यदधात् कलाभिः

भूत्वाथ वामन इमाम् अहरद् बलेः क्ष्माम्

याच् ञाच् छलेन समदाद् अदितेः सुतेभ्यः

21 निः क्षत्रियाम् अकृत गाम् च त्रिःसप्त कृत्वो

रामस्तु हैहय कुलाप्यय भार्ग वाग्निः

सोऽब्धिम् बबन्ध दश वक्त्र महन् सलङ्कम्

सीता पतिर् जयति लोकम् अलघ्न कीर्तिः

22 भूमेर् भराव तरणाय यदुष्व जन्मा

जातः करिष्यति सुरैर् अपि दुष्कराणि

वादैर् विमोहयति यज्ञ कृतो ऽतदर्हान्

शूद्रान् कलौ क्षिति भुजो न्यह निष्य दन्ते

23 एवम् विधानि कर्मानि जन्माणि च जगत् पतेः

भूरीणि भूरि यशसो वर्णितानि महा भुज

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

एकादश स्कन्दे चतुर्थ्थो ऽध्याय ः||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ एकादश स्कन्दः पञ्चमो ऽध्याय ः

स्कन्द- 11: अध्याय- 05

01 श्री राजो उवाच

भगवन् तम् हरिम् प्रायो न भजन्त् यात्म वित्तमा:

तेषाम् अशान्त कामानाम् क निष्ठा विजित् आत्मनाम्

02 श्री चमस उवाच

मुख बाहूरु पादेभ्य: पुरुषस् याश्रमै: सह

चत्वारो जज्ञिरे वर्णा गुणै: विप्रादय: पृथक्

03 य एषाम् पुरुषम् साक्षाद् आत्म प्रभवम् ईश्वरम्

न भजन्ति अवजानन्ति स्थानाद् भ्रष्टा: पतन्त् यध:

04 दूरे हरि कथा: केचिद् दूरे चाच्युत कीर्तना:

स्त्रिय: शूद्रा दयश् चैव ते ऽनुकम्प्या भवा दृशाम्

05 विप्रो राजन्य वैश्यौ च हरे: प्राप्ता: पदान्तिकम्

श्रौतेन जन्म नाथापि मुह्यन्त् याम्नाय वादिन:

06 कर्मण्य कोविदा: स्तब्धा मूर्खा: पण्डित मानिन:

वदन्ति चाटुकान् मूढा यया माध्व्या गिरोत् सुका:

07 रजसा घोर सङ्कल्पा: कामुका अहिमन्यव:

दाम्भिका मानिन: पापा विहसन्त् यच्युत प्रियान्

08 वदन्ति ते ऽन्योन्यम् उपासि त स्त्रियो गृहेषु मैथुन्य परेषु चाशिष:

यजन्त्य सृष्टान् न विधान दक्षिणम् वृत्त्यै परम् घ्नन्ति पशून् अतद्विद:

09 श्रिया विभूत् याभि जनेन विद्यया त्यागेन रूपेण बलेन कर्मणा

जातस्मयेन् आन्धधिय: सहेश्वरान् सतो ऽवमन् यन्ति हरि प्रियान् खला:

10 सर्वेषु शश्वत् तनु भृत् स्व वस्थितम्

यथा खम् आत्मानम् अभीष्टम् ईश्वरम्

वेदोप गीतम् च न शृण्वते ऽबुधा

मनो रथानाम् प्रवदन्ति वार्तया

11 लोके व्यवायाम् इषमद्य सेवा नित्यास्तु जन्तो: न हि तत्र चोदना

व्यवस्थिति: तेषु विवाह यज्ञ सुराग्र हैरासु निवृत्ति रिष्टा

12 धनम् च धर्मैक फलम् यतो वै

ज्ञानम् स विज्ञानम् अनु प्रशान्ति
गृहेषु युञ्जन्ति कलेवरस्य
मृत्युम् न पश्यन्ति दुरन्त वीर्यम्

13 यद् घ्राण भक्षो विहितः सुरायाः तथा पशोर् आलभनम् न हिम्सा
एवम् व्यवा यः प्रजया न रत्या इमम् विशुद्धम् न विदुः स्व धर्मम्

14 ये त्वनेवम् विदो ऽसन्तः स्तब्धाः सदभि मानिनः
पशून् द्रुह्यन्ति विश्रब्धाः प्रेत्य खादन्ति ते च तान्

15 द्विषन्तः परका येषु स्वात्मानम् हरिम् ईश्वरम्
मृतके सानु बन्धे ऽस्मिन् बद्ध स्नेहाः पतन्त् यधः

16 ये कैवल्यम् असम् प्राप्ता ये चाती ताश् च मूढताम्
त्रै वर्गिका ह्यक्षणिका आत्मानम् घातयन्ति ते

17 एत आत्म हनो ऽशान्ता अज्ञाने ज्ञान मानिनः
सीदन्ति अकृत कृत्या वै काल ध्वस्त मनोरथाः

18 हित्वात् याया सरचिता गृहा पत्य सुहृत् स्त्रियः
तमो विशन्त् यनिच्छन्तो वासुदेव पराङ्मुखाः

19 श्री राजो उवाच
कस्मिन्काले स भगवान् किम् वर्णः कीद् ऋशो नृभिः
नाम्ना वा केन विधिना पूज्यते तदि होच्यताम्

20 श्री करभाजन उवाच
कृतम् त्रेता द्वापरम् च कलिर् इत्येषु केशवः
नाना वर्णा भिधा कारो नानैव विधिनेज् यते

21 कृते शुक्लश् चतुर् बाहुः जटिलो वल्कल् आम्बरः
कृष्णाजिनो पवीताक्षान् बिभ्रद् दण्ड कमण्डलू

22 मनुष् यास्तु तदा शान्ता निर्वैराः सुहृदः समाः
यजन्ति तपसा देवम् शमेन च दमेन च

23 हम्सः सुपर्णो वैकुण्ठो धर्मो योगेश्वरो ऽमलः

ईश्वरः पुरुषो ऽव्यक्तः परमात् मेति गीयते

24 त्रेतायाम् रक्त वर्णो ऽसौ चतुर् बाहुस् त्रि मेखलः

हिरण्य केशस् त्रय् यात्मा स्रुक्स्रुवाद् युप लक्षणः

25 तम् तदा मनुजा देवम् सर्व देव मयम् हरिम्

यजन्ति विद्यया त्रय्या धर्मिष्ठा ब्रह्म वादिनः

26 विष्णुर् यज्ञः पृश्नि गर्भः सर्व देव उरुक्रमः

वृषा कपिर् जयन्तश् च उरुगाय इतीर् यते

27 द्वापरे भगवान् श्यामः पीत वासा निजायुधः

श्री वत्सादिभिर् अङ्कैश् च लक्षणैः उपलक्षितः

28 तम् तदा पुरुषम् मर्त्या महा राजोप लक्षणम्

यजन्ति वेद तन्त्राभ् याम् परम् जिज्ञास वो नृप

29 नमस्ते वासुदेवाय नमः सङ्कर्षणाय च

प्रद्युम्ना यानिरुद्धाय तुभ्यम् भगवते नमः

30 नारायणाय ऋषये पुरुषाय महात्मने

विश्वेश्वराय विश्वाय सर्व भूत् आत्मने नमः

31 इति द्वापर उर्वीश स्तुवन्ति जगद् ईश्वरम्

नाना तन्त्र विधानेन कलावपि यथा शृणु

32 कृष्ण वर्णम् त्विषा कृष्णम् साङ्गो पाङ्ग् आस्त्र पार्षदम्

यज्ञैः सङ्कीर्तन प्रायैः यजन्ति हि सुमेधसः

33 ध्येयम् सदा परि भवघ्नम् अभीष्ट दोहम्

तीर्थास् पदम् शिव विरिञ्चिन् उतम् शरण्यम्

भृत् यार्तिहम् प्रणत पाल भवाब्धि पोतम्

वन्दे महा पुरुष ते चरण् आरविन्दम्

34 त्यक्त्वा सु दुस्त्यज सुरेप्सित राज्य लक्ष्मीम्

धर्मिष्ठ आर्य वचसा यदगाद् अरण्यम्

माया मृगम् दयित येप्सित मन्वधा वद्

वन्दे महा पुरुष ते चरण् आरविन्दम्

35 एवम् युगानु रूपाभ्याम् भगवान् युग वर्तिभिः

मनुजैर् इज्यते राजन् श्रेयसाम् ईश्वरो हरिः

36 कलिम् स भाजयन्त् यार्या गुण ज्ञाः सार भागिनः

यत्र सङ्कीर्तने नैव सर्व स्वार्थो ऽभि लभ्यते

37 न ह्यतः परमो लाभो देहिनाम् भ्राम्यताम् इह

यतो विन्देत परमाम् शान्तिम् नश्यति सम्सृतिः

38 कृतादिषु प्रजा राजन् कला विच्छन्ति सम्भवम्

कलौ खलु भविष् यन्ति नारायण परायणाः

39 क्वचित् क्वचिन् महाराज द्रविडेषु च भूरिशः

ताम्रपर्णी नदी यत्र कृतमाला पयस्विनी

40 कावेरी च महा पुण्या प्रतीची च महा नदी

ये पिबन्ति जलम् तासाम् मनुजा मनुजेश्वर

प्रायो भक्ता भगवति वासुदेवे ऽमलाशयाः

41 देवर्षि भूताप्त नृणाम् पितॄणाम् न किङ्करो नायम् ऋणी च राजन्

सर्वात्मना यः शरणम् शरण्यम् गतो मुकुन्दम् परिहृत्य कर्तम्

42 स्व पाद मूलम् भजतः प्रियस्य त्यक्तान् य भावस्य हरिः परेशः

विकर्म यच्चोत् पतितम् कथञ्चिद् धुनोति सर्वम् हृदि सन्निविष्टः

43 श्री नारद उवाच

धर्मान् भागवतान् इत्थम् श्रुत्वा थ मिथिलेश्वरः

जायन् तेयान् मुनीन् प्रीतः सोपाध् यायो ह्य पूजयत्

44 ततो ऽन्तर् दधिरे सिद्धाः सर्व लोकस्य पश्यतः

राजा धर्मान् उपातिष्ठन् अवाप परमाम् गतिम्

45 त्वम् अप्येतान् महा भाग धर्मान् भागवतान् श्रुतान्

आस्थितः श्रद्धया युक्तो निःसङ्गो यास्य से परम्

46 युवयोः खलु दम् पत्योः यशसा पूरितम् जगत्

पुत्र ताम् अगमद्यद् वाम् भगवान् ईश्वरो हरिः

47 दर्शना लिङ्गना लापैः शयन् आसन भोजनैः

आत्मा वाम् पावितः कृष्णे पुत्र स्नेहम् प्रकुर्वतोः

48 वैरेण यम् नृपतयः शिशु पाल पौण्ड्र

शाल्वादयो गति विलास विलोक नाद्यैः

ध्यायन्त आकृतधियः शयन् आसना दौ

तत् साम्य मापुः अनुरक्त धियाम् पुनः किम्

49 मापत्य बुद्धिम् अकृथाः कृष्णे सर्वात्मन् ईश्वरे

माया मनुष्य भावेन गूढ़ ऐश्वर्ये परे ऽव्यये

50 भूभार् आसुर राजन्य हन्तवे गुप्तये सताम्

अवतीर्णस्य निर्वृत्यै यशो लोके वितन्यते

51 श्री शुक उवाच

एतच् छ्रुत्वा महा भागो वसुदेवो ऽति विस्मितः

देवकी च महा भागा जहतुर् मोहम् आत्मनः

52 इतिहासम् इमम् पुण्यम् धारयेद्यः समाहितः

स विधू येह शमलम् ब्रह्म भूयाय कल्पते

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

एकादश स्कन्दे पञ्चमो ऽध्याय ः||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ एकादश स्कन्दः षष्टो ऽध्याय :

स्कन्द- 11: अध्याय- 06

01 श्री शुक उवाच

अथ ब्रह्म् आत्मजैः देवैः प्रजेशैर् आवृतो ऽभ्यगात्

भवश् च भूत भव् येशो ययौ भूत गणैर् वृतः

02 इन्द्रो मरुद्भिर् भगवान् आदित्या वसवो ऽश्विनौ

ऋभवो ऽङ्गिरसो रुद्रा विश्वे साध्याश् च देवताः

03 गन्धर्व् आप्सर सो नागाः सिद्ध चारण गुह्यकाः

ऋषयः पितरश् चैव स विद्याधर किन्नराः

04 द्वारकाम् उप सन्जग्मुः सर्वे कृष्ण दिदृक्षवः

वपुषा येन भगवान् नरलोक मनोरमः

यशो वितेने लोकेषु सर्व लोक मलापहम्

05 तस्याम् विभ्राज मानायाम् समृद् धायाम् महर्द् धिभिः

व्यचक्ष तावि तृप् ताक्षाः कृष्णम् अद्भुत दर्शनम्

06 स्वर्गो द्यानो पगैर् माल्यैः छाद यन्तो युदूत्तमम्

गीर्भिः चित्र पदार्थाभिः तुष्टुवुः जगद् ईश्वरम्

07 श्री देवा ऊचुः

नताः स्म ते नाथ पदार विन्दम् बुद् धीन्द्रिय प्राण मनो वचोभिः

यच् चिन्त् यते ऽन्तर् हृदि भाव युक्तैः मुमुक्षुभिः कर्म मयोरु पाशात्

08 त्वम् मायया त्रि गुण यात्मनि दुर् विभाव्यम्

व्यक्तम् सृजस्य वसि लुम्पसि तद् गुणस्थः

नै तैर् भवान् अजित कर्मभिर् अज्य ते वै

यत्स्वे सुखे ऽव्यवहिते ऽभिरतो ऽनवद्यः

09 शुद्धिर् नृणाम् न तु तथेड्य दुराश यानाम्

विद्या श्रुता ध्ययन दान तपः क्रियाभिः

सत्त् वात्मनाम् ऋषभ ते यशसि प्रवृद्ध

सच् छ्रद्धया श्रवण सम्भृतया यथा स्यात्

10 स्यान् नस्तवाङ्घ्रिर् अशु भाशय धूम केतुः

क्षेमाय यो मुनिभिर् आर्द्र हृदोह्य मानः
यः सात्वतैः सम विभूत य आत्म वद्भिः
व्यूहे ऽर्चितः सवनशः स्वर तिक्र माय
11 यस् चिन्त्यते प्रयत पाणिभिर् अध्वराग्नौ
त्रय्या निरुक्त विधिनेश हविर् गृहीत्वा
अध्यात्म योग उत योगिभिर् आत्म मायाम्
जिज्ञासुभिः परम भागवतैः परीष्टः
12 पर्युष्टया तव विभो वन मालयेयम्
सम्स्पार्धिनी भगवती प्रति पत्नि वच्छ्रीः
यः सुप्रणीतम् अमुयार्हण माद दन्नो
भूयात् सदाङ्घ्रिर् अशु भाशय धूमकेतुः
13 केतुस् त्रि विक्रम युतस् त्रि पतत् पताको
यस्ते भया भयकरो ऽसुर देव चम्वोः
स्वर्गाय साधुषु खले ष्वितराय भूमन्
पदः पुनातु भगवन् भजताम् अघम् नः
14 नस्योत गाव इव यस्य वशे भवन्ति
ब्रह्मादयस् तनु भृतो मिथुर् अर्द्यमानाः
कालस्य ते प्रकृति पूरुष योः परस्य
शम् नस्तनोतु चरणः पुरुषोत्त मस्य
15 अस्यासि हेतुर् उदयस् थिति सम्य मानाम्
अव्यक्त जीव महताम् अपि कालमाहुः
सोऽयम् त्रिणाभिर् अखिलाप चये प्रवृत्तः
कालो गभीररय उत्तम पूरुषस् त्वम्
16 त्वत्तः पुमान् समधिगम्य ययास्य वीर्यम्
धत्ते महान्तम् इव गर्भम् अमोघ वीर्यः
सोऽयम् तयानुगत आत्मन आण्ड कोशम्

हैमम् ससर्ज बहिर् आवरणैर् उपेतम्

17 तत् तस्थु षश् च जगतश् च भवान् अधीशो

यन् माय योत्थ गुण विक्रिय योप नीतान्

अर्थाञ्जुषन् अपि हृषीक पते न लिप्तो

येऽन्ये स्वतः परि हृताद् अपि बिभ्यति स्म

18 स्मायाव लोक लव दर्शित भाव हारि

भ्रू मण्डल प्रहित सौरत मन्त्र शौण्डैः

पत्न्यस्तु षोडश सहस्र मनङ्ग बाणैर्

यस् येन्द्रियम् विमथितुम् करणैर् न विभ्व्यः

19 विभ्व्यस् तवाम् ऋत कथो दव हास् त्रिलोक्याः

पादाव नेज सरितः शमलानि हन्तुम्

आनुश्रवम् श्रुतिभिर् अङ्घ्रिजम् अङ्ग सङ्गैः

तीर्थ द्वयम् शुचि षदस्त उप स्पृशन्ति

20 श्री बादरायणिर् उवाच

इत् यभिष्टूय विबुधैः सेशः शत धृतिर् हरिम्

अभ्य भाषत गोविन्दम् प्रणम् याम्बरम् आश्रितः

21 श्री ब्रह्मो उवाच

भूमेर् भाराव ताराय पुरा विज्ञापितः प्रभो

त्वम् अस्माभिर् अशेष् आत्मन् तत् तथैवोप पादितम्

22 धर्मश् च स्थापितः सत्सु सत्य सन्धेषु वै त्वया

कीर्तिश् च दिक्षु विक्षिप्ता सर्व लोक मलापहा

23 अवतीर्य यदोर् वम्शे बिभ्रद् रूपम् अनुत्तमम्

कर्माणि उद्दाम वृत्तानि हिताय जगतो ऽकृथाः

24 यानि ते चरिता नीश मनुष्याः साधवः कलौ

शृण्वन् तः कीर्तयन् तश् च तरिष्यन् त्यञ्ज सा तमः

25 यदु वम्शे ऽव तीर्णस् य भवतः पुरुषोत्तम

शरच् छतम् व्यती याय पञ्च विम्शाधि कम् प्रभो

26 नाधुना ते ऽखिला धार देव कार्याव शेषितम्

कुलम् च विप्र शापेन नष्ट प्रायम् अभूदिदम्

27 ततः स्वधाम परमम् विशस्व यदि मन्यसे

सलोकान् लोक पालान्नः पाहि वैकुण्ठ किङ्करान्

28 श्री भगवान् उवाच

अवधारित मे तन्मे यदात्थ विबुधेश्वर

कृतम् वः कार्यम् अखिलम् भूमेर् भारो ऽवतारितः

29 तद् इदम् याद वकुलम् वीर्य शौर्य श्रियोद् धतम्

लोकम् जिघृक्षद् रुद्धम् मे वेलयेव महार्णवः

30 यद् यसम् हृत्य दृप्तानाम् यदूनाम् विपुलम् कुलम्

गन्तास् म्यनेन लोकोऽयम् उद्वेलेन विनङ्क्ष्यति

31 इदानीम् नाश आरब्धः कुलस्य द्विज शापतः

यास्यामि भवनम् ब्रह्मन् एत दन्ते त वानघ

32 श्री शुक उवाच

इत् युक्तो लोक नाथेन स्वयम्भूः प्रणि पत्य तम्

सह देव गणैर् देवः स्वधाम समपद् यत

33 अथ तस्याम् महोत् पातान् द्वार वत्याम् समुत्थि तान्

विलोक्य भगवान् आह यदु वृद्धान् समागतान्

34 श्री भगवान् उवाच

एते वै सु महोत् पाता व्युत्तिष्ठन् तीह सर्वतः

शापश् च नः कुलस् यासीद् ब्राह्मणेभ्यो दुरत्य यः

35 न वस्तव्यम् इहास् माभिः जिजीवि षुभिर् आर्यकाः

प्रभासम् सु महत् पुण्यम् यास्यामो ऽद्यैव मा चिरम्

36 यत्र स्नात्वा दक्ष शापाद् गृहीतो यक्ष्मणोडु राट्

विमुक्तः किल्बिषात् सद्यो भेजे भूयः कलोदयम्

37 वयम् च तस्मिन् आप्लुत्य तर्प यित्वा पित्ऋन् सुरान्

भोजयित् वोषिजो विप्रान् नाना गुणव तान् धसा

38 तेषु दानानि पात्रेषु श्रद्धयोप् त्वा महान्ति वै

वृजिनानि तरिष् यामो दानैः नौभिर् इवार्णवम्

39 श्री शुक उवाच

एवम् भगवता दिष्टा यादवाः कुल नन्दन

गन्तुम् कृतधियस् तीर्थम् स्यन्दनान् सम यूयुजन्

40 तन् निरीक्ष् योद्धवो राजन् श्रुत्वा भगवतोद् इतम्

दृष्ट्वार् इष्टानि घोराणि नित्यम् कृष्ण मनुव्रतः

41 विविक्त उप सङ्गम्य जगताम् ईश्वरेश् वरम्

प्रणम्य शिरिसा पादौ प्राञ्जलिस् तम् अभाषत

42 श्री उद्धव उवाच

देव देवेश योगेश पुण्य श्रवण कीर्तन

सम्हृत् यै तत् कुलम् नूनम् लोकम् सन्त् यक्ष्यते भवान्

विप्र शापम् समर्थो ऽपि प्रत्यहन् न यद् ईश्वरः

43 नाहम् तवाङ्घ्रि कमलम् क्षणार्धम् अपि केशव

त्यक्तुम् समुत्सहे नाथ स्वधाम नय मामपि

44 तव विक्रीडितम् कृष्ण नृनाम् परम मङ्गळम्

कर्ण पीयूष मास्वाद्य त्यजत् यन्यस् पृहाम् जनाः

45 शय्यास नाटन स्थान स्नान क्रीडाश नादिषु

कथम् त्वाम् प्रियम् आत्मानम् वयम् भक्तास् त्यजेम हि

46 त्वयोप भुक्त स्रग् गन्ध वासो ऽलङ्कार चर्चिताः

उच्छिष्ट भोजिनो दासाः तव मायाम् जयेम हि

47 वात रशना य ऋषयः श्रमणा ऊर्ध्व मन्थिनः

ब्रह्माख्यम् धाम ते यान्ति शान्ताः सन्न्यासी नो ऽमलाः

48 वयम् त्विह महा योगिन् भ्रमन्तः कर्म वर्त्मसु

त्वद् वार्तया तरिष् यामः तावकैर् दुस्तरम् तमः

49 स्मरन्तः कीर्तयन् तस् ते कृतानि गदितानि च

गत्युत् स्मितेक्षण क्ष्वेलि यन् नृलोक विडम्बनम्

50 श्री शुक उवाच

एवम् विज्ञापितो राजन् भगवान् देवकी सुतः

एकान्तिनम् प्रियम् भृत्यम् उद्धवम् सम भाषत

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

एकादश स्कन्दे षष्टो ऽध्याय ः॥

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ एकादश स्कन्दः सप्तमो ऽध्याय ः

स्कन्द- 11: अध्याय- 07

01 श्री भगवान् उवाच

यदात् थ माम् महा भाग तच् चिकीर्षितम् एव मे

ब्रह्मा भवो लोक पालाः स्वर्वासम् मे ऽभिकाङ्क्षिणः

02 मया निष्पादितम् ह्यत्र देव कार्यम् अशेषतः

यदर्थम् अवतीर्णो ऽहम् अम्शेन ब्रह्मणार्थितः

03 कुलम् वै शाप निर्दग्धम् नङ्क्ष्यत् यन्योन्य विग्रहात्

समुद्रः सप्तमे ह्येनाम् पुरीम् च प्लाव यिष्यति

04 यह्र्येवायम् मया त्यक्तो लोकोऽयम् नष्ट मङ्गळः

भविष्यत् यचिरात् साधो कलिनापि निरा कृतः

05 न वस्तव्यम् त्वयै वेह मया त्यक्ते महीतले

जनो ऽधर्म रुचिर् भद्र भविष्यति कलौ युगे

06 त्वम् तु सर्वम् परित्यज्य स्नेहम् स्वजन बन्धुषु

मय्या वेश्य मनः सम्यक् समदृग् विचरस् व गाम्

07 यदिदम् मनसा वाचा चक्षुर्भ्याम् श्रवणा दिभिः

नश्वरम् गृह्य माणम् च विद्धि माया मनोमयम्

08 पुम्सो ऽयुक्तस् य नानार्थो भ्रमः स गुण दोष भाक्

कर्मा कर्म विकर्मेति गुण दोष धियो भिदा

09 तस्माद् युक्तेन्द्रिय ग्रामो युक्त चित्त इदम् जगत्

आत्मनी क्षस्व विततम् आत्मानम् मय्य धीश्वरे

10 ज्ञान विज्ञान सम्युक्त आत्म भूतः शरीरिणाम्

आत्मानुभव तुष्टात्मा नान्तरायैर् विहन्यसे

11 दोष बुद्ध्यो भया तीतो निषेधान् न निवर्तते

गुण बुद्ध्या च विहितम् न करोति यथार् भकः

12 सर्व भूत सुहृच् छान्तो ज्ञान विज्ञान निश्चयः

पश्यन् मद् आत्मकम् विश्वम् न विपद् येत वै पुनः

13 श्री शुक उवाच

इत् यादिष्टो भगवता महा भागवतो नृप

उद्धवः प्रणि पत्याह तत्त्व जिज्ञासुर् अच्युतम्

14 श्री उद्धव उवाच

योगेशा योग विन्यासा योगात्मन् योग सम्भव

निःश्रेय साय मे प्रोक्तः त्यागः सन्न्यास लक्षणः

15 त्यागो ऽयम् दुष्करो भूमन् कामानाम् विषयात् मभिः

सुतराम् त्वयि सर्वात्मन् न भक्तैर् इति मे मतिः

16 सोऽहम् ममाहम् इति मूढ मतिर् विगाढः

त्वन् मायया विरचित् आत्मनि सानु बन्धे

तत्त्वञ्ज सा निगदितम् भवता यथाहम्

सम्साध यामि भगवन् अनुशाधि भृत्यम्

17 सत्यस्य ते स्व दृश आत्मन आत्मनो ऽन्यम्

वक्तारमीश विबुधेष् वपि नानु चक्षे

सर्वे विमोहित धियस् तव माय येमे

ब्रह्मादयस् तनु भृतो बहिरर्थ भावाः

18 तस्माद् भवन्तम् अनवद्यम् अनन्त पारम्

सर्वज्ञम् ईश्वरम् अकुण्ठ विकुण्ठ धिष्ण्यम्

निर्विण्णधीर् अह मुह वृजिनाभि तप्तो

नारायणम् नरसखम् शरणम् प्रपद्ये

19 श्री भगवान् उवाच

प्रायेण मनुजा लोके लोक तत्त्व विचक्षणाः

समुद् धरन्ति ह्यात्मानम् आत्मनैवा शुभाश यात्

20 आत्मनो गुरुर् आत्मैव पुरुषस्य विशेषतः

यत् प्रत्यक्षानु मानाभ्याम् श्रेयो ऽसौ अनुविन्दते

21 पुरुषत्वे च माम् धीराः साङ्ख्य योग विशारदाः

आविस्तराम् प्रपश् यन्ति सर्व शक्त् युप बृम्हितम्

22 एक द्वित्रि चतुस् पादो बहुपादस् तथा पदः

बह्व्यः सन्ति पुरः सृष्टाः तासाम् मे पौरुषी प्रिया

23 अत्र माम् मार्गयन्त् यद्धा युक्ता हेतुभिर् ईश्वरम्

गृह्यमाणैर् गुणैर् लिङ्गैर् अग्राह्यम् अनुमानतः

24 अत्राप्युदा हरन् तीमम् इतिहासम् पुरातनम्

अवधूतस् य सम्वादम् यदोर् अमित तेजसः

25 अवधूतम् द्वियम् कञ्चिच् चरन्तम् अकुतोभयम्

कविम् निरीक्ष्य तरुणम् यदुः पप्रच्छ धर्मवित्

26 श्री यदुर् उवाच

कुतो बुद्धिर् इयम् ब्रह्मन् अकर्तुः सु विशारदा

याम् आसाद्य भवान् लोकम् विद्वाम्श् चरति बालवत्

27 प्रायो धर्म् आर्थ कामेषु विवित्सायाम् च मानवाः

हेतुनैव समीहन्ते आयुषो यशसः श्रियः

28 त्वम् तु कल्पः कविर् दक्षः सुभगो ऽमृत भाषणः

न कर्ता नेहसे किञ्चित् जडोन्मत्त पिशाच वत्

29 जनेषु दह्य मानेषु काम लोभ दवाग्नि ना

न तप्यसे ऽग्निना मुक्तो गङ्गाम् भःस्थ इव द्विपः

30 त्वम् हि नः पृच्छताम् ब्रह्मन् आत्मनि आनन्द कारणम्

ब्रूहि स्पर्श विहीनस्य भवतः केवल् आत्मनः

31 श्री भगवान् उवाच

यदुनैवम् महा भागो ब्रह्मण् येन सुमेधसा

पृष्टः सभाजितः प्राह प्रश्रया वनतम् द्विजः

32 श्री ब्राह्मण उवाच

सन्ति मे गुरवो राजन् बहवो बुद् हयुपश्रिताः

यतो बुद्धिम् उपादाय मुक्तो ऽटामीह तान् शृणु

33 पृथिवी वायुर् आकाशम् आपो ऽग्निश् चन्द्रमा रविः

कपोतो ऽजगरः सिन्धुः पतङ्गो मधुकृद् गजः

34 मधुहा हरिणो मीनः पिङ्गला कुररो ऽर्भकः

कुमारी शरकृत् सर्प ऊर्णनाभिः सुपेश कृत्

35 एते मे गुरवो राजन् चतुर् विम्शतिर् आश्रिताः

शिक्षा वृत्तिभिर् एतेषाम् अन्व शिक्षम् इहात्मनः

36 यतो यद् अनुशिक्षामि यथा वा नाहु षात्मज

तत् तथा पुरुष व्याघ्र निबोध कथयाम् इते

37 भूतैर् आक्रम्य माणोऽपि धीरो दैव वशानुगैः

तद् विद्वान् न चलेन् मार्गाद् अन्वशिक्षम् क्षितेर् व्रतम्

38 शश्वत् परार्थ सर्वेहः परार्थै कान्त सम्भवः

साधुः शिक्षेत भू भृत्तो नगशिष्यः परात्म ताम्

39 प्राण वृत् त्यैव सन्तुष्येत् मुनिर् नैवेन्द्रिय प्रियैः

ज्ञानम् यथा न नश् येत नावकीर् येत वाङ्मनः

40 विषयेष्वा विशन् योगी नाना धर्मेषु सर्वतः

गुण दोष व्यपेत् आत्मा न विषज्जेत वायु वत्

41 पार्थिवेष् विह देहेषु प्रविष्टस् तद् गुणाश्रयः

गुणैर्न युज्यते योगी गन्धैर् वायुर् इवात्म दृक्

42 अन्तर् हितश् च स्थिर जङ्गमेषु ब्रह्मात्म भावेन समन्व येन

व्याप्त्या व्यवच् छेदम् असङ्गम् आत्मनो मुनिर् नभस् त्वम् विततस्य भावयेत्

43 तेजो ऽबन्नमयैर् भावैः मेघाद्यैर् वायु नेरितैः

न स्पृश्यते नभस् तद् वत् काल सृष्टैर् गुणैः पुमान्

44 स्वच्छः प्रकृतितः स्निग्धो माधुर्यस् तीर्थ भूर् नृणाम्

मुनिः पुनात्यपाम् मित्रम् ईक्षोप स्पर्श कीर्तनैः

45 तेजस्वी तपसा दीप्तो दुर्धर् षोदर भाजनः

सर्व भक्ष्यो ऽपि युक्त् आत्मा नादत्ते मलम् अग्निवत्

46 क्वचिच् छन्नः क्वचित् स्पष्ट उपास्यः श्रेय इच्छताम्

भुङ्क्ते सर्वत्र दातृणाम् दहन् प्राग् उत्तरा शुभम्

47 स्व मायया सृष्टम् इदम् सद सल्लक्षणम् विभुः

प्रविष्ट ईयते तत् तत् स्वरूपो ऽग्निर् इवैधसि

48 विसर् गाद्याः श्मशा नान्ता भावा देहस्य नात्मनः

कलानाम् इव चन्द्रस् य कालेना व्यक्त वर्त्मना

49 कालेन ह्योघ वेगेन भूतानाम् प्रभवाप् ययौ

नित्यावपि न दृश् येते आत्मनो ऽग्नेर् यथार् चिषाम्

50 गुणैर् गुणानु पादत् ते यथा कालम् विमुञ्चति

न तेषु युज्यते योगी गोभिर्गा इव गोपतिः

51 बुध्यते स्वे न भेदेन व्यक्तिस्थ इव तद् गतः

लक्ष्यते स्थूल मतिभि: आत्मा चावस्थितो ऽर्कवत्

52 नातिस्नेह: प्रसङ्गो वा कर्तव्य: क्वापि केनचित्

कुर्वन् विन्दे त सन्तापम् कपोत इव दीनधी:

53 कपोत: कश्चनार् अण्ये कृत नीडो वनस्पतौ

कपोत्या भार्यया सार्धम् उवास कतिचित् समा:

54 कपोतौ स्नेह गुणित हृदयौ गृह धर्मिणौ

दृष्टिम् दृष्ट्याङ्गम् अङ्गेन बुद्धिम् बुद्ध्या बबन् धतु:

55 शय्यास नाटन स्थान वार्ता क्रीडाश नादिकम्

मिथुनी भूय विश्रब्धौ चेरतु: वन राजिषु

56 यम् यम् वान्छति सा राजन् तर्पयन्त् यनु कम्पिता

तम् तम् समनयत् कामम् कृच्छ्रेणाप् यजितेन्द्रिय:

57 कपोती प्रथमम् गर्भम् गृह्णन्ती काल आगते

अण्डानि सुषुवे नीडे स्वपत्यु: सन्निधौ सती

58 तेषु काले व्यजा यन्त रचिता वय वा हरे:

शक्तिभिर् दुर् विभा व्याभि: कोमलाङ्ग तनू रुहा:

59 प्रजा: पुपुषतु: प्रीतौ दम्पती पुत्र वत्सलौ

शृण्वन् तौ कूजितम् तासाम् निर्वृतौ कलभाषितै:

60 तासाम् पत त्रै: सु स्पर्शै: कूजितैर् मुग्ध चेष्टितै:

प्रत्युद् गमैर् अदीनानाम् पितरौ मुदमा पतु:

61 स्नेहानु बद्ध हृदयौ अन्योन्यम् विष्णु मायया

विमोहितौ दीन धियौ शिशून् पुपुषतु: प्रजा:

62 एकदा जग्म तुस् तासाम् अन्नार्थम् तौ कुटुम्बिनौ

परित: कानने तस्मिन् अर्थिनौ चेर तुश्चिरम्

63 दृष्ट्वा तान् लुब्धक: कश्चिद् यदृच् छातो वनेचर:

जगृहे जालमा तत्य चरत: स्वाल यान्तिके

64 कपोतश् च कपोती च प्रजापोषे सदोत् सुकौ

गतौ पोषणम् आदाय स्वनीडम् उपजग् मतु:

65 कपोती स्वात्मजान् वीक्ष्य बालकान् जाल सम्वृतान्

तान् अभ्यधावत् क्रोशन्ती क्रोशतो भृश दु:खिता

66 सासकृत् स्नेह गुणिता दीन चित्ताज मायया

स्वयम् चा बध्यत शिचा बद्धान् पश्यन्त् यपस्मृति:

67 कपोत: स्वात्मजान् बद्धान् आत्मनो ऽप्यधिकान् प्रियान्

भार्याम् चात्म समाम् दीनो विललापाति दु:खित:

68 अहो मे पश्यता पायम् अल्प पुण्यस्य दुर्मते:

अतृप्तस्या कृतार्थस्य गृहस्त्रै वर्गिको हत:

69 अनुरूप् आनुकूला च यस्य मे पति देवता

शून्ये गृहे माम् सन्त् यज्य पुत्रै: स्वर्याति साधुभि:

70 सोऽहम् शून्ये गृहे दीनो मृत दारो मृत प्रज:

जिजीविषे किमर्थम् वा विधुरो दु:ख जीवित:

71 ताम्स् तथैवा वृतान् शिग्भि: मृत्यु ग्रस्तान् विचेष्टत:

स्वयम् च कृपण: शिक्षु पश्यन् न प्यबुधो ऽपतत्

72 तम् लब्ध्वा लुब्ध क: क्रूर: कपोतम् गृह मेधिनम्

कपोतकान् कपोतीम् च सिद्धार्थ: प्रययौ गृहम्

73 एवम् कुटुम्बि अशान्त् आत्मा द्वन्द्वा राम: पत त्रिवत्

पुष्णन् कुटुम्बम् कृपण: सानुबन्धो ऽवसीदति

74 य: प्राप्य मानुषम् लोकम् मुक्ति द्वारम् अपावृतम्

गृहेषु खगवत् सक्त: तम् आरूढ् अच्युतम् विदु:

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

एकादश स्कन्दे सप्तमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ एकादश स्कन्दः अष्टमो ऽध्याय :

स्कन्द- 11: अध्याय- 08

01 श्री ब्राह्मण उवाच

सुखम् ऐन्द्रियकम् राजन् स्वर्गे नरक एव च

देहिनाम् यद् यथा दुःखम् तस्मान् नेच्छेत तद्बुधः

02 ग्रासम् सुमृष्टम् विरसम् महान्तम् स्तोकम् एव वा

यदृच्छ यैवा पतितम् ग्रसेद् आजगरो ऽक्रियः

03 शयीता हानि भूरीणि निराहारो ऽनुपक्रमः

यदि नोपनमेद् ग्रासो महाहिरिव दिष्टभुक्

04 ओजःसहो बलयुतम् बिभ्रद् देहम् अकर्मकम्

शयानो वीत निद्रश् च नेहे तेन्द्रिय वानपि

05 मुनिः प्रसन्न गम्भीरो दुर्विगाह्यो दुरत् ययः

अनन्त पारो ह्यक्षोभ्यः स्तिमि तोद इवार्णवः

06 समृद्ध कामो हीनो वा नारायण परो मुनिः

नोत् सर्पेत न शुष्येत सरिद् भिरिव सागरः

07 दृष्ट्वा स्त्रियम् देवमायाम् तद् भावैर् अजितेन्द्रियः

प्रलोभितः पतत् यन्धे तमस् यग्नौ पतङ्ग वत्

08 योषिद् हिरण्या भरणाम् बरादि द्रव् येषु माया रचितेषु मूढः

प्रलोभित् आत्मा ह्युप भोग बुद्ध्या पतङ्ग वन्नश् यति नष्ट दृष्टिः

09 स्तोकम् स्तोकम् ग्रसेद् ग्रासम् देहो वर्तेत या वता

गृहान् अहिम्सन् नातिष्ठेद् वृत्तिम् माधुकरीम् मुनिः

10 अणुभ्यश् च महद्भ्यश् च शास्त्रेभ्यः कुशलो नरः

सर्वतः सारम् आददयात् पुष्पेभ्य इव षट्पदः

11 सायन्तनम् श्वस्तनम् वा न सङ्गृह्णीत भिक्षितम्
पाणि पात्रो द रामत्रो मक्षिकेव न सङ्ग्रही

12 सायन्तनम् श्वस्तनम् वा न सङ्गृह्णीत भिक्षुकः
मक्षिका इव सङ्गृह्णन् सह तेन विनश् यति

13 पदापि युवतीम् भिक्षु न स्पृशेद् दारवीम् अपि
स्पृशन् करीव बध् येत करिण्या अङ्ग सङ्गतः

14 नाधिगच् छेत् स्त्रियम् प्राज्ञः कर्हिचिन् मृत्युम् आत्मनः
बलाधिकैः स हन्येत गजैर् अन्यैर् गजो यथा

15 न देयम् नोपभोग्यम् च लुब्धैर् यद् दुःख सञ्चितम्
भुङ्क्ते तद् अपि तच् चान्यो मधुहे वार्थ विन्मधु

16 सुदुःखो पार्जितैर् वित्तैर् आशा सानाम् गृहा शिषः
मधुहेवा ग्रतो भुङ्क्ते यतिर्वै गृह मेधिनाम्

17 ग्राम्य गीतम् न शृणुयाद् यतिर् वनचरः क्वचित्
शिक्षेत हरिणाद् बद्धात् मृगयोर् गीत मोहितात्

18 नृत्य वादित्र गीतानि जुषन् ग्राम्याणि योषिताम्
आसाम् क्रीडनको वश्य ऋष्य शृङ्गो मृगी सुतः

19 जिह्वयाति प्रमाथिन्या जनो रस विमोहितः
मृत्यु मृच्छत्य सद् बुद्धिर् मीनस्तु बडिशैर् यथा

20 इन्द्रियाणि जयन्त् याशु निराहारा मनीषिणः
वर्जयित्वा तु रसनम् तन् निरन्नस् य वर्धते

21 तावज् जितेन्द्रियो न स्याद् विजितान् येन्द्रियः पुमान्
न जयेद् रसनम् यावत् जितम् सर्वम् जिते रसे

22 पिङ्गला नाम वेश्यासीद् विदेह नगरे पुरा
तस्या मे शिक्षितम् किञ्चित् निबोध नृप नन्दन

23 सा स्वैरिण्येक दा कान्तम् सङ्केत उपनेष् यती
अभूत् काले बहिर् द्वारे बिभ्रती रूपम् उत्तमम्

24 मार्ग आगच्छतो वीक्ष्य पुरुषान् पुरुषर्षभ

तान् शुल्कदान् वित्तवतः कान्तान् मेने ऽर्थ कामुका

25 आगतेषु अपयातेषु सा सङ्केतोप जीविनी

अप्यन्यो वित्तवान् को ऽपि माम् उपैष्यति भूरिदः

26 एवम् दुराशया ध्वस्त निद्रा द्वार् य वलम्बती

निर्गच् छन्ती प्रविशती निशीथम् समपद् यत

27 तस्या वित्ताशया शुष्यद् वक्त्राया दीन चेतसः

निर्वेदः परमो जज्ञे चिन्ता हेतुः सुखा वहः

28 तस्या निर्विण्ण चित्ताया गीतम् शृणु यथा मम

निर्वेद आशा पाशानाम् पुरुषस्य यथा ह्यसिः

29 न ह्यङ्गाजात निर्वेदो देह बन्धम् जिहासति

यथा विज्ञान रहितो मनुजो ममताम् नृप

30 पिङ्गलो उवाच

अहो मे मोह विततिम् पश्यता विजित् आत्मनः

या कान्ताद् असतः कामम् कामये येन बालिशा

31 सन्तम् समीपे रमणम् रति प्रदम् वित्त प्रदम् नित्य मिमम् विहाय

अकामदम् दुःख भयाधि शोक मोहप्रदम् तुच्छम् अहम् भजे ऽज्ञा

32 अहो मयात्मा परितापितो वृथा साङ्केत्य वृत्त्याति विगर्ह्य वार्तया

स्त्रैणान् नराद् यार्थ तृषो ऽनुशोच् यात् क्रीतेन वित्तम् रति मात्मनेच् छती

33 यद् अस्थिभिर् निर्मित वम्श वम्स्य

स्थूणम् त्वचा रोम नखैः पिनद्धम्

क्षरन् नव द्वार मगारम् एतद्

विण् मूत्र पूर्णम् मदु पैति कान्या

34 विदेहानाम् पुरे ह्यस्मिन् अहमेकैव मूढधीः

यान् य मिच्छन् त्यसत् यस्माद् आत्मदात् कामम् अच्युतात्

35 सुहृत् प्रेष्ठ तमो नाथ आत्मा चायम् शरीरिणाम्

तम् विक्री यात्म नैवाहम् रमे ऽनेन यथा रमा

36 कियत् प्रियम् ते व्यभजन् कामा ये काम दा नराः

आद्यन्त वन्तो भार्याया देवा वा काल विद्रुताः

37 नूनम् मे भगवान् प्रीतो विष्णुः केनापि कर्मणा

निर्वेदोऽयम् दुरा शाया यन्मे जातः सुखा वहः

38 मैवम् स्युः मन्द भाग्या याः क्लेशा निर्वेद हेतवः

येनानु बन्धम् निर्हृत्य पुरुषः शम मृच्छति

39 तेनोप कृतम् आदाय शिरसा ग्राम्य सङ्गताः

त्यक्त्वा दुराशाः शरणम् व्रजामि तम् अधीश्वरम्

40 सन्तुष्टा श्रद्द धत् येतद् यथा लाभेन जीवती

विहरामि अमुनै वाहम् आत्मना रमणे न वै

41 सम्सार कूपे पतितम् विषयैर् मुषि तेक्षणम्

ग्रस्तम् कालाहिन् आत्मानम् को ऽन्यस्त्रातुम् अधीश्वरः

42 आत्मैव ह्यात्मनो गोप्ता निर्विद् येत यद् आखिलात्

अप्रमत्त इदम् पश्येद् ग्रस्तम् कालाहिना जगत्

43 श्री ब्राह्मण उवाच

एवम् व्यवसित मतिः दुराशाम् कान् त तर्षजाम्

छित्त्वो पशम मास्थाय शय्याम् उपविवेश सा

44 आशा हि परमम् दुःखम् नैराश्यम् परमम् सुखम्

यथा सञ्छिद्य कान् ताशाम् सुखम् सुष्वाप पिङ्गला

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

एकादश स्कन्दे अष्टमो ऽध्याय :॥

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ एकादश स्कन्द: नवमो ऽध्याय :

स्कन्द- 11: अध्याय- 09

01 श्री ब्राह्मण उवाच

परिग्रहो हि दु:खाय यद् यत् प्रियतमम् नृणाम्

अनन्तम् सुखम् आप्नोति तद् विद्वान् यस्त्व किञ्चन:

02 सामिषम् कुररम् जघ्नुर् बलिनो ये निरामिषा:

तद् आमिषम् परित्यज्य स सुखम् सम विन्दत

03 न मे मान् आवमानौ स्तो न चिन्ता गेह पुत्रिणाम्

आत्म क्रीड आत्म रति: विचरामीह बालवत्

04 द्वावेव चिन्तया मुक्तौ परम् आनन्द आप्लुतौ

यो विमुग्धो जडो बालो यो गुणेभ्य: परम् गत:

05 क्वचित् कुमारी त्वात् मानम् वृणानान् गृह मागतान्

स्वयम् तान् अर्हया मास क्वापि यातेषु बन्धुषु

06 तेषाम् अभ्यव हारार्थम् शालीन् रहसि पार्थिव

अवघ्नन्त्या: प्रकोष्ठस् था: चक्रु: शङ्खा: स्वनम् महत्

07 सा तज् जुगुप्सितम् मत्वा महती वृईडिता तत:

बभञ्जै कै कश: शङ्खान् द्वौ द्वौ पाण्योर् अशेषयत्

08 उभयोरप् यभूद् घोषो ह्यवघ्नन्त् या: स्वशङ्खयो:

तत्राप् येकम् निरभिदद् एकस्मान् नाभवद् ध्वनि:

09 अन्व शिक्षम् इमम् तस्या उपदेशम् अरिन्दम

लोकान् अनुचरन् नेतान् लोक तत्त्व विवित्सया

10 वासे बहूनाम् कलहो भवेद् वार्ता द्वयोर् अपि

एक एव चरेत् तस्मात् कुमार्या इव कङ्कण:

11 मन एकत्र सम्युञ्ज्यात् जितश्वा सो जितासन:

वैराग्याभ् यास योगेन ध्रियमाण मतन्द्रित:

12 यस्मिन् मनो लब्ध पदम् यदे तच् छनै: शनैर् मुञ्चति कर्मरेणून्

सत्त्वेन वृद्धेन रजस् तमश् च विधूय निर्वाणम् उपैत् य निन्धनम्

13 तदैव मात्मन् यवरुद्ध चित्तो न वेद किञ्चिद् बहिर् अन्तरम् वा

यथेषु कारो नृपतिम् व्रजन्तम् इषौ गतात्मा न ददर्श पार्श्वे

14 एकचारि अनिकेत: स्याद् अप्रमत्तो गुहाशय:

अलक्ष्यमाण आचारै: मुनिर् एको ऽल्प भाषण:

15 गृहारम्भो ऽति दु:खाय विफलश् चाध्रु वात्मन:

सर्प: परकृतम् वेश्म प्रविश्य सुखमे धते

16 एको नारायणो देव: पूर्व सृष्टम् स्व मायया

सम्हृत्य काल कलया कल्पान्त इदम् ईश्वर:

एक एवा द्वितीयो ऽभूद् आत्मा धारो ऽखिल् आश्रय:

17 कालेन् आत्मानु भावेन साम्यम् नीतासु शक्तिषु

सत्त्वादिषु आदि पुरुष: प्रधान पुरुषेश्वर:

18 परावराणाम् परम आस्ते कैवल्य सञ्ज्ञित:

केवल् आनुभवान् अन्द सन्दो हो निरुपाधिक:

19 केवल् आत्म् आनुभावेन स्व मायाम् त्रि गुणात्मिकाम्

सङ्क्षोभयन् सृजत् यादौ तया सूत्रम् अरिन्दम

20 ताम् आहु: त्रि गुण व्यक्तिम् सृजन्तीम् विश्वतो मुखम्

यस्मिन् प्रोतम् इदम् विश्वम् येन सम्सर ते पुमान्

21 यथोर्णनाभिर् हृदयाद् ऊर्णाम् सन्तत्य वक्त्रत:

तया विहृत्य भूयस्ताम् ग्रसत्येवम् महेश्वर:

22 यत्र यत्र मनो देही धारयेत् सकलम् धिया

स्नेहाद् द्वेषाद् भयाद् वापि याति तत् तत् स्वरूपताम्

23 कीट: पेशस् कृतम् ध्यायन् कुड्याम् तेन प्रवेशित:

याति तत् सात्मताम् राजन् पूर्व रूपम् असन्त्यजन्

24 एवम् गुरुभ्य एतेभ्य एषा मे शिक्षिता मतिः

स्वात्मोप शिक्षिताम् बुद्धिम् शृणु मे वदतः प्रभो

25 देहो गुरुर् मम विरक्ति विवेक हेतुर्

बिभ्रत्स्म सत्त्व निधनम् सत तार्त् युदर्कम्

तत्त्वान् यनेन विमृशामि यथा तथापि

पारक्यम् इत्य वसितो विचराम्य सङ्गः

26 जाय् आत्मजार् थ पशु भृत्य गृहाप्त वर्गान्

पुष्नाति यत् प्रिय चिकीर् षुतया वितन्वन्

स्वान्ते सकृच् छ्रमव रुद्ध धनः स देहः

सृष्ट्वास्य बीजम् अवसीदति वृक्ष धर्मः

27 जिह्वैकतो ऽमुम् अपकर्षति कर्हि तर्षा

शिश्नो ऽन्यतस् त्व गुदरम् श्रवणम् कुतश्चित्

घ्राणो ऽन्यतश् चपल दृक् क्व च कर्म शक्तिर्

बह्व्यः सपत्न्य इव गेह पतिम् लुनन्ति

28 सृष्ट्वा पुराणि विविधानि अजयात्म शक्त्या

वृक्षान् सरी सृप पशून् खगदम्श मत्स्यान्

तैस् तैर् अतुष्ट हृदयः पुरुषम् विधाय

ब्रह्माव लोक धिषणम् मुदमाप देवः

29 लब्ध्वा सु दुर्लभम् इदम् बहु सम्भवान् ते

मानुष्यम् अर्थदम् अनित्यम् अपीह धीरः

तूर्णम् यतेत न पतेद् अनुमृत्यु यावत्

निःश्रेयसा य विषयः खलु सर्वतः स्यात्

30 एवम् सञ्जात वैराग्यो विज्ञाना लोक आत्मनि

विचरामि मही मेताम् मुक्त सङ्गो ऽनहङ्कृति

31 न ह्ये कस्माद् गुरोर् ज्ञानम् सुस्थिरम् स्यात् सु पुष्कलम्

ब्रह्मै तद् अद्वितीयम् वै गीयते बहु धर्षिभिः

32 श्री भगवान् उवाच

इत् युक्त्वा स यदुम् विप्रस् तमा मन्त्र्य गभीरधी:

वन्दितो ऽभ्यर्थितो राज्ञा ययौ प्रीतो यथा गतम्

33 अवधूत वच: श्रुत्वा पूर्वेषाम् न: स पूर्वज:

सर्व सङ्ग विनिर् मुक्त: सम चित्तो बभू व ह

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

एकादश स्कन्दे नवमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ एकादश स्कन्द: दशमो ऽध्याय :

स्कन्द- 11: अध्याय- 10

01 श्री भगवान् उवाच

मयो दिते ष्ववहित: स्वधर्मेषु मदाश्रय:

वर्णाश्रम कुलाचारम् अकामात्मा समा चरेत्

02 अन्वीक्षेत विशुद् धात्मा देहिनाम् विषयात् मनाम्

गुणेषु तत्त्व ध्यानेन सर्वारम्भ विपर्ययम्

03 सुप्तस्य विषया लोको ध्यायतो वा मनोरथ:

नानात्म कत्वाद् विफल: तथा भेद् आत्मधीर् गुणै:

04 निवृत्तम् कर्म सेवेत प्रवृत्तम् मत् परस्त् यजेत्

जिज्ञासायाम् सम्प्र वृत्तो नाद्रियेत् कर्म चोदनाम्

05 यमान् अभीक्ष्णम् सेवेत नियमान् मत् पर: क्वचित्

मद् अभिज्ञम् गुरुम् शान्तम् उपासीत मद् आत्मकम्

06 अमान्य मत्सरो दक्षो निर्ममो दृढ सौहृद:

असत्वरो ऽर्थ जिज्ञासुर् अनसूयुर् अमोघवाक्

07 जाया पत्य गृह क्षेत्र स्वजन द्रविणा दिषु

उदासीन: समम् पश्यन् सर्वेष् वर्थम् इवात्मन:

08 विलक्षण: स्थूल सूक्ष्माद् देहाद् आत्मेक्षिता स्वदृक्

यथ् आग्निर् दारुणो दाह्याद् दाह को ऽन्य: प्रकाशक:

09 निरोधोत् पत् त्यणुबृहन् नानात्वम् तत् कृतान् गुणान्

अन्त: प्रविष्ट आधत्त एवम् देह गुणान् पर:

10 योऽसौ गुणै: विरचितो देहोऽयम् पुरुषस्य हि

सम्सारस् तन् निबन्धोऽयम् पुम्सो विद्या च्छिदात्मन:

11 तस्माज् जिज्ञास यात्मानम् आत्मस्थम् केवलम् परम्

सङ्गम्य निरसे दे तद् वस्तु बुद्धिम् यथाक्रमम्

12 आचार्यो ऽरणिराद् य: स्याद् अन्तेवास् युत् तरारणि:

तत् सन्धानम् प्रवचनम् विद्या सन्धि: सुखावह:

13 वैशारदी साति विशुद्ध बुद्धिर् धुनोति मायाम् गुण सम् प्रसूताम्

गुनाम्श् च सन्दह्य यदात्म मेतत् स्वयम् च शाम्यति असमिद्य थाग्नि:

14 अथैषाम् कर्म कर्तॄणाम् भोक्तॄणाम् सुख दु:खयो:

नानात्वम् अथ नित्यत्वम् लोक कालागम् आत्मनाम्

15 मन्यसे सर्व भावानाम् सम्स्था ह्यौत् पत्तिकी यथा

तत् तद् आकृति भेदेन जायते भिद्यते च धी:

16 एवम् अप्यङ्ग सर्वेषाम् देहिनाम् देह योगत:

कालाव यवत: सन्ति भावा जन्मादयो ऽसकृत्

17 अत्रापि कर्मणाम् कर्तु: अस्वा तन्त्र्यम् च लक्ष्यते

भोक्तुश् च दु:ख सुखयो: को न्वर्थो विवशम् भजेत्

18 न देहिनाम् सुखम् किञ्चिद् विद्यते विदुषाम् अपि

तथा च दु:खम् मूढानाम् वृथा हङ्करणम् परम्

19 यदि प्राप्तिम् विघातम् च जानन्ति सुख दुःखयोः

ते ऽप्यद्धा न विदुर् योगम् मृत्युर् न प्रभवेद् यथा

20 को ऽन्वर्थः सुख यत् येनम् कामो वा मृत्युर् अन्तिके

आघातम् नीय मानस्य वध्यस्ये व न तुष्टिदः

21 श्रुतम् च दृष्टवद् दुष्टम् स्पर्धासू यात् य यव्ययैः

बह्वन्तराय कामत्वात् कृषिवच् चापि निष्फलम्

22 अन्तरायैर् अविहितो यदि धर्मः स्वनुष्ठितः

तेनापि निर्जितम् स्थानम् यथा गच्छति तच् छृणु

23 इष्ट्वेह देवता यज्ञैः स्वर्लोकम् याति याज्ञिकः

भुञ्जीत देववत् तत्र भोगान् दिव्यान् निजार्जितान्

24 स्व पुण्यो पचिते शुभ्रे विमान उपगीयते

गन्धर्वैर् विहरन् मध्ये देवीनाम् हृद्यवे षधृक्

25 स्त्रीभिः काम गयानेन किङ्किनी जालमालिना

क्रीडन् न वेदात्म पातम् सुरा क्रीडेषु निर्वृतः

26 तावत् प्रमोदते स्वर्गे यावत् पुण्यम् समाप्यते

क्षीण पुन्यः पत त्यर्वाग् अनिच्छन् काल चालितः

27 यदि अधर्म रतः सङ्गादत् असताम् वाजितेन्द्रियः

कामात्मा कृपणो लुब्धः स्त्रैणो भूत विहिम्सकः

28 पशून विधिना लभ्य प्रेत भूत गणान् यजन्

नरकान् अवशो जन्तुः गत्वा यात् युल्बणम् तमः

29 कर्माणि दुःखो दर्काणि कुर्वन् देहेन तैः पुनः

देहम् आभजते तत्र किम् सुखम् मर्त्य धर्मिणः

30 लोकानाम् लोक पालानाम् मद् भयम् कल्प जीविनाम्

ब्रह्मणो ऽपि भयम् मत्तो द्वि परार्ध परायुषः

31 गुणाः सृजन्ति कर्माणि गुणो ऽनुसृज ते गुणान्

जीवस्तु गुण सम्युक्तो भुङ्क्ते कर्म फलान् यसौ

32 यावत् स्याद् गुणवै षम्यम् तावन् नानात्व मात्मन:

नानात्वम् आत्मनो यावत् पार तन्त्र्यम् तदैव हि

33 यावद् अस्यास्व तन्त्रत्वम् तावद् ईश्वरतो भयम्

य एतत् सम् उपासीरन्: ते मुह्यन्ति शुचार्पिता:

34 काल आत्मा गमो लोक: स्वभावो धर्म एव च

इति माम् बहुधा प्राहु: गुण व्यतिकरे सति

35 श्री उद्धव उवाच

गुणेषु वर्तमानो ऽपि देह जेषु अनपा वृत:

गुणैर्न बध्यते देही बध्यते वा कथम् विभो

36 कथम् वर्ते त विहरेत् कैर्वा ज्ञायेत लक्षणै:

किम् भुञ्जीतो त विसृजेच् छयीता सीत याति वा

37 एतद् अच्युत मे ब्रूहि प्रश्नम् प्रश्न विदाम् वर

नित्य मुक्तो नित्य बद्ध एक एवेति मे भ्रम:

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

एकादश स्कन्दे दशमो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ एकादश स्कन्द: एका दशो ऽध्याय :

स्कन्द- 11: अध्याय- 11

01 श्री भगवान् उवाच

बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुत:

गुणस्य माया मूलत्वात् न मे मोक्षो न बन्धनम्

02 शोक मोहौ सुखम् दुःखम् देहा पत्तिश् च मायया

स्वप्नो यथ् आत्मनः ख्यातिः सम्सृतिर् न तु वास्तवी

03 विद्या विद्ये मम तनू विद् ध्युद्धव शरीरिणाम्

मोक्ष बन्ध करी आद्ये मायया मे विनिर्मिते

04 एकस् यैव ममाम् शस्य जीवस् यैव महामते

बन्धो ऽस्या विद्यया नादिः विद्यया च तथे तरः

05 अथ बद्धस्य मुक्तस्य वै लक्षण्यम् वदामि ते

विरुद्ध धर्मिणोस् तात स्थितयोर् एक धर्मिणि

06 सुपर्णा वेतौ सदृशौ सखायौ यदृच्छ यैतौ कृतनीडौ च वृक्षे

एक स्तयोः खादति पिप्पलान्नम् अन्यो निरन्नो ऽपि बलेन भूयान्

07 आत्मानम् अन्यम् च स वेद विद्वान् अपिप्पलादो न तु पिप्पलादः

यो ऽविद्यया युक् सतु नित्य बद्धो विद्या मयो यः सतु नित्य मुक्तः

08 देहस्थो ऽपि न देहस्थो विद्वान् स्वप्नाद् यथोत् थितः

अदेहस्थो ऽपि देहस्थः कुमतिः स्वप्न दृग् यथा

09 इन्द्रियैर् इन्द्रियार् थेषु गुणैर् अपि गुणेषु च

गृह्यमाणेष् वहम् कुर्यात् न विद्वान् यस् त्ववि क्रियः

10 दैवाधीने शरीरे ऽस्मिन् गुण भाव्येन कर्मणा

वर्तमानो ऽबुधस् तत्र कर्तास् मीति निबध्यते

11 एवम् विरक्तः शयन आसनाटन मज्जने

दर्शन स्पर्शन घ्राण भोजन श्रवणा दिषु

न तथा बध्यते विद्वाम् तत्र तत्रा द यन् गुणान्

12 प्रकृतिस्थो ऽप्यसम् सक्तो यथा खम् सवितानिलः

वैशारद् येक्षया सङ्ग शितया छिन्न सम्शयः

प्रति बुद्ध इव स्वप्नात् नानात्वाद् विनि वर्तते

14 यस्य स्युः वीत सङ्कल्पाः प्राणेन्द्रिय मनोधियाम्

वृत्तयः स विनिर् मुक्तो देहस्थो ऽपि हि तद् गुणैः

15 यस् यात्मा हिम्स्यते हिम्स्रैः येन किञ्चिद् यदृच्छया

अर्च्यते वा क्वचित् तत्र न व्यति क्रियते बुधः

16 न स्तु वीत न निन्देत कुर्वतः साध्व साधु वा

वदतो गुण दोषाभ्याम् वर्जितः सम दृङ्मुनिः

17 न कुर्यान् न वदेत् किञ्चित् न ध्यायेत् साध्व साधु वा

आत्मा रामो ऽनया वृत्त्या विचरेत् जडवन् मुनिः

18 शब्द ब्रह्मणि निष्णातो न निष्णायात् परे यदि

श्रमस् तस्य श्रम फलो हयधेनुम् इव रक्षतः

19 गाम् दुग्ध दोहाम् असतीम् च भार्याम् देहम् पराधीनम् असत् प्रजाम् च

वित्तम् त्व तीर्थी कृतम् अङ्ग वाचम् हीनाम् मया रक्षति दुःख दुःखी

20 यस्याम् न मे पावनम् अङ्ग कर्म स्थित् युद् भव प्राण निरोधमस्य

लीला ऽवतारेप् सित जन्म वा स्याद् वन्ध्याम् गिरम् ताम् बिभृयान् न धीरः

21 एवम् जिज्ञासया पोह्य नानात्व भ्रमम् आत्मनि

उपारमेत विरजम् मनो मय्यर्प्य सर्वगे

22 यद् य नीशो धार यितुम् मनो ब्रह्मणि निश्चलम्

मयि सर्वाणि कर्माणि निरपेक्षः समाचर

23 श्रद्धालुर् मे कथाः शृण्वन् सुभद्रा लोक पावनीः

गायन् अनुस्मरन् कर्म जन्म चाभ् इनयन् मुहुः

24 मद् अर्थे धर्म कामार्थान् आचरन् मद् अपाश्रयः

लभते निश्चलाम् भक्तिम् मय् युद्धव सनातने

25 सत्सङ्ग लब्धया भक्त्या मयि माम् स उपासिता

स वै मे दर्शितम् सद्भिः अञ्जसा विन्द ते पदम्

26 श्री उद्धव उवाच

साधुस् तवोत्तम श्लोक मतः कीदृग् विधः प्रभो

भक्तिस्त्वय् युपयुज् येत कीदृशी सद्भिर् आदृता

27 एतन् मे पुरुषाध् यक्ष लोकाध् यक्ष जगत् प्रभो

प्रणताय अनुरक्ताय प्रपन्नाय च कथ् यताम्

28 त्वम् ब्रह्म परमम् व्योम पुरुष: प्रकृते: पर:

अवतीर्णोऽसि भगवन् स्वेच्छो पात् त पृथग् वपु:

29 श्री भगवान् उवाच

कृपालु: अकृत द्रोहस् तितिक्षु: सर्व देहिनाम्

सत्य सारो ऽन वद् यात्मा सम: सर्वोप कारक:

30 कामै: अहतधीर् दान्तो मृदु: शुचिर् अकिञ्चन:

अनीहो मित भुक् षान्त: स्थिरो मच् छरणो मुनि:

31 अप्रमत्तो गभीर् आत्मा धृतिमान् जित षड्गुण:

अमानी मानद: कल्पो मैत्र: कारुणिक: कवि:

32 आज्ञा यैवम् गुणान् दोषान् मया दिष्टान् अपि स्वकान्

धर्मान् सन्त्यज्य य: सर्वान् माम् भजेत स सत्तम:

33 ज्ञात्वा ज्ञात्वा थ ये वै माम् यावान् यश्चास्मि या दृश:

भजन्ति अनन्य भावेन ते मे भक्त तमा मता:

34 मल्लिङ्ग मद् भक्त जन दर्शन स्पर्शन् आर्चनम्

परिचर्या स्तुति: प्रह्व गुण कर्मानु कीर्तनम्

35 मत् कथा श्रवणे श्रद्धा मद् अनुध्यान मुद्धव

सर्व लाभोप हरणम् दास्येन आत्म निवेदनम्

36 मज् जन्म कर्म कथनम् मम पर्वा ऽनुमोदनम्

गीत ताण्डव वादित्र गोष्ठीभि: मद् गृहोत्सव:

37 यात्रा बलि विधानम् च सर्व वार्षिक पर्वसु

वैदिकी तान्त्रिकी दीक्षा मदीय व्रत धारणम्

38 ममार्चा स्थापने श्रद्धा स्वत: सम् हत्य चोद्यम:

उद्यानोप वना क्रीड पुर मन्दिर कर्मणि

39 सम् मार्जनोप लेपाभ्याम् सेक मण्डल वर्तनै:

गृह शुश्रूषणम् मह्यम् दास वद् यद् अमायया

40 अमानित्वम् अदम्भित्वम् कृतस्य अपरि कीर्तनम्

अपि दीपाव लोकम् मे नोपयुञ्ज्यात् निवेदितम्

41 यद् यदिष्ट तमम् लोके यच्चाति प्रियम् आत्मनः

तत् तन् निवेदयेन् मह्यम् तद् आनन्त्या य कल्पते

42 सूर्यो ऽग्निर् ब्राह्मणू गावो वैष्णवः खम् मरुज् जलम्

भूर् आत्मा सर्व भूतानि भद्र पूजा पदानि मे

43 सूर् ये तु विद्यया त्रय्या हविषाग्नौ यजेत माम्

आतिथ्येन तु विप्राग्र्ये गोष्वङ्गय वसादिना

44 वैष्णवे बन्धु सत् कृत्या हृदि खे ध्यान निष्ठया

वायौ मुख्य धिया तोये द्रव्यैः तोय पुरस् क्रुतैः

45 स्थण्डिले मन्त्र हृदयैः भोगैर् आत्मानम् आत्मनि

क्षेत्रज्ञम् सर्व भूतेषु समत्वेन यजे त माम्

46 धिष्ण्येष् वेष्वि ति मद् रूपम् शङ्ख चक्र गदा ऽम्बुजैः

युक्तम् चतुर् भुजम् शान्तम् ध्यायन् अर्चेत् समाहितः

47 इष्टा पूर्तेन मामेवम् यो यजे त समाहितः

लभते मयि सद् भक्तिम् मत् स्मृतिः साधु सेवया

48 प्रायेण भक्ति योगेन सत्सङ्गेन विनोद्धव

नोपायो विद्यते सध्रयङ् प्रायणम् हि सतामहम्

49 अथै तत् परमम् गुह्यम् शृण्वतो यदु नन्दन

सुगोप्यम् अपि वक्ष्यामि त्वम् मे भृत्यः सुहृत् सखा

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

एकादश स्कन्दे एका दशो ऽध्याय ः॥

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ एकादश स्कन्दः द्वा दशो ऽध्याय :

स्कन्द- 11: अध्याय- 12

01 श्री भगवान् उवाच

न रोधयति माम् योगो न साङ्ख्यम् धर्म एव च

न स्वाध्यायस् तपस् त्यागो नेष्टा पूर्तम् न दक्षिणा

02 व्रतानि यज्ञश् छन्दाम्सि तीर्थानि नियमा यमाः

यथा वरुन्धे सत्सङ्गः सर्व सङ्गाप हो हि माम्

03 सत्सङ्गेन हि दैतेया यातु धाना मृगाः खगाः

गन्धर्व् आप्सरसो नागाः सिद्धाश् चारण गुह्यकाः

04 विद्याधरा मनुष्येषु वैश्याः शूद्राः स्त्रियो ऽन्त्यजाः

रजस् तमःप्रकृतयः तस्मिन् तस्मिन् युगे ऽनघ

05 बहवो मत् पदम् प्राप्ताः त्वाष्ट्र कायाध वादयः

वृष पर्वा बलिर् बाणो मयश् चाथ विभीषणः

06 सुग्रीवो हनुमान् ऋक्षो गजो गृध्रो वणिक् पथः

व्याधः कुब्जा व्रजे गोप्यो यज्ञ पत्न् यस् त थापरे

07 ते नाधी त श्रुति गणा नोपासित महत् तमाः

अव्रता तप्त तपसः सत्सङ्गान् माम् उपागताः

08 केवलेन हि भावेन गोप्यो गावो नगा मृगाः

ये ऽन्ये मूढधियो नागाः सिद्धा मामीयु रञ्जसा

09 यम् न योगेन साङ्ख्येन दान व्रत तपो ऽध्वरैः

व्याख्या स्वाध्या य सन्न्यासैः प्राप्नुयाद् यत्नवान् अपि

10 रामेण सार्धम् मथुराम् प्रणीते श्वा फल्किना मय् यनु रक्त चित्ताः

विगाढ भावेन न मे वियोग तीव्राधयो ऽन्यम् ददृशुः सुखाय

11 तास्ताः क्षपाः प्रेष्ठ तमेन नीता मयैव वृन्दावन गो चरेण

क्षणार्ध वत्ताः पुनरङ्ग तासाम् हीना मया कल्प समा बभूवुः

12 ता नाविदन् मय् यनुषङ्ग बद्ध धियः स्वम् आत्मानम् अदस्त थेदम्

यथा समाधौ मुनयो ऽब्धितोये नद्यः प्रविष्टा इव नाम रूपे

13 मत् कामा रमणम् जारम् अस्व रूप विदो ऽबलाः

ब्रह्म माम् परमम् प्रापुः सङ्गात्ः छत सहस्रशः

14 तस्मात् त्वम् उद्धवोत् सृज्य चोदनाम् प्रति चोदनाम्

प्रवृत्तम् च निवृत्तम् च श्रोतव्यम् श्रुतम् एव च

15 माम् एकम् एव शरणम् आत्मानम् सर्व देहिनाम्

याहि सर्वात्म भावेन मया स्या ह्यकुतो भयः

16 श्री उद्धव उवाच

सम्शयः शृण्वतो वाचम् तव योगेश् वरेश्वर

न निवर्त त आत्मस्थो येन भ्राम्यति मे मनः

17 श्री भगवान् उवाच

स एष जीवो विवर प्रसूतिः प्राणेन घोषेण गुहाम् प्रविष्टः

मनोमयम् सूक्ष्मम् उपेत्य रूपम् मात्रा स्वरो वर्ण इति स्थविष्ठः

18 यथानलः खे ऽनिल बन्धु रूष्मा बलेन दारुनि अधि मथ्य मानः

अणुः प्रजातो हविषा समेधते तथैव मे व्यक्ति रियम् हि वाणी

19 एवम् गदिः कर्म गतिर् विसर्गो घ्राणो रसो दृक् स्पर्शः श्रुतिश् च

सङ्कल्प विज्ञानम् अथा ऽभिमानः सूत्रम् रजःसत्त्व तमो विकारः

20 अयम् हि जीवः त्रि वृदब्ज योनिः अव्यक्त एको वयसा स आद्यः

विश्लिष्ट शक्तिः बहुधेव भाति बीजानि योनिम् प्रति पद्य यद् वत्

21 यस्मिन् निदम् प्रोतम् अशेष मोतम् पटो यथा तन्तु वितान सम्स्थः

य एष सम्सार तरुः पुराणः कर्मात्मकः पुष्प फले प्रसूते

22 द्वे अस्य बीजे शत मूलस् त्रिनालः पञ्च स्कन्धः पञ्च रस प्रसूतिः

दशैक शाखो द्वि सुपर्ण नीडः त्रिवल्कलो द्विफलो ऽर्कम् प्रविष्टः

23 अदन्ति चैकम् फलमस्य गृध्रा ग्रामेचरा एकम् अरण्य वासाः

हम्सा य एकम् बहु रूपम् इज्यै: माया मयम् वेद स वेद वेदम्

24 एवम् गुरूपासन यैक भक्त्या विद्या कुठारेण शितेन धीर:

विवृश्च्य जीवाशयम् अप्रमत्त: सम्पद्य चात्मानम् अथ त्यजास्त्रम्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

एकादश स्कन्दे द्वा दशो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ एकादश स्कन्द: त्रयो दशो ऽध्याय :

स्कन्द- 11: अध्याय- 13

01 श्री भगवान् उवाच

सत्त्वम् रजस् तम इति गुणा बुद्धेर्न चात्मन:

सत्त्वेनान् यत मौ हन्यात् सत्त्वम् सत्त्वेन चैव हि

02 सत्त्वाद् धर्मो भवेद् वृद्धात् पुम्सो मद् भक्ति लक्षण:

सात्त् विकोपा सया सत्त्वम् ततो धर्म: प्रवर्तते

03 धर्मो रजस् तमो हन्यात् सत्त्व वृद्धिर् अनुत्तम:

आशु नश्यति तन् मूलो ह्यधर्म उभये हते

04 आगमो ऽप: प्रजा देश: काल: कर्म च जन्म च

ध्यानम् मन्त्रो ऽथ सम्स्कारो दशैते गुण हेतव:

05 तत् तत् सात्त्विक मे वैषाम् यद् यद् वृद्धा: प्रचक्षते

निन्दन्ति तामसम् तत् तद् राजसम् तद् उपेक्षितम्

06 सात्त्विकान् येव सेवेत पुमान् सत्त्व विवृद्धये

ततो धर्मस् ततो ज्ञानम् यावत् स्मृतिर् अपोहनम्

07 वेणु सङ्घर्षजो वह्नि: दग्ध्वा शाम् यति तद् वनम्

एवम् गुण व्यत्य यजो देह: शाम्यति तत् क्रिय:

08 श्री उद्धव उवाच

विदन्ति मर्त्या: प्रायेण विषयान् पदम् आपदाम्

तथापि भुञ्जते कृष्ण तत् कथम् श्व खराजवत्

09 श्री भगवान् उवाच

अहम् इत् यन्यथा बुद्धि: प्रमत् तस्य यथा हृदि

उत् सर्पति रजो घोरम् ततो वैकारिकम् मन:

10 रजो युक्तस्य मनस: सङ्कल्प: सवि कल्पक:

तत: कामो गुण ध्यानाद् दु:सह: स्याद्धि दुर् मते:

11 करोति काम वशग: कर्माणि अवि जितेन्द्रिय:

दु:खो दर्काणि सम्पश्यन् रजो वेग विमोहित:

12 रजस् तमोभ्याम् यद् अपि विद्वान् विक्षिप्तधी: पुन:

अतन्द्रितो मनो युञ्जन् दोष दृष्टिर् न सज्जते

13 अप्रमत्तो ऽनु युञ्जीत मनो मय्यर्पयन् छनै:

अनिर्विण्णो यथा कालम् जित श्वासो जितासन:

14 एतावान् योग आदिष्टो मच् छिष्यै: सनकादिभि:

सर्वतो मन आकृष्य मय् यद्धा वेश्यते यथा

15 श्री उद्धव उवाच

यदा त्वम् सनका दिभ्यो येन रूपेण केशव

योगम् आदिष्टवान् एतद् रूपम् इच्छामि वेदितुम्

16 श्री भगवान् उवाच

पुत्रा हिरण्य गर्भस्य मानसा: सनकादय:

पप्रच्छु: पितरम् सूक्ष्माम् योगस् यै कान्तिकीम् गतिम्

17 सनकादय ऊचु:

गुणेषु आविशते चेतो गुणा: चेतसि च प्रभो

कथम् अन्योन्य सन् त्यागो मुमुक्षोः अति तितीर्षोः

18 श्री भगवान् उवाच

एवम् पृष्टो महा देवः स्वयम्भूः भूत भावनः

ध्याय मानः प्रश्न बीजम् नाभ्य पद् यत कर्मधीः

19 स माम् अचिन्तयद् देवः प्रश्न पारति तीर्षया

तस्याहम् हम्स रूपेण सकाशम् अगमम् तदा

20 दृष्ट्वा माम् त उपव्रज्य कृत्व पादाभि वन्दनम्

ब्रह्माणम् अग्रतः कृत्वा पप्रच्छुः को भवानिति

21 इत्यहम् मुनिभिः पृष्टः तत्त्व जिज्ञासु भिस् तदा

यदवोचम् अहम् तेभ्यः तद् उद्धव निबोध मे

22 वस्तुनो यद् य नानात्वम् आत्मनः प्रश्न ईदृशः

कथम् घटेत वो विप्रा वक्तुर्वा मे क आश्रयः

23 पञ्च् आत्मकेषु भूतेषु समानेषु च वस्तुतः

को भवान् इति वः प्रश्नो वाचा रम्भो ह्यनर्थकः

24 मनसा वचसा दृष्ट्या गृह्यते ऽन्यैः अपीन्द्रियैः

अहमेव न मत्तो ऽन्यद् इति बुध्यध्वम् अञ्जसा

25 गुणेष्वा विशते चेतो गुणाः चेतसि च प्रजाः

जीवस्य देह उभयम् गुणाश् चेतो मद् आत्मनः

26 गुणेषु चाविशच् चित्तम् अभीक्ष्णम् गुण सेवया

गुणाश् च चित्त प्रभवा मद् रूप उभयम् त्यजेत्

27 जाग्रत् स्वप्नः सुषुप्तम् च गुणतो बुद्धि वृत्तयः

तासाम् विलक्षणो जीवः साक्षि त्वेन विनिश्चितः

28 यर्हि सम्सृति बन्धो ऽयम् आत्मनो गुण वृत्तिदः

मयि तुर्ये स्थितो जह्यात् त्यागस् तद् गुण चेतसाम्

29 अहङ्कार कृतम् बन्धम् आत्मनो ऽर्थ विपर्ययम्

विद्वान् निर्विद्य सम्सार चिन्ताम् तुर्ये स्थितस्त् यजेत्

30 यावन् नानार्थ धीः पुम्सो न निवर्ते त युक्तिभिः

जागर्त् यपि स्वपन् नज्ञः स्वप्ने जागरणम् यथा

31 असत्त्वाद् आत्मनो ऽन्येषाम् भावानाम् तत् कृता भिदा

गतयो हेतवश् चास्य मृषा स्वप्न दृशो यथा

32 यो जागरे बहिर् अनुक्षण धर्मिणो ऽर्थान्

भुङ्क्ते समस् त करणैः हृदि तत् सदृक्षान्

स्वप्ने सुषुप्त उप सम्हर ते स एकः

स्मृत्यन् वयात् त्रि गुण वृत्ति दृग् इन्द्रियेशः

33 एवम् विमृश्य गुणतो मनसस् त्र्य वस्था

मन् मायया मयि कृता इति निश्चि तार्थाः

सञ्छिद्य हार्दम् अनुमान सदुक्ति तीक्ष्ण

ज्ञानासिना भजत माखिल सम्शयाधिम्

34 ईक्षेत विभ्रमम् इदम् मनसो विलासम्

दृष्टम् विनष्टम् अति लोलम् अलात चक्रम्

विज्ञान मेकम् उरुधेव विभाति माया

स्वप्न स्त्रिधा गुण विसर्ग कृतो विकल्पः

35 दृष्टिम् ततः प्रति निवर्त्य निवृत्त तृष्णस्

तूष्णीम् भवेन् निज सुखानु भवो निरीहः

सन्दृश् यते क्व च यदीदम् अवस्तु बुद्ध्या

त्यक्तम् भ्रमाय न भवेत् स्मृति रानि पातात्

36 देहम् च नश्वरम् अवस्थितम् उत्थितम् वा

सिद्धो न पश्यति यतो ऽध्यग मत् स्वरूपम्

दैवाद् अपेतम् उथ दैव वशादु पेतम्

वासो यथा परिकृतम् मदिराम दान्धः

37 देहो ऽपि दैव वशगः खलु कर्म यावत्

स्वारम्भकम् प्रति समी क्षत एव सासुः

तम् सप्र पञ्चम् अधि रूढ समाधि योग:

स्वाप्नम् पुनर्न भजते प्रति बुद्ध वस्तु:

38 मयै त दुक्तम् वो विप्रा गुह्यम् यत् साङ्ख्य योगयो:

जानीत मागतम् यज्ञम् युष्मद् धर्म विवक्षया

39 अहम् योगस्य साङ्ख्यस्य सत्यस् यर्तस्य तेजस:

परायणम् द्विज श्रेष्ठा: श्रिय: कीर्तेर् दमस्य च

40 माम् भजन्ति गुणा: सर्वे निर्गुणम् निरपेक्षकम्

सुहृदम् प्रियम् आत्मानम् साम्या सङ्गाद यो ऽगुणा:

41 इति मे छिन्न सन्देहा मुनय: सनकादय:

सभाज यित्वा परया भक्त्या गृणत सम्स्तवै:

42 तैर् अहम् पूजित: सम्यक् सम्स्तुत: परमर्षिभि:

प्रत्येयाय स्वकम् धाम पश्यत: परमेष्ठिन:

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

एकादश स्कन्दे त्रयो दशो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ एकादश स्कन्द: चतुर् दशो ऽध्याय :

स्कन्द- 11: अध्याय- 14

01 श्री उद्धव उवाच

वदन्ति कृष्ण श्रेयाम्सि बहूनि ब्रह्म वादिन:

तेषाम् विकल्प प्राधान्यम् उताहो एक मुख्यता

02 भवतो दाहृत: स्वामिन् भक्ति योगो ऽनपेक्षित:

निरस्य सर्वतः सङ्गम् येन त्वय्या विशेन् मनः

03 श्री भगवान् उवाच

कालेन नष्टा प्रलये वाणीयम् वेद सञ्ज्ञिता

मयादौ ब्रह्मणे प्रोक्ता धर्मो यस्याम् मद् आत्मकः

04 तेन प्रोक्ता च पुत्राय मनवे पूर्वजा य सा

ततो भृग्वादयो ऽगृह्णन् सप्त ब्रह्म महर्षयः

05 तेभ्यः पितृभ्यस् तत् पुत्रा देव दानव गुह्यकाः

मनुष्याः सिद्ध गन्धर्वाः स विद्याधर चारणाः

06 किन्देवाः किन्नरा नागा रक्षः किम्पुरुषा दयः

बह्व्यस् तेषाम् प्रकृतयो रजः सत्त्व तमो भुवः

07 याभिर् भूतानि भिद्यन्ते भूतानाम् मतयस् तथा

यथा प्रकृति सर्वेषाम् चित्रा वाचः स्रवन्ति हि

08 एवम् प्रकृति वैचित्र्याद् भिद्यन्ते मतयो नृणाम्

पारम् पर्येण केषाञ्चित् पाखण्ड मतयो ऽपरे

09 मन्माया मोहितधियः पुरुषाः पुरुषर्षभ

श्रेयो वदन्त् यनेकान्तम् यथा कर्म यथा रुचि

10 धर्ममेके यशश्चान् ये कामम् सत्यम् दमम् शमम्

अन्ये वदन्ति स्वार्थम् वा ऐश्वर्यम् त्याग भोजनम्

केचिद् यज्ञ तपो दानम् व्रतानि नियमान् यमान्

11 आद्यन्त वन्त एवैषाम् लोकाः कर्म विनिर्मिताः

दुःखो दर्कास् तमो निष्ठाः क्षुद्रा नन्दाः शुचार्पिताः

12 मय् यर्पित् आत्मनः सभ्य निरपेक्षस् य सर्वतः

मय् आत्मना सुखम् यत् तत् कुतः स्याद् विषयात् मनाम्

13 अकिञ्चनस्य दान् तस्य शान्तस्य सम चेतसः

मया सन्तुष्ट मनसः सर्वाः सुख मया दिशः

14 न पारमेष्ठ्यम् न महेन्द्र धिष्ण्यम्

न सार्व भौमम् न रसाधि पत्यम्

न योग सिद्धीर् अपुनर् भवम् वा

मय् यर्पितात् मेच् छति मद् विनान् यत्

15 न तथा मे प्रिय तम आत्म योनिर् न शङ्कर:

न च सङ्कर्षणो न श्री: नैवात्मा च यथा भवान्

16 निरपेक्षम् मुनिम् शान्तम् निर्वैरम् सम दर्शनम्

अनुव्रजाम् यहम् नित्यम् पूये येत् यङ्घ्रि रेणुभि:

17 निष्किञ्चना मय् यनुरक्त चेतस: शान्ता महान्तो ऽखिल जीव वत्सला:

कामैर् अनालब्ध धियो जुषन्ति यत् तन् नैर पेक्ष्यम् न विदु: सुखम् मम

18 बाध्यमानो ऽपि मद् भक्तो विषयै: अजितेन्द्रिय:

प्राय: प्रगल्भया भक्त्या विषयै: नाभि भूयते

19 यथाग्नि: सु समृद् धार्चि: करोत् येधाम्सि भस्म सात्

तथा मद् विषया भक्ति: उद्धवै नाम्सि कृत्स्नश:

20 न साधयति माम् योगो न साङ्ख्यम् धर्म उद्धव

न स्वाध्यायस् तपस् त्यागो यथा भक्तिर् ममोर्जिता

21 भक्त्याहम् एकया ग्राह्य: श्रद्ध यात्मा प्रिय: सताम्

भक्ति: पुनाति मन्निष्ठा श्वपाकान् अपि सम्भवात्

22 धर्म: सत्य दयो पेतो विद्या वा तप सान्विता

मद् भक्त्या पेत मात्मानम् न सम्यक् प्रपु नाति हि

23 कथम् विना रोमहर्षम् द्रवता चेतसा विना

विना आनन्दाश्रु कलया शुध्येद् भक्त्या विनाशय:

24 वाग् गद् गदा द्रवते यस्य चित्तम् रुदत् यभीक्ष्णम् हसति क्वचिच् च

विलज्ज उद्गायति नृत्यते च मद् भक्ति युक्तो भुवनम् पुनाति

25 यथ् आग्निना हेम मलम् जहाति ध्मातम् पुन: स्वम् भजते च रूपम्

आत्मा च कर्मानुशयम् विधूय मद् भक्ति योगेन भजत्य थो माम्

26 यथा यथ् आत्मा परिमृज्य ते ऽसौ मत् पुण्य गाथा श्रवणाभि धानै:

तथा तथा पश्यति वस्तु सूक्ष्मम् चक्षुर् यथै वाञ्जन सम्प्र युक्तम्

27 विषयान् ध्यायतश् चित्तम् विषयेषु विषज्जते

माम् अनुस्मर तश् चित्तम् मय्येव प्रविलीयते

28 तस्माद् असद् अभिध्यानम् यथा स्वप्न मनोरथम्

हित्वा मयि समाधत्स्व मनो मद् भाव भावितम्

29 स्त्रीणाम् स्त्री सङ्गिनाम् सङ्गम् त्यक्त्वा दूरत आत्मवान्

क्षेमे विविक्त आसीनः चिन्तयेन् मा मतन्द्रितः

30 न तथास् य भवेत् क्लेशो बन्धश्चान् य प्रसङ्गतः

योषित् सङ्गाद् यथा पुम्सो यथा तत् सङ्गि सङ्गतः

31 श्री उद्धव उवाच

यथा त्वाम् अरविन्दाक्ष यादृशम् वा यद् आत्मकम्

ध्यायेन् मुमुक्षुरे तन् मे ध्यानम् त्वम् वक्तु मर्हसि

32 श्री भगवान् उवाच

सम आसन आसीनः समकायो यथा सुखम्

हस्तावुत् सङ्ग आधाय स्वना साग्र कृतेक्षणः

33 प्राणस्य शोधयेन् मार्गम् पूर कुम्भ करेचकैः

विपर्ययेण् आपि शनैः अभ्यसेत् निर् जितेन्द्रियः

34 हृद्य विच्छिन्न मोम्कारम् घण्टा नादम् बिसोर्णवत्

प्राणेनो दीर्य तत् राथ पुनः सम्वेश येत् स्वरम्

35 एवम् प्रणवसम् युक्तम् प्राणम् एव समभ्य सेत्

दश कृत्वस् त्रि षवणम् मासाद् अर्वाग्जि तानिलः

36 हृत् पुण्डरीकम् अन्तः स्थम् ऊर्ध्व नालम् अधोमुखम्

ध्यात् वोर्ध्व मुख मुन्निद्रम् अष्टपत्रम् स कर्णिकम्

37 कर्णिकायाम् न्यसेत् सूर्य सोमाग्नीन् उत्त रोत्तरम्

वह्नि मध्ये स्मरेद् रूपम् ममै तद् ध्यान मङ्गलम्

38 समम् प्रशान्तम् सुमुखम् दीर्घ चारु चतुर् भुजम्

सु चारु सुन्दर ग्रीवम् सु कपोलम् शुचिस्मितम्

39 समान कर्णविन् यस्त स्फुरन् मकर कुण्डलम्

हेमाम्बरम् घन श्यामम् श्रीवत्स श्री निकेतनम्

40 शङ्ख चक्र गदा पद्म वनमाला विभूषितम्

नूपुरैः विलसत् पादम् कौस्तुभ प्रभया युतम्

41 द्युमत् किरीट कटक कटि सूत्राङ्गद् आयुतम्

सर्वाङ्ग सुन्दरम् हृद्यम् प्रसाद सुमुखे क्षनम्

42 सुकुमारम् अभिध्या येत् सर्वाङ्गेषु मनो दधत्

इन्द्रियाण् ईन्द्रियार् थेभ्यो मनसा कृष् य तन् मनः

बुद्ध्या सारथिना धीरः प्रणयेन् मयि सर्वतः

43 तत् सर्व व्यापकम् चित्तम् आकृष् यै कत्र धारयेत्

नान्यानि चिन्तयेद् भूयः सुस्मितम् भावयेन् मुखम्

44 तत्र लब्ध पदम् चित्तम् आकृष्य व्योम्नि धारयेत्

तच् च त्यक्त्वा मद् आरोहो न किञ्चिद् अपि चिन्त येत्

45 एवम् समाहित मतिः मामे वात्मान मात्मनि

विचष्टे मयि सर्वात्मन् ज्योतिर् ज्योतिषि सम्युतम्

46 ध्याने नेत्थम् सुतीव्रेण युञ्जतो योगिनो मनः

सम्यास् यत् याशु निर्वाणम् द्रव्य ज्ञान क्रिया भ्रमः

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

एकादश स्कन्दे चतुर् दशो ऽध्याय ः॥

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ एकादश स्कन्दः पञ्च दशो ऽध्याय ः

स्कन्द- *11:* अध्याय- *15*

*01* श्री भगवान् उवाच

जितेन्द्रियस् य युक्तस् य जित श्वासस् य योगिनः

मयि धार यतश् चेत उपतिष्ठन्ति सिद्धयः

*02* श्री उद्धव उवाच

कया धारणया का स्वित् कथम् स्वित् सिद्धिर् अच्युत

कति वा सिद्धयो ब्रूहि योगिनाम् सिद्धिदो भवान्

*03* श्री भगवान् उवाच

सिद्धयो ऽष्टा दश प्रोक्ता धारणा योग पारगैः

तासाम् अष्टौ मत् प्रधाना दशैव गुण हेतवः

*04* अणिमा महिमा मूर्तेः लघिमा प्राप्तिर् इन्द्रियैः

प्राकाम्यम् श्रुत दृष्टेषु शक्ति प्रेरण मीशिता

*05* गुणेषु असङ्गो वशिता यत् कामस् तदवस् यति

एता मे सिद्धयः सौम्य अष्टा वौत् पत्ति का मताः

*06* अनूर्मि मत्त्वम् देहे ऽस्मिन् दूर श्रवण दर्शनम्

मनोजवः काम रूपम् परकाय प्रवेशनम्

*07* स्वच्छन्द मृत्युः देवानाम् सह क्रीडानु दर्शनम्

यथा सङ्कल्प सम्सिद्धिः आज्ञा प्रतिहता गतिः

*08* त्रि कालज्ञत्वम् अद्वन्द्वम् परचित् ताद्य भिज्ञता

अग्न्यर् काम्बु विषादीनाम् प्रतिष्टम्भो ऽपराजयः

*09* एताश् चोद्दे शतः प्रोक्ता योग धारण सिद्धयः

यया धारणया या स्याद् यथा वा स्यान् निबोध मे

*10* भूत सूक्ष्मात् मनिमयि तन् मात्रम् धारयेन् मनः

अणिमानम् अवाप्नोति तन् मात्रोपास को मम

*11* महत् यात् मन्मयि परे यथा सम्स्थम् मनो दधत्

महिमानम् अवाप्नोति भूतानाम् च पृथक् पृथक्

12 परमाणु मये चित्तम् भूतानाम् मयि रञ्जयन्

कालसूक्ष्मार् थताम् योगी लघिमानम् अवाप्नु यात्

13 धारयन् मय्यहम् तत्त्वे मनो वैकारिके ऽखिलम्

सर्वेन्द्रियाणाम् आत्मत्वम् प्राप्तिम् प्राप्नोति मन्मनाः

14 महत् यात्मनि यः सूत्रे धारयेन् मयि मानसम्

प्राकाम्यम् पारमेष्ठ्यम् मे विन्दते ऽव्यक्त जन्मनः

15 विष्णौ त्र्यधीश् वरे चित्तम् धारयेत् काल विग्रहे

स ईशित्वम् अवाप्नोति क्षेत्र क्षेत्रज्ञ चोदनाम्

16 नारायणे तुरी याख्ये भगवच् छब्द शब्दिते

मनो मय् यादधद् योगी मद् धर्मा वशितामि यात्

17 निर्गुणे ब्रह्मणि मयि धारयन् विशदम् मनः

परमानन्दम् आप्नोति यत्र कामो ऽवसीयते

18 श्वेत द्वीप पतौ चित्तम् शुद्धे धर्म मये मयि

धारयन् छ्वेतताम् याति षड् ऊर्मि रहितो नरः

19 मय् याका शात्मनि प्राणे मनसा घोषम् उद्वहन्

तत्रोप लब्धा भूतानाम् हम्सो वाचः शृणोत् यसौ

20 चक्षुस् त्वष्टरि सम्योज्य त्वष्टारम् अपि चक्षुषि

माम् तत्र मनसा ध्यायन् विश्वम् पश्यति सूक्ष्म द्रुक्ः

21 मनो मयि सु सम्योज्य देहम् तद् अनुवायुना

मद् धारणानु भावेन तत् रात्मा यत्र वै मनः

22 यदा मन उपादाय यद् यद् रूपम् बुभूषति

तत् तद् भवेन् मनोरूपम् मद्योग बलम् आश्रयः

23 परकायम् विशन् सिद्ध आत्मानम् तत्र भावयेत्

पिण्डम् हित्वा विशेत् प्राणो वायु भूतः षडङ्घ्रि वत्

24 पार्ष्ण्य आपीड्य गुदम् प्राणम् हृद् उरःकण्ठम् ऊर्धसु

आरोप्य ब्रह्म रन्ध्रेण ब्रह्म नीत्वोत् सृजेत् तनुम्

25 विहरिष्यन् सुराक्रीडे मत्स्थम् सत्त्वम् विभावयेत्

विमाने नोपतिष् ठन्ति सत्त्व वृत्तीः सुर स्त्रियः

26 यथा सङ्कल्प येद् बुद्ध्या यदा वा मत् परः पुमान्

मयि सत्ये मनो युञ्जन्ः तथा तत् समु पाश्नुते

27 यो वै मद् भाव मापन्न ईशितुर् वशितुः पुमान्

कुतश् चिन्न विहन्येत तस्य चाज्ञा यथा मम

28 मद् भक्त्या शुद्ध सत्त्वस्य योगिनो धारणा विदः

तस्य त्रै कालिकी बुद्धिः जन्म मृत्यूप बृम्हिता

29 अग्न्यादिभिर् न हन्येत मुनेः योगमयम् वपुः

मद् योग शान्त चित्तस्य यादसाम् उदकम् यथा

30 मद् विभूतीर् अभि ध्यायन् श्रीवत् सास्त्र विभूषिताः

ध्वजात पत्र व्यजनैः स भवेद् अपराजितः

31 उपासकस्य माम् एवम् योग धारणया मुनेः

सिद्धयः पूर्व कथिता उपतिष्ठन् त्य शेषतः

32 जितेन्द्रि यस्य दान् तस्य जित श्वास् आत्मनो मुनेः

मद् धारणाम् धार यतः का सा सिद्धिः सु दुर्लभा

33 अन्तरायान् वदन्त् येता युञ्जतो योग मुत्तमम्

मया सम्पद्य मानस्य काल क्षपण हेतवः

34 जन्मौषधि तपो मन्त्रैर् यावतीर् इह सिद्धयः

योगेन् आप्नोति ताः सर्वा नान्यैः योग गतिम् व्रजेत्

35 सर्वासाम् अपि सिद्धीनाम् हेतुः पति रहम् प्रभुः

अहम् योगस्य साङ्ख्यस्य धर्मस्य ब्रह्म वादिनाम्

36 अहम् आत्मान्तरो बाह्यो ऽनावृतः सर्व देहिनाम्

यथा भूतानि भूतेषु बहिरन्तः स्वयम् तथा

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

एकादश स्कन्दे पञ्च दशो ऽध्याय ::||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ एकादश स्कन्द: षोडशो ऽध्याय :

स्कन्द- 11: अध्याय- 16

01 श्री उद्धव उवाच

त्वम् ब्रह्म परमम् साक्षाद् अनाद् यन्तम् अपावृतम्

सर्वेषाम् अपि भावानाम् त्राणस् थित् यप्य योद् भव:

02 उच्चाव चेषु भूतेषु दुर्ज्ञेयम् अकृतात् मभि:

उपासते त्वाम् भगवन् याथा तथ् येन ब्राह्मणा:

03 येषु येषु च भावेषु भक्त्या त्वाम् परमर्षय:

उपासीना: प्रपद् यन्ते सम्सिद्धिम् तद् वदस्व मे

04 गूढश् चरसि भूतात्मा भूतानाम् भूत भावन

न त्वाम् पश्यन्ति भूतानि पश्यन्तम् मोहितानि ते

05 या: काश् च भूमौ दिवि वै रसायाम् विभूतयो दिक्षु महा विभूते

ता मह्यम् आख्याहि अनुभावि तास्ते नमामि ते तीर्थ पदाङ्घ्रि पद्मम्

06 श्री भगवान् उवाच

एवम् एतद् अहम् पृष्ट: प्रश्नम् प्रश्न विदाम् वर

युयुत्सुना विनशने सपत्नैर् अर्जुनेन वै

07 ज्ञात्वा ज्ञाति वधम् गर्ह्यम् अधर्मम् राज्य हेतुकम्

ततो निवृत्तो हन्ताहम् हतो ऽयमिति लौकिक:

08 स तदा पुरुष व्याघ्रो युक्त्या मे प्रति बोधित:

अभ्य भाषत मामेवम् यथा त्वम् रण मूर्धनि

09 अहम् आत्मोद् धवाम् ईषाम् भूतानाम् सुहृद् ईश्वरः

अहम् सर्वाणि भूतानि तेषाम् स्थित् युद् भवाप् ययः

10 अहम् गतिः गति मताम् कालः कलयता महम्

गुनाणाम् चाप्यहम् साम्यम् गुणिन् यौत्पत्ति को गुणः

11 गुणिनाम् अप्यहम् सूत्रम् महताम् च महानहम्

सूक्ष्माणाम् अप्य हम् जीवो दुर्जयानाम् अहम् मनः

12 हिरण्यगर्भो वेदानाम् मन्त्राणाम् प्रणवस् त्रि वृत्

अक्षराणाम् अकारो ऽस्मि पदानि च्छन्द सामहम्

13 इन्द्रो ऽहम् सर्व देवानाम् वसूनाम् अस्मि हव्यवाट्

आदित्यानाम् अहम् विष्णू रुद्राणाम् नील लोहितः

14 ब्रह्मर्षीणाम् भृगु रहम् राजर्षीणाम् अहम् मनुः

देवर्षीणाम् नारदो ऽहम् हविर्धान् यस्मि धेनुषु

15 सिद्धेश् वराणाम् कपिलः सुपर्णो ऽहम् पत त्रिणाम्

प्रजापतीनाम् दक्षो ऽहम् पित्ॠणाम् अहम् अर्यमा

16 माम् विद् ह्युद्धव दैत्यानाम् प्रह्लादम् असुरेश्वरम्

सोमम् नक्षत् रौषधीनाम् धनेशम् यक्ष रक्षसाम्

17 ऐरावतम् गजेन्द्राणाम् यादसाम् वरुणम् प्रभुम्

तपताम् द्युमताम् सूर्यम् मनुष्याणाम् च भूपतिम्

18 उच्चैः श्रवास्तुर् अङ्गाणाम् धातूनाम् अस्मि काञ्चनम्

यमः सम् यमताम् चाहम् सर्पाणाम् अस्मि वासुकिः

19 नागेन्द्राणाम् अनन्तो ऽहम् मृगेन्द्रः शृङ्गि दम्ष्ट्रिणाम्

आश्रमाणाम् अहम् तुर्यो वर्णानाम् प्रथमो ऽनघ

20 तीर्थानाम् स्रोतसाम् गङ्गा समुद्रः सरसामहम्

आयुधानाम् धनुरहम् त्रिपुरघ्नो धनुष् मताम्

21 धिष्ण्यानाम् अस्म्यहम् मेरुः गहनानाम् हिमालयः

वनस्पतीनाम् अश्वत्थ ओषधीनाम् अहम् यव:

22 पुरोधसाम् वसिष्ठो ऽहम् ब्रह्मिष्ठानाम् बृहस्पति:

स्कन्दो ऽहम् सर्व सेनान्याम् अग्रण्याम् भगवान् अज:

23 यज्ञानाम् ब्रह्म यज्ञोऽहम् व्रतानाम् अवि हिम्सनम्

वाय् वग्न्यर् काम्बु वागात्मा शुचीनाम् अप्यहम् शुचि:

24 योगानाम् आत्म सम्रोधो मन्त्रो ऽस्मि विजिगी षताम्

आन्वीक्षिकी कौशलानाम् विकल्प: ख्याति वादिनाम्

25 स्त्रीणाम् तु शत रूपाहम् पुम्साम् स्वायम्भुवो मनु:

नारायणो मुनीनाम् च कुमारो ब्रह्म चारिणाम्

26 धर्माणाम् अस्मि सन्न्यास: क्षेमाणाम् अबहिर् मति:

गुह्यानाम् सुनृतम् मौनम् मिथुनानाम् अजस्त्वहम्

27 सम्वत्सरो ऽस्मि अनिमिषाम् ॠतूनाम् मधु माधवौ

मासानाम् मार्गशीर्षो ऽहम् नक्षत्राणाम् तथाभि जित्

28 अहम् युगानाम् च कृतम् धीराणाम् देवलो ऽसित:

द्वैपायनो ऽस्मि व्यासानाम् कवीनाम् काव्य आत्मवान्

29 वासुदेवो भगवताम् त्वम् तु भागवतेष् वहम्

किम्पुरुषानाम् हनुमान् विद्याध्राणाम् सुदर्शन:

30 रत्नानाम् पद्म रागोऽस्मि पद्म कोश: सुपेशसाम्

कुशोऽस्मि दर्भजा तीनाम् गव्यम् आज्यम् हवि: ष्वहम्

31 व्यवसायिनाम् अहम् लक्ष्मी: कितवानाम् छलग्रह:

तिति क्षास्मि तिति क्षूणाम् सत्त्वम् सत्त्व वतामहम्

32 ओज: सहो बलवताम् कर्माहम् विद्धि सात्वताम्

सात्वताम् नव मूर्तीनाम् आदि मूर्ति रहम् परा

33 विश्वावसु: पूर्व चित्ति: गन्धर्व् आप्सरसा महम्

भूधराणाम् अहम् स्थैर्यम् गन्ध मात्रम् अहम् भुव:

34 अपाम् रसश् च परम: तेजिष्ठानाम् विभावसु:

प्रभा सूर्येन्दु ताराणाम् शब्दो ऽहम् नभस: पर:

35 ब्रह्मण्यानाम् बलिरहम् वीराणाम् अहम् अर्जुन:

भूतानाम् स्थितिर् उत्पत्ति: अहम् वै प्रति सङ्क्रम:

36 गत् युक्त्युत् सर्गो पादानम् आनन्द स्पर्श लक्षनम्

आस्वाद श्रुत् यव घ्राणम् अहम् सर्वेन्द्रि येन्द्रियम्

37 पृथिवी वायुर् आकाश आपो ज्योतिर् अहम् महान्

विकार: पुरुषो ऽव्यक्तम् रज: सत्त्वम् तम: परम्

अहम् एतत् प्रसङ्ख्यानम् ज्ञानम् तत्त्व विनिश्चय:

38 मयेश्वरेण जीवेन गुणेन गुणिना विना

सर्वात्म नापि सर्वेण न भावो विद्यते क्वचित्

39 सङ्ख्यानम् परमाणूनाम् कालेन क्रियते मया

न तथा मे विभूतीनाम् सृजतो ऽण्डानि कोटिश:

40 तेज: श्री : कीर्तिर् ऐश्वर्यम् ह्रीस् त्याग: सौभगम् भग:

वीर्यम् तितिक्षा विज्ञानम् यत्र यत्र स मे ऽम्शक:

41 एतास्ते कीर्तिता: सर्वा: सङ्क्षेपेण विभूतय:

मनो विकारा एवैते यथा वाचाभि धीयते

42 वाचम् यच्छ मनो यच्छ प्राणान् यच् छेद्रियाणि च

आत्मानम् आत्मना यच्छ न भूय: कल्पसे ऽध्वने

43 यो वै वाङ्मनसी सम्यग् असम्यच्छन् धिया यति:

तस्य व्रतम् तपो दानम् स्रवति आमघटाम् बुवत्

44 तस्मान् मनो वच: प्राणान् नियच्छेन् मत् परायण:

मद् भक्ति युक्तया बुद्ध्या तत: परि समाप् यते

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

एकादश स्कन्दे षोडशो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ एकादश स्कन्दः सप्त दशो ऽध्याय :

स्कन्द- 11: अध्याय- 17

01 श्री उद्धव उवाच

यस्त्वया भिहितः पूर्वम् धर्मस् त्वद् भक्ति लक्षणः

वर्णाश्रमा चार वताम् सर्वेषाम् द्विपदाम् अपि

02 यथ् आनुष्ठीय मानेन त्वयि भक्तिर् नृणाम् भवेत्

स्वधर्मेण् आरविन्दाक्ष तत् समाख्यातु मर्हसि

03 पुरा किल महा बाहो धर्मम् परमकम् प्रभो

यत्तेन हम्स रूपेण ब्रह्मणे ऽभ्यात्थ माधव

04 स इदानीम् सु महता कालेना मित्र कर्शन

न प्रायो भविता मर्त्य लोके प्राग् अनुशासितः

05 वक्ता कर्ता विता नान्यो धर्मस् याच्युत ते भुवि

सभायाम् अपि वैरिञ्च्याम् यत्र मूर्ति धराः कलाः

06 कर्त्रा वित्रा प्रवक्त्रा च भवता मधुसूदन

त्यक्ते महीतले देव विनष्टम् कः प्रवक्ष्यति

07 तत्त्वम् नः सर्व धर्मज्ञ धर्मस् त्वद् भक्ति लक्षणः

यथा यस्य विधीयेत तथा वर्ण य मे प्रभो

08 श्री शुक उवाच

इत्थम् स्व भृत्य मुख्येन पृष्टः स भगवान् हरिः

प्रीतः क्षेमाय मर्त्यानाम् धर्मान् आह सनातनान्

09 श्री भगवान् उवाच

धर्म्य एष तव प्रश्नो नैः श्रेयस करो नृणाम्

वर्णाश्रमा चार वताम् तम् उद्धव निबोध मे

10 आदौ कृत युगे वर्णो नृणाम् हम्स इति स्मृतः

कृत कृत्याः प्रजा जात्या तस्मात् कृत युगम् विदुः

11 वेदः प्रणव एवाग्रे धर्मो ऽहम् वृष रूप धृक्

उपासते तपो निष्ठा हम्सम् माम् मुक्त किल्बिषाः

12 त्रेता मुखे महा भाग प्राणान् मे हृदयात् त्रयी

विद्या प्रादुर भूत् तस्या अहमासम् त्रिवृन् मखः

13 विप्र क्षत्रिय विट् शूद्रा मुख बाहूरु पादजाः

वैराजात् पुरुषाज् जाता य आत्मा चार लक्षणाः

14 गृहाश्रमो जघनतो ब्रह्म चर्यम् हृदो मम

वक्षः स्थनाद् वने वासोः न्यासः शीर्षणि सम्स्थितः

15 वर्णानाम् आश्रमाणाम् च जन्म भूम् यनुसारिणीः

आसन् प्रकृतयो न्ॠनाम् नीचैर् नीचोत्त मोत्तमाः

16 शमो दमस् तपः शौचम् सन्तोषः क्षान्ति रार्जवम्

मद् भक्तिश् च दया सत्यम् ब्रह्म प्रकृतयस् त्विमाः

17 तेजो बलम् धृतिः शौर्यम् तिति क्षौदार्य मुद्यमः

स्थैर्यम् ब्रह्मन्य तैश्वर्यम् क्षत्र प्रकृत यस्त् विमाः

18 आस्तिक्यम् दान निष्ठा च अदम्भो ब्रह्म सेवनम्

अतुष्टिः अर्थोप चयैः वैश्य प्रकृत यस् त्विमाः

19 शुश्रूषणम् द्विजगवाम् देवानाम् चाप्य मायया

तत्र लब्धेन सन्तोषः शूद्र प्रकृत यस् त्विमाः

20 अशौचम् अनृतम् स्तेयम् नास्तिक्यम् शुष्क विग्रहः

कामः क्रोधश् च तर्षश् च स्वभावो ऽन्तेव सायिनाम्

21 अहिम्सा सत्यमस् तेयम् अकाम क्रोध लोभता

भूत प्रिय हितेहा च धर्मोऽयम् सार्व वर्णिकः

22 द्वितीयम् प्राप्यानु पूर्व्यात् जन्मोप नयनम् द्विजः

वसन् गुरुकुले दान्तो ब्रह्माधी यीत चाहूतः

23 मेखला जिन दण्डाक्ष ब्रह्म सूत्र कमण्डलून्

जटिलो ऽधौत दद् वासो ऽरक्त पीठः कुशान्द धत्

24 स्नान भोजन होमेषु जपो च्चारे च वाग्यतः

न च्छिन्द्यान् नख रोमाणि कक्षोपस् थ गतान् यपि

25 रेतो नावकि रेज्जातु ब्रह्म व्रत धरः स्वयम्

अवकीर्णे ऽवगाह् याप्सु यतासुः त्रि पदीम् जपेत्

26 अग्न् यर्क् आचार्य गो विप्र गुरु वृद्ध सुराञ्न् शुचिः

समाहित उपासीत सन्ध्ये च यत वाग् जपन्

27 आचार्यम् माम् विजानीयात् नाव मन्ये त कर्हिचित्

न मर्त्य बुद्ध्या सूयेत सर्व देव मयो गुरुः

28 सायम् प्रातर् उपानीय भैक्ष्यम् तस्मै निवेदयेत्

यच्चान् यदप् यनुज्ञातम् उपयुञ्जीत सम्यतः

29 शुश्रूष माण आचार्यम् सदोपासी त नीचवत्

यान शय्यासन स्थानैर् नाति दूरे कृताञ्जलिः

30 एवम् वृत्तो गुरुकुले वसेद् भोग विवर्जितः

विद्या समाप्यते यावद् बिभ्रद् व्रतम् अखण्डितम्

31 यद्यसौ छन्दसाम् लोकम् आरोक्ष्यन् ब्रह्म विष्टपम्

गुरवे विन्यसेद् देहम् स्वाध्या यार्थम् बृहद् व्रतः

32 अग्नौ गुरौ आत्मनि च सर्व भूतेषु माम् परम्

अपृथग्धीर् उपसीत ब्रह्म वर्चस्वि अकल्मषः

33 स्त्रीणाम् निरीक्षण स्पर्श सम्लाप क्ष्वेल नादिकम्

प्राणिनो मिथुनी भूतान् अगृहस्थो ऽग्रतस्त् यजेत्

34 शौचम् आचमनम् स्नानम् सन्ध् योपासनम् आर्जवम्

तीर्थ सेवा जपो ऽस्पृश्या भक्ष्या सम्भाष्य वर्जनम्

35 सर्व् आश्रम प्रयुक्तो ऽयम् नियमः कुल नन्दन

मद् भावः सर्व भूतेषु मनो वाक्काय सम्यमः

36 एवम् बृहद् व्रत धरो ब्राह्मणो ऽग्निर् इव ज्वलन्

मद् भक्तः तीव्र तपसा दग्ध कर्माश यो ऽमलः

37 अथान् अन्तरम् आवेक्ष्यन् यथा जिज्ञासि तागमः

गुरवे दक्षिणाम् दत्त्वा स्नायाद् गुर्व् अनुमोदितः

38 गृहम् वनम् वोपविशेत् प्रव्रजेद् वा द्विजोत्तमः

आश्रमाद् आश्रमम् गच्छेत् नान्यथा मत् परश् चरेत्

39 गृहार्थी सदृशीम् भार्याम् उद्वहेद् अजु गुप्सिताम्

यवीयसीम् तु वयसा ताम् सवर्णाम् अनु क्रमात्

40 इज्या ध्ययन दानानि सर्वेषाम् च द्विजन् मनाम्

प्रतिग्रहो ऽध्यापनम् च ब्राह्मणस् यैव याजनम्

41 प्रतिग्रहम् अन्यमानः तपस् तेजो यशोनुदम्

अन्याभ्याम् एव जीवेत शिलैर्वा दोष दृक्तयोः

42 ब्राह्मणस्य हि देहोऽयम् क्षुद्र कामाय नेष्यते

कृच्छ्राय तपसे चेह प्रेत् यानन्त सुखाय च

43 शिलोञ्छ वृत्त्या परितुष्ट चित्तो धर्मम् महान्तम् विरजम् जुषाणः

मय् यर्पि तात्मा गृह एव तिष्ठन् नाति प्रसक्तः समुपैति शान्तिम्

44 समुद्धरन्ति ये विप्रम् सीदन्तम् मत् परायणम्

तान् उद्धरिष्ये न चिराद् आपद्भ्यो नौरि वार्णवात्

45 सर्वाः समुद्धरेद् राजा पितेव व्यसनात् प्रजाः

आत्मानम् आत्मना धीरो यथा गज पतिर् गजान्

46 एवम् विधो नरपतिः विमाने नार्क वर्चसा

विधूयेहा शुभम् कृत्स्नम् इन्द्रेण सह मोदते

47 सीदन् विप्रो वणिग् वृत्त्या पण्यैर् एवा पदम् तरेत्

खड्गेन वा पदा क्रान्तो न श्व वृत्त्या कथञ्चन

48 वैश्य वृत्त्या तु राजन् यो जीवेन् मृगयया पदि

चरेद्वा विप्र रूपेण न श्व वृत्त्या कथञ्चन

49 शूद्र वृत्तिम् भजेद् वैश्यः शूद्रः कारु कटक्रियाम्

कृच्छ्रान् मुक्तो न गर्ह्येण वृत्तिम् लिप्सेत कर्मणा

50 वेद् आध्याय स्वधा स्वाहा बल्यन् नाद्यैः यथोदयम्

देवर्षि पितृ भूतानि मद् रूपाण् यन् वहम् यजेत्

51 यदृच्छ योप पन्नेन शुक्लेनो पार्जि तेन वा

धनेना पीडयन् भृत्यान् न्याये नैवाह रेत् क्रतून्

52 कुटुम्बेषु न सज्जेत न प्रमाद् येत् कुटुम्ब्यपि

विपश्चिन् नश्वरम् पश्येद् अदृष्टम् अपि दृष्टवत्

53 पुत्र दार् आप्त बन्धूनाम् सङ्गमः पान्थ सङ्गमः

अनुदेहम् वियन्त्येते स्वप्नो निद्रानु गो यथा

54 इत्थम् परिमृशन् मुक्तो गृहेषु अतिथि वद्वसन्

न गृहैर् अनुबध् येत निर्ममो निरहङ्कृतः

55 कर्मभिर् गृहमे धीयैः इष्ट्वा माम् एव भक्तिमान्

तिष्ठेद् वनम् वोपविशेत् प्रजावान् व अपरिव्रजेत्

56 यस्त्वा सक्त मतिर् गेहे पुत्र वित्तैषण् आतुरः

स्त्रैणः कृपणधीर् मूढो ममाहम् इति बध्यते

57 अहो मे पितरौ वृद्धौ भार्या बाल् आत्मज् आत्मजाः

अनाथा मामृते दीनाः कथम् जीवन्ति दुःखिताः

58 एवम् गृहाशया क्षिप्त हृदयो मूढ धीरयम्

अतृप्तस्तान् अनुध्यायन् मृतो ऽन्धम् विशते तमः

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

एकादश स्कन्दे सप्त दशो ऽध्याय ःǁ

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ एकादश स्कन्दः अष्टा दशो ऽध्याय :

स्कन्द- 11: अध्याय- 18

01 श्री भगवान् उवाच

वनम् विविक्षुः पुत्रेषु भार्याम् न्यस्य सहैव वा

वन एव वसेच् छान्तः तृतीयम् भाग मायुषः

02 कन्द मूल फलैर् वन्यैः मेध्यैः वृत्तिम् प्रकल्पयेत्

वसीत वल्कलम् वासस् तृण पर्णाजि नानि च

03 केश रोम नखश् मश्रु मलानि बिभृयाद् दतः

न धावेद् अप्सु मज्जेत त्रि कालम् स्थण्डि लेशयः

04 ग्रीष्मे तप्ये त पञ्चाग्नीन् वर्षास्वा सारषाड् जले

आकण्ठ मग्नः शिशिर एवम् वृत्तस् तपश् चरेत्

05 अग्नि पक्वम् समश्नी यात् काल पक्वम् अथापि वा

उलूखल् आश्म कुट्टो वा दन्तोलू खल एव वा

06 स्वयम् सञ्चिनुयात् सर्वम् आत्मनो वृत्ति कारणम्

देश काल बला भिज्ञो नाद दीतान् यदा हृतम्

07 वन्यैः चरुपुरोड् आशैर् निर्वपेत् काल चोदितान्

न तु श्रौतेन पशुना माम् यजेत वनाश्रमी

08 अग्नि होत्रम् च दर्शश् च पौर्ण मासश् च पूर्व वत्

चातुर् मास्यानि च मुनेः आम्नातानि च नैगमैः

09 एवम् चीर्णेन तपसा मुनिः धमनि सन्ततः

माम् तपोमयम् आराध्य ऋषिलोकाद् उपैति माम्

10 यस्त्वे तत् कृच्छ्रतश् चीर्णम् तपो निःश्रेय सम् महत्

कामाय अल्पीयसे युञ्ज्याद् बालिशः को ऽपरस् ततः

11 यदासौ नियमे ऽकल्पो जरया जात वेपथुः

आत्मन् यग्नीन् समारोप्य मच्चित्तो ऽग्निम् समाविशेत्

12 यदा कर्म विपाकेषु लोकेषु निरयात्मसु

विरागो जायते सम्यङ् न्यस्त् आग्निः प्रव्रजेत् ततः

13 इष्ट्वा यथो (उ)पदेशम् माम् दत्त्वा सर्वस्वम् ऋत्विजे

अग्नीन् स्वप्राण आवेश्य निरपेक्षः परिव्रजेत्

14 विप्रस्य वै सन् न्यसतो देवा दारादि रूपिणः

विघ्नान् कुर्वन्त्ययम् ह्यस्मान् आक्रम्य समियात् परम्

15 बिभृ याच्चेन् मुनिर् वासः कौपीनाच् छादनम् परम्

त्यक्तम् न दण्ड पात्राभ्याम् अन्यत् किञ्चिद् अनापदि

16 दृष्टि पूतम् न्यसेत् पादम् वस्त्र पूतम् पिबेज्जलम्

सत्य पूताम् वदेद् वाचम् मनः पूतम् समाचरेत्

17 मौनानी हानि लायामा दण्डा वाग् देह चेतसाम्

न ह्येते यस्य सन्त् यङ्ग वेणु भिर्न भवेद् यतिः

18 भिक्षाम् चतुर्षु वर्णेषु विगर्ह्यान् वर्जयम्श् चरेत्

सप्तागारान् असङ् क्लृतान् तुष्येल् लब्धेन तावता

19 बहिर् जलाशयम् गत्वा तत्रोपस् पृश्य वाग्यतः

विभज्य पावितम् शेषम् भुञ्जीता शेष माहृतम्

20 एकश् चरेन् मही मेताम् निःसङ्गः सम् यतेन्द्रियः

आत्म क्रीड आत्म रत आत्मवान् सम दर्शनः

21 विविक्त क्षेम शरणो मद् भाव विमलाशयः

आत्मानम् चिन्तयेद् एकम् अभेदेन मया मुनिः

22 अन्वीक्षेत् आत्मनो बन्धम् मोक्षम् च ज्ञान निष्ठया

बन्ध इन्द्रिय विक्षेपो मोक्ष एषाम् च सम्यमः

23 तस्मान् नियम्य षड् वर्गम् मद् भावेन चरेन् मुनिः

विरक्तः क्षुल्ल कामेभ्यो लब्ध् वात्मनि सुखम् महत्

24 पुरग्राम व्रजान् सार्थान् भिक्षार्थम् प्रविशम्श् चरेत्

पुण्य देश सरिच् छैल वनाश्रम वतीम् महीम्

25 वानप्रस्थ् आश्रम पदेषु अभीक्ष्णम् भैक्ष्य मा चरेत्

सम् सिध्यत्याश् वसम् मोहः शुद्ध सत्त्वः शिलान् धसा

26 नै तद् वस्तु तया पश्येद् दृश्यमानम् विनश्यति

असक्त चित्तो विरमेद् इहाम् उत्र चिकीर्षि तात्

27 यदेतद् आत्मनि जगन् मनोवाक् प्राण सम्हतम्

सर्वम् मायेति तर्केण स्वस्थः त्यक्त्वा न तत् स्मरेत्

28 ज्ञान निष्ठो विरक्तो वा मद् भक्तो वान पेक्षकः

सलिङ्गान् आश्रमाम्स् त्यक्त्वा चरेद् अविधि गोचरः

29 बुधो बालक वत् क्रीडेत् कुशलो जड वच् चरेत्

वदेद् उन्मत्त वद् विद्वान् गोचर्याम् नैग मश्चरेत्

30 वेद वाद रतो न स्यात् न पाखण्डी न हैतुकः

शुष्क वाद विवादे न कञ्चित् पक्षम् समाश्रयेत्

31 नोद् विजेत जनाद् धीरो जनम् चोद्वेजयेन् न तु

अतिवादाम् स्तितिक्षेत नाव मन्येत कञ्चन

देहम् उद्दिश्य पशुवद् वैरम् कुर्यान् न केनचित्

32 एक एव परो ह्यात्मा भूतेष् वात्मन् य वस्थितः

यथेन्दुरु द पात्रेषु भूतानि एकात्म कानि च

33 अलब्ध्वा न विषीदेत काले काले ऽशनम् क्वचित्

लब्ध्वा न हृष्येद् धृतिमान् उभयम् दैव तन्त्रितम्

34 आहारार्थम् समीहेत युक्तम् तत् प्राण धारणम्

तत्त्वम् विमृश्यते तेन तद् विज्ञाय विमुच्यते

35 यदृच्छयोप पन्नान्नम् अद्यात् छ्रेष्ठम् उतापरम्

तथा वासस् तथा शय्याम् प्राप्तम् प्राप्तम् भजेन् मुनिः

36 शौचम् आचमनम् स्नानम् न तु चोदन या चरेत्

अन्याम्श् च नियमान् ज्ञानी यथाहम् लीलयेश्वरः

37 न हि तस्य विकल्पाख्या या च मद् वीक्षया हता

आदेहान् तात् क्वचित् ख्यातिः ततः सम्पद् यते मया

38 दुःखो दर्केषु कामेषु जात निर्वेद आत्मवान्

अज्ज्ञासित मद् धर्मो गुरुम् मुनिम् उपव्रजेत्

39 तावत् परिचरेद् भक्तः श्रद्धावान् अनसूयकः

यावद् ब्रह्म विजानीयान् मामेव गुरु मादृतः

40 यस्तु असम्यत षड्वर्गः प्रचण् डेन्द्रिय सारथिः

ज्ञान वैराग्य रहितः त्रि दण्डम् उपजीवति

41 सुरान् आत्मानम् आत्मस्थम् निह्नुते माम् च धर्महा

अवि पक्व कषायो ऽस्माद् अमुष्माच् च विहीयते

42 भिक्षोर् धर्मः शमो ऽहिम्सा तप ईक्षा वनौकसः

गृहिणो भूत रक्षेज्या द्विजस्य आचार्य सेवनम्

43 ब्रह्मचर्यम् तपः शौचम् सन्तोषो भूत सौहृदम्

गृहस् थस्याप् यृतौ गन्तुः सर्वेषाम् मदु पासनम्

44 इति माम् यः स्वधर्मेण भजन् नित्यम् अनन्यभाक्

सर्वभूतेषु मद् भावो मद् भक्तिम् विन्दते दृढाम्

45 भक्त् योद्ध वान पायिन्या सर्व लोक महेश्वरम्

सर्वोत्पत् त्यप्ययम् ब्रह्म कारणम् मोप याति सः

46 इति स्वधर्म निर्णिक्त सत्त्वो निर्ज्ञात मद् गतिः

ज्ञान विज्ञान सम्पन्नो न चिरात् समुपैति माम्

47 वर्णाश्रम वताम् धर्म एष आचार लक्षणः

स एव मद् भक्ति युतो निःश्रेयस करः परः

48 एतत् ते ऽभिहितम् साधो भवान् पृच्छति यच्च माम्

यथा स्वधर्म सम्युक्तो भक्तो माम् समियात् परम्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

एकादश स्कन्दे अष्टा दशो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ एकादश स्कन्द: एकोन विम्शो ऽध्याय :

स्कन्द- *11:* अध्याय- *19*

*01* श्री भगवान् उवाच

योविद्या श्रुत सम्पन्न: आत्मवान् नानु मानिक:

मया मात्रम् इदम् ज्ञात्वा ज्ञानम् च मयि सन्न्यसेत्

*02* ज्ञानिनस् त्वह मेवेष्ट: स्वार्थो हेतुश् च सम्मत:

स्वर्गश् चैवाप वर्गश् च नान्यो ऽर्थो मदृते प्रिय:

*03* ज्ञान विज्ञान सम्सिद्धा: पदम् श्रेष्ठम् विदुर् मम

ज्ञानी प्रियतमो ऽतो मे ज्ञाने नासौ बिभर्ति माम्

*04* तपस् तीर्थम् जपो दानम् पवित्राणी त राणि च

नालम् कुर्वन्ति ताम् सिद्धिम् या ज्ञान कलया कृता

*05* तस्माज् ज्ञानेन सहितम् ज्ञात्वा स्वात्मानम् उद्धव

ज्ञान विज्ञान सम्पन्नो भज माम् भक्ति भावित:

*06* ज्ञान विज्ञान यज्ञेन मामिष्ट् वात्मान मात्मनि

सर्व यज्ञ पतिम् माम् वै सम्सिद्धिम् मुनयो ऽगमन्

*07* त्वय् युद्धवाश् रयति यस् त्रिविधो विकारो

मायान्तरा पतति नाद्य पवर्ग योर्यत्

जन्मादयो ऽस्य यदमी तव तस्य किम् स्यु:

आद्यन्तयो: यद् असतो ऽस्ति तदेव मध्ये

08 श्री उद्धव उवाच

ज्ञानम् विशुद्धम् विपुलम् यथै तद् वैराग्य विज्ञान युतम् पुराणम्

आख्याहि विश्वेश्वर विश्व मूर्ते त्वद् भक्ति योगम् च महद् विमृग्यम्

09 ताप त्रयेणा भिहतस्य घोरे सन्तप्य मानस्य भवा ध्वनीश

पश्यामि नान्यच् छरणम् तवाङ्घ्रि द्वन्द्वात पत्राद् अमृताभि वर्षात्

10 दष्टम् जनम् सम् पतितम् बिले ऽस्मिन् कालाहिना क्षुद्र सुखोरु तर्षम्

समुद्ध रैनम् कृपयाप वर्ग्यैः वचोभि रासिञ्च महानु भाव

11 श्री भगवान् उवाच

इत्थम् एतत् पुरा राजा भीष्मम् धर्म भृताम् वरम्

अजात शत्रुः पप्रच्छ सर्वेषाम् नो ऽनु शृण्वताम्

12 निवृत्ते भारते युद्धे सुहृन् निधन विह्वलः

श्रुत्वा धर्मान् बहून् पश्चात् मोक्ष धर्मान् अपृच्छत

13 तानहम् ते ऽभिधास्यामि देव व्रत मुखाच् छ्रुतान्

ज्ञान वैराग्य विज्ञान श्रद्धा भक्त् युप बृम्हितान्

14 नवै कादश पञ्च त्रीन् भावान् भूतेषु येन वै

ईक्षे ताथाइक मप्येषु तज् ज्ञानम् मम निश्चितम्

15 एत देव हि विज्ञानम् न तथैकेन येन यत्

स्थित् युत्पत् त्यप्ययान् पश्येद् भावानाम् त्रि गुणात्मनाम्

16 आदा वन्ते च मध्ये च सृज्यात् सृज्यम् यद् अन्वियात्

पुनस् तत् प्रति सङ्क्रामे यच्छिष् येत तद् एव सत्

17 श्रुतिः प्रत्यक्ष मैतिह्यम् अनुमानम् चतुष्टयम्

प्रमाणेषु अनवस् थानाद् विकल्पात् स विरज्यते

18 कर्मणाम् परिणाम् इत्वाद् आविरिञ्च्याद मङ्गळम्

विपश्चिन् नश्वरम् पश्येद् अदृष्टम् अपि दृष्टवत्

19 भक्ति योगः पुरैवोक्तः प्रीयमाणाय ते ऽनघ

पुनश् च कथयिष् यामि मद् भक्तेः कारणम् परम्

20 श्रद्धा अमृत कथायाम् मे शश्वन् मद् अनुकीर्तनम्

परि निष्ठा च पूजायाम् स्तुतिभिः स्तवनम् मम

21 आदरः परि चर्यायाम् सर्वाङ्गैः अभि वन्दनम्

मद् भक्त पूजाभ् यधिका सर्व भूतेषु मन्मतिः

22 मद् अर्थेषु अङ्ग चेष्टा च वचसा मद् गुणेरणम्

मय् यर्पणम् च मनसः सर्व काम विवर्जनम्

23 मद् अर्थे ऽर्थ परित्यागो भोगस्य च सुखस्य च

इष्टम् दत्तम् हुतम् जप्तम् मदर्थम् यद् व्रतम् तपः

24 एवम् धर्मैर् मनुष्याणाम् उद्धव् आत्म निवेदिनाम्

मयि सञ्जायते भक्तिः को ऽन्यो ऽर्थो ऽस्या वशिष्यते

25 यदा आत्मन् यर्पितम् चित्तम् शान्तम् सत्त्वोप बृम्हितम्

धर्मम् ज्ञानम् स वैराग्यम् ऐश्वर्यम् चाभि पद् यते

26 यद् अर्पितम् तद् विकल्पे इन्द्रियैः परिधावति

रजस्वलम् चासन् निष्ठम् चित्तम् विद्धिवि पर्ययम्

27 धर्मो मद् भक्ति कृत् प्रोक्तो ज्ञानम् चैकात्म्य दर्शनम्

गुणेस् वसङ्गो वैराग्यम् ऐश्वर्यम् चाणि मादयः

28 श्री उद्धव उवाच

यमः कतिविधः प्रोक्तो नियमो वारि कर्षण

कः शमः को दमः कृष्ण का तितिक्षा धृतिः प्रभो

29 किम् दानम् किम् तपः शौर्यम् किम् सत्यम् ऋत मुच्यते

कस्त्यागः किम् धनम् चेष्टम् को यज्ञः का च दक्षिणा

30 पुम्सः किम् स्विद् बलम् श्रीमन् भगो लाभश् च केशव

का विद्या ह्रीः परा का श्री : किम् सुखम् दुःखम् एव च

31 कः पण्डितः कश् च मूर्खः कः पन्था उत्पथश् च कः

कः स्वर्गो नरकः कः स्वित् को बन्धुर् उत किम् ग्रुहम्

32 क आढ्यः को दरिद्रो वा क्रुपणः कः क ईश्वरः

एतान् प्रश्नान् मम ब्रूहि विपरी ताम्श् च सत् पते

33 श्री भगवान् उवाच

अहिम्सा सत्य मस्तेयम् असङ्गो ह्रीर् असञ्चयः

आस्तिक्यम् ब्रह्मचर्यम् च मौनम् स्थैर्यम् क्षमा भयम्

34 शौचम् जपस् तपो होमः श्रद्धा तिथ्यम् मद् अर्चनम्

तीर्थाटनम् परार् थेहा तुष्टिर् आचार्य सेवनम्

35 एते यमाः स नियमा उभयोर् द्वादश स्मृताः

पुम्साम् उपासितास् तात यथा कामम् दुहन्ति हि

36 शमो मन् निष्ठता बुद्धेः दम इन्द्रिय सम्यमः

तितिक्षा दुःख सम्मर्षो जिह्वो पस्थ जयो धृतिः

37 दण्ड न्यासः परम् दानम् काम त्यागस् तपः स्मृतम्

स्वभाव विजयः शौर्यम् सत्यम् च सम दर्शनम्

38 ऋतम् च सुनृता वाणी कविभिः परि कीर्तिता

कर्म स्वसङ्ग मः शौचम् त्यागः सन्न्यास उच्यते

39 धर्म इष्टम् धनम् न्ॠणाम् यज्ञोऽहम् भगवत् तमः

दक्षिणा ज्ञान सन्देशः प्राणायामः परम् बलम्

40 भगो म ऐश्वरो भावो लाभो मद् भक्तिर् उत्तमः

विद् यात्मनि भिदा बाधो जुगुप्सा ह्रीर् अकर्मसु

41 श्रीर् गुणा नैरपेक्ष् याद्याः सुखम् दुःख सुखात् ययः

दुःखम् काम सुखा पेक्षा पण्डितो बन्ध मोक्षवित्

42 मूर्खो देहाद् यहम् बुद्धिः पन्था मन् निगमः स्मृतः

उत्पथश् चित्त विक्षेपः स्वर्गः सत्त्व गुणोदयः

43 नरकस् तम उन्नाहो बन्धुः गुरुरहम् सखे

गृहम् शरीरम् मानुष्यम् गुणाढ्यो ह्याढ्य उच्यते

44 दरिद्रो यस्तु असन्तुष्टः कृपणो यो ऽजितेन्द्रियः

गुणेषु असक्त धीरीशो गुणसङ्गो विपर्ययः

45 एत उद्धव ते प्रश्ना: सर्वे साधु निरूपिता:

किम् वर्णितेन बहुना लक्षणम् गुण दोषयो:

गुण दोष दृशिर् दोषो गुणस्तू उभय वर्जित:

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

एकादश स्कन्दे एकोन विम्शो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ एकादश स्कन्द: विम्शो ऽध्याय :

स्कन्द- 11: अध्याय- 20

01 श्री उद्धव उवाच

विधिश् च प्रतिषेधश् च निगमो हीश्वरस्य ते

अवेक्षते ऽरविण्डाक्ष गुणम् दोषम् च कर्मणाम्

02 वर्णाश्रम विकल्पम् च प्रति लोमानु लोमजम्

द्रव्य देश वय: कालान् स्वर्गम् नरकम् एव च

03 गुण दोष भिदा दृष्टिम् अन्तरेण वचस् तव

नि: श्रेयसम् कथम् न्ऋृणाम् निषेध विधि लक्षणम्

04 पितृ देव मनुष्यानाम् वेदश् चक्षु: तवेश्वर

श्रेयस्त्व् अनुपलब्धे ऽर्थे साध्य साधन योरपि

05 गुण दोष भिदा दृष्टि: निगमात्ते न हि स्वत:

निगमेनाप वादश् च भिदाया इति ह भ्रम:

06 श्री भगवान् उवाच

योगास् त्रयो मया प्रोक्ता न्ऋृणाम् श्रेयो विधित्सया

ज्ञानम् कर्म च भक्तिश् च नोपायो ऽन्यो ऽस्ति कुत्रचित्

07 निर्विण्णानाम् ज्ञान योगो न्यासिनाम् इह कर्मसु

तेषु अनिर्विण्ण चित्तानाम् कर्म योगस्तु कामिनाम्

08 यदृच्छया मत् कथा दौ जात श्रद्धस्तु यः पुमान्

न निर्विण्णो नाति सक्तो भक्ति योगो ऽस्य सिद्धिदः

09 तावत् कर्माणि कुर्वीत न निर्विद् येत यावता

मत् कथा श्रवणा दौ वा श्रद्धा यावन् न जायते

10 स्वधर्मस्थो यजन् यज्ञैः अनाशीः काम उद्धव

न याति स्वर्ग नरकौ यद् यन्यन् न समाचरेत्

11 अस्मिन् लोके वर्तमानः स्वधर्मस्थो ऽनघः शुचिः

ज्ञानम् विशुद्धम् आप्नोति मद् भक्तिम् वा यदृच्छया

12 स्वर्गिणो ऽप्येत मिच्छन्ति लोकम् निरयिणस् तथा

साधकम् ज्ञान भक्तिभ्याम् उभयम् तद् असाधकम्

13 न नरः स्वर्गतिम् काङ्क्षेत् नारकीम् वा विचक्षणः

नेमम् लोकम् च काङ्क्षेत देहा वेशात् प्रमाद् यति

14 एतद् विद्वान् पुरा मृत्योः अभवाय घटे त सः

अप्रमत्त इदम् ज्ञात्वा मर्त्यम् अप्यर्थ सिद्धिदम्

15 छिद्यमानम् यमै रेतैः कृतनीडम् वनस्पतिम्

खगः स्व केतम् उत्सृज्य क्षेमम् याति ह्यलम्पटः

16 अहो रात्रैः छिद्यमानम् बुद्ध्वायुर् भय वेपथुः

मुक्त सङ्गः परम् बुद्ध्वा निरीह उपशाम् यति

17 नृदेह माद्यम् सुलभम् सु दुर्लभम्

प्लवम् सुकल्पम् गुरु कर्ण धारम्

मयानु कूलेन नभस्व तेरितम्

पुमान् भवाब्धिम् न तरेत् स आत्महा

18 यद् आरम्भेषु निर्विण्णो विरक्तः सम् यतेन्द्रियः

अभ्यासेन् आत्मनो योगी धारयेद् अचलम् मनः

19 धार्य माणम् मनो यर्हि भ्राम्यद् आश् वन वस्थितम्

अतन्द्रितो ऽनुरोधेन मार्गेण् आत्म वशम् नयेत्

20 मनोगतिम् न विसृजेज् जित प्राणो जितेन्द्रियः

सत्त्व सम्पन्न या बुद्ध्या मन आत्म वशम् नयेत्

21 एष वै परमो योगो मनसः सङ्ग्रहः स्मृतः

हृदय ज्ञत्वम् अन्विच्छन् दम्यस् येवार्व तो मुहुः

22 साङ्ख्येन सर्व भावानाम् प्रति लोमानु लोमतः

भवाप् ययौ अनुध्यायेन् मनो यावत् प्रसीदति

23 निर्विण्णस्य विरक्तस्य पुरुषस् योक्त वेदिनः

मनस् त्यजति दौरात्म्यम् चिन्तितस् यानु चिन्तया

24 यमादिभिर् योग पथैः आन्वीक्षिक् या च विद्यया

मम् आर्चो (उ)पासना भिर्वा नान्यैः योग्यम् स्मरेन् मनः

25 यदि कुर्यात् प्रमादेन योगी कर्म विगर्हितम्

योगेनैव दहेद् अम्हो नान्यत् तत्र कदाचन

26 स्वे स्वे ऽधिकारे या निष्ठा स गुणः परिकीर्तितः

कर्मणाम् जात्य शुद्धानाम् अनेन नियमः कृतः

गुण दोष विधानेन सङ्गानाम् त्याज नेच्छया

27 जात श्रद्धो मत् कथासु निर्विण्णः सर्व कर्मसु

वेद दुःख् आत्मकान् कामान् परित्यागे ऽप्यन् ईश्वरः

28 ततो भजेत माम् प्रीतः श्रद्धालुः दृढ निश्चयः

जुषमाणश् च तान् कामान् दुःखो दर्काम्श् च गर्हयन्

29 प्रोक्तेन भक्ति योगेन भजतो मास कृन्मुनेः

कामा हृदय्या नश्यन्ति सर्वे मयि हृदि स्थिते

30 भिद्यते हृदय ग्रन्थिः छिद्यन्ते सर्व सम्शयाः

क्षीयन्ते चास्य कर्माणि मयि दृष्टे ऽखिल् आत्मनि

31 तस्मान् मद् भक्ति युक्तस्य योगिनो वै मद् आत्मन:

न ज्ञानम् न च वैराग्यम् प्राय: श्रेयो भवेदिह

32 यत् कर्मभि: यत् तपसा ज्ञान वैराग्य तश् च यत्

योगेन दान धर्मेण श्रेयोभिर् इतरैर् अपि

33 सर्वम् मद् भक्ति योगेन मद् भक्तो लभते ऽञ्जसा

स्वर्गाप वर्गम् मद् धाम कथञ्चिद् यदि वाञ्छति

34 न किञ्चित् साधवो धीरा भक्ता ह्येकान्तिनो मम

वाञ्छन्त् यपि मया दत्तम् कैवल्यम् अपुनर्भवम्

35 नैर् अपेक्ष्यम् परम् प्राहु: नि: श्रेयसम् अनल्पकम्

तस्मात् निराशिषो भक्ति: निरपेक्षस्य मे भवेत्

36 न मय् येकान्त भक्तानाम् गुण दोषोद् भवा गुणा:

साधूनाम् सम चित्तानाम् बुद्धे: परम् उपेयुषाम्

37 एवम् एतान् मया दिष्टान् अनुतिष्ठन्ति मे पथ:

क्षेमम् विन्दन्ति मत् स्थानम् यद् ब्रह्म परमम् विदु:

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

एकादश स्कन्दे विम्शो ऽध्याय :॥

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ एकादश स्कन्द: एक विम्शो ऽध्याय :

स्कन्द- 11: अध्याय- 21

01 श्री भगवान् उवाच

य एतान् मत् पथो हित्वा भक्ति ज्ञान क्रियात्मकान्

क्षुद्रान् कामाम्श् चलैः प्राणैः जुषन्तः सम् सरन्ति ते

02 स्वे स्वे ऽधिकारे या निष्ठा स गुणः परि कीर्तितः

विपर्य यस्तु दोषः स्याद् उभयोर् एष निश्चयः

03 शुद्ध्य शुद्धी विधीयेते समानेष् वपि वस्तुषु

द्रव्यस्य विचिकित् सार्थम् गुणदोषौ शुभा शुभौ

धर्मार्थम् व्यवहा रार्थम् यात्रार्थम् इति चानघ

04 दर्शितो ऽयम् मया चारो

धर्मम् उद्वहताम् धुरम्

05 भूम्यम्ब् वग्नि अनिल् आकाशा भूतानाम् पञ्च धातवः

आब्रह्मस् थावरा दीनाम् शारीरा आत्म सम्युताः

06 वेदेन नाम रूपाणि विषमाणि समेष् वपि

धातु षूद्धव कल्प्यन्त एतेषाम् स्वार्थ सिद्धये

07 देश कालादि भावानाम् वस्तूनाम् मम सत्तम

गुण दोषौ विधीयेते नियमार्थम् हि कर्मणाम्

08 अकृष्ण सारो देशानाम् अब्रह्मण्यो ऽसुचिर् भवेत्

कृष्ण सारो ऽप्यसौ वीर कीकटा सम्स्कृ तेरिणम्

09 कर्मण्यो गुणवान् कालो द्रव्यतः स्वत एव वा

यतो निवर्तते कर्म स दोषो ऽकर्मकः स्मृतः

10 द्रव्यस्य शुद्ध्य शुद्धी च द्रव्येण वचनेन च

सम्स्कारेणाथ कालेन महत्वाल् पत याथ वा

11 शक्त्या शक्त्या थ वा बुद्ध्या समृद्ध्या च यद् आत्मने

अघम् कुर्वन्ति हि यथा देशा वस्थानु सारतः

12 धान्य दार्वस्थि तन्तूनाम् रसतै जस चर्मणाम्

काल वाय् वग्नि मृत्तोयैः पार्थिवानाम् युता युतैः

13 अमेध्य लिप्तम् यद्येन गन्धम् लेपम् व्यपोहति

भजते प्रकृतिम् तस्य तच् छौचम् तावदिष् यते

14 स्नान दान तपो ऽवस्था वीर्य सम्स्कार कर्मभि:

मत् स्मृत्या चात्मन: शौचम् शुद्ध: कर्माच रेद् द्विज:

15 मन्त्रस् य च परिज्ञानम् कर्म शुद्धिर् मद् अर्पणम्

धर्म: सम्पद् यते षड्भि: अधर्मस्तु विपर्यय:

16 क्वचिद् गुणो ऽपि दोष: स्याद् दोषो ऽपि विधिना गुण:

गुण दोषार्थ नियम: तद् भिदामेव बाधते

17 समान कर्मा चरणम् पतितानाम् न पातकम्

औत्पत्तिको गुण: सङ्गो न शयान: पतत् यध:

18 यतो यतो निवर्तेत विमुच्येत ततस् तत:

एष धर्मो नृणाम् क्षेम: शोक मोह भया पह:

19 विषयेषु गुणा ध्यासात् पुम्स: सङ्गस् ततो भवेत्

सङ्गात् तत्र भवेत् काम: कामा देव कलिर् नृणाम्

20 कले: दुर्विषह: क्रोध: तमस् तमनु वर्तते

तमसा ग्रस्यते पुम्स: चेतना व्यापिनी द्रुतम्

21 तया विरहित: साधो जन्तु: शून्याय कल्पते

ततो ऽस्य स्वार्थ विभ्रम्शो मूर्च्छि तस्य मृतस्य च

22 विषयाभि निवेशेन नात्मानम् वेद नापरम्

वृक्ष जीविकया जीवन् व्यर्थम् भस्त्रेव य: श्वसन्

23 फल श्रुति रियम् न्ऋृणाम् न श्रेयो रोचनम् परम्

श्रेयो विवक्षया प्रोक्तम् यथा भैषज् य रोचनम्

24 उत्पत्त्यैव हि कामेषु प्राणेषु स्वजनेषु च

आसक्त मनसो मर्त्या आत्मनो ऽनर्थ हेतुषु

25 नतान् अविदुष: स्वार्थम् भ्राम्यतो वृजिना ध्वनि

कथम् युञ्ज्यात् पुनस्तेषु ताम्स् तमो विशतो बुध:

26 एवम् व्यवसितम् केचिद् अविज्ञाय कुबुद्धय:

फल श्रुतिम् कुसुमिताम् न वेदज्ञा वदन्ति हि

27 कामिनः कृपणा लुब्धाः पुष्पेषु फल बुद्धयः

अग्नि मुग्धा धूमतान् ताः स्वम् लोकम् न विदन्ति ते

28 न ते माम् अङ्ग जानन्ति हृदिस्थम् य इदम् यतः

उक्थ शस्त्रा ह्यसु तृपो यथा नीहार चक्षुषः

29 ते मे मतम् अविज्ञाय परोक्षम् विषयात्मकाः

हिम्सायाम् यदि रागः स्याद् यज्ञ एव न चोदना

30 हिम्सा विहारा ह्यालब्धैः पशुभिः स्व सुखेच्छया

यजन्ते देवता यज्ञैः पितृ भूत पतीन् खलाः

31 स्वप्नोपमम् अमुम् लोकम् असन्तम् श्रवण प्रियम्

आशिषो हृदि सङ्कल्प्य त्यजन्त् यर्थान् यथा वणिक्

32 रजः सत्त्व तमो निष्ठा रजः सत्त्व तमो जुषः

उपासत इन्द्र मुख्यान् देवादीन् न तथैव माम्

33 इष्ट्वेह देवता यज्ञैः गत्वा रम्स्याम हे दिवि

तस्यान्त इह भूयास्म महा शाला महा कुलाः

34 एवम् पुष्पितया वाचा व्याक्षिप्त मनसाम् नृणाम्

मानिनाम् चातिस् तब्धानाम् मद् वार्तापि न रोचते

35 वेदा ब्रह्मात्म विषयाः त्रिकाण्ड विषया इमे

परोक्ष वादा ऋषयः परोक्षम् मम च प्रियम्

36 शब्द ब्रह्म सु दुर्बोधम् प्राणेन्द्रिय मनोमयम्

अनन्त पारम् गम्भीरम् दुर् विगाह्यम् समुद्र वत्

37 मयोप बृम्हितम् भूम्ना ब्रह्मण् आनन्त शक्तिना

भूतेषु घोष रूपेण विसेषु ऊर्णेव लक्ष्यते

38 यथोर्ण नाभिः हृदयाद् ऊर्णाम् उद्वमते मुखात्

आकाशाद् घोषवान् प्राणो मनसा स्पर्श रूपिणा

39 छन्दोमयो ऽमृत मयः सहस्र पदवीम् प्रभुः

ओम्काराद् व्यञ्जित स्पर्श स्वरोष्मान् तस्थ भूषिताम्

40 विचित्र भाषा विततताम् छन्दोभिश् चतुर् उत्तरैः

अनन्त पाराम् बृहतीम् सृजत् याक्षिपते स्वयम्

41 गायत्र् युष्णिग् अनुष्टुप् च बृहती पङ्क्तिर् एव च

त्रिष्टुब् जगत् यतिच् छन्दो ह्यत्यष्टि अति जगद् विराट्

42 किम् विधत्ते किम् आचष्टे किम् अनूद्य विकल्पयेत्

इत्यस्या हृदयम् लोके नान्यो मद् वेद कश्चन

43 माम् विधत्ते ऽभिधत्ते माम् विकल्प्या पोह्यते त्वहम्

एतावान् सर्व वेदार्थः शब्द आस्थाय माम् भिदाम्

माया मात्रम् अनूद् यान्ते प्रतिषिध्य प्रसीदति

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

एकादश स्कन्दे एक विम्शो ऽध्याय ः||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ एकादश स्कन्दः द्वा विम्शो ऽध्याय ः

स्कन्द- 11: अध्याय- 22

01 श्री उद्धव उवाच

कति तत्त्वानि विश्वेश सङ्ख्यातानि ऋषिभिः प्रभो

नवै कादश पञ्च त्रीणि आत् थत्वमिह शुश्रुम

02 केचित् षड् विम्श तिम् प्राहुः अपरे पञ्च विम्शतिम्

सप्तैके नव षट् केचिच् चत्वार् येकाद शापरे

केचित् सप्त दश प्राहुः षोडशैके त्रयो दश

03 एता वत्त्वम् हि सङ्ख्यानाम् ऋषयो यद् विवक्षया

गायन्ति पृथग् आयुष्मन् इदम् नो वक्तु मर्हसि

04 श्री भगवान् उवाच

युक्तम् च सन्ति सर्वत्र भाषन्ते ब्राह्मणा यथा

मायाम् मदीयाम् उद्गृह्य वदताम् किम् नु दुर् घटम्

05 नैतद् एवम् यथात् थ त्वम् यदहम् वच्मि तत् तथा

एवम् विवदताम् हेतुम् शक्तयो मे दुरत्यया:

06 यासाम् व्यतिकराद् आसीद् विकल्पो वदताम् पदम्

प्राप्ते शम दमे ऽप्येति वाद: तम् अनु शाम्यति

07 परस्परानु प्रवेशात् तत्त्वानाम् पुरुषर् षभ

पौर्वा पर्य प्रसङ्ख्यानम् यथा वक्तु: विवक्षितम्

08 एकस्मिन् अपि दृश् यन्ते प्रविष्टानी त राणि च

पूर्वस्मिन् वा परस्मिन् वा तत्त्वे तत्त्वानि सर्वश:

09 पौर्वा पर्यम् अतो ऽमीषाम् प्रसङ्ख्यानम् अभीप् सताम्

यथा विविक्तम् यद् वक्त्रम् गृह्णीमो युक्ति सम्भवात्

10 अनाद्य विद्या युक्तस्य पुरुषस् यात्म वेदनम्

स्वतो न सम्भवाद् अन्य: तत्त्वज्ञो ज्ञानदो भवेत्

11 पुरुषेश्वर योरत्र न वैलक्षण्यम् अण्वपि

तद् अन्य कल्पना पार्था ज्ञानम् च प्रकृतेर् गुण:

12 प्रकृति: गुण साम्यम् वै प्रकृतेर् नात्म नो गुणा:

सत्त्वम् रजस् तम इति स्थित् युत्पत् त्यन्त हेतव:

13 सत्त्वम् ज्ञानम् रज: कर्म तमो ऽज्ञान मिहोच्यते

गुण व्यतिकर: काल: स्वभाव: सूत्रम् एव च

14 पुरुष: प्रकृतिर् व्यक्तम् अहङ्कारो नभो ऽनिल:

ज्योतिर् आप: क्षितिर् इति तत्त्वान् युक्तानि मे नव

15 श्रोत्रम् त्वग् दर्शनम् घ्राणो जिह्वेति ज्ञान शक्तय:

वाक् पाण् युपस्थ पाय् वङ्घ्रि: कर्माण् यङ्गो भयम् मन:

16 शब्दः स्पर्शो रसो गन्धो रूपम् चेत् यर्थ जातयः

गत् युक्त् युत् सर्ग शिल्पानि कर्मा यतन सिद्धयः

17 सर्गादौ प्रकृतिर् ह्यस्य कार्य कारण रूपिणी

सत्त्वा दिभिर् गुणैर् धत्ते पुरुषो ऽव्यक्त ईक्षते

18 व्यक्तादायो विकुर्वाणा धातवः पुरुषे क्षया

लब्ध वीर्याः सृजन्त् यण्डम् सम्हताः प्रकृतेर् बलात्

19 सप्तैव धातव इति तत् रार्थाः पञ्च खादयः

ज्ञान मात्मोभया धारः ततो देहेन्द्रिया सवः

20 षडित् यत् रापि भूतानि पञ्च षष्ठः परः पुमान्

तैर् युक्त आत्म सम्भूतैः सृष्ट्वेदम् सम् उपाविशत्

21 चत्वार् येवेति तत्रापि तेज आपोऽन्नम् आत्मनः

जातानि तैरिदम् जातम् जन्मा वय विनः खलु

22 सङ्ख्याने सप्त दशके भूत मात्रेन्द्रि याणि च

पञ्च पञ्चैक मनसा आत्मा सप्त दशः स्मृतः

23 तद् वत् षोडश सङ्ख्याने आत्मैव मन उच्यते

भूतेन्द्रि याणि पञ्चैव मन आत्मा त्रयो दश

24 एका दशत्व आत्मासौ महा भूतेन्द्रि याणि च

अष्टौ प्रकृत यश् चैव पुरुषश् च नवेत् यथ

25 इति नाना प्रसङ्ख्यानम् तत्त्वानाम् ऋषिभिः कृतम्

सर्वम् न्याय्यम् युक्ति मत् त्वाद् विदुषाम् किम् अशोभनम्

26 श्री उद्धव उवाच

प्रकृतिः पुरुषश् चोभौ यद् यप् यात्म विलक्षणौ

अन्योन्या पाश्रयात् कृष्ण दृश्यते न भिदा तयोः

प्रकृतौ लक्ष्यते ह्यात्मा प्रकृतिश् च तथ् आत्मनि

27 एवम् मे पुण्डरीकाक्ष महान्तम् सम् शयम् हृदि

छेत्तु मर्हसि सर्वज्ञ वचोभिः नयनै पुणैः

28 त्वत्तो ज्ञानम् हि जीवानाम् प्रमो षस्ते ऽत्र शक्तितः

त्वमेव ह्यात्म मायाया गतिम् वेत्थ न चापरः

29 श्री भगवान् उवाच

प्रकृतिः पुरुषश् चेति विकल्पः पुरुषर् षभ

एष वैकारिकः सर्गो गुण व्यतिकर् आत्मकः

30 ममाङ्ग माया गुणमय्य नेकधा विकल्प बुद्धीश् च गुणैर् वि धत्ते

वैकारिकस् त्रिविधो ऽध्यात्म मेकम् अथाधि दैवम् अधि भूतम् अन्यत्

31 दृग् रूपम् आर्कम् वपुरत्र रन्ध्रे परस्परम् सिध्यति यः स्व तः खे

आत्मा यदेषाम् अपरो य आद्यः स्वयानु भूत् याखिल सिद्ध सिद्धिः

32 एवम् त्वगादि श्रवणादि चक्षुर्

जिह्वादि नासादि च चित्त युक्तम्

33 योऽसौ गुणक् षोभ कृतो विकारः प्रधान मूलान् महतः प्रसूतः

अहम् त्रिवृन् मोह विकल्प हेतुः वैकारिकस् तामस ऐन्द्रियश् च

34 आत्मा परिज्ञान मयो विवादो ह्यस्तीति नास्तीति भिदार्थ निष्ठः

व्यर्थो ऽपि नैवो परमेत पुम्साम् मत्तः परा वृत्त धियाम् स्व लोकात्

35 श्री उद्धव उवाच

त्वत्तः परा वृत्त धियः स्वकृतैः कर्मभिः प्रभो

उच्चा वचान् यथा देहान् गृह्णन्ति विसृजन्ति च

36 तन् म माख्याहि गोविन्द दुर् विभाव्यम् अनात्मभिः

न ह्ये तत् प्रायशो लोके विद्वाम् सः सन्ति वञ्चिताः

37 श्री भगवान् उवाच

मनः कर्म मयम् ण्ॠणाम् इन्द्रियैः पञ्चभिर् युतम्

लोकाल् लोकम् प्रयात् यन्य आत्मा तद् अनुवर्तते

38 ध्यायन् मनो ऽनु विषयान् दृष्टान् वानु श्रुतान् अथ

उद्यत् सीदत् कर्म तन्त्रम् स्मृतिस् तद् अनु शाम्यति

39 विषयाभि निवेशेन नात्मानम् यत् स्मरेत् पुनः

जन्तोर्वै कस्यचिद् हेतोः मृत्युर् अत्यन्त विस्मृतिः

40 जन्म त्वात्म तया पुम्सः सर्व भावेन भूरिद

विषय स्वीकृतिम् प्राहुः यथा स्वप्न मनोरथः

41 स्वप्नम् मनोरथम् चेत्थम् प्राक्तनम् न स्मरत् यसौ

तत्र पूर्वम् इवात्मानम् अपूर्वम् चानु पश्यति

42 इन्द्रियायन सृष्ट्येदम् त्रै विध्यम् भाति वस्तुनि

बहिर् अन्तर् भिदा हेतुः जनो ऽसज्जन कृद् यथा

43 नित्यदा हयङ्ग भूतानि भवन्ति न भवन्ति च

कालेना लक्ष्य वेगेन सूक्ष्म त्वात् तन्न दृश् यते

44 यथ् आर्चिषाम् स्रोतसाम् च फलानाम् वा वनस्पतेः

तथैव सर्व भूतानाम् वयो ऽवस्थाद यः कृताः

45 सोऽयम् दीपो ऽर्चिषाम् यद् वत् स्रोतसाम् तद् इदम् जलम्

सोऽयम् पुमान् इति नृणाम् मृषा गीर् धीर् मृषा युषाम्

46 मा स्वस्य कर्म बीजेन जायते सो ऽप्ययम् पुमान्

म्रियते वा मरो भ्रान्त्या यथ् आग्निर् दारु सम्युतः

47 निषेक गर्भ जन्मानि बाल्य कौमार यौवनम्

वयो मध्यम् जरा मृत्युः इत् यवस्थास् तनोर् नव

48 एता मनोरथ मयीः हयन्यस् योच्चाव चास्तनूः

गुण सङ्गाद् उपादत् ते क्वचित् कश्चिज् जहाति च

49 आत्मनः पितृ पुत्राभ्याम् अनुमेयौ भवाप् ययौ

न भवाप् यय वस्तूनाम् अभिज्ञो द्वय लक्षणः

50 तरोर् बीज विपाकाभ्याम् यो विद्वान् जन्म सम्यमौ

तरोर् विलक्षणो द्रष्टा एवम् द्रष्टा तनोः पृथक्

51 प्रकृतेर् एव मात्मानम् अवि विच्या बुधः पुमान्

तत्त्वेन स्पर्श सम्मूढः सम्सारम् प्रति पद्यते

52 सत्त्व सङ्गाद् ऋषीन् देवान् रजसा सुर मानुषान्

तमसा भूत तिर्यक्त्वम् भ्रामितो याति कर्मभिः

53 नृत् यतो गायतः पश्यन् यथैवानु करोति तान्

एवम् बुद्धि गुणान् पश्यन् अनीहो ऽप्यनु कार्यते

54 यथ् आम्भसा प्रचलता तरवो ऽपि चला इव

चक्षुसा भ्राम्य माणेन दृश्यते भ्रमती व भूः

55 यथा मनो रथ धियो विषय्षानु भवो मृषा

स्वप्न दृष्टाश् च दाशार् ह तथा सम्सार आत्मनः

56 अर्थे ह्यविद्य माने ऽपि सम्सृतिर् न निवर्तते

ध्यायतो विषया नस्य स्वप्ने ऽनर्थाग मो यथा

57 तस्माद् उद्धव मा भुङ्क्ष्व विषयान् असद् इन्द्रियैः

आत्मा ग्रहण निर्भातम् पश्य वै कल्पिकम् भ्रमम्

58 क्षिप्तो ऽवमानितो ऽसद्भिः प्रलब्धो ऽसूयितो ऽथ वा

ताडितः सन्नि बद्धो वा वृत्त्या वा परि हापितः

59 निष्ठितो मूत्रितो वाज्ञैः बहु धैवम् प्रकम्पितः

श्रेयस् कामः कृच्छ्र गत आत्मन् आत्मानम् उद्धरेत्

60 श्री उद्धव उवाच

यथैवम् अनु बुध्येयम्

वद नो वद ताम् वर

61 सुदुः सहम् इमम् मन्ये आत्मनि असद् अतिक्रमम्

विदुषाम् अपि विश्वात्मन् प्रकृतिर् हि बलीयसी

ऋते त्वद् धर्म निरतान् शान्ताम्स् ते चरणालयान्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

एकादश स्कन्दे द्वा विम्शो ऽध्याय ॥

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ एकादश स्कन्दः त्रयो विम्शो ऽध्याय :

स्कन्द- 11: अध्याय- 23

01 श्री बादरायणिर् उवाच

स एवम् आशम्सित उद्धवेन भागवत मुख्येन दाशार्ह मुख्यः

सभाजयन् भृत्य वचो मुकुन्दः तम् आबभाषे श्रवणीय वीर्यः

02 श्री भगवान् उवाच

बार्हस् पत्य स वै नात्र साधुर्वै दुर्ज नेरितैः

दुरक्तैः भिन्नम् आत्मानम् यः समाधातु मीश्वरः

03 न तथा तप्यते विद्धः पुमान् बाणैः सु मर्मगैः

यथा तुदन्ति मर्मस्था ह्यसताम् परुषेषवः

04 कथयन्ति महत् पुण्यम् इतिहासम् इहोद्धव

तमहम् वर्ण यिष्यामि निबोध सु समाहितः

05 केनचिद् भिक्षुणा गीतम् परि भूतेन दुर् जनैः

स्मरता धृति युक्तेन विपाकम् निज कर्मणाम्

06 अवन्तिषु द्विजः कश्चिद् आसीद् आढ्यत मः श्रिया

वार्ता वृत्तिः कदर् यस्तु कामी लुब्धो ऽति कोपनः

07 ज्ञातयो ऽतिथयस् तस्य वाङ्मात्रेण् आपि नार्चिताः

शून्याव सथ आत्मापि काले कामैर् अनर्चितः

08 दुः शीलस्य कदर् यस्य द्रुह् यन्ते पुत्र बान्धवाः

दारा दुहितरो भृत्या विषण्णा नाचरन् प्रियम्

09 तस् यैवम् यक्ष वित् तस्य च्युतस्यो भय लोकतः

धर्म काम विहीनस्य चुक्रुधुः पञ्च भागिनः

10 तद् अवध्यान् अविस्रस्त पुण्य स्कन्धस्य भूरिद

अर्थो ऽप्य गच्छन् निधनम् बह्वाया स परिश्रमः

11 ज्ञात्यो जगृहुः किञ्चित् किञ्चिद् दस्यव उद्धव

दैवतः कालतः किञ्चिद् ब्रह्म बन्धोर् नृपार्थि वात्

12 स एवम् द्रविणे नष्टे धर्म काम विवर्जितः

उपेक्षितश् च स्वजनैः चिन्ताम् आप दुरत् ययाम्

13 तस् यैवम् ध्यायतो दीर्घम् नष्ट रायस् तपस्विनः

खिद्यतो बाष्प कण्ठस्य निर्वेदः सुम हानभूत्

14 स चा हेदम् अहो कष्टम् वृथात्मा मे ऽनुतापितः

न धर्माय न कामाय यस्यार् थायास ईदृशः

15 प्रायेणाथाः कदर् याणाम् न सुखाय कदाचन

इह चात्मो पता पाय मृतस्य नरका य च

16 यशो यशस्विनाम् शुद्धम् श्लाघ्या ये गुणिनाम् गुणाः

लोभः स्वल्पो ऽपि तान् हन्ति श्वित्रो रूपम् इवेप्सितम्

17 अर्थस्य साधने सिद्धे उत्कर्षे रक्षणे व्यये

नाशोप भोग आयासः त्रासश् चिन्ता भ्रमो नृणाम्

18 स्तेयम् हिम्सा नृतम् दम्भः कामः क्रोधः स्मयो मदः

भेदो वैरम् अविश्वासः सम्स्पर्धा व्यसनानि च

19 एते पञ्च दश अनर्था ह्यर्थ मूला मता नृणाम्

तस्माद् अनर्थम् अर्थाख्यम् श्रेयो ऽर्थी दूर तस् त्यजेत्

20 भिद्यन्ते भ्रातरो दाराः पितरः सुहृदस् तथा

एका स्निग्धाः काकिणिना सद्यः सर्वे ऽरयः कृताः

21 अर्थेन् आल्पीयसा ह्येते सम्रब्धा दीप्त मन्यवः

त्यजन्त् याशु स्पृधो घ्नन्ति सहसोत् सृज्य सौहृदम्

22 लब्ध्वा जन्मा मर प्रार्थ्यम् मानुष्यम् तद् द्विजाग्र् यताम्

तद् अनाद् ऋत्य ये स्वार्थम् घ्नन्ति यान्ति अशुभाम् गतिम्

23 स्वर्गाप वर्गयोर् द्वारम् प्राप्य लोकम् इमम् पुमान्

द्रविणे को ऽनुषज् जेत मर्त्यो ऽनर्थस्य धामनि

24 देवर्षि पितृ भूतानि ज्ञातीन् बन्धूम्श् च भागिन:

असम् विभज्य चात्मानम् यक्ष वित्त: पत त्यध:

25 व्यर्थ यार्थेह या वित्तम् प्रमत् तस्य वयो बलम्

कुशला येन सिध्यन्ति जरठ: किम् नु साधये

26 कस्मात् सङ्क्लिश्यते विद्वान् व्यर्थयार्थे ह यासकृत्

कस्यचिन् मायया नूनम् लोकोऽयम् सु विमोहित:

27 किम् धनैर् धन दैर्वा किम् कामैर्वा काम दैरुत

मृत्युना ग्रस्य मानस्य कर्मभिर् वोत जन्मदै:

28 नूनम् मे भगवाम्स् तुष्ट: सर्व देव मयो हरि:

येन नीतो दशा मेताम् निर्वेदश् चात्मन: प्लव:

29 सोऽहम् कालाव शेषेण शोषयिष्ये ऽङ्ग मात्मन:

अप्रमत्तो ऽखिल स्वार्थे यदि स्यात् सिद्ध आत्मनि

30 तत्र माम् अनुमो देरन् देवा: त्रि भुवनेश्वरा:

मुहूर्तेन ब्रह्म लोकम् खट्वाङ्ग: सम साधयत्

31 श्री भगवान् उवाच

इत् यभि प्रेत्य मनसा ह्यावन्त्यो द्विज सत्तम:

उन्मुच्य हृदय ग्रन्थीन् शान्तो भिक्षु रभून् मुनि:

32 स चचार मही मेताम् सम्यत् आत्मेन्द्रि यानिल:

भिक्षार्थम् नगर ग्रामान् असङ्गो ऽलक्षितो ऽविशत्

33 तम् वै प्रवयसम् भिक्षुम् अवधूतम् असज्जना:

दृष्ट्वा पर्यभ वन् भद्र बह्वीभि: परि भूतिभि:

34 केचित् त्रिवेणुम् जगृहु: एके पात्रम् कमण्डलुम्

पीठम् चैके ऽक्ष सूत्रम् च कन्थाम् चीराणि केचन

प्रदाय च पुनस्तानि दर्शितानि आददुर् मुने:

35 अन्नम् च भैक्ष्य सम्पन्नम् भुञ्जानस्य सरित् तटे

मूत्र यन्ति च पापिष्ठाः ष्ठीवन् त्यस् य च मूर्धनि

36 यत वाचम् वाचयन्ति ताडयन्ति न वक्ति चेत्

तर्जयन् त्यपरे वाग्भिः स्तेनोऽयम् इति वादिनः

बध्नन्ति रज्ज्वा तम् केचिद् बध्यताम् बध्यताम् इति

37 क्षिपन्त् येके ऽवजानन्त एष धर्म ध्वजः शठः

क्षीण वित्त इमाम् वृत्तिम् अग्रहीत् स्वजनोज् झितः

38 अहो एष महा सारो धृतिमान् गिरिराड् इव

मौनेन साधयत् यर्थम् बकवद् दृढ निश्चयः

39 इत् येके विहसन्त् येनम् एके दुर्वात यन्ति च

तम् बबन्धुर् निरुरुधुः यथा क्रीडनकम् द्विजम्

40 एवम् स भौतिकम् दुःखम् दैविकम् दैहिकम् च यत्

भोक्तव्यम् आत्मनो दिष्टम् प्राप्तम् प्राप्तम् अबुध्यत

41 परिभूत इमाम् गाथाम् अगायत नराधमैः

पात यद्भिः स्व धर्मस्थो धृति मास्थाय सात्त्विकीम्

42 द्विज उवाच

नायम् जनो मे सुख दुःख हेतुः न देव तात्मा ग्रह कर्म कालाः

मनः परम् कारण मा मनन्ति सम्सार चक्रम् परिवर्त येद् यत्

43 मनो गुणान् वै सृजते बलीयः ततश् च कर्माणि विलक्षणानि

शुक्लानि कृष्णानि अथ लोहितानि तेभ्यः सवर्णाः सृतयो भवन्ति

44 अनीह आत्मा मनसा समीहता हिरण्मयो मत् सख उद्वि चष्टे

मनः स्वलिङ्गम् परिगृह्य कामान् जुषन् निबद्धो गुण सङ्गतो ऽसौ

45 दानम् स्वधर्मो नियमो यमश् च श्रुतम् च कर्माणि च सद् व्रतानि

सर्वे मनो निग्रह लक्षणान् ताः परो हि योगो मनसः समाधिः

46 समाहितम् यस्य मनः प्रशान्तम् दानादिभिः किम् वद तस्य कृत्यम्

असम्य तम् यस्य मनो विनश्यद् दानादि भिश् चेद् अपरम् किमेभिः

47 मनोवशे ऽन्ये ह्यभवन्स् म देवा मनश् च नान्यस्य वशम् समेति

भीष्मो हि देवः सहसः सहीयान् युञ्ज्याद्वशे तम् सहि देव देवः

48 तम् दुर्जयम् शत्रुम् असह्य वेगम् अरुन्तुदम् तन्न विजित्य केचित्

कुर्वन्त् यसद् विग्रह मत्र मर्त्यैः मित्राणि उदासीन रिपून् वि मूढाः

49 देहम् मनो मात्रम् इमम् गृहीत्वा ममाहम् इत् यन्धधियो मनुष्याः

एषो ऽहम् अन्योऽयम् इति भ्रमेण दुरन्त पारे तमसि भ्रमन्ति

50 जनस्तु हेतुः सुख दुःख योश् चेत् किम् आत्मनश् चात्र ह भौमयोस् तत्

जिह्वाम् क्वचित् सन्द शति स्वदद्भिः तद् वेद नायाम् कतमाय कुप्येत्

51 दुःखस् य हेतुः यदि देव तास्तु किम् आत्मनस् तत्र विकारयोस् तत्

यद् अङ्गम् अङ्गेन निहन्य ते क्वचित् क्रुध्येत कस्मै पुरुषः स्व देहे

52 आत्मा यदि स्यात् सुख दुःख हेतुः किम् अन्य तस् तत्र निज स्वभावः

न ह्यात्मनो ऽन्यद् यदि तन् मृषा स्यात् क्रुध्येत कस्मात् न सुखम् न दुःखम्

53 ग्रहा निमित्तम् सुख दुःख योश् चेत् किम् आत्मनो ऽजस्य जनस्य ते वै

ग्रहैः ग्रहस् यैव वदन्ति पीडाम् क्रुध्येत कस्मै पुरुषस्त तोऽन्यः

54 कर्मास्तु हेतुः सुख दुःख योश् चेत् किम् आत्मन स्तद्धि जडा जडत्वे

देहस् त्वचित् पुरुषोऽयम् सुपर्णः क्रुध्येत कस्मै न हि कर्म मूलम्

55 कालस्तु हेतुः सुख दुःख योश् चेत् किम् आत्मनस् तत्र तद् आत्म को ऽसौ

नाग्नेर्हि तापो न हिमस्य तत् स्यात् क्रुध्येत कस्मै न परस्य द्वन् द्वम्

56 न केनचित् क्वापि कथञ्च नास्य द्वन्द्वोप रागः परतः परस्य

यथाहमः सम्सृति रूपिणः स्याद् एवम् प्रबुद्धो न बिभेति भूतैः

57 एताम् स आस्थाय परात्म निष्ठाम् अध्यासिताम् पूर्व तमैर् महर्षिभिः

अहम् तरिष्यामि दुरन्त पारम् तमो मुकुन्दाङ्घ्रि निषेव यैव

58 श्री भगवान् उवाच

निर्विद्य नष्ट द्रविणो गत क्लमः प्रव्रज्य गाम् पर्यट मान इत्थम्

निराकृतो ऽसद्भिर् अपि स्व धर्माद् अकम्पितो ऽमूम् मुनिराह गाथाम्

59 सुख दुःख प्रदो नान्यः पुरुषस् यात्म विभ्रमः

मित्रो दासीन रिपवः सम्सारस् तमसः कृतः

60 तस्मात् सर्वात्मना तात निगृहाण मनो धिया

मय्यावेशि तया युक्त एतावान् योग सङ्ग्रह:

61 य एताम् भिक्षुणा गीताम् ब्रह्म निष्ठाम् समाहित:

धारयन् छ्रावयन् छृण्वन् द्वन्द्वैर् नैवाभि भूयते

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

एकादश स्कन्दे त्रयो विम्शो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ एकादश स्कन्द: चतुर् विम्शो ऽध्याय :

स्कन्द- 11: अध्याय- 24

01 श्री भगवान् उवाच

अथ ते सम्प्र वक्ष्यामि साङ्ख्यम् पूर्वैर् विनिश्चितम्

यद् विज्ञाय पुमान् सद्यो जह्याद् वैकल्पिकम् भ्रमम्

02 आसीज् ज्ञान मथो ह्यर्थ एकमेवा विकल्पितम्

यदा विवेक निपुणा आदौ कृत युगे ऽयुगे

03 तन् माया फल रूपेण केवलम् निर् विकल्पितम्

वाङ्मनो ऽगोचरम् सत्यम् द्विधा सम् अभवद् बृहत्

04 तयोर् एक तरो ह्यर्थ: प्रकृति: सोभ यात्मिका

ज्ञानम् त्वन्य तमो भाव: पुरुष: सोऽभि धीयते

05 तमो रज: सत्त्वम् इति प्रकृतेर् अभवन् गुणा:

मया प्रक्षोभ्य माणाया: पुरुषानु मते न च

06 तेभ्य: सम भवत् सूत्रम् महान् सूत्रेण सम्युत:

ततो विकुर्वतो जातो ऽहङ्कारो यो विमोहनः

07 वैकारिकस् तैज सश् च तामसश् चेत् यहम् त्रिवृत्

तन् मात्रेन्द्रिय मनसाम् कारणम् चिद चिन्मयः

08 अर्थः तन् मात्रिकाज् जज्ञे तामसाद् इन्द्रियाणि च

तैजसाद् देवता आसन् एका दश च वै कृतात्

09 मया सञ्चो दिता भावाः सर्वे सम् हत्य कारिणः

अण्ड मुत्पादया मासुः ममाय तनम् उत्तमम्

10 तस्मिन् नहम् समभवम् अण्डे सलिल सम्स्थितौ

मम नाभ्याम् अभूत् पद्मम् विश्वाख्यम् तत्र चात् मभूः

11 सो ऽसृजत् तपसा युक्तो रजसा मद् अनुग्रहात्

लोकान् सपालान् विश्वात्मा भूर् भुवः स्वरिति त्रिधा

12 देवानाम् ओक आसीत् स्वर् भूतानाम् च भुवः पदम्

मर्त्या दीनाम् च भूर् लोकः सिद्धानाम् त्रितयात् परम्

13 अधो ऽसुराणाम् नागानाम् भूमेर् ओको ऽसृजत् प्रभुः

त्रि लोक्याम् गतयः सर्वाः कर्मणाम् त्रि गुणात्मनाम्

14 योगस् य तपसश् चैव न्यासस् य गतयो ऽमलाः

महर् जनस् तपः सत्यम् भक्ति योगस् य मद् गतिः

15 मया कालात्मना धात्रा कर्म युक्तम् इदम् जगत्

गुण प्रवाह एतस्मिन् उन्मज्जति निमज्जति

16 अणुर् बृहत् कृशः स्थूलो यो यो भावः प्रसिध् यति

सर्वो ऽप्युभय सम्युक्तः प्रकृत्या पुरुषेण च

17 यस्तु यस्याद् इरन्तश् च स वै मध्यम् च तस्य सन्

विकारो व्यवहार् आर्थो यथा तैजस पार्थिवाः

18 यद् उपादाय पूर्वस्तु भावो विकुरुते ऽपरम्

आदिरन्तो यदा यस्य तत् सत्यम् अभि धीयते

19 प्रकृतिः यस्यो पादानम् आधारः पुरुषः परः

सतो ऽभिव्यञ्ज कः कालो ब्रह्म तत् त्रितयम् त्वहम्

20 सर्गः प्रवर्तते तावत् पौर्वा पर्येण नित्यशः

महान् गुण विसर्गार्थः स्थित् यन्तो यावद् ईक्षणम्

21 विराण्मया साद्य मानो लोक कल्प विकल्पकः

पञ्चत्वा य विशेषा य कल्पते भुवनैः सह

22 अन्ने प्रलीयते मर्त्यम् अन्नम् धानासु लीयते

धाना भूमौ प्रलीयन्ते भूमिर् गन्धे प्रलीयते

23 अप्सु प्रलीयते गन्ध आपश् च स्वगुणे रसे

लीयते ज्योति षिरसो ज्योती रूपे प्रलीयते

24 रूपम् वायौ स च स्पर्शे लीयते सोऽपि चाम्बरे

अम्बरम् शब्द तन् मात्र इन्द्रियाणि स्वयोनिषु

25 योनिः वैकारिके सौम्य लीयते मनस् ईश्वरे

शब्दो भूतादि मप्येति भूतादिर् महति प्रभुः

26 स लीयते महान् स्वेषु गुणेषु गुण वत्तमः

ते ऽव्यक्ते सम्प्र लीयन्ते तत् काले लीयते ऽव्यये

27 कालो माया मये जीवे जीव आत्मनि मय्यजे

आत्मा केवल आत्मस्थो विकल् पापाय लक्षणः

28 एवम् अन्वीक्ष माणस्य कथम् वै कल्पिको भ्रमः

मनसो हृदि तिष्ठेत व्योम् नीवार् कोदये तमः

29 एष साङ्ख्य विधिः प्रोक्तः सम्शय ग्रन्थि भेदनः

प्रति लोमानु लोमाभ्याम् परावर दृश मया

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

एकादश स्कन्दे चतुर् विम्शो ऽध्याय ः॥

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ एकादश स्कन्द: पञ्च विम्शो ऽध्याय :

स्कन्द- 11: अध्याय- 25

01 श्री भगवान् उवाच

गुणानाम् असमिश्राणाम् पुमान् येन यथा भवेत्

तन् मे पुरुष वर्येदम् उपधारय शम्सत:

02 शमो दमस् तिति क्षेक्षा तप: सत्यम् दया स्मृति:

तुष्टिस् त्यागो ऽस्पृहा श्रद्धा ह्रीर् दयादि: स्व निर्वृति:

03 काम ईहा मदस् तृष्णा स्तम्भ आशीर् भिदा सुखम्

मदोत् साहो यश: प्रीति: हास्यम् वीर्यम् बलोद्यम:

04 क्रोधो लोभो ऽनृतम् हिम्सा याच्ञा दम्भ: क्लम: कलि:

शोक मोहौ विषाद् आर्ती निद्राशा भीर् अनुद्यम:

05 सत्त्वस्य रजसश् चैता: तमसश् चानु पूर्वश:

वृत्तयो वर्णित प्राया: सन्निपातम् अथो शृणु

06 सन्निपातस् त्वहम् इति ममेत् युद्धव या मति:

व्यवहार: सन्नि पातो मनो मात्रेन्द्रि या सुभि:

07 धर्मे चार्थे च कामे च यदासौ परि निष्ठित:

गुणानाम् सन्नि कर्षोऽयम् श्रद्धारति धनावह:

08 प्रवृत्ति लक्षणे निष्ठा पुमान् यर्हि गृहाश्रमे

स्वधर्मे चानु तिष्ठेत गुणानाम् समितिर् हि सा

09 पुरुषम् सत्त्व सम्युक्तम् अनुमीयाच् छमादिभि:

कामादिभी रजो युक्तम् क्रोधाद्यै: तमसा युतम्

10 यदा भजति माम् भक्त्या निरपेक्ष: स्व कर्मभि:

तम् सत्त्व प्रकृतिम् विद्यात् पुरुषम् स्त्रियम् एव वा

11 यदा आशिष आशास्य माम् भजेत स्व कर्मभिः

तम् रजः प्रकृतिम् विद्याद् इम्साम् आशास्य तामसम्

12 सत्त्वम् रजस् तम इति गुणा जीवस्य नैव मे

चित्तजा यैस्तु भूतानाम् सज्जमानो निबध्यते

13 यदेतरौ जयेत् सत्त्वम् भास्वरम् विशदम् शिवम्

तदा सुखेन युज्येत धर्म ज्ञानादिभिः पुमान्

14 यदा जयेत् तमः सत्त्वम् रजः सङ्गम् भिदा चलम्

तदा दुःखेन युज्येत कर्मणा यशसा श्रिया

15 यदा जयेद् रजः सत्त्वम् तमो मूढम् लयम् जडम्

युज्येत शोक मोहाभ्याम् निद्रया हिम्सया शया

16 यदा चित्तम् प्रसीदे त इन्द्रियाणाम् च निर्वृतिः

देहे ऽभयम् मनो ऽसङ्गम् तत् सत्त्वम् विद्धि मत् पदम्

17 विकुर्वन् क्रियया चाधीः अनिवृत्तिश् च चेतसाम्

गात्रास् वास्थ्यम् मनो भ्रान्तम् रज एतैः निशामय

18 सीदच् चित्तम् विलीयेत चेतसो ग्रहणे ऽक्षमम्

मनो नष्टम् तमो ग्लानिः तमस् तद् उपधारय

19 एधमाने गुणे सत्त्वे देवानाम् बलमेधते

असुराणाम् च रजसि तमस् युद्धव रक्षसाम्

20 सत्त्वात् जागरणम् विद्याद् रजसा स्वप्नम् आदिशेत्

प्रस्वापम् तमसा जन्तोः तुरीयम् त्रिषु सन्ततम्

21 उपर् युपरि गच्छन्ति सत्त्वेन ब्राह्मणा जनाः

तमसाधो ऽध आमुख्याद् रजसान् तर चारिणः

22 सत्त्वे प्रलीनाः स्वर्यान्ति नरलोकम् रजोलयाः

तमो लयास्तु निरयम् यान्ति माम् एव निर्गुणाः

23 मद् अर्पणम् निष्फलम् वा सात्त्विकम् निज कर्म तत्

राजसम् फल सङ्कल्पम् हिम्सा प्रायादि तामसम्

24 कैवल्यम् सात्त्विकम् ज्ञानम् रजो वै कल्पिकम् च यत्

प्राकृतम् तामसम् ज्ञानम् मन्निष्ठम् निर्गुणम् स्मृतम्

25 वनम् तु सात्त्विको वासो ग्रामो राजस उच्यते

तामसम् द्यूत सदनम् मन्निकेतम् तु निर्गुणम्

26 सात्त्विकः कारको ऽसङ्गी रागान् धो राजसः स्मृतः

तामसः स्मृति विभ्रष्टो निर्गुणो मद् अपाश्रयः

27 सात्त्विक् याध् यात्मिकी श्रद्धा कर्म श्रद्धा तु राजसी

तामसि अधर्मे या श्रद्धा मत् सेवायाम् तु निर्गुणा

28 पथ्यम् पूतम् अनायस्तम् आहार्यम् सात्त्विकम् स्मृतम्

राजसम् चेन्द्रिय प्रेष्ठम् तामसम् चार्ति दाशुचि

29 सात्त्विकम् सुखम् आत्मोत्थम् विषयोत्थम् तु राजसम्

तामसम् मोह दैन्योत्थम् निर्गुणम् मद् अपाश्रयम्

30 द्रव्यम् देशः फलम् कालो ज्ञानम् कर्म च कारकः

श्रद्ध् आवस्था कृतिर् निष्ठा त्रै गुण्यः सर्व एव हि

31 सर्वे गुणमया भावाः पुरुषा व्यक्त धिष्ठिताः

दृष्टम् श्रुतम् अनुध्यातम् बुद्ध्या वा पुरुषर् षभ

32 एताः सम्सृतयः पुम्सो गुण कर्म निबन्धनाः

येनेमे निर्जिताः सौम्य गुणा जीवेन चित्तजाः

भक्ति योगेन मन् निष्ठो मद् भावाय प्रपद् यते

33 तस्माद् देहमिमम् लब्ध्वा ज्ञान विज्ञान सम्भवम्

गुण सङ्गम् विनिर् धूय माम् भजन्तु विचक्षणाः

34 निः सङ्गो माम् भजेद् विद्वान् अप्रमत्तो जितेन्द्रियः

रजस् तमश् चा भिजयेत् सत्त्व सम्सेवया मुनिः

35 सत्त्वम् चा भिजयेद् युक्तो नैर् अपेक्ष्येण शान्तधीः

सम्पद्य ते गुणैर् मुक्तो जीवो जीवम् विहाय माम्

36 जीवो जीव विनिर् मुक्तो गुणैश् चाशय सम्भवैः

मयैव ब्रह्मणा पूर्णो न बहिर् नान्तरश् चरेत्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

एकादश स्कन्दे पञ्च विम्शो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ एकादश स्कन्द: षड् विम्शो ऽध्याय :

स्कन्द- *11:* अध्याय- *26*

*01* श्री भगवान् उवाच

मल् लक्षणम् इमम् कायम् लब्ध्वा मद् धर्म आस्थित:

आनन्दम् परमात्मानम् आत्मस्थम् समुपैति माम्

*02* गुण मय्या जीवयोन्या विमुक्तो ज्ञान निष्ठया

गुणेषु माया मात्रेषु दृश्यमाने ष्व वस्तुत:

वर्तमानो ऽपि न पुमान् युज्यते ऽवस्तुभिर् गुणै:

*03* सङ्गम् न कुर्याद् असताम् शिश्नोदर तृपाम् क्वचित्

तस् यानुगस् तमस् यन्धे पतत् यन्धानु गान्धवत्

*04* ऐल: सम्राड् इमाम् गाथाम् अगायत बृहच् छ्रवा:

उर्वशी विरहान् मुह्यन् निर्विण्ण: शोक सम्यमे

*05* त्यक्त् वात्मानम् व्रयन्तीम् ताम् नग्न उन्मत्त वन् नृप:

विलपन् अन्वगाज् जाये घोरे तिष्ठेति विक्लव:

*06* कामान् अतृप्तो ऽनुजुषन् क्षुल्लकान् वर्ष यामिनी:

न वेद यान्तीर् नायान्ती: उर्वश्या कृष्ट चेतन:

*07* ऐल उवाच

अहो मे मोह विस्तारः काम कश्मल चेतसः

देव्या गृहीत कण्ठस्य नायुः खण्डा इमे स्मृताः

08 नाहम् वेदाभि निर्मुक्तः सूर्यो वाभ्यु दितो ऽमुया

मुषितो वर्ष पूगानाम् बता हानि गतान् युत

09 अहो मे आत्म सम्मोहो येनात्मा योषिताम् कृतः

क्रीडा मृगश् चक्रवर्ती नर देव शिखामणिः

10 स परिच्छदम् आत्मानम् हित्वा तृण मिवेश्वरम्

यान्तीम् स्त्रियम् चान् वगमम् नग्न उन्मत्त वद् रुदन्

11 कुतस् तस्यानु भावः स्यात् तेज ईशत्व मेव वा

यो ऽन्व गच्छम् स्त्रियम् यान्तीम् खरवत् पाद ताडितः

12 किम् विद्यया किम् तपसा किम् त्यागेन श्रुतेन वा

किम् विविक्तेन मौनेन स्त्रीभिर् यस्य मनो हृतम्

13 स्वार्थस् या कोविदम् धिङ्माम् मूर्खम् पण्डित मानिनम्

योऽहम् ईश्वर ताम् प्राप्य स्त्रीभिः गो खर वज्जितः

14 सेवतो वर्ष पूगान् मे उर्वश्या अधरा सवम्

न तृप्यत् यात्म भूः कामो वह्निर् आहुति भिर् यथा

15 पुम्श्चल् याप हृतम् चित्तम् को न्वन्यो मोचितुम् प्रभुः

आत्मा रामेश्वर मृते भगवन्तम् अधोक्षजम्

16 बोधि तस्यापि देव्या मे सूक्त वाक्येन दुर् मतेः

मनोगतो महा मोहो नापयाति अजित् आत्मनः

17 किम् एतया नो ऽपकृतम् रज्ज्वा वा सर्प चेतसः

रज्जुः स्वरूपा विदुषो योऽहम् यद् अजितेन्द्रियः

18 क्वायम् मलीम सः कायो दौर् गन्ध्याद् यात्म को ऽशुचिः

क्व गुणाः सौमनस् याद्या हयध्यासो ऽविद्यया कृतः

19 पित्रोः किम् स्वम् नु भार्या याः स्वामिनो ऽग्नेः श्व गृध्रयोः

किम् आत्मनः किम् सुहृदाम् इति यो नाव सीयते

20 तस्मिन् कलेवरे ऽमेध्ये तुच्छ निष्ठे विषज्जते

अहो सुभद्रम् सुनसम् सुस्मितम् च मुखम् स्त्रियः

21 त्वङ् माम्स रुधिर स्नायु मेदो मज्जास्थि सम्हतौ

विण् मूत्र पूये रमताम् कृमीणाम् कियद् अन्तरम्

22 अथापि नोप सज्जेत स्त्रीषु स्त्रैणेषु चार्थ वित्

विषयेन्द्रिय सम्योगात् मनः क्षुभ्यति नान् यथा

23 अदृष्टाद् अश्रुताद् भावात् न भाव उपजायते

असम्प्र युन्जतः प्राणान् शाम् यति स्तिमितम् मनः

24 तस्मात् सङ्गो न कर्तव्यः स्त्रीषु स्त्रैणेषु चेन्द्रियैः

विदुषाम् चाप्य विस्रब्धः षड् वर्गः किमु मादृशाम्

25 श्री भगवान् उवाच

एवम् प्रगायन् नृप देव देवः स उर्वशी लोकम् अथो विहाय

आत्मानम् आत्मन् यवगम्य माम् वै उपार मज् ज्ञाअन विधूत मोहः

26 ततो दुःसङ्ग मुत् सृज्य सत्सु सज्जेत बुद्धिमान्

सन्त एतस्य छिन्दन्ति मनो व्या सङ्ग मुक्तिभिः

27 सन्तो ऽनपेक्षा मच् चित्ताः प्रशान्ताः सम दर्शिनः

निर्ममा निरहङ्कारा निर् द्वन्द्वा निष् परिग्रहाः

28 तेषु नित्यम् महा भाग महा भागेषु मत् कथाः

सम्भवन्ति हि ता न्ऋृणाम् जुषताम् प्रपु नन्त्यघम्

29 ता ये शृण्वन्ति गायन्ति ह्यनु मोदन्ति चाद् ऋताः

मत् पराः श्रद्दधा नाश् च भक्तिम् विन्दन्ति ते मयि

30 भक्तिम् लब्ध वतः साधोः किम् अन्यद् अवशिष्यते

मय् यनन्त गुणे ब्रह्मणि आनन्द् आनुभवात् मनि

31 यथो पश्रय माणस्य भगवन्तम् विभावसुम्

शीतम् भयम् तमो ऽप्येति साधून् सम्सेव तस् तथा

32 निमज्ज्योन् मज्जताम् घोरे भवाब्धौ परमायणम्

सन्तो ब्रह्म विदः शान्ता नौर् दृढेवाप्सु मज्जताम्

33 अन्नम् हि प्राणिनाम् प्राण आर्तानाम् शरणम् त्वहम्

धर्मो वित्तम् नृणाम् प्रेत्य सन्तो ऽर्वाग् बिभ्य तोऽरणम्

34 सन्तो दिशन्ति चक्षूम्सि बहिरर्कः स मुत्थितः

देवता बान्धवाः सन्तः सन्त आत्माहम् एव च

35 वैत सेनस् ततो ऽप्येवम् उर्वश्या लोक निष्पृहः

मुक्त सङ्गो मही मेताम् आत्मा रामश् चचार ह

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

एकादश स्कन्दे षड् विम्शो ऽध्याय :||

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ एकादश स्कन्दः सप्त विम्शो ऽध्याय :

स्कन्द- 11: अध्याय- 27

01 श्री उद्धव उवाच

क्रिया योगम् समा चक्ष्व भवद् आराधनम् प्रभो

यस्मात् त्वाम् ये यथार् चन्ति सात्वताः सात्व तर्षभ

02 एतद् वदन्ति मुनयो मुहुर्निः श्रेयसम् नृणाम्

नारदो भगवान् व्यास आचार्यो ऽङ्गिरसः सुतः

03 निः सृतम् ते मुखाम् भोजाद् यदाह भगवान् अजः

पुत्रेभ्यो भृगु मुख्येभ्यो देव्यै च भगवान् भवः

04 एतद् वै सर्व वर्णानाम् आश्रमाणाम् च सम्मतम्

श्रेयसाम् उत्तमम् मन्ये स्त्री शूद्राणाम् च मानद

05 एतत् कमल पत्राक्ष कर्म बन्ध विमोचनम्

भक्ताय चानु रक्ताय ब्रूहि विश्वेश्व रेश्वर

06 श्री भगवान् उवाच

न ह्यन्तो ऽनन्त पारस्य कर्म काण्डस्य चोद्धव

सङ्क्षिप्तम् वर्ण यिष्यामि यथा वदनु पूर्वशः

07 वैदिकस् तान्त्रिको मिश्र इति मे त्रिविधो मखः

त्रयाणाम् ईप्सिते नैव विधिना माम् सम् अर्चरेत्

08 यदा स्व निगमे नोक्तम् द्विजत्वम् प्राप्य पूरुषः

यथा यजेत माम् भक्त्या श्रद्धया तन् निबोध मे

09 अर्चायाम् स्थण्डिले ऽग्नौ वा सूर्ये वाप्सु हृदि द्विजेः

द्रव्येण भक्ति युक्तो ऽर्चेत् स्व गुरुम् माम् अमायया

10 पूर्वम् स्नानम् प्रकुर् वीत धौत दन्तो ऽङ्ग शुद्धये

उभयैर् अपि च स्नानम् मन्त्रैः मृद् ग्रहणादिना

11 सन्ध्यो पास्त्यादि कर्माणि वेदेना चोदि तानि मे

पूजाम् तैः कल्पयेत् सम्यक् सङ्कल्पः कर्म पावनीम्

12 शैली दारुमयी लौही लेप्या लेख्या च सैकती

मनोमयी मणिमयी प्रतिमाष्ट विधा स्मृता

13 चला चलेति द्विविधा प्रतिष्ठा जीव मन्दिरम्

उद्वा सावाहने न स्तः स्थिरायाम् उद्धव् आर्चने

14 अस्थिरायाम् विकल्पः स्यात् स्थण्डिले तु भवेद् द्वयम्

स्नपनम् त्वविलेप् यायाम् अन्यत्र परिमार्जनम्

15 द्रव्यैः प्रसिद्धैर् मद् यागः प्रति मादिष्व मायिनः

भक्तस्य च यथा लब्धैः हृदि भावेन चैव हि

16 स्नान् आलङ्करणम् प्रेष्ठम् अर्चायाम् एव तूद्धव

स्थण्डिले तत्त्व विन्यासो वह्नौ आज्यप्लुतम् हविः

17 सूर्ये चाभ् यर्हणम् प्रेष्ठम् सलिले सलिलादिभिः

श्रद्धयोपा हृतम् प्रेष्ठम् भक्तेन मम वार्यपि

18 भूर्यपि अभक्तोपा हृतम् न मे तोषाय कल्पते

गन्धो धूपः सु मनसो दीपो ऽन्नाद्यम् च किम् पुनः

19 शुचिः सम्भृत सम्भारः प्राग् दर्भैः कल्पितासनः

आसीनः प्रागुदग् वार्चेद् अर्चायाम् अथ सम्मुखः

20 कृतन्यासः कृतन् यासाम् मद् अर्चाम् पाणिना मृजेत्

कलशम् प्रोक्षणीयम् च यथावद् उप साधयेत्

21 तद् अद्भिर् देव यजनम् द्रव्याणि आत्मान मेव च

प्रोक्ष्य पात्राणि त्रीण् यद्भिः तैस् तैर् द्रव् यैश् च साधयेत्

22 पाद्यार्घ् याचमनी यार्थम् त्रीणि पात्राणि दैशिकः

हृदा शीर्ष्णाथ शिखया गायत्र्या चाभि मन्त्र येत्

23 पिण्डे वाय् वग्नि सम्शुद्धे हृत् पद् मस्थाम् पराम् मम

अण्वीम् जीव कलाम् ध्यायेत् नादान् ते सिद्ध भाविताम्

24 तयात्म भूतया पिण्डे व्याप्ते सम्पूज्य तन् मयः

आवा ह्यार्चादिषु स्थाप्य न्यस्ताङ्गम् माम् प्रपूज येत्

25 पाद्योप स्पर्शार् हणादीन् उपचारान् प्रकल्पयेत्

धर्मा दिभिश् च नवभिः कल्प यित्वा सनम् मम

26 पद्मम् अष्टदळम् तत्र कर्णिका के सरोज्ज्वलम्

उभाभ्याम् वेद तन्त्राभ्याम् मह्यम् तूभय सिद्धये

27 सुदर्शनम् पाञ्च जन्यम् गदासीषु धनुर् हलान्

मुसलम् कौस्तुभम् मालाम् श्रीवत्सम् चानु पूजयेत्

28 नन्दम् सुनन्दम् गरुडम् प्रचण्डम् चण्डम् एव च

महाबलम् बलम् चैव कुमुदम् कुमुदेक्षणम्

29 दुर्गाम् विनायकम् व्यासम् विष्वक्षेनम् गुरून् सुरान्

स्वे स्वे स्थाने त्वभि मुखान् पूजयेत् प्रोक्षणादिभिः

30 चन्दनो शीर कर्पूर कुङ्कुमा गुरु वासितैः

सलिलैः स्नापयेन् मन्त्रैः नित्यदा विभवे सति

31 स्वर्ण घर्मानु वाकेन महा पुरुष विद्यया

पौरुषेणापि सूक्तेन सामभी राजन् आदिभिः

32 वस्त्रोप वीत् आभरण पत्र स्रग् गन्ध लेपनैः

अलङ्कुर्वीत सप्रेम मद् भक्तो माम् यथो चितम्

33 पाद्यम् आचमनीयम् च गन्धम् सु मनसो ऽक्षतान्

धूप दीपोप हार्याणि दद्यान् मे श्रद्ध यार्चकः

34 गुड पायस सर्पीम्षि शष्कुल्या पूप मोदकान्

सम्यावद् अधिसूपाम्श् च नैवेद्यम् सति कल्पयेत्

35 अभ्यङ्गोन् मर्दना दर्श दन्त धावाभि षेचनम्

अन्नाद्य गीत न्रुत्यादि पर्वणि स्युरु तान्वहम्

36 विधिना विहिते कुण्डे मेखला गर्त वेदिभिः

अग्नि माधाय परितः समूहेत् पाणि नोदितम्

37 परिस् तीर्याथ पर्युक्षेद् अन्वाधाय यथा विधि

10 प्राक् कूले बर्हिष्या सीनो गङ्गा कूल उदङ् मुखः

ब्रह्म भूतो महा योगी निः सङ्गः छिन्न सम्शयः

11 तक्षकः प्रहितो विप्राः क्रुद्धेन द्विज सूनुना

हन्तु कामो नृपम् गच्छन् द दर्श पथि कश्यपम्

12 तम् तर्प यित्वा द्रविणैः निवर्त्य विषहारिणम्

द्विज रूप प्रतिच् छन्नः काम रूपो ऽदशन् नृपम्

13 ब्रह्म भूतस्य राजर्षेः देहो ऽहिगरल् आग्निना

बभूव भस्म सात् सद्यः पश्यताम् सर्व देहिनाम्

14 हाहा कारो महा नासीद् भुवि खे दिक्षु सर्वतः

विस्मिता ह्यभवन् सर्वे देवासुर नरा दयः

15 देव दुन्दुभयो नेदुः गन्धर् वाप्सर सो जगुः

ववृषुः पुष्प वर्षाणि विबुधाः साधु वादिनः

16 जन्मेजय: स्व पितरम् श्रुत्वा तक्षक भक्षितम्

यथा जुहाव सन्क्रुद्धो नागान् सत्रे सह द्विजै:

17 सर्प सत्रे समिद् धाग्नौ दह्य मानान् महो रगान्

दृष्ट् वेन्द्रम् भयसम् विग्न: तक्षक: शरणम् ययौ

18 अपश्यम्स् तक्षकम् तत्र राजा पारीक्षितो द्विजान्

उवाच तक्षक: कस्मात् न दह्ये तोर् अगाधम:

19 तम् गोपायति राजेन्द्र शक्र: शरण मागतम्

तेन सम् स्तम्भित: सर्प: तस्मान् नाग्नौ पतत् यसौ

20 पारीक्षित इति श्रुत्वा प्राहर्त् विज उदारधी:

सहेन्द्रस् तक्षको विप्रा नाग्नौ किमिति पात्यते

21 तच् छ्रुत्वा आजुहुवुर् विप्रा: सहेन्द्रम् तक्षकम् मखे

तक्षकाशु पतस्वेह सहेन्द्रेण मरुत् वता

22 इति ब्रह्मोदिता क्षेपै: स्थानाद् इन्द्र: प्रचालित:

बभूव सम्भ्रान्त मति: स विमान: स तक्षक:

23 तम् पतन्तम् विमानेन सह तक्षकम् अम्बरात्

विलोक् याङ्गिरस: प्राह राजानम् तम् बृहस्पति:

24 नैष त्वया मनुष् येन्द्र वधम् अर्हति सर्पराट्

अनेन पीतम् अमृतम् अथ वा अजर् आमर:

25 जीवितम् मरणम् जन्तो: गति: स्वेनैव कर्मणा

राजम्स् ततो ऽन्यो नान्यस्य प्रदाता सुख दु:ख यो:

26 सर्प चौर् आग्नि विद् युद्भ्य: क्षुत् तृड् व्याध्यादि भिर् नृप

पञ्चत्वम् ऋच्छते जन्तु: भुङ्क्त आरब्ध कर्म तत्

27 तस्मात् सत्रम् इदम् राजन् सम्स्थीये ता ऽभिचारिकम्

सर्पा अनागसो दग्धा जनैर् दिष्टम् हि भुज्यते

28 सूत उवाच

इत् युक्त: स तथेत् याह महर्षेर् मानयन् वच:

सर्प सत्राद् उपरतः पूजया मास वाक् पतिम्

29 सैषा विष्णोर् महा माया बाध्यया लक्षणा यया

मुह्यन्त् यस् यै वात्म भूता भूतेषु गुण वृत्तिभिः

30 न यत्र दम्भीत्य भया विराजिता मायात्म वादे ऽस्स कृदात्म वादिभिः

न यद् विवादो विविधस् तद् आश्रयो मनश् च सङ्कल्प विकल्प वृत्ति यत्

31 न यत्र सृज्यम् सृजतो भयोः परम् श्रेयश् च जीवस् त्रिभिर् अन्वितस् त्वहम्

तद् एतद् उत्सादित बाध्य बाधकम् निषिध्य चोर्मीन् विरमे स्वयम् मुनिः

32 परम् पदम् वैष्णवम् आमनन्ति तद् यन् नेति नेती त्यतद् उत्सि सृक्षवः

विसृज्य दौरात्म्यम् अनन्य सौहृदा हृदोप गुहया वसितम् समाहितैः

33 त एतद् अधिगच् छन्ति विष्णोर् यत् परमम् पदम्

अहम् ममेति दौर् जन्यम् न येषाम् देह गेहजम्

34 अतिवादाम्स् तितिक्षेत नाव मन्येत कञ्चन

न चेमम् देहम् आश्रित्य वैरम् कुर्वीत केनचित्

35 नमो भगवते तस्मै कृष्णाया कुण्ठ मेधसे

यत् पादाम् बुरुह ध्यानात् सम्हिताम् अध्यगाम् इमाम्

36 श्री शौनक उवाच

पैलादिभिर् व्यास शिष्यैः वेद् आचार्यैः महात्मभिः

वेदाश् च कथिता व्यस्ता एतत् सौम्याभि धेहि नः

37 सूत उवाच

समाहित् आत्मनो ब्रह्मन् ब्रह्मणः परमेष्ठिनः

हृद् याकाशाद् अभून् नादो वृत्ति रोधाद् विभाव्यते

38 यद् उपासनया ब्रह्मन् योगिनो मल मात्मनः

द्रव्य क्रिया कार काख्यम् धूत्वा यान्त् य पुनर्भवम्

39 ततो ऽभूत् त्रिवृद् ओम्कारो यो ऽव्यक्त प्रभवः स्वराट्

यत् तल् लिङ्गम् भगवतो ब्रह्मणः परमात्मनः

40 शृणोति य इमम् स्फोटम् सुप्त श्रोत्रे च शून्य दृक्

येन वाग् व्यज्य ते यस्य व्यक्तिर् आकाश आत्मनः

41 स्वधाम्नो ब्राह्मणः साक्षाद् वाचकः परमात्मनः

स सर्व मन्त्र् ओपनिषद् वेद बीजम् सनातनम्

42 तस्य ह्यासम्स् त्रयो वर्णा अकाराद्या भृगूद् वह

धार्यन्ते यैस्त्र यो भावा गुण नामार्थ वृत्तयः

43 ततो ऽक्षर समाम् नायम् असृजद् भगवान् अजः

अन्तस् थोष्म स्वर स्पर्श ह्रस्व दीर्घादि लक्षणम्

44 तेनासौ चतुरो वेदान् चतुर्भिर् वदनैर् विभुः

स व्याहृतिकान् सोम्काराम्ः चातुर् होत्र विवक्षया

45 पुत्रान् अध्याप यत् ताम्स्तु ब्रह्मर्षीन् ब्रह्म कोविदान्

ते तु धर्मोप देष्टारः स्व पुत्रेभ्यः समादिशन्

46 ते परम् परया प्राप्ताः तत् तच् छिष्यैर् धृतव्रतैः

चतुर् युगेष्व थ व्यस्ता द्वापरादौ महर्षिभिः

47 क्षीणायुषः क्षीण सत्त्वान् दुर्मेधान् वीक्ष्य कालतः

वेदान् ब्रह्म ऋषयू व्यस्यन् हृदिस् थाच्युत चोदिताः

48 अस्मिन् नप्यन्तरे ब्रह्मन् भगवान् लोक भावनः

ब्रह्मे शाद्यैर् लोक पालैः याचितो धर्म गुप्तये

49 पराशरात् सत्यवत्याम् अम्शाम्श कलया विभुः

अवतीर्णो महा भाग वेदम् चक्रे चतुर् विधम्

50 ऋग थर्व यजुः साम्नाम् राशीन् उद्धृत्य वर्गशः

चतस्रः सम्हिताश् चक्रे मन्त्रैः मणिगणा इव

51 तासाम् स चतुरः शिष्यान् उपाहूय महा मतिः

एकैकाम् सम्हिताम् ब्रह्मन् एकै कस्मै ददौ विभुः

52 पैलाय सम्हिताम् आद्याम् बह्वृ चाख्याम् उवाच ह

वैशम्पायन सम्ज्ञाय निगदाख्यम् यजुर् गणम्

53 साम्नाम् जैमिनये प्राह तथा छन्दोग सम्हिताम्

अथर्वाङ्गि रसीम् नाम स्व शिष्याय सुमन्तवे

54 पैलः स्व सम्हिताम् ऊचे इन्द्र प्रमित ये मुनिः

बाष्कलाय च सोऽप्याह शिष्येभ्यः सम्हिताम् स्वकाम्

55 चतुर्धा व्यस्य बोध्याय याज्ञ वल्क्याय भार्गव

पराशरा याग्नि मित्रे इन्द्र प्रमितिर् आत्मवान्

56 अध्यापयत् सम्हिताम् स्वाम् माण्डूकेयम् ऋषिम् कविम्

तस्य शिष्यो देव मित्रः सौभर्या दिभ्य ऊचिवान्

57 शाकल्यस् तत् सुतः स्वाम् तु पञ्चधा व्यस्य सम्हिताम्

वात्स्य मुद्गल शालीय गोखल्य शिशिरेष् वधात्

58 जातू कर्ण्यश् च तच् छिष्यः स निरुक्ताम् स्व सम्हिताम्

बलाक पैजवै ताल विरजेभ्यो ददौ मुनिः

59 बाष्कलिः प्रति शाखाभ्यो वालखिल् याख्य सम्हिताम्

चक्रे वालाय निर्भज्यः कासारश् चैव ताम् दधुः

60 बह्वृचाः सम्हिता ह्येता एभिर् ब्रह्म ऋषि भिर् धृताः

श्रुत्वै तच् छन्दसाम् व्यासम् सर्व पापैः प्रमुच्यते

61 वैशम्पायन शिष्या वै चरकाध् वर्यवो ऽभवन्

यच् चेरुर् ब्रह्म हत्याम्हः क्षपणम् स्व गुरोर् व्रतम्

62 याज्ञवल्क्यश् च तच् छिष्य आहाहो भगवन् कियत्

चरितेन् आल्प साराणाम् चरिष्ये ऽहम् सु दुश्चरम्

63 इत् युक्तो गुरु रप्याह कुपितो याह्यलम् त्वया

विप्राव मन्त्रा शिष्येण मद् अधीतम् त्यजाश् विति

64 देवरात सुतः सोऽपि छर्दित्वा यजुषाम् गणम्

ततो गतो ऽथ मुनयो ददृशुस् तान् यजुर् गणान्

65 यजूम्षि तित्तिरा भूत्वा तल् लोलुप तया ददुः

तैत्तिरीया इति यजुः शाखा आसन् सुपेशलाः

66 याज्ञ वल्क्यस्त तो ब्रह्मन् छन्दाम् स्यधि गवेषयन्

गुरोर् अविद्य मानानि सूपतस् थे ऽर्कम् ईश्वरम्

67 श्री याज्ञवल्क्य उवाच

ओम् नमो भगवते आदित्याय अखिल जगताम् आत्म स्वरूपेण काल

स्वरूपेण चतुर् विध भूत निकायानाम् ब्रह्मादिस् तम्ब पर्यन्तानाम् अन्तर् हृदयेषु

बहिर् अपि च अकाश इव उपाधिना व्यवधीय मानो भवान् एक

एव क्षण लव निमेषा वय वोप चित सम्वत्सर गणे नापाम् आदान

विसर्गाभ्याम् इमाम् लोक यात्राम् अनुवहति

68 यदु ह वाव विबु धर्षभ सवित रदस् तपति अनुसवनम् अहर्

अहराम्नाय विधिनोप तिष्ठ मानानाम् अखिल दुरित वृजिन

बीजाव भर्जन भगवतः समभि धीमहि तपन मण्डलम्

69 य इह वाव स्थिर चर निकराणाम् निज निकेतनानाम् मन इन्द्रियासु

गणान् अनात्मनः स्वयम् आत्म् आन्तर् यामी प्रचोद यति

70 य एवेमम् लोकम् अति कराल वदनान्ध कार सम्ज्ञाजगर ग्रह

गिलितम् मृतकम् इव विचेतनम् अवलोक्य अनुकम्पया परम कारुणिक

ईक्ष यैवोत् थाप्य अहरहर् अनुसवनम् श्रेयसि स्वधर्मा ख्यात्माव

स्थने प्रवर्त यति

71 अवनि पतिर् इव असाधूनाम् भयम् उदीरयन् नटति परित आशा पालैस्

तत्र तत्र कमल कोशाञ्जलिभिः उपहृतार् हणः

72 अथ ह भगवन्स् तव चरण नलिन युगलम् त्रि भुवन गुरुभिः वन्दितम्

अहम् अयात याम यजुः काम उपसरा मीति

73 सूत उवाच

एवम् स्तुतः स भगवान् वाजि रूप धरो हरिः

यजूम्ष् ययातया मानि मुनये ऽदात् प्रसादितः

74 यजुर् भिर् अकरोच् छाखा दश पञ्च शतैर् विभुः

जगृहुर् वाज सन्यस्ताः काण्व माध्यन् दिनादयः

75 जैमिनेः समगस् यासीत् सुमन्तुस् तनयो मुनिः

सुन्वान्स्तु तत् सुतस् ताभ्याम् एकैकाम् प्राह सम्हिताम्

76 सुकर्मा चापि तच् छिष्य: साम वेद तरोर् महान्

सहस्र सम्हिता भेदम् चक्रे साम्नाम् ततो द्विज

77 हिरण्य नाभ: कौशल्य: पौष्यन्जिश् च सु कर्मण:

शिष्यौ जगृ हतुश् चान्य आवन्त्यो ब्रह्म वित्तम:

78 उदीच्या: सामगा: शिष्या आसन् पञ्च शतानि वै

पौष् यञ्ज्या वन्त्ययोश् चापि ताम्श् च प्राच्यान् प्रचक्षते

79 लौगाक्षि: माङ्गलि: कुल्य: कुशीद: कुक्षिर् एव च

पौष्यन्जि सिष्या जगृहु: सम्हितास् ते शतम् शतम्

80 कृतो हिरण्य नाभस्य चतुर् विम्शति सम्हिता:

शिष्य ऊचे स्व शिष्येभ्य: शेषा आवन्त्य आत्मवान्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

द्वादश स्कन्दे षष्टो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ द्वादश स्कन्द: सप्तमो ऽध्याय :

स्कन्द- 12: अध्याय- 07

01 सूत उवाच

अथर्व वित् सुमन्तुश् च शिष्यम् अध्याप यत् स्वकाम्

सम्हिताम् सो ऽपि पथ्याय वेद दर्शाय चोक्तवान्

02 शौक्लाय निर् ब्रह्म बलि: मोदोष: पिप्पलायनि:

वेद दर्शस् य शिष्यास् ते पथ्य शिष्यान् अथो शृणु

कुमुदः शुनको ब्रह्मन् जाजलिश् चाप् यथर्व वित्

03 बभ्रुः शिष्यो ऽथान्गिरसः सैन्ध वायन एव च

अधीयेताम् सम्हिते द्वे सावर्णाद् यास् त थापरे

04 नक्षत्र कल्पः शान्तिश् च कश्यपाङ्गि रसादयः

एते आथर्वणा चार्याः शृणु पौराणिकान् मुने

05 त्रय् यारुणिः कश्य पश् च सावर्णिर् अकृत व्रनः

वैशम्पायन हारीतौ षड्वै पौराणिका इमे

06 अधीयन्त व्यास शिष्यात् सम्हिताम् मत् पितुर् मुखात्

एकैकाम् अहमे तेषाम् शिष्यः सर्वाः समध्यगाम्

07 कश्यपो ऽहम् च सावर्णी राम शिष्यो ऽकृत व्रनः

अधीमहि व्यास शिष्यात् चतस्रो मूल सम्हिताः

08 पुराण लक्षणम् ब्रह्मन् ब्रह्म ऋषिभिर् निरूपितम्

शृणुष्व बुद्धिमाश् रित्य वेद शास्त्रानु सारतः

09 सर्गो ऽस्याथ विसर्गश् च वृत्ति रक्षान्त राणि च

वम्शो वम्शानु चरितम् सम्स्था हेतुर् अपाश्रयः

10 दशभिर् लक्षणैर् युक्तम् पुराणम् तद् विदो विदुः

केचित् पञ्च विधम् ब्रह्मन् महद् अल्प व्यवस्थया

11 अव्याकृत गुण क्षोभान् महतस् त्रि वृतो ऽहमः

भूतमात् तेन्द्रियार् थानाम् सम्भवः सर्ग उच्यते

12 पुरुषानु गृहीतानाम् एतेषाम् वासना मयः

विसर्गो ऽयम् समाहारो बीजाद् बीजम् चराचरम्

13 वृत्तिर् भूतानि भूतानाम् चराणाम् अचराणि च

कृता स्वेन नृणाम् तत्र कामात् चोदन यापि वा

14 रक्षाच् युताव तारेहा विश्वस् यानु युगे युगे

तिर्यङ् मर्त्य ऋषि देवेषु हन्यन्ते यैस् त्रयी द्विषः

15 मन्वन्तरम् मनुर् देवा मनु पुत्राः सुरेश्वराः

ऋषयू ऽम्शाव ताराश् च हरेः षड् विध मुच्यते

16 राज्ञाम् ब्रह्म प्रसूतानाम् वम्शस् त्रै कालि को ऽन्वयः

वम्शानु चरितम् तेषाम् वृत्तम् वम्श धराश् च ये

17 नैमित्तिकः प्राकृतिको नित्य आत्यन्तिको लयः

सम्स्थेति कविभिः प्रोक्तः चतुर् धास्य स्व भावतः

18 हेतुर् जीवो ऽस्य सर्गादेः अविद्या कर्म कारकः

यम् चानु शायिनम् प्राहुः अव्या कृत मुतापरे

19 व्यतिरेकान् वयो यस्य जाग्रत् स्वप्न सुषुप्तिषु

माया मयेषु तद् ब्रह्म जीव वृत्तिष् व पाश्रयः

20 पदार्थेषु यथा द्रव्यम् सन् मात्रम् रूपना मसु

बीजादि पञ्चतान् तासु ह्यवस्थासु युता युतम्

21 विरमेत यदा चित्तम् हित्वा वृत्ति त्रयम् स्वयम्

योगेन वा तद् आत्मानम् वेदे हाया निवर्तते

22 एवम् लक्षण लक्ष्याणि पुराणानि पुराविदः

मुनयो ऽष्टा दश प्राहुः क्षुल्लकानि महान्ति च

23 ब्राह्मम् पाद्मम् वैष्णवम् च शैवम् लैङ्गम् स गारुडम्

नारदीयम् भागवतम् आग्नेयम् स्कान्द सम्ज्ञितम्

24 भविष्यम् ब्रह्म वै वर्तम् मार्कण्डेयम् सवा मनम्

वाराहम् मात्स्यम् कौर्मम् च ब्रह्माण् डाख्यम् इति त्रि षट्

25 ब्रह्मन् इदम् समाख्यातम् शाखा प्रणयनम् मुनेः

शिष्य शिष्य प्रशिष् याणाम् ब्रह्म तेजो विवर्धनम्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

द्वादश स्कन्दे सप्तमो ऽध्याय ः॥

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ द्वादश स्कन्दः अष्टमो ऽध्याय :

स्कन्द- 12: अध्याय- 08

01 श्री शौनक उवाच

सूत जीव चिरम् साधो वद नो वदताम् वर

तमस्य पारे भ्रमताम् न्ऋृणाम् त्वम् पार दर्शनः

02 आहुश् चिरायुषम् ऋषिम् मृकण्ड तनयम् जनाः

यः कल्पान्ते उर्वरितो येन ग्रस्तम् इदम् जगत्

03 स वा अस्मत् कुलोत् पन्नः कल्पे ऽस्मिन् भार्ग वर्षभः

नैवा धुनापि भूतानाम् सम्प्लवः को ऽपि जायते

04 एक एवार्णवे भ्राम्यन् द दर्श पुरुषम् किल

वट पत्र पुटे तोकम् शयानम् त्वेकम् अद्भुतम्

05 एष नः सम्शयो भूयान् सूत कौतूहलम् यतः

तम् नश्छिन्धि महा योगिन् पुराणेष् वपि सम्मतः

06 सूत उवाच

प्रश्नस् त्वया महर्षे ऽयम् कृतो लोक भ्रमा पहः

नारायण कथा यत्र गीता कलि मलापहा

07 प्राप्त द्विजाति सम्स्कारो मार्कण्डेयः पितुः क्रमात्

छन्दाम्स् यधीत्य धर्मेण तपः स्वाध्याय सम्युतः

08 बृहद् व्रत धरः शान्तो जटिलो वल्कल् आम्बरः

बिभ्रत् कमण्डलुम् दण्डम् उपवीतम् स मेखलम्

09 कृष्णाजिनम् साक्ष सूत्रम् कुशाम्श् च निय मर्द्धये

अग्न् यर्क गुरु विप्रात्म स्वर्चयन् सन्ध्य योर् हरिम्

10 सायम् प्रातः स गुरवे भैक्ष्यम् आहृत्य वाग्यतः

बुभुजे गुर्वनु ज्ञातः सकृन् नो चेद् उपोषितः

11 एवम् तपः स्वाध्याय परो वर्षाणाम् अयुतायुतम्

आराधयन् हृषीकेशम् जिग्ये मृत्युम् सुदुर् जयम्

12 ब्रह्मा भृगुर् भवो दक्षो ब्रह्म पुत्राश् च ये ऽपरे

नृदेव पितृ भूतानि तेनासन् अति विस्मिताः

13 इत्थम् बृहद् व्रत धरः तपः स्वाध्याय सम्यमैः

दध्याव धोक्षजम् योगी ध्वस् त क्लेश् आन्तर् आत्मना

14 तस् यैवम् युञ्जतश् चित्तम् महा योगेन योगिनः

व्यतीयाय महान् कालो मन्वन्तर षड् आत्मकः

15 एतत् पुरन्दरो ज्ञात्वा सप्तमे ऽस्मिन् किलान्तरे

तपो विशङ्कितो ब्रह्मन् आरेभे तद् विघातनम्

16 गन्धर् वाप्सर सः कामम् वसन्त मलया निलौ

मुनये प्रेषया मास रजस् तोक मदौ तथा

17 ते वै तद् आश्रमम् जग्मुः हिमाद्रेः पार्श्व उत्तरे

पुष्प भद्रा नदी यत्र चित्राख्या च शिला विभो

18 तद् आश्रम पदम् पुण्यम् पुण्य द्रुमल ताञ्चितम्

पुण्य द्विज कुला कीर्णम् पुण्यामल जलाशयम्

19 मत् त भ्रमर सङ्गीतम् मत् त कोकिल कूजितम्

मत् त बर्हि नटाटोपम् मत् त द्विज कुलाकुलम्

20 वायुः प्रविष्ट आदाय हिम निर्झर शीकरान्

सुमनोभिः परिष्वक्तो ववौ उत्तम् भयन् स्मरम्

21 उद्यच् चन्द्र निशा वक्त्रः प्रवालस् तब कालिभिः

गोप द्रुम लता जालैः तत्रासीत् कुसुमा करः

22 अन्वीयमानो गन्धर्वैः गीत वादित्र यूथकैः

अदृश्य तात् त चापेषुः स्वः स्त्रीयूथ पतिः स्मरः

23 हुत् वाग्निम् सम् उपासीनम् ददृशुः शक्र किङ्कराः

मीलिताक्षम् दुरा धर्षम् मूर्ति मन्तम् इवानलम्

24 ननृतुः तस्य पुरतः स्त्रियो ऽथो गायका जगुः

मृदङ्ग वीणा पणवैः वाद्यम् चक्रुर् मनोरमम्

25 सन्दधे ऽस्त्रम् स्व धनुषि कामः पञ्च मुखम् तदा

मधुर् मनो रजस् तोक इन्द्र भृत्या व्यकम्पयन्

26 क्रीडन्त्याः पुञ्जिकस् थल्याः कन्दुकैः स्तन गौरवात्

भृशम् उद्विग्न मध् यायाः केश विस्रम् सितस्रजः

27 इतस् ततो भ्रमद् दृष्टेः चलन्त्या अनु कन्दुकम्

वायुर् जहार तद् वासः सूक्ष्मम् त्रुटि त मेखलम्

28 विससर्ज तदा बाणम् मत्वा तम् स्वजितम् स्मरः

सर्वम् तत् राभवन् मोघम् अनीशस्य यथोद् यमः

29 त इत्थम् अपकुर्वन्तो मुनेः तत् तेजसा मुने

दह्य माना निववृतुः प्रबोध्या हिम् इवार्भकाः

30 इतीन्द्रानु चरैर् ब्रह्मन् धर्षितो ऽपि महामुनिः

यन् नागाद् अहमो भावम् न तच् चित्रम् महत् सु हि

31 दृष्ट्वा निस्तेजसम् कामम् सगणम् भगवान् स्वराट्

श्रुत् वानुभावम् ब्रह्म रुषेः विस्मयम् सम गात्परम्

32 तस्यैवम् युञ्जतश् चित्तम् तपः स्वाध्याय सम्यमैः

अनुग्रहाय आविरासीत् नर नारायणो हरिः

33 तौ शुक्ल कृष्णौ नव कञ्ज लोचनौ

चतुर् भुजौ रौरव वल्कल् आम्बरौ

पवित्र पाणी उपवीतकम् त्रिवृत्

कमण्डलुम् दण्डम् ऋजुम् च वैणवम्

34 पद्माक्ष मालाम् उत जन्तु मार्जनम्

वेदम् च साक्षात् तप एव रूपिणौ

तपत् तडिद् वर्ण पिशङ्ग रोचिषा

प्राम्शू दधानौ विबु धर्ष भार्चितौ

35 ते वै भगवतो रूपे नर नारायणा वृषी

दृष्ट्वोत् थायाद रेणोच्चैर् ननाम् आङ्गेन दण्डवत्

36 स तत् सन्दर्शन् आनन्द निर्वृत् आत्मेन्द्रिया शयः

हृष्ट रोमाश्रु पूर्णाक्षो न से हे तावु दीक्षितुम्

37 उत्थाय प्राञ्जलिः प्रह्व औत्सुक्याद् आश्लि षन्निव

नमो नम इती शानौ बभाशे गद्गद् आक्षरः

38 तयोर् आसन मादाय पादयोर् अवनिज् य च

अर्हणे नानु लेपेन धूप माल्यैर् अपूजयत्

39 सुखम् आसन मासीनौ प्रसादाभि मुखौ मुनी

पुनरानम्य पादाभ्याम् गरिष्ठौ इदम् अब्रवीत्

40 श्री मार्कण्डेय उवाच

किम् वर्णये तव विभो यदु दीरितो ऽसुः

सम् स्पन्दते तमनु वाङ् मन इन्द्रियाणि

स्पन्दन्ति वै तनु भृताम् अजशर्व योश् च

स्वस्याप्य थापि भजताम् असि भाव बन्धुः

41 मूर्ती इमे भगवतो भगवम्स् त्रि लोक्याः

क्षेमाय ताप विरमाय च मृत्यु जित्यै

नाना बिभर्ष्य वितुम् अन्य तनूर् यथेदम्

सृष्ट्वा पुनर् ग्रससि सर्वम् इवोर्णनाभिः

42 तस्या वितुः स्थिर चरेशितु रङ्घ्रि मूलम्

यत्स्थम् न कर्म गुण कालरुजः स्पृशन्ति

यद्वै स्तुवन्ति निनमन्ति यजन्त् यभीक्ष्णम्

ध्यायन्ति वेद हृदया मुनयस् तद् आप्त्यै

43 नान्यम् तवाङ्घ्र् युपनयाद् अप वर्ग मूर्तेः

क्षेमम् जनस्य परितोभिय ईश विद्मः

ब्रह्मा बिभेत् य लमतो द्वि परार्ध धिष्ण्यः
कालस्य ते किमुत तत् कृत भौति कानाम्
44 तद्वै भजामि ऋतधियस् तव पाद मूलम्
हित्वेदम् आत्मच् छदि चात्म गुरोः परस्य
देहाद् यपार्थम् असदन्त्यम् अभिज्ञ मात्रम्
विन्देत ते तर्हि सर्व मनीषि तार्थम्
45 सत्त्वम् रजस् तम इतीश तव् आत्म बन्धो
माया मयाः स्थिति लयो दय हेतवो ऽस्य
लीला धृता यदपि सत्त्व मयी प्रशान्त् यै
नान्ये नृणाम् व्यसन मोह भियश् च याभ्याम्
46 तस्मात् त वेह भगवन् नथ ताव कानाम्
शुक्लाम् तनुम् स्वङ् हयिताम् कुशला भजन्ति
यत् सात्वताः पुरुष रूपम् उशन्ति सत्त्वम्
लोको यतो ऽभयम् उतात्म सुखम् न चान् यत्
47 तस्मै नमो भगवते पुरुषाय भूम्ने
विश्वाय विश्व गुरवे पर देवतायै
नारायणाय ऋषये च नरोत्तमाय
हम्साय सम्य तगिरे निगमेश्व राय
48 यम् वै न वेद वितथाक्ष पथैर् भ्रमद्धीः
सन्तम् स्वकेषु असुषु हृद्यपि दृक् पथेषु
तन् मायया वृत मतिः स उ एव साक्षाद्
आद्यस् तवा अखिल गुरो रुपसाद्य वेदम्
49 यद् दर्शनम् निगम आत्म रहः प्रकाशम्
मुह्यन्ति यत्र कवयो ऽजपरा यतन्तः
तम् सर्व वाद विषय प्रति रूप शीलम्
वन्दे महा पुरुषम् आत्म निगूढ बोधम्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

द्वादश स्कन्दे अष्टमो ऽध्याय ः॥

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ द्वादश स्कन्दः नवमो ऽध्याय :

स्कन्द- *12:* अध्याय- *09*

*01* सूत उवाच

सम्स्तुतो भगवान् इत्थम् मार्कण्डेयेन धीमता

नारायणो नर सखः प्रीत आह भृगूद् वहम्

*02* श्री भगवान् उवाच

भो भो ब्रह्म ऋषि वर्यासि सिद्ध आत्म समाधिना

मयि भक्त्यान पायिन्या तपः स्वाध्याय सम्यमैः

*03* वयम् ते परितुष्टाः स्म त्वद् बृहद् व्रत चर्यया

वरम् प्रतीच् छ भद्रम् ते वरदे शाद् अभीप्सितम्

*04* श्री ऋषिर् उवाच

जितम् ते देव देवेश प्रपन्नार्ति हराच्युत

वरेणैताव तालम् नो यद् भवान् सम दृश्यत

*05* गृहीत्वा जादयो यस्य श्रीमत् पादाब्ज दर्शनम्

मनसा योग पक्वेन स भवान् मे ऽक्षगोचरः

*06* अथापि अम्बुज पत् राक्ष पुण्य श्लोक शिखामणे

द्रक्ष्ये मायाम् यया लोकः सपालो वेद सद् भिदाम्

*07* सूत उवाच

इतीडितो ऽर्चितः कामम् ऋषिणा भगवान् मुने

तथेति स स्मयन् प्रागाद् बदर् याश्रमम् ईश्वरः

08 तमेव चिन्तयन् अर्थम् ऋषिः स्वाश्रम एव सः

वसन् अग्न् यर्क सोमाम्बु भू वायु वियद् आत्मसु

09 ध्यायन् सर्वत्र च हरिम् भाव द्रव्य इर पूजयत्

क्वचित् पूजाम् विसस्मार प्रेम प्रसर सम्प्लुतः

10 तस्यै कदा भृगु श्रेष्ठ पुष्प भद्रा तटे मुनेः

उपासीनस्य सन्ध्यायाम् ब्रह्मन् वायुर् अभून् महान्

11 तम् चण्ड शब्दम् समुदीर यन्तम् बलाह का अन्व भवन् करालाः

अक्षस् थविष्ठा मुमुचुस् तडिद्भिः स्वनन्त उच्चैः अभि वर्ष धाराः

12 ततो व्यदृश् यन्त चतुः समुद्राः समन् ततः क्ष्मातलम् आग्रसन्तः

समीर वेगोर्मिभिर् उग्र नक्र महा भया वर्त गभीर घोषाः

13 अन्तर् बहिश् चाद्भिर् अतिद्युभिः खरैः

शत ह्रदा भीरु पतापितम् जगत्

चतुर् विधम् वीक्ष्य सहात्मना मुनिः

जला प्लुताम् क्ष्माम् विमनाः समत्र सत्

14 तस्यैव मुद् वीक्षत ऊर्मि भीषणः प्रभञ्जना घूर्णित वार् महार्णवः

आपूर्य माणो वरषद्भिर् अम्बुदैः क्ष्माम् अप्यधाद् द्वीप वर्षाद्रि भिः समम्

15 सक्ष्मान् तरिक्षम् स दिवम् स भागणम्

त्रैलोक्य मासीत् सह दिग्भिर् आप्लुतम्

स एक एवोर् वरितो महा मुनिः

बभ्राम विक्षिप्य जटा जडान् धवत्

16 क्षुत्तृट् परीतो मकरैस् तिमिङ्गिलैः

उपद्रुतो वीचि नभस्वता हतः

तमस्य पारे पतितो भ्रमन् दिशो

न वेद खम् गाम् च परिश्रमे षितः

17 क्वचिद् गतो महावर्ते तरलैस् ताडितः क्वचित्

यादोभिर् भक्ष्यते क्वापि स्वयम् अन्योन्य घातिभिः

18 क्वचिच् छोकम् क्वचिन् मोहम् क्वचिद् दुःखम् सुखम् भयम्

क्वचिन् मृत्यु मवाप्नोति व्याध्या दिभिर् उतार्दितः

19 अयुतायुत वर्षाणाम् सहस्राणि शतानि च

व्यतीयुः भ्रमतस् तस्मिन् विष्णु माया वृतात्मनः

20 स कदाचिद् भ्रमन् तस्मिन् पृथिव्याः क कुदि द्विजः

न्याग्रोध पोतम् ददृशे फल पल्लव शोभितम्

21 प्राग् उत्तरस्याम् शाखायाम् तस्यापि ददृशे शिशुम्

शयानम् पर्ण पुटके ग्रसन्तम् प्रभया तमः

22 महा मरकत श्यामम् श्रीमद् वदन पङ्कजम्

कम्बु ग्रीवम् महो रस्कम् सुनसम् सुन्दर भ्रुवम्

23 श्वासै जद् अलका भातम् कम्बुश्री कर्ण दाडिमम्

विद्रु माधर भासेषच् छोणा यित सुधास्मितम्

24 पद्म गर्भारुणा पाङ्गम् हृद्यहा सावलोकनम्

श्वासै जद् बलि सम्विग्न निम्नना भिद लोदरम्

25 चार् वङ्गुलिभ्याम् पाणिभ्याम् उन्नीय चरणाम्बुजम्

मुखे निधाय विप्रेन्द्रो धयन्तम् वीक्ष्य विस्मितः

26 तद् दर्शनाद् वीत परिश्रमो मुदा प्रोत् फुल्ल हृत् पद्म विलोचन् आम्बुजः

प्रहृष्ट रोमाद्भुत भाव शङ्कितः प्रष्टुम् पुरस्तम् प्रससार बालकम्

27 तावच् छिशोर् वै श्वसितेन भार्गवः

सो ऽन्तः शरीरम् मशको यथा विशत्

तत् राप्यदो न्यस्तम् अचष्ट कृत्स्नशो

यथा पुराम् उह्यद् अतीव विस्मितः

28 खम् रोदसी भागणान् अद्रि सागरान् द्वीपान् स वर्षान् ककुभः सुरा सुरान्

वनानि देशान् सरितः पुराकरान् खेटान् व्रजान् आश्रम वर्ण वृत्तयः

29 महान्ति भूतान् यथ भौतिकान् यसौ कालम् च नाना युग कल्प कल्पनम्

यत् किञ्चिद् अन्यद् व्यवहार कारणम् द दर्श विश्वम् सदिवाव भावितम्

30 हिमालयम् पुष्प वहाम् च ताम् नदीम् निजाश्रमम् तत्र ऋषीन् अपश्यत्

विश्वम् विपश्यञ् छ्वसिताच् छिशोर्वै बहिर् निरस्तो न्यप तल्ल याब्धौ

31 तस्मिन् पृथिव्याः ककुदि प्ररूढम् वटम् च तत् पर्ण पुटे शयानम्

तोकम् च तत् प्रेम सुधा स्मितेन निरीक्षितो ऽपाङ्ग निरीक्षणेन

32 अथ तम् बालकम् वीक्ष्य नेत्राभ्याम् धिष्ठितम् हृदि

अभ्ययाद् अति सङ्क्लिष्टः परिष्वक्तुम् अधोक्षजम्

33 तावत् स भगवान् साक्षाद् योगा धीशो गुहाशयः

अन्तर् दध ऋषेः सद्यो यथेहा नीश निर्मिता

34 तम् अन्वथ वटो ब्रह्मन् सलिलम् लोक सम्प्लवः

तिरोधायि क्षणा दस्य स्वाश्रमे पूर्व वत् स्थितः

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

द्वादश स्कन्दे नवमो ऽध्याय ः॥

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ द्वादश स्कन्दः दशमो ऽध्याय ः

स्कन्द- 12: अध्याय- 10

01 सूत उवाच

स एवम् अनुभू येदम् नारायण विनिर्मितम्

वैभवम् योग मायायाः तमेव शरणम् ययौ

02 श्री मार्कण्डेय उवाच

प्रपन्नो ऽस्म्यङ्घ्रि मूलम् ते प्रपन्ना भयदम् हरे

यन् माययापि विबुधा मुह्यन्ति ज्ञान काशया

03 सूत उवाच

तमेवम् निभृत् आत्मानम् वृषेण दिवि पर्यटन्

रुद्राण्या भगवान् रुद्रो द दर्श स्व गणैर् वृतः

04 अथोमा तम् ऋषिम् वीक्ष्य गिरिशम् सम भाषत

पश्येमम् भगवन् विप्रम् निभृ तात्मेन्द्रि याशयम्

05 निभृतोद झष व्रातम् वाता पाये यथार्णवम्

कुर्वस्य तपसः साक्षात् सम्सिद्धिम् सिद्धिदो भवान्

06 श्री भगवान् उवाच

नैवेच् छत्याशि षः क्वापि ब्रह्मर्षिः मोक्षम् अप्युत

भक्तिम् पराम् भगवति लब्धवान् पुरुषे ऽव्यये

07 अथापि सम् वदिष्यामो भवान् येतेन साधुना

अयम् हि परमो लाभो नृणाम् साधु समागमः

08 सूत उवाच

इत् युक्त्वा तम् उपेयाय भगवान् स सताम् गतिः

ईशानः सर्व विद्यानाम् ईश्वरः सर्व देहिनाम्

09 तयोर् आगमनम् साक्षाद् ईशयोर् जगद् आत्मनोः

न वेद रुद्ध धीवृत्तिः आत्मानम् विश्वमेव च

10 भगवाम्स् तद् अभिज्ञाय गिरीशो योग मायया

आविशत् तद् गुहा काशम् वायुश् छिद्रम् इवेश्वरः

11 आत्मन् यपि शिवम् प्राप्तम् तडित् पिङ्ग जटाधरम्

त्र्यक्षम् दश भुजम् प्राम्शुम् उद्यन्तम् इव भास्करम्

12 व्याघ्र चर्माम् बरदरम् शूल खट्वान्ग चर्मभिः

अक्ष माला डमरुक कपाला सि धनुः सह

13 बिभ्राणम् सहसा भातम् विचक्ष्य हृदि विस्मितः

किमिदम् कुत एवेति समाधेर् विरतो मुनिः

14 नेत्रे उन्मील्य ददृशे सगणम् सोम यागतम्

रुद्रम् त्रिलोकै क गुरुम् ननाम शिरसा मुनिः

15 तस्मै सपर्याम् व्यदधात् सगणाय सहोमया

स्वागत् आसन पाद् यार्घ्य गन्ध स्रग् धूप दीपकैः

16 आह चात्मानु भावेन पूर्ण कामस्य ते विभो

करवाम किमीशान येनेदम् निर्वृतम् जगत्

17 नमः शिवाय शान्ताय सत्त्वाय प्रमृडाय च

रजो जुषेऽप्य घोराय नमस् तुभ्यम् तमोजुषे

18 सूत उवाच

एवम् स्तुतः स भगवान् आदिदेवः सताम् गतिः

परितुष्टः प्रसन् नात्मा प्रहसम्स् तम् अभाषत

19 श्री भगवान् उवाच

वरम् वृणीष्व नः कामम् वर देशा वयम् त्रयः

अमोघम् दर्शनम् येषाम् मर्त्यो यद् विन्दते ऽमृतम्

20 ब्राह्मणाः साधवः शान्ता निः सङ्गा भूत वत्सलाः

एकान्त भक्ता अस्मासु निर्वैराः सम दर्शिनः

21 स लोका लोक पाला स्तान् वन्दन्त् यर्चन्त् युपासते

अहम् च भगवान् ब्रह्मा स्वयम् च हरिर् ईश्वरः

22 न ते मय् यच्युते ऽजे च भिदाम् अण्वपि चक्षते

नात्मनश् च जनस् यापि तद् युष्मान् वयम् ईमहि

23 न ह्यम् मयानि तीर्थानि न देवाश् चेतनोज् झिताः

ते पुनन्त् युरु कालेन यूयम् दर्शन मात्रतः

24 ब्राह्मणेभ्यो नमस् यामो ये ऽस्मद् रूपम् त्रयी मयम्

बिभ्रत् यात्म समाधान तपः स्वाध्याय सम्यमैः

25 श्रवणाद् दर्शनाद् वापि महा पात किनो ऽपि वः

शुध्येरन् अन्त्यजाश् चापि किमु सम्भाषणा दिभिः

26 सूत उवाच

इति चन्द्र ललामस्य धर्म गुह्योप बृम्हितम्

वचो ऽमृतायनम् ऋषिः ना तृप्यत् कर्णयोः पिबन्

27 स चिरम् मायया विष्णोः भ्रामितः कर्शितो भृशम्

शिव वाग् अमृत ध्वस्त क्लेश पुञ्जस्तम् अब्रवीत्

28 ऋषिर् उवाच

अहो ईश्वर लीलेयम् दुर् विभाव्या शरीरिणाम्

यन् नमन् तीशित व्यानि स्तुवन्ति जगद् ईश्वराः

29 धर्मम् ग्राह यितुम् प्रायः प्रवक्तारश् च देहिनाम्

आचरन्त् यनु मोदन्ते क्रियमाणम् स्तुवन्ति च

30 नैतावता भगवतः स्व माया मय वृत्तिभिः

न दुष् येतानु भावस्तैः मायिनः कुहकम् यथा

31 सृष्ट् वेदम् मनसा विश्वम् आत्मनानु प्रविश्य यः

गुणैः कुर्वद्भिर् आभाति कर्तेव स्वप्न दृग् यथा

32 तस्मै नमो भगवते त्रि गुणाय गुणात्मने

केवला याद् वितीयाय गुरवे ब्रह्म मूर्तये

33 कम् वृणे नु परम् भूमन् वरम् त्वद् वर दर्शनात्

यद् दर्शनात् पूर्ण कामः सत्य कामः पुमान् भवेत्

34 वरम् एकम् वृणे ऽथापि पूर्णात् कामाभि वर्षणात्

भगवति अच्युताम् भक्तिम् तत् परेषु तथा त्वयि

35 सूत उवाच

इत् यर्चितो ऽभिष्टु तश् च मुनिना सूक्तया गिरा

तमाह भगवाञ् छर्वः शर्वया चाभि नन्दितः

36 कामो महर्षे सर्वो ऽयम् भक्तिमाम्स् त्वम् अधोक्षजे

आकल्पान् ताद् यशः पुण्यम् अज राम रता तथा

37 ज्ञानम् त्रै कालिकम् ब्रह्मन् विज्ञानम् च विरक्ति मत्

ब्रह्म वर्चस्विनो भूयात् पुराणा चार्य तास्तु ते

38 सूत उवाच

एवम् वरान् स मुनये दत् त्वागात् त्र्यक्ष ईश्वर:

देव्यै तत् कर्म कथयन् अनुभूतम् पुरा मुना

39 सो ऽप्य वाप्त महा योग महिमा भार्ग वोत्तम:

विचरत् यधुनाप् यद्धा हरावे कान्त ताम् गत:

40 अनुवर्णितम् एतत् ते मार्कण्डे यस्य धीमत:

अनुभूतम् भगवतो माया वैभवम् अद्भुतम्

41 एतत् केचिद् अविद्वाम्सो माया सम्सृतिम् आत्मन:

अनाद्या वर्तितम् न्रॄणाम् कादा चित्कम् प्रचक्षते

42 य एव मेतद् भृगुवर्य वर्णितम् रथाङ्ग पाणे: अनुभाव भावितम्

सम्श्राव येत् सम् शृणुयादु तावुभौ तयोर् न कर्माशय सम्सृतिर् भवेत्

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

द्वादश स्कन्दे दशमो ऽध्याय :॥

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ द्वादश स्कन्द: एका दशो ऽध्याय :

स्कन्द- 12: अध्याय- 11

01 श्री शौनक उवाच

अथेमम् अर्थम् पृच्छामो भवन्तम् बहु वित्तमम्

समस्त तन्त्र राद् धान्ते भवान् भागवत तत्त्व वित्

02 तान्त्रिकाः परिचर् यायाम् केवलस्य श्रियः पतेः

अङ्गो पाङ्गा युधा कल्पम् कल्पयन्ति यथा च यैः

03 तन्नो वर्णय भद्रम् ते क्रिया योगम् बुभुत् सताम्

येन क्रिया नै पुणेन मर्त्यो यायाद् अमर्त्यताम्

04 सूत उवाच

नमस् कृत्य गुरून् वक्ष्ये विभूतीर् वैष्णवीर् अपि

याः प्रोक्ता वेद तन्त्राभ्याम् आचार्यैः पद्म जादिभिः

05 मायाद् यैर् नव भिस् तत् त्वैः स विकार मयो विराट्

निर्मितो दृश्यते यत्र सचित्के भुवन त्रयम्

06 एतद् वै पौरुषम् रूपम् भूः पादौ द्यौः शिरो नभः

नाभिः सूर्यो ऽक्षिणी नासे वायुः कर्णौ दिशः प्रभोः

07 प्रजापतिः प्रजननम् अपानो मृत्युर् ईशितुः

तद् बाहवो लोक पाला मनश् चन्द्रो भ्रुवौ यमः

08 लज्जोत्तरो ऽधरो लोभो दन्ता ज्योत्स्ना स्मयो भ्रमः

रोमाणि भूरुहा भूम्नो मेघाः पुरुष मूर्धजाः

09 यावानयम् वै पुरुषो यावत्या सम्स्थया मितः

तावान् असावपि महा पुरुषो लोक सम्स्थया

10 कौस्तुभ व्यप देशेन स्वात्म ज्योतिर् बिभर्त् यजः

तत् प्रभा व्यापिनी साक्षात् श्रीवत्सम् उरसा विभुः

11 स्व मायाम् वन मालाख्याम् नाना गुणमयीम् दधत्

वासश् छन्दो मयम् पीतम् ब्रह्म सूत्रम् त्रिवृत् स्वरम्

12 बिभर्ति साङ्ख्यम् योगम् च देवो मकर कुण्डले

मौलिम् पदम् पार मेष्ठ्यम् सर्व लोका भयङ्करम्

13 अव्याकृतम् अनन्ताख्यम् आसनम् यद् अधिष्ठितः

धर्म ज्ञानादिभिर् युक्तम् सत्त्वम् पद्म मिहोच्यते

14 ओजः सहो बल युतम् मुख्य तत्त्वम् गदाम् दधत्

अपाम् तत्त्वम् दरवरम् तेजस् तत्त्वम् सुदर्शनम्

15 नभो निभम् नभस् तत्त्वम् असिम् चर्म तमो मयम्

काल रूपम् धनुः शार्ङ्गम् तथा कर्म मयेषुधिम्

16 इन्द्रियाणि शरान् आहुः आकूती रस्य स्यन्दनम्

तन् मात्राण् यस्या भिव् यक्तिम् मुद्र यार्थ क्रियात् मताम्

17 मण्डलम् देव यजनम् दीक्षा सम्स्कार आत्मनः

परिचर्या भगवत आत्मनो दुरित क्षयः

18 भगवान् भग शब्दार्थम् लीला कमलम् उद्वहन्

धर्मम् यशश् च भगवान् चामर व्यजने ऽभजत्

19 आत पत्रम् तु वैकुण्ठम् द्विजा धामा कुतो भयम्

त्रिवृद् वेदः सुपर्णाख्यो यज्ञम् वहति पूरुषम्

20 अनपायिनी भगवती श्रीः साक्षाद् आत्मनो हरेः

विष्वक्षेनस् तन्त्र मूर्तिः विदितः पार्षदा धिपः

नन्दादयो ऽष्टौ द्वाः स्थाश् च ते ऽणिमाद्या हरेर् गुणाः

21 वासुदेवः सङ्कर्षणः प्रद्युम्नः पुरुषः स्वयम्

अनिरुद्ध इति ब्रह्मन् मूर्ति व्यूहो ऽभि धीयते

22 स विश्वस् तैज सः प्राज्ञः तुरीय इति वृत्तिभिः

अर्थेन्द्रियाश यज्ञानैर् भगवान् परि भाव्यते

23 अङ्गो पाङ्गा युधा कल्पैः भगवाम्स् तच् चतुष्टयम्

बिभर्ति स्म चतुर् मूर्तिः भगवान् हरिर् ईश्वरः

24 द्विज ऋषभ स एष ब्रह्मयोनिः स्वयम् दृक्

स्व महिम परिपूर्णो मायया च स्वयै तत्

सृजति हरति पातीत् याख्यया ना वृताक्षो

विवृत इव निरुक्तः तत् परैर् आत्म लभ्यः

25 श्री कृष्ण कृष्ण सख वृष्णि ऋषभा वनिध्रुग्

राजन् य वम्श दहना अनप वर्ग वीर्य

गोविन्द गोप वनिता व्रज भृत्य गीत

तीर्थ श्रवः श्रवण मङ्गळ पाहि भृत्यान्

26 य इदम् कल्य उत्थाय महा पुरुष लक्षणम्

तच् चित्तः प्रयतो जप्त्वा ब्रह्म वेद गुहाशयम्

27 श्री शौनक उवाच

शुको यदाह भगवान् विष्णु राताय शृण्वते

सौरो गणो मासि मासि नाना वसति सप्तकः

28 तेषाम् नामानि कर्माणि सम्युक्तानाम् अधीश्वरैः

ब्रूहि नः श्रद्द धानानाम् व्यूहम् सूर्यात्मनो हरेः

29 सूत उवाच

अनाद्य विद्यया विष्णोः आत्मनः सर्व देहिनाम्

निर्मितो लोक तन्त्रो ऽयम् लोकेषु परि वर्तते

30 एक एव हि लोकानाम् सूर्य आत्मा दिकृद् हरिः

सर्व वेद क्रिया मूलम् ऋषिभिः बहुधो दितः

31 कालो देशः क्रिया कर्ता करणम् कार्यम् आगमः

द्रव्यम् फलम् इति ब्रह्मन् नव धोक्तो ऽजया हरिः

32 मध् वादिषु द्वाद शसु भगवान् काल रूप धृक्

लोक तन्त्राय चरति पृथग् द्वा दश भिर्गणैः

33 धाता कृतस्थ ली हेतिः वासुकी रथ कृन्मुने

पुलस्त्यस् तुम्बुरु रिति मधु मासम् नयन्त्यमी

34 अर्यमा पुलहो ऽथौजाः प्रहेतिः पुञ्जिकस् थली

नारदः कच्छ नीरश् च नयन्त् येते स्म माधवम्

35 मित्रो ऽत्रिः पौरुषे यो ऽथ तक्षको मेनका हहाः

रथस्वन इति ह्येते शुक्र मासम् नयन्त् यमी

36 वसिष्ठो वरुणो रम्भा सह जन्यस् तथा हुहूः

शुक्रश् चित्रस् वनश् चैव शुचि मासम् नयन्त् यमी

37 इन्द्रो विश्वा वसुः श्रोता एला पत्रस् तथाङ्गिराः

प्रम्लोचा राक्षसो वर्यो नभो मासम् नयन्त् यमी

38 विवस्वान् उग्रसेनश् च व्याघ्र आसारणो भृगुः

अनुम् लोचा शङ्ख पालो नभस् याख्यम् नयन्त् यमी

39 पूषा धनञ्जयो वातः सुषेणः सुरुचिस् तथा

घृताची गौतमश् चेति तपो मासम् नयन्त् यमी

40 क्रतुर् वर्चा भरद्वाजः पर्जन्यः सेनजित् तथा

विश्व ऐरावतश् चैव तपस् याख्यम् नयन्त् यमी

41 अथाम्शुः कश्यपस् तार्क्ष्य ऋत सेनस् तथ् ओर्वशी

विद्युच् छत्रुर् महा शङ्खः सहोमासम् नयन्त् यमी

42 भगः स्फूर्जो ऽरिष्ट नेमिः ऊर्ण आयुश् च पञ्चमः

कर्कोटकः पूर्व चित्तिः पुष्य मासम् नयन्त् यमी

43 त्वष्टा ऋचीक तनयः कम्बलश् च तिलोत्तमा

ब्रह्मा पेतो ऽथ सतजिद् धृत राष्ट्र इषम्भराः

44 विष्णुर् अश्वतरो रम्भा सूर्य वर्चाश् च सत्यजित्

विश्वामित्रो मखा पेत ऊर्ज मासम् नयन्त् यमी

45 एता भगवतो विष्णोः आदित् यस्य विभूतयः

स्मरताम् सन्ध्ययोर् न्ऋृणाम् हरन्त्यम् हो दिने दिने

46 द्वादशस् वपि मासेषु देवो ऽसौ षड् भिरस्य वै

चरन् समन्तात् तनुते परत्रे ह च सन्मतिम्

47 सामर्ग्य जुर्भिस् तल् लिङ्गैः ऋषयः सम्स् तुवन्त् यमुम्

गन्धर् वास्तम् प्रगायन्ति नृत्यन्त् यप्सरसो ऽग्रतः

48 उन्नह्यन्ति रथम् नागा ग्रामण्यो रथ योजकाः

चोदयन्ति रथम् पृष्ठे नैर् ऋता बल शालिनः

49 वालखिल्याः सहस्राणि षष्टिर् ब्रह्म ऋषयू ऽमलाः

पुरतो ऽभि मुखम् यान्ति स्तुवन्ति स्तुति भिर् विभुम्

50 एवम् हि अनादि निधनो भगवान् हरिर् ईश्वर:

कल्पे कल्पे स्वम् आत्मानम् व्यूहय लोकान् अवत्यज:

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

द्वादश स्कन्दे एका दशो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ द्वादश स्कन्द: द्वा दशो ऽध्याय :

स्कन्द- 12: अध्याय- 12

01 सूत उवाच

नमो धर्माय महते नम: कृष्णाय वेधसे

ब्रह्मणेभ्यो नमस् कृत्य धर्मान् वक्ष्ये सनातनान्

02 एतद्व: कथितम् विप्रा विष्णोश् चरितम् अद्भुतम्

भवद्भिर् यदहम् पृष्टो नराणाम् पुरुषो चितम्

03 अत्र सङ्कीर्तित: साक्षात् सर्व पाप हरो हरि:

नारायणो हृषीकेशो भगवान् सात्वताम् पति:

04 अत्र ब्रह्म परम् गुह्यम् जगत: प्रभ वाप्ययम्

ज्ञानम् च तद् उपाख्यानम् प्रोक्तम् विज्ञान सम्युतम्

05 भक्ति योग: समाख्यातो वैराग्यम् च तद् आश्रयम्

पारीक्षितम् उपाख्यानम् नारदाख् यानम् एव च

06 प्रायोप वेशो राजर्षे: विप्र शापात् परीक्षित:

शुकस्य ब्रह्म ऋषभस् य सम्वादश् च परीक्षित:

07 योग धारणयोत् क्रान्ति: सम्वादो नारदा जयो:

अवतारानु गीतम् च सर्गः प्राधानि को ऽग्रतः

08 विदुरोद्धव सम्वादः क्षत्तृ मैत्रेय योस् ततः

पुराण सम्हिता प्रश्नो महा पुरुष सम्स्थितिः

09 ततः प्राकृतिकः सर्गः सप्त वैकृति काश् च ये

ततो ब्रह्माण्ड सम्भूतिः वैराजः पुरुषो यतः

10 कालस्य स्थूल सूक्ष्मस्य गतिः पद्म समुद् भवः

भुव उद्धरणे ऽम्भोधेः हिरण्याक्ष वधो यथा

11 ऊर्ध्व तिर्यग् अवाक् सर्गो रुद्र सर्गस् त थैव च

अर्धनारी नरस्याथ यतः स्वायम्भुवो मनुः

12 शतरूपा च या स्त्रीणाम् आद्या प्रकृतिर् उत्तमा

सन्तानो धर्म पत्नीनाम् कर्दमस्य प्रजापतेः

13 अवतारो भगवतः कपिलस्य महात्मनः

देवहूत् याश् च सम्वादः कपिलेन च धीमता

14 नव ब्रह्म समुत् पत्तिः दक्ष यज्ञ विनाशनम्

ध्रुवस्य चरितम् पश्चात् पृथोः प्राचीन बर्हिषः

15 नारदस्य च सम्वादः ततः प्रैय व्रतम् द्विजाः

नाभेस् ततो ऽनु चरितम् ऋषभस्य भरतस्य च

16 द्वीप वर्ष समुद्राणाम् गिरिनद् युप वर्णनम्

ज्योतिश् चक्रस्य सम्स्थानम् पाताल नरकस् थितिः

17 दक्ष जन्म प्रचेतोभ्यः तत् पुत्रीणाम् च सन्ततिः

यतो देव् आसुर नराः तिर्यङ् नग खगा दयः

18 त्वाष्ट्रस्य जन्म निधनम् पुत्रयोश् च दितेर् द्विजाः

दैत्येश् वरस्य चरितम् प्रह्लादस्य महात्मनः

19 मन्वन्तरानु कथनम् गजेन्द्रस् य विमोक्षणम्

मन्वन्तर् आवताराश् च विष्णोर् हय शिरादयः

20 कौर्मम् धान्वन्तरम् मात्स्यम् वामनम् च जगत् पतेः

क्षीरोद मथनम् तद् वद् अमृतार्थे दिवौ कसाम्

21 देव् आसुर महा युद्धम् राज वम्शानु कीर्तनम्

इक्ष्वाकु जन्म तद् वम्श: सुद्युम्नस् य महात्मन:

22 इलो पाख्यानम् अत्रोक्तम् तारो पाख्यानम् एव च

सूर्य वम्शानु कथनम् शशा दाद्या नृगादय:

23 सौकन्यम् चाथ शर्याते: ककुत्स् थस्य च धीमत:

खट्वाङ्गस्य च मान्धातु: सौभरे: सगरस्य च

24 रामस्य कोशलेन् द्रस्य चरितम् किल्बिषापहम्

निमेर् अङ्ग परि त्यागो जनकानाम् च सम्भव:

25 रामस्य भार्गवेन् द्रस्य नि: क्षत्र करणम् भुव:

ऐलस्य सोम वम्शस्य ययातेर् नहुषस् य च

26 दौष्यन्तेर् भरतस् यापि शान्तनोस् तत् सुतस् य च

ययातेर् ज्येष्ठ पुत्रस्य यदोर् वम्शो ऽनु कीर्तित:

27 यत्राव तीर्णो भगवान् कृष्णाख्यो जगद् ईश्वर:

वसुदेव गृहे जन्म ततो वृद्धिश् च गोकुले

28 तस्य कर्माणि अपाराणि कीर्तितान् यसुर द्विष:

पूतनासु पय: पानम् शकटोच् चाटनम् शिशो:

29 तृणा वर्तस्य निष्पेष: त थैव बकवत् सयो:

30 धेनुकस्य सह भ्रातु: प्रलम्बस्य च सङ्क्षय:

गोपानाम् च परित्राणम् दावाग्ने: परि सर्पत:

31 दमनम् कालियस् याहे: महाहेर् नन्द मोक्षणम्

व्रत चर्या तु कन्यानाम् यत्र तुष्टो ऽच्युतो व्रतै:

32 प्रसादो यज्ञ पत्नीभ्यो विप्राणाम् चानु तापनम्

गोवर्धनो [उ]द्धारणम् च शक्रस्य सुरभेरथ

33 यज्ञभिषेक: कृष्ण स्य स्त्रीभि: क्रीडा च रात्रिषु

शङ्ख चूडस्य दुर्बुद्धे: वधो ऽरिष्टस् य केशिन:

34 अक्रूर् आगमनम् पश्चात् प्रस्थानम् राम कृष्ण योः
व्रज स्त्रीणाम् विलापश् च मथुरा लोकनम् ततः
35 गज मुष्टिक चाणूर कम्सा दीनाम् च यो वधः
मृतस्या नयनम् सूनोः पुनः सान्दीपनेर् गुरोः
36 मथुरायाम् निव सता यदु चक्रस्य यत् प्रियम्
कृतम् उद्धव रामाभ्याम् युतेन हरिणा द्विजाः
37 जरासन्ध समानीत सैन्यस्य बहुशो वधः
घातनम् यवनेन् द्रस्य कुशस् थल्या निवेशनम्
38 आदानम् पारिजातस् य सुधर्मा याः सुरालयात्
रुक्मिण्या हरणम् युद्धे प्रमथ्य द्विषतो हरेः
39 हरस्य जृम्भणम् युद्धे बाणस्य भुज कृन्तनम्
प्राग् ज्योतिष पतिम् हत्वा कन्यानाम् हरणम् च यत्
40 चैद्य पौण्ड्रक शाल्वानाम् दन्त वक्त्रस्य दुर्मतेः
शम्बरो द्विविदः पीठो मुरः पञ्चज नादयः
41 माहात्म्यम् च वधस् तेषाम् वाराणस् याश् च दाहनम्
भाराव तरणम् भूमेः निमित्ती कृत्य पाण्डवान्
42 विप्र शापा पदे शेन सम्हारः स्व कुलस्य च
उद्धवस्य च सम्वादो वसुदेवस् य चाद्भुतः
43 यत् रात्म विद्या हयखिला प्रोक्ता धर्म विनिर्णयः
ततो मर्त्य परित्याग आत्म योगानु भावतः
44 युग लक्षण वृत्तिश् च कलौ न्रॄणाम् उपप्लवः
चतुर् विधश् च प्रलय उत्पत्तिस् त्रिविधा तथा
45 देह त्यागश् च राजर्षेः विष्णु रातस्य धीमतः
शाखा प्रणयनम् ऋषेः मार्कण्डे यस्य सत् कथा
महा पुरुष विन्यासः सूर्यस्य जगद् आत्मनः
46 इति चोक्तम् द्विज श्रेष्ठा यत् पृष्टो ऽहम् इहास्मि वः

लीलावतार कर्माणि कीर्ति तानी ह सर्वशः

47 पतितः स्खलितश् चार्तः क्षुत्त्वा वा विवशो ब्रुवन्

हरये नम इत् युच्चैः मुच्यते सर्व पातकात्

48 सङ्कीर्त्य मानो भगवान् अनन्तः श्रुतानु भावो व्यसनम् हि पुम्साम्

प्रविश्य चित्तम् विधुनोत् य शेषम् यथा तमो ऽर्को ऽभ्रमि वाति वातः

49 मृषा गिरस्ता ह्यसतीर सत् कथा न कथ्यते यद् भगवान् अधोक्षजः

तदेव सत्यम् तदु हैव मङ्गळम् तदेव पुण्यम् भगवद् गुणो दयम्

50 तदेव रम्यम् रुचिरम् नवम् नवम् तदेव शश्वन् मनसो महोत्सवम्

तदेव शोकार्णव शोषणम् नृणाम् यद् उत्तमः श्लोक यशो ऽनुगीयते

51 न तद् वचश् चित्र पदम् हरेर् यशो

जगत् पवित्रम् प्रगृणीत कर्हिचित्

तद् ध्वाङ्क्ष तीर्थम् न तु हम्स सेवितम्

यत् राच्युतस् तत्र हि साधवो ऽमलाः

52 स वाग् विसर्गो जनताघ सम्प्लवो यस्मिन् प्रति श्लोकम् अबद्ध वत् यपि

नामान् यनन्तस्य यशो ऽङ्कि तानि यत् शृण्वन्ति गायन्ति गृणन्ति साधवः

53 नैष् कर्म्यम् अप् यच्युत भाव वर्जितम्

न शोभते ज्ञानमलम् निरञ्जनम्

कुतः पुनः शश्वद् अभद्र मीश्वरे

न ह्यर्पितम् कर्म यदप् यन् उत्तमम्

54 यशः श्रिया मेव परिश्रमः परो वर्णाश्रमा चार तपः श्रुतादिषु

अविस्मृतिः श्रीधर पाद पद्मयोः गुणानु वाद श्रवणादि भिर् हरेः

55 अविस्मृतिः कृष्ण पदार विन्दयोः क्षिणोति अभद्राणि शमम् तनोति च

सत्त्वस्य शुद्धिम् परमात्म भक्तिम् ज्ञानम् च विज्ञान विराग युक्तम्

56 यूयम् द्विजाग्र्या बत भूरि भागा यच्छश् वद् आत्मन् यखिल् आत्म भूतम्

नारायणम् देवम् अदेवम् ईशम् अजस्र भावा भजतावि वेश्य

57 अहम् च सम्स्मारित आत्म तत्त्वम् श्रुतम् पुरा मे परम ऋषि वक्त्रात्

प्रायोप वेशे नृपतेः परीक्षितः सदस्यृ षीणाम् महताम् च शृण्वताम्

58 एतद्वः कथितम् विप्राः कथ नीयोरु कर्मणः

माहात्म्यम् वासुदेवस्य सर्व् आशुभ विनाशनम्

59 य एवम् श्रावयेन् नित्यम् याम क्षणम् अनन्यधीः

श्रद्धावान् यो ऽनु शृणुयात् पुनात् यात्मानम् एव सः

60 द्वा दश्याम् एका दश्याम् वा शृण्वन् आयुष्यवान् भवेत्

पठत्य नश्नन् प्रयतः ततो भवत् य पातकी

61 पुष्करे मथुरयाम् च द्वार वत्याम् यत् आत्मवान्

उपोष्य सम्हिताम् एताम् पठित्वा मुच्यते भयात्

62 देवता मुनयः सिद्धाः पितरो मनवो नृपाः

यच् छन्ति कामान् गृणतः शृण्वतो यस्य कीर्तनात्

63 ऋचो यजूम्षि सामानि द्विजो ऽधीत् यानु विन्दते

मधु कुल्या घृत कुल्याः पयः कुल्याश् च तत् फलम्

64 पुराण सम्हिताम् एताम् अधीत्य प्रयतो द्विजः

प्रोक्तम् भगवता यत्तु तत् पदम् परमम् व्रजेत्

65 विप्रो ऽधीत् याप्नुयात् प्रज्ञाम् राजन् यो दधि मेखलाम्

वैश्यो निधि पति त्वम् च शूद्रः शुध् येत पातकात्

66 कलिमल सम्हति कालनो ऽखिलेशो हरि रित रत्र न गीयते ह्यभीक्ष्णम्

इह तु पुनर् भगवान् अशेष मूर्तिः परिपठितो ऽनुपदम् कथा प्रसङ्गैः

67 तमह मजम् अनन्तम् आत्म तत्त्वम् जगद् उदयस् थिति सम्यम् आत्म शक्तिम्

द्युपतिभिर् अज शक्र शङ्करादयैर् दुरवसितस् तवम् अच्युतम् नतो ऽस्मि

68 उपचित नव शक्तिभिः स्व आत्मनि उपरचितस् थिर जङ्ग मालयाय

भगवत उपलब्धि मात्र धम्ने सुर ऋषभाय नमः सनातनाय

69 स्व सुख निभृत चेताः तद् व्युदस् तान्य भावो ऽपि

अजित रुचिर लीला कृष्ट सारस् तदीयम्

व्यतनुत कृपया यः तत्त्व दीपम् पुराणम्

तम् अखिल वृजि नघ्नम् व्यास सूनुम् नतो ऽस्मि

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

द्वादश स्कन्दे द्वा दशो ऽध्याय :||

श्री हरये नम: श्री हरये नम: श्री हरये नम: गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

अथ द्वादश स्कन्द: त्रयो दशो ऽध्याय :

स्कन्द- *12:* अध्याय- *13*

*01* सूत उवाच

यम् ब्रह्मा वरुणेन्द्र रुद्र मरुत: स्तुन् वन्ति दिव्यै: स्तवै:

वेदै: साङ्ग पद क्रमोप निषदै: गायन्ति यम् सामगा:

ध्याना वस्थित तद् गतेन मनसा पश्यन्ति यम् योगिनो

यस्यान्तम् न विदु: सुरासुर गणा देवाय तस्मै नम:

*02* पृष्ठे भ्राम्यद् अमन्द मन्दर गिरि ग्रावाग्र कण्डूयनात्

निद्रालो: कमठा कृतेर् भगवत: श्वासा निला: पान्तु व:

यत् सम्स्कार कलानु वर्त नवशाद् वेलानि भेनाम्भ साम्

याता यातम् अतन्द्रितम् जलनिधे: नाद्यापि विश्राम्यति

*03* पुराण सङ्ख्या सम्भूतिम् अस्य वाच्य प्रयोजने

दानम् दानस्य माहात्म्यम् पाठादेश् च निबोधत

*04* ब्राह्मम् दश सहस्राणि पाद्मम् पञ्चो न षष्टि च

श्री वैष्णवम् त्रयो विम्शत् चतुर् विम्शति शैवकम्

*05* दशाष्टौ श्री भागवतम् नारदम् पञ्च विम्शति

मार्कण्डम् नव वाहनम् च दश पञ्च चतु: शतम्

06 चतुर् दश भविष्यम् स्यात् तथा पञ्च शतानि च
दशाष्टौ ब्रह्म वै वर्तम् लिङ्गम् एकाद शैव तु

07 चतुर् विम्शति वाराहम् एकाशीति सहस्रकम्
स्कान्दम् शतम् तथा चैकम् वामनम् दश कीर्तितम्

08 कौर्मम् सप्त दशा ख्यातम् मात्स्यम् तत्तु चतुर् दश
एकोन विम्शत् सौपर्णम् ब्रह्माण्डम् द्वाद शैव तु

09 एवम् पुराण सन्दोहः चतुर् लक्ष उदाहृतः
तत् राष्ट दश साहस्रम् श्री भागवतम् इष्यते

10 इदम् भगवता पूर्वम् ब्रह्मणे नाभि पङ्कजे
स्थिताय भव भीताय कारुण्यात् सम् प्रकाशितम्

11 आदि मध्याव सानेषु वैराग् याख्यान सम्युतम्
हरि लीला कथा व्राताम् ऋता नन्दित सत् सुरम्

12 सर्व वेदान्त सारम् यद् ब्रह्मात्मै कत्व लक्षणम्
वस्त्व द्वितीयम् तन् निष्ठम् कैवल्यैक प्रयोजनम्

13 प्रौष्ठ पद्याम् पौर्ण मास्याम् हेम सिम्ह समन्वितम्
ददाति यो भागवतम् स याति परमाम् गतिम्

14 राजन् ते तावद् अन्यानि पुराणानि सताम् गणे
यावन् न द्रुश्यते साक्षत् श्रीमत् भागवतम् परम्

15 सर्व वेदान्त सारम् हि श्री भागवतम् इष्यते
तद् रसामृत तृप्तस्य नान् यत्र स्याद् रतिः क्वचित्

16 निम्न गानाम् यथा गङ्गा देवानाम् अच्युतो यथा
वैष्णवानाम् यथा शम्भुः पुराणानाम् इदम् तथा

17 क्षेत्राणाम् चैव सर्वेषाम् यथा काशी ह्यनुत् तमा
तथा पुराण व्रातानाम् श्रीमद् भागवतम् द्विजाः

18 श्रीमद् भागवतम् पुराणम् अमलम् यद् वैष्णवानाम् प्रियम्
यस्मिन् पारम हम्स्य मेकम् अमलम् ज्ञानम् परम् गीयते

तत्र ज्ञान विराग भक्ति सहितम् नैष्कर्म्य माविष्क्रुतम्

तच् छृण्वन् विपठन् विचारण परो भक्त्या विमुच्येन् नरः

19 कस्मै येन विभासितो ऽयमतुलो ज्ञान प्रदीपः पुरा

तद् रूपेण च नारदाय मुनये कृष्णाय तद् रूपिणा

योगीन्द्राय तद् आत्मना थ भगवद् राताय कारुण्य तः

तच् छुद्धम् विमलम् विशोकम् अमृतम् सत्यम् परम् धीमहि

20 नमस् तस्मै भगवते वासुदेवाय साक्षिणे

य इदम् कृपया कस्मै व्याच चक्षे मुमुक्षवे

21 योगीन्द्राय नमस् तस्मै शुकाय ब्रह्म रूपिणे

सम्सार सर्प दष्टम् यो विष्णुरातम् अमू मुचत्

22 भवे भवे यथा भक्तिः पादयोस् तव जायते

तथा कुरुष्व देवेश नाथस् त्वम् नो यतः प्रभो

23 नाम सङ्कीर्तनम् यस्य सर्व पाप प्रणाशनम्

प्रणामो दुःख शमनः तम् नमामि हरिम् परम्

|| ओम् तत् सत् ||

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆

इति श्रीमद् भागवते महा पुराणे पारम हम्स्याम् सम्हिदायाम्

द्वादश स्कन्दे त्रयो दशो ऽध्याय :|| श्रीमद् भागवतम् सम्पूर्णम्

श्री हरये नमः श्री हरये नमः श्री हरये नमः गोपिका जीवन स्मरणम्-

गोविन्दा गोविन्दा ; सद् गुरुनात महराज्कि - जय्

♫ हरे राम हरे राम राम राम हरे हरे !

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे !! ♫

☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆ ☆ ✡ ☆